Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भगवत्पतञ्जलिविरचितं

व्याकरणमहाभाष्यम्

मूलमात्रम्

सम्पादकः
डॉ. आत्मदेवमिश्रः

चौखम्बा सुरभारती प्रकाशन
वाराणसी

CC-0. Gurukul Kangri Collection, Haridwar

400
मिश्रा-व
Digitized by Arya Samaj Foundation Chennai and eGangotri
R
147341

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः ॥
चौखम्बा सुरभारती ग्रन्थमाला
464

श्रीमद्भगवत्पतञ्जलिविरचितं

व्याकरणमहाभाष्यम्

मूलमात्रम्

(द्वितीयाध्यायात्मकम्)

पुस्तकालय
147341
गुरुकुल कांगड़ी विश्वविद्यालय

सम्पादकः
डॉ० आत्मदेवमिश्रः

147341

चौखम्बा सुरभारती प्रकाशन
वाराणसी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

© **सर्वाधिकार सुरक्षित।** इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण, या किसी भी विधि (जैसे - इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉडिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, प्रकाशक की पूर्वलिखित अनुमति के बिना नही किया जा सकता है।

ISBN : 978-93-80326-24-5 (प्रथम भाग)
978-93-80326-25-2 (द्वितीय भाग)
978-93-80326-26-9 (सेट)

R
400
मिश्र - व

प्रकाशक :

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के-37/117 गोपाल मंदिर लेन, पोस्ट बॉक्स न. 1129
वाराणसी-221001
दूरभाष : (0542) 2335263

© सर्वाधिकार प्रकाशकाधीन

प्रथम संस्करण : 2010
मूल्य : 2000.00 (1-2 भाग सम्पूर्ण)

अन्य प्राप्तिस्थान :

चौखम्बा पब्लिशिंग हाऊस

4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली न. 21-ए, अंसारी रोड़, दरियागंज
नई दिल्ली - 110002
दूरभाषः (011) 32996391, टेलीफैक्सः (011) 23286537

*

चौखम्बा संस्कृत प्रतिष्ठान

38. यू. ए. बंग्लो रोड़, जवाहर नगर,
पोस्ट बॉक्स न. 2113, दिल्ली - 110007

*

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पोस्ट बॉक्स न. 1069, वाराणसी-221001

मुद्रक

डीलक्स ऑफसेट प्रिंटर्स, दिल्ली

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तावना

इह खलु लोकव्यवहारनिर्वहणार्थं भाषैव जुषते प्रधानभावम्। अन्तरेण भाषां लोका न प्रभवन्ति नैजमाशयं प्रकाशयितुम्। अप्रकाशयन्तश्चाशयं कथमिव ते पारयेयुः किञ्चिदनुष्ठातुम्। किञ्चिदनुष्ठातुमशक्नुवतां तेषां कृते सकलं जगदेवान्धकारमयम्भवेत्। अतएव स्पष्टमाचष्ट तत्रभवान् आचार्यप्रवरो दण्डिमहाभागः—

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। इति।

भाषयापि तया पुनः सुसंस्कृतया भवितव्यम् परत्राशयं सङ्क्रमयितुम्। सुसंस्कृता भाषा च शब्दसाधुत्वमपेक्षते। साधुशब्दा हि प्रयुज्यमाना यथार्थमर्थमर्पयन्ति नासाधुशब्दाः। साधुशब्दप्रयोगे तु व्याकरणाध्ययनं हि प्रधानं प्रयोजकम्। न हि व्याकरणज्ञानरहितः साधुशब्दान् प्रयोक्तुं क्षमः। उक्तञ्च रामायणे—

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।।

इत्यनेन हनुमतो वाग्व्यापारेण तस्य व्याकरणपारङ्गतत्वं ध्वनितं भवति। तदेवं व्याकरणच्युतिपरिहाराय व्याकरणस्याध्ययनं नितरामावश्यकम्। नाऽवैय्याकरणः साधुशब्दप्रयोगे क्षमः, पद्यमिदमित्यपि च सूचयति। आलङ्कारिका अपि च्युतिसंस्कारत्वाख्यं काव्यदोषमाचक्षाणास्तत्परिहाराय व्याकरणाध्ययनस्यावश्यकत्वमपूपुषन्। आचार्यो वेङ्कटाध्वरोऽपि अमुमेवार्थं विशदयति स्वकीये पद्ये निम्नाङ्किते—

अस्वीकृतव्याकरणौषधानामपाटवं वाचि सुगाढमास्ते।
कस्मिंश्चिदुक्ते तु पदं कथञ्चित् स्वैरं वपुः स्विद्यति वेपते च।।

तदित्थं व्याकरणस्य परममहत्त्वमुपपादितमाचार्यैरिति।

व्याकरणस्य च पुनः प्रकृतिप्रत्ययाद्यनुशासनेन पदस्वरूपनिर्णयाय तदर्थनिर्धारणाय च परमोपयोगः। न हि व्याकरणमन्तरा पदपदार्थावबोधः सम्यक् शक्यते सम्भवितुम्। व्याकरणस्य प्रयोजनजातमुद्दिश्य आचार्यो वररुचिरप्याह वार्त्तिकमुखेन—'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति। तान्येतानि प्रयोजनान्तराण्यपि भगवत्पतञ्जलिमुनिपादैः प्रपञ्चितानि महाभाष्ये पस्पशाह्निके। 'रक्षार्थं वेदानामध्येयम् व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति वेदार्थञ्चाध्यवस्यति। ऊहः खल्वपि—न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदमन्त्रा निगदिताः ते चावश्यं यज्ञगतेन विपरिणमयितव्याः। तान्नावैय्याकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।' तत्र रक्षोहादीनि तु प्रमुखानि प्रयोजनानि, आनुषङ्गिकानि चेतराणि। एवं बहूनि व्याकरणस्य प्रयोजनानि प्रदर्शितानि, विशेषावगतिकुतूहलिभिस्तु तानि तत्रैवानुसन्धेयानि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेतच्च किल व्याकरणं 'वृद्धिरादैच्' (1.1.1) इत्यारभ्य 'अ अ' इत्यन्तमष्टाध्यायात्मकं शब्दशास्त्रं पाणिनिमुनिभगवत्पादैरुपनिबद्धम्। तत्र कात्यायनेन मुनिना वार्त्तिकमुपन्यस्तम्। तद्वार्त्तिकोपरि भगवत्पतञ्जलिमुनिपादैः महाभाष्यमारचितम्। तदेतत्त्रिमुनि व्याकरणं वेदाङ्गत्वेन प्रख्यायते। व्याकरणान्तराणि तु वेदाङ्गत्वेन नोन्नीयन्ते। कुतः? तेषां लौकिकप्रयोगावबोध-मात्रपर्यवसानात्।

व्याकरणस्य भेदाः

तानीमानि पुनर्व्याकरणानि नव सन्ति, इति लघु-त्रिमुनि-कल्पतरुकारलेखेनानुमीयते—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।

अन्ये तु व्याकरणानामष्टकत्वमेव निरूपयन्ति। तद्यथा भविष्यपुराणे ब्राह्मे पर्वणि प्रथमाध्याये—

प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।
सावित्रं तथा प्रोक्तमष्टमं वैष्णवं तथा।। इत्यादि।

परं वस्तुतस्तु ऐन्द्र-काशकृत्स्न-आपिशलि-शाकटायन-पाणिनिकृतं व्याकरणञ्चेति पञ्चकमेव प्राचीनतमं व्याकरणम्।

पाणिनीयव्याकरणम्

व्याकरणं हि नाम वेदाङ्गेषु प्रधानतममङ्गमिति न तिरोहितं विदुषाम्। सर्वेष्वपि व्याकरणेषु पाणिनीयतन्त्रस्यैव लौकिकवैदिकोभयप्रक्रियालङ्कृतत्वाद् वेदाङ्गत्वं नेतरेषाम्। तदिदं पाणिनीयव्या-करणमष्टभिरध्यायैर्गुम्फितत्वादष्टाध्यायीति पदेनापि परिभाष्यते।

स एष पाणिनिमुनिः अक्षरसमाम्नायादारभ्य लोकवेदोभयपथा सञ्चरमाणः किमपि व्याकरणान्तरविलक्षणं तन्त्रं प्रणिनाय। यस्मिन् पथि पाणिनेः प्राङ् न कोऽपि आचार्यः सञ्चचार। इति हेतोरेव पाणिन्युपज्ञं व्याकरणमिति व्यपदेशो लब्धावकाशः। एष एव पाणिनिव्याकरणस्य व्याकरणान्तरेभ्यो विशेषः।

अस्मिन् सर्वाङ्गरमणीये पाणिनीये विद्यमाने सति व्याकरणान्तरेषु विद्वांसः कथमिव बद्धादरा भवेयुरिति तानि प्रचारवैरल्यात् सहजगत्या विस्मृतिपथङ्गतानि। अत एव वेङ्कटाध्वरो व्याकरणान्तरापेक्षया पाणिनीयव्याकरणस्य समादरणे बीजमुपोद्बलयति—'पाणिनिव्याकरणमेव प्रायेणौपाधिकप्रतीतिकारणमिति।' अतएव तत्र कृतधियामादरः। वैदिकशब्दानतिरिच्य लौकिकेष्वपि शब्देषु पाणिनिव्याकरणमेव प्रकृष्टतमं व्यवस्थापकत्वमलङ्करोति। तद्यथा—'शताच्च ठन्यतावशते' इति पाणिनीयविधिमालम्ब्य 'शतिक' इति रूपं भवति, आपिशलि-काशकृत्स्नाभ्यां 'शताच्च ठन्यतावग्रन्थे' इति सूत्रकरणात् शत्य इति रूपम्। तत्र पाणिन्यनुगृहीतः शब्दः साधुरुतान्यानुगृहीत इत्युदेति विप्रतिपत्तिः। तत्र—'नियतकालाश्च स्मृतयो व्यवस्थाहेतवः' इति 'मुनित्रयमतेनाद्यत्वे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साध्वसाधु प्रविभागः' इति कैय्यटमहाभागेनाभ्यधायि समाधानम्। 'यथोत्तरं मुनीनां प्रामाण्य'-मिति वचनादपि च पाणिनीयस्यैव प्रमुखं प्रामाण्यमभ्युपेयम्भवति। तथा च यथोत्तरमिति प्रतीकमुपादाय उत्तरोत्तरस्य बहुलक्ष्यदर्शितत्वादिति हेतुरपि प्रामाण्येनोपन्यस्तः। एतेनापि पाणिनीयस्यैवादरास्पदत्वं ध्वनितम्भवति। इदमत्र प्रतिपत्तव्यम्, स्वकाले प्रयुक्तानेव शब्दान् लक्ष्यीकृत्यैव पाणिनिः स्वकीयं व्याकरणं प्रणिनाय। तदनु कांश्चिद्विपर्यस्तान् शब्दान् स्वकाले प्रयुक्तानुद्दिश्य कात्यायनो वार्त्तिकान् रचयामास। एवमेव तदनु च भगवान् पतञ्जलिरपि पूर्व-दृष्टान् शब्दान् साक्षात्कृत्य तदनुगुणं भाष्यं निर्ममे। तदेभिस्त्रिमुनिभिः प्रवर्त्तितत्वादेव त्रिमुनि व्याकरणमिति वैय्याकरणव्यवहारः। सत्येतस्मिन् व्यतिकरेऽपि व्याकरणस्य पाणिन्युपज्ञत्वन्तु किलाव्याहतमेवेति। विलसति च लोकवेदोभयशब्दानुशासनपरत्वात् पाणिनीयमेवाखिलव्याकरण-राशिशिरोरत्नायमानमिति। अपि च—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।

इति सूत्रलक्षणं यथा सङ्घाघटीति पाणिनीयसूत्रेषु न तथा क्वचिदन्यत्र। अस्य सूत्राणि अल्पाक्षराणि, सूत्रगतपदानाञ्च सूत्रान्तरेष्वनुवृत्तिः। न तु प्रतिसूत्रमनुवृत्तिपदप्रयोगः। संज्ञाश्चापि इत्-कृत्-षट्-लुक्-श्लु-घ-वि-घु-टि-भ—इत्येवंविधाः प्रायशः एकाक्षरा अल्पाक्षरा वा प्रणिबद्धाः। किञ्च यद्यच्छास्त्रमसिद्धत्वात् कार्यान्तरप्रयोजकं तन्निवर्त्तकं वा तत्तच्छास्त्रमसि-द्धकाण्डे पठितम्। यस्य च परत्वेन प्राबल्यमभिप्रेतं तत्परस्तादुट्टङ्कितम्। अहो नु खलु बुद्धिवैलक्षण्यं पाणिनेः। इत्थं पाणिनीयव्याकरणस्योत्कर्षाधायकानि गणनातीतानि तत्त्वानि। नात्र विस्तरभिया तानि निरूपयितुमुत्सहामहे। सोऽयं व्याकरणमार्त्तण्डमण्डलाखण्डलपदवी-मारूढः यशःशरीरेण वर्त्तमानोऽद्यापि कस्य चक्षुष्मतो हृदयानन्दममन्दं नोपजनयति।

महर्षिः पाणिनिः

संस्कृतव्याकरणशास्त्रेतिहासाऽऽलोडने कृते ऐन्द्रचान्द्रकाशकृत्स्नाऽऽपिशलादिप्रामुख्य-म्भजमानेषु व्याकरणेषु रत्नायमानं साङ्गोपाङ्गं पाणिनीयमेव व्याकरणं समुपलभ्यते। संस्कृतवाङ्-मयस्याऽनुपमरत्नस्वरूपमिदं व्याकरणमित्यत्र नाऽस्ति सन्देहलेशोऽपि। पूर्वप्रोक्तेषु व्याकरणेषु सम्पूर्णस्य शब्दजातस्य व्युत्पत्तिसामर्थ्यमनवलोक्य महामुनिः पाणिनिर्लौकिकच्छान्दसोभ-यविधप्रयोगसाधनार्थं महेश्वरप्रसादलब्धौजसा 'अष्टाध्यायी'ग्रन्थं प्रणिनाय।

ग्रन्थोऽयं गीर्वाणवाण्याः प्राचीनेष्वर्वाचीनेषु च वाङ्मयेषु सूर्य इव प्रकाशमानो विराजते। अस्याऽत्यन्तं सुन्दरं सुसम्बद्धं सूक्ष्मतमं पदार्थविद्योतनसामर्थ्यं दृष्ट्वा प्राच्याः पाश्चात्याश्च सर्वे विद्वांसो मुक्तकण्ठेनैनं प्रशंसन्ति। महेश्वरप्रासादाल्लब्धानि 'अइउण्' इत्यादि सूत्राण्याधारीकृत्य प्रत्याहारमाध्यमेन वैज्ञानिकसूत्ररचनाप्रकारो ग्रन्थकर्तुः पाणिनेराचार्यस्य प्रतिभाया वैशिष्ट्यं प्रकटयति। यदि वयं विश्वभाषासु दृष्टिं निक्षिपामस्तदा विश्वस्य कस्याञ्चिदपि भाषायामेतादृशं व्याकरणं न दृश्यते, यादृशं संस्कृतवाङ्मयस्य गौरवाधायकं पाणिनीयव्याकरणं देववाण्यां विराजते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनिनाम्नैव पणनं पणः, पणोऽस्याऽस्तीति पणी, पणिनो गोत्रापत्यं पाणिनिरिति व्युत्पत्त्या पाणिनेर्नामान्वर्थतां भजते। पुरुषोत्तमदेवेन त्रिकाण्डशेषे पाणिनेरग्रेलिखितानि नामान्तराण्युक्तानि—1. पाणिन, 2. पाणिनि, 3. दाक्षीपुत्र, 4. शालङ्कि, 5. शालातुरीय 6. आहिक। श्लोकात्मकपाणिनीयशिक्षाया याजुषपाठे पाणिनेराचार्यस्य 'पाणिनेय' इत्यपि नाम उपलभ्यते। यशस्तिलकचम्प्वां 'पणिपुत्र'शब्दस्याऽपि व्यवहारो दृश्यते।

यशस्तिलकचम्प्वां पणिपुत्रशब्दव्यवहारेणाऽस्य पितुर्नाम पणिरिति सम्भाव्यते। शालङ्कि-नाम्ना पाणिनेः पितुर्नाम 'शलङ्कु' इति महामहोपाध्यायपण्डितशिवदत्तशर्ममहोदयानां मतम्। पैलादिगणे 'शालङ्कि'पाठसामर्थ्यात् 'शाङ्कुल'शब्दस्य शलङ्क आदेशे इञ् प्रत्ययो भवति, ञित्वाच्चाऽऽदिवृद्धिः। परन्तु युधिष्ठिरमीमांसकमहोदयमतानुसारेण पाणिनेः पितुर्नाम 'पणिन्' आसीदिति ज्ञायते। पाणिनिशब्दव्युत्पत्तिविषये वैयाकरणेषु मतद्वयमस्ति। प्रथममतानुसारेण 'पणिन्' शब्दादपत्यार्थे अण्प्रत्यये 'पाणिन' इति व्युत्पद्यते, पुनश्च तस्मादपत्यार्थे 'इञ्' प्रत्यये 'पाणिनि' इति रूपं सिद्ध्यति।

द्वितीयमतानुसारेण नकारान्तस्य 'पणिन्' शब्दस्य पर्यायः 'पणिन' इति अकारान्तः स्वतन्त्रशब्दोऽस्ति। तस्मात् 'अत इञ्' इति सूत्रेण इञ् प्रत्यये 'पाणिनि' शब्दो व्युत्पद्यते। पाणिनये प्रयुक्तः 'पणिपुत्र'शब्दोऽप्यस्यैव तथ्यस्य ज्ञापको यत् पाणिनिः 'पणिन्' (नकारान्तस्य) इत्यस्याऽपत्यम्, न तु 'पणिन' इत्यस्य। 'पणिन्' इति नकारान्तशब्दादपि बाह्वादिगणस्याऽऽ-कृतिगणत्वाद् इञ् प्रत्ययः सम्भाव्यते। अत्र मतद्वये श्रीमीमांसकमहोदयाः द्वितीयमतमेव युक्तं मन्यन्ते, गोत्रप्रकरणेषु 'पाणिन-पाणिनि' इत्युभयोर्नामगोत्ररूपेण स्मृतत्वात्। प्रथमपक्षस्वीकारे 'पाणिन' इति गोत्रं भविष्यति, 'पाणिनि' इति च युवा। यद्येतादृशमभविष्यत्तर्हि युवप्रत्ययान्तस्य 'पाणिनि'शब्दस्य गोत्ररूपेणोल्लेखो नाऽभविष्यत्।

'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः' इति महाभाष्यनिर्देशादस्य मातुर्नाम 'दाक्षी'-ति ज्ञायते। संग्रहकारस्य व्याडेर्नाम बहुधा महाभाष्यकारेणोक्तम्—'दाक्षायण' इति। तदनुसारेण दाक्षायणो व्याडिः पाणिनेर्मातुलपुत्र इति प्रतीयते। परन्तु काशिकायाम् (6.2.69) 'कुमारी दाक्षाः' इत्युदाहरणे दाक्षायण एव 'दाक्षि' नाम्ना स्मृतः। अतः प्राचीनपद्धत्या दाक्षिर्दाक्षायण-श्चेत्युभयमपि नाम संग्रहकारस्य व्याडेराचार्यस्यैवाऽस्ति। अतो दाक्षि-दाक्षायणेत्युभयनामभ्यां प्रसिद्धो व्याडिर्दाक्षीपुत्रस्य पाणिनेर्मातुल एवाऽऽसीदिति ज्ञायते। एतेन व्याडेर्भगिन्याः दाक्ष्याः नाम 'व्याड्या' इत्यप्यासीदिति ज्ञायते। वेदार्थदीपिकायां छन्दःशास्त्रप्रवक्तुः पिङ्गलस्य पाणिनिभ्रातृ-त्वेनोल्लेखो वर्तते।

पाणिनिना स्वशब्दानुशासने द्विधा बहुवचनान्तस्य 'आचार्य'पदस्य निर्देशो विहितः। श्रीहरदत्तमतानुसारेण पाणिनिर्बहुवचनान्तेन 'आचार्य'पदेन स्वगुरोरुल्लेखं करोति। कथासरि-त्सागरग्रन्थानुसारेण पाणिनेर्गुरोर्नाम 'वर्ष' आसीत्। वर्षस्याऽनुज 'उपवर्ष' आसीत्। एक उपवर्षो जैमिनीयसूत्राणां वृत्तिकार आसीत्। एक उपवर्षो धर्मशास्त्रेष्वपि स्मृतोऽस्ति। युधिष्ठिर-मीमांसकमतानुसारेण जैमिनीयसूत्रवृत्तिकार उपवर्षो धर्मशास्त्रेषु स्मृत उपवर्षश्चैक एव। उपवर्षोऽयं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैमिनेरीषदेवोत्तरकालीनोऽस्ति। अवन्तिसुन्दरीकथासारे वर्षोपवर्षयोस्तूल्लेखोऽस्ति, परन्तु तत्र पाणिनेरुल्लेखो नाऽस्ति। कथासरित्सागरस्य कथा ऐतिहासिकदृष्ट्या पूर्णतया प्रमाणिक्यो न सन्ति, अतः पाणिनेराचार्यस्य नाम सन्धिग्धमस्ति। यदि कथासरित्सागरे स्मृत उपवर्षोऽपि प्राचीनजैमिनीयसूत्रवृत्तिकरेण, धर्मशास्त्रेषु स्मृतेनोपवर्षेण चाऽभिन्नो भवेत्, तस्यैव भ्राता वर्षो भवेत् तर्हि 'वर्षः' पाणिनिर्गुरुरासीदिति स्वीकर्तुं शक्यते। महेश्वरोऽपि पाणिनेर्गुरुरासीदित्यर्वाचीनाः वैयाकरणाः स्वीकुर्वन्ति। श्लोकात्मकपाणिनीयशिक्षानुसारेण पाणिनिना महेश्वरादक्षरसमाम्नायस्वरूपचतुर्दशसूत्राणामुपदेशं लब्ध्वा तदाधारेणैव स्वकीय 'अष्टाध्यायी'-ग्रन्थो विरचितः। स्कन्दपुराणानुसारेण गोपर्वते तपश्चर्यानन्तरं पाणिनिर्विशिष्टं ज्ञानं लब्धवान्। हरचरितचिन्तामणिग्रन्थानुसारेण वर्षोपाध्यायशिष्यः सन्नपि यदा पाणिनिः स्वजडत्वकारणेन किञ्चिज्ज्ञातुं नाऽशकत्, तदा सः स्वजडत्वदूरीकरणाय हिमालयपर्वते गत्वा तपश्चचार, भगवान् शङ्करश्च तस्मै व्याकरणशास्त्रमुपदिदेश।

भगवतः पाणिनेराचार्यस्य चरितमद्यापि विद्यते तमसावृतम्। कस्मिन् काले स समुत्पन्नः, कतमञ्च जनपदमलञ्चकार स्वजनुषा, कुतश्च तस्य तादृशव्याकरणविज्ञानसम्पादनपाटवम्, इति निखिलमपि तत्त्वजातमिदमनुसन्धानमपेक्षते। तदत्र विदुषां प्रीतये तद्विषयेऽपि किञ्चिन्मात्रमिहोच्यते। तत्र तावत् शिक्षायां 'दाक्षीपुत्रस्य पाणिने'रिति वचनेन गम्यते यदेष मुनिः कस्याश्चिद् दाक्षीनाम्न्या देव्या गर्भशुक्तिमुक्तामणिः। जनकश्चास्य कश्चित् पाणिनो नामा मुनिसत्तमः। तथा च स्वयमाचार्यः, पणिन्शब्दादणि, भसंज्ञायां प्राप्ते टिलोपे 'गाथि-विदथि-केशि-गणि-पणिनश्चेति' सूत्रेण निषेधात् पाणिनं शब्दं व्याकुरुते। तस्यापत्यं पाणिनिः। तदेतावता गम्यते यत्कस्माच्चित्पाणिननाम्नो मुनिप्रवरात् दाक्षीनाम्न्यां देव्यां गृहीतजन्मपरिग्रहोऽयं पुण्यात्मा महर्षिः पाणिनिरिति निश्चितप्रायम्।

पाणिनेर्जनपदः—पाणिनिः 'तूदीशलातुरेति' सूत्रे शलातुर इति कस्यापि स्थानविशेषस्य नामेति निर्दिदेश। अतः सुशकमिदमभ्युपेतुं यदाचार्योऽयं शलातुराख्यं नगरं विभूषयामास। यत्खलु क्रमेण सलातर-हलाहुर-लहुर इति अपभ्रश्य, सम्प्रति लाहुर इति नाम्ना परिणतम्। तत्रभवान् भाष्यकारश्च पुनः शालातुरीयशब्दं पाणिनीयपर्यायतयाऽसकृत् प्रायुङ्क्त। तेनैतत् सम्यक्तया प्रतिपत्तुं शक्यते यदसौ महामेधावी पश्चिमोत्तरदेशमेव स्वजन्मना समलञ्चकारेति।

इदञ्च शलातुर नाम नगरं तक्षशिलायाः समीपे वर्त्तते। स च शलातुरशब्दोऽयमद्यत्वे लहुर इति समाख्यया प्रख्यायते। कैम्बलपुरमण्डलान्तर्गतजहाँगीराख्यग्रामसविधे ततो दशक्रोशमितेऽन्तरे चावस्थितो लाहुरश्चायं साम्प्रतिकलाहौरनगराद् भिन्नः इति गवेषणयाऽवधार्यते।

पाणिनिमुनिरयमासीद् बाल्यकालादेव महान् मेधावी प्रदीप्तप्रतिभाशाली च। भगवता पतञ्जलिनाऽसौ कविपदेन विभूषितः—'अकीर्तितमाचरितं कविने'ति। अपि च 'प्रमाणभूत आचार्यः दर्भपवित्रपाणिः, शुचाववकाशे प्राङ्मुख उपविश्य, महता यत्नेन, प्रणयति स्मेति। तत्र वर्णेनापि अनर्थकेन न भवितव्यम्, किं पुनरयिता सूत्रेणेति।' तमिमं वर्णसमाम्नायन्तु तत्तीव्रेण तपसा प्रत्यक्षीभूतः साक्षान्महेश्वर एव शब्दविद्यारहस्यप्रकाशनार्थं पाणिनये समुपदिदेशेति प्रवादस्तु तस्मिन् सातिशयबद्धश्रद्धाकानां तत्परमभक्तानामर्थवादमात्र एव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एष किल वर्णसमाम्नायस्तु वस्तुतः ऋगुपज्ञः मूलोद्देशतः 'अग्निमीले' इति ऋग्वेदीयप्रथमश्रुतावेवोपदिष्टो भगवता आदिकविना परमेश्वरेण इति प्रदर्शितञ्चान्यत्र। यत्कालान्तरेणालङ्काररूपेण कविभिर्मनीषिभिर्महेश्वरढक्कानिनादोत्थनिर्घोषरूपेण समासादितायां चतुर्दशसूत्र्यां परिणतोऽवधार्यत इति।

पाणिनेः कालनिर्णयः—महर्षिः पाणिनिः कदा भारतभुवं स्वजनुषाऽनुजग्राह इत्यत्र तु विमर्शका अपि प्रायशो वाचंयमाः। ये च यं कमपि कालं निरूपयन्ति तेऽपि तं युक्तियुक्तवचोभिरुपपादयितुं न प्रभवः। इतरे कालनिर्णिनीषया प्रवर्त्तमाना अपि साधनसौकर्यमनवाप्य कुण्ठितधियः सन्तः मध्य एव विरताः। एवमेव कथासरित्सागरोऽपि पाणिनेः कालनिर्णये कुल्यायमान इवास्ते। केचन तु ख्रीस्तशतकारम्भात् सार्द्धत्रिंशद्वर्षात्पूर्वमेवास्य कालं सम्भावयन्ति। अपरे ख्रीस्ताब्दतः सार्द्धद्विसहस्रतोऽपि कतिपयवर्षपूर्वमस्य कालमाकलयन्ति। अन्ये च कथामप्येकामत्रोदाहरन्ति। यत्पुरा यदा कुण्ठितमतिः पाणिनिः श्रीगुरुवरमुपवर्षमुपाध्यायं विद्याध्ययनार्थमुपाश्रितः, तदा तस्य सतीर्थ्येन कात्यायनेन वादाहवे स बलवत्कदर्थितः परमविषण्णः सन् भगवन्तं महेश्वरं तपःप्रभावेन प्रसाद्य समासाद्य च तड्ढक्कानिनादसमुत्थं वर्णसमाम्नायं शब्दविद्यारहस्यप्रकाशनार्थमिदं नूतनं पाणिनीयाष्टकं नाम व्याकरणशास्त्रं रचयामासेति। एवं ये कात्यायनसमकालभवत्वमाचार्यस्य प्रतिपादयन्ति न तद्युक्तं प्रतिभाति। यतो न हि पाणिनीयसूत्रेषु राज्ञो जनमेजयादुत्तरकालभवस्य कस्यापि नाम दृक्पथमवतरति। नैतावदेव अपितु परमप्रसिद्धस्य व्याससूनोः शुकस्यापि नाम नोपन्यस्तमुपलभ्यते। तत्र शुकस्य व्यासापत्यबोधिकां 'वैय्यासकिः' इति संज्ञामनुश्रुत्य परस्तात् तत्साधनाय कात्यायनेन वररुचिना 'व्यासवरुडेति' वार्त्तिकमारब्धम्। तेनैतदनुमातुन्न दुःशकम् यत्तदानीं पाणिनिकाले वैयासकिवारुडक्यादिपदानि लोके व्यवह्रियमाणानि नासन्। इति हेतोरेव पाणिनिः तदानीं तादृशं सूत्रं न जुगुम्फ। पाणिनिस्तु स्वकालव्यवहृतानेव शब्दान् सूत्रेषु न्यभान्त्सीदिति। पाणिनिना यन्नोक्तं कदुक्तं वा तदेव कात्यायनेन वार्त्तिकैः पूरितं प्रत्याख्यातं वा। तस्मात् पाणिनेः कात्यायनात् पूर्वकालभवत्वं सूपपन्नमेव। पुराणकालात्पूर्वमपि पाणिनेरिदमेवावलम्बनं यत् पुराणपठितान् बहून् शब्दान् अपाणिनीयान् पञ्चषैः सूत्रैः संस्कर्तुं सुशकानपि न स सञ्चस्कार। अतोऽपि पुराणकालात्पूर्वजत्वं पाणिनेरव्याहतम्। किञ्च स्वैरसञ्चानाः पुराणकर्त्तारो महर्षयः पाणिनीयानामपि शब्दानामार्षत्वं स्वीकुर्वाणा पाणिनीयव्याकरणं नाशिश्रियन् इत्यपि सम्भाव्येत चेत्तदापि तस्य पुराणकालात् प्राचीनत्वं तु दुरपह्नवमेवेति। अतः वैदिकपौराणिककालयोरन्तराल एव क्वचित्पाणिनेः कालः सम्भाव्यते। केचन कालविदः पाणिनेः कालः ख्रीस्तात् प्राक् 700 वर्षदेशीयः कात्यायनस्य च ख्रीस्तात् 400 वर्षदेशीयः इत्यामनन्ति।

वररुच्यपरनामा कात्यायनस्तु पाणिनेरुत्तरकालजात एव। यः किल स्वकाले प्रयुक्तप्रयोगानुस्यूतानव्यवहृतपूर्वान् शब्दानुद्दिश्य वार्त्तिकान् प्रणिनाय। यथा खलु पुरा पाणिनिकाले—'देवानां प्रिय' इति पदद्वयं असमस्तमेव प्रयुज्यते स्म। तदानीं तेनासमस्तपदेन यज्ञीयपशुरेवावबुध्यते स्म, तदनु कात्यायनकाले समस्तमेकपदीभूतं पशुसादृश्यप्रद्योतकतया मूर्खार्थकत्वेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहृतिं गतम्। ततो भगवता कात्यायनेन 'देवानांप्रियो मूर्खे' इति वार्त्तिकं प्रणीतम्। इत्यनेनापि कात्यायनस्यावरजत्वं सूच्यते इति।

पाणिनेर्वैदुष्यम्—पाणिनेर्विलक्षणं वैदुष्यशेवधिमुपश्लाघयन् तत्रभवान् भाष्यकारो व्याजहार 'वृद्धिरादैजिति' सूत्रभाष्ये—'स प्रमाणभूत आचार्यः·········महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्र वर्णेनापि अनर्थकेन न भवितव्यं किंपुनरियता सूत्रेणेति।' एतेन लोकोत्तरमेधाविनोऽस्य बुद्धिप्रौढिमाऽ-पूर्वक्रान्तदर्शिता च सुतरां ध्वनिता भवति। सोऽयमेवंविधालौकिकगुणगरिम्णा कस्य वा न नमस्यो भवेन्महामुनिः पाणिनिः—

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥

वस्तुतः पाणिनीयव्याकरणं सर्वतोमुखं सर्वाङ्गपूर्णञ्चेत्यत्र नास्ति संशयलवोऽपि।

पाणिनीयाष्टकप्रतिपाद्या विषयाः—पाणिनीयव्याकरणमिदम् अष्टभिरध्यायैरुपनिबद्धं पाणिनीयाष्टकनाम्नाऽपि प्रसिद्धम्। अत्र हि प्रत्यध्यायं चत्वारः पादा अनुस्यूताः। व्याकरणं हि नाम प्रकृतिप्रत्ययाद्यनुशासनेन पद-पदार्थस्वरूपव्यवस्थापकं पुण्यतमं शास्त्रम्। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा येनेति तद्व्युत्पत्तेः। तदेतत्सर्वाङ्गलक्षणघटितत्वात् पाणिनीयमेवेतरव्याकरण-मूर्द्धाभिषिक्तं विभाव्यते। एतत्प्रतिपाद्या विषयाः सङ्ग्रहेण निम्नपद्येषु समुपसंहृताः—

सूत्राणां क्रमविन्यासो रुचिरो मुनिना कृतः।
निरीक्ष्यतां सावधानं पूर्णञ्च परितुष्यताम्॥
संज्ञानां परिभाषाणां पूर्वाध्याये प्रदर्शनम्।
समासश्च विभक्त्यर्था द्वितीयाध्यायगोचराः॥
तृतीये धातुविहिताः प्रत्ययाः सुव्यवस्थिताः।
तुर्य्यपञ्चमयोरुक्ता अवशिष्टाश्च ते क्रमात्॥
षष्ठे प्रकृतकार्याणि प्रायेण दर्शयन्मुनिः।
सप्तमे प्रत्ययस्थानि द्विष्ठानि च यथाक्रमम्॥
अष्टमे पूर्वचरणे पदकार्यं समासतः।
यान्यसिद्धानि पूर्वत्र त्रिपाद्यां तान्यवेशयत्॥
कृत्वा पूर्णमनोयोगं शिष्यप्रियचिकीर्षया।
पाणिनीयमिदं पाठ्यं गुरुभिः करुणार्णवैः॥
शब्दाम्बोधितितीर्षा चेद्व्याकृत्यधिजिगाँसुता।
पाणिनीयं प्रयत्नेन समभ्यस्यं तदर्थिभिः॥ इति।

पाणिनेः काव्यकला—सुगृहीतनामधेयो भगवान् पाणिनिर्न केवलं शब्दशास्त्रपारङ्गतः कवित्वकलायामप्यसौ परमकुशल आसीदिति रायमहाभागेन अमरकोशटीकायामुद्धृतानि पाणिनिप्रणीतानि कतिपयानि पद्यानि आचार्यस्य कवित्वकलाचातुरीं द्योतयन्ति—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतेऽर्द्धरात्रे परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः।
अपश्यती वत्समिवेन्दुबिम्बं तच्छर्वरी गौरिव हुङ्करोति।।
अपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितन्न लक्षितम्।।
विलोक्य सङ्गमे रागं पश्चिमायां विवस्वतः।
कृतं कृष्णमुखं प्राच्या न हि नार्यो विनेर्ष्यया।।
अथाससादामुमनिन्द्यतेजा जनस्य दूरोज्झितमृत्युभीतेः।
उत्पत्तिमद्वस्तु विनाश्यवश्यं यथाहमित्येवमिवोपदेष्टुम्।।
शरदि रविरश्मितप्ता बिभ्राणाः शोषमतिशयग्लपिताः। इत्यादि।

विशिष्य तु काव्यप्रकरणमत्रानुसन्धेयम्। पाणिनिना काव्यद्वयं प्रणीतम्—पाटलविजयं-जाम्बवतीविजयञ्चेति। तत्र स्खलितमालोक्य केचन प्रत्यवतिष्ठन्ते यत्संस्कारच्युतिदोषदुष्टत्वान्नेयं पाणिनेः कृतिरिति सम्भाव्यते। व्याकरणो यज्ञव्यपदेशभाजः शब्दाह्वयस्य शाश्वतिकज्योतिषः संस्रष्टुः सिद्धवाग्विभवस्य कृतौ तु नाणोरपि च्युतिसंस्कारादिदोषस्य सम्भवोऽस्ति। परन्तु रुद्रटप्रणीतकाव्यालङ्कारटीकायां नेमिसाधुना च्युतिसंस्कारदोषोदाहरणप्रसङ्गे—'सन्ध्यां वधूं गृह्य करेणेत्यत्र' गृहीत्वेति वक्तव्ये गृह्येति प्रायोगः च्युतिसंस्कारदोषदूषितः इत्युदाहृतम्। तथाविधोऽव्याकृतः प्रयोगः शब्दशास्त्रमार्तण्डमण्डलाखण्डलेन कृतः स्यादिति न बुद्धिपद्धतिमारोहति। अतः सैषा कृतिः पाणिनेः नास्त्येवेति निश्चितप्रायम्। सत्यमेतत् चेन्नाम रचनेयं न स्यात्पाणिनेरिति। परन्तु यदि नाम स्वीक्रियेत यद्रचनेयं पाणिनेः कृतित्वं न व्यभिचरति, तदा तु पाणिनिकृतिबलादेवाऽस्य प्रयोगस्य साधुत्वमभ्युपेयमेव। गृह्य-गृहीत्वेति प्रयोगद्वयस्यापि साधुत्वं आचार्यानुगृहीतत्वादेवोन्नेयमिति। न खलु पाणिनीयस्यापाणिनीयत्वं यत्नशतेनापि शक्यते साधयितुम्। तथा सति काव्ययोरनयोः पाणिनिकृतित्वाङ्गीकारेऽपि न कापि विप्रतिपत्तिरिति। न हि तेजस्तिमिरयोः सामानाधिकरण्यं सम्भवति। परन्तु मानवनिसर्गसुलभदोषसंश्लेषात्तु पाणिनिरपि न मुक्तः। तदस्याद्भुतप्रज्ञस्य पाणिनेरपि सर्वविदः कृतिमुद्दिश्य दोषोद्घाटनं नाम कस्य न विस्मयकरम्। तथाऽपि मानवस्वभावसुलभभ्रमादिदोषस्यापरिहार्यत्वमवगमयितुं किञ्चिदिवात्र प्रस्तूयते—

तथा च पदसंस्कारपक्षे 'हरिर्भवति, साधुर्भवति' इत्यत्र विसर्गस्य रेफभव्यः विधायकानुशासनाभावात् अव्याकृतत्वं दुर्निवारमिति। तदेवंजातीयका दोषदृष्टयः पाणिनेरुत्कर्षं न मात्रयापि समपकर्षयितुं प्रभ्व्यः। सोऽयमलौकिकगुणसम्पन्नो महर्षिः क्वचिदरण्ये ध्यानावस्थितः व्याघ्रेणाक्रान्तः त्रयोदश्यां भौतिकं शरीरं तत्याज। इति हेतोरेव व्याकरणसम्प्रदाये तस्यामेव तिथौ सर्वैरनध्यायः परिपाल्यते तत्पुण्यतिथिमुद्दिश्येति।

पाणिनेरन्यरचनाः—पाणिनीयाष्टकमतिरिच्य अन्येऽपि—गणपाठः-धातुपाठः-उणादिसूत्रं-फिट्सूत्रं-शिक्षा-लिङ्गानुशासनम्-परिभाषाप्रभृतयो ग्रन्थाः पाणिनिना विरचिताः। तेषु फिट्सूत्र-लिङ्गानुशासनादीनि तु व्याडिकृतानीति बहव आशेरते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनेः शिष्यपरम्परा—पाणिनेः सर्वप्रथमः शिष्यः कात्यायनो वररुचिरासीत्। 'उपसेदिवान् कौत्सः पाणिनिम्' इति महाभाष्योक्तोदाहरणात्, 'अनूषिवान् कौत्सः पाणिनिम्, उपशुश्रुवान् कौत्सः पाणिनिम्' इति काशिकोक्तोदाहरणाज्ज्ञाज्ञायते यत् पाणिनेः कश्चन कौत्सनामाऽपरः शिष्योऽप्यासीत्।

पाणिनेः सम्पन्नता—पाणिनेः कुलमत्यन्तं समृद्धमासीत्। तेन व्याकरणाऽध्येतृभ्यश्छात्रेभ्यो भोजनस्य व्यवस्था कृताऽऽसीत्। तत्र विद्यया सह भोजनमपि लभ्यते स्म। इदमस्य तात्पर्यमुद्घोषयितुं पतञ्जलिना महाभाष्ये 'ओदनपाणिनीयाः' इत्युदाहरणं प्रदत्तम्, किन्तु वामनेन काशिकायामुदाहरणमिदं निन्दार्थे प्रदत्तमस्ति। तदर्थश्च कृतो यदोदनप्रधानाः पाणिनीया ओदनपाणिनीया इति। अर्थात् ये श्रद्धामन्तरा केवलमोदनप्राप्त्यै पाणिनीयं शास्त्रमधीयते ते निन्दावचनं प्राप्नुवन्ति।

पाणिनेर्मृत्युः—आचार्यस्य पाणिनेरन्यज्जीवनस्येतिवृत्तं किमपि नोपलभ्यते, किन्तु पञ्चतन्त्रे मित्रसम्प्राप्तौ प्रसङ्गतः कस्माच्चित् प्राचीनग्रन्थात् पद्यमेकमुद्धृतमस्ति, यत्र पाणिनेः, जैमिनेः, पिङ्गलस्य च मृत्युकारणानामुल्लेखो वर्तते। तथाहि—

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्
अज्ञानावृतचेतसां मतिरुषां कोऽर्थस्तिरश्चां गुणैः॥

एतेन पाणिनिं कश्चन सिंहो जघान, मृत्युश्च तस्य त्रयोदश्यां तिथावेवाऽभूदिति प्रतीयते। अत एव काश्यादिषु वैयाकरणैर्मासस्याऽनिश्चयात् प्रतित्रयोदश्यामनध्यायतिथित्वेन व्यवह्रियते।

पाणिनीयव्याकरणस्वरूपं तद्वैशिष्ट्यञ्च—पाणिनेरष्टाध्यायी एका एवं सर्वाङ्गपूर्णा कृतिरस्ति, यस्यां लौकिकवैदिकोभयविधशब्दसिद्धये नियमनिर्देशादयोऽपूर्वाः सर्वसामान्याश्चाऽभूवन्। मैकडॉनलमहोदयस्य कथनमस्ति यत् पाणिनीयं व्याकरणं स्वनीतिनियमकारणेनेयतीं न्यायिकां ख्यातिमार्जयद् यदाधारेण वक्तुं शक्यते यद् भारतीयव्याकरणे विश्वस्मिन् सर्वप्रथमं शब्दानां वैज्ञानिकं विवेचनं जातम्, प्रकृतिप्रत्यययोर्भेदपरिचयो जातः शब्दसिद्धिप्रकारनिर्द्धारणं निश्चितम्, सार्वजनीसर्वाङ्गीणविशुद्धायाः पद्धतेर्निर्माणमजायत, यस्य तुलना विश्वस्य केनाऽपि व्याकरणेन न कर्तुं शक्यते।

भारतस्य भाषागतपरम्परायां साहित्यक्षेत्रे पाणिनिव्याकरणेनैकमभिनवयुगानुवर्तनं विहितम्। यत्र वैदिकयुगापेक्षया व्याकरणशास्त्रस्याऽभिवृद्ध्यर्थं नवं नवं कार्यमजायत। भारतस्य प्रसिद्धेन भाषाविदा बाबूसुनीतिकुमारचटर्जीमहोदयेनाऽपि स्पष्टमुक्तमस्ति यद् 'यदा ऋग्वेदस्य भाषा किञ्चित् प्राचीना सर्वसाधारणस्य कृते आंशिकरूपेण दुर्बोधा चानुभूता तदा भारतीयाऽऽर्यभाषाया एकमर्वाचीनतरं रूपं विशिष्टसाहित्यिकभाषारूपेण प्रतिष्ठापयितुं पश्चिमोत्तरपञ्जाबनिवासिना पाणिनिना नवीनसाहित्यिकभाषाव्याकरणं विरच्य लौकिकभाषाया रूपं प्रदत्तम्।'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनेरष्टाध्याय्या अस्तित्वं तावत्पर्यन्तं स्थास्यति यावत्कालं विश्वस्मिन् संस्कृतस्याध्ययनाध्यापनप्रवाहः प्रचलिष्यति। पाणिनेरष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति, तथा चेयमष्टसु अध्यायेषु विभक्ताऽस्ति, यत्र प्रत्येकं चत्वारः पादास्सन्ति। पाणिनिनाऽत्यन्तरसरलया, मनोरमया च शैल्या सूत्राणां रचना कृताऽस्ति, यां वयमनायासेनावगच्छामः। महाभाष्यकारो भगवान् पतञ्जलिः पाणिनिविषये लिखति यत्—'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राऽशक्यं वर्णेनाऽप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण।' पुनरग्रे लिखति—'सामर्थ्ययोगान्न हि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्।'

अशेषशेमुषीसम्पन्नस्य तर्कप्रवणस्य पतञ्जलेः पाणिनीयशास्त्रविषये उक्तो लेखस्तस्याऽत्यन्तं महत्त्वं व्यनक्ति। तथा काशिकायां जयादित्यमहोदयेन—'उदक् च विपाशः..............महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य।'

प्रसिद्धश्चीनदेशीयः श्रीह्वेनसाङ्गनामाभिधो यात्री लिखति यत्—'ऋषिः पूर्णमनसा शब्दभण्डारतः शब्दानसञ्चयद्, सहस्रेषु पद्येषु च सम्पूर्णां व्युत्पत्तिं विरचितवान् प्रत्येकं पद्यं द्वात्रिंशदक्षराणामासीत्। अत्र प्राचीनाऽर्वाचीनं समस्तं लिखितं ज्ञानं समाप्तम्। तत्र शब्दाऽक्षरविषयकं किमपि तथ्यं विस्मृतं भवितुं नाऽशकत्।'

द्वादशशतकीयः ऋग्वेदभाष्यकारः श्रीवेङ्कटमाधवो लिखति—

शाकल्यः पाणिनिर्यास्क इत्यृगर्थपरास्त्रयः।

अर्थाद् ऋग्वेदस्य त्रयो ज्ञातारस्सन्ति—शाकल्यः, पाणिनिर्यास्कश्चेति। वेङ्कटमाधवस्येदं कथनं सर्वथा सत्यमेव। वेदार्थे स्वरज्ञानं सर्वतः प्रधानं साधनम्। पाणिनिना स्वरशास्त्रस्य सूक्ष्मविवेचनदृष्ट्या न केवलं प्रत्येकं प्रत्ययस्याऽऽदेशस्य च ञित्नित्चित्प्रभृतिष्वनुबन्धेषु ध्यानं दत्तम्, अपितु चतुश्शतानि सूत्राणि केवलं स्वरविशेषपरिज्ञानायैव प्रणीतानि। अतः पाणिनेराचार्यस्य वेदज्ञता स्पष्टं विद्यते।

अतः परं पाणिनीयव्याकरणविषये आधुनिकानां पाश्चात्यानां विदुषां मतानि प्रदर्श्यन्ते—

इङ्गलैण्डदेशस्य प्रो० मोरियर विलियम्समहोदयो वक्ति यत्—'संस्कृतं व्याकरणं तस्याः मानवमस्तिष्कप्रतिभाया आश्चर्यतम आदर्शोऽस्ति, यः केनाऽपि देशेन नाऽद्यावधि आविष्कृतः।'

जर्मनीदेशस्थः श्रीमैक्समूलरमहोदयो ब्रवीति यत्—'हिन्दूनां व्याकरणान्वययोग्यता विश्वस्य कस्या अपि जातेर्व्याकरणसाहित्यादधिकं विद्यते।'

सर हन्टरमहोदयः कथयति यत्—'विश्वव्याकरणेषु पाणिनीयव्याकरणं शेखरीभूतमस्ति। तस्य वर्णशुद्धता, भाषायाः धात्वन्वयसिद्धान्तः, प्रयोगविधयश्चाऽद्वितीया अपूर्वाश्च सन्ति।'

रूसदेशस्थ लेनिनग्रादनगरीयेण श्रीप्रोफेसर त० शेरवात्सकी महोदयेन पाणिनीयव्याकरणविषये उक्तम् यत्—'पाणिनीयव्याकरणं मानवमस्तिष्कस्य सर्वोत्कृष्टकृतिष्वेकमस्ति।'

सुप्रसिद्धेनाऽऽधुनिकभाषावैज्ञानिकेन ब्लूमफील्डमहोदयेनोक्तम्—Generations of such labour must have preceded the oldest treatise that has come down

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

to us, the grammar of Panini. This grammar, which dates from somewhere round 350 to 250 B.C., is one of the greatest monuments of human intelligence.

अर्थाद् अनेकेषां वंशानामेतादृशपरिश्रमेणाऽस्माभिः प्राचीनतमं व्याकरणं पाणिनीयं व्याकरणमुपलब्धम्। व्याकरणमिदम्, यस्य रचनाकालः 350 ईशवीयपूर्वतः 250 ईशवीयपूर्वं भवितुमर्हति, मानवबुद्धिमत्तायाः महत्तमासु कृतिष्वेकमस्ति।

व्याकरणमहाभाष्यकार आचार्यः पतञ्जलिः

महामुनिना भगवता पतञ्जलिना हि पाणिनीयसूत्राणां याऽत्युत्कृष्टा व्यवहारोपयोगिनी व्याख्या कृता सा संस्कृतजगति 'महाभाष्य'नाम्ना व्यपदिश्यते। अत्र व्याकरणस्य शुष्कविषया एवंविधया सरसया सरलया सरण्योपस्थापिताः, यां मुक्तकण्ठं प्रशंसन्ति सर्वे विद्वांसः। अस्य रचनासौष्ठवं संस्कृतवाङ्मयेऽपूर्वमस्ति मञ्जुलम्। वस्तुतो महाभाष्यमेतत्र केवलं पाणिनीयव्याकरणेऽतिमहत्त्वाधायकमस्ति अपितु समस्ते संस्कृतवाङ्मये इदमेकमद्भुतं प्रामाणिकं ग्रन्थरत्नमस्ति। सर्वे वैयाकरणा एतस्य समक्षं नतमस्तकाः भवन्ति महाभाष्ये हि प्रायः पाणिनीयसूत्राणां प्रत्येकपदानां विवेचनं कृतं विद्यते। वैयाकरणा हि सूत्रवार्तिकभाष्येषु परस्परविरोधे महाभाष्यमेव प्रामाणिकं मन्यन्ते। तथा हि महाभाष्यस्य प्रदीपे कैयटेनोक्तम्—'यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्'; प्रदीपोद्द्योतटीकायाञ्च नागेशेनोक्तम्—'यथोत्तरं मुनीनां प्रामाण्यम्' इति।

अत्राऽयमाशयः—पाणिनिसूत्रविषये यत्र वार्तिककृता काचिद् विप्रतिपत्तिः प्रदर्शिता, उपसङ्ख्यानादिकं च कृतम्, तत्र तस्यैव वचनं ग्राह्यम्। तद्वचनसंस्कृताः प्रयोगा एव साधवो मन्तव्याः। यत्र वा वार्तिककृद्वचनानि खण्डयित्वा भाष्यकारेण कश्चन प्रयोगः समर्पितः वार्तिकं वा प्रत्याख्यातम्; तत्र तत्र तद्वचनमेवाऽनुसृत्य प्रयोगाणां साधुत्वमनुसन्धेयम्। यथा—'न बहुव्रीहौ' इति सूत्रेण बहुव्रीहिसमासार्थप्रक्रियाविग्रहवाक्ये सर्वनामसंज्ञानिषेधं कुर्वतः सूत्रकारस्य मते सर्वनामत्वाभावेनाऽकचोऽप्रवृत्त्या त्वं पिता यस्येति विग्रहे स्वार्थिके कप्रत्यये 'त्वत्कपितृक' इत्येव प्रयोगः साधुत्वेनाऽीयुपगन्तव्यः, परन्तु गोनर्दीयस्त्वाह—

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयम्।
त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति॥

इति महाभाष्यवचनादकचि कृते 'त्वत्कपितृकः' इत्येव स्वीकर्तव्यम्। तस्मात्तत्र भाष्यकृद्वचनमेव श्रेष्ठं मत्वा व्यवस्था भवति।

भाष्यवार्तिककारयोः पर्यालोचनया प्रतीयते यत् वार्तिककारः सूत्रकृतो न्यूनताप्रदर्शनमेवाभिलक्ष्य वार्तिककरणे प्रवृत्तः, भाष्यकारस्तु सूत्रकृतो गौरवरक्षार्थमेव प्रवर्तते। अत एव स्पष्टं तेनोक्तम् 'वृद्धिरादैच्' इति सूत्रे भाष्ये—'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राऽशक्यं वर्णेनाऽप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण।'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव कथासरित्सागरे पाणिनिकात्यायनयोर्विद्वेषपूर्वकं परस्परशास्त्रार्थकथा प्रवृत्ता। महाभाष्यञ्चेदं वार्तिकानामेव व्याख्यानम्, वार्तिकमवलम्ब्यैव भाष्यस्य प्रायः प्रवृत्तिदर्शनात्।

पाणिनिना हि भूतार्थे लकारत्रयं विहितम्—तत्र सामान्यभूते लुङ्, अनद्यतनभूते लङ्, अनद्यतनपरोक्षे च लिडिति 'लुङ्' 'अनद्यतने लङ्' 'परोक्षे लिट्' चेति सूत्रव्यवस्थाकृता। 'अनद्यतने लङ्' इति सूत्रे कात्यायनेन 'परोक्षे च लोकविज्ञाने प्रयोक्तुर्दर्शनविषये' इति वार्तिकं पठितम्। तत्रोदाहरणप्रसङ्गे भगवान् भाष्यकारः प्राह—'अरुणद् यवनः साकेतम्, अरुणद् यवनो मध्यमिकाम्'। प्रयोक्तुर्दर्शनविषय इति किम्, 'जघान कंसं किल वासुदेवः' इति। अत्र प्रदीपे कैयटः—अननुभूतत्वात्परोक्षेऽपि प्रत्यक्षयोग्यतामात्राश्रयेण दर्शनविषय इति विरोधाभावः, उद्द्योते च नागेशः। भाष्ये जघानेति कंसवधो हि नेदानीन्तनप्रयोक्तुर्दर्शनयोग्योऽपीत्यर्थः, अरुणदित्युदाहरणे तु तुल्यकालं प्रवक्तेति बोध्यम्। एतस्याऽयमभिप्रायः—या घटना स्वयं न दृष्टा, परं स्वकाले एव जातत्वेन दर्शनयोग्या लोकप्रसिद्धा च तस्य अदृष्टत्वेन परोक्षत्वात् पाणिनिमते लिडेव भवति, किन्तु कात्यायनमते तत्र लङ्प्रयोक्तव्य इति।

अद्यत्वे पाणिनीयव्याकरणस्य यादृशी प्रतिष्ठा यथा वा शास्त्रेषु मुख्यं स्थानं गण्यते, सोऽयं भगवतः पाणिनेः, कात्यायनस्य, पतञ्जलेश्च प्रभावः। पतञ्जलिकृतं महाभाष्यं न केवलं व्याकरणस्यैव निबन्धः, किन्त्वत्र सर्वे ज्ञातव्याः विषयाः, लौकिका व्यवहाराः, प्राक्तना इतिहासाः आवश्यकाः धर्माः दर्शनानां सिद्धान्ताः, गूढतमानि विज्ञानानि च तत्र तत्र सपरिकरं विवेचितानि। वैज्ञानिका यमाकर्षणसिद्धान्तं न्यूटनेनाऽऽविष्कृतं मन्यन्ते, स तु भगवता पतञ्जलिना 'स्थानेऽन्तरतमः' इति सूत्रभाष्ये बहुपूर्वमेव समुद्घोषितः।

नामान्तराणि—विभिन्नेषु प्राचीनेषु ग्रन्थेषु पतञ्जलेराचार्यस्य गोनर्दीय-गोणिकापुत्र-नागनाथ-अहिपति-फणिभृत्-शेषराज-शेषाहि-चूर्णिकार-पदकारप्रभृतीनि नामान्तराण्युपलभ्यन्ते। वैजयन्तीकोषकारो गोनर्दीयशब्दं पतञ्जलेर्नामान्तररूपेण स्वीकरोति। व्याकरणमहाभाष्येऽनेकेषु स्थलेषु गोनर्दीय आचार्यस्य मतानि निर्दिष्टानि। तथा हि—गोनर्दीयस्त्वाह—सत्यमेतत्, सति त्वन्यस्मिन्निति। गोनर्दीयस्त्वाह—अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ। त्वकत्पितृकौ मकत्पितृक इत्येव भवितव्यमिति। न तर्हि इदानीमिदं भवति—इच्छाम्यहं काशकटीकारमिति। इष्टमेवैतद् गोनर्दीयस्य। 'गोनर्दीय आह—इष्टमेवैतत् संगृहीतं भवति—अतिजरमतिजरैरिति भवितव्यम्।

भर्तृहरि-कैयट-नागेश-राजशेखरप्रभृतीनां मते गोनर्दीयः पतञ्जलेर्वाचकः। युधिष्ठिरमीमांसक-महोदयमतानुसारेण गोनर्दीयः पतञ्जलेराचार्यात् सर्वथा भिन्नः प्रतीयते। महाभाष्ये गोणिकापुत्रस्य मतमुपलभ्यते, तथैव नागेशभट्टस्य उद्द्योतटीकया प्रतीयते यदनेके प्राचीनाः टीकाकाराः गोणिकापुत्रशब्दं भाष्यकारस्य पतञ्जलेर्नामान्तरत्वेन स्वीकुर्वन्ति स्म। परन्तु श्रीमीमांसाकमतानुसारेण गोणिकापुत्रो भाष्यकारस्य पतञ्जलेर्नामान्तरं नास्ति, सः पतञ्जलेर्भिन्नः। कैयटेन महाभाष्ये प्रदीपटीकायां पतञ्जलिकृते 'नागनाथ'शब्दः प्रयुक्तः। चक्रपाणिः चरकसंहिताग्रन्थस्य टीकाप्रारम्भे अहिपतिनाम्ना पतञ्जलिं नमस्करोति। वैयाकरणभूषणसारे भाष्यकारस्य 'फणि' इति नाम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यते। भोजराजेन योगसूत्रवृत्तेरारम्भे 'फणिभृत्' नाम्ना पतञ्जलेर्निर्देशो विहितः। अमरचन्द्रसूरिमहोदयेन हैमवृहद्वृत्त्यवचूर्णिग्रन्थे महाभाष्यस्यैकः पाठः 'शेषराज'नाम्नाऽभिहितः। वल्लभदेवेन शिशुपालवधमहाकाव्यस्य (2.112) टीकायां पतञ्जलिः 'शेषाहि''नाम्ना स्मृतः। भर्तृहरिप्रणीतायां महाभाष्यदीपिकायां 'चूर्णिकारपदेन' त्रिधा पतञ्जलेरुल्लेखो विहितः। साङ्ख्यकारिकायाः युक्तिदीपिकायां टीकायां महाभाष्यस्य (1.4. आ. 2.21) वचनं 'चूर्णिकार'-नाम्नोद्धृतम्। बौद्धधर्मावलम्बिना चीनदेशीयइत्सिगमहोदयेन महाभाष्यस्य 'चूर्णि' चूर्णिनाम्नोल्लेखो विहितः। क्षीरस्वामिना अमरीटीकायां 'चूर्णिः' भाष्यपर्यायत्वेन स्वीकृतः। स्कन्धस्वामिना निरुक्तटीकायां (1.3) पदकारनाम्ना 5.2.28 सूत्रस्थमहाभाष्यपाठः उद्धृतः। उव्वटेनाऽपि ऋक्प्रातिशाख्यस्य (13.19) टीकायां पदकारनाम्ना महाभाष्यस्य (1.1. आ. 4. सू. 9) पाठ उद्धृतः। दुर्घटवृत्तिग्रन्थे अनुपदकारस्यैकं मतमुद्धृतमस्ति। मैत्रेयरक्षितेनाऽपि तन्त्रप्रदीपे (7.4.1) अनुपदकारस्य मतमुद्धृतम्। परन्तु अनुपदकारनाम्नोद्धृतानि मतानि महाभाष्ये नोपलभ्यन्ते। काशिकायां पदशेषकारस्यैकं मतमुद्धृतमस्ति, परन्तु तदपि महाभाष्ये नोपलभ्यते। पदशेषकारस्यैकमुद्धरणं पुरुषोत्तमदेवप्रणीतायाः महाभाष्यलघुवृत्तेः 'भाष्यव्याख्याप्रपञ्च' इत्याख्यायां टीकायामप्युपलभ्यते। अनुपदकारपदशेषकारयोरेकत्वमस्ति न वेति विचारणीयमस्ति।

पतञ्जलेर्वंशो देशश्च—नागेशभट्टानुसारेण पतञ्जलेर्मातुर्नाम गोणिकाऽऽसीत्। जनश्रुत्यनुसारं पतञ्जलेर्जन्मस्थानं गोनर्ददेश आसीत्। अत एव पतञ्जलिः गोनर्दीयः प्रोच्यते। भण्डारकरमहोदयेन अयोध्यात उत्तरपश्चिमे वर्तमानः साम्प्रतिकं गोण्डामण्डलमेव गोनर्दो मन्यते। 'एङ् प्राचां देशे' इति सूत्रस्य काशिकावृत्तौ एणीपचनीयः, गोनर्दीयः, भोजकटीय इत्याद्युदाहरणैरयं गोनर्दीयः प्राच्यदेशवासी प्रतीयते। भर्तृहरि-कैयट-राजशेखरप्रभृतयो ग्रन्थकाराः विद्वांसो गोनर्दीयं पतञ्जलेर्नामान्तरं स्वीकुर्वन्ति। वैजयन्तीकोशकारोऽपि गोनर्दीयं पतञ्जलिमेव मनुते। किन्तु डॉ० कीलहार्नमहोदयस्य मतमस्ति यद् गोनर्दीय आचार्यो हि पतञ्जलेर्भिन्न एवाऽस्ति। 'पुष्यमित्रं याजयामहे' इति भष्योदाहरणात् पुष्यमित्रस्य पुरोहितोऽयमासीदित्यपि साधयन्ति समालोचकाः।

यद्यपि पुष्यमित्रस्य राजधानी पाटलिपुत्रमासीत् तथापि अयोध्यायां तेनोपराज्यं स्थापितमासीत्। ततश्च गोण्डामण्डलमधिवसतः पतञ्जलेः सम्भवति अयोध्यावसता पुष्यमित्रेण सह सम्बन्धः। केचित्तु गोनर्दम् उज्जयिनीप्रान्ते मध्यदेशे मन्यन्ते। यस्य प्राकृतं नाम गोनद्धमित्यासीत्। परन्तु काशिकादौ गोनर्दः प्राग्देशेषु गणितो, न दक्षिणदेशेषु। अतः गोण्डा एव गोनर्दो मन्तव्यः।

महाभाष्ये 'अभिजानासि देवदत्त कश्मीरान् गमिष्यामः, तत्र सक्तून् पास्यामः' इत्याद्युदाहरणेषु कश्मीरगमनस्योल्लेख उपलभ्यते। एतादृशान्युदाहरणान्याधारीकृत्य कैश्चिद् विद्वद्भिः पतञ्जलिः काश्मीरनिवासीति साधितः।

महाभष्यस्य 'इहाधीमहे, इह वसामः, इह पुष्यमित्रं याजयामः' इत्याद्युदाहरणात् प्रतीयते यत् पतञ्जलिः पाटलिपुत्रे निवसति स्म। महाभाष्यस्य विविधनिर्देशैर्ज्ञायते यत् पतञ्जलिः मथुरा-साकेत-कौशाम्बी-पाटलिपुत्रादिभिर्यथावद्विज्ञ आसीत्। अतः पतञ्जलेर्जन्मस्थानं कुत्रासीदिति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्दिग्धं प्रतीयते; किन्तु काश्मीराधिपतेरभिमन्योः शासनकाले चन्द्राचार्यद्वारा, पुनः काश्मीराधिपतेर्जयापीडस्य शासनकाले क्षीरद्वारा महाभाष्यस्य पुनरुद्धाराधारेणेदं वक्तुं शक्यते यद् भाष्यकारस्य पतञ्जलेर्जन्मभूमिः काश्मीरमेवासीत्।

भाष्यकारस्य पतञ्जलेः कालः—पतञ्जलेरितिवृत्तमन्धकारावृतमस्ति। पतञ्जलेः कालनिर्णये महाभाष्ये अनेकाः सहायिकाः सामग्र्य उपलभ्यन्ते। तथा हि—1. अनुशोणं पाटलिपुत्रम्। 2. जेयो वृषलः। 3. काण्डीभूतं वृषलकुलम् कुड्यीभूतं वृषलकुलम्। 4. मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः। 5. अरुणद्यवनः साकेतम्, अरुणद् यवनो मध्वमिकाम्। 6. पुष्यमित्रसभा, चन्द्रगुप्तसभा। 7. महीपालवचःश्रुत्वा जुघुषुः पुष्यमाणवाः। एष प्रयोग उपपन्नो भवति। 8. इह पुष्यमित्रं याजयामः। 9. पुष्यमित्रो यजते, याजका याजयन्ति। 10. यदा भवद्विधः क्षत्रियं याजयेत्। यदि भवद्विधः क्षत्रियं याजयेत्।

अत्र प्रथमोद्धरणे पाटलिपुत्रस्योल्लेखोऽस्ति। महाभाष्ये पाटलिपुत्रस्य नामाऽनेकधा प्रयुक्तम्। वायुपुराणानुसारेण महाराजेन उदयीनामाऽभिधेयेन राज्ञा गंगायाः दक्षिणे कूले कुसुमनामानं नगरं कृतम्। आधुनिकानामैतिहासिकानाम्मतानुसारेण कुसुमपुरमिति पाटलिपुत्रस्यैव नामान्तरमिति कृत्वा तेषां मते महाभाष्यकारः पतञ्जलिरुदयीनामाभिधेयमहाराजात् सर्वथाऽर्वाचीनः प्रतीयते।

द्वितीये तृतीये चोद्धरणे वृषल-वृषलकुलयोर्निर्देशोऽस्ति। द्वितीये उद्धरणे वृषलो 'जेय' उक्तः। तृतीये उद्धरणे कस्यचिन्महतो वृषलकुलस्य कुड्यवत् अतिसङ्कीर्णतायाः सङ्केतोऽस्ति। 'मुद्राराक्षस'नामाभिधेये नाटके चाणक्यश्चन्द्रगुप्तं प्रायो 'वृषल'नाम्ना सम्बोधयति। सम्प्रति वृषलशब्दस्य 'शूद्र' इत्यर्थोऽवबुद्ध्यते। विश्वप्रकाशकोशे वृषलशब्दः शूद्र-चन्द्रगुप्ताऽश्वार्थवाचक उक्तः। वस्तुतो वृषलशब्दो 'देवानां प्रियः' इतिवद् द्व्यर्थकोऽस्ति। अस्यैकोऽर्थोऽस्तिपापी, द्वितीयश्च—धर्मात्मा। यास्काचार्यस्य निरुक्ते वृषलशब्द एवं व्याख्यातः—'ब्राह्मणवद्वृषलवत्। ब्राह्मणा इव वृषला इव। वृषलो वृषशीलो भवति, वृषाशीलो वा।'

अर्थाद् वृषलस्याऽर्थो द्विविधः। प्रथमस्तावत्, वृषः = धर्मः, शीलः द्वितीयश्चाऽर्थः—वृषः = धर्मः + अशीलोऽस्ति। द्वितीयाऽर्थे 'शकन्धुः' इतिवद् अकारस्य पररूपं जातम्। एतयोरेव द्वयोरर्थयोर्वृषलशब्दस्य व्युत्पत्तिद्वयमपि समुपलभ्येते। तत्रैका व्युत्पत्तिस्तावत्, 'वृषं धर्मं लाति आदत्ते इति वृषलः' इत्यस्ति। अत्रैव 'वृषादिभ्यश्चित्' इत्युणादिसूत्रेण वृषधातोः कर्तरि कलप्रत्यये जाते सति 'वर्षतीति वृषलः' इति व्युत्पत्तिर्जायते। द्वितीया व्युत्पत्तिश्च मनुस्मृतावुल्लिखिताऽस्ति। तथा हि—

वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलम्।
वृषलं यं विदुर्देवास्तस्माद्धर्मं न लोपयेत्॥

एतादृशविभिन्नप्रवृत्तिनिमित्तानि दर्शयितुमेव निरुक्तकारेण निर्वचनद्वैषं दर्शितम्। अर्वाचीनैर्ग्रन्थकारैर्मौर्यचन्द्रगुप्ताय वृषलशब्दस्य प्रयोगं दृष्ट्वा 'मुरा'नाम्न्याः शूद्रायाः चन्द्रगुप्तोत्पत्तिः कल्पिता, या ऐतिह्यविरुद्धत्वात् त्याज्याऽस्ति। मौर्यवंशः क्षत्रियवंश आसीत्। व्याकरणनियमानुसारेण मुरायाः सन्ततिर्मैरियपदेनैव भाषितुं शक्यते, न मौर्यपदेन।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवेचनयाऽनया स्पष्टं यन्महाभाष्यस्य द्वितीयतृतीयोद्धरणयोर्मौर्यबृहद्रथसमकालिकस्य मौर्यकुलस्य हीनताया उल्लेखोऽस्ति। चतुर्थोद्धरणे स्पष्टतया मौर्यशब्दस्योल्लेखोऽस्ति। अतो महाभाष्यकारो मौर्यराज्यानन्तरमुत्पन्नोऽभूदिति अनुमातुं शक्यते।

पञ्चमोद्धरणे अयोध्यानगर्यां माध्यमिका(मध्वमिका)नगर्याञ्च कस्यचिद् यवनस्याऽऽक्रमण-स्योल्लेखोऽस्ति। गार्गीसंहितानुसारेणाऽस्य राज्ञो नाम धर्ममीत आसीत्। व्याकरणस्य नियमानुसारेण 'अरुणत्' शब्दस्य प्रयोगकर्त्रा भाष्यकारेण यवनराजस्य धर्ममीतस्य समकालिकेन भाव्यम्।

षष्ठसप्तमाऽष्टमनवमोद्धरणेषु स्पष्टतया पुष्यमित्रस्योल्लेखोऽस्ति। अनेकेषां विदुषां मता-नुसारेणाऽष्टमोद्धरणे महाभाष्यकारद्वारा पुष्यमित्रीयाऽश्वमेधस्य ऋत्विक्कर्मकरणस्य सङ्केतोऽस्ति। दशमोद्धरणं तथ्यमिदं पुष्णाति। अत्र क्षत्रियद्वारा यजनकर्मणो निन्दा विहिता। पतञ्जलेर्यजमानो पुष्यमित्रो ब्राह्मणवंशीय आसीत्।

महाराजेन समुद्रगुप्तेन प्रणीतस्य कृष्णचरितस्य प्रस्तावनया ज्ञायते यन्महामुनिना पतञ्जलिना 'महानन्दमयं काव्यं' निर्मितमासीत्। तथा हि—

विद्ययोद्रिक्तगुणतया भूमावमरतां गताः।
पतञ्जलिर्मुनिवरो नमस्यो विदुषां सदा।।
कृतं येन व्याकरणभाष्यं वचनशोधनम्।
धर्मावियुक्ताश्चरके योगाः रोगमुषः कृताः।।
महानन्दमयं काव्यं योगदर्शनमद्भुतम्।
योगव्याख्यानभूतं तद्रचितं चित्तदोषहम्।।

यदि महानन्दशब्दः श्लेषाद् महानन्दपद्मस्य वाचको भवेत्तर्हि निश्चयेनैव पतञ्जलिर्महा-नदपद्माादुत्तरवर्ती भविष्यति।

एतानि प्रमाणान्याधारीकृत्येदं वक्तुं शक्यते यन्महाभाष्यकारः पतञ्जलिः शुङ्गवंशीयस्य महाराजस्य पुष्यमित्रस्य समकालीन आसीत्; परन्तु युधिष्ठिरमीमांसकमहोदयेन 'संस्कृत व्याकरणशास्त्र का इतिहास' इत्यभिधेये स्वग्रन्थे महाभाष्यकारस्य पतञ्जलेः कालः द्विसहस्र-वैक्रमाब्दपूर्वमिति निर्धारितम्। तत्रोपस्थापितानि प्रमाणान्यधोलिखितानि—

- महाभाष्ये कुत्रचिदपि पुष्यमित्रस्य 'शुङ्ग' 'राजा' इति वा विशेषणं वा नोपलभ्यते, न च कुत्रचित् पुष्यमित्रस्याऽश्वमेधयज्ञकरणस्यैव सङ्केतोऽस्ति। अत इदं नामाऽपि देवदत्त-यज्ञदत्त-विष्णुमित्रादिवत् सामान्यपदमेव।
- यदि 'इह पुष्यमित्रं याजयामः' इत्यस्मिन् वाक्ये 'इह' इति पदं पाटलिपुत्रस्य निर्देशकत्वेन स्वीक्रियेत तर्हि तदुत्तरवर्त्तिना 'इह अधीमहे' इत्यनेन वाक्येनेदं स्वीकर्तव्यं भविष्यति यत् पतञ्जलिः पुष्यमित्रस्याऽश्वमेधयज्ञसमये पाटलिपुत्रेऽध्ययनं करोति स्म। एता-दृशाऽर्थस्वीकारे अश्वमेधयाजनं गुरुमुखादध्ययनमिति द्विविधमपि कार्यं सममेव न भवितुर्महति। अत एतादृशवाक्यानां कश्मिंश्चिदर्थविशेषे सङ्केतरूपेण स्वीकरणमनुपपन्नमेव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

● 'चन्द्रगुप्तसभा' इत्युदाहरणं महाभाष्यस्यानेकेषु हस्तलेखेषु नोपलभ्यते; यत्रोपलभ्यते तत्रापि 'पुष्यमित्रसभा' इति वाक्यादनन्तरमेवोपलभ्यते। पाठक्रमोऽयमैतिहासिकदृष्ट्याऽयुक्तमेवाऽस्ति।

● महाभाष्यस्य पूर्वोद्धृते उद्धरणे बृषलशब्दस्याऽतिप्रसिद्धो 'धर्मात्मा' इत्यर्थोऽपि भवितुर्महति। वृषलस्याऽर्थः केवलं चन्द्रगुप्त एव नाऽस्ति।

● 'अरुणद् यवनः साकेतम्, अरुणद् यवनो मध्वमिकाम्' इत्यत्र कस्यचिद् विशिष्टस्य यवनस्य राज्ञ उल्लेखो नाऽस्ति। कालयवननामाऽतिप्राचीनो यवनसम्राड् भारतस्यैकस्मिन् बृहद्भागे आक्रमणं चकार, देशेऽस्मिन् तेनाऽत्यन्तमत्याचारा विहिताः। श्रीकृष्णास्तमवधीत्। भारतीया आर्या अतिप्राचीनकालाद् यवनेभ्यः परिचिता आसन्। रामायणमहाभारतादिषु यवनानां बहुधा उल्लेख उपलभ्यते। अतः केवलमेतावता निर्देशेन कालविशेषस्य सिद्धिर्नैव भवितुमर्हति।

● मौर्यवंशः प्राचीनः, तस्याऽऽरम्भश्चन्द्रगुप्तादेव जातः। अतः केवलं मौर्यपदस्योल्लेखाद् विशिष्टः परिणामो न साधयितुं शक्यते। महाभाष्यस्य टीकाकारमतेषु मौर्यशब्दः शिल्पिवाचकोऽस्ति।

● आचार्यस्य भर्तृहरेः, कल्हणस्य च लेखाज्ज्ञायते यत् चन्द्राचार्येण विलुप्तप्रायस्य व्याकरणमहाभाष्यस्य पुनरुद्धारो विहित आसीत्। महता प्रयत्नेन चन्द्राचार्येण दक्षिणप्रदेशान्महाभाष्यस्यैका प्रतिरुपलब्धा। अत एवेदं सम्भाव्यते यद् यथा विलुप्ताया अग्निवेशसंहितायाश्चरकदृढबलाभ्यां परिष्कारो विहितः, यथा च जीवकेन काश्यपसंहितायाः परिष्कारो विहितस्तथैव चन्द्राचार्येण विनष्टस्य महाभाष्यस्य परिष्कारो विहितो भवेत्।

आयुर्वेदीयचरकसंहितायामुक्तं—यद् अस्मिन् काले अर्थात् कलेरारम्भे मनुष्याणां खल्वायुर्वर्षशतपरिमाणमस्ति। प्रत्येकं शतवर्षानन्तरं मनुष्याणामायुषः काले खल्वेकसंवत्सरस्य ह्रासो जायते। पतञ्जलिनाऽप्युक्तं महाभाष्ये—किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति वर्षशतं जीवति।

अनेन स्पष्टतया सिद्ध्यति यद् भाष्यकारकाले मनुष्याणां प्रायिकमायुः शतवर्षाणामासीदिति। चरकसंहितायां मनुष्यायुषो यो निर्देशो विहितः, उत्तरोत्तरञ्चायुषो ह्रासस्य यद् वैज्ञानिकं तत्त्वं सङ्केतितम्, तस्योल्लेखोऽभारतीयग्रन्थेष्वप्युपलभ्यते। बाइबिलग्रन्थे लिखितमस्ति—हमारी आयु के बरस सत्तर तो होते हैं और चाहे बल के कारण अस्सी बरस भी हों, तो भी उन पर का घमण्ड कष्ट और व्यर्थ बात ठहरता है।

अनेन स्पष्टं भवति यद् ईसामसीहमहोदयस्य काले मनुष्याणां प्रायिकमायुः सप्ततिवर्षाणां स्वीक्रियते स्म। भारतीयैतिहासिककालगणनानुसारेण ईसामसीहमहोदयस्य कालः ३१०० मितकलिसंवत्सरे स्वीक्रियते। एवं कलिप्रारम्भकालाद् ईसामसीहकालं यावत् ३००० वर्षेषु चरकस्य प्रतिशतवर्षे एकसंवत्सरस्य ह्रासनियमानुसारेण ३० वर्षाणां ह्रास आवश्यक एव। अनेनेदमपि प्रमाणितं भवति यत् चरकसंहिता ईसामसीहकालात् त्रिसहस्रवर्षप्राचीना त्ववश्यमेवाऽस्ति। अर्थाद् भारतीया कालगणनैव समीचीना। पाश्चात्यैर्विद्वद्भिः ईसातः १४०० मितवर्षपूर्वं विहिता भारतयुद्धकालस्थापना च नितान्तमशुद्धैव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतञ्जलिना 'यः सर्वथा चिरं जीवति' इत्यनेन यो भावो व्यक्तः, स एव बाइबिलग्रन्थे 'चाहे बल के कारण' शब्दैः प्रकटितः। अत एवैतदुभयवर्णनस्य तुलनया स्पष्टं ज्ञायते यत् सामान्यमायुः प्रयत्नद्वाराऽतिरिक्तरूपेण दशवर्षाणि यावद् वर्द्धयितुं शक्यते। एतन्नियमानुसारेण भाष्यकारशब्दैरिदमेव तात्पर्यमवबुद्ध्यते यद् भाष्यकारस्य काले मनुष्याणां सामान्यमायुर्नवतिमितवर्षाणामासीत्; चिरञ्जीविनश्च शतं वर्षाण्यपि जीवन्ति स्म। एवं चरकस्यायर्विज्ञाननियमानुसारेण महाभाष्यकारस्य पतञ्जलेराचार्यस्य कालो वैक्रमाब्दाद् द्विसहस्रमितवर्षपूर्वमेव स्वीकर्तव्यः।

कृतयः—पतञ्जलेराचार्यस्य सम्प्रति त्रयो ग्रन्था उपलभ्यन्ते—निदानसूत्रम्, योगदर्शनम्, व्याकरणमहाभाष्यञ्चेति। तत्र निदानसूत्रम्, योगदर्शनञ्चोभे अपि कस्यचित् प्राचीनस्य पतञ्जलेः कृती स्तः—इति श्रीमीमांसकमतम्।

महाराजसमुद्रगुप्तप्रणीतस्य कृष्णचरितस्य पूर्वोद्धृतपद्यावलोकनेन ज्ञायते यद् महाभाष्यकारेण पतञ्जलिना 'महानन्द', 'महानन्दमय'मित्याख्यं वा काव्यं प्रणीतमासीत्। काव्येऽस्मिन् पतञ्जलिना काव्यमिषेण योगस्याऽपि व्याख्या विहिताऽऽसीत्। अस्य 'महानन्द'काव्यस्य मगधसम्राजा महानन्देन सह कश्चिदपि सम्बन्धो नाऽऽसीत्।

चक्रपाणि-पुण्यराज-भोजदेवप्रभृतयोऽनेके ग्रन्थकाराः पतञ्जलिं चरकसंहितायाः प्रतिसंस्कारकं स्वीकुर्वन्ति। समुद्रगुप्तस्य कृष्णचरिताऽवलोकनेन ज्ञायते यद् महाभाष्यकारेण पतञ्जलिना चरकसंहितायां केषाञ्चिद् धर्माविरुद्धानां योगानां सन्निवेशो विहितः। चरकसंहितायाः सूत्रस्थानादिष्वन्ते पार्श्वाङ्कितं वाक्यमुपलभ्यते—अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते।

सम्प्रति प्रश्नोऽयं समुपतिष्ठते यत् किं 'चरक' इति पतञ्जलेरेव नामान्तरमस्ति। श्री पं० युधिष्ठिरमीमांसकमहोदयेन स्वकीये 'संस्कृत व्याकरणशास्त्र का इतिहास' इत्यभिधेये ग्रन्थे महाभाष्ये समुपलभ्यमानानां वैदिकपाठानां सम्प्रत्युपलभ्यमानशाखानां पाठैः सह तुलना विहिता। तेनेदं साधितं यत् पतञ्जलिः प्रायः काठकसंहितापाठान् महाभाष्ये समुद्धृतवान्। काठकसंहिता चरकचरणान्तर्गताऽस्ति। अतः पतञ्जलिश्चरकशाखाध्यायीति प्रतीयते, तस्य चरकचरणत्वाच्च सः 'चरक' इति वक्तुं शक्यते।

पण्डितगुरुपदहालदारमहोदयमतानुसारेण 'वातस्कन्धोपेतस्कन्धोपेतसिद्धान्तसारावली' इत्यभिधेयो वैद्यकग्रन्थोऽपि पतञ्जलिना प्रणीतः।

कोषग्रन्थानामनेकासु टीकासु वासुकि-शेष-भोगीन्द्र-फणिपतिप्रभृतिनामभिः कस्यचित् कोशग्रन्थस्योद्धरणान्युपलभ्यन्ते। हेमचन्द्र आत्मनः 'अभिधानचिन्तामणिकोषटीकायाः' प्रारम्भेऽन्यैः कोषकारैः सह वासुकिं निर्दिशति; परन्तु स्वग्रन्थे तस्यानेकान् पाठान् 'शेष'नाम्ना समुद्धरति। अतः शेषवासुकयोर्भेदो नाऽस्ति। 'विश्वप्रकाशकोषस्य' प्रारम्भे भोगीन्द्रफणिपति इत्याख्ये नामनी उपलभ्येते। राघवो 'नानार्थमञ्जरी' ग्रन्थस्य प्रारम्भे शेषकारस्य नाम उद्धृतं करोति। अतः शेष-वासुकि-भोगीन्द्र-फणिपति-अहिपति-नागनाथ-पदकारादीनि पतञ्जलेरेव नामान्तराणि। अनेन प्रतीयते यन्महाभाष्यकारेण पतञ्जलिना कश्चन कोषग्रन्थोऽपि प्रणीत आसीत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषनाम्ना ग्रन्थकारेण (पतञ्जलिना) सेश्वरसाङ्ख्यस्य 'आर्यापञ्चाशीति'नामा कश्चित् कारिकाग्रन्थः प्रणीत आसीत्। अभिनवगुप्तेन तस्मिन्नेव किञ्चित् परिवर्तनं विधाय तस्य नाम 'परमार्थसार' इति निर्धारितम्। साङ्ख्यकारिकायाः युक्तिदीपिकाटीकायां पतञ्जलेराचार्यस्य साङ्ख्य-विषयकान्यनेकानि मतान्युद्धृतानि। पतञ्जलेराचार्यस्यैकं मतं योगसूत्रस्य व्यासभाष्येऽप्युद्धृतमस्ति।

गायकवाडसंस्कृतग्रन्थमालान्तर्गते प्रकाशिते शारदातनयप्रणीते 'भावप्रकाशनम्' इत्यभिधेये ग्रन्थे वासुकि-(पतञ्जलि)प्रणीतात् कस्माच्चित् साहित्यशास्त्राद् 'भावद्वारा रसोत्पत्ति'-प्रकरणस्योल्लेख उपलभ्यते।

शिवदासेन चक्रदत्तस्य टीकायां पतञ्जलिप्रणीतस्य 'लोहशास्त्र'स्योल्लेखो विहितः। पतञ्जलिप्रणीतत्वेनाऽभिहितेषु साङ्ख्यशास्त्र-साहित्यशास्त्र-लोहशास्त्रग्रन्थेषु कस्तावन्महाभाष्य-कारेण पतञ्जलिना प्रणीत इति तु सन्दिग्धमेव।

पातञ्जलमहाभाष्यस्वरूपं तद्वैशिष्ट्यञ्च

स्वातन्त्र्येण सूत्राणि तु क्वचिदेव व्याख्यातानि महाभाष्ये। अन्यशास्त्रभाष्यापेक्षया व्याकरणमहाभाष्ये इदमस्ति वैलक्षण्यम्—वेदान्तादिभाष्यस्य व्याख्यानभूतं वार्तिकम्, व्याकरणे तु वार्तिकव्याख्यानभूतं वार्तिकम्। अतो व्याकरणभाष्यं महाभाष्यमित्युच्यते। स्वातन्त्र्येष्ट्यादिमत्वं महत्त्वमिति गुरुचरणाः। भाष्यलक्षणञ्च—

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।

यथा 'वृद्धिरादैच्' इति सूत्रे वृद्धिपदेन सूत्रकृता पाणिनिना मङ्गलं कृतम्, 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र सिद्धपदेन वार्तिककृता मङ्गलं विहितम्, तथैव 'अथ शब्दानुशासनम्' इत्यत्र 'अथ'शब्देन भाष्यकृता मङ्गलमनुष्ठितम्।

महाभाष्ये यद्यपि प्रधानतया कात्यायनीयवार्तिकानामुल्लेखो विद्यते, तथापि तत्राऽन्येषामपि वार्तिककाराणां वार्तिकानि समुद्धृतानि सन्ति। विष्णुधर्मोत्तरपुराणस्य तृतीये खण्डे चतुर्थाध्याये भाष्यस्य लक्षणं कृतमस्ति यद् यस्मिन् ग्रन्थे सूत्रार्थसूत्रानुसारि वाक्यवार्तिकस्थपदानां व्याख्यानं क्रियते, स ग्रन्थो भाष्यनाम्ना व्यवह्रियते।

महाभाष्यस्य रचनाशैली—यद्यपि पातञ्जलमहाभाष्यं व्याकरणशास्त्रस्यैव मान्यो ग्रन्थो विद्यते, तथापि अन्यव्याकरणग्रन्थवदयं शुष्क एकाङ्गी च नाऽस्ति। अत्र व्याकरणसदृशस्य क्लिष्टस्य विषयस्याऽत्यन्तसरस-सरल-प्राञ्जलया सरण्या प्रतिपादनं कृतमस्ति। अस्य भाषा दीर्घपदसमासरहिता, लघुलघुतरवाक्यकदम्बकैर्गुम्फिता, प्रश्नोत्तरसनाथा, सरला, सरसा, मञ्जुला चाऽस्ति। लेखनशैलीदृष्ट्या ग्रन्थोऽयं संस्कृतवाङ्मयेऽद्भुतो वर्तते। न कोऽपि ग्रन्थ एतद्रचनाशैलीसमतां विधातुं समर्थोऽस्ति। शबरस्वामिना महाभाष्यस्याऽऽदर्शे स्वं मीमांसाभाष्यं लिखितुं प्रयतितम्; परन्तु तस्य भाषा नैतादृशी प्राञ्जला जाता, स्थले-स्थले तद्भाषा प्रस्खलितभावा सती, न नैजं भावमभिव्यञ्जयितुं क्षमा। स्वामिशंकराचार्यकृता वेदान्तभाष्यभाषा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

147341

यद्यपि प्राञ्जला, भावव्यञ्जनसमर्था, प्रसादगुणगुम्फिताऽस्ति, तथापि महाभाष्यवत् सरला, सरसा, स्वाभाविकी च नाऽस्ति। चरकसंहितायाः गद्यभागभाषा महाभाष्यवत्सरला, सरसा, स्वाभाविकी, प्राञ्जला वा सत्यपि तद्विषयप्रतिपादनशैली अत्युत्कृष्टत्वं न बिभर्ति। अतो भाषायाः सरलता-प्राञ्जलता-स्वाभाविकता-विषयप्रतिपादनशैल्युत्कृष्टत्वादिदृष्ट्या पतञ्जलिप्रणीतं व्याकरणमहाभाष्यं समस्तसंस्कृतवाङ्मयेष्वादर्शभूतमस्ति।

महाभाष्यस्य वैशिष्ट्यम्—महाभाष्यं हि पाणिनीयव्याकरणस्याऽत्यन्तं प्रामाणिकं ग्रन्थरत्नमस्ति। महामुनेः पतञ्जलेराचार्यस्य काले पाणिनीयव्याकरणस्याऽन्येषां प्राचीनानां व्याकरणग्रन्थानाञ्च महती ग्रन्थराशिर्विद्यमानाऽऽसीत्। महामुनिना भगवता पतञ्जलिना पाणिनीयव्याकरणव्याख्यानव्याजेन महाभाष्ये तेषां समस्तानां ग्रन्थानां सारः संगृहीतोऽस्ति। महाभाष्येऽनेकेषां प्राचीनवैयाकरणानामुल्लेखोऽस्ति, अनेकेषाञ्च प्राचीनग्रन्थानामनेकानि वचनानि चोद्धृतानि। महाभाष्यस्य सूक्ष्मपर्यालोचनया प्रतीयते यदयं ग्रन्थो न केवलं पाणिनीयव्याकरणशास्त्रस्यैव प्रामाणिको ग्रन्थोऽस्ति; अपि त्वयं समस्तानां विद्यानामाकरग्रन्थोऽस्ति। अत एवोक्तं भर्तृहरिणा वाक्यप्रदीये—

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।

महाभाष्यस्याऽनेकशो लोपस्तदुद्धारश्च—उपर्युक्तलेखेन स्पष्टतया प्रतीयते यत् 'पातञ्जलमहाभाष्यम्' अतिप्राचीनतमो ग्रन्थोऽस्ति। एतावति सुदीर्घकाले महाभाष्यस्याऽध्ययनाऽध्यापनपरम्परायाः न्यूनातिन्यूनं त्रिधोच्छेदोऽवश्यमेव जातः।

प्रथमवारम्—भर्तृहरेराचार्यस्य लेखाज्ज्ञायते यद् बैजिसौभवहर्यक्षप्रभृतिभिः शुष्कतार्किकैर्व्याकरणमहाभाष्यस्य प्रचारो विनष्टः। चन्द्राचार्येण महता परिश्रमेण दक्षिणस्य कस्माच्चिद् पर्वतोयप्रादेशादेकं हस्तलेखं लब्ध्वा तस्य पुनः प्रचारो विहितः। तथा हि—

बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके।।
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः।।
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।

(वाक्यपदीयम्-2.287-489)

कल्हणेन लिखितं यत् चन्द्राचार्येण काश्मीराधिपतेरभिमन्युमहाराजस्याऽऽदेशेन महाभाष्यस्योद्धारो विहितः; तथाहि—

चन्द्राचार्यादिभिर्लब्ध्वादेशं तस्मातदागमम्।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम्।।

(राजतरङ्गिणी-1.116)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयवारम्—कल्हणमहोदयस्य 'राजतरङ्गिणी'त्यभिधेयग्रन्थानुसारेण वैक्रमाब्दस्याऽष्टमे शतके महाभाष्यस्य प्रचारः पुनः विनष्टो जातः। काश्मीरस्य महाराजो जयापीडो देशान्तरात् 'क्षीर'नामानं शब्दविद्योपाध्यायमाहूय विच्छिन्नस्य महाभाष्यस्य पुनः प्रचारमकारयत्। तथाहि—

देशान्तरादागमय्याथ व्याचक्षाणान् क्षमापतिः।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले।।
क्षीराभिधानाच्छब्दविद्योपाध्यायात्सम्भृतश्रुतः।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः।। (1.176)

महाराजस्य जयापीडस्य शासनकालः ८०८ वैक्रमसंवत्सरात् ८३९ मितवैक्रमसंवत्सरं यावत् स्वीक्रियते। एकः क्षीरस्वामीनामा वैयाकरणः क्षीरतरङ्गिणी-अमरकोशटीकाद्यनेकग्रन्थानां प्रणेताऽऽसीत्। कल्हणेन स्मृतः 'क्षीरः' एतस्मात् क्षीरस्वामिनो भिन्न एव। क्षीरस्वामी स्वग्रन्थेषु महाराजं भोजम्, तस्य सरस्वतीकण्ठाभरणञ्च बहुधा समुद्धरति। अतोऽस्य क्षीरस्वामिनः कालः वैक्रमैकादशशतकस्योत्तरार्द्धोऽस्ति।

तृतीयवारम्—वैक्रमसंवत्सरस्य अष्टादशशतके एकोनविंशतितमे शतके च सिद्धान्त-कौमुदीलघुशब्देन्दुशेखरादीनामर्वाचीनग्रन्थानामत्यधिकेन प्रचारेण महाभाष्यस्याऽध्ययनाऽध्यापनं प्रायो लुप्तमेव संवृत्तमासीत्। काश्या अनेकेषां वैयाकरणपण्डितानामियं धारणाऽस्ति—

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।।

प्रथमवारं द्वितीयवारं च चन्द्राचार्यक्षीराभ्यां महाभाष्यस्योद्धारस्तात्कालिकानां सम्राजां साहाय्येन विहितः, परन्तु तृतीयवारं महाभाष्यस्योद्धारः कौपीनमात्रधारिणा परमहंसदण्डिना स्वामिविरजानन्दसरस्वतिमहाभागेन, तच्छिष्येण महर्षिदयानन्दसरस्वतिमहाभागेन च विहितः। श्रीमता विरजानन्दमहाभागेन तात्कालिकवैयाकरणपण्डितानां पूर्वोक्तधारणायाः विपरीताऽधोलि-खिता घोषणा विहिता—

अष्टाध्यायी महाभाष्ये द्वे व्याकरणपुस्तके।
ततोऽन्यत् पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम्।।

अद्य भारते वर्षे यत् कुत्रचिद् महाभाष्यस्येषदध्ययनाध्यापनमवलोक्यते, तत् श्रीस्वामिवि-रजानन्दमहाभागस्य, तच्छिष्यस्य महर्षिदयानन्दसरस्वतिमहाभागस्य चैव कृपाऽस्ति।

महाभाष्ये विषयोपन्यासः

अथ महाभाष्यस्य भाषासौष्ठवं, कठिनतरस्यापि विषयस्य सुलभतया विवेचनं, सर्वत्र शब्दस्य शब्दार्थस्यापि वा सफलत्वमित्यादिगुणसमूहमवलोक्य कस्य चेतो न चित्रीयेत। मीमांसान्यायशास्त्रादिटीकाग्रन्थानां केवलं भाष्यशब्देनैव व्यवहारः, अस्य श्रीमद्भगवत्पतञ्ज-लिप्रणीतस्य च महाभाष्यशब्देन व्यवहारोऽपि महत्त्वबोधनायादरेण लोके क्रियते। तथा चोक्तं पुण्यराजेन 'कृतेऽथ पतञ्जलिना' इति वाक्यपदीयकारिकाव्याख्याऽवसरे—'तच्च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके' इति। अस्याध्ययनाध्यापनप्रणालिरिदानीमुच्छिन्नेव प्रतिभाति। परकीयसत्तासमये परकीयभाषापराभूतप्रायेव भारतीया विद्या। यत्र क्वचन काश्यादिविशेषस्थलेषु संज्ञामात्रेणावशिष्टा तत्रापि टीकाग्रन्थैरेव सर्वमप्यायुः परिपूर्णमिति क्वावशिष्टोऽवकाशो भाष्याध्ययनाय। इदानीं स्वाधीने भारते प्रभविष्यति भारतीया विद्या, सुखी करिष्यति च संसारमिति न नः सन्देहः। भारतीयानामभ्युदये समुचिते काले सुसम्पन्नस्यास्य महाभाष्यस्यावलोकनेन हृदये सम्परिवर्तते यत् महाभाष्यकारसमये का वा भारतस्य दशाऽऽसीत्, कथञ्चैतद्देशीयाः कालं यापयन्ति स्म, कृष्यादिकं तदा कीदृशमासीत्, जातिविभागास्तदाऽऽसन्न वा, कथं वा तदानीन्तनानां मनुष्याणां स्वभाव आसीत्, देशे तदानीं प्रमाणादिव्यवहार आसीन्न वा, लोकव्यवहाराश्च कथमेतेषामासान्—इति। अस्य ज्ञानस्य प्रत्यक्षं तादृशसामग्र्यभावादशक्यमपि भाष्यप्रदत्तोदाहरणादिनाऽनुमातुं शक्यं स्यात्। यतः स्वाभाविकोऽयं समयस्तत्कालव्यवहारप्रतिबिम्बं सामाजिकानां लौकिकेष्वाचारेष्वप्यवतरति किमुत विशिष्टग्रन्थप्रणयितृव्यवहारेषु। यथा—इदानीन्तनानां सामाजिकानां व्यवहाराः सत्याहिंसादिकाल्पनिकाचारानपि नातिक्रमन्ते, जात्यादिव्युच्छेदाय सततं यतन्ते, लोककल्याणे ननु सर्वः समाज एव प्रवृत्त इति प्रतिभासयन्ति, किन्तु अधिकं! ये ये सभ्यानामिदानीन्तनानां व्यवहारास्तैः सर्वोऽपि भारतीयानामितिहासो हस्तामलकवदिव प्रतिभाति। तथैव भाष्यसदृशप्रेष्ठतमग्रन्थप्रणयितृव्यवहारा अपि तत्कालव्यपदेशायालमिति भाष्योदाहरणानि कानिचन विविच्य तात्कालिकीमवस्थामनुमातुं प्रत्ययते।

वस्त्रनिर्माणप्रकाराः—तथाहि—'तद्धितार्थोत्तरपदसमाहारे च' (2.1.50) इतिसूत्रभाष्ये 'कश्चित्तन्तुवायमाह—अस्य सूत्रस्य शाटकं वयेति। स पश्यति—यदि शाटको न वातव्यः, वातव्यो न शाटकः, स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवति' इति। एतदुदाहरणदर्शनेन वायकोऽपि यस्मिन् देशे एतादृशो विचक्षणः 'यदि शाटको न वातव्य' इत्यादि विचारयति, यत्र च सूत्रोत्पत्तिः सर्वैरपि क्रियते स्म येनायं प्रस्तुतो विचारो व्यवहारश्च श्रुतः श्रोत्रे सुखयति। तदानीन्तनैस्तैः सूत्रमपि निष्पाद्यते वस्त्रमपि च। सूत्रनिष्पादने विशेषसामग्र्या अभावात् यत्र तत्राऽऽपामरैः सर्वैरपि कर्तुं शक्यं स्यात्। न तथा वस्त्रवायनं, तच्च वायनसामग्र्यधीनमिति यत्र तत्र न कर्तुं पार्यत इति वायकसमीपे एवागमनमुल्लिख्यते भाष्ये। अन्यथा कश्चित्कञ्चिदाहेत्याद्येवोल्लिख्येत।

तस्मिन् समये न केवलं सामान्यवस्त्राणामेवोत्पत्तिरासीत्, किन्तु सूक्ष्मसूक्ष्मतरवस्त्राणामप्युत्पत्तौ कृतप्रयत्नास्तदीया जना दृश्यन्ते। यथा—'वर्णो वर्णेन' (2.1.68) इति सूत्रे पूर्वपदातिशय इति वार्तिके 'किं प्रयोजनं, सूक्ष्मवस्त्रतराद्यर्थः। यावता वस्त्राणि तद्वान्तमपेक्षन्ते, तद्वन्तं चापेक्ष्यवस्त्राणां वस्त्रैर्युगपत्स्पर्धा भवति। यथैवायं द्रव्येषु यतते—वस्त्राणि मे स्युरिति, एवं गुणेष्वपि यततेसूक्ष्मतराणि मे स्युरिति'। एतद्दर्शनेनेदं सुस्पष्टं प्रतीयते यत् न केवलं वस्त्राणामेवोत्पत्तौ कृतकृत्यास्ते किन्तु गुणवन्ति सूक्ष्मतराणि च वायकैर्निर्मीयन्ते स्म,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्त्रव्यवहारिणश्च गुणवद्वस्त्रव्यवहरणे दत्तचित्ताश्चासन्। युज्यते चैतत्। ये निरापदा वस्त्राणि गृह्णीयुस्ते यावन्ति गुणवन्ति सुशक्यानि तत्रैव कृतप्रयत्ना भविष्यन्ति न तु तेषां वस्त्रमात्रलाभेन समाश्वासः। अन्यच्च यत्र सूक्ष्मतरवस्त्रनिष्पादनशक्तिस्तत्र सुधौतवस्त्रादिनिष्पादनमप्यावश्यकम्। तादृशं चेदानीमेव, न तदाऽऽसीदित्यपि न मन्तव्यम्। तदा यथा सूक्ष्मतरवस्त्रनिष्पादने सामर्थ्यमासीत्। तथैव सुधौतवस्त्रनिर्माणेऽपि शक्तिरासीदिति प्रतीयते। तच्च—'अतिशायने तमबिष्ठनौ' (5.3.35) इत्यत्रोदाहरता भाष्यकृता स्पष्टीकृतमेतत्। तत्र हि 'एवं हि दृश्यते लोके—समाने आयामे विस्तारे पटस्यार्घोऽन्यो भवति काशिकस्य, अन्यो माथुरस्य। गुणान्तरं च खल्वपि शिल्पिन उत्पादयमाना द्रव्यान्तरेण प्रक्षालयन्ति। अन्येन शुद्धं धौतकं कुर्वन्ति, अन्येन शैफालिकम्, अन्येन माध्यमिकम्' इत्युक्तम्। एकस्यैव वस्त्रस्य गुणोत्पादनवैशिष्ट्येन भिन्नानि मूल्यानि भवन्ति, ताश्च क्रिया भिन्नभिन्नदेशेषु भिन्ना भिन्ना आसन् इत्यनेन व्यवहारेण गम्यते—काशिकस्य मूल्यमन्यत्, माथुरस्य चान्यदिति। तत्र धौतशैफालिकमाध्यमिकाः क्रियाः प्रक्षालनवैजात्यकृता वस्त्रस्य गुणविशेषकराः। तदेतच्च समानगुणे एव तादृशी स्पर्शा आसीत्, न गुणभेदकृता। शुक्लगुणस्य यन्मूल्यं तदेव कृष्णगुणस्येति नासीत्। तदग्रे 'क्रियमाणे चापि गुणग्रहणे समानगुणग्रहणं कर्तव्यम्, शुक्लात् कृष्णे माभूत्। न कर्तव्यम्। समानगुणे एव स्पर्धा भवति, न ह्याढ्याभिरूपौ स्पर्धेते।' इत्यनेन स्पष्टीकृतम्। एवञ्च तदानीं सूक्ष्मतराणि सुधौतानि बहुमूल्यवन्ति वस्त्राणि सुलभान्यासन्।

यथेदानीमपि यन्त्रनिर्माणयुगे कस्मिंश्चिद्यन्त्रे लघुमूल्यानि वस्त्राणि भवन्ति, कस्मिंश्चिच्च बहुमूल्यानि। धावनविशेषप्रकारैरपि मूल्ये तरतमभावोऽनुभूयते जनैः। यादृश एवेदानीन्तरतमभावः स्पर्धा वा तादृश्येव तदानीमपि। एतावता वस्त्रव्यवहारश्च तदसुलभतर आसीदित्यवगम्यते।

साम्प्रतिके काले वस्त्रव्यवहारो यथा व्युच्छिन्न इव दृश्यते तत्रापि महताकारणेन भवितव्यम्। इदानीं वस्त्रोत्पत्तिर्महद्यन्त्राधीना, तानि च यन्त्राणि प्रदेशविशेषेष्वेवावतिष्ठन्ते, न तु सर्वत्र। ये च तदुत्पादनसमर्थास्तत्र तेषां काचन स्पर्धैव नास्तीति निरुत्साहास्ते यद्भविष्यति तद्भविष्यतीति वादिनः स्वोदरपूर्तौ कदाचिद्वस्त्राणि निष्पादयेयुः, कदाचिदन्यद्वा किञ्चिदुत्पादयेयुः।

अन्यच्च यन्त्रेष्वपि द्विविधमाधिपत्यमिदानीं दृश्यते। एकत्र च धनिकायत्तम्, अन्यत्र च कर्मकरायत्तम्। तेन गुणवानप्येको भृत्य उभाभ्यां स्वामिभ्यामेकस्मिन्नेव समये विरुद्धदिक्स्थे कर्मणी आज्ञाप्येयातां तदोभयोरपि न करोति, तथा यन्त्रयुगे समापन्नमिव दृश्यते। प्राक्तने च काले एतन्नासीत्, यतस्तत्र जातिनिर्बन्धादिना नियतान्येव कर्माण्यासन्। वायकास्तावद्वस्त्राण्येव वयन्ति, न ते कदाचिदपि अन्यदीयकर्मणा व्यवहरन्ति। यदि चेते न वस्त्राणि कुर्युस्तदाऽकृत्रिमनिर्बन्धादिनाऽन्यकर्मकरणेऽशक्ताः स्वोदरपूरणेऽसमर्था भवेयुः। यत्र जातिनिर्बन्धो दृढो भवेत् तत्र स्वीयकर्मकरणे उत्साहवन्तः स्वकर्तव्यमिति बुद्ध्या तत्र प्रवर्तमानाः स्वे स्वे कर्मणि निरता जना भवन्ति। तत्रापि भिन्नदेशस्थानां सजातीयानां कर्मणि विशेषकौशलादिकमवलोक्य परस्परं पास्पर्धमाना उत्कृष्टगुणवन्तो भवन्ति। यत्र स्पर्धैव नास्ति तत्रेदानीं शर्कराविषये यादृशीमवस्थामात्मा नीतः स्वकीयैः स न कदापि विस्मर्तव्यः। यतन्ते च स्वार्थप्रवणा राज-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीयकार्यकरा नीतिमन्तोऽपि पुरुषा अन्यत्रापि स्पर्धां विलोपयितुम्। निदर्शनञ्चात्र राष्ट्रीयकरण-मिषेण व्युच्छिन्नव्यवहाराणां कतिपयानामेवालं स्यात्। न च राजाज्ञया कस्मिंश्चित्कर्मणि सहजत्वं निर्मातुं शक्यम्, न वा नेदं ते सहजं कर्मेति वा विधातुं शक्यम्।

नन्वेवं चेत्, राजाज्ञया न किञ्चिदनिष्टं निष्पाद्यत इति चेन्न। विभ्रमबुद्धयो हि मनुष्याः। ते राजाज्ञया किंकर्तव्यविमूढाः संशयितचित्तवृत्तयो न सहजं कुर्वन्ति, न वाऽऽज्ञप्ते कर्मणि सावधाना भवन्ति। एवञ्चेदृशराजाज्ञया देशविप्लव एव सर्वथाऽभिसमीक्ष्यः स्यात्। अत एवेदृशं विधानं युक्तं यत् तत्रत्यसमाजस्य तत्स्वाभाविकं स्यात्—इति।

लौकिको व्यवहारः—लोकव्यवहारनिदर्शकं 'समर्थः पदविधिः' (2.1.1) इति सूत्रे भाष्यकृता समीचीनमुदाहरणं दत्तम्। तद्यथा—'एवं हि दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति, सञ्चयायैव प्रवर्तते' इति। भिक्षुको हि धनसंग्रहे लुब्धः कथं वा पूर्वां भिक्षां जह्यात्। अनेनोदाहरणप्रदर्शनेन समाजस्य स्वाभाविकं रूपं सन्दृश्यते। 'प्राग्रीश्वरान्निपाताः' (1.4.56) इत्यत्र 'किमर्थं रेफाधिक ईश्वरशब्दो गृह्यते लोकत एतत्सिद्धम्, तद्यथा—आ वनान्तात् आ उदकान्तात् प्रियं पान्थमनुव्रजेदिति य एव प्रथमो वनान्त उद-कान्तश्च ततोऽनुव्रजन्ति। लौकिकं चातिवर्तते। द्वितीयं तृतीयञ्च वनान्तमुदकान्तमनुव्रजन्ति तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः' इति। अत्र हि रीश्वरादिति किमुक्तं, ईश्वरादित्येव कथं नोच्येतेत्याशङ्क्य, आ वनान्तादा उदकान्तात्प्रियं पान्थमनुव्रजेदिति विधाने नियमाभावाद् द्वितीयं तृतीयं च वनान्तमनुगच्छन्ति, तथाऽत्रापि प्रथमेश्वरशब्दं विहाय द्वितीयपर्यन्तमपि अनुव्रजिष्यन्तीति तदर्थं विकृतमिति तद्भाष्यार्थः। ग्रामाद्ग्रामान्तरं गच्छतः पान्थस्यानुव्रजनं उदकान्तं वनान्तं वा कर्तव्यमित्याचार आसीत्तदानीम्। ग्रामाद्बहिरपि मध्येमार्गं विपुला उदकान्ता विपुलानि वा वनानि यत्र सम्भवन्ति तत्रैवेदमुचितं स्यात्। तत्रापि द्वितीयं तृतीयं वा वनान्तं गच्छन्तीति दर्शनेन च नियतं तस्मिन् काले बहूनि वनानि संरक्षितानि निर्मितानि वा भवेयुः। पान्थानामुपभोगाय धार्मिकैर्निर्मिता बहवो जलाशया वा भवेयुरिति सुजलां सुफलामिति भारतभूस्वरूपं दृष्टिपथमायाति।

तदानीन्तनाश्च धार्मिका राजदण्डे समादरयुक्ताश्च लोका इत्यग्रिमोदाहरणदर्शनेन प्रतीयते। यथा—'वारणार्थानामीप्सितः' (1.4.27) इत्यत्र 'किमुदाहरणं? माषेभ्यो गां वारयति। भवे-द्यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः, यस्य तु खलु गावो न माषाः कथं तस्य माषां ईप्सिताः स्युः। तस्यापि माषा एवेप्सिताः। आतश्चेप्सिताः, यदेभ्यो गा वारयति। पश्यत्ययं यदीमा गावस्तत्र गच्छन्ति ध्रुवः सस्यविनाशः, सस्यविनाशेऽधर्मश्चैव राजभयञ्च। स बुद्ध्या सम्प्राप्य निवर्तयति' इति। क्षेत्रे गवां सम्मर्देन सस्यविनाशः स्यात्, विनष्टे च सस्ये क्षेत्रस्वामिनः क्लेशेनाधर्मः स्यादिति येषां बुद्धिस्तेषां खलु भारतीयानां कथममङ्गलाशंसनमपि सम्भवति। गो सञ्चारयितुः पांशुलपादस्य यत्रेदृशं धर्मबन्धनं तत्र सुनिविष्टानां नागरिकाणां किमु वक्तव्यम्। वस्तुत अरण्ये संस्थितस्य क्षेत्रस्य रक्षणमपि धर्म एव करोतीति 'धर्मो रक्षतिः रक्षितः' इति वचनं कथमन्यथा मन्तव्यम्। 'अधर्मश्चैव राजभयञ्च' इत्युभयमप्युक्तं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परन्तु तत्र राजभयस्य न तादृशः समादरो यादृशो धर्मस्य, अत एव तस्य पूर्वमुक्तिः। एतदपि तत्रावधेयं—तदा सस्यविनाशेऽपि राजकीयः प्रतीकारः समर्थतर आसीत् न निर्विण्णः, येनारण्यकेनापि राजभयात्क्षेत्ररक्षणं क्रियते। अत्रापि न राजा रक्षति किन्तु धर्म एव रक्षतीत्येव सत्यम्। यद्यसत्याश्रयणं कर्तुं शक्यते तदा गाश्चारयित्वा क्षेत्रविनाशेऽपि न मदीयगोभिस्तत्क्षेत्रं नाशितम्, अहं तु तस्मिन्दिने तत्क्षेत्रं नैव दृष्टवानित्याद्युक्तिभिः स्वसंरक्षणं कर्तुं शक्यम्। राजभयं चेति प्रतिपादयता भाष्यकारेण जनानां धर्मानुसन्धानात् सत्यप्रियत्वमाविष्क्रियते, तदैव च राजभयं च सम्भाव्यते। अन्यथाऽधार्मिके राज्ये यावन्तः शासनीया जनास्तावन्तो रक्षापुरुषान् विधायापि चौरैराततायिभिश्च प्रत्यहं राजधान्यां कतिपयमनुष्या हन्यन्ते, कानिचिच्च गृहाणि दह्यन्ते, केचिच्च मुष्यन्ते—इत्यादि त्वनुभूयत एव व्यवहारकुशलैः।

धर्मबन्धनादेव—'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (1.2.45) इत्यत्र 'तद्यथा लोके—आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते। न च सर्वे तत्राढ्या भवन्ति सर्वे वा गोमन्तः। यस्य हि यद्द्रव्यं भवति स तेन कार्यं करोति। यस्य च या गावो भवन्ति स तासां क्षीरं घृतमुपभुङ्क्ते, अन्यैरेतद्द्रष्टुमप्यशक्यम्।' इत्युक्तं सङ्गच्छते। धर्मबन्धनाभावेऽन्यस्यापि द्रव्य-मन्येनोपभुज्यमानं प्रत्यहमुपलभ्यते, यस्य च गावो भवन्ति तद्दुग्धमन्यैरुपभुज्यमानमेव प्रत्यहं प्रतिपाल्यते। एतदुदाहरणदर्शनेन नगरेऽपि गोपालनं बहूनामपि तदा सुकरमासीदिति गम्यते। इदानीमपि नगरे गाः पालयन्ति ता दुग्धेनोपजीवनार्थं न स्वोपभोगार्थमिति विशेषः। अत एव 'अनुदात्तङित आत्मनेपदम्' (1.3.12) इत्यत्र सुष्ठु खल्वभिहितं 'न खल्वप्यन्यत्प्रकृतम-नुवर्तनादन्यद्भवति, न हि गोधा सर्पन्ती सर्पणादहिर्भवति' इति। स्वातन्त्र्यमात्रप्राप्तिलाभेन चौरा दुष्टाः शठा वा न नागरिकपदवीमर्हन्ति, न वा ते शुद्धाचाराः सम्भवन्तीति।

बह्वायाससाध्ये लघुनि फले न तदानीन्तनानां प्रवृत्तिरासीदिति नवाह्निकस्य द्वितीयाह्निके 'सैषा महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते इति वदता प्रदर्श्यते। अयञ्च हयवरट् (शिवसूत्रम्) सूत्रस्थो युक्तिवादस्तदानीन्तनानां व्यवहारे याथार्थ्यं गमयति। तद्यथा—'एकश्चक्षुष्मान् दर्शने समर्थस्तत्समुदायश्च शतमपि समर्थम्, एकश्च तिलस्तैलदाने समर्थस्तत्समुदायश्च खार्यपि तैलदाने समर्था। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। एकोऽन्धो दर्शनेऽसमर्थ-स्तत्समुदायश्च शतमप्यसमर्थम्, एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतम-प्यसमर्थम्' इति। पर्याप्तमेतन्निदर्शनं तदानीन्तनानाम्। राजनीतिविचारे राजनीतिशून्यानां सहस्राधिकानां, धर्मसभायां संशयितचित्तानां लक्षादप्यधिकानां, लोकोपकारविचारसमये बहुसंख्ययाऽप्युपस्थितानां स्वार्थप्रवणानां तदानीन्तने काले शून्यमेव मूल्यमासीत्, न ततोऽधिकम्। तत्र च राजनीतिज्ञा धर्मशास्त्रविदो निःस्वार्था एवाधिकृताः सम्मन्यन्ते स्म—इत्याविष्कृतं भगवता। अत एव शास्त्रमात्रैकनिष्ठानां मन्दिरप्रवेशविवाहादिविषयाणां चर्चाप्रसङ्गे शास्त्रगन्धमपि दुर्गन्धिं मन्यमानानामन्धप्रायाणामभिप्रायेण शास्त्रविरुद्धाचरणमिदानीन्तनानां नातीव शोभते। बहूनामन्धानां समवाये न चक्षुष्मताऽप्यन्धेन भवितव्यं न वा बधिराणां समवाये कर्णवताऽपि पिको हातव्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगृहीतनाम्नो भाष्यकारस्य समये स्वे स्वे कर्मण्यभिरता जना आसन्निति 'कृन्मेजन्तः' (1.1.39) इत्यत्र 'न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते' इत्यादितो ज्ञायते। न हि विघ्नाः सन्तीति कार्याणि नारभ्यन्ते इत्येव तेषां दृढा मतिः, न तु विघ्नाः सन्तीति स्वाभिमतं कार्यमपि सन्त्यज्यावस्थीयत इति।

व्यवहारकौशल्यमपि तदानीन्तनानां 'न मुने' (8.2.3) इति सूत्रे 'अथवा द्विगता अपि हेतवो भवन्ति। तद्यथा—आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति। तथा वाक्यान्यपि द्विगतानि दृश्यन्ते—श्वेतो धावति, अलम्बुसानां यातेति। अथवा वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम्। वृद्धकुमारी इन्द्रेणोक्ता वरं वृणीष्वेति सा वरमवृणीत पौत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति। न च तावदस्याः पतिर्भवति कुतः पुत्राः कुतो वा पौत्राः कुतो गावः कुतो धान्यम्। तत्रानया एकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवति।' इत्युपन्यस्यता प्रकटितम्। कस्मिंश्चित्समवाये किंजातीयो धावति, किंवर्णो धावति, को धावतीति बहुभिः पृष्टे चतुर उत्तरयति—श्वेतो धावत्यलम्बुसानां यातेति एकेनैवोत्तरेण सर्वेषामपि समाधिर्विधीयते। अनुमीयते चैतेन भाष्यप्रणयनकाले व्युत्पन्नाः सुचतुरा धीरा धार्मिकाश्च जना भारते निवसन्ति स्मेति।

कृषिः—तदानीं कृषिविषये कीदृशं ज्ञानमासीत्, कथं वा तेषां कर्षणम्, के वा कर्षका इत्यादिविषये भाष्यप्रदत्तोदाहरणमात्रादेव यदुपलभ्यते तदेतत्—'वर्णो वर्णेन' (2.1.68) इत्यत्र 'इह हि सर्वे मनुष्या अल्पेनाल्पेन महतो महतोऽर्थानाकाङ्क्षन्ति। एकेन माषेण शतसहस्रम्। एकेन कुद्दालपदेन खारीसहस्रम्' इत्युक्तम्। सर्वेषामयं स्वाभाविको धर्मो यदल्पेन प्रयत्नेनाल्पेन मूल्येन वा महती कार्यसिद्धिरपेक्ष्यते—इति। एकमाषसुवर्णेन वस्त्रादीनां शतं सहस्रमपीच्छन्ति, अथवा एकेन माषेणोप्तेन सहस्रसङ्ख्याकान् माषानपीच्छन्ति। तथा कुद्दालपदेन खनित्राग्रस्थितपरिमितधान्येन तादृशधान्यवापेन, अथवा खननार्थं भूम्यां पातितः कुद्दालो यत्परिमितं क्षेत्रं व्याप्नोति तत्परिमितेन क्षेत्रेण खारीणां सहस्रमिच्छन्ति। वस्तुतः कर्षकाणामयं व्यवहारः—एकेन हलेनैकस्मिन्दिवसे यावत्क्षेत्रं क्रष्टुं शक्यं तावदेव तदुच्यते—एकहलं क्षेत्रमिति, तथैकेन कुद्दालेनैकस्मिन्दिवसे यावत्क्षेत्रं कृष्टं स्यात्तत्कुद्दालपदमिति। एकेन कुद्दालपदेन एककुद्दालपरिमितक्षेत्रेण खारीसहस्रमपीच्छन्तीति तदर्थः। एकेन कुद्दालपरिमितक्षेत्रेण 'खारीसहस्रमिच्छन्ति' एवमुक्तौ सम्भावनीयायामपि एतावता क्षेत्रेण इयद्धान्यं भवति, इयद्धान्यं चापेक्षते—इत्येतादृशं यत्क्षेत्रविषयकं संशोधनं तत्तदानीमासीदिति निश्चयेन प्रतीयते। तत्र खारीपरिमाणञ्च—

पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम्।
चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम्।।
अष्टाढको भवेद्द्रोणो द्विद्रोणः सूर्प उच्यते।
सार्द्धसूर्पो भवेत्खारी द्विद्रोणा गोण्युदाहृतम्।
तामेव भारं जानीयाद्वाहो भारचतुष्टयम्।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यभियुक्तोक्तवचनात् सेटकस्य पादः पलम्, चत्वारि पलानि कुडवः, स एव सेटकः (भाषायां शेर इत्युच्यते), चत्वारश्च कुडवाः प्रस्थं (पायली), चत्वारः प्रस्थाः आढकं (चतुर्णामाढकानां भाषायां 'मण' इत्युच्यते), अष्टाढकः द्रोणः (दोन मण), द्विद्रोणः सूर्पः, सार्धसूर्पः खारी (सहा मण), द्वाभ्यां द्रोणाभ्यामधिका खारी द्विद्रोणा गोणी, गोणी भारः, चत्वारो भाराः वाहः—इति प्रायः परिमाणानि भवन्ति। अनेन खारी—सहा मण (भाषायां), खारीसहस्रं—भाषायां मणसंज्ञकानां षट्सहस्राणामेकेन कुद्दालपरिमितक्षेत्रेणोत्पादनमिच्छन्ति। कुद्दालपरिमितं क्षेत्रमपि यथा—एकहलं क्षेत्रं भाषायां 'एकर' इत्याख्यात् किञ्चिदेव न्यूनं प्रायो व्यवह्रियते। एकहलमूल्यं कार्षिकैरेवं व्यवह्रियते। द्वौ वृषभौ एकश्च हलवाह इति त्रयो भवन्ति, एकस्य हलवाहस्य या एकदिनस्य भृतिस्तत्त्रिगुणा भृतिर्हलस्य। तथैव एकेन हलेन यावत्क्रष्टुं शक्यं तस्य तृतीयो भाग एकेन हलवाहेनापि कुद्दालेन क्रष्टुं शक्यः। एवञ्च भाषायां 'एकर' इत्याख्यस्य तृतीयो भागः कुद्दालपरिमितं क्षेत्रं स्यात्। इदानीं 'एकर'परिमिते क्षेत्रे शालीनां निष्पत्तिः खारीचतुष्टयपरिमिता भवतीति द्वादशद्रोणा उत्पद्यन्त इति राजकीयकर्मचराणामभिमतम्। कुद्दालपरिमिते क्षेत्रे चतुर्णां द्रोणानां निष्पत्तिः स्वीकृतप्राया। चत्वारो द्रोणाश्च भाषायामष्ट 'मण'संज्ञका भवन्ति। तत्र तदानीन्तनैः खारीसहस्रस्योत्पत्तिरभिहिता। मनुष्यस्वभावनिरीक्षणे यदेव प्रत्यक्षं तत्समीपे एव कल्पनाव्यवहारः। यथा—दरिद्रः शतमिच्छति, शती च सहस्रमिच्छति, न तु दरिद्रः कदापि कोटिमीहते। साहित्ये रसाभिव्यक्तिः सहृदयस्यैव भवतीति सङ्केतस्तथा कल्पनाया व्याप्तिरपि सहृदयैरेवाकलनीया। सहृदयैर्विचार्यमाणे सामान्यो मनुष्यस्तावद्राजानं दृष्ट्वा 'अहं राजा स्याम्' इत्येवाकलयति, प्रधानामात्यश्च 'अहं सार्वभौमः स्याम्' इति कल्पयेत्, तेनैव च स सुखी भवति। तथाऽत्राप्यत्युक्तिकल्पनायां यत्र शतस्योत्पत्तिस्तत्र सहस्रं परिकल्प्येत, न तु यत्रैकमेव भवति तत्र सहस्रस्य कल्पनाऽभिमता। एवञ्च खारीसहस्रमित्यनेन खारीशतं तु मन्तव्यमेव। एकस्मिन् कुद्दालपरिमिते क्षेत्रे यत्रेदानीं चत्वारो द्रोणा भवन्ति तत्र खारीशतं (त्रिशतसङ्ख्याका द्रोणाः) भवन्ति स्मेति अनुमीयते। अथवा खारीशतविषये तेषां प्रयत्नस्तु अवश्यं वक्तव्यः। ईदृशी धान्योत्पत्तिस्तदाऽऽसीदित्यभिप्रायग्रहणे तदानीन्तना जनाः सुखिन आसन्नित्यत्र न कोऽपि विवादः स्यात्।

अदेवमातृका कृषिः—तथा—शालीनामुत्पादने यादृशस्तेषां व्यवहारस्तेनैतज्ज्ञायते—न वर्षास्वेव शालीनुत्पादयन्ति, किन्तु अवर्षायां हेमन्तादावपि शालीनुत्पादयन्ति स्मेति। 'मीनातिमिनोतिदीङां ल्यपि च' (6.1.50) इति सूत्रे 'अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा—शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते' इति व्यवहारदर्शनात् शाल्यर्थं कुल्यानां बहुप्रचार आसीदिति निश्चयेनावगन्तुं शक्यम्। अत एव 'बहुगणवतुडति संख्या' (1.1.24) सूत्रादौ बहुत्र 'शाल्यर्थं कुल्याः प्रणीयन्ते' इत्युक्तिभिर्भाष्यकृतां सामञ्जस्येन सङ्गच्छते। कुल्याशब्दश्च कृत्रिमनदीवाचकः, 'कुल्याल्पा कृत्रिमा सरित्' इत्यमरात् कुल्या—कृत्रिमा वारिप्रवाहिकाऽल्पा नदी भवति। तथाविधानां कुल्यानां शाल्यर्थं निर्माणेन समृद्धशालिमान् देशो भविष्यतीति प्राचीनव्यवहारदर्शनात् अनुमीयते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शालिप्रकाराः—शालीनां प्रकारा अपि भिन्नास्तत्तद्देशविशेषणविशिष्टा भिन्नरुचयश्च यथेदानीं दृश्यन्ते तथा तदानीमप्यासन्। यथेदानीं केचिच्च शालयोऽल्पेन कालेन भवन्ति केचिच्च महता तद्वत् तदानीमपि। तच्च यथा—'वर्णो वर्णेने'ति सूत्रे एव 'लोहितशालिमान् ग्रामः' इत्युदाहृतम्। केचिच्च शालयो लोहितवर्णा भवन्ति, अपरे न। कस्मिंश्चिद् ग्रामे विशिष्टवर्णाः शालयः सम्भवन्ति। क्वचिच्च ग्रामः सर्वबीजी भवति, कश्चिच्च न तथेत्येतदपि तस्मिन्नेव सूत्रे 'सर्वबीजी ग्रामः' इत्युदाहरणादवसीयते।

कर्षकाणां ऋणम्—धनित्वञ्च तदानीं धान्येनापि व्यवहरन्ति स्मेति 'तृतीया तत्कृतार्थेन गुणवचनेन' (2.1.29) इति सूत्रे 'धान्येन धनवान्' इत्युदाहरणेन प्रदर्शितम्। न केवलं धनेनैव धनी भवति किन्तु धान्येन। तस्मिन् समये कर्षकाश्च ऋणेन व्याप्ता इत्येवमुदाहरणं न दृष्टिगोचरं सम्पूर्णेऽपि भाष्ये। इदानीन्तनीयेन व्यवहारेण ये ये नगराद्बहिर्ग्रामे घोषे वा वर्तन्ते ते सर्वेऽपि ऋणिनोऽवश्यं भवेयुः। ये ग्रामे वसन्ति ते नानाविधानि वस्तूनि निष्पादयन्ति नागरिकान् द्रव्यव्ययेन विक्रीणन्ति च—इत्थमासीत्पुरातनो व्यवहारः। इदानीं तत्सर्वं विपरीतमिव सञ्जातम्। सामान्यजनानां ग्रामीणानां प्रत्यहं येषामुपयोगस्ते हि दीपशलाका, वनस्पतिः (चहा), वस्त्रं, और्णेयं, दीपतैलं, गुडः शर्करा वा एते पदार्था झटिति बुद्धिगोचरा भवन्ति। तत्र गुडः शर्कराभावेऽपि ग्रामे एव सम्भवतीति तद्विषये न काऽपि चिन्ता। परन्तु दीपशलाकादीन्पदार्थान् क्रेतुं न धान्यस्योपयोगः, द्रव्यमेव तत्रापेक्ष्यते। दीपशलाकानिर्माणेन बहूपकृतं खलु वैदेशिकैर्नागरिकाणाम्, ग्रामीणानां कृते तद्विरुद्धमिव सञ्जातम्। यतो दीपशलाकाभावे करीषाणां वैपुल्यात् अग्नीन् गृहे संरक्ष्य दीपशलाकाकार्यमनायासेनैव सम्पत्स्येते। इदानीं दीपशलाकापराक्रमश्चैवं वर्णनीयः—एकेन पणेन दीपशलाकाशतं लभते, तेनैकसप्ताहपर्यन्तं कार्यं निर्वहति। एकसप्ता-हपर्यन्तमग्निसंरक्षणे बहूनां करीषाणां व्ययः कालहानिश्चेत्यालोच्य तादृशपदार्थनिर्माणेन विस्मितबुद्धयस्तत्पदार्थव्यवहारे कटिबद्धा वैदिशिकानां गुणगौरवे दत्तचित्ताश्च विस्मृतस्ववृत्तयो दास्यभावेन सहात्मसमर्पणमपि चक्रुः। (चहा) वनस्पतिसेवनमपि वैदेशिककृपालब्धमेव, तत्र तु द्रव्यव्यय आवश्यकः, यतः सा वनस्पतिर्न यत्रकुत्रापि क्षेत्रे सम्भवतीति। ततश्च वस्त्रं, तत्तु इदानीं यन्त्राधीनं कथं द्रव्याभाव उपलभ्येत। दीपतैलं तु (राकाइल) इतरतैलापेक्षया लघुमूल्यं दीपशलाकावत् ग्रामादिषु एकेन पणेन सप्ताहपर्यन्तं प्रकाशकमिति कृत्वैवान्यान् तैलानभिभावयति। धान्येन धनिनां हस्ते समये-समये द्रव्यसंग्रहः सम्भवति, परन्तु एवमपि केचन दिवसाः सम्भवन्ति—यदद्य पणोऽपि नास्तीति। त एव तेषां ऋणकारका दिवसाः। तेषु सञ्चीयमानं ऋणं धान्यानां समये समागते लघुबुद्धित्वान्मोहवशाद्वा न प्रतिक्रियत इति ते ऋणिनः।

भाष्यकारसमये तु दीपशलाकादीनामापणक्रेतव्यानां नामापि नासीदिति ग्रामवासिनां ऋणग्रहणसमय एव नाभूदिति सुखिनस्ते तदा सम्प्रवृत्ताः। अत एव ऋणोदाहरणसमयेऽपि ग्रामीणऋणस्य न क्वापि तैश्चर्चा कृता। इदानीं स्वातन्त्र्यावसरे समागते यदि केचन सुसंस्कृतभारतीयबुद्धिवैभवशालिनो नेतारोऽस्मद्भाग्यवशात् संयुज्येरन् तदा कोऽवकाशो ग्रामीणानां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्लेशनिर्हरणे। पाश्चात्यवादविप्लुष्टमतयो नैतत्कार्यं कर्तुं प्रभविष्यन्तीति सुनिश्चितमेव। अत एव कर्षकऋणापाकरणचिकित्सानिर्णये 'तदृणमेव न देयम्' इत्येव निश्चयो गृहीतस्तैः। एतच्च नावलोकितं—कर्षकाणामुत्तमर्णा अपि प्रायः कर्षका एवेति तेषां द्रव्यनाशे कर्षकाणामेव द्रव्यनाश इति। अनायासेन लब्धं राज्यमपि यथा पालयितुं न शक्यते तथाऽनायासेन प्राप्त-मनृणित्वमपि तथैव। अथ च यावदृणकारणसामग्री तदवस्थैव तावदृणापाकरणं मूलं विहाय शाखासिञ्चनमिव दरीदृश्यते।

कर्षकाः के—अवसरेऽस्मिन् प्राक् के कृषकपदवाच्याः शिष्टसम्मता इत्यवलोकनमपि सुसम्बद्धं स्यात्। तथाहि—'हेतुमति च' (3.1.26) इत्यत्र णिच्प्रत्ययोत्पत्त्यनुत्पत्तिविचारवेलायां 'कृष्यादिषु चानुत्पत्तिर्वक्तव्या। एकान्ते तूष्णीमासीन उच्यते पञ्चभिर्हलैः कृषतीति। तत्र भवितव्यं पञ्चभिर्हलैः कर्षयतीति। कृष्यादिषु चानुत्पत्तिर्नाना क्रियाणां कृष्यर्थत्वात्। कृष्यादिषु चानुत्पत्तिः सिद्धा। कुतः। नानाक्रियाणां कृष्यर्थत्वात्। नाना क्रियाः कृषेरर्थाः। नावश्यं कृषतिर्विलेखने एव वर्तते। किं तर्हि? प्रतिविधानेऽपि वर्तते। यदसौ भक्तबीजबलीवर्दैः प्रतिविधानं करोति स कृष्यर्थः। आतश्च प्रतिविधानेऽपि वर्तते, यदहरेवासौ न प्रतिविधत्ते तदहरेव तत्कर्म न प्रवर्तते इत्युक्तम्।

कृष्यादिधातोर्णिजनुत्पत्तिर्वक्तव्या, यतस्तूष्णीमासीनेऽपि—अकिञ्चित्कुर्वाणेऽपि देवदत्ते 'पञ्चभिर्हलैः कृषति देवदत्तः' इति लोका वदन्ति, वस्तुतस्तत्र भृत्यादिद्वारा कर्षणात् 'पञ्चभिर्हलैः कर्षयति देवदत्तः' इति वक्तुं युक्तम्। एवञ्च यत्र णिच् प्राप्तस्तत्राकरणात् कृष्यादिषु चानुत्पत्तिर्वक्त-व्येति। ततश्च वार्तिककार आह—पञ्चभिर्हलैः कृषति देवदत्त इत्यत्र णिचः प्राप्तिरेव नेति न ततोऽनुत्पत्तिर्वक्तव्या। तत्र हेतुमाह—नानाक्रियाणां कृष्यर्थत्वादिति। कृषधातोर्न विलेखनमेवार्थः, किन्तु विलेखनप्रेरणं विलेखनोपकारकरणं विलेखनविषये यावत्प्रतिविधानकरणञ्च। तथा च यत्र कृषति तत्र देवदत्तः कृषति, यत्र देवदत्तस्य भृत्याः कृषन्ति तत्रापि देवदत्त एव कृषति, यत्र च देवदत्तस्यांशभागिनः कृषन्ति तत्रापि देवदत्तस्य प्रतिविधानकर्तृत्वाद्देवदत्तः कृषतीति भवत्येव। क्वचिद्देवदत्तो भक्तेन प्रतिविधानं करोति, क्वचिच्च बीजदानेन प्रतिविधानं करोति, क्वचित् हलबलीवर्दादिभिः प्रतिविधत्ते इति तदर्थः। एवञ्च तदानीन्तने समये कर्षकपदवाच्याः—यः स्वयं कृषति, यो भृत्यद्वारा, यो भागदानेन, यश्च बीजबलीवर्दादिसम्पादनेन, ते सर्वेऽपि कर्षका एवेति निर्णयः। कृषिश्चैवं पदार्थोऽस्ति य एकेन न निर्वर्तयितुं शक्यः, बहूनां साहाय्यसम-वधाने एव तस्य सम्पन्नत्वात्। कर्षकार्थविचारवेलायां यद्येतदनवलोक्य यः कृषति स कर्षक इत्येवोपादाने न तेनैकेन समीचीना कृषिः स्यात्, न च धान्यसमृद्धिश्च स्यादिति। अत एव भाष्ये 'भक्तबीजबलीवर्दैः प्रतिविधानं करोति' इत्यत्र नात्मनेपदप्रयोगः। अन्यथा प्रतिविधानफलस्य कर्तृगामित्वात् तत्र 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यात्मनेपदमेव युक्तं स्यात्। इह तु भागादिना प्रतिविधानफलं यथा कर्तृगामी तथाऽन्यत्रापि गच्छतीति नात्मनेपदप्रयोगः।

कृषिकर्माणि—कर्षकाणां क्रियाप्रवृत्त्याद्यपि क्वचिदुपवर्णितम्, तद्यथा—'कर्मवत्कर्मणा तुल्यक्रियः' (3.1.87) इत्यत्र 'कथं ज्ञायते भिद्यते कुसूलेनेति। न चान्यः कर्ता दृश्यते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रिया चोपलभ्यते। किञ्च भो विग्रहवतैव क्रियायाः कर्त्रा भवितव्यम्, न पुनर्वातातपकाला अपि कर्तारः स्युः। भवेत्सिद्धं यदि वातातपकालानामन्यतमः कर्ता स्यात्। यस्तु खलु निवाते निरभिवर्षे अचिरकालकृतः कुसूलः स्वयमेव भिद्यते तस्य नान्यः कर्ता भवति अन्यदतः कुसूलात्। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्यः कर्ता नास्ति। इह तु कथं—लूयते केदारः स्वयमेवेति। यत्रासौ देवदत्तो दात्रहस्तः समन्ततो विपरिपतन्दृश्यते। अत्रापि याऽसौ सुकरता नाम तस्या नान्यः कर्ता भवति अन्यदतः केदारात्' इति।

अयमर्थः—भिद्यते कुसूलः स्वयमेवेत्यत्र कुसूलस्य कथं कर्तृत्वमित्याक्षिप्य न चान्यः कर्ता दृश्यते क्रिया चोपलभ्यतेऽतः कोऽपि कर्ताऽवश्यमाश्रयणीयः स चान्याभावात्कुसूल एव। विग्रहवतैव—शरीरिणैव केनचन कर्त्रा भवितव्यमिति न, किन्तु वातातपादयोऽपि कर्तारः। एवमपि यत्र वातवर्षादिकं नास्ति नूत्नश्च कुसूलः स्वयमेव भिद्यते तत्र कुसूल एव कर्ता। कुसूलविषये भवतु तथा, तत्रान्यः कश्चित् कर्ता नास्तीति। यत्र चान्यः कर्ता दृश्यते तत्रापि लूयते केदारः स्वयमेवेति कथम्? तत्र दात्रहस्तो देवदत्त इतस्ततो धावन् दृश्यते तत्र देवदत्त एव कर्तेति वक्तुं युक्तम्। तत्रायं समाधिः—अत्र या सुकरता तस्या कर्ता नान्य इति केदार एव तस्याः कर्तेति निर्णयः। एवं च लूयते केदारः, भिद्यते कुसूल इत्यादौ केदारादीनां कर्तृत्वमुपपद्यते इति। कुसूलः—अर्धभित्तिसदृशो मृत्तिकाभिः पाषाणैर्वा क्षेत्रादीनां संरक्षणार्थं निर्मीयते। यदा दात्रखनित्रहस्तो देवदत्तः केदारं लुनाति तदा सौकर्यातिशयात् देवदत्तस्य परिक्लेशो न, केदारश्च लूनो भवति तदा कर्मणः कर्तृत्वविवक्षायां लूयते केदार इति भवति। यदा क्षेत्रेऽधिकजलसञ्चयो जायते तच्च शालीनां नावश्यकं तदा नालिकयैकया क्षेत्राज्जलं निष्कास्यते। यदाऽधिकजलसञ्चयात् दात्रसंसर्गमात्रेण नालिका जायते तत्र देवदत्तस्य न कर्तृत्वं किन्तु केदारस्यैवेति तदर्थः। एवञ्च यथेदानीं जलसञ्चयापाकरणे कर्षका दक्षा भवन्ति तथा प्रागपि स व्यवहारस्तथैवासीदिति ज्ञायते।

गवादीनामुपचारः—'छदिरुपधिबलेर्ढञ्' (5.1.13) इत्यत्र 'इहार्थं तावद्बालेयास्तण्डुलाः। आर्षभ्यो वत्सः। ऋषभार्थो घासः। गुणान्तरयुक्ता हि तण्डुला बालेयाः। गुणान्तरयुक्तवत्स आर्षभ्यः' इति वदता बहुगुणविशिष्टास्तण्डुला आसन्, केचिद्बल्यर्थमुपयुज्यन्ते, केचिच्च राजभोजनाः, केचिद्गुणान्तरविशिष्टा इति सूचितम्। आर्षभ्यो वत्स इत्यनेन—अयं वत्सो वृषभत्वे योग्य इति परीक्ष्य तादृश एव वृषभकरणे नियुज्यते। एवं पश्वादीनां चिकित्सा परीक्षा चासीत्, न केवलं गोर्जातो वृषभ इति स्वीकारः। तथा ऋषभार्थो घास इत्यनेन च गवामुपयुक्तो घासोऽन्यः, वत्सोपयुक्तोऽन्यः, वृषभार्थोऽप्यन्य इति घासादीनां पशूनाञ्च गुणावगुणदर्शनेन निश्चयस्य प्रथाऽऽसीत्, घासमात्रलाभेन ते न सन्तुष्टा इति व्यज्यते।

'पूर्ववत्सनः' (1.3.62) इति सूत्रे 'गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य' इत्युदाहरणेन गवां प्रत्यभिज्ञानादिकं नियतमासीदिति गम्यते। तथा—'अञ्चोऽनपादाने' (8.2.49) इति सूत्रे 'एवं तर्हि अञ्चे रङ्कः। अङ्कश्च प्रकाशनम्। अङ्किता गाव इत्युच्यते, अन्याभ्यो गोभ्यः प्रकाशन्ते' इत्युदाहरता गवां परिसङ्ख्यानादिकं सुचारुरूपेणासीदिति प्रकाश्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (5.1.90) इति सूत्रे ये षष्टिरात्रिसमूहेन पच्यन्ते ते व्रीहयः षष्टिका इत्युच्यन्ते (इदानीं भाषायां 'साठी'शब्देन तेषां व्यवहारः)। तत्र वार्तिककार आह—षष्टिके संज्ञाग्रहणम्, षष्टिके संज्ञाग्रहणं कर्तव्यम्। मुद्गा अपि हि षष्टिरात्रेण पच्यन्ते तत्र माभूदिति। अत्र वार्तिककारस्यायमाशयः—मुद्गा यद्यपि षष्टिरात्रेण पच्यन्ते तेषामपि 'षष्टिकाः' इत्येवमभिधानं स्यात्, लोके तच्च नेष्यत इति तत्र संज्ञाग्रहणं कर्तव्यम्। संज्ञाग्रहणे कृते षष्टिरात्रेण ये पच्यन्ते व्रीहयस्तत्रैव 'षष्टिकाः' इति शब्दव्यवहारः। तेन मुद्गाः षष्टिरात्रेण पच्यमाना अपि नैतां संज्ञां लभन्ते। एवञ्च षष्टिका इति व्रीहीणामेव संज्ञेति तदभिप्रायः।

क्षेत्रपरीक्षा—यथा धान्येष्वनेके प्रकारा गुणभेदादिना प्रवर्तन्ते तथा क्षेत्रादीनामपि विचिकित्साऽऽसीत्। तथा चोच्यते—'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' (5.4.50) इति सूत्रे सम्पद्यन्ते यवाः, सम्पद्यन्ते शालय इति। सम्पद्यन्तेऽस्मिन् क्षेत्रे शालय इति।' अस्मिन् क्षेत्रे शालयो भविष्यन्ति, अस्मिंश्च यवा भविष्यन्तीत्यनेनास्मिन् क्षेत्रे यवापेक्षया समीचीनाः शालयः सम्भविष्यन्तीत्यर्थो गम्यते। एतच्च तदैव युज्येत यदा क्षेत्राणां धान्यादीनां विशिष्टोऽभ्यासः सम्पत्स्येत। स तथाऽऽसीदित्यनुभावयत्येतद्वाक्यम्।

क्षेत्रमितिः—ईदृशं यत्र कृषिकर्म प्रवर्तते तत्र क्षेत्राणां मर्यादा स्वामिसम्बन्धोऽप्यावश्यकः, तदभावे न्यूनतैवास्यार्थस्य स्यात्। तदर्थमत्रावधेयम्—'मपर्यन्तस्य' (7.2.91) इति सूत्रे 'अयमन्तशब्दोऽस्त्येव सह तेन वर्तते। तद्यथा—मर्यादान्तं देवदत्तस्य क्षेत्रम्, सहमर्यादयेति गम्यते। अस्ति प्राक् तस्माद्वर्तते। तद्यथा—नद्यन्तं देवदत्तस्य क्षेत्रमिति, प्राक् नद्या इति गम्यते। तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत। नैतदस्ति प्रयोजनम्। सर्वत्रैवान्तशब्दः सह तेन वर्तते। अथ कथं नद्यन्तं देवदत्तस्य क्षेत्रमिति? नद्याः क्षेत्रत्वे सम्भवो नास्तीति कृत्वा प्राक् नद्या इति गम्यते' इत्युक्तम्। अत्र क्षेत्राणां मर्यादाऽप्युक्ता। 'मपर्यन्तस्य' सूत्रे पर्यन्तस्येति किमर्थमुच्यते, मान्तस्येत्येव वक्तव्यमित्याक्षिप्य अन्तशब्दस्य व्यभिचारदर्शनात् परिग्रहणं कृतमित्युक्तम्। अन्तशब्दस्य व्यभिचारश्च मर्यादान्तं देवदत्तस्य क्षेत्रमित्युच्यमाने मर्यादाऽपि क्षेत्रावयव इत्येव प्रतीयते न तु मर्यादां विहाय क्षेत्रमित्यर्थः प्रतीयते, नद्यन्तं क्षेत्रमित्युच्यमाने च नदीं विहाय क्षेत्रमित्येव ज्ञायते। ततश्च क्वचिदन्तशब्दस्तेन सहेत्यर्थस्य बोधकः क्वचित्तं विहायेत्यर्थस्येति दृष्टापचारोऽन्तशब्द इति परिग्रहणमित्युक्तेऽपि पूर्वपक्षिणा तत उच्यते—अन्तशब्दः सर्वत्रादृष्टापचार एव, नद्यन्तं देवदत्तस्य क्षेत्रमित्यादौ नद्याः क्षेत्रत्वा-सम्भवात्र नद्यन्तपदेन नद्याः क्षेत्रे समावेश इति तद्भावः। अत्र देवदत्तस्य क्षेत्रमिति क्षेत्रादीनां स्वामिसम्बन्धो बोधितः। इदं च क्षेत्रं देवदत्तस्य, न यज्ञदत्तस्येत्यर्थे प्रमाणमपि राज्याधिकारिभिः स्थापितमेव भवेत्। अन्यथा देवदत्तस्येत्यर्थे यदि न राजा प्रमाणं तदितरः कः शक्नुयादेवं वक्तुम्, अतो देवदत्तस्येत्यर्थे राजाऽपि प्रमाणमासीत्तदेत्यभ्युपगन्तव्यमेव। तथा मर्यादान्तमित्य-नेनेदानीं यथा क्षेत्रसीम्नि पाषाणाद्युपन्यस्यते तथा तदानीमपि मर्यादाकरणविधिः प्रतीयते। एवच्च मर्यादापरिपालितं स्वामिसम्बद्धं पर्याप्तान्नोत्पादकं तदानीं क्षेत्रमासीदित्यायातमनेन।

धान्यमूल्यम्—तथा धान्यादीनां स्थितिप्रलयाववेक्षणीयावेवास्ताम्, येन नाशो विलोक्यते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन तदर्थं कश्चित्प्रयत्नः क्रियत एव। धान्यस्य नाशः स्थितिश्च—'ल्वादिभ्यः' (8.2.44) सूत्रे 'पूञो विनाशे इति वक्तव्यम्। पूना यवाः। विनाश इति किमर्थम्। पूतं धान्यम्।' इत्यनेन प्रदर्शिता। धान्यं यदि नष्टं चेत् पूनमित्युच्यते, अनष्टञ्चेत्पूतमित्युच्यते—इति शब्दद्वैविध्यमेव निर्दिष्टम्। येन संशयलेशोऽपि न भवेत्। यथेदानीं वस्तुतो विचार्यमाणे, व्यवहारे धान्यस्य मूल्यं नास्ति। मूल्यं च तदेवोच्यते यस्मिन् कस्मिंश्चिदपि क्षणे आपणे नीतं वस्तु विनिमयेन व्यवह्रियेत न तथा धान्यमिति वस्तुतो धान्यस्य मूल्यमिदानीं न संरक्षितम्। तदानीं तु 'अध्यर्धशूर्पम्, अर्धपञ्चमशूर्पम्' इत्यादिभाष्योदाहरणदर्शनात् धान्येनैव ग्रामीणानां प्रत्यहं सर्वोऽपि व्यवहारः सेत्स्यतीति न तदर्थं तेषां परमुखप्रेक्षणमिति व्यवस्थितिः। अत एव धान्यस्यापि व्यवहारे मूल्यमासीदिति वक्तुं युज्यते।

एवमेव 'चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः' (2.1.36) इति सूत्रे 'महाराजार्थो बलिः स महाराजार्थो भवति, अश्वघासः, हस्तिविधा, ब्राह्मणार्थं पयः, ब्राह्मणार्थः सूपः, ब्राह्मणार्था यवागूः' इत्याद्युदाहरणैरिदं समर्थ्यते—यो राजग्राह्यो भागः सोऽपि धान्यरूपेणैव, न तु द्रव्येणेति महाराजार्थो बलिरित्येतत्सूचयति। धान्यरूपेण बलेर्निर्धारणान्न धनिकमुखापेक्षा कर्षकाणामिति व्यवहारसौलभ्यं भवति। अश्वघासो हस्तिविधेत्यनेन समुचितोपायवन्तः कर्षका यद्यस्य रुचितं तत्तेभ्यो दत्त्वा निर्वृतास्तिष्ठन्ति, न हस्तिभोज्यं गोभ्यो ददते, न वाऽश्वभोज्यं हस्तिभ्यो दत्वा कृतार्थमात्मानं मन्यन्ते। कृषिसंरक्षणोपाये पशुसंरक्षणं मूलभूतमिति गवादीनां भक्ष्यविशेषनिर्देशेनोचितप्रबन्धाः पशवः संरक्ष्यन्ते स्मेति कृषेरुपकारः समर्थितो भवति। अत एव 'गोभिर्वपावान्' इति 'तृतीयातत्कृतार्थेन गुणवचनेन' (2.1.29) इत्यत्रोक्तमुदाहरणं सङ्गच्छते। गोसम्बन्धिदध्याद्युपयोगाद्वपावत्वं तदैव स्याद्यदा गोदुग्धस्य प्रचुर उद्गमः स्यात्, तदर्थञ्च गवादीनां दुग्धवाहाद्युपयोगिनां सर्वतः संरक्षणं विधीयते स्मेत्यवगम्यते।

'कर्तरि कर्मव्यतिहारे' (1.3.14) सूत्रे 'कर्मव्यतिहार इत्युच्यमाने इहापि प्रसज्येत—देवदत्तस्य धान्यं व्यतिलुनन्तीति। इह च न स्यात्—व्यतिलुनते व्यतिपुनते इति' इत्युदाहरता मूल्येन क्रियाव्यतिहारेण वा कर्षकाणां कार्यं समर्थयता न सामुदायिकी कृषिः, न वा एकमात्रकर्तृका कृषिरिति समर्थितम्। देवदत्तस्य धान्यमित्यादिभाष्यस्यायमर्थः—सूत्रे 'कर्मव्यतिहारे' इत्येवोच्यमाने यत्र धान्यस्य कर्मणो व्यतिहारस्तत्रैव स्यात्, यत्र क्रियाव्यतिहारस्तत्र न स्यात्। तथा च देवदत्तस्य धान्यं लवनात्प्राक् क्षेत्र एव व्यवस्थितं कश्चित्क्रीणाति तत्र कर्मणो धान्यस्य व्यतिहारात् धान्यं व्यतिलुनन्तीत्यत्रात्मनेपदं स्यात्। यत्र च देवदत्तेन कर्तुमुचिता लवनक्रिया वेतनेन पणनादिना वाऽन्येन क्रियते तत्र न स्यादिति। देवदत्तस्य धान्यं व्यतिलुनत इत्यत्रान्यस्तस्य क्रियां करोति न त्वत्रकर्मणो व्यतिहार इत्यत्रात्मनेपदं भवति, एतादृशक्रियाव्यतिहारेण द्रव्याभावेऽपि कृषेः सर्वं कार्यं सेत्स्यति सर्वेऽपि सुखिनो भवन्ति। अत्रार्थे यदि मूल्यस्यैव निर्भरः स्यात् तदा समये सर्वं कार्यं न निष्पद्येत, समयमूल्यं तु कृषिव्यवहारे परमोन्नतमिति परमुखप्रेक्षिणां कर्षकाणामसमये क्रियमाणं कार्यमक्रियमाणमेवेति महती हानिः स्यात्।

देवदत्तस्य धान्यं व्यतिलुनन्तीति व्यवहारस्तु कृषेः परमोन्नतिं प्रदर्शयति। धान्यं लूत्वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूत्वाऽऽपणे च नीत्वा विक्रेयमित्येतत्तु परिमितधान्यवतां व्यवहारविषयम्। अन्ततो गत्वा यदि विक्रेयमेव यद्धान्यं तद्यदि लवनादिव्यवहारतः प्रागेव विक्रीतं भवेत् तदा तावता समयेनान्यत्कार्यं सम्पत्स्येतेत्यादिव्यवहारः सम्पन्नानामेव शोभते, न तु दरिद्राणाम्। परिमितधान्यवन्तस्तु तदपि कुर्वत इति 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' (1.4.52) इति सूत्रे 'नयति देवदत्तः, नाययति देवदत्तेन। वहन्ति बलीवर्दा यवान्, वाहयति बलीवर्दान् यवान्। भक्षयन्ति यवान् बलीवर्दाः, भक्षयति बलीवर्दान् यवान्। मासं शेते देवदत्तः' इत्युदाहरणैः प्रदर्शितम्। परिमितधान्यवांस्तु स्वयमेव नयनानयनं करोति, ततोऽप्यधिको बलीवर्दैर्नयति। यत्र तु अधिकं धान्यं पुष्टिकामाश्च बलीवर्दानां तत्र—भक्षयति बलीवर्दान् यवानित्यपि सम्भाव्यते।

क्षेत्रादीनां विशेषः—खलादिवर्णनमपि 'खलेयवं, खलेबुसं, लूनयवं, पूनयवं, पूयमानयवम्' इत्यादिना 'तिष्ठद्गुप्रभृतीनि च' (2.1.16) इति सूत्रे समुचितं दृश्यते। अत्र हि खलेयवमित्यादिना कृषिकर्मणः परिज्ञानं यथावद्भवति। यवाः क्षेत्रतः खल आयाता इति खलेयवमित्यनेन बोध्यते। खलेबुसमित्यनेन क्षेत्रतः खल आनीय पूता यवा गृहं गताः खले वुसमात्रमवशिष्टमिति ज्ञायते। लूनयवमित्यनेन क्षेत्रे एव यवा लूनाः सन्तिष्ठन्ति खले नायाता इति बोध्यते।

कुद्दालपदेन खारीसहस्रमित्यनेनापि विशेषोऽयं बोध्यते—यत्र हलेन कर्षणं न सम्भवति पर्वतादौ, तत्र कुद्दालेनापि धान्यमुत्पादयन्तीति। इदानीमपि पार्वतीपरिचरणपवित्रितभूभागस्य ऋष्याश्रमसन्निधानस्य भारतवैभवस्य हिमाचलस्योपत्यकायामधिवसन्तो जनाः कुद्दालेनैव कर्षन्तीति श्रूयते। एवञ्च तदा सुसम्पन्ना कृषिः सुखयति स्म लोकानिति विज्ञाने न कोऽपि प्रत्यवायः।

धान्यसञ्चयः—धान्यादीनां सञ्चयस्तेषां वितुषीकरणादिकमपि तात्कालिकमेवं प्रतीयते—'क्षिप्रवचने लृट्' (3.2.133) सूत्रे 'अवश्यं खल्वपि कोष्ठगतेष्वपि शालिषु अवहननादीनि प्रतीक्ष्याणि' इत्यादिना। पूर्वं 'शाल्यर्थं कुल्याः प्रणीयन्ते' इत्यादिनाऽदेवमातृका कृषिः प्रतिपन्ना, विशालेऽस्मिन् भारते यत्र कुल्यादिकरणासम्भवस्तत्र देवमातृकत्वमपि प्रतीयते तत्रैव सूत्रे—'देवश्चेद्वृष्टो निष्पन्नाः शालयः। कश्चिदाह देवश्चेद्वृष्टः सम्पत्स्यन्ते शालय इति। स उच्यते—मैवं वोचः, सम्पन्नाः शालय इत्येवं ब्रूहि' इत्याद्युदाहरणैः। अन्यच्च वृष्ट्यनन्तरं शालीनामुत्पत्तिर्निश्चिता, न तत्र रोगादिना चौरादिव्यतिक्रमाद्वा नाशः स्यादिति रोगादिप्रतीकारोपाया राजादिसंरक्षणञ्च तत्र सन्नद्धमिति द्योतयति।

ग्रामनगरादिविभागः—ननु सम्पन्ना कृषिरिति स्वीकारेऽपि तदा देशनगरग्रामघोषादीनां निर्माणमासीत्, उत यत्र तत्र वा यथा कथञ्चिन्निवासः। न देशविभागाः, न देशग्रामयोस्तारतम्यम्, न मार्गादीनां निर्माणमित्याद्याशङ्कादीनामवसरः स्यात्, यदि भाष्यकृता देशग्रामविषयकाणि उदाहरणानि नोपन्यस्तानि भवेयुः। तद्विषयकाणि च बहून्युदाहरणानि यत्र तत्र प्रदर्शितानि, तत्र कतिपयान्यत्र प्रस्तूयन्ते। 'पृषोदरादीनि यथोपदिष्टम्' (6.3.109) इत्यत्र 'उच्चार्य हि वर्णानाह—उपदिष्टा इमे वर्णा इति। कैः पुनरुपदिष्टाः? शिष्टैः। के पुनः शिष्टाः? निवास-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तश्चाचारतश्च। स चाचार आर्यावर्ते एव। कः पुनरार्यावर्तः? प्रागदर्शात् प्रत्यक्कालकवनात् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्। एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः' इत्येवं शिष्टलक्षणं विहितं, तदवसरे आर्यावर्तलक्षणं दक्षिणेन हिमवन्तमुत्तरेण पारियात्रं—हिमवद्विन्ध्ययोर्मध्ये कालकवनादर्शयोर्मध्ये च यो देशः स आर्यावर्त इत्युच्यते। कालकवनं प्रयागः, आदर्शः पर्वतः, पूर्वस्यां दिशि आदर्शः पर्वतः पश्चिमस्यां च कालकवनं—प्रयागो दक्षिणस्यां हिमवान् उत्तरस्याञ्च विन्ध्य इति चतुर्णामादर्शादीनां मध्ये यो देशः स आर्यावर्त इत्युच्यते, तस्मिन्नार्यावर्ते निवसन्तः कुम्भ्यामेव येषां धान्यं ते अलुब्धाः स्वाध्यायोऽध्येतव्य इति बुद्ध्यैव विद्यापारंगतास्ते ब्राह्मणाः शिष्टाः। तादृशशिष्टैरुपदिष्टो मार्ग एव कल्याणकरो न त्वन्यैरुपदिष्टः। अनेकनगर-ग्रामक्षेत्रारामनदीपर्वतविशिष्टस्य भूभागस्य देश इति संज्ञामाचक्षते पुरातत्त्वविदः। तस्यैतस्यार्यावर्तस्य जगतीतलभूषणभूतस्य मानचित्रम्प्रागुपनिबद्धमवलोकनीयम्।

अन्यत्रापि आर्यावर्तलक्षणं पुनः पुनरुपरिष्टं दृश्यते। 'शूद्राणामनिरवसितानाम्' (2.4.10) इति सूत्रे केऽनिरवसिताः के च निरवसिताः शूद्रा इति विचारप्रस्तावे 'कः पुनरार्यावर्तः? प्रागादर्शात्प्रत्यक्कालकवनात् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्' इति पूर्ववदेव लक्षणमार्यावर्तस्योक्तम्। एतादृशदेशविशिष्टा रचनास्तदानीमासन्निति ज्ञायते। 'विशिष्टलिङ्गो नदीदेशो ग्रामाः' (2.4.7) इति सूत्रे 'अग्रामाः' इति यदुच्यते तत्र 'ग्रामप्रतिषेधे नगरप्रतिषेधो वक्तव्यः' इति वार्तिककृतोक्तम्। नावश्यको ग्रामप्रतिषेधः, आवश्यकश्च नगरप्रतिषेध इति तदाशयः। अतश्च वार्तिककारसमये ग्रामनगरयोर्महान् भेदः संप्रत्येति। तदुदाहरणेषु 'शौर्यं च केतवता च शौर्यकेतवते। जाम्बवं च शालूकिनी च जाम्बवशालूकिन्यौ' इत्यत्र शौर्यं—नगरं, केतवता—ग्रामः, जाम्बवं—नगरं, शालूकिनी—ग्रामः। तत्र 'एवं तर्हि आर्यनिवासादनिरवसितानाम्। कः पुनरार्यनिवासः? ग्रामो घोषो नगरं संवाह इति। एवमपि ये महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति तत्र चण्डालमृतपा इति न सिध्यति।' इत्युक्त्या ग्रामो घोषो नगरः संवाहा निवासविशेषाः प्रतीयन्ते।

तत्र ग्रामश्च प्रसिद्ध एव, घोषः प्राधान्येन गोमहिष्यादीनां शालास्तदङ्गत्वेन चेतरशाला यत्र सन्ति, संवाहः वणिजामापणप्रधानः (बाजारपेठ भाषा)। ग्रामलक्षणं च 'आद्यन्तवदेकस्मिन्' (1.1.21) सूत्रे 'लोके शालासमुदायो ग्राम इत्युच्यते। भवति चैतदेकस्मिन् एकशालो ग्राम इति। विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते, तद्यथा—ग्रामो दग्ध इति। अस्ति वाटपरिक्षेपे वर्तते—ग्रामं प्रविष्ट इति। अस्ति च मनुष्येषु वर्तते—ग्रामो गतो ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते, तद्यथा—ग्रामो लब्ध इति। तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते—एकशालो ग्राम इति।' एतादृशमुक्तम्। ग्रामं प्रविष्ट इत्युच्यमाने शालां प्रविष्ट इति न भवति किन्तु ससीमकः सारण्यकः सस्थण्डिलकः सर्वोऽपि ग्राम एवेति सीमाप्रविष्टे ग्रामं प्रविष्ट इति व्यवहारः। ग्रामश्च लघुरेकशालोऽपि भवति महांश्चानेकशालोऽपि। सारण्यके ससीमके सस्थण्डिलक इत्याद्युपवर्णनात् नैसर्गिकसीमासन्निवेशे विशेषनिर्भरः प्रतीयते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामनगरयोर्भेदोऽपि लोकव्यवहारतः सुस्पष्टः 'प्राचां ग्रामनगराणाम्' (7.3.14) इत्यत्र 'नगरग्रहणं किमर्थं, न प्राचां ग्रामाणामित्येव सिद्धम्। न सिध्यति। अन्यो हि ग्रामः, अन्यन्नगरम्। कथं ज्ञायते? एवं हि कश्चित्कञ्चित्पृच्छति—कुतो भवानागच्छति ग्रामात्। स आह—न ग्रामात् नगरादिति। ननु च भोः य एव ग्रामस्तन्नगरम्। कथं ज्ञायते? लोकतः। ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरे क्रियन्ते। तद्यथा—अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युक्ते सुतरां नागरोऽपि न भक्ष्यते। तथा ग्रामे नाध्येयमिति साधीयो नगरेऽपि नाधीयते। तस्माद्य एव ग्रामस्तनगरम्। कथं यदुक्तम्—एवं हि कञ्चित्पृच्छति कुतो भवानागच्छति ग्रामात्, स आह—न ग्रामान्नगरादिति। संस्त्यायविशेषमसौ आचष्टे। संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति' इत्युक्तवता भाष्यकृता प्रकाशितः। ग्रामशब्दो हि जननिकायनिवासमात्रे प्रसिद्धः, निवासविशेषेऽपि च, समुदायेऽपि प्रसिद्धो भूतग्रामः, इन्द्रियग्राम इत्यादौ। अनेकार्थप्रत्यायकं ग्रामशब्दमाश्रित्यैतद्व्याख्यानं भाष्ये। अभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यसूकरो ग्रामे नाध्येयमित्यत्र जननिकायनिवासमात्रे प्रसिद्धस्य ग्रहणम्। अत एव ग्राम्यकुक्कुटो न भक्षणीय इत्यनेन नागरोऽपि न भक्ष्यते इत्याद्युपपद्यते। ग्रामे नाध्येयमित्यत्रापि जननिकायनिवासमात्रे प्रसिद्धस्यैव ग्रहणम्। कुतो भवान् ग्रामादागत इत्यादौ संस्त्यायविशेषमसौ पृच्छतीत्यालोच्य न ग्रामान्नगरादित्युत्तरं सङ्गच्छते। संस्त्यायः जनसंनिवेशः। भूतग्रामादौ केवलसमुदायवाचकस्यैव ग्रामशब्दस्य प्रसिद्धिः। संस्त्यायविशेषविवक्षायां ग्रामो नगराद्भिन्न इत्यस्मादुपन्यासात्प्रतीयते।

ग्रामाश्च नगराणां देशानामपि वाऽवयवाः सम्बन्धिनो वा भवन्ति। 'तस्येदम्' (4.3.120) इति सूत्रे स्वे ग्रामजनपदमनुष्येभ्य इति वार्तिकोदाहरणे स्रौघ्नो ग्रामः, माथुरो ग्राम इति स्रुघ्ननगरस्य यो ग्रामः स स्रौघ्नो ग्राम इत्युच्यते, मथुरानगर्या यो ग्रामः स माथुरो ग्राम इति। ये नगरसमीपे ग्रामा भवन्ति नगर एव वा येषामुपजीवनं ते तत्तन्नगरशब्दसम्बन्धित्वेन व्यवह्रियन्ते। तथा देशवाचकशब्दसम्बन्धित्वेनापि ग्रामाणां व्यवहारः 'आङ्गकः, वाङ्गकः' इत्यादिशब्दैर्भवति। अङ्गदेशस्य यो ग्रामः स आङ्गकः। वङ्गदेशसम्बन्धी यो ग्रामः स वाङ्गकशब्देन व्यवह्रियते।

निवासाभिजनशब्दयोरपि भिन्नो व्यवहारः 'सोऽस्य निवासः' (4.3.89) इति सूत्रे 'निवासाभिजनयोः को विशेषः? निवासो नाम यत्र सम्प्रत्युष्यते। अभिजनो नाम यत्र पूर्वैरुषितम्' इत्यादिना प्रतिपादितः।

देशनगरादीनां व्याख्यानान्यपि कृतानि दृश्यन्ते। 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' (4.3.66) इत्यत्र 'पाटलिपुत्रस्य व्याख्यानी सुकोसला' यादृशं पाटलिपुत्रं व्याख्यानग्रन्थे प्रसिद्धमुपवर्ण्यते तादृशी सुकोसला नगरीत्युपवर्णनेन नगराणां परिचयपुस्तिकाप्रकारास्तेषां मानचित्राणि वा निर्मीयन्ते स्मेति सम्भवति। शब्दश्चैतावान् रूढो यः शब्दग्रन्थेषु व्याख्यानमिति भवति, नगरेषु नगरव्याख्यानमिति न भवतीत्युपवर्णयता 'अथ क्रियमाणेऽपि व्याख्यातव्यनाम्नो ग्रहणे कस्मादेवात्र न भवति। अवयवशो ह्याख्यानं व्याख्यानं, पाटलिपुत्रमपि अवयवश

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचष्टे—ईदृशा अस्य प्राकाराः, ईदृशा अस्य प्रासादा इति। सत्यमेवमेतत्। क्वचित्तु काचित् प्रसृततरा गतिर्भवति। शब्दग्रन्थेषु चैषा प्रसृततरा गतिर्भवति—निरुक्तं व्याख्यायते व्याकरणं व्याख्यायत इत्युच्यते, न कश्चिदाह—पाटलिपुत्रं व्याख्यायत इति' इत्युपन्यस्तम्। नगरस्यावयवशो ह्याख्यानेऽपि नगरव्याख्यानमिति तत्र व्याख्यानशब्दो न प्रभवति। अनेन नगराणां वर्णनमवयवशः सविस्तरमितरनगरसाम्यञ्च प्रदर्श्य निःसन्दिग्धं कृतमासीदित्युपलभ्यते।

देशान्तरगमनागमनप्रकारा मनुष्याणां नित्यमेव भवन्ति, ये व्यवसायार्थं देशदेशान्तरं गच्छन्ति क्वचिच्च चिरमधिवसन्ति ते तत्र प्रायभवाः, ये च तत्र नित्यम्भवन्ति ते तत्रभवा इति। यथा ये मुम्बापुर्यां व्यवसायार्थमागत्य तत्र चिरं निवसन्ति ते तत्र प्रायभवा मरुदेशस्था गुर्जरा उत्तरदेशीयाश्च। ये च नित्यं निवसन्ति मुम्बापुर्यां ते तत्रभवा इति व्यवहारस्तथा तदानीमपि व्यवहार आसीदिति प्रतीतिः 'प्रायभवः' (4.3.39) इति सूत्रे 'यो हि राष्ट्रे प्रायेण भवति तत्र भवोऽसौ भवति, तत्र 'तत्र भव' इत्येव सिद्धम्। न सिध्यति। अनित्यभवः—प्रायभवः, नित्यभवः—तत्रभवः। स्रौघ्नो देवदत्तः, स्रौघ्नाः प्रासादाः, स्रौघ्नाः प्राकारा इति' इत्यनेन वर्णनेन ज्ञायते। अत्र राष्ट्रशब्दो देशसमानार्थो व्यवहृतः।

तस्मिन् समये प्रसिद्धानि ग्रामनगरनामानि 'अव्ययात्त्यप्' (4.2.104) सूत्रादौ भाष्यकृता बहुश उक्तानि—आरात्-करव-तीर-कास्तीर-चणाररूप्य-दासरूप्य-शिवपुर-शाकल-निलीनक-सौसुक-निषाहकर्षू-दाक्षिकर्षु-त्रिगर्त-वत्स-मालव-साङ्काश्य-काम्पिल्य-पातालप्रस्थ-काञ्चीपुर-नान्दीपुर-वातवह-कौक्कुटीवह-ब्राह्मणक-आष्टक-ऋषिक-जिह्नव-मौञ्ज इत्यादीनि नानाविधानि विचित्राणि च मनसो मोदकराणि संदृश्यन्ते। पस्पशाह्निके 'सर्वे देशान्तरे' इति व्याख्यानावसरे 'सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते, न चैवोपलभ्यन्ते। उपलब्धौ यत्नः क्रियताम्। महान् शब्दस्य प्रयोगविषयः—सप्तद्वीपा वसुमती त्रयो लोकाः' इत्याद्युक्तवतो भाष्यकारस्य अनेकदेशग्रामाद्यभिधानप्रस्तावो न चित्रकरः, किन्तु स्वाभाविक एव। अइउण् सूत्रव्याख्यानावसरे 'तानेव शाटकानाच्छादयामः, ये मथुरायाम्। तानेव शालीन भुञ्महे, ये मगधेषु। तदेवेदं भवतः कार्षापणं, यन्मथुरायां गृहीतम्। अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात्तदेवेदमिति भवति' इत्यादिवचनैर्द्वौ यात्रिणौ स्वानुभवं परस्परमुपपादयतः। एतेन च यात्रायामभिरुचिः स्वानुभवसम्पादनस्वभावश्च प्रतिपादितो भवति। यात्राभिरुचिवैशिष्ट्यादेव च 'चार्थे द्वन्द्वः' (2.2.29) सूत्रे—

उपास्नातं स्थूलसिक्तं तूष्णीङ्गङ्गं महाह्रदम्।
द्रोणञ्चेदशको गन्तुं मा त्वा ताप्तां कृताकृते।।

इत्युक्तिः सङ्गच्छते।

मार्गप्रबन्धः—'कालाध्वनोरत्यन्तरसंयोगे' (2.3.5) इति सूत्रे 'शय्यते क्रोशम्' इत्युदाहरणात् रथादिवाहनैर्गच्छन् पुरुषः क्रोशं शेते इत्यभिव्यक्तिबलात् अनेके पन्थानः शिल्पिभिः कृता व्यवतिष्ठन्त इति प्रतीतिः। तथा तत्रैव 'क्रोशं कुटिला नदी क्रोशं रमणीया वनराजिः' इत्युदाहरणात् वनराज्या सुशीतलाः सुगमाश्च पन्थान आसन्ननायासेन पान्था गमागमं कुर्वत इति। अत एव 'कुतो भवानागच्छति? पाटलिपुत्रादागच्छामि। गवीधुमतो निःसृत्य साङ्काश्यं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारि योजनानि। दक्षिणतो ग्रामस्य उत्तरतो ग्रामस्य उपरिष्टाद्ग्रामस्य' इत्यादिनिर्देशास्तत्रतत्रोपलभ्यमाना: सङ्गच्छन्ते।

नगराणां निर्देश: क्वचिन्नदीसहचरितोऽपि दृश्यते। 'यस्य चायाम:' (2.1.15) इति सूत्रे 'अनुगङ्गं वाराणसी, अनुगङ्गं हास्तिनपुरम्, अनुशोणं पाटलिपुत्रम्। यस्य चायाम इत्युच्यते। गङ्गा चाप्यायता, वाराणस्यप्यायता, तत्र कुत एतत् गङ्गया सह समासो भविष्यति, न पुनर्वाराणस्येति। एवं तर्हि 'लक्षणेन' इति वर्तते। गङ्गा चैव लक्षणं न वाराणसी। अथवा 'यस्य चायाम:' इत्युच्यते। गङ्गा चाप्यायता वाराणस्यप्यायता। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो यस्यायाम इति। साधीयश्च गङ्गाया:, न वाराणस्या:।' इत्ययामवन्ति महान्ति नगराणि प्रदर्श्यन्ते। अस्य भाष्यस्य चायमाशय:—यत्सम्बन्धि आयामबोधकोऽनु: स तेन सुबन्तेनोपस्थितत्वात् षष्ठ्यन्तेन समस्यत इत्यर्थे गङ्गाऽपि दीर्घा वाराणस्यपि, यथाऽनुगङ्गं वाराणसीति भवति तथा अनुवाराणसि गङ्गेति कथं नेत्याशङ्क्य पूर्वसूत्रादत्र लक्षणेनेति पदमनुवर्तते, तेन लक्षणवाचकेन समस्यत इत्यर्थात् अनुगङ्गमित्येव भवति, यतो हि गङ्गा लक्षणम्। अथवा वाराणसी आयता गङ्गाऽप्यायता, तत्र वाराणस्यपेक्षया गङ्गाऽऽयतेति अनुगङ्गमित्येव भवतीति। एतानि नगराणि सम्पन्नानि सुदीर्घाणि महान्ति गङ्गादिभि: प्लावितानि च शोभन्ते स्म। इदानीमपि तानि नगराणि प्रधानान्येव वर्तन्ते। यद्यपि पाटलिपुत्रहास्तिनपुरयो: नामविपरिवर्तनेऽपि महत्त्वं तयोस्तदवस्थमेव। अनुमीयते च पुरातने काले इमान्यतिविस्तृतान्येव नगराण्यासन्निति। यत इमानि महान्ति नगराण्यासन्नतस्तत्र नगरप्रबन्धकै: प्रयत्नैरपि भवितव्यमेव, तद्विषये किञ्चिद्वक्तव्यमिति नोदाहरणत: सुस्पष्टं प्रतीतमस्माभि:।

एतावत्तु प्रतीयते—तत्समयेऽपि नूत्ननगरग्रामादिनिर्माणमपि सञ्जातमिति। अत एव 'न वेति विभाषा' (1.1.43) सूत्रे 'ग्रामो भवता गन्तव्यो नव:, प्रत्यग्र इति गम्यते' इत्युक्तं सङ्गच्छते। नगरयो: परस्परं विप्रकर्षेऽपि प्रतिपादित एतद्बोधयति—तत्रत्या नागरिका विशिष्टगुणाधाने बद्धपरिकरा नगराणामैश्वर्यं बहुतरमवीवृधन्निति। अत एव 'ध्रुवमपायेऽपादानम्' (1.4.24) इत्यत्र 'इह च साङ्काश्यकेभ्य: पाटलिपुत्रका अभिरूपतरा इति यस्तै: साम्यं गतवान् भवति स एतत्प्रयुङ्क्ते' इत्युक्तमुपपद्यते। साङ्काश्यकपाटलिपुत्रयो: समगुणत्वात् साम्यमवगत्य पाटलिपुत्रे कश्चित् विशेषं पश्यति स एतत्प्रयुङ्क्ते इति तदर्थ:। तथा 'ग्रामादागच्छति शकटेन' 'ग्रामादागच्छन् कंसपात्र्यां पाणिनौदनं भुङ्क्ते' इत्युक्तिर्ग्रामीणानां व्यवहारं बोधयति।

वैद्यकप्रबन्ध:——नगरेषु ग्रामेषु वा वैद्यकप्रबन्ध: कीदृश इत्यवलोकने मुक्तकण्ठेनैवं वक्तव्यम्—इदानीं परिदृश्यमानो वैद्यकव्यवहारस्तद्व्यवहारविमर्शने न दृष्टिगोचरो भवति। भवन्ति च 'नड्वलोदकं पादरोग:, पादरोगनिमित्तमिति गम्यते। दधित्रपुसं प्रत्यक्षो ज्वर:' इत्येवंविधा व्यवहारा दृष्टिगोचरा:। रोगोत्पत्त्यनन्तरं तदुपशमोपायाश्चेदानीन्तनानाम्, रोगोत्पत्तिरेव प्रतिबध्यते प्राचीनै:। एतादृशवैलक्षण्य इदमेव वक्तुं पार्यते—

अहरहर्नयमानो गामश्वं पुरुषं पशुम्।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति 'चार्थे द्वन्द्वः' (2.2.29) इति सूत्रोक्तवचनानुसरणमेव। रोगे रोगे चिकित्साया नवीनाविष्कारमाविष्कुर्वद्भिः मस्तकशूले इदमौषधं, उदरव्याधाविदं, कर्णोपशमनार्थमिदमित्यादिव्याध्युत्पत्त्यनन्तरमेव चिकित्साविद्भिः पाश्चात्यानुसरणशालिभिर्वैद्यैः 'यथा दुर्मदी (अल्पेन पानेन यस्य मदो न भवति बहुतरं पानमपेक्ष्यते सः) सुरया न तृप्यति यमराजोऽपि अहरहर्नयमानो न तृप्यति तथा वैद्यराजोऽपि रोगैर्न तृप्यति—नवीनरोगाविष्करणे दत्तचित्तो भवति' प्रयत्यते, न तेन तादृशो लोकोपकारो न तथा व्याधिनिवृत्तिः।

रोगप्रतिबन्धार्थं दृष्टादृष्टोपायाः—ननु यमराजेनैते पास्पर्धमाना नवीनाविष्करणैस्तत्साहाय्यमेव कुर्वते। बहुवित्तव्ययसाध्यश्चायं मार्गो नवीनानाम्। वस्तुतस्तु प्राचीनप्रणाल्यां चिकित्सा दृष्टाऽदृष्टविषयिका द्विविधाऽप्यासीदिति 'आमः' (2.4.81) इति सूत्रे 'चक्षुष्कामं याजयाञ्चकार' इत्याद्युदाहरणैर्दृश्यते। कश्चिद्देवदत्तोऽन्धत्वं प्राप्तो दृष्टोपायैर्निस्तरणमनभिपश्यन् अदृष्टोपायार्थं यतत इत्यादि प्रकथनमपीदानीं दोषायतनं स्यात्। वस्तुतस्तु व्याधयो द्विविधा दृष्टकारणका अदृष्टकारणकाश्च। तत्र दृष्टकारणा दृष्टैरेवोपायैः शाम्यन्तीति न विवादः। अदृष्टकारणाश्च कुष्ठादिसदृशा न दृष्टोपायैः कदापि शाम्यन्तीति अदृष्टोपायकरणं न दोषाय। अत एव दृष्टकारणकान् रोगान्निवर्तयितुं रोगे रोगे औषधमित्युपायो न शिष्टसम्मतः किन्तु रोगकारणान्निवर्तयितुं तादृश आचार एवानवद्यः पन्था इति तदभिप्रायः। अत एव तादृशापत्तिपरिहारार्थमाचारविशेषं श्रुत्यादिभिः प्रतिपादितं तदानीन्तनानां सुपरिचितमेव, उदाहरणमुखेन जनसांमुख्यमुपनयति भगवान् भाष्यकारः। तद्यथा—'चतुर्थ्यर्थे बहुलं छन्दसि' (2.3.62) इति सूत्रे 'या खर्वेण पिबति तस्यै खर्वो जायते, यां मलवद्वाससं सम्भवन्ति यस्ततो जायते सोऽभिशस्तः, यामरण्ये तस्यै स्तेनः, यां पराचीं तस्यै हीतमुख्यपगल्भः या स्नाति तस्या अप्सुमारुकः, याऽभ्यङ्क्ते तस्यै दुश्चर्मा, या प्रलिखते तस्यै खलतिरपस्मारी, याऽङ्क्ते तस्यै काणः, या दतो धावते तस्यै श्यावदन्, या नखानि निकृन्तते तस्यै कुनखी, या कृणत्ति तस्यै क्लीबः, या रज्जुं सृजति तस्या उद्बन्धुकः, या पर्णेन पिबति तस्या उन्मादुको जायते' इति। अनेन मातृदोषविशेषेण बालकस्य रोगोत्पत्तिं विभावयन्नीरोगप्रसवार्थं व्यतिरेकेणाचारविशेषमुपशिक्षयति। रजस्वलाऽऽचारप्रस्तावेऽयमुपन्यासस्तैत्तिरीयश्रुतौ प्रसिद्धः। अनेनोपन्यासेनेदानीन्तना जना बहुशिक्षितव्या भवेयुः, आचाराश्चैते धार्मिका इति कृत्वा निर्धर्मकैरुपेक्ष्यन्ते, आचारविद्वेषिणश्चाल्पबुद्धयो निर्मर्यादाः पैशाचादीन्धर्मानुपस्तुवन्ति, साम्यवादमभिकामयमानाश्च नैसर्गिके रजःप्रवर्तने कीदृशोऽयं रजस्वालनामाचारो देहाद्युपदण्डनञ्चेत्यभिमन्यमाना आचारविच्छेदेन स्वीयं नवनीतादपि सुकोमलं हृदयं ख्यापयन्ति। एवमनेकप्रकारैरुपहन्यमानोऽपि भारतीयाचारः पूर्ववत् यावन्नाश्रियेत, परमुखप्रेक्षिभिः शिशुबुद्धिभिर्यावदुपेक्ष्येत, स्वार्थवञ्चनाप्रवणैर्यावज्जनानां बुद्धिभेदः परिकल्प्येत तावद्विनिपात एव सांमुखीनः, का कथाऽभ्युन्नतेरिति खलु न विस्मर्तव्यन्तत्रभवद्भिर्जननेतृभिः।

इदानीं दृश्यमानानि रुग्णसेवासदनानि तदाऽऽसन्न वेति विचार्यमाणे सुस्पष्टन्तादृशार्थप्रतिपादकानि वाक्यानि नोपलभ्यन्त इत्येव वक्तव्यं स्यात्। व्याधितानां वर्णनञ्च क्वचिदुपलभ्यत

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव। तद्यथा—'भूवादयो धातवः' (1.3.1) इति सूत्रे 'एवं हि कश्चित्पृच्छति—किमवस्थो देवदत्तस्य व्याधिरिति, स आह—वर्द्धते, अपर आह—अपक्षीयते, अपर आह—स्थितः' इति। अनेकक्रियाभिरुत्तराणि ह्येवं बोधयन्ति—कस्यचन व्याधिः स्थितः, कस्यचन वर्धते, कस्यचनापक्षीयत इति बहुषु व्याधितेषु मिलितेषु चिकित्सकेन पृष्टोऽन्यश्चिकित्सको वक्तीति रुग्णालयवर्णनेन भाव्यमिति।

तथा—'अनुदात्तङित आत्मनेपदम्' (1.3.12) सूत्रे 'एतिजीवन्तमानन्दः, नास्य किञ्चिद्रुजति' इत्युदाहरणे स्वस्थोऽयं देवदत्तो नास्य किञ्चिद्रुजति, जीवन्तं पुरुषमानन्दः प्राप्नोतीति तदर्थं यतनीयं नोपेक्षा करणीयेति चिकित्सकानां व्यवहारं बोधयतः। 'अस्मदो द्वयोश्च' (1.2.59) इत्यत्र 'इदं मे अक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु श‍ृणोति, अनेनाक्ष्णा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु श‍ृणोमि' इत्युदाहरणानि नेत्रकर्णादिचिकित्सकसविधे तद्व्याधितानामुत्तराण्यपि सम्भवन्ति। एतेन तदानीन्तने काले चिकित्साप्रकाराः शुश्रूषाविशेषाश्च समवर्तन्तेत्यनुमाने न हेत्वाभासाः प्रभवेयुः।

चिकित्साप्रकारा भिन्ना भिन्ना आसन्नित्यप्यवगन्तुं शक्यते 'नानोर्ज्ञः' (1.3.58) इति सूत्रे 'औषधस्यानुजिज्ञासते' इत्युदाहरणावलोकनेन। औषधस्यानुजिज्ञासत इत्यस्य हि औषधेन प्रवर्तितुमिच्छतीत्यर्थः। एवञ्चान्यचिकित्साकरणानन्तरमिदानीमोषधीभिश्चिकित्सितुमिच्छतीत्यनेन विविधाश्चिकित्साप्रकारा ज्ञायन्त इति सिद्धम्। अस्मिन् विषये प्राचीनानामभिमतोऽर्थः—सदाचरणेन रोगोत्पत्तिरेव प्रतिबन्धनीया, एवम्प्रयतमानस्यापि यदि दैववशात्कश्चिद्व्याधिरुत्पत्स्येत तत्कारणान्येव चिकित्सितव्यानि न तु परकीयां चिकित्सापद्धतिमवलम्ब्य स्वात्मनाशवत् द्रव्यनाशोऽपि विधेय इत्येव।

नगरादीनां निर्माणम्—इदानीं नवराष्ट्रनिर्माणप्रसङ्गो राजकीयपुरुषाणां सांमुख्यमादधाति। एतादृशे समये प्रस्तुतो विषयोऽपि जनकल्याणमतिभिर्नोपेक्षणीय एव। यादृशेनोपायेन सर्वेषां जनानामत्यन्तं हितं स्यात्तादृश एवोपाय आश्रयणीय इत्येतन्न विवादास्पदम्। अत एवेतिहासविद्भिः परमहितैषिभिः परिवर्तिनि संसारेऽस्मिन् येनोपायेन कुशलिनो जनाः सम्पत्स्यन्ते स उपायः समादरणीयश्चेत्, एतद्देशप्राचीनपरम्परादर्शनादेव कुशलम्, न परकीयदेशाचारमुखप्रेक्षणेन। नवराष्ट्रनिर्माणप्रसङ्गोऽपि भाष्यकृता 'कस्य च दः' (5.3.72) इत्यत्र 'नवग्रामकं, नवराष्ट्रकं, नवनगरकं' इत्युदाहरता प्रतिपादितः। ग्रामो नवो विधीयते स्म, नवनगरनिर्माणदक्षा अपि तदानीन्तनाः पुरुषाः, नवराष्ट्रनिर्माणेऽपि बद्धपरिकराः सफलाश्चेति सर्वमनेन प्रतीयते।

नगरादीनां निर्माणे यत्र विशेषतोऽवधेयं तत् 'स्थानेऽन्तरतमः' (1.1.50) सूत्रे भगवता महता कौशल्येन प्रतिपादितम्। तदित्थम्—'समाजेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषामेव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते। यथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते। तथा यान्येतानि गोयुक्तानि सङ्घुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति। एवं तावच्चेतनावत्सु। अचेतनेष्वपि यथा—लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छत्यान्तर्यतः। तथा—या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः। स धूम आकाशे निवाते नैव तिर्यग्गच्छति नार्वागवरोहति। आब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा—ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति नार्वागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः' इति। 'नैव कृशाः' इत्यस्य व्याख्यानवेलायां 'गुणप्रमाणकृतसादृश्यपरिहारेण विद्याद्यर्थकृतमान्तर्यं लोक आश्रीयत इत्यर्थः' इति व्याख्यातं कैयटेन। प्रदीपव्याख्यानावसरे 'विद्यादीति' इति प्रतीकमुपादाय 'आदिनोत्सवाशनाद्यर्थित्वब्राह्मणत्वादिजातिधनादिसङ्ग्रहः' इत्युक्तं नागेशभट्टेन। अनेन प्रघट्टकेन चेतनाचेतनसाधारणधर्मप्रतिपादकेन येषां किञ्चिदर्थकृतमान्तर्यं तेषामेवैकत्र निवासः सम्भवति। अर्थकृतमान्तर्यञ्च समानोत्सवत्वेन समानाशित्वेन समानेच्छावत्वेन समानजातित्वादिना वा भवति न विरुद्धधर्मवत्वेनेति तदनुगुणानामेवैकत्रनगरं राष्ट्रं ग्रामो वा भवति। तथा च विरुद्धसंस्कारवतां विद्वेषस्वभावानां क्रूराणां जडाभिमानिनामनिच्छयाऽवकाशे प्रदत्तेऽपि अनुनयसम्पादनं विफलमेवेत्यवधेयम्।

यथेदानीं विशिष्टवर्गीयाः पुरुषा उपपत्त्यनुपपत्तिमवलोक्य यत्र तत्र वसन्ति यतस्ततो वाऽन्यत्र गच्छन्ति तद्वत्तदानीमपि विशिष्टवर्ग्या इतस्ततो गच्छन्तीति 'गतिश्च' (1.4.59) इत्यत्र 'विगताः सेचका अस्माद् ग्रामात् विसेचको ग्रामः, प्रगता नायका अस्माद् ग्रामात् प्रनायको ग्रामः' इत्यादिनोपवर्ण्यते। तत्र सेचनकार्याभावात्, अन्यत्र सेचनमूल्यधिकं मन्यमानानां वाऽन्यत्रगमनं सम्भवति तेषाम्। कार्यवशाद्ग्रामे नेतारः समापन्नाः कार्यावसानेऽन्यत्र गच्छन्ति, समुचितनेतृत्वकरणदक्षा अभ्युन्नत्यपेक्षयाऽन्यत्र गच्छन्ति, अथवा सर्वेऽपि यत्र नेतारस्तत्रापीदं वक्तुं योग्यम्।

नगरादीनां संज्ञाः—ग्रामनगराणां नामान्यपि तत्रत्यविशिष्टवस्त्वपेक्षया समाजापेक्षयैव वा निर्वर्त्यन्ते स्मेति 'मतोश्च बह्वजङ्गात्' (4.2.72) इत्यत्र 'मालावतामयं निवासो मालावतम्, श्ववान्, उदुम्बरावती, मशकावती' इत्युदाहरणैः प्रतीयते। यत्र मालावन्त एव प्राधान्येन निवसन्ति तन्नगरं मालावतम्, यत्र शोभनाः श्वान उत्पद्यन्ते, श्वानश्च यत्र तत्र भवन्ति, ग्रामेऽस्मिन् विशिष्टा व्याघ्र इव शूरा मृगयानिपुणा रक्षकाश्च श्वानो दृश्यन्ते इति श्ववान् ग्राम इत्युच्यते। यस्याः परिसरे वृक्षा उदुम्बरा बहवः सन्ति, यत्र वा देहल्यो बहवः सन्ति सोदुम्बरावतीत्यन्वर्थं नाम ('उदुम्बरस्तु देहल्यां वृक्षभेदे च पण्डके' इति मेदिनी)। एवञ्च गुणविशेषात् अभिजनविशेषाद्वा ग्रामादीनामभिधानानि प्रवर्तन्ते स्म। ग्रामश्च प्रायः सर्वजातिविशिष्ट एव परिपूर्णो भवतीति व्यवहारस्य—'एच इक् ह्रस्वादेशे' (1.1.48) इत्यत्र 'भूयस एव ग्रहणानि भविष्यन्ति। तद्यथा—ब्राह्मणग्राम आनीयतामित्युच्यते। तत्र चावरतः पञ्चकारुकी भवति' इत्युदाहरणेनोपपत्तिः। यत्र ब्राह्मणग्रामोऽयमित्युच्यते तत्राप्यन्ये निवसन्त्येव न तु केवलं ब्राह्मणा निवसन्तीति ब्राह्मणग्राम इति भवति। एवमेव क्षत्रियग्रामो वैश्यग्रामः शूद्रग्राम इत्यादीनामुपपत्तिरनुसन्धेया, न तु क्षत्रियग्राम इत्युक्ते क्षत्रिया एव निवसन्ति, नान्ये केचन तत्रासन्; ये वा समावसन्ति ते निर्लुठिता निष्कासिता वेति न प्रतिपत्तिः। पञ्चकारुकीशब्देन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलालकर्मारवर्धकिनापितरजका गृह्यन्ते, ब्राह्मणप्रधानग्रामेऽपि ते सुखेन निवसन्त्येव। अत एव आकडारसूत्रे 'अब्राह्मणको देशः, अवृषलको देशः, वीरपुरुषको ग्रामः' इत्यादीन्युदाहरणानि सामञ्जस्येन सङ्गच्छन्ते।

मार्गाः—'योजनं गच्छति' (5.1.74) इति सूत्रे 'क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः, योजनशतादभिगमनमर्हति यौजनशतिको गुरुः' इत्यादिना देशे निवसन्तः पुरुषा योजनशतादागच्छन्तं गुरुमधिगच्छन्तीति सुगमाः सानुबन्धाः सूपन्यस्ताश्च पन्थानो बोध्यन्ते। अत एव मार्गाणां प्रकारविशेषा 'उत्तरपथेनाहृतञ्च' (5.1.77) इत्यत्रानेकान्युदाहरणानि प्रदर्शयता बोध्यन्ते। तानि यथा—'वारिपथेन गच्छति वारिपथिकः, वारिपथेनाहृतम् वारिपथिकम्, जङ्गलपथेन गच्छति जाङ्गलपथिकः, जङ्गलपथेनाहृतं जाङ्गलपथिकम्, स्थलपथेन गच्छति स्थालपथिकः, स्थलपथेनाहृतं स्थालपथिकम्, कान्तारपथेन गच्छति कान्तारपथिकः, कान्तारपथेनाहृतं कान्तारपथिकम्, अजपथेन गच्छति आजपथिकः, आजपथिकम्, शङ्कुपथेन गच्छति शाङ्कुपथिकः, शाङ्कुपथिकम्' इत्यादीनि। अनेनोदाहरणजालेन तदा मार्गाणामनेके प्रकारास्तेषु भिन्नाः संव्यवहाराश्चासन्निति सुभगाः सुसम्पन्नाः सुभिक्षाः सम्पन्नपानीया देशा भारतभूमिमलङ्कुर्वन्ति स्मेति 'विशेषणानां चाजातेः' (1.2.52) इत्यत्र 'सुभिक्षः सम्पन्नपानीयो बहुमाल्यफलो देशः' इत्युदाहरणदानेन समर्थयति भगवान् भाष्यकारः।

जातिनिर्धारणम्—ईदृशे सुभिक्षे सम्पन्नपानीये बहुमाल्यफले देशे मनुष्याः किं समानधर्मिणः समानरूपाः समानगुणविशिष्टा वा वसन्ति स्म, उत विभिन्नजातीया विभिन्नरूपा विभिन्नगुणविशिष्टा वेति विचार्यमाणे सर्वेऽप्यत्र सुखेन निर्वहन्ति स्मेति वक्तुं पार्यते। जातयश्चापि यथासम्भवं यत्र तत्रोदाहरणेषु प्रतिपन्ना उल्लेखनीया एवेति जातिलक्षणं प्रथमतः प्रदर्श्यते। 'अतिशायने तमबिष्ठनौ' (5.3.55) इति सूत्रे 'यदप्युच्यते जातेर्नेति वक्तव्यमिति। न वक्तव्यम्। जननेन या प्राप्यते सा जातिः। न चैतस्यार्थस्य प्रकर्षाप्रकर्षौ स्तः' इत्यनेन जन्मना या प्राप्यते सा जातिरिति गुणोपष्टम्भादिना न जातिरिति प्रतिपादयति। यथा काकाज्जातमात्रे प्राणिनि काकत्वं, शुकाज्जातमात्रे च शुकत्वं, मनुष्याज्जातमात्रे च मनुष्यत्वं, तथा शूद्राज्जातमात्रे शूद्रत्वं, क्षत्रियाज्जाते च क्षत्रियत्वमिति जातमात्रे वस्तुनि तत्तज्जातिमत्वमस्त्येवेति। भाष्यार्थश्च—तमबिष्ठनौ प्रत्ययौ जातेर्न भवन्तीति वक्तव्यमित्याक्षिप्य या जननेनैव प्राप्नोति तत्र कः प्रसङ्गः प्रकर्षाप्रकर्षयोरिति जातेर्नेति न वक्तव्यमिति। जातेर्नेति वक्तव्यमित्यस्योदाहरणप्रसङ्गे 'वृक्षोऽयम्, प्लक्षोऽयम्' इत्युदाहृतम्। यत्र तृणानि लता गुल्मानि वा वर्तन्ते न वृक्षास्तत्र महान्तं सुच्छायं महत्फलं वृक्षमेकमुपलभ्य वृक्षोऽयमित्युच्यते। तत्र लतावीरुधादिभ्यो वृक्षेऽतिशयः सम्प्रतीयते, स एव व्यक्तावुपलभ्यमानोऽतिशयो वृक्षत्वजातावप्युपलभ्यत इति जातिवाचकाद्वृक्षशब्दात्तमबिष्ठनौ प्राप्नुतस्तदर्थं जातेर्नेति वक्तव्यमिति सम्प्रतिपन्नं, जन्मना प्राप्यमाणे वस्तुनि न कश्चिदतिशय इति समाधत्ते। कश्चिद्राजगृह उत्पद्यते, कश्चिद्भिक्षुगृहे, तयोर्बालकयोः को गुणातिशयः? एवञ्च जन्मना जातो ब्राह्मणो जन्मना जातः क्षत्रियो जन्मना जातश्च शूद्र इत्यनयोर्न कोऽपि दृश्यो विशेषः, केवलञ्जातिथेददर्शनात्तेषां भिन्नाः संस्कारा भवन्तीत्येव। यथा काकाज्जाते शिशौ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न स्तनपानसंस्कारः काकेन क्रियते न वा गोवत्से काकवत् मुखेनान्नरससंस्कारं गोर्विधत्ते तथा क्षत्रियबालके भिन्नाः संस्काराः, शूद्रबालके चान्ये, ब्राह्मणबालके चान्ये इति जातिभेदनिमित्तं संस्कारभेद इत्येव, न कश्चित्तेषां बालकानां दृश्यः प्रकर्षश्चाप्रकर्षश्च भाष्यकारसमये केषाञ्चनेष्टः। अत एव 'पुंयोगादाख्यायाम्' (4.1.48) इति सूत्रे—

त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च।
एतच्छिवं विजानीहि ब्राह्मणाग्र्यस्य लक्षणम्।।

इत्यादीनि ब्राह्मणादीनां लक्षणान्युपसंगृहीतानि भाष्ये।

अथ संस्कारभेदोऽपीदानीमस्माभिर्नाभिप्रेयते, ये संस्कारा ब्राह्मणबालकेषु क्रियन्ते त एव क्षत्रियबालकेषु अन्येषु वेत्याग्रहश्चैत्, क्षत्रियबालका ब्राह्मणसंस्कारैः संस्क्रियमाणा अजसमूहे पाल्यमानो व्याघ्रशिशुर्वकं दृष्ट्वाऽजशब्दमिव शत्रुं दृष्ट्वा यज्ञोपवीतं प्रदर्शयेयुः। एवञ्च जन्मना जातिमभिमन्यमानास्तदानीन्तनीयाः सुखेनैव कालं व्यतिचक्रमुः।

संस्कारादिभिर्न जात्युत्पत्तिः—केवलं क्षत्रियसंस्कारैः संस्क्रियमाणाः सर्वेऽपि क्षत्रिया भवेयुरित्यपि नेतयग्रिमोपन्यासेन समवधेयम्। 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (4.1.104) इत्यत्र 'अनृष्यानन्तर्य इत्युच्यते तत्रेदं न सिध्याति—कौशिको विश्वामित्र इति। किं कारणम्। विश्वामित्रस्तपस्तेपे नानृषिः स्यामिति, तत्र भवान् ऋषिः सम्पन्नः। स पुनस्तपस्तेपे नानृषेः पुत्रः स्यामिति, तत्रभवान् गाधिरपि ऋषिः सम्पन्नः। स पुनस्तपस्तेपे नानृषेः पौत्रः स्यामिति, तत्रभवान् कुशिकोऽपि ऋषिः सम्पन्नः। तदेतदृष्यानन्तर्यम्भवति।' इत्युक्तम्। क्षत्रियो विश्वामित्रो ऋषित्वसम्पत्तये तपश्चचार तपसा स ऋषिः समभूत्। एवमेव तपसा गाधिकुशिकावपि ऋषी समभूताम्। विरुद्धसंस्कारमात्रेण जातिविपरिवर्तनं नैव भवतीति तेषां मतिः। अन्यथा चाण्डालेष्वपि ब्राह्मण्यमाधातुं कृतप्रयत्नं कञ्चन धर्मपरिवर्तनक्षमं महामहोपाध्यायमाहूय ब्राह्मण्यमनुभूयमानो विश्वामित्रस्तपश्चरणक्लेशसंवरणादिकं नाकरिष्यत्। एवञ्च तपः सामर्थ्यमपि तदा नितरां सम्मन्यते स्मेत्यपि निर्विवादम्। तदानीं जातिभेदसत्वादेव 'आदेच उपदेशेऽशिति' (6.1.45) इति सूत्रे 'तथा ह्यर्थो गम्यते लोके—अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमानयति, नासौ लोष्टमानीय कृती भवति' इति व्यवहारः सामञ्जस्येनोपपद्यते।

जातिभेदाः—जातिभेदसमाश्रयणादेव च 'प्रत्यभिवादेऽशूद्रे' (8.2.83) इति सूत्रे 'भो राजन्यविशां वेति वक्तव्यम्। राजन्य—इन्द्रवर्माहं भोः। आयुष्मानेधीन्द्रवर्म3न्। विश्—इन्द्रपालितोऽहं भोः। आयुष्मानेधीन्द्रपालिता3' इत्यादिना राजन्यवैश्ययोर्विकल्पेन, शूद्रब्राह्मणयोश्च नित्यं प्लुतं विधाय शर्मवर्मपालितदासास्तत्तज्जातिविशेषा अपि प्रदर्श्यन्ते। ब्राह्मणादीनां लक्षणञ्चाकारि भाष्यकृता 'तेन तुल्यं क्रिया चेद्वतिः' (5.1.115) इत्यत्र 'सर्व एवे शब्दा गुणसमुदायेषु वर्तन्ते—ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति। आतश्च गुणसमुदाये, एवं ह्याह—

तपःश्रुतञ्च योनिश्चेत्येतद्ब्राह्मणकारकम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।

तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानभ्यन्तरान् ब्राह्मण्ये गुणान् कुर्वन्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुदायेषु च शब्दा वृत्ता अवयवेष्वपि वर्तन्ते। एवमयं ब्राह्मणशब्दः समुदाये वृत्तोऽवयवेष्वपि वर्तते' इत्यादिलक्षणानि ब्राह्मणादीनां तत्तज्जातिविशिष्टानामुक्तानि विराजन्ते प्राचीनानाम्। अत्र हि तेन तुल्यं क्रिया चेदित्युक्तौ तृतीयान्तेन ब्राह्मणादिशब्देन क्रियायाः सामानाधिकरण्ये वतिप्रत्ययो विधीयते। ब्राह्मणेन तुलयमधीते क्षत्रिय इत्यादौ ब्राह्मणक्षत्रिययोरध्ययनक्रिया तुल्या प्रतीयते, तत्र क्रियया सामानाधिकरण्यमनुपपन्नमिति प्रत्ययो न स्यादित्याक्षिप्य समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति अवयवबोधकशब्देनापि तेषां सामानाधिकरण्यम्, तैलं भुक्तमित्यादौ यथा समुदायेऽपि वर्तमानस्तैलशब्दो भुक्ता या मात्रा तत्रापि व्यवह्रियते तथा क्रियादावपि अवयवे ब्राह्मणशब्दस्य सत्त्वेन न सामानाधिकरण्यस्यानुपपत्तिः। अत एव शौचाचारादिविहीने केवलजन्मना जातमात्रेऽपि तत्तच्छब्दव्यवहार उपपद्यते। गौरः शुच्याचार इत्यत्र गौरपदेन गौरवर्णविशिष्टो न, किन्तु—

अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते।
सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तितः।।

इति धर्मशास्त्राभिप्रायेण गौरीपुत्र एव गौरपदवाच्यः। तथा च स्त्रीणामभ्युन्नतिकामैरपि विवाहवयोमर्यादाकरणं शास्त्रविरुद्धं विशुद्धवर्णोत्पत्तिप्रतिबन्धकमिति दूरतः परिवर्जनीयमेवेति। एतादृशमेव लक्षणं 'ब्राह्मणादीनां नञ्' (2.2.6) इति सूत्रे विस्तरेणोक्तमिति तत एवावगन्तव्यम्।

उच्चनीचभावविषये—पूर्वनिपातप्रकरणे 'अल्पाच्तरम्' (2.2.34) इति सूत्रे ब्राह्मण-क्षत्रियवैश्यशूद्राः सहोच्चारिताः क्व निपतन्तीति विचारावसरे वर्णानामानुपूर्व्येण पूर्वनिपाता भवन्ति—इति वक्तव्यम्। 'ब्राह्मणक्षत्रियविट्शूद्राः' इत्यादिना वेदादौ येन क्रमेण तेषामुत्पत्तिः कथिता तेनैव क्रमेण पूर्वनिपातोऽपि कर्तव्य इत्यादि प्रतिपादयन् भगवान् न तेषां श्रेष्ठत्वमुच्चत्वं वाऽऽह, किन्तु वेदे ब्राह्मणोत्पत्तिः पूर्वमभिहितेति ब्राह्मणस्य पूर्वनिपात इत्येव। यदि तेषां पूज्यत्वापूज्यत्वे प्रसिद्धे समभूतां तदा तस्मिन्नेव सूत्रे 'अभ्यर्हितञ्च। अभ्यर्हितञ्च पूर्वं निपतीति वक्तव्यम्। मातापितरौ। श्रद्धामेधे' इत्यनेन मातापित्रोर्मातुरेवाभ्यर्हितत्वात् पित्रपेक्षया पूज्यत्वात् पूर्वनिपातो विधीयते तेनैव ब्राह्मणादीनामपि पूर्वनिपाते सिद्धे 'वर्णानामानुपूर्व्येण' इति वार्तिक-प्रणयनम् स्वव्याख्यानेन तद्बृंहणञ्चोभयमपि विफलमेवाभविष्यत्। निरर्थकमेवेदमुच्यत इति चेत्, अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इत्याद्यापामरप्रसिद्धो वैयाकरणाचारो ननु अत्र प्रमाणीकर्तव्यः। 'दर्भपवित्रपाणिः प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणिनाय, तत्र वर्णेनाप्यनर्थकेन न भवितव्यम्' इत्याद्युपदिशन् भाष्यकारो वर्णानामानुपूर्व्येणेति समग्रं वचनमेव निरर्थकं व्याक्रियमाणः सम्भवेदित्याशङ्कनमपि साहसमात्रमेव स्यात्। एवञ्च जातिभेदप्रबन्धे महति वर्तमानेऽपि न कश्चित्तेषामुच्चनीचादिव्यवहार आसीत्, न वा कश्चिद्विरोधोऽप्यासीदिति सुनिश्चितं प्रतीयते। पस्पशाह्निके 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इत्याद्युपन्यासेऽपि ब्राह्मणशब्दः संस्कारमात्रे प्रवृत्तस्त्रैवर्णिकान् ग्राहयति। तत्र त्रैवर्णिकैरवश्यं शब्दा ज्ञेया इतरेषां शब्दाज्ञाने न कश्चित्प्रत्यवायः। यदि शब्दज्ञानजिज्ञासा, न कश्चित्प्रतिबध्नाति। जिज्ञासाभावे न कश्चिदुपरुणद्धि च। एवञ्च जात्या-दिसंव्यवहारेण बहूपकृतं समाजस्य नानिष्टं किञ्चिदित्येवावसीयते जात्यादिविचारविमर्शनेन।

सामाजिकव्यवहारः—तदानीन्तनानां सामाजिकव्यवहारेणैतत्सुस्पष्टं प्रतिपद्येतेति सोऽ-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्यवश्यं विमर्शनीयः 'जीवति तु वंश्ये युवा' (4.1.163) इति सूत्रे 'वृद्धस्य च पूजायाम्। वृद्धस्य च पूजायां युवसंज्ञा वक्तव्या। तत्रभवन्तो गार्ग्यायणाः, तत्रभवन्तो वात्स्यायनाः। का पुनरिह पूजा? युवत्वं लोके ईप्सितं पूजेत्युपचर्यते। तत्र भवन्तश्च युवत्वेनोपचर्यमाणाः पूजिता भवन्ति' इत्युदाहरणं तदानीन्तने व्यवहारे प्रकाशमापादयति। वृद्धसंज्ञकाद्युवसंज्ञकाच्च भिन्नाः प्रत्यया विद्यन्ते, यथा च भवति—गार्ग्यो गार्ग्यायण इति। तत्र वार्तिकेनानेन पूजायां कर्तव्यायां वृद्धसंज्ञकस्यापि युवसंज्ञा भवति, भवति च तस्मात्तादृशः प्रत्ययः। यतो युवत्वं लोके सर्वैः काम्यते अतो युवत्वेन व्यवहारः पूजेत्युपचर्यते। अतो यत्र गार्ग्यशब्दव्यवहारः समापन्नस्तत्र माननीये पूज्ये गार्ग्ये गार्ग्यायणशब्दव्यवहारः कर्तव्य इत्यादिशतो वररुचिपतञ्जली।

यस्य च वस्तुतो यूनो गार्ग्यायणस्य दुर्वृत्तं पश्यति जनस्तत्र वास्तविके गार्ग्यायणेऽपि गार्ग्यशब्दव्यवहारमनुमनुतः 'अपत्यं पौत्रप्रभृतिगोत्रम्' (4.1.162) सूत्रे 'जीवद्वंश्यश्च कुत्सितम्। जीवद्वंश्यश्च कुत्सितं गोत्रसंज्ञं भवतीति वक्तव्यम्। गार्ग्यस्त्वमसि जाल्म, वात्स्यस्त्वमसि जाल्म' इत्यादिना। वस्तुतो युवसंज्ञकस्यापि दुर्वृत्तादिविशेषान्न युवसंज्ञकेन व्यवहारः किन्तु गार्ग्यस्त्वमसि जाल्मेति गार्ग्यशब्देन व्यवहारं बोधयति। षष्ट्यब्दिपूर्तिकरणतत्परैरप्येतदवधेयं—तादृशपूर्तिकरणेन न पूजा सम्प्रतिपद्यते, किन्तु वृद्धस्त्वमसि, प्रत्यवसेया व्यवहारा इत्येव बोध्यते। यथा निमन्त्रितसमासे पण्डितापण्डितसमवाये आगच्छन्तमपण्डितमपि स्वागताध्यक्षो महतोत्साहेनाचारविशेषं 'आगन्तव्यं महाभागैः, भवदागमनेन पूजिता वयम्' इत्यादि प्रतिपादयति, अपण्डितश्च पूजार्हमात्मानं मन्यते तथैवायं व्यवहारः सम्प्रतिपद्यत इति पाश्चात्याचारचतुराः षष्ट्यब्दिपूजकाः पूज्याश्च इतो नावदधत इत्येव कुशलम्। कुत्साव्यवहारः क्वचिदुपदर्शितोऽपि दृष्टिपातमर्हत्येव। तथाहि—'का पुनरिह कुत्सा? पितृतो लोके व्यपदेशवताऽस्वतन्त्रेण भवितव्यम्। य इदानीं पितृमान् स्वतन्त्रो भवति स उच्यते—गार्ग्यस्त्वमसि जाल्म। न त्वं पितृतो व्यपदेशमर्हसीति' इत्यादिना यत्र यः पितुराज्ञां तिरस्करोति स कुत्सितो भवति किमुत पितृपितामहादीनां ऋषीणामाज्ञाव्यतिक्रमे—इति विचारणीयं सुधीभिः।

विद्यार्थिनः—समाजस्य प्राणभूता विद्यार्थिनः, तद्विषये 'कमण्डलुपाणिं छात्रमद्राक्षीत्' इत्याद्युक्तयो बहुश उपलभ्यमाना विद्यार्थिनः सुचरित्राः स्वाध्यायशालिनो ब्रह्मचर्यरताः समाजेन समादृता देशभूषणा भवन्ति स्मेति बोधयन्ति। ये च दुश्चरिता अनध्ययनवन्तस्ते कठोरतरं निर्भर्त्सिता भवन्तीति 'ध्वाङ्क्षेण क्षेपे' (2.1.42) इति सूत्रे 'यथा तीर्थकाका न चिरं स्थातारो भवन्ति। एवं यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति' इत्यनेन ज्ञायते। शालां गत्वोपस्थितिं परिज्ञाप्य ये शालायामापणे वा बाभ्रम्यमाणास्तिष्ठन्ति त उच्यन्ते तीर्थकाका इति हि सामयिकोऽर्थः। यथा छात्राणां स्तुतिनिन्दे प्रवर्तेते न तथाऽध्यापकानाम्। अत्रेदमपि बीजं स्यात्—ये प्रयोजनमनपेक्ष्य कर्तव्यमिति बुद्ध्या शिष्यान् पाठयन्ति ते कथं निन्दनीया भवेयुः। यथेदानीं गुरुकुलानां व्यवस्था सम्प्रवर्तते न तदानीं तादृशी आसीत्। तदा च ग्रामे ग्रामे विद्याव्यसनिनः कर्तव्यबुद्ध्याऽध्यापनवृत्तिं सम्पादयन्तः सर्वानपि शिशूनध्यापयन्ति स्मेति ज्ञायते। यथेदानीं पाठशालाकरणमपि व्यवसायः, यथा वा महता व्ययेनापि न तत्त्वाध्यापनं, न तदानीमेतत्किमप्यासीदिति प्रतीयते। तदा गुरुशिष्यसम्बन्धश्च 'छत्रादिभ्यो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ण:' (4.1.62) इति सूत्रे 'किं यस्य छत्रधारणं शीलं स छात्रः? किञ्चातः? राजपुरुषे प्राप्नोति। एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्यः—छत्रमिव छत्रम्। गुरुश्छत्रम्। गुरुणा शिष्यश्छत्रवत् छाद्यः, शिष्येण गुरुश्छत्रमिव परिपाल्यः इत्येवमुपवर्णित आस्ते। न तदा केचन नेतारः शिष्याणां बुद्धिभेदमकुर्वन्। न वा गुरूनुपहसन्तस्ते आत्मनः प्रतिष्ठां शिष्यस-मुदायाग्रेऽवदन्, येनात्मप्रतिष्ठाबोधनेन स्वार्थो न सिध्यति परार्थश्च हीयते। तदा चैवमुपवर्णितः सम्बन्धो गुरुशिष्ययोः समवस्थित आसीदिति प्रतिपादयति। एतादृशी चिन्ता तु दृश्यते—'अनद्यतने लुट्' (3.2.15) इति सूत्रे 'अयं तु कदाऽध्येता य एवमनभियुक्त इति। अध्ये-तेवायमध्येता नायमध्येष्यते' इति। य एवमभ्यासहीनः तस्याध्ययनं कथं स्यादिति तदर्थः। तथा विद्यार्थिनां शीतादिनिवारणदक्षा अपि तदानीन्तनाः—'हेतुमति च' (3.1.26) सूत्रे 'भिक्षा वासयति, कारीषोऽग्निरध्यापयति। भिक्षाश्चापि प्रचुरा व्यञ्जनवत्यो लभ्यमाना वा सम्प्रयोजयन्ति, तथा कारीषोऽग्निर्निर्वाते एकान्ते सुप्रज्वलितोऽध्ययनं प्रयोजयति' इत्यनेन ज्ञायते। 'चतुर्थी' (2.1.36) इत्यत्रापि 'छात्राय रुचितम्, छात्राय स्वदितम्' इत्यादिना छात्रो-पकारपरान् तदानीन्तनान्बोधयति। 'खट्वा क्षेपे' (2.1.25) इति सूत्रे 'क्षेप इत्युच्यते कः क्षेपो नाम? अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढव्या। च इदानीमतोऽन्यथा करोति स उच्यते खट्वारूढोऽयं जाल्मो नातिव्रतवान्' इत्यनेन गुर्वनुज्ञां विनैव योऽग्नीनुपसंगृह्णाति स एवं निन्द्यते—खट्वारूढोऽयं जाल्म इति। तदानीं गुर्वनुज्ञां विना धर्म्यो विवाहोऽपि निन्द्यते किमुत कन्यासंसर्गश्छात्रस्य क्षमेत वा। छात्राणां बुद्ध्याद्युपलब्धिरपि परीक्ष्येतेति तद्धितश्चासर्ववि-भक्तिरिति सूत्रे 'समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्त, अपरे न। तत्र किमस्माभिः कर्तुं शक्यम्। स्वाभाविकमेतत्' इति प्रतीयते। अनेन चोपष्टम्भेन तदा गुरुकुलानि महान्ति सर्वाध्ययनप्रकारविशेषाण्यासन्नित्यवगन्तुं युक्तम्।

'वृद्धिरादैच्' (1.1.1) सूत्रे 'एवं हि दृश्यते लोके य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति' इति दर्शनात्, एकस्मिन् गुरुकुलेऽनेकेऽध्यापकाः समये-समये पाठयन्ति। कश्चित् खण्डिकोपाध्यायः, कश्चिद्वर्गाध्यापकः, कश्चिदृगध्यापक इति तत्तद्विषयाध्यापकाः खण्डिकोपाध्यायपदोपादानेन बोध्यन्ते। अथर्ववेदे पादस्य खण्डिकापदेन व्यवहारः, तदध्यापकश्च खण्डिकोपाध्यायः।

ननु 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' इत्युदाहरणदर्शनात् सुसंस्कृतेनाधुनिकेन समाजेन विनिन्दिता बालानां ताडनादिप्रकारास्तदा प्रचलिता आसन्निति ग्राम्यत्वं तेषां प्रदर्शितं भवतीति चेन्न। शिष्योपकारार्थं क्वचित्तादृशं ताडनमपि गुणायैव भवतीति 'वाक्यादेरामन्त्रित-स्यासूया' (8.1.8) इति सूत्रोक्तेन व्यवहारेण प्रतीयते। तत्र हि 'असूयाकुत्सनयोः कोपभर्त्सनयो-श्चैकार्थत्वात् पृथक्त्वनिर्देशानर्थक्यम्। असूया-कुत्सनमित्येकोऽर्थः। कोपो भर्त्सनमित्येकोऽर्थः। एकार्थत्वात्पृथक्त्वनिर्देशोऽनर्थकः। न ह्यनसूयम् कुत्सयति, न चाप्यकुपितो भर्त्सयते। ननु च भोः अकुपिता अपि दृश्यन्ते दारकान् भर्त्सयमानाः। अन्ततस्ते तां शरीराकृतिं कुर्वन्ति या कुपितस्य भवति। एवं तर्ह्याह—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः॥

इत्युक्तम्। एवञ्चाल्यबुद्धीनां बालानामुत्पथप्रतिपन्नानां चपेटादिप्रकारेण स्वल्पेन दण्डेन दण्डयन्तः परमार्थत उपकारमेव कुर्वन्तीति सुसंस्कृतैराधुनिकैरवधेयम्॥

तादृशादध्यापकात् अन्तर्धानमपि कृतापकारिणां शिष्याणां 'अन्तर्द्धौ येनादर्शनमिच्छति' (1.4.28) सूत्रे 'उपाध्यायादन्तर्धत्त इति। पश्यत्ययं यदि मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणमुपालम्भो वेति स बुद्ध्या सम्प्राप्य निवर्तते' इत्यनेन ज्ञायते। अविनीतस्य पाठशालातो निष्क्रमणं दण्डादिनोपालम्भो वा प्रदीयते स्मेति पाठशालासम्बन्धं सुनियतं सुचारुरूपञ्च निर्वर्तयितुं स्वाधीनप्रयत्नास्तत्पराः कुलपतय इत्यध्ययनाध्यापनपद्धतिः सुचारुरूपेत्यविवादम्।

विद्याश्च नानाविधाः—काश्चन विद्यान्तपदेन बोध्यन्ते, काश्चिच्च लक्षणान्तपदेन सूत्रान्तपदेन वेति वेदव्याकरणमीमांसादिशास्त्रेष्वेवैते परिनिष्ठितास्तेषु शास्त्रेष्वेव विवदमानाः समवर्तेरन्नित्यपि न मन्तव्यम्। 'क्रतूक्थादिसूत्रान्ताट्ठक्' (4.2.60) इति सूत्रे तदधीते तद्वेदेत्यधिकारे विधाध्ययनशीलानां निर्देशेन वेदव्याकरणमीमांसादिविद्यावत् यन्त्रतन्त्रनीतिक्रीडादिलौकिकविद्याकलादिस्वरूपमप्युपदर्शयति भाष्यकारः। तत्र हि—'वायसविद्यिकः, सार्पविद्यिकः, गौलक्षणिकः, आश्वलक्षणिकः, पाराशरकल्पिकः पारकल्पिकः, वार्तिकसूत्रिकः, सांग्रहसूत्रिकः, आङ्गविद्यः, क्षात्रविद्यः, त्रैविद्यः, उक्थान्यधीते औक्थिकः, यज्ञमधीते याज्ञिकः, ऐतिहासिकः, सर्ववेदः, सर्वतन्त्रः, पञ्चकल्पः, द्वितन्त्रः, आनुसुकः, लक्ष्यिकः, लाक्षणिकः, चान्दनगन्धिकः, शतपथिकः, षष्टिपथिकः' इत्यादौ वायसविद्यादिविद्यास्तत्रोपलक्षणत्वेन गृहीता दृश्यन्ते। येन राज्यव्यवस्थायामुपयुक्ताः लौकिकनिर्वाहाय च प्रतीताः पदार्थविज्ञानादिषु निष्णाता विद्यार्थिन एकस्यामेकस्यां विद्यायां कृतप्रयत्नाः संशोधनदक्षा अप्यासन्निति प्रतीयते। तासु च बह्व्यः प्रायो लुप्तप्राया इदानीमवगम्यन्ते।

विहाराः—विद्यार्थिनां विहारादिवर्णनमपि 'न वेति विभाषा' सूत्रे 'अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः, यत्कश्मीरेष्ववसाम, यत्तत्रौदनं भोक्ष्यामहे यत्तत्रौदनमभुञ्ज्महि। अभिजानासि देवदत्त कश्मीरान् गमिष्यामः कश्मीरानगच्छाम, तत्रोदनं भोक्ष्यामहे तत्रौदनमभुञ्ज्महि' इत्यादिनोपपादितं सन्दृश्यते। तथा 'लुङ्' (3.2.110) इति सूत्रे 'गमिष्यामो घोषान् पास्यामः पयः। शयिष्यामहे पूतीकतृणेषु' इत्यादिना विहारादिवर्णनं बहुशो व्याख्यातं सामञ्जस्येन सङ्गच्छते।

भारतभूललामभूतः कश्मीरस्तदाऽपि तादृश एव ललामभूत आसीत्, तत्रत्यमन्नमपि स्वादु मृदु रुचिरं विशदं चासीद्यत्तदभिलाषेण कश्मीरगमनं, तद्गुणावकृष्टैः पश्चात्तत्स्मरणं वोभयमप्यत्र प्रदर्शितम्। कश्मीरसम्भवा जलवायवः, विचित्रा भूभागाः, हिमाच्छन्नानि शिखराणि, अन्यत्रानुपलभ्यमाना विचित्राः फलादिजातयः, सुसम्पन्ना वैशिष्ट्याधायकाश्च तण्डुलाः सर्वमपीदमिदानीमास्ते। केवलं तत्र विद्यायाः पारङ्गताः साहित्यादिशास्त्रप्रणेतारः सुकुशला जना इदानीं नोपलभ्यन्त इति हा हन्त! कालाय तस्मै नमः।

समाजसेवाविषये—सामाजिकसुखसम्पत्तये तदानीमपि प्रयत्नशीला जना आसन्निति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'छदिरुपधिबलेर्ढञ्' (5.1.13) इति सूत्रप्रदर्शितेनैकेनोदाहरणेन सम्यक् सम्प्रतीयते। तत्र हि 'उपानदर्थस्तिलकल्कः' इत्युदाहृतम्। तेनोपानद्व्यवहारिणः तिलकल्कसंज्ञकं (बूटपालिश) व्यवहरन्ति स्म। उपानहश्चोपलेपनसमर्थाः सुरूपा उपलेपनेन संस्क्रियमाणा व्यवहारसाधना आसन्निति नागरिकव्यवहारातिशयं व्यञ्जयन्ति।

जनाः संव्यवहारे लोलुपा अलोलुपाः स्वार्थैकप्रवणा निःस्वार्थाश्च सर्वदैवोपलभ्यन्ते। तत्र निःस्वार्थजनबाहुल्ये निःस्वार्थनेतृषु वा सत्सु स्वार्थप्रवणा अपि जना न व्यतिक्रामन्तीति समाजः सुचारुरूपेणावतिष्ठते। तदा च कश्चित्स्वार्थप्रवणो वाच्यतामुपयाति। अत एव 'समर्थः पदविधिः' (2.1.1) इति सूत्रे 'राजविशिष्टाया गोः क्षीरेण सह समासो भवति, न केवलायाः। किं वक्तव्यमेतत्? न हि। कथमनुच्यमानं गंस्यते। यथैवायं गवि यतते न च क्षीरमात्रेण सन्तोषं करोति, एवं राजन्यपि यतते—राज्ञो या गौस्तस्या यत्क्षीरमिति' इत्युदाहृतमुपपद्यते। यथेदानीं अभिनन्दनपत्रपेटिकाक्रयणादिषु अहमहमिकया जनः सम्प्रवर्तते, यथा वा हस्ताक्षरोपलब्धये यतते, यथा च राजपुरुषादीनामागमने स्वागतसम्भारसम्भृतावुपलभते तथैव तदानीमपि गोक्रयणवेलायां राज्ञो गां बहुवित्तव्ययेनापि राज्ञ इयमित्यभिनिवेशात्क्रीणाति, राजसामीप्योपलब्धये यतते चेति प्रतीयते। राजसम्बन्धाभिलाषुक इदानीं सम्पूज्यते तदानीञ्च वाच्यतामुपयाति स्मेति महान् भेदः। अत एवेदानीममात्यादीनां राजकीयपुरुषाणामागमनोत्सवे अहमहमिकया स्वागतसमारम्भो विधीयते, तत्रोदासीन एवेदानीं वाच्यतामुपयाति, स एव दण्ड्यो भवति चेति सर्वजनानुभवसिद्धं वस्तु नाधिकं प्रकाशमपेक्षते।

भाष्यकारसमये विचक्षणः स्वाधीनक्रियश्च समाज आसीदित्यत्र न कश्चित्सन्देहलेशोऽपि। ये च समाजसेवकान् दम्भरहितान् परोपकारार्थमेव यतमानान् स्वार्थरहितान् देशहितार्थमेव दम्भपदव्यधिष्ठितान् मन्यन्ते तेषां समाजो ननु गर्तायामापन्न इवावगन्तव्यः। अत्रार्थे समाजसेवकाभिधानां कियन्मूल्यं प्राचीनैर्निर्द्धारितमासीदित्यवश्यमेवावगन्तव्यम्। तच्च यथा—हेतुमति चेति सूत्रे 'प्रवृत्तिर्ह्युभयत्रानपेक्ष्यैव किञ्चिद्भवति देवदत्ते चादित्ये च। नेह कश्चित्परोऽनुग्रहीतव्य इति प्रवर्तते। सर्व इमे स्वभूत्यर्थं प्रवर्तन्ते। ये तावदेते गुरुशुश्रूषवो नाम तेऽपि स्वभूत्यर्थं प्रवर्तन्ते—पारलौकिकञ्च नो भविष्यति, इह च नः प्रीतो गुरुरध्यापयिष्यतीति। यथा य एते दासाः कर्मकरा नाम तेऽपि स्वभूत्यर्थं प्रवर्तन्ते—भक्तञ्चैलञ्च लप्स्यामहे परिभाषाश्च न नो भविष्यन्ति। तथा च एते शिल्पिनो नाम एतेऽपि स्वभूत्यर्थं प्रवर्तन्ते—वेतनञ्च लप्स्यामहे मित्राणि च नो भविष्यन्तीति' इति। अत्र हि आदित्यादि-देवदत्तान्ताः सर्वेऽपि परानुग्रहकारिणो गुरोरादेश इति न निःस्वार्थाः प्रवर्तन्ते, न परोपकारः स्वकीयोऽयं धर्म इति वा प्रवर्तन्ते। केवलं स्वार्थमात्रप्रवृत्ता ह्येते स्वार्थसाधनायैव प्रवर्तन्ते। प्रवृत्तिर्हि-आर्दित्यादीनां प्रवृत्तिः उभयत्र—आदित्ये देवदत्ते च अनपेक्ष्य किञ्चित्—गुर्वाद्यादे-शमन्याभिप्रायं वाऽनपेक्ष्य स्वाभिप्रायमात्रोद्देश्यिकैव भवति। तमभिप्रायमेव स्पष्टमुपपादयति—नेह कश्चित्परोऽनुग्रहीतव्य इत्यादिना। यश्चादित्यः केवलं लोककाम एव लोकान् प्रकाशयतीति निर्विवादं सर्वैः समर्थ्यते तमेव पूर्वमुपलक्षीकृत्य भगवान् भाष्यकारो लोकरहस्यं समाजस्थिति-स्थापकं निःशङ्कमुपशिक्षयति। यदेतत्तत्वं न प्राचीनैर्नवीनैर्भविष्यत्कालिकैश्च कदापि विस्मर्तव्यमिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवान् भास्करोऽपि यत्र न लोककामायैव प्रवर्तते, तत्र किमु मानवाः। सेन्द्रियाः शालिफलाद्यु-पभुञ्जानाः सत्तत्त्वविमुखाः स्वाभिप्रायेणैव व्यवह्रियमाणा ऐहिकाभिप्राया लोककामायैव स्वार्थं विहाय प्रवर्तन्त इत्याग्रहः समाजाधःपातायैवेत्यवधेयम्।

निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये।।

इति हरिकारिकाऽपि तमेवार्थं सुस्पष्टतयाऽभिव्यनक्ति। यः कश्चित्पराभिप्रायानुरोधेन प्रवर्तमान उपलभ्येत सोऽपि स्वार्थप्रसिद्धिकाम एव तदर्थं यतते न परानुग्रहकाम्ययेति निर्विवादम्। अत एव प्रामाणिका न लोकवचनेष्ववतिष्ठन्ते, किन्तु स्वतःप्रमाणेन वेदशास्त्र-वचनानुरोधेनैव प्रवर्तन्ते। 'न हि फलमनुद्दिश्य मन्दोऽपि प्रवर्तते' इति न्यायमनुरुध्य वस्तुतो विचार्यमाणे राजाज्ञापालनं निर्धर्मकानां नानिवार्यम्, किन्तु राजाज्ञावञ्चनमेव तेषां धर्मः स्यात्। यतो राजाज्ञापालनं हि धर्मो 'नाविष्णुः पृथिवीपतिः' इति वादिनामेवास्ते, अत एव ते भारतीया राजाज्ञापालनतत्परा न परस्परं व्यत्यघ्नन्, न वा तदा राजाज्ञाभङ्गमकुर्वन्। तदभावे हि 'सर्वैः सह भ्रातृभावेनावस्थेयं' इत्याज्ञप्तमपि किमर्थं तथाऽवस्थेयमिति प्रश्नो व्याकुलीकरोति चेतः। यत्रापि 'हिंसां न कर्तव्या, तदुपलब्धौ हि राजदण्डः स्यात्' इत्यनुशासने हिंसा कृत्वाऽन्येन कृता सा हिंसा न मयेत्युद्घोष्यमाणे राजदण्डपरामर्शभीरपेयात्, स्याच्च हिंसयेष्टसिद्धिरिति अहिंसामयेऽस्मिन् समये हिंसाविहारिण एव सर्वत्र विहरन्ते। अन्यच्च 'अस्मद्गुरूपदिष्टया अहिंसयैव सर्वस्य समाजस्याभ्युन्नतिः स्यादिति स एव मार्गः सर्वत्र सञ्चालनीयः, ये तत्र प्रतीपा भविष्यन्ति या वा संस्था अहिंसाविरोधिन्यो भविष्यन्ति तास्तांश्च वा वयं निर्दयमुपहिंसामः' इत्युक्तिमहिंसाऽऽचार्याणां भैरवभेरीरवसदृशामाकर्ण्य सर्वपक्षेभ्यः सुदूरमवस्थितानां धर्मैकशरणानां भारतीयानां कम्पन्ते चेतांसि, यतोऽद्यापि क्रूराणामविवेकिनाञ्च न परस्परं शान्तः कलह इति।

एवञ्च तदानीं धार्मिका जना आसन्, येन हिंसाचौर्यादीनां संशयोऽपि न भवेत्। 'उपकार्याभावे उपकाराभावः' इति न्यायेन सम्पन्नतरेऽस्मिन् देशे को वा विपन्नः स्यात् यमासाद्योपकारिणः प्रभवेयुः। अन्यच्च—उपकार्यो भूत्वा जीवनं ननु मरणमेवेत्यापामरप्रसिद्ध-मेतद्देशसंस्कृतिसम्बद्धं चास्ते, समाजसेवकानां स्वरूपं च पूर्वं निर्दिष्टं सर्वजनप्रसिद्धमिति उपकारिण एव स्वचारितार्थ्याय उपकार्यनिर्माणे न प्रयत्नशीलास्तदानीमिति सर्वमप्यवदातम्।

ऋणादानादयो व्यवहाराः—एतादृशे सुपरिष्कृते समाजे ऋणादानादिव्यवहारो नासीदिति वक्तुमप्यशक्यम्। तत्र ऋणदानादाने न कश्चिद्विरोधः, वृद्धिग्रहणं तु सर्वथा विनिन्दन् सूत्रकार आह—'प्रयच्छति गर्ह्यम्' (4.4.3) इति। तत्र हि भाष्यकारः—'अयुक्तोऽयं निर्देशः, यद-सावल्पं दत्वा बहु गृह्णाति तद्गर्ह्यम्। कथं तर्हि निर्देशः कर्तव्यः? प्रयच्छति गर्ह्यायेति। स तर्हि तथा निर्देशः कर्तव्य। न कर्तव्यः। तादर्थ्यात्ताच्छब्द्यं भविष्यति—गर्ह्यार्थं गर्ह्यम्। द्विगुणं मे स्यादिति प्रयच्छति—द्वैगुणिकः, त्रैगुणिकः अत्र वृद्धेर्वृधुषि भावः—वार्धुषिकः' इत्याह। अत्र प्रयच्छति गर्ह्यमिति निर्देशोऽयुक्तः, एवं हि अधमर्णे प्राप्नोति, उत्तमर्णे चेष्यते, तर्हि प्रयच्छति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्ह्यायेत्याक्षिप्य न वक्तव्यमित्याह। तादर्थ्यात्—यत् ऋणं दीयते तद्वृद्ध्यर्थं, सा वृद्धिरेव गर्ह्या तदर्थं दीयमानं ऋणं गर्ह्यमिति यो गर्ह्यं प्रयच्छति—यो वृद्ध्यर्थं ऋणं प्रयच्छति तस्मात्प्रत्यय इत्युपपन्नमिति तदर्थः। अनेन प्रघट्टकेन वृद्धिग्रहणमेव निषिध्यते, ऋणदानं न निषिध्यते। वृद्धिग्रहणनिषेधात् न कर्षकाणां काचिद्विप्रतिपत्तिर्न वा तत्र किञ्चिद्विधानमप्यपेक्षते।

ननु वृद्धिग्रहणाभावे कः किमर्थं ऋणं दद्यादिति चेत्, यो द्विगुणार्थं प्रयच्छति स द्वैगुणिक इत्यादिना परिमितवृद्ध्यतिरिक्ता वृद्धिरेव निषिद्धेति तदभिप्रायः। अत एव योऽल्पवृद्धिदानमङ्गीकृत्य परकीयं धनं गृहीत्वा वृद्ध्यर्थमन्यस्मै प्रयच्छति स वार्धुषिक इत्युच्यते। तेन हि स्वलाभार्थं बह्वी वृद्धिरेव ग्राह्या, अन्यथा तस्य लाभो न स्यादिति तस्य निन्दा प्रतीयते। एवञ्च अनुचितवृद्ध्यादानं निषिद्धमासीद्व्यवहारे इति प्रतीयते।

देशविशेषेण आचारविशेषा न्यायविशेषा विहारादिविशेषा अपि प्रतिभासन्ते। यथा—'अरण्यान्मनुष्ये' (4.2.129) इति सूत्रे 'अल्यल्पमिदमुच्यते मनुष्य इति। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्। आरण्यकः पन्थाः, आरण्यकोध्यायः, आरण्यको न्यायः, आरण्यको विहारः, काच्छको मनुष्यः, काच्छकं हसितं, काच्छकं जल्पितम्, काच्छकं स्मितम्' इत्यादिना कच्छदेशोद्भवो मनुष्यो भिन्नः, तस्य हसितं जल्पितं वाऽन्यत्, आरण्यको न्यायो भिन्न इत्यादि व्यवहारविशिष्टं प्रकथ्यते।

भक्ष्यप्रकारा अपि सुसंस्कृता विशिष्टा वा आसन्निति 'तत्र जातः' (4.3.25) इति सूत्रे 'जातादिष्वेव घादयो यथा स्युः, इह मा भूवन्—तत्रास्ते तत्र शेते इति। यदि नियमः क्रियते, दार्षदाः सक्तवः—औलूखलो यावक इति न सिध्यति। संस्कृतमित्येवं भविष्यति। भवेत्सिद्धं—दार्षदाः सक्तव इति। इदं तु न सिध्यति—औलूखलो यावक इति। संस्कृतं नाम तद्भवति यत्तत एवापकृष्याभ्यवह्रियते। न च यावक उलूखलादेवापकृष्याभ्यवह्रियते। अवश्यं रन्धनादीनि प्रतीक्ष्याणि' इत्यनेन प्रसिध्यति। जातादिष्वेव घादयो भवन्तीति नियमे दार्षदादीनि न सिध्यन्ति। ननु तत्र 'संस्कृतम्' इत्यनेनैव प्रत्ययसिद्धिः, तेन हि 'दार्षदाः' इत्येव सिध्येत्। यतः संस्कृतं तद्भवति तत एव भक्ष्यते, यथा दृषदि पिष्टाः सक्तवो भक्षणार्हा भवन्ति औलूखलो यावकश्च न तादृश इति उलूखलेन संस्कृत इति न भवतीति तदर्थः। प्रघट्टकेनानेन भक्ष्याणां विविधाः प्रकाराः प्रचलिता इति सुस्पष्टमेव।

नदीतरादीनां प्रसिद्धिस्तदाऽऽसीदिति घसंज्ञासूत्रे 'घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः। नद्यास्तरो नदीतरः' इत्युदाहरणेन ज्ञायते।

भृत्यादिना कर्मकरा अपि तदानीमासन्, तद्भृत्यवलोकनेन च वस्तूनां मूल्यमपि निर्धारयितुं शक्यम्। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (1.3.72) इति सूत्रे 'याजका यजन्ति गा लप्स्यामह इति, कर्मकराः कुर्वन्ति पादिकमहर्लप्स्यामह इति' इत्यादिना गवादिलाभार्थं याजका यजन्ति, भृतिलाभार्थं कर्मकराः कुर्वन्तीति ज्ञायते। भृत्यस्य पादिकं वेतनमासीत्, पादिकञ्च पणस्य ताम्रमुद्रायाश्चतुर्थोऽशः—इति तावती भृतिरासीत्। तदा पणपादेन निर्वाहः सुसम्बद्ध इत्यप्याक्षिप्यते। अन्यथा तादृशेनाल्पमूल्येन कर्मकरो न प्रवर्तेतेति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजकीयम्—राजकीयप्रबन्धेऽपि 'कारनाम्नि च प्राचां हलादौ' (6.3.10) इत्यत्र 'अविकटे उरणो दातव्य: अविकटोरण:' इत्यनेन अवीनां समुदायो निर्वाहार्थं यै: पाल्यते तत्र नियतसंख्याके समुदाये राजकीयदेयमुरणो दातव्य इति नियमो दृश्यते। चारुरूपश्चायं नियमो येन अविसमुदायपालानां अविदाने न तादृशी हानिर्यादृशी द्रव्यदाने स्यात्। ऊर्णार्थम-विव्यवसायश्च सुचारुरूपेण परिवर्तित आसीदित्यवगम्यते। राज्ञां युद्धादिवर्णनं बहुत्रायातमपि 'पङ्क्तिविंशति' (5.1.59) इति सूत्रे 'इह कदाचिद्गुण: प्राधान्येन विवक्षितो भवति। तद्यथा—पञ्चोऽडुपशतानि तीर्णानि, पञ्चवध्रीशतानि तीर्णानि, अश्वैर्युद्धम्, असिभिर्युद्धम्। न चासयो युध्यन्ते, असिगुणा: पुरुषा युध्यन्ते, गुणस्तु खलु प्राधान्येन विवक्षितो भवति' इत्यादिवर्णनं विशेषतामाधत्ते। 'मद्रात्परिवापणे' (5.4.67) इत्यत्र 'क्षेमे सुभिक्षे कृतसञ्चयानि पुराणि राज्ञां विनयन्ति कोपम्' इत्युदाहरणेनापि बलवतां राज्ञां पारस्परिके प्रहरणेऽपि तत्र प्रजानां कश्चिदुपद्रवो नासीत्, रणाङ्गणे युद्धम्, कुशलिनश्च प्रजा नगरे इति राज्ञां युद्धप्रसङ्गे सर्वेऽपि संव्यवहरन्ते स्मेति। 'गर्गा: शतन्दण्ड्यन्ताम्। अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति' इत्युदाहरणं बहुषु स्थलेषूपलभ्यमानं राज्ञामलोलुपत्वं धर्मानुबन्धित्वञ्च द्योतयति। हिरण्येनार्थिनोऽपि राजानो न पदवाक्यप्रमाणानतिक्रामन्ते, न स्वार्थानुसारेण प्रत्येकं दण्डयन्तीति भाव:। 'अमात्यानां राज्ञा सह समवाये पारतन्त्र्यं व्यवाये स्वातन्त्र्यम्' इति 'कारके' (1.4.23) इति सूत्रोपात्तमुदाहरणं राज्ञाममात्यानाञ्चैकमत्यमेव प्रतिपादयति।

'ये त्वेते राजकर्मिणो मनुष्यास्तेषां कश्चित्कञ्चिदाह—कटं कुर्विति। स आह—नाहं कटं करिष्यामि घटो मयाऽऽहृत इति। तस्य क्रियामात्रमीप्सितम्' इति 'कर्तुरीप्सिततमं कर्म' (1.4.49) सूत्रे समुदाहृतं राजकीयकर्मचारिणां संव्यवहारं बोधयति। राजकीयकर्मकराश्च क्रियामात्राभिनिविष्टा न फलसिद्धौ बद्धादरा 'यद्भविष्यति तद्भवतु' इत्येतद्भावभाविता भवन्ति, घटो मयाऽऽहृत इति मया काचित्क्रिया कृता कार्यसिद्धिर्भवतु वा मा वा, नाहं कटङ्करिष्यामीति वदन्ति। लोकराज्ये तु स्वाधीनशासना अमात्यादयोऽपि स्वेच्छया व्यवहरन्त: क्रियामात्रं प्रतिपादयन्ति। दैववशात्सम्पन्ने कार्ये मयैतत्सम्पादितम्, कार्यविप्रतिपत्तौ तु भ्रष्टाचारा: सर्वेऽपीत्यधिकारन्यासेन समर्थयन्ति चात्मानम्। राजकीयकर्मकरै: कथं वर्तनीयमित्येतद्विषयेऽपि 'जहदप्यसौ स्वार्थं नात्यन्ताय जहाति, य: परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा—तक्षा राजकर्मणि प्रवर्तमान: स्वं तक्षकर्म जहाति, न तु हिक्कितश्वसितकण्डूयितानि' इति समर्थसूत्रे प्रतिपाद्यते। राजकर्मणि प्रवर्तमाना: पुरुषा: स्वीयेन कर्मणा राजकर्मण उपरोधं वारयेयुरित्येव राज्ञोऽभिप्राय:। यानि च स्वोन्नतिसाधकानि कर्माणि राजकर्मण: प्रतिरोधं न कुर्वीरन् तत्सम्पादने न काचिद्धानिर्नान्यायश्चेति। राजकीयोद्धासविषयप्रकाशकानि भाष्ये बहून्युदाहरणानि प्रदर्शनीयान्यपि स्थानाभावाद्दिङ्मात्रप्रदर्शनेनैव सन्तोष्टव्यम्।

स्त्रीसम्मान:—स्त्रीसमुदाचार: कथमासीत्तदानीं सोऽप्यवलोकनीय: 'एको गोत्रे' (4.1.93) इत्यत्र 'काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी' इति; 'अनुपसर्जनात्' (4.1.14) सूत्रे 'काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी अत्र प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैष दोषः। अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम्' इत्याद्युदाहरणैः स्त्रीणां शिक्षैव नासीत् ताश्च केवलं भोगसाधनीभूता अस्वतन्त्रा इत्याद्याक्षेपा निर्मूलाः। तदा गृहिण्यो मीमांसादिशास्त्रेष्वपि ग्रन्थकर्त्र्य आसन्, न तु गृहं गृहमटमाना भृत्यकर्मण्येव नियुक्ताः। अत एव 'अणिञोरनार्षयोः' (4.1.78) इति सूत्रे 'औदमेध्यायाश्छात्राः' इत्युदाहरणं सङ्गच्छते। विप्रतिषेधसूत्रे 'अस्ति प्राधान्ये वर्तते, तद्यथा—परमियं ब्राह्मण्यस्मिन् कुटुम्बे, प्रधानमिति गम्यते' इत्युदाहरणेन कुटुम्बप्राधान्यमपि तासामासीदिति निर्विवादं वक्तुं शक्यते। करणसंज्ञासूत्रे 'अभिरूपायोदकमानेयमभिरूपाय कन्या देया इति। न चानभिरूपे प्रवृत्तिरस्ति तत्र अभिरूपतमाय इति गम्यते' इति; 'नमः स्वस्ति' (2.3.16) इति सूत्रे 'अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम्। इह मा भूत्—अलं कुरुते कन्याम्' इति चोदाहरणाभ्यां स्त्रीदाक्षिण्यं सुरूपमिव प्रतीयते।

प्रमाणव्यवहारः—मानविषये—

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः।।
भेदमात्रं ब्रवीत्येषा नैषा मानं कुतश्चन।।

इति 'आर्हादगोपुच्छ' (5.1.19) इति सूत्रेऽन्यत्र च विस्तरश उक्तमिति प्रमाणप्रमेयादिकल्पना सूक्ष्मतरदर्शिनां भूषणभूतैवासीदिति गम्यते। तेन प्रामाणिक एव व्यवहारः संप्रवृत्त इति सिद्धम्।

व्यवहारेऽपि कथं दक्षा आसन्निति 'लोकतो व्यवहारं दृष्ट्वा गुणस्य निर्ज्ञानम्। तद्यथा—पटुरयं ब्राह्मण इत्युच्यते यो लघुनोपायेनार्थान् साधयति। पटुकल्पोऽयमित्युच्यते यो न तथा साधयति' इति 'ईषदसमाप्तौ' (5.3.67) सूत्रे; 'वृषलरूपोऽयं, अप्ययं पलाण्डुना सुरां पिबेत्। चोररूपोऽयं, अप्ययमक्ष्णोरञ्जनं हरेत्। दस्युरूपोऽयं, अप्ययं धावतो लोहितं पिबेत्' इति 'प्रशंसायां रूपप् (5.3.66) सूत्रे च सम्प्रदर्शितव्यवहारेण ज्ञातुं शक्यम्। गुणिनां दुष्टानाञ्च स्वभावपरिज्ञाने सुकुशलास्तदानीन्तना अनेन प्रघट्टकेन ज्ञायन्ते। व्यवहारपरिज्ञानेऽन्यान्यप्युदाहरणानि यथा—'तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। यथा—द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रित्तको लोहकंसस्तद्गुण उपलभ्यते' इति 'नीचैरनुदात्तः' (1.2.30) इति सूत्रे; 'कटं करोति भीष्ममुदारं शोभनं दर्शनीयम्' इति अनभिहितसूत्रे प्रतिपादितानि समाजस्य याथार्थ्यं गमयन्ति। बदरपिटके—बदरपेटिकायां प्रेषणार्थं कृतायां रित्तकः—घर्षणेनोज्ज्वलीकृतः लोहकंसः—आदर्शस्तद्गुणा उपलभ्यत इति तदर्थः। पेटिकाश्चारुरूपाः कृत्वाऽऽदर्शसंयुताश्च विधाय तासु विक्रयार्थं प्रेषणीयानि बदरादीनि फलानि निधाय ताः पेटिका बहिः प्रस्थाप्यन्ते इत्यनेन व्यवहारकरणे कौशल्यमेषामुपजनयन्ति।

वाहनानि—वाहनादिप्रकारा अपि 'निपातैर्यद्यदिहन्त' (8.1.30) इति सूत्रे 'यत्कूजति शकटं, यती कूजति शकटी, यन् रथः कूजति' इति; 'यद्धितु परं' (8.1.56) इति सूत्रे 'आरोहन्ति हस्तिनं मनुष्या आरोहयति हस्ती स्थलं मनुष्यान्'; न वेति विभाषासूत्रे 'अभ्यवहारयति सैन्धवान्, विकारयति सैन्धवैः' इत्यादिभिः हस्त्यश्वगवादीनां वाहनेषु नियतमुपयोग आसीदिति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यभिज्ञानम्। ग्रहणकशास्त्रे 'तमेवाध्वानं कश्चिदाशु गच्छति कश्चिच्चिरेण कश्चिच्चिरतरेण। रथिक आशुगच्छति आश्विकश्चिरेण पदातिश्चिरतरेण' इत्युदाहरणं वाहनक्रियायामुपयुज्यमानो रथ एव तत्र प्रधानमासीदिति गम्यते।

मार्गेषु गमनागमनप्रकारोऽपि 'हेतुहेतुमतोर्लिङ्' (3.3.156) इति सूत्रे सुस्पष्टं प्रतिपादितः। तत्र हि 'दक्षिणेन चेद्यायात् न शकटं पर्याभवेत्। दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति' इत्युदाहरणं 'यदि देवदत्तो मार्गे दक्षिणभागेन यास्यति तदा शकटाद्रक्षितः स्यात्' इत्यर्थकमुक्तम्। अनेन वाहनानां पादचारिणामपि केचन नियमा आसन्निति ज्ञायते।

'योजनं गच्छति' (5.1.75) इति सूत्रे 'क्रोशशतं गच्छति क्रौशशतिकः, योजनशतं गच्छति यौजनशतिकः, वारिपथेन गच्छति वारिपथिकः' इत्यनेन क्रोशशतगमनसमर्थानि योजनशतगमनसाराणि वाहनानि प्रयुज्यन्ते स्म। विचित्राणि अनेकप्रकाराणि वाहनान्यपि 'तस्येदम्' (4.3.120) इति सूत्रे 'आश्वरथम्, औष्ट्ररथम्, गार्दभरथम्' इत्युदाहरणैः प्रदर्श्यन्ते। जल-वाहनान्यपि नापरिचितानीति वारिपथिकेन ज्ञायते। 'क्रीडोऽनुसं' (1.3.21) इत्यत्र 'संक्रीडन्ति शकटानि' इत्यनेन वाहनानां स्पर्धा प्रतीयते। तथा तत्रैव 'पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते' इत्येतत् वाह्यानां स्वभावान् द्योतयति। 'ग्राम्यपशुसं' (1.2.73) सूत्रे 'गाव उत्कालितपुंस्का वाहाय च विक्रयाय च। कः पुनरर्हति अग्राम्याणां पुंस उत्कालयितुं ये ग्रहीतुमशक्याः, कुत एव वाहाय च विक्रयाय च। कः पुनरर्हति अपशूनां पुंस उत्कालयितुं येऽशक्या वाहाय च विक्रयाय च' इति वाहविषये विशिष्टं व्यवहारं प्रतिपादयति। प्रत्यभिज्ञायते चानेन येऽपशवः, ये वाऽऽरण्यका वाहायानुपयुज्यमानाः, तेषु एतादृशं व्यवहारमनाचरन्तः सम्यक् दर्शिन आसन्निति।

शब्दव्यवहारः—शब्दव्यवहारेऽपि कथं दक्षाश्चैत इत्यवलोकनेन प्रीणन्ति सहृदया इति दिङ्मात्रमुदाह्रियते। 'ह्रस्वे' (5.3.86) इत्यत्र 'अल्पं घृतं, अल्पं तैलमित्युच्यते, न कश्चिदाह—ह्रस्वं घृतं ह्रस्वं तैलमिति। ह्रस्वः पटः ह्रस्वः शाटक इत्युच्यते, न कश्चिदाह—अल्पः पटः अल्पः शाटक इति' इति; 'समाने रक्ते वर्णे गौर्लोहित इति भवति अश्वः शोण इति। समाने च काले वर्णे गौः कृष्ण इति भवति अश्वो हेम इति, समाने च शुक्ले वर्णे गौः श्वेत इति भवति अश्वः कर्व इति। 'पितामात्रा' (1.2.70) 'बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम्। इति बुद्धिविषयमेव शब्दानां पौर्वापर्यम्। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः, अस्मिंस्तावच्छब्देऽयं तावद्वर्णस्ततोऽयं व्यवहारः' इति संहितासंज्ञासूत्रे प्रयुज्यमाना व्यवहाराश्च शब्दप्रावीण्यं गमयन्ति। अत एवैते शब्दप्रमाणका इत्यभ्युपगम्यते। भाषाशब्दानां संव्यवहाराश्च देशभेदेन भिन्नाः संस्कृतेन साम्यमुपगच्छन्तः 'गावी गोणी गोता गोपोतलिका' इत्येवमादयस्तदानीं राष्ट्रभाषात्वेन गीर्वाणवाण्याः सुप्रचार आसीदित्यवगमयन्ति।

परिमितमत्रस्थानम्, महांश्चायं विषयः। एतावता प्रबन्धेन दिङ्मात्रदर्शनमेव यथा कश्चिद्भवेन्न वेति संशयितचित्ताः साहसेनैव प्रवृत्ताः स्वबुद्धिबलानुरूपं यत्किञ्चित्स्वरूपं विद्वज्जनमनो-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनोदार्थमेतदुपस्थापयामः। भाष्यप्रदत्तोदाहरणेभ्यस्तत्कालचित्रं यथावदुपपादयितुं शक्यं युक्तञ्चेत्येतावान् समाश्वासो यदि तत्र भवतां पारदृश्वनां मनांसि प्रमोदयेत् तदा सफलपरिश्रमा वयमिति सम्भावयामः।

स्वभावपरिचयः—मनुष्यस्वभावपरिचायकान्युदाहरणान्यप्यवश्यमवलोकनीयानि, तानि च सुबहून्यप्यत्र कतिपयान्येवोदाह्रियन्ते। 'शीतोष्णाभ्यां' (5.2.72) इति सूत्रे 'किं यः शीतं करोति स शीतकः, यो वा उष्णं करोति स उष्णकः? किञ्चातः? तुषारे आदित्ये च प्राप्नोति। एवन्तर्हि शीतमिव शीतम्, उष्णमिवोष्णम्। य आशु कर्तव्यानर्थांश्चिरेण करोति स उच्यते शीतक इति। यः पुनराशु कर्तव्यानर्थानाश्वेव करोति स उच्यते उष्णक इति।' इति; 'अयः शूल0' (5.2.76) सूत्रे 'किं योऽयःशूलेनान्विच्छति स आयःशूलिकः, किञ्चातः? शिवभागवते प्राप्नोति। एवं तर्हि अयः शूलमिव अयःशूलम्। यो मृदुनोपायेनान्वेष्टव्यानर्थान् रभसेनान्विच्छति स उच्यते—आयःशूलिकः' इति चोदाहरणे उष्णकं शीतकं आयःशूलिकञ्च जनमुपस्थापयतः। तत्र प्रसङ्गात् शिवस्य भगवतो भक्ता आयसेन त्रिशूलेन भिक्षामन्विच्छन्तीत्यपि प्रदर्शितम्। केचिच्चोष्णका वर्तन्ते केचिच्च मन्दा अपर आततायिन इति दर्शनादेते सर्वेऽपि प्रकारा निन्दिता लोके, तद्गुणविशिष्टाश्च ये विहरन्ति तेऽपि वाच्या भवन्तीत्याशयः।

'उपमानं शब्दार्थ' (6.2.80) इत्यत्र 'पुष्पहारी फलहारी वृकवञ्ची वृकप्रेक्षी कोकिलाभिव्याहारी गर्दभोच्चारी साध्वध्यायी विलम्बिताध्यायी' इत्याद्युदाहरणानि नानाविधान् मनुष्यस्वभावान् परिचाययन्ति।

'दूराद्धूते च' (8.2.84) इत्यत्र 'दूरशब्दश्चायमनवस्थितपदार्थकः। तदेव हि किञ्चित्प्रति दूरं किञ्चित्प्रति अन्तिकं भवति। एवं हि कश्चित्कञ्चिदाह—एष पार्श्वतः करकस्तमानयेति। स आह—उत्थाय गृहाण दूरं न शक्ष्यामीति। अपर आह—दूरं मथुरायाः पाटलिपुत्रमिति। स आह—न दूरमन्तिकमिति। एवमेष दूरशब्दोऽनवस्थितपदार्थकः' इति; 'कृत्यचः' (8.4.29) इति सूत्रे 'निर्विण्णोऽहमनेन वासेन' इति; 'अट्कुप्वाङ्' (8.4.2) इति सूत्रे 'गर्गैः सह न भोक्तव्यमिति प्रत्येकञ्च न भुज्यते समुदितैश्च' इत्येतैश्च 'गर्गैः सह न भोक्तव्यम्' इति सामुदायिक आदेश इत्याद्याः स्वभावविशेषाः प्रतीयन्ते। भिन्नरुचिर्हि लोक इति न्यायेन यदेवैकस्य समीपं तदेवान्यस्य दूरमिति स्वभाववैचित्र्यं प्रदर्शयति। 'यदुदुम्बरवर्णानां घटीनां मण्डलं महत्, वेदान्नो वैदिकाः शब्दाः, खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदविगमो गम्यायाञ्चागम्यायाञ्च' इत्यादीनि प्रसिद्धतराणि स्वभाववैचित्र्यदर्शीन्युदाहरणानि लौकिकानां स्वभावपरिचये वैदुष्यातिशयं द्योतयन्ति। समर्थसूत्रे 'त्वं तिष्ठ शङ्कुलया खण्डो धावति मुसलेन, किं त्वं करिष्यसि शङ्कुलया खण्डो विष्णुमित्र उपलेन' एते वाक्ये 'त्वं तिष्ठ शङ्कुलया न प्रयोजनं मुसलेन कृतः खण्डो धावति। हे विष्णुमित्र त्वं शङ्कुलया किं करिष्यसि, उपलेनेव कृतः खण्डः' इत्यर्थके वक्तुः स्वभाववैचित्र्यं प्रदर्शयतः, स्वल्पे वस्तुनि दुर्बोधोक्तिम्प्रदर्श्य स्वभाववक्रतामुपपादयतश्च।

'अनेकमन्यपदार्थे' (2.2.24) इति सूत्रे 'इदं तावदयं प्रष्टव्यः—अथेह देवदत्तस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्राता इति कः षष्ठ्यर्थ इति। तत्रैत्स्यात्—एकस्मात्प्रादुर्भाव इति। एतच्च वार्तम्। सार्थिकानामेकप्रतिश्रये उषितानां प्रातरुत्थाय प्रतिष्ठमानानां न कश्चित्परस्परमभिसम्बन्धो भवति। एवंजातीयकं भ्रातृत्वं नाम। अत्र चेद्युक्तः षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम्' इत्यनेन प्रघट्टकेन भगवान् भाष्यकारः सार्थिकेष्वपि भातृवद्व्यवहारमुपदिशन् तदानीन्तनानां स्वभाववैशिष्ट्यमुपपादयति।

अत्र भाष्योदाहरणान्येव प्रायोऽर्थसम्पत्तये समाहृतानि। भाष्योदाहरणेषु च विद्याः, कलाः, सामाजिकव्यवहाराः, राजकीयव्यवहाराः, धर्मव्यवहाराः, स्त्रीणामधिकाराः, प्रमाणप्रमेयादिव्यवहाराः, वाहनप्रकाराः, आरण्यकन्यायाः, शब्दव्यवहारा इत्यादयोऽनेके विषयाः संगृहीता दृश्यन्ते। तत्र कतिपयान्युदाहरणान्यासाद्य प्रतीतमर्थं विद्यार्थिनामुपयोगायात्रोपनिबद्धं सुचिरमालोक्य सफलयन्तु तत्रभवन्तो विद्याव्यसनिनः। एतावांश्चार्थ उपलभ्यते—तदानीन्तना जनाः सर्वासु विद्यासु कलासु चाभिविनाताः सामाजिकव्यवहारेषु निष्णाता अन्यायप्रतीकारबुद्धयः प्रमाणादीन्निर्णीय तदनुसारेण संविधानमाचरन्तः शब्दव्यवहारकुशला अधर्मभीरवः शूराः प्राणपणेनापि सत्यसंरक्षणदक्षाः परोपकारिणश्चातुर्वर्ण्यव्यवस्थामर्यादामपरित्यजन्तोऽपि परस्परं वैरभावमुत्सृज्य भ्रातृभावेन व्यवहरणशीलाः स्त्रीसम्मानसंरक्षणदक्षा धनधान्यपश्वादिभिरुपेताः सुखिनो धार्मिकाश्चासन्निति। तथाऽचिरोद्गतस्वातन्त्र्यरसाप्लाविता इदानीन्तना भारतीया बुद्धिवैभवशालिनः प्राज्यफलमूलोदकाः सुविद्याश्चातुर्वर्ण्यव्यवस्थापालनदक्षा धर्मनिष्ठा आचन्द्रार्कं सुखिनो भूयासुरिति सप्रणम्य महर्षिपतञ्जलिचरणौ सम्प्रार्थयामः।

प्रकृतं संस्करणम्

पातञ्जले महाभाष्ये भाषागतसौष्ठवमेव टीकेव प्रस्तुतम्। यतो हि अस्यां कृतौ यादृशं भाषासौष्ठवं विषयप्रकाशनं वस्तुचित्रणञ्च प्रकाशितं न तादृशं ग्रन्थान्तरेषु अन्यासु कृतिषु समुपलभ्यते। अत्र महर्षेः पातञ्जलेः यादृशी कोमलकान्तपदावली गीर्वाणभारत्या परिदृश्यमाना नान्यत्र। अत एव अस्य सम्पादनविधौ मूलेनैव परिपूर्णत्वात् न टीकाया समपेक्षा विचारिता। सर्वत्र स्पष्टार्थत्वात् न कुत्रापि केभ्योऽपि विप्रतिपत्तिः काठिन्यञ्चानुभूयते। अत एव मूलमात्रं सम्पादनमपि वरं विचार्य मूलमात्रमेव सम्पादितम्। विषयवस्तुनिर्देशनमपि मूलेनैव पूर्यते। अत्रापि स्पष्टीकरणसाहसन्तु भास्कराय दीपदर्शनमेव भवति। अन्ते छात्राणां शिक्षक-बन्धूनाञ्च सौविध्याय प्रतिपादितमिति सन्तुष्यते सम्पादकेन। अस्य प्रकाशने वाराणसीस्थ चौखम्बा सुरभारतेः प्रबन्धकस्य श्रीमतः नवनीतदासगुप्तस्य सौजन्यं त्यागश्च स्तुत्येति अनुभूयते। अनेन ग्रन्थेन छात्राणामध्यापकानाञ्च कोऽपि लाभश्चेत् सन्तोषमावहे वयम्।

महाशिवरात्रि-2065 — विद्वच्चरणचञ्चरीकः
जबलपुर — **आत्मदेव मिश्रः**

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दशास्त्रावतारक्रमः

तत्रतावत् हरचरितचिन्तामणौ सप्तविंशे प्रकाशे शब्दशास्त्रावतारक्रमः अधोलिखित रूपेण प्रदर्शितः—

तत्तन्मोहतमोपहं पशुपते यल्लक्षणं तावकं
सर्वं पाणिनिबद्धमित्यधिगतं येनाद्वितीयोऽसि च।
यन्माहात्म्यवशादुदेति च परा वाग्वाच्यवैचित्र्यसू-
स्तन्मे संविदि सामरस्यमधुना पुष्णातु लोकोत्तरम्।।1।।
सन्तापसन्ततिकरी तावत्तिष्ठति मूर्खता।
वाच्यवाचकरूपोऽयं न ध्यातो यावदीश्वरः।।2।।
पूर्वं कदाचिद्भगवान्कैलासशिखरोपरि।
विविधैर्विभ्रमैरासीद्देव्या सह रहोभुवि।।3।।
सप्रमोदेन चित्तेन देवी शम्भुमतोषयत्।
उत्सङ्गमधिरोप्यैतां शम्भुर्हृष्टोऽभ्यभाषत।।4।।
प्रियं करोमि सुभगे किं तवेत्यभिधीयताम्।
श्रुत्वेति साब्रवीद्देवी स्मेरीकृतविलोचना।।5।।
सत्यं यदि प्रसन्नोऽसि किञ्चिदाख्याहि सत्कथाम्।
कस्याऽपि वर्तते या न विदिता परमेश्वर।।6।।
उक्त्वेति भूयोऽप्यवदन्नन्दिन् द्वारं निरुध्यताम्।
न केनचित्प्रवेष्टव्यमिहेति तुहिनाद्रिजा।।7।।
नन्दिन्यथाश्रितद्वारे सावधानतया स्थिताम्।
अभाषत महादेवो देवीं मधुरया गिरा।।8।।
सदा सुखममर्त्येषु दुःखमैकान्तिकं नृषु।
वैद्याधरं तच्चरितं सुखदुःखमयं शृणु।।9।।
एवं यावच्छिवो देवीं बभाषे तावदागमत्।
पुष्पदन्तो गणः शम्भुप्रसादरसभाजनम्।।10।।
प्रवेशं प्रार्थयन्द्वारे निषिद्धः सोऽथ नन्दिना।
बुभुत्सुः कारणं योगात्प्रविवेशालिविग्रहः।।11।।
प्रविष्टः सर्वमशृणोत्कथितं चन्द्रमौलिना।
विद्याधराणां चरितं सप्तानामद्भुतं च सः।।12।।
श्रुत्वा निर्गत्य भार्यायै स जयायै जगाद तत्।
विमोहयति सर्वं हि दुर्लङ्घ्या भवितव्यता।।13।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः सखीनां पुरतस्तत्कथावर्णनोद्यता।
देवी **जया**मप्यज्ञासीदुक्तिभिस्तत्कथाविदम्।।14।।
अकुप्यत्पार्वती भर्त्रे नापूर्वं कथितं त्वया।
जयाऽप्येतद्विजानातीत्यभ्यधाच्च तदाऽचिरात्।।15।।
प्रणिधाय ततः शम्भुरभाषत हिमाद्रिजाम्।
श्रुता योगप्रविष्टेन पुष्पदन्तेन सा कथा।
बभाषे स जयायै तु न जानात्यपरः प्रिये।।16।।
श्रुत्वेति चाद्रिजा **पुष्पदन्त**मानाययत्क्रुधा।
शशाप चाविनीतस्त्वं भव मर्त्य इति क्रुधा।।17।।
तथैव **माल्यवन्तं** च गणं तत्पक्षपातिनम्।
जयया प्रार्थिता देवी ततः शापान्तमभ्यधात्।।18।।
प्रभूणां करुणाहेतुर्विनयप्रार्थनैव हि।
यक्षः कुबेरशापेन **सुप्रतीकः** पिशाचताम्।।19।।
आसाद्य विन्ध्याटव्यां यः **काणभूति**रिति स्थितः।
स्मृतजातिस्तमालोक्य पुष्पदन्तः कथामिमाम्।।20।।
यदा वर्णयते तस्मै तदा शापाद्विमोक्ष्यते।
शापावसानमित्युक्त्वा विरराम हिमाद्रिजा।।21।।
दृष्टनष्टाविव गणौ तौ च तत्र बभूवतुः।
कालान्तरेण **कौशाम्ब्यां सोमदत्त**द्विजन्मनः।।22।।
भार्यायां **वसुदत्तायां पुष्पदन्तो** गणोऽजनि।
वररुच्यभिधानेन स ततः समवर्धत।।23।।
अतिबालस्य चैतस्य जनकः पञ्चतामगात्।
माता च तं सुतस्नेहाद्विधवा समवर्धयत्।।24।।
क्रमेणाथ स दिव्यां तां धिषणां समवाप्तवान्।
अथैकदा तत्सदनं ब्राह्मणावभ्यगच्छताम्।।25।।
दूराध्वगमनश्रान्तौ स्थातुं दिवसमेककम्।
तयोर्निवसतोस्तत्र मुरजध्वनिरुद्ययौ।।26।।
माता तं चाब्रवीद्भर्तुः स्मृत्वा बाष्पाकुलेक्षणा।
मित्रं तव पितुर्नन्दो नटो नृत्यति पुत्र सः।।27।।
श्रुत्वेति सोऽब्रवीन्मातर्गच्छाम्यहमवेक्षितुम्।
सर्वं ते दर्शयिष्यामि नाट्यं वीक्ष्य यथाक्रमम्।।28।।
तेनेति कथिते विप्रौ तौ विस्मयमवापतुः।
ततोऽब्रवीत्तौ तन्माता नात्रांशेनापि संशयः।।29।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकृच्छ्रुतं वा दृष्टं वा बालो जानात्यसाविति।
प्रातिशाख्यं ततस्ताभ्यां जिज्ञासुभ्यामपठ्यत।।30।।
तथैव तद्वररुचिः पपाठ च तयोः पुरः।
ताभ्यां स सहितो गत्वा वीक्ष्य नाट्यं निजे गृहे।।31।।
स्वमातुर्दर्शयामास स समग्रं तथैव तत्।
सकृद्ग्राहिणमालोक्य प्राज्ञं वररुचिं तदा।।32।।
व्याडिरेकस्तयोर्मध्यात्तन्मातरमभाषत।
देवस्वामी करम्बश्च सोदरौ प्राग्बभूवतुः।।33।।
परस्परमतिप्रीतौ **वीतर्सी**नगरे द्विजौ।
इन्द्रदत्तोऽयमेकस्य तयोः सूनुरजायत।।34।।
अहं **व्याडि**र्द्वितीयस्य जनकः संस्थितश्च मे।
इन्द्रदत्तपिता यातस्तच्छोकेन महापथम्।।35।।
अस्मन्मात्रोश्च हृदयं शोकेन त्रुटितं ततः।
धने सत्यप्यनाथौ तौ गतौ विद्याभिलाषिणौ।।36।।
अभ्यर्थयन्तौ तावावां तपोभिः स्वामिनं गुहम्।
गुहस्तत्रादिशत्स्वप्ने प्रभुरावां तपःस्थितौ।।37।।
नन्दस्य नृपतेरस्ति पुरं **पाटलिपुत्र**कम्।
वर्षाख्यस्तत्र विप्रोऽस्ति तस्माद्विद्यामवाप्स्यथः।।38।।
इति श्रुत्वा विभोर्वाक्यमावां तस्य पुरं गतौ।
तत्पुरं प्राप्य पृच्छद्भ्यामावाभ्यां शुश्रुवे जनात्।।39।।
द्विजोऽस्ति मूर्खो **वर्षा**ख्य इति चिन्तावहं वचः।
अन्विष्यद्भ्यामथावाभ्यां दारिद्र्यैकनिधिर्गृहे।।40।।
दृश्यते स्म द्विजो **वर्षो** ध्यानस्तिमितलोचनः।
तत्पत्नी विहितातिथ्या धूसरा मलिनाम्बरा।।41।।
आवां प्रविष्टौ प्रणतौ पप्रच्छास्मत्प्रयोजनम्।
अस्मन्निवेदितोदन्ता ततः साध्वी जगाद सा।।42।।
पुत्रयोर्युवयोरग्रे कालज्ञा कथयामि तत्।
उक्त्वेति भर्तृवृत्तान्तकथां वक्तुं प्रचक्रमे।।43।।
बभूव **शंकस्वामी** नगरेऽस्मिन्द्विजोत्तमः।
मत्पतिस्तस्य पुत्रोऽय**मुपवर्ष**स्तथा पुरा।।44।।
मूर्खश्च दुर्गतश्चायं बुधश्च धनवांश्च सः।
तेन भ्रात्रा स्वभार्याऽस्य नियुक्ता निजपोषणे।।45।।
प्रावृट् कदाचिदासन्ना तस्या आस्ते स्म योषितः।
जुगुप्सितं पिष्टमयं गुह्यरूपं गुडान्वितम्।।46।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्त्वा विप्राय कस्मैचिल्लभन्ते स्म ऋतुं स्त्रियः।
निदाघे शीतकाले च स्नानक्लेशासहिष्णवः।।47।।
एवं योषिज्जनाः प्रायः स्वमाचारं वितन्वते।
जुगुप्सितं तद् गृह्णाति को नाम मतिमान्द्विजः।।48।।
तस्मादाददते मूर्खा दक्षिणां धनलम्पटाः।
सा च मद्देवरवधूरासन्नऋतुशङ्किनी।।49।।
तमन्वतिष्ठदाचारमस्मै मूर्खाय गर्विता।
अयं सदक्षिणं तच्च गृहीत्वा गृहमागतः।।50।।
निर्भर्त्सितो मया मूर्खभावाच्चान्तरतप्यत।
अथ स्वामिकुमारस्य सानुतापस्तपो व्यधात्।।51।।
प्रभुणा तेन तुष्टेन विद्याश्चास्य प्रकाशिताः।
सकृद्ग्राहिणमासाद्य शिष्यं तास्त्वं प्रकाशयेः।।52।।
इत्युक्तश्च गुहेनायं प्रमोदाद् गृहमागतः।
स्वं वृत्तान्तं समग्रं च समागत्य न्यवेदयत्।।53।।
ततः प्रभृत्ययं ध्यायञ्जपंश्च सततं स्थितः।
समागतौ युवां सद्यः सर्वसिद्धिर्भविष्यति।।54।।
उक्त्वेति सा वर्षवधूः साध्वी तूष्णीं बभूव च।
अदायि तस्यै चावाभ्यां हेम दारिद्र्यनाशनम्।।55।।
परिभ्रम्य भुवं लब्धः सकृद्ग्राही न कुत्रचित्।
आवाभ्यामद्य तु प्राप्तस्तव **श्रुतधरः** सुतः।।56।।
तदमुं स्वसुतं देहि विद्यासिद्ध्यै यतावहे।
इति **व्याडि**वचः श्रुत्वा जगदे **वसुदत्त**या।।57।।
सर्वं सङ्गतमेवैतत्प्रत्ययोऽत्रास्त्यसंशयः।
तथाहि जातमात्रेऽस्मिन्वाक् दैवी ह्युदपद्यत।।58।।
अयं श्रुतधरो लब्ध्वा विद्या वर्षादशेषतः।
लोके व्याकरणं दिव्यं प्रतिष्ठां प्रापयिष्यति।।59।।
रोचते हि वरं यस्मान्नाम्ना **वररुचिः** सुधीः।
प्रतिपद्येति सा वाणी व्यरमच्च नभस्तलात्।।60।।
ततः प्रभृति बालेऽस्मिन्वर्धमाने मुहुर्मुहुः।
वर्षोपाध्यायलाभाय मम चेतः प्रवर्तते।।61।।
युवाभ्यामद्य तज्ज्ञातं सन्तोषश्च परो मम।
तदेष युवयोर्भ्राता नीयतां च तदन्तिकम्।।62।।
इत्याकर्ण्य वचस्तस्य **व्याडिः** पूर्णमनोरथः।
महोत्सवविधानाय ददाति स्म निजं धनम्।।63।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनीय ततो **व्याडि**र्वेदार्हत्वाय तं शिशुम्।
जग्राह मात्रा कथमप्यनुज्ञातं सबाष्पया॥64॥
लब्ध्वा वररुचिं गाढप्रमोदौ तरसा ततः।
व्याडीन्द्रदत्तौ वर्षस्य गुरोः प्राप्तौ निकेतनम्॥65॥
जानन्वररुचिं मूर्तं प्रसादं षण्मुखस्य सः।
वर्षः सन्तोषमासाद्य तदानीमास्त निर्वृतः॥66॥
अन्येद्युः पुरतः कृत्वा ताञ्शुद्धे वसुधातले।
ओङ्कारमकरो**द्वर्षो**पाध्यायो दिव्यया गिरा॥67॥
तदानीमस्य चत्वारः साङ्गा वेदाः समुद्ययुः।
अध्यापयितुमेतांश्च प्रावर्तत पुरःस्थितान्॥68॥
सकृञ्छुतं **वररुचिर्व्याडि**श्च द्विःश्रुतं वचः।
त्रिश्रुतं **चेन्द्रदत्तः** स जग्राह गुरुणोदितम्॥69॥
अपूर्वं ध्वनिमाकर्ण्य दिव्यं सञ्जातविस्मयाः।
उपासते स्म सर्वेऽपि पौरा **वर्ष**गुरुं ततः॥70॥
स्कन्दप्रसादं तं ज्ञात्वा तद्देशनृपतिस्ततः।
हर्षेण **वर्षो**पाध्यायमुपास्ते स्म सविस्मयः॥71॥
अथ कालेन बहवः शिष्या **वर्ष**मुपाययुः।
एकोऽपि **पाणिनि**र्नाम जडबुद्धिरुपाययौ॥72॥
शिष्यान्तरोपहासेन सावमानः स **पाणिनिः**।
शुश्रूषाक्लेशतो यातः कदाचित्तुहिनाचलम्॥73॥
आराध्य तपसा तत्र विद्याकामः स शङ्करम्।
प्राप व्याकरणं दिव्यं स च विद्यामुखं शुभम्॥74॥
तत्राप्याह्वयते स्मायं सर्वान्वादाय **पाणिनिः**।
स्ववर्ग्या**न्वररुच्यादी**नुपहासान्स्मरन्सुधीः ॥75॥
ततोऽभव**द्वररुचे**र्वादः **पाणिनि**ना सह।
दिनानि सप्त च ययुस्तयोर्विवदमानयोः॥76॥
अथाष्टमे दिने तेन **पाणिनौ** निर्जिते सति।
नभस्तलान्महाघोरं हुङ्करोति स्म शङ्करः॥77॥
श्रुत्वा शङ्करहुङ्कारं ततः **पाणिनि**ना जितम्।
मूर्खत्वं **वररुच्या**द्याः प्रापुश्च प्रतिवादिनः॥78॥
ऐन्द्रं व्याकरणं नष्टं समग्रं चाभवद्भुवि।
ततो **वररुचि**र्दुःखं विद्यात्रिरहितो दधे॥79॥
मूर्खीभूतो **वररुचि**र्मुक्ताहारो विनिर्ययौ।
आराधयितुमीशानं तपोभिस्तुहिनाचले॥80॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परितुष्टो **वररुचे**स्तपोभिः परमेश्वरः।
शास्त्रं प्रकाशयामास **पाणिनीय**मशेषतः॥81॥
शङ्करेच्छाप्रसादेन चूर्णीकृत्याथ तच्च सः।
जगाम स्वगृहं तुष्यन्नज्ञाताध्वपरिश्रमः॥82॥
तत्राप **पाणिनेः** शास्त्रं **वर्षः स्वामिकुमार**तः।
वर्षाद्व्याडीन्द्रदत्तौ च लब्धवन्तावसंशयम्॥83॥
एवं व्याकरणं दिव्यं प्रबोधायाऽभ्यधात्पुनः।
पाणिनीयमधिष्ठाय शरीरं परमेश्वरः॥84॥
ततो **व्याडीन्द्रदत्ता**भ्यां प्रार्थितो गुरुदक्षिणाम्।
अङ्गीचकार वर्षः स हेमकोटिं सुनिर्मलाम्॥85॥
इन्द्रदत्तः प्रविश्याथ संस्थितस्य कलेवरम्।
योगेन नन्दनृपतेर्व्याडयेऽदत्त काञ्चनम्॥86॥
व्याडिः काञ्चनकोटिं तां **वर्षा**यादत्त दक्षिणाम्।
इन्द्रदत्तश्च नन्दोऽ**भूच्छकटाल**धिया नृपः॥87॥
इन्द्रदत्तस्ततो योगे **नन्द**भूपालतां भजन्।
मन्त्रिभावे वररुचिं महाप्राज्ञं न्ययोजयत्॥88॥
किमन्यदथ **नन्द**स्य चिरमादाय मन्त्रिताम्।
खिन्नो **वररुचिः** शान्तस्तपोवनमशिश्रियत्॥89॥
एकदा स ययौ द्रष्टुं देवीं विन्ध्यनिवासिनीम्।
आराधिता च तपसा सा तं स्वप्ने समादिशत्॥90॥
गच्छ विन्ध्याटवीमद्य **काणभूति**मवेक्षितुम्।
इति देव्या गिरा सोऽपि विन्ध्यकान्तारमाययौ॥91॥
अपश्यत्**काणभूतिं** स पिशाचैस्तत्र चावृतम्।
जगाद स सदाचारः कथमीदृग् भवानिति॥92॥
श्रुत्वा वररुचेरेवं **काणभूति**रभाषत।
पादोपसंग्रहं कृत्वा सौजन्यमधुरां गिरम्॥93॥
विज्ञानं मे स्वतो नास्ति श्मशाने श्रुतमीश्वरात्।
यदुज्जयिन्यां सर्वं ने कथयामि शृणुष्व तत्॥94॥
श्मशाने च कपाले च तव देव रतिः कुतः।
इति सप्रणयं पृष्टः पार्वत्या शम्भुरब्रवीत्।
कल्पान्तसमये पूर्वमभूदेकार्णवं जगत्॥95॥
पातितः शोणितकणो विभिद्योरुं मया ततः।
जले स एवाण्डमभूद् द्विधा गतवतस्ततः॥96॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरगात्पुरुषः सृष्टौ सृष्टा च प्रकृतिर्मया।
ततः स निखिलं सृष्ट्वा प्रजापतिपुरःसरम्।।97।।
पितामह इति प्रोक्तो गाढाहङ्कारतामगात्।
ततः कररुहेणाहं तन्मूर्धानमपाटयम्।।98।।
महाव्रतं गृहीत्वा च श्मशानप्रियतां श्रये।
एतद्देवि कपालात्म जगत्करतले स्थितम्।।99।।
तस्याण्डस्य कपाले द्वे रोदसी परिकीर्तिते।
कपालप्रियता तेन सदैव मम वर्तते।।100।।
श्रुत्वेति शम्भोस्तत्रैव स्थितवानस्मि सादरम्।
ततो मयि श्रोतुकामे पार्वती पुनरब्रवीत्।।101।।
कियता समयेनास्मान्पुष्पदन्त उपैष्यति।
आकर्ण्येत्यवदद्देवीमुद्दिशन्मां त्रिलोचनः।।102।।
कुबेरानुचरः सोऽयं यक्षः प्राप्तः पिशाचताम्।
अस्य **स्थूलशिरा** नाम मित्रमासीन्निशाचरः।।103।।
तन्मैत्र्या धनदः शापात्पिशाचममुमाददे।
प्रार्थिते **दीर्घजङ्घेन** भ्रात्राऽप्यस्य धनाधिपः।।104।।
शापावसानमवदत्किंचित्कोपं परित्यजन्।
पुष्पदन्तात्समाकर्ण्य कथां शापावरोहिणः।।105।।
उक्त्वा शापावतीर्णस्य तां च **माल्यवतो**ऽखिलाम्।
गणाभ्यां सहितस्ताभ्यामेष शापाद्विमोक्ष्यते।।106।।
पुष्पदन्तस्य शापान्तस्त्वयाऽप्येवं कृतः स्मर।
श्रुत्वेति शम्भोर्वचनं हृष्यन्नहमिहागतः।।107।।
तस्मान्निर्वते शापः **पुष्पदन्ता**गमान्मम।
आकर्ण्येमां वररुचिः काणभूतेर्गिरं ततः।।108।।
जातिं सुप्तोत्थित इव स्मृत्वा तत्क्षणमब्रवीत्।
पुष्पदन्तगणः सोऽहं शृणु मत्तोऽखिलं च तत्।।109।।
उक्त्वेति ग्रन्थलक्षाणि सप्त सप्ताब्रवीत्कथाः।
आकर्ण्य ताः **काणभूति**रभाषत सविस्मयः।।110।।
त्वं रुद्र एव कोऽन्यो वा कश्चिद्वेत्तीदृशीः कथाः।
श्रुत्वा कथा इमाः शापो विरतो मे शरीरतः।।111।।
स्ववृत्तान्तं समाख्याहि बाल्यात्प्रभृति मे प्रभो।
ततो विनीतशिरसं वृत्तान्तं स्वमवर्णयत्।।112।।
काणभूतिं वररुचिर्जन्मनःप्रभृति स्फुटम्।
उक्त्वा स्ववार्तां भूयोऽपि **काणभूतिं** जगाद सः।।113।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वास्थ्यं लभे त्वामालोक्य परं खेदमहं श्रितः।
त्वदालोकनमाहात्म्यान्मम शापो निवर्तते॥114॥
प्रभावाद्विन्ध्यवासिन्या मयोक्ताश्च महाकथाः।
क्षीणशापो वपुस्त्यक्त्वा तत्प्राग्जन्म भजाम्यहम्॥115॥
..................................पुनरवस्थितिः।
मत्पक्षपाती प्रथमं माल्यवानप्यशप्यत।
तस्मै महेश्वरेणोक्ता कथनीया महाकथा॥116॥
त्वं च सम्प्रति तिष्ठेह यावदायाति तेऽन्तिकम्।
त्यक्तभाषात्रयः सोऽपि **गुणाढ्यो** द्विजसत्तमः॥117॥
एवं **वररुचि**स्तत्र काणभूतेर्निवेद्य सः।
देहमोक्षाय त्वरितमगाद्बदरिकाश्रमम्॥118॥
ततो **वररुचि**स्त्यक्त्वा योगधारणया वपुः।
प्राग्जन्म तत्समासाद्य भगवद्गणतामगात्॥119॥
स गणो माल्यवान्नाम देवीशापादधोभवत्।
तत्काले गुरुणा तेन प्रोक्तोऽसौ द्विजसत्तमः॥120॥
क्रमेण विद्याः सर्वाः स समासाद्य प्रसिद्धिमान्।
सुप्रतिष्ठितनामानं देशं प्राप प्रकृष्टधीः॥121॥
सातवाहनभूपालमास्थानस्थमवैक्षत ।
शर्ववर्मादिभि सर्वैर्मन्त्रिभिः परिवारितः।
स राजा तममात्यत्वे स्तुतिपूर्वं न्यवेशयत्॥122॥
अथाऽसौ राज्यकर्माणि चिन्तयन्मन्त्रिभावतः।
ताँस्तानध्यापयञ्छिष्यान्**गुणाढ्यः** सुखमन्वभूत्॥123॥
कदाचिदथ भूपालो वसन्ते कामिनीसखः।
दिव्योद्यानावनौ वापीजले चिक्रीड सादरः॥124॥
सपाणियन्त्रधाराभिः सिषेच वरकामिनीः।
कामिन्योऽपि प्रजह्रुस्तं कटाक्षैः सह वारिभिः॥125॥
एकदा तस्य क्रीडन्ती नितम्बस्तनगौरवात्।
खिद्यमाना क्लमं प्राप वापीमध्ये विलासिनी॥126॥
सिञ्चन्ती सलिलैर्भूपं सा जगादालसालसा।
मोदकैर्नाथ मां सद्यः प्रहरेति कृतस्मिता॥127॥
एवं तद्वचनं श्रुत्वा जलप्रहरणात्मकम्।
शब्देन च्छलितो राजा मोदकैस्तां तताड सः॥128॥
ततो विहस्य सा राज्ञी पुनरेवमभाषत।
राजन्नवसरः कोऽत्र मोदकानां जलान्तरे॥129॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदकैः सिञ्च मा मा त्वं मामित्युक्तं मया हि तत्।
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः॥130॥
न च व्याकरणं वेत्सि मूर्खस्त्वं कथमीदृशः।
इत्युक्तः स तया राज्या शब्दशास्त्रविदा नृपः॥131॥
ततश्चिन्तापरो मुह्यन्नाहारादिविवर्जितः।
चिन्तास्थ इव पृष्टोऽपि नैव किञ्चिदभाषत॥132॥
पाण्डित्यं शरणं वा मे मृत्युर्वेति विचिन्तयन्।
शयनीये परित्यक्तगात्रः संतापवानभूत्॥133॥
उपविश्याथ निकटे मन्त्रिणे ज्ञातमानसाः।
कारणं देव कथय वर्तसे विमना इति॥134॥
तच्छुत्वाऽपि तथैवास्त तूष्णीं स सातवाहनः।
ततोऽवदत्सुधीः कश्चिद्वर्षैर्द्वादशभिः सह॥135॥
ज्ञायते सर्वविद्यानां मुख्यं व्याकरणं नृप।
अहं तु शिक्षयाम्येतत्तुल्यः स्कन्देन चापरः॥136॥
तदहं मासषट्केन देव त्वां शिक्षयामि तत्।
ततः स्वामिकुमारस्य प्रसादात्तदकल्पयत्॥137॥
शिक्षयामास राजानं सुधीः प्राप्तार्थसञ्चयः।
राजा कवित्वपाण्डित्यमयीं प्राप च चातुरीम्॥138॥
ततो गुणाढ्यस्तद्वीक्ष्य प्रतिज्ञां प्राक्तनीं स्मरन्।
संस्कृतं प्राकृतं देशभाषामपि समत्यजत्॥139॥
संत्यज्य कृतमौनत्वाद्व्यवहारानसौ ततः।
निर्ययौ नगरात्तस्माद्दिदृक्षुर्विन्ध्यवासिनीम्॥140॥
स्वप्ने स विन्ध्यवासिन्या प्रेषितस्तदगाद्वनम्।
यत्र स्थितः काणभूतिः पिशाचैः परिवारितः॥141॥
तत्राऽश्रृणोत्पिशाचानां परस्परमसौ कथाः।
शिशिक्षे चात्र तद्भाषां भाषात्रयविलक्षणाम्॥142॥
पिशाचभाषया तत्र मौनमोक्षैकहेतुना।
स्वागतं विदधे काणभूतेर्विन्ध्याटवीस्थितेः॥143॥
मित्रस्य रक्षसो **भूतिवर्मणो** दिव्यचक्षुषः।
वचसा **माल्यवन्तं** तं गुणाढ्यं सोऽभ्यगाद्वने॥144॥
काणभूतिः कथां तस्य पुष्पदन्तोदितां ततः।
अवर्णयद्गुणाढ्यस्य शापान्तसमयोत्सुकः॥145॥
निबबन्ध **गुणाढ्यस्**ताश्चतुर्थ्या भाषया कथाः।
सप्तैव सप्तभिर्वर्षैर्ग्रन्थलक्षाणि सप्त सः॥146॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मसीमटव्यामप्राप्य गुणाढ्य: स्वाङ्गशोणितै:।
लिलेख ता: कथा दिव्याश्चित्रचारित्रशालिनी:।।147।।
निबद्धास्ता **गुणाढ्येन** दृष्ट्वा तत्र महाकथा:।
त्यक्तशापो गतिं प्राप **काणभूति**र्निजां तत:।।148।।
काणभूतेरनुचरा: पिशाचास्तत्र ये स्थिता:।
तेऽपि दिव्यां कथां श्रुत्वा सर्वे प्रापुर्दिवं तत:।।149।।
इयं बृहत्कथा पृथ्व्यां प्रसिद्धिं प्राप्य(प्स्य)ते कथम्।
इति शापान्तसोत्कण्ठो **गुणाढ्य:** समचिन्तयत्।।150।।
प्राहिणोत्तां कथां सोऽथ **सातवाहन**भूभुजे।
अधिचिक्षेप राजाऽपि तां कथां मदनिष्ठुर:।।151।।
सानुतापो **गुणाढ्यो**ऽपि वह्निकुण्डं ततो व्यधात्।
व्याख्याय पत्रमेकैकं निचिक्षेप च तत्र स:।।152।।
देहातिवाहमुत्सृज्य तृणाम्बुमयमादरात्।
अशृण्वन्साश्रवस्तत्र तां कथां मृगपक्षिण:।।153।।
निराहारेषु शुष्यत्सु तदानीं मृगपक्षिषु।
अस्वादुनि च तन्मांसे भुक्ते प्राप रुजं नृप:।।154।।
गुणाढ्यचरितं श्रुत्वा वनेचरजनात्तत:।
आजगाम स्वयं राजा तमेवोद्देशमादरात्।।155।।
सबाष्पमृगमध्यस्थं **गुणाढ्यं** वनवासिनम्।
प्रत्यभिज्ञाय च ततो नमश्चक्रे महीपति:।।156।।
अथ पृष्टवतो राज्ञ: स्ववृत्तान्तं जगाद स:।
भूतभाषामयैर्वाक्यै**र्गुणाढ्यो** विस्मयस्पृश:।।157।।
आख्याहि निजवृत्तान्तं पुनरप्यब्रवीदसौ।
दग्धानि ग्रन्थलक्षाणि षडेकमवशिष्यते।।158।।
ग्रन्थलक्षमिदं यैका सा कथां गृह्यतां त्वया।
नरवाहनदत्तस्य चरितं त्वेतदद्भुतम्।।159।।
उक्त्वेत्यदत्त स कथा: सातवाहनभूभुजे।
राजाऽपि प्रणमन्भक्त्या जग्राह निजमूर्धनि।।160।।
अथ ज्ञात्वा स शापान्तं त्यक्त्वा योगेन विग्रहम्।
माल्यवान्गणतां लेभे शिवभक्त्येकभावित:।।161।।
बृहत्कथा सा सर्वत्र प्रसिद्धिं प्रापदद्भुता।
यां स्वयं स महादेव्याश्चन्द्रमौलिरवर्णयत्।।162।।
अनया कथया किंवा प्रसङ्गोद्दिष्टया मया।
ऐन्द्रं व्याकरणं हित्वा **पाणिनीयं** व्यधाच्छिव:।।163।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततःप्रभृति निःशेष**शब्दज्ञान**प्रकाशकम्।
दिव्यं व्याकरणं भूमौ **पाणिनीयं** प्रसिद्ध्यति॥164॥
पाणिनिर्भगवानेव स्वयं चन्द्रार्धशेखरः।
प्रतिष्ठापयते कोऽन्यो दिव्यं व्याकरणं भुवि॥165॥
अशेषेष्वपि शास्त्रेषु स्तूयते कैर्न **पाणिनिः**।
ज्ञायन्ते सम्यगेवैते यत्प्रसादेन वाचकाः॥166॥
कालान्तरेण सर्वज्ञस्याज्ञया **भुजगेश्वरः**।
स्वजिह्वाः सफलीचक्रे बह्वी**र्भाष्यो**पदेशतः॥167॥
परिमितमतयः किमाचरन्तु प्रसृमरसंशयखिद्यमानचित्ताः।
विभुरनवधिवाच्यावाचकात्मा शिव इति पश्य तमेव सर्वशक्तिम्॥168॥

इति श्रीमहामाहेश्वरजयद्रथविरचिते हरचरितचिन्तामणौ
शब्दशास्त्रावतारो नाम सप्तविंशः प्रकाशः

●

व्याकरणशास्त्रे प्रयुक्तपारिभाषिकशब्दानामर्थाः

अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्देश उपदेशोऽपदेशः प्रदेशोऽतिदेशोरपवर्गो वाक्यशेषोऽर्थापत्तिः प्रसङ्ग एकान्तोऽनेकान्तः पूर्वपक्षो निर्णयो विधानं विपर्ययोऽतिक्रान्तवीक्षण-मनागतवीक्षणं संशयो व्याख्यानमनुमतं स्वसंज्ञा निर्वचनं दृष्टान्तो नियोगो विकल्पः समुच्चय ऊह्यमिति। तत्र यमर्थमधिकृत्योच्यते त**दधिकरणम्**। येन वाक्यार्थो युज्यते स **योगः**। योऽ-र्थोऽविकृतसूत्रपदे स **पदार्थः**। यदन्यतो युक्तिमदर्थस्य साधनं स **हेत्वर्थः**। समासवचन**मुद्देशः**। विस्तरवचनं **निर्देशः**। एवमेवेत्**युपदेशः**। अनेन कारणेनेत्**यपदेशः**। प्रकृतस्यानागतेन साधनं **प्रदेशः**। अतिक्रान्तेना**तिदेशः**। अभिप्रायानुकर्षण**मपवर्गः**। येनार्थः परिसमाप्यते पदेनाहार्येण स **वाक्यशेषः**। यदकीर्तितमर्थादापाद्यते सा**र्थापत्तिः**। प्रकरणाभिहितोऽर्थः केनचिदुपोद्घातेन पुनरुच्यमानः **प्रसङ्गः**। सर्वत्र यस्तथा स **एकान्तः**। क्वचिदन्यथा क्वचित्तथा सो**ऽनेकान्तः**। प्रतिषेधवचनं **पूर्वपक्षः**। तस्योत्तरवचनं **निर्णयः**। प्रकरणानुपूर्व्यं **विधानम्**। तस्य प्रातिलोम्यं **विपर्ययः**। इत्युक्तमित्यति**क्रान्तवीक्षणम्**। परत्र वक्ष्यामीत्**यनागतवीक्षणम्**। उभयतो हेतुदर्शनं **संशयः**। तत्रातिशयवर्णना **व्याख्यानम्**। परमतमप्रतिषिद्ध**मनुमतम्**। परैरसंमतः शब्दः **स्वसंज्ञा**। लोके प्रतीतमुदाहरणं **निर्वचनम्**। तद्युक्तिनिदर्शनं **दृष्टान्तः**। इदमेवेति **नियोगः**। इदं वेदं वेति **विकल्पः**। इदं चेदं चेति **समुच्चयः**। यदनिर्दिष्टं युक्तिगम्यं त**दूह्यम्** इति।

प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवं च।
कृतव्युदासोऽकृतशासनं च स वार्तिको धर्मगुणोऽष्टकश्च॥

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयाध्यायान्तव्याख्यातसूत्रानुक्रमणी

सूत्राणि	पृष्ठाङ्काः
अकथितं च	396
अकेनोर्भविष्यदाधमर्ण्ययोः	555
अक्षशलाकासंख्याः परिणा	449
अचः परस्मिन् पूर्वविधौ	168
अचश्च	244
अजेर्व्यघञपोः	576
अणावकर्मकाच्चित्तवत्कर्तृकात्	350
अणुदित्सवर्णस्य चाप्रत्ययः	212
अत्यन्तसंयोगे च	455
अदर्शनं लोपः	188
अदसो मात्	79
अदो जग्धिर्ल्यप्ति किति	571
अधिपरी अनर्थकौ	414
अधिरीश्वरे	415
अधीगर्थदयेशां कर्मणि	549
अनभिहिते	521
अनुकरणं चानितिपरम्	408
अनुदात्तङित आत्मनेपदम्	324
अनुपराभ्यां कृञः	349
अनुर्लक्षणे	412
अनुवादे चरणानाम्	558
अनेकमन्यपदार्थे	498
अनेकाल् शित्सर्वस्य	156
अन्तरं बहिर्योगोपसंव्यानयोः	110
अन्तरपरिग्रहे	409
अन्तरान्तरेण युक्ते	527
अन्तर्द्धौ येनादर्शनमिच्छति	389
अन्नेन व्यञ्जनम्	458
अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदा-जाहियुक्ते	539
अपथं नपुंसकम्	566
अपवर्गे तृतीया	529
अपादाने पञ्चमी	538
अपिः पदार्थसम्भावनान्ववसर्गगर्हा-समुच्चयेषु	414
अपृक्त एकाल्प्रत्ययः	253
अमैवाव्ययेन	496
अयस्मयादीनि च्छन्दसि	379
अर्थवदधातुरप्रत्ययः प्रातिपदिकम्	258
अर्द्धं नपुंसकम्	481
अर्धर्चाः पुंसि च	567
अलोऽन्त्यस्य	155
अलोऽन्त्यात्पूर्व उपधा	202
अल्पाच्तरम्	516
अवाद् ग्रः	336
अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्था-भावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चा-द्यथानुपूर्व्य-यौगपद्यसादृश्यसम्पत्ति-साकल्यान्तवचनेषु	448
अव्ययादाप्सुपः	587
अव्ययीभावः	448
अव्ययीभावश्च	118
असँय्योगाल्लिट्कित्	232
अस्मदो द्वयोश्च	274
अस्मद्युत्तमः	417
आकडारादेका सञ्ज्ञा	351
आख्यातोपयोगे	389
आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्	582
आङ उद्गमने	335
आङो दोनास्यविहरणे	331

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्राणि	पृष्ठाङ्काः
आङो यमहनः	335
आङ् मर्यादाभिविध्योः	450
आङ्मर्यादावचने	413
आदरानादरयोः सदसती	409
आदिरन्त्येन सहेता	218
आदेः परस्य	156
आद्यन्तवदेकस्मिन्	90
आद्यन्तौ टकितौ	133
आमः	585
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य	344
आर्धधातुके	570
इको झल्	233
इग्यणः सम्प्रसारणम्	131
इणो गा लुङि	572
इतरेतरान्योन्योपपदाच्च	331
इत्थंभूतलक्षणं	537
इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ	567
इद्गोण्याः	268
इन्धिभवतिभ्यां च	233
ईदूतौ च सप्तम्यर्थे	85
ईदूदेद् द्विवचनं प्रगृह्यम्	77
ईषदकृता	488
उच्चैरुदात्तः	246
उञः	84
उदुपधाद्भावादिकर्मणोरन्यतरस्याम्	240
उदोनूर्ध्वकर्मणि	333
उद्विभ्यां तपः	334
उपकादिभ्योन्यतरस्यामद्वन्द्वे	582
उपदेशेऽजनुनासिक इत्	307
उपपदमतिङ्	495
उपमानानि सामान्यवचनैः	470
उपमितं व्याघ्रादिभिः सामान्याप्रयोगे	472
उपसर्जनं पूर्वम्	516
उपाद्यमः स्वकरणे	337
उपान्मन्त्रकरणे	333

सूत्राणि	पृष्ठाङ्काः
उपान्वध्याङ्वसः	393
उभयप्राप्तौ कर्मणि	552
उरण् रपरः	149
ऊँ	84
ऊकालोऽज्झ्रस्वदीर्घप्लुतः	241
ऊर्यादिच्विडाचश्च	407
एङ् प्राचां देशे	228
एओङ् (मा0 सू0)	24
एकविभक्ति चापूर्वनिपाते	257
एकश्रुति दूरात्सम्बुद्धौ	250
एच इग्घ्रस्वादेशे	139
एतदस्त्रतसोस्त्रतसौ चानुदात्तौ	568
ऐऔच् (मा0 सू0)	24
ओत्	83
कडाराः कर्मधारये	520
कर्तरि कर्मव्यतिहारे	329
कर्तुरीप्सिततमं कर्म	394
कर्तृकरणयोस्तृतीया	535
कर्तृकरणे कृता बहुलम्	457
कर्तृकर्मणोः कृति	551
कर्मणा यमभिप्रैति स सम्प्रदानम्	391
कर्मणि च	491
कर्मणि द्वितीया	526
कर्मप्रवचनीययुक्ते द्वितीया	529
कर्मप्रवचनीयाः	411
कारके	382
कालाः परिमाणिना	484
कालाध्वनोरत्यन्तसंयोगे	528
कुगतिप्रादयः	492
कुत्सितानि कुत्सनैः	470
कृत्तद्धितसमासाश्च	264
कृत्यानां कर्तरि वा	555
कृत्यैरधिकार्थवचने	457
कृत्यैर्ऋणे	463
कृन्मेजन्तः	114

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्राणि	पृष्ठाङ्काः
क्तक्तवतू निष्ठा	99
क्तस्य च वर्तमाने	553
क्तेन नञ्विशिष्टेनानञ्	474
क्रीडोऽनुसम्परिभ्यश्च	332
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः	392
क्षुद्रजन्तवः	559
क्षेपे	464
खट्वा क्षेपे	455
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ	399
गतिश्च	406
गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि	531
गवाश्वप्रभृतीनि च	560
गाङ् लिटि	573
गाङ्कुटादिभ्योऽञ्णिन् ङित्	228
गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु	584
गोस्त्रियोरुपसर्जनस्य	266
ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री	299
ङिच्च	155
चक्षिङः ख्याञ्	574
चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः	459
चतुर्थी सम्प्रदाने	532
चतुर्थ्यर्थे बहुलं छन्दसि	551
चतुष्पादो गर्भिण्या	481
चादयोऽसत्त्वे	405
चार्थे द्वन्द्वः	510
चुटू	312
छन्दसि पुनर्वस्वोरेकवचनम्	275
जनिकर्तुः प्रकृतिः	390
जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्	272
ञमङणनम् (मा० सू०)	40
डति च	99
णेरणौ यत्कर्म णौ चेत्स कर्ता नाध्याने	345

सूत्राणि	पृष्ठाङ्काः
णौ गमिरबोधने	572
ण्यक्षत्रियार्षञितो यूनि लुगणिञोः	576
तत्पुरुषः समानाधिकरणः कर्मधारयः	255
तत्पुरुषोऽनञ्कर्मधारयः	563
तत्प्रयोजको हेतुश्च	403
तत्र तेनेदमिति सरूपे	509
तथा युक्तं चानीप्सितम्	395
तदशिष्यं सञ्ज्ञाप्रमाणत्वात्	272
तद्धितश्चासर्वविभक्ति	112
तद्धितार्थोत्तरपदसमाहारे च	465
तद्राजस्य बहुषु तेनैवास्त्रियाम्	577
तनादिभ्यस्तथासोः	584
तपरस्तत्कालस्य	216
तरप्तमपौ घः	93
तसौ मत्वर्थे	379
तस्मादित्युत्तरस्य	205
तस्मिन्निति निर्दिष्टे पूर्वस्य	205
तस्य लोपः	313
तस्यादित उदात्तमर्धह्रस्वम्	248
तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः	416
तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्	275
तिष्ठद्गुप्रभृतीनि च	451
तुल्यास्यप्रयत्नं सवर्णम्	71
तृतीया च होश्छन्दसि	526
तृतीया तत्कृतार्थेन गुणवचनेन	455
तृतीयासप्तम्योर्बहुलम्	589
तृतीयासमासे	109
तृषिमृषिकृषेः काश्यपस्य	241
तेन सहेति तुल्ययोगे	508
ते प्राग्धातोः	410
त्यदादीनि च	227
त्यदादीनि सर्वैर्नित्यम्	297
दाणश्च सा चेच्चतुर्थ्यर्थे	337
दा धा घ्वदाप्	86

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्राणि	पृष्ठाङ्काः
दिङ्नामान्यन्तराले	508
दीधीवेवीटाम्	65
दूरान्तिकार्थेभ्यो द्वितीया च	541
देवब्रह्मणोरनुदात्तः	252
द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्	558
द्विगुरेकवचनम्	556
द्विगुश्च	453
द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्	482
द्वितीयाटौस्स्वेनः	569
द्वितीया ब्राह्मणे	550
द्वितीया श्रितातीतपतितगतात्यस्त-प्राप्तापन्नैः	453
द्विर्वचनेऽचि	185
ध्रुवमपायेऽपादानम्	386
ध्वाङ्क्षेण क्षेपे	463
नः क्ये	377
न क्त्वा सेट्	238
नक्षत्रे च लुपि	544
न गतिहिंसार्थेभ्यः	330
न गोपवनादिभ्यः	582
नञ्	485
नदीभिश्च	452
न धातुलोप आर्धधातुके	59
न निर्धारणे	489
न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु	179
न पादम्याङ्यमाङ्यसपरिमुहरु-चिनृतिवदवसः	351
नपुंसकमनपुंसकेनैकवच्चास्यान्य-तरस्याम्	295
न बहुव्रीहौ	107
नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च	534
न लुमताङ्गस्य	197
न लोकाव्ययनिष्ठाखलर्थतृनाम्	553
न विभक्तौ तुस्माः	311

सूत्राणि	पृष्ठाङ्काः
न वेति विभाषा	120
न सुब्रह्मण्यायां स्वरितस्य तूदात्तः	251
नाज्झलौ	75
नानोर्ज्ञः	337
नाव्ययीभावादतोऽम्त्वपञ्चम्याः	587
नित्यं क्रीडाजीविकयोः	492
निपात एकाजनाङ्	82
निष्ठा	519
नीचैरनुदात्तः	246
पञ्चमी भयेन	462
पञ्चमी विभक्ते	543
परः संन्निकर्षः संहिता	421
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः	564
पराजेरसोढः	388
पात्रेसमितादयश्च	464
पारेमध्ये षष्ठ्या वा	451
पिता मात्रा	296
पुमान् स्त्रिया	294
पूङः क्त्वा च	240
पूरणगुणसुहितार्थसदव्ययतव्यसमाना-धिकरणेन	490
पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन	464
पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम्	109
पूर्ववत्सनः	340
पूर्वसदृशसमोनार्थकलहनि-पुणमिश्रश्लक्ष्णैः	457
पूर्वापरप्रथमचरमजघन्यसमानमध्य-मध्यमवीराश्च	473
पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्	540
प्रत्ययस्य लुक्श्लुलुपः	189
प्रत्ययलोपे प्रत्ययलक्षणम्	191
प्रथमानिर्दिष्टं समास उपसर्जनम्	255
प्रसितोत्सुकाभ्यां तृतीया च	544

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्राणि	पृष्ठाङ्काः
प्राक्कडारात्समासः	446
प्राग्रीश्वरान्निपाताः	403
प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा	544
प्रादय उपसर्गाः क्रियायोगे	405
प्राप्तापन्ने च द्वितीयया	484
प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने	550
प्रोपाभ्यां युजेरयज्ञपात्रेषु	344
फल्गुनीप्रोष्ठपदानां च नक्षत्रे	274
बहुगणवतुडति संख्या	94
बहुषु बहुवचनम्	380
बह्वच इञः प्राच्यभरतेषु	581
बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः	350
भक्ष्येण मिश्रीकरणम्	458
भीत्रार्थानां भयहेतुः	387
भुजोनवने	345
भुवः प्रभवः	391
भूवादयो धातवः	300
भ्रातृपुत्रौ स्वसृदुहितृभ्याम्	294
मन्यकर्मण्यनादरे विभाषाऽप्राणिषु	534
मयूरव्यंसकादयश्च	481
मिदचोऽन्त्यात्परः	136
मुखनासिकावचनोऽनुनासिकः	70
मृडमृदगुधकुषक्लिशवदवसः क्त्वा	233
यडोऽचि च	583
यञञोश्च	581
यचि भम्	378
यथाऽसादृश्ये	448
यथासंख्यमनुदेशः समानाम्	316
यस्मात्प्रत्यविधिस्तदादि प्रत्ययेऽङ्गम्	373
यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी	530
यस्य च भावेन भावलक्षणम्	542
यस्य चायामः	450
युवा खलतिपलितवलिनजरतीभिः	476

सूत्राणि	पृष्ठाङ्काः
युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः	417
यू स्त्र्याख्यौ नदी	369
येन विधिस्तदन्तस्य	218
येनाङ्गविकारः	536
येषां च विरोधः शाश्वतिकः	560
रलो व्युपधाद्धलादेः संश्च	241
रात्राह्नाहाः पुंसि	566
रुजार्थानां भाववचनानामज्वरेः	550
लः परस्मैपदम्	415
लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः	413
लण् (मा० सू०)	38
लिङ्सिचावात्मनेपदेषु	236
लुक्तद्धितलुकि	268
लुङि च	572
लुङ्सनोर्घस्लृ	572
लुटः प्रथमस्य डारौरसः	589
लुटि च क्लृपः	351
लुपि युक्तवद्व्यक्तिवचने	269
वर्णो वर्णेन	476
वारणार्थानामीप्सितः	388
विपराभ्यां जेः	331
विप्रतिषेधे परं कार्यम्	360
विभक्तिश्च	417
विभाषा जसि	109
विभाषा दिक्समासे बहुव्रीहौ	106
विभाषापपरिबहिरञ्चवः पञ्चम्या	450
विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशु-शकुन्यश्ववडवपूर्वापराधर्रारोत्तणाम्	561
विभाषा समीपे	562
विरामोऽवसानम्	423
विशाखयोश्च	275
विशिष्टलिङ्गो नदीदेशोऽग्रामाः	559
विशेषणं विशेष्येण बहुलम्	473

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्राणि	पृष्ठाङ्काः
विशेषणानां चाजातेः	271
वृद्धिरादैच्	42
वृद्धिर्यस्याचामादिस्तद् वृद्धम्	225
वृद्धो यूना तल्लक्षणश्चेदेव विशेषः	293
व्यक्तवाचां समुच्चारणे	336
शदेः शितः	338
शि सर्वनामस्थानम्	119
शूद्राणामनिरवसितानाम्	560
शे	82
शेषात्कर्तरि परस्मैपदम्	348
शेषे प्रथमः	417
शेषो बहुव्रीहिः	497
श्रेण्यादयः कृतादिभिः	474
श्वशुरः श्वश्रवा	296
षष्ठी	488
षष्ठीयुक्तश्छन्दसि वा	373
षष्ठी शेषे	547
षष्ठी स्थानेयोगा	140
षष्ठ्यतसर्थप्रत्ययेन	540
ष्णान्ता षट्	98
सङ्ख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये	506
सङ्ख्यापूर्वो द्विगुः	469
सञ्ज्ञोऽन्यतरस्यां कर्मणि	537
सनि च	573
सप्तमीपञ्चम्यौ कारकमध्ये	529
सप्तमीविशेषणे बहुव्रीहौ	518
सप्तमी शौण्डैः	462
सप्तम्यधिकरणे च	542
समः क्ष्णुवः	345
समर्थः पदविधिः	426
समवप्रविभ्यः स्थः	333
समस्तृतीयायुक्तात्	336
समाहारः स्वरितः	247
समो गम्यृच्छिभ्याम्	335
सरूपाणामेकशेष एकविभक्तौ	276
सर्वादीनि सर्वनामानि	101
सहयुक्तेऽप्रधाने	535
सह सुपा	447
साक्षात्प्रभृतीनि च	409
साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः	543
साधकतमं करणम्	393
सार्वधातुकमपित्	231
सुडनपुंसकस्य	119
सुप्तिङन्तं पदम्	376
सुप्प्रतिना मात्रार्थे	449
सुबामन्त्रिते पराङ्गवत्स्वरे	443
स्त्री पुंवच्च	293
स्थाध्वोरिच्च	237
स्थानिवदादेशोऽनल्विधौ	157
स्थानेऽन्तरतमः	142
स्वं रूपं शब्दस्याशब्दसञ्ज्ञा	210
स्वतन्त्रः कर्ता	402
स्वमज्ञातिधनाख्यायाम्	110
स्वरादिनिपातमव्ययम्	111
स्वरितञितः कर्त्रभिप्राये क्रियाफले	347
स्वरितात्संहितायामनुदात्तानाम्	252
स्वरितेनाधिकारः	322
स्वादिष्वसर्वनामस्थाने	377
हनो वध लिङि	572
हयवरट् (मा० सू०)	30
हलन्ताच्च	235
हलन्त्यम्	309
हलोऽनन्तराः संयोगः	66
हृक्रोरन्यतरस्याम्	401
हेतौ	538
ह्रस्वो नपुंसके प्रातिपदिकस्य	265

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः॥

श्रीमद्भगवत्पतञ्जलिमुनिप्रणीतं

व्याकरणमहाभाष्यम्

प्रथमोऽध्यायः

प्रथमे पादे पस्पशाह्निकम्

शास्त्रप्रयोजनाधिकरणम्

भाष्यम्

अथ शब्दानुशासनम्

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्।

आक्षेपभाष्यम्- केषां शब्दानाम्?

समाधानभाष्यम्- लौकिकानां वैदिकानां च। तत्र लौकिकास्तावद्—गौः-अश्वः-पुरुषः-हस्ती-शकुनिः-मृगः-ब्राह्मण इति। वैदिकाः खल्वपि—शं नो देवीरभिष्टये। इषे त्वोर्जे त्वा, अग्निमीळे पुरोहितम्, अग्न आयाहि वीतये—इति।

जिज्ञासाभाष्यम्- अथ गौरित्यत्र कः शब्दः?

प्रश्नभाष्यम्- किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः?

उत्तरभाष्यम्- नेत्याह; द्रव्यं नाम तत्।

प्रश्नभाष्यम्- यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः?

उत्तरभाष्यम्- नेत्याह; क्रिया नाम सा।

प्रश्नभाष्यम्- यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः?

उत्तरभाष्यम्- नेत्याह; गुणो नाम सः।

प्रश्नभाष्यम्- यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं, स शब्दः?

उत्तरभाष्यम्- नेत्याह; आकृतिर्नाम सा।

प्रश्नोपसंहारभाष्यम्- कस्तर्हि शब्दः?

समाधानभाष्यम्- येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्- अथवा—प्रतीतपदार्थको लोके ध्वनिः 'शब्द' इत्युच्यते। तद्यथा—शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।

शास्त्रप्रयोजनजिज्ञासाभाष्यम्- कानि पुनः शब्दानुशासनस्य प्रयोजनानि?

समाधानभाष्यम्- रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।

रक्षापदार्थनिरूपणभाष्यम्- रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति।

ऊहपदार्थनिरूपणभाष्यम्- ऊहः खल्वपि—न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।

आगमपदार्थनिरूपणभाष्यम्- आगमः खल्वपि—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फल-वान् भवति।

लघुपदार्थनिरूपणभाष्यम्- लघ्वर्थञ्चाध्येयं व्याकरणम्। 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्।

असन्देहपदार्थनिरूपणभाष्यम्- असन्देहार्थञ्चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति। तस्यां सन्देहः—स्थूला चासौ पृषती च, स्थूलानि वा पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ अन्तोदात्तत्वं ततस्तत्पुरुष इति।

व्याकरणाध्ययनसाधकागमप्रतीकभाष्यम्- इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण—इति।

भाष्यम्- तेऽसुराः—'तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः।' म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः।

दुष्टः शब्दः—

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।। इति।

दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। दुष्टः शब्दः।

यदधीतम्—

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्। यदधीतम्।

यस्तु प्रयुङ्क्ते—

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।।

कः? वाग्योगविदेव। कुत एतत्? यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयो बहवोऽपभ्रंशाः। अथ योऽवाग्योगवित्, अज्ञानं तस्य शरणम्।

बाधकभाष्यम्- विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात्।

सिद्धान्तव्याख्याभाष्यम्- एवं तर्हि—

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।

कः? अवाग्योगविदेव। अथ यो वाग्योगविद्, विज्ञानं तस्य शरणम्।

स्थानजिज्ञासाभाष्यम्- क्व पुनरिदं पठितम्?

समाधानभाष्यम्- भ्राजा नाम श्लोकाः।

प्रामाण्याक्षेपभाष्यम्- किञ्च भोः श्लोका अपि प्रमाणम्? किञ्चातः? यदि श्लोकाः अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति—

यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत्।। इति।

समाधानभाष्यम्- प्रमत्तगीत एष तत्रभवतः। यस्त्वप्रमत्तगीतस्तत्प्रमाणम्। यस्तु प्रयुङ्क्ते।

प्रयोजनभाष्यम्- अविद्वांसः—

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।।

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम्। अविद्वांसः।

विभक्तिं कुर्वन्ति—याज्ञिकाः पठन्ति—'प्रयाजाः सविभक्तिकाः कार्या' इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। विभक्तिं कुर्वन्ति।

यो वा इमाम्—'यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति'। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्। यो वा इमाम्।

चत्वारि—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।। इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारि शृङ्गाणि—चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः—त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे—द्वौ शब्दात्मानौ, नित्यः कार्यश्च। सप्तहस्तासो अस्य—सप्त विभक्तयः। त्रिधा बद्धः—त्रिषु स्थानेषु बद्धः, उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीतिं शब्दं करोति। कुत एतत्? रौतिः शब्दकर्मा। महोदेवो मर्त्यां आविवेशेति। महान् देवः शब्दः। मर्त्याः मरणधर्माणो मनुष्यास्तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्। अपर आह--

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।

'चत्वारि वाक्परिमिता पदानि।' चत्वारि पदजातानि—नामाख्यातोपसर्गनिपाताश्च। 'तानि विदुर्ब्राह्मणा ये मनीषिणः।' मनस ईषिणः मनीषिणः। 'गुहा त्रीणि निहिता नेङ्गयन्ति।' गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते, न निमिषन्तीत्यर्थः। 'तुरीयं वाचो मनुष्या वदन्ति।' तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते, चतुर्थमित्यर्थः। चत्वारि।

उत त्वः—

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वसौ तन्वं विसस्रे जायेव पत्य उशती सुवासाः।।

अपि खल्वेकः पश्यन्नपि न पश्यति वाचम्। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति। अविद्वांसमाहार्धम्। उतो त्वस्मै तन्वं विसस्रे तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद्यथा—जायेव पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाक् वाग्विदे स्वात्मानं विवृणुते। वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। उत त्वः।

सक्तुमिव—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि।।

सक्तुः—सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति। तितउ—परिपवनं भवति, ततवद्वा तुन्नवद्वा। धीराः ध्यानवन्तः। मनसा प्रज्ञानेन। वाचमक्रत वाचमकृषत।

अत्रा सखायः सख्यानि जानते। अत्र सखायः सन्तः सख्यानि जानते, सायुज्यानि जानते। क्व? य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः। के पुनस्ते? वैयाकरणाः। कुत एतत्? 'भद्रैषां लक्ष्मीर्निहिताधिवाचि।' एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति। सक्तुमिव।

सारस्वतीम्—याज्ञिकाः पठन्ति—'अहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्' इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। सारस्वतीम्।

दशम्यां पुत्रस्य—याज्ञिकाः पठन्ति—'दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्' इति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। दशम्यां पुत्रस्य।

सुदेवो असि—

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव।।

सुदेवो असि वरुण सत्यदेवोऽसि। यस्य ते सप्तसिन्धवः सप्त विभक्तयः। अनुक्षरन्ति काकुदम्। काकुदं तालु। काकुर्जिह्वा, साऽस्मिन्नुद्यत इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा—शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्। सुदेवो असि।

उक्तप्रयोजनग्रन्थोपपत्तिप्रकरणम्

आक्षेपभाष्यम्- किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किञ्चित् ओ३म् इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान् पठन्ति?

समाधानभाष्यम्- पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवन्ति—

वेदान्नो वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः।

'अनर्थकं व्याकरणम्' इति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनान्यध्येयं व्याकरणम्—इति।

अनुबन्धचतुष्टयोपसंहारभाष्यम्- उक्तः शब्दः। स्वरूपमप्युक्तम्। प्रयोजनान्यप्युक्तानि।

शास्त्रनिर्माणरीतिनिरूपणाधिकरणम्

प्रकारप्रदर्शकभाष्यम्- शब्दानुशासनमिदानीं कर्तव्यम्। तत्कथं कर्तव्यम्। किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति ?

प्रकारनिर्धारकभाष्यम्- अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतत्—अतोऽन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन च भक्ष्यनियमः। तद्यथा—'अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतत्—आरण्यो भक्ष्य इति। एवमिहापि । यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत्—गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियेत, गाव्यादिषूपदिष्टेषु गम्यत एतत्—गौरित्येष शब्द इति।

प्रकारविशेषजिज्ञासाभाष्यम्- किं पुनरत्र ज्यायः?

निश्चितपक्षदर्शकभाष्यम्- लघुत्वाच्छब्दोपदेशः। लघीयाञ्छब्दोपदेशः। गरीयानप-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्यस्य शब्दस्य गावी-गोणी-गोता-गोपोतलिका इत्येवमादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति।

आक्षेपभाष्यम्- अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः। गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः?

समाधानभाष्यम्- नेत्याह। अनुभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते—'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम'। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम। किं पुनरद्यत्वे? यः सर्वथा चिरं जीवति वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यागम-कालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः।

आक्षेपभाष्यम्- कथं तर्हीमे शब्दाः प्रतिपत्तव्याः?

समाधानभाष्यम्- किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, कश्चिद-पवादः।

आक्षेपभाष्यम्- कथञ्जातीयकः पुनरुत्सर्गः कर्तव्यः, कथञ्जातीयकोऽपवादः?

समाधानभाष्यम्- सामान्येनोत्सर्गः कर्तव्यः। तद्यथा—'कर्मण्यण्'। तस्य विशेषेणा-पवादः। तद्यथा—'आतोऽनुपसर्गे कः'।

जातिव्यक्तिपदार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्- किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम्?

समाधानभाष्यम्- उभयमित्याह। कथं ज्ञायते ? उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा—'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इत्युच्यते। द्रव्यं पदार्थं मत्वा 'सरूपाणाम्-' इत्येकशेष आरभ्यते।

शब्दनित्यत्वानित्यत्वविचारः

सन्देहदर्शकभाष्यम्- किं पुनर्नित्यः शब्दः आहोस्वित्कार्यः?

पक्षनिर्धारकभाष्यम्- संग्रह एतत्प्राधान्येन परीक्षितम्—नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः—यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति।

नित्यशब्दवादेऽपि शास्त्रस्य धर्मजनकताधिकरणम्

वार्त्तिकावतरणभाष्यम्- कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्?

(आक्षेपसाधकवार्त्तिकप्रथमखण्डम्- 1)

*** सिद्धे शब्दार्थसम्बन्धे ***

व्याख्याभाष्यम्- सिद्धे शब्देऽर्थे सम्बन्धे चेति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- अथ सिद्धशब्दस्य कः पदार्थः ?

समाधानभाष्यम्- नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते? यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा—सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति।

आक्षेपभाष्यम्- ननु च भोः कार्येष्वपि वर्तते। तद्यथा—सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति। यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति?

समाधानभाष्यम्- संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव।

समाधानान्तरभाष्यम्- अथवा सन्त्येकपदान्यप्यवधारणानि। तद्यथा—अब्भक्षो वायुभक्ष इति; अप एव भक्षयति—वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव, न साध्य इति।

समाधानान्तरभाष्यम्- अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः—अत्यन्तसिद्धः सिद्ध इति। तद्यथा—देवदत्तः—दत्तः सत्यभामा—भामेति।

समाधानान्तरभाष्यम्- अथवा 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः।

आक्षेपभाष्यम्- किं पुनरनेन वर्ण्येन। किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसन्देहः स्यात्?

समाधानभाष्यम्- मङ्गलार्थम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति।

समाधानभाष्यशेषभाष्यम्- अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्हि? आभीक्ष्ण्येऽपि वर्तते। तद्यथा—नित्यप्रसहितो नित्यप्रजल्पित इति। यावता आभीक्ष्ण्येऽपि वर्तते, तत्राप्यनेनैवार्थः स्यात्—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः।

नित्यतासाधकपक्षनिर्णयाधिकरणम्

आक्षेपभाष्यम्- अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते—सिद्धे शब्देऽर्थे सम्बन्धे चेति?

समाधानभाष्यम्- आकृतिमित्याह। कुत एतत्? आकृत्तिर्हि नित्या, द्रव्यमनित्यम्।

आक्षेपभाष्यम्- अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः?

समाधानभाष्यम्- सिद्धे शब्दे अर्थसम्बन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः।

द्रव्यपदार्थाभ्युपगमभाष्यम्- अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः—सिद्धे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दे अर्थे सम्बन्धे चेति। द्रव्यं हि नित्यमाकृतिरनित्या। कथं ज्ञायते? एवं हि दृश्यते लोके—मृत्कयाचिदाकृत्या युक्तो पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमपमृद्य कुण्डिकाः क्रियन्ते। तथा—सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते।

आकृतिपदार्थाभ्युपगमभाष्यम्- आकृतावापि पदार्थ एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति। ननु चोक्तम्—आकृतिरनित्या इति। नैतदस्ति। नित्याऽऽकृतिः। कथम्? न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते।

समाधानसाधकनित्यलक्षणभाष्यम्- अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते। किं पुनस्तत्त्वम्? तस्य भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते।

नित्यानित्यत्वविचारस्याप्रकृतत्वबोधकभाष्यम्- अथवा किं न एतेन—इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते—सिद्धे शब्देऽर्थे सम्बन्धे चेति।

वार्त्तिकद्वितीयखण्डावतरणभाष्यम्- कथं पुनर्ज्ञायते—सिद्धः शब्दोऽर्थः सम्बन्धश्चेति?

(1. शब्दार्थसम्बन्धानां प्रमाणबोधकवार्त्तिकद्वितीयखण्डम्- 2)

* लोकतः *

भाष्यम्- यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा—घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाऽऽह—कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह—कुरु शब्दान् प्रयोक्ष्य इति। तावत्येवार्थमुपादाय शब्दान् प्रयुञ्जते।

धर्मनियमाधिकरणम्

वार्त्तिकतृतीयखण्डावतरणभाष्यम्- यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते?

(1. शास्त्रोपयोगप्रकथने वार्त्तिकतृतीयखण्डम्- 3)

* लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः *

भाष्यम्- लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते। किमिदं धर्मनियम इति? धर्माय नियमः धर्मनियमः, धर्मार्थो वा नियमः धर्मनियमः, धर्मप्रयोजनो वा नियमः धर्मनियमः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1. वार्त्तिकचतुर्थखण्डम्-4)

*** यथा लौकिकवैदिकेषु ***

भाष्यम्- प्रियतद्धिता दाक्षिणात्याः। यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते। अथवा—युक्त एवात्र तद्धितार्थः। यथा लौकिकवैदिकेषु च कृतान्तेषु। लोके तावत्—'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते। शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते—इदं भक्ष्यमिदमभक्ष्यमिति। तथा—खेदात्स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च। तत्र नियमः क्रियते—इयं गम्येयमगम्येति।

वैदिकसिद्धान्तोपपादकभाष्यम्- वेदे खल्वपि—'पयोव्रतो ब्राह्मणः यवागूव्रतो राजन्यः आमिक्षाव्रतो वैश्यः' इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते। तथा—'बैल्वः खादिरो वा यूपः स्यात्' इत्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत्किञ्चिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम्। तत्र नियमः क्रियते। तथा—'अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते—भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्' इति। अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति। तत्र च नियमः क्रियते। एवं क्रियमाणमभ्युदयकारि भवतीति।

दार्ष्टान्तिक उपसंहारभाष्यम्- एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते—शब्देनैवार्थोऽभिधेयो नापशब्देनति। एवं क्रियमाणभ्युदयकारि भवतीति।

शब्दविषयप्रदर्शनाधिकरणम्

नियमापेक्षे वार्त्तिकांशानुवादभाष्यम्

*** अस्त्यप्रयुक्तः ***

भाष्यम्- सन्ति वै शब्दा अप्रयुक्ताः। तद्यथा—ऊष, तेर, चक्र, पेच इति। किमतो यत्सन्त्यप्रयुक्ताः? प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति। य इदानीमप्रयुक्ताः, नामी साधवः स्युः।

आक्षेपासङ्गतिबोधकभाष्यम्- इदं तावद्विप्रतिषिद्धम्; यदुच्यते—'सन्ति वै शब्दाः अप्रयुक्ताः' इति। यदि सन्ति नाप्रयुक्ताः, अथाप्रयुक्ताः न सन्ति। सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह—सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्?

आक्षेपसङ्गतिसाधकभाष्यम्- नैतद्विप्रतिद्विषिद्धम्। सन्तीति तावद् ब्रूमः, यदेतान् शास्त्रविदः शास्त्रेणानुविदधते। अप्रयुक्ता इति ब्रूमः, यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते—'कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्' इति। न ब्रूमोऽस्माभिरप्रयुक्ता

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। किं तर्हि? लोकेऽप्रयुक्ता इति।

आक्षेपभाष्यम्- ननु च भवानप्यभ्यन्तरो लोके।

समाधानभाष्यम्- अभ्यन्तरोऽहं लोके, न त्वहं लोकः।

(2. नियमाक्षेपबाधकं वार्त्तिकम्- 1)

* अस्त्यप्रयुक्त इति चेत् नार्थे शब्दप्रयोगात् *

भाष्यम्- अस्त्यप्रयुक्त इति चेत्, तन्न। किं कारणम्? 'अर्थे शब्दप्रयोगात्।' अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते।

(3. बाधकांशनिरासवार्त्तिकम्- 2)

* अप्रयोगः प्रयोगान्यत्वात् *

भाष्यम्- अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः? प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा—ऊषेत्यस्य शब्दस्यार्थे—क्व यूयमुषिताः तेरेत्यस्यार्थे—क्व यूयं तीर्णाः, चक्रेत्यस्यार्थे—क्व यूयं कृतवन्तः। पेचेत्यत्यस्यार्थे—क्व यूयं पक्ववन्त इति।

(4. बाधकोपपत्तिवार्त्तिकम्- 3)

* अप्रयुक्ते दीर्घसत्रवत् *

भाष्यम्- यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः। तद्यथा—दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च, न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसम्प्रदायो धर्म इति कृत्वा यज्ञिकाः शास्त्रेणानुविदधते।

(5. सिद्धान्तसमाधानवार्त्तिकम्- 4)

* सर्वे देशान्तरे *

भाष्यम्- सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते।

आक्षेपभाष्यम्- न चैवोपलभ्यन्ते।

समाधानभाष्यम्- उपलब्धौ यत्नः क्रियताम्। महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः—एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाथर्वणो वेदः, वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमनुनिशम्य 'सन्त्यप्रयुक्ताः' इति वचनं केवलं साहसमात्रमेव।

शब्दानां नियतविषयकत्वदर्शकभाष्यम्- एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा—शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते—शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रयुक्तशब्दोपलम्भकभाष्यम्- ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते। क्व? वेदे। तद्यथा—'सप्तास्येरेवतीरेवदूष, यद्वो रेवतीरेवत्यन्तमूष, यन्मे नरः श्रुत्यं ब्रह्म चक्र, यत्रा नश्चक्रा जरसं तनूनाम्' इति।

शब्दज्ञानस्य धर्मजनकताधिकरणम्

आक्षेपभाष्यम्- किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित्प्रयोगे?

प्रत्याक्षेपभाष्यम्- कश्चात्र विशेषः?

(6. ज्ञानपक्षदूषणवार्त्तिकम्- 1)

*** ज्ञाने धर्म इति चेत्तथाऽधर्मः ***

भाष्यम्- ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्राप्नोति। यो हि शब्दाञ्ज्ञानात्यपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः।

अधर्माधिक्यदर्शनभाष्यम्- अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्यस्य गावी-गोणी-गोता-गोपोतलिकेत्येवमादयोऽपभ्रंशाः।

(7. ज्ञानपक्षाभावबोधकं वार्त्तिकम्- 2)

*** आचारे नियमः ***

भाष्यम्- आचारे पुनर्ऋषिर्नियमं वेदयते—तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः इति।

प्रयोगपक्षाङ्गीकारभाष्यम्- अस्तु तर्हि प्रयोगे।

(8. प्रयोगपक्षे दूषणवार्त्तिकम्- 3)

*** प्रयोगे सर्वलोकस्य ***

भाष्यम्- यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत।

आक्षेपभाष्यम्- कश्चेदानीं भवतो मत्सरः, यदि सर्वो लोकोऽभ्युदयेन युज्येत?

समाधानभाष्यम्- न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यम्। न च प्रयत्नः फलाद्व्यतिरेच्यः।

समाधानबाधकभाष्यम्- ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदेन योक्ष्यन्ते।

समाधानसाधकभाष्यम्- व्यतिरेकोऽपि वै लक्ष्यन्ते। दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात्।

पक्षद्वयनिराकरणोपसंहारवार्तिकावतरणभाष्यम्- एवं तर्हि—नापि ज्ञान एव धर्मः, नापि प्रयोग एव। किं तर्हि?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(9. ध्वनिः शब्दपक्षे सिद्धान्तवार्त्तिकम्-4)

*** शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ***

भाष्यम्- शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदाशब्दा अप्येवमभिवदन्ति—योऽग्निष्टोमेन यजते य उ चैनमेवं वेद। योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद।

व्याख्यान्तरभाष्यम्- अपर आह—तत्तुल्यं वेदशब्देन—इति। यथा—वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति, एवं यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति।

सिद्धान्तभाष्यम्- अथ वा पुनरस्तु—'ज्ञान एव धर्म' इति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'ज्ञाने धर्म इति चेत्तथाऽधर्मः' इति।

आक्षेपनिराकरणभाष्यम्- नैष दोषः शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम्। यच्च पुनरशिष्टाप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय। तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय।

समाधानान्तरभाष्यम्- अथवाऽभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्मः इति ब्रुवतोऽर्थादापन्नं भवति—अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः इति।

समाधानन्तरे न्यायदर्शकभाष्यम्- अथवा कूपखानकवदेतद्भविष्यति। तद्यथा—कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति, सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति, येन च स दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति।

द्वितीयदूषणनिरासभाष्यम्- यदप्युच्यते—'आचारे नियमः' इति। याज्ञे कर्मणि स नियमोऽन्यत्रानियमः। एवं हि श्रूयते—यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञाः विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्रभवन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम्, ततस्ते पराभूताः।

व्याकरणाधिकरणम्

व्याकरणपदार्थोपन्यासभाष्यम्- अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः? सूत्रम्।

(10. आक्षेपवार्त्तिकम्-1)

*** सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ***

भाष्यम्- सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते—व्याकरणस्य सूत्रम् इति। किं हि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदन्यत्सूत्राद् व्याकरणम्, यस्यादः सूत्रं स्यात्।

(11. आक्षेपान्तरवार्त्तिकम्-2)

*** शब्दाप्रतिपत्तिः ***

भाष्यम्- शब्दानां चाप्रतिपत्तिः प्राप्नोति—व्याकरणाच्छब्दान्प्रतिपद्यामहे इति। न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते। किं तर्हि? व्याख्यानतश्च।

आक्षेपबाधकभाष्यम्- ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति।

आक्षेपसाधकभाष्यम्- न केवलं चर्चापदानि व्याख्यानम्—वृद्धिः, आत्, ऐच् इति। किं तर्हि? उदाहरणं-प्रत्युदाहरणं-वाक्याध्याहारः—इत्येतत्समुदितं व्याख्यानं भवति।

पक्षान्तरोपस्थापकभाष्यम्- एवं तर्हि शब्दः।

(12. शब्दो व्याकरणमिति पक्षे आक्षेपवार्त्तिकम्-3)

*** शब्दे ल्युडर्थः ***

भाष्यम्- यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते—व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्। न हि शब्देन किञ्चिद् व्याक्रियते। केन तर्हि? सूत्रेण।

(13. आक्षेपान्तरवार्त्तिकम्-4)

*** भवे च तद्धितः ***

भाष्यम्- भवे च तद्धितो नोपपद्यते—व्याकरणे भवो योगो वैयाकरणः इति। नहि शब्दे भवो योगः। क्व तर्हि? सूत्रे।

(14. आक्षेपान्तरवार्त्तिकम्-5)

*** प्रोक्तादयश्च तद्धिताः ***

भाष्यम्- प्रोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं काशकृत्स्नमिति। न हि पाणिनिना शब्दाः प्रोक्ताः। किं तर्हि? सूत्रम्।

वार्तिकप्रणयनाक्षेपभाष्यम्- पुरस्तादिदमाचार्येण दृष्टम्—'भवे च तद्धितः' इति, तत्पठितम्। तत उत्तरकालमिदं दृष्टम्—'प्रोक्तादयश्च तद्धिताः' इति, तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति।

प्रथमाक्षेपबाधकभाष्यम्- अयं तावददोषः—यदुच्यते 'शब्दे ल्युडर्थः' इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते। किं तर्हि? अन्येष्वपि कारकेषु—'कृत्यल्युटो बहुलम्' इति। तद्यथा—प्रस्कन्दनं प्रपतनमिति।

करणल्युट्समर्थनभाष्यम्- अथवा शब्दैरपि शब्दा व्याक्रियन्ते। तद्यथा—गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते, नाश्वो न गर्दभ इति।

अनुद्धूतदोषप्रदर्शकभाष्यम्- अयं तर्हि दोषः—'भवे प्रोक्तादयश्च तद्धिताः' इति।

समाधानोपक्रमभाष्यम्- एवं तर्हि—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(15. सिद्धान्तवार्त्तिकम्-6)

* लक्ष्यलक्षणे व्याकरणम् *

भाष्यम्- लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यम्, किं लक्षणम्? शब्दो लक्ष्यः, सूत्रं लक्षणम्।

समाधानबाधकभाष्यम्- एवमप्ययं दोषः—समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्यते—वैयाकरण इति।

समाधानसाधकभाष्यम्- नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते। तद्यथा—पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम्, शुक्लो नीलः कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते।

प्रथमपक्षाभ्युपगमभाष्यम्- अथ वा पुनरस्तु सूत्रम्।

प्रथमाक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः' इति।

प्रथमाक्षेपनिरासभाष्यम्- नैष दोषः, व्यपदेशिवद्भावेन भविष्यति।

द्वितीयाक्षेपस्मारणभाष्यम्- यदप्युच्यते—'शब्दाप्रतिपत्तिः' इति। न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते। किं तर्हि? व्याख्यानतश्चेति। परिहृतमेतत्—तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति।

परिहारबाधकस्मारणभाष्यम्- ननु चोक्तम्—न केवलानि चर्चापदानि व्याख्यानम्—वृद्धिः-आत्-ऐजिति। किं तर्हि? उदाहरणं-प्रत्युदाहरणं-वाक्याध्याहारः—इत्येतत्समुदितं व्याख्यानं भवति इति।

परिहारसाधकभाष्यम्- अविजानत एतदेवं भवति। सूत्रत एव हि शब्दान् प्रतिपद्यन्ते। आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत।

वर्णोपदेशाधिकरणम्

आक्षेपभाष्यम्- अथ किमर्थो वर्णानामुपदेशः?

(16. समाधानवार्त्तिकम्-1)

* वृत्तिसमवायार्थ उपदेशः *

भाष्यम्- वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त्तव्य। किमिदं वृत्तिसमवायार्थ इति? वृत्तये समवायः वृत्तिसमवायः। वृत्त्यर्थो वा समवायः वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायः वृत्तिसमवायः। का पुनर्वृत्तिः? शास्त्रप्रवृत्तिः। अथ कः समवायः? वर्णानामानुपूर्व्येण सन्निवेशः। अथ क उपदेशः? उच्चारणम्। कुत एतत्? दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह—उपदिष्टा इमे वर्णा इति।

(17. वर्णोपदेशप्रयोजनान्तरवार्त्तिकम्-2)

* अनुबन्धकरणार्थश्च *

भाष्यम्- अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्त्तव्यः। अनुबन्धानासङ्क्ष्यामीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च। वृत्तिसमवायश्चानुबन्धकरणञ्च प्रत्याहारार्थम्। प्रत्याहारो वृत्त्यर्थः।

वार्तिकावतरणभाष्यम्- 'इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः'। 'इष्टान्वर्णान् भोत्स्यामहे' इति। न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम्।

(18. **आक्षेपवार्त्तिकम्**-3)

*** इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ***

भाष्यम्- इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः। एवंगुणा अपि हि वर्णा इष्यन्ते।

(19. **सिद्धान्तवार्त्तिकम्**-4)

*** आकृत्युपदेशात्सिद्धम् ***

भाष्यम्- आकृत्युपदेशात्सिद्धमेतत्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः। तथोवर्णाकृतिः।

(20. **आक्षेपवार्त्तिकम्**-5)

*** आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ***

भाष्यम्- आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः। के पुनः संवृतादयः? संवृतः, कलः, ध्मातः, एणीकृतः, अम्बूकृतः, अर्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः, रोमशः इति। अपर आह—

ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः।। इति।

अतोऽन्ये व्यञ्जनदोषाः।

सिद्धान्तिभाष्यम्- नैष दोषः। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति।

आक्षेपभाष्यम्- अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम्। किम्? समुदायानां साधुत्वं यथा स्यादिति।

समाधानैकदेशिभाष्यम्- एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि।

आक्षेपभाष्यम्- सा तर्हि वक्तव्या।

(21. **एकदेशिसमाधानवार्त्तिकम्**-6)

*** लिङ्गार्था तु प्रत्यापत्तिः ***

भाष्यम्- लिङ्गार्था सा तर्हि भवति।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- यद्यप्येतदुच्यते। अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यमित्सञ्ज्ञा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च न वक्तव्या, लोपश्च न वक्तव्य:। यदनुबन्धै: क्रियते तत्कलादिभि: करिष्यते।

आक्षेपभाष्यम्- सिद्ध्यत्येवम्। अपाणिनीयं तु भवति।

सिद्धान्तिभाष्यम्- यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध:' इति।

समाधानभाष्यम्- परिहृतमेतत्—गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यतीति।

समाधानबाधकभाष्यम्- ननु चान्यद् गर्गादिबिदादिपाठे प्रयोजनमुक्तम्। किम्? समुदायानां साधुत्वं यथा स्यादिति।

समानसाधकभाष्यम्- एवं तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते, कलादयश्च निवर्त्यन्ते। कथं पुनरेकेन यत्नेनोभयं लभ्यम्? लभ्यमित्याह। कथम्? द्विगता अपि हेतवो भवन्ति। तद्यथा—आम्राश्च सिक्ता: पितरश्च प्रीणिता इति। तथा वाक्यान्यपि द्विष्ठानि भवन्ति—श्वेतो धावति, अलम्बुसानां यातेति।

सिद्धान्तभाष्यम्- अथवा इदं तावदयं प्रष्टव्य:—क्वेमे संवृतादय: श्रूयेरन्निति? आगमेषु। आगमा: शुद्धा: पठ्यन्ते। विकारेषु तर्हि। विकारा अपि शुद्धा: पठ्यन्ते। प्रत्ययेषु तर्हि। प्रत्यया अपि शुद्धा: पठ्यन्ते। धातुषु तर्हि। धातवोऽपि शुद्धा: पठ्यन्ते। प्रातिपदिकेषु तर्हि। प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते। यानि तर्ह्यग्रहणानि प्रातिपदिकानि। एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेश: कर्तव्य:। शश: षष इति मा भूत्। पलाश: पलाष इति मा भूत्। मञ्चको मञ्जक इति मा भूत्।

आगमाश्च विकाराश्च प्रत्यया: सह धातुभि:।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ता: कलादय:।। 1।।

इति श्रीमद्भगवत्पञ्जलिप्रणीते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे प्रथमं पस्पशाह्निकम्

●

प्रथमेऽध्याये प्रथमे पादे द्वितीयं प्रत्याहाराह्निकम्

(शिवसूत्रम्)

अइउण्- 1

व्यक्तिपक्षाधिकरणम्

(22. विवृतोपदेशप्रतिज्ञावार्त्तिकम्- 1)

*** अकारस्य विवृतोपदेश आकारग्रहणार्थ: ***

भाष्यम्- अकारस्य विवृतोपदेश: कर्तव्य:। किं प्रयोजनम्? आकारग्रहणार्थ:। अकार:

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात्।

आक्षेपभाष्यम्- किं च कारणं न गृह्णीयात्?

समाधानभाष्यम्- विवारभेदात्।

प्रत्याक्षेपभाष्यम्- किमुच्यते—विचारभेदादिति, न पुनः कालभेदादपि। यथैव ह्ययं विवारभिन्नः, एवं कालभिन्नोऽपि?

समाधानभाष्यम्- सत्यमेव तत्। वक्ष्यति—'तुल्यास्यप्रयत्नं सवर्णम्' इत्यत्रास्य-ग्रहणस्य प्रयोजनम्—आस्ये येषां तुल्यो देशः प्रयत्नश्च, ते सवर्णसञ्ज्ञा भवन्तीति। बाह्यश्च पुनरास्यात्कालः। तेन स्यादेव कालभिन्नस्य ग्रहणम्, न पुनर्विवारभिन्नस्य।

आक्षेपभाष्यम्- किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते?

समाधानभाष्यम्- विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथं ज्ञायते? यदयम्—'अ अ' इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति।

समाधानबाधकभाष्यम्- नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? अतिखट्वः अतिमालः—इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्ये-वमर्था प्रत्यापत्तिः।

समाधानसाधकभाष्यम्- नैतदस्ति। नैव लोके न च वेदेऽकारो विवृतोऽस्ति। कस्तर्हि? संवृतः, योऽस्ति स भविष्यति। तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति—'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते' इति।

आक्षेपभाष्यम्- कः पुनरत्र विशेषः—विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत, संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति?

समाधानभाष्यम्- न खलु कश्चिद्विशेषः। आहोपुरुषिकामात्रं तु भवानाह—संवृतस्योप-दिश्यमानस्य विवृतोपदेशश्चोद्यत इति। वयं तु ब्रूमः—विवृतस्योपदिश्यमानस्य प्रयोजन-मन्वाख्यायते इति।

(23. धात्वादिषु विवृतत्वप्रतिज्ञावार्त्तिकम्-2)

* तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः *

भाष्यम्- तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः। क्वान्यत्र? धातुप्रातिपदिकप्रत्ययनिपातस्थस्य। किं प्रयोजनम्? सवर्णग्रहणार्थः। आक्षर-समाम्नायिकेनास्य ग्रहणं यथा स्यात्। किं च कारणं न स्यात्? विवारभेदादेव।

धात्वादिषु ज्ञापकेन विवृतत्वसाधकभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—भवत्याक्षर-समाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति। यदयम् 'अकः सवर्णे दीर्घः' इति प्रत्याहारेऽको ग्रहणं करोति। कथं कृत्वा ज्ञापकम्? नहि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति।

विवृतत्वसाधकज्ञापकविघटनभाष्यम्- नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचने प्रयोजनम्। किम्? यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति, तदर्थमेतत्स्यात्—खट्वाढकं मालाढकमिति। सति प्रयोजने न ज्ञापकं भवति। तस्माद्विवृतोपदेशः कर्तव्यः।

आक्षेपभाष्यम्- क एष यत्नश्चोद्यते—विवृतोपदेशो नाम। विवृतो वोपदिश्येत, संवृतो वा। कोन्वत्र विशेषः?

समाधानभाष्यम्- स एष सर्व एवमर्थो यत्नः—यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद्गुरु भवति। तस्माद्वक्तव्यम्—'धात्वादिस्थश्च विवृत' इति।

(24. **एकदेशिनः प्रयोजनान्तरवार्त्तिकम्**- 3)

* दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः *

भाष्यम्- दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः, दीर्घप्लुतौ संवृतौ मा भूतामिति। वृक्षाभ्याम्, देवदत्ता 3 इति।

सिद्धान्तिनो निराकरणभाष्यम्- नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः। कौ तर्हि? विवृतौ। यौ स्तस्तौ भविष्यतः।

(एकदेशिप्रयोजनसाधकं श्लोकवार्त्तिकम्)

* स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम् *

भाष्यम्- संवृतः स्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेत्। अनुस्वारो यथा यणम्। तद्यथा—सँय्यन्ता सँव्वत्सरः यँल्लोकं तँल्लोकमिति—अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति।

निराकरणभाष्यम्- विषम उपन्यासः। युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्घप्लुतौ पुनर्नैव लोके न च वेदे संवृतौ स्तः। कौ तर्हि? विवृतौ, यौ स्तस्तौ भविष्यतः।

आक्षेपभाष्यम्- एवमपि कुत एतत्—तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः, न पुनस्तुल्य-प्रयत्नौ स्थानभिन्नौ स्याताम्—ईकार ऊकारो वेति?

समाधानभाष्यम्- वक्ष्यति—'स्थानेऽन्तरतमः' इत्यत्र 'स्थाने' इति वर्तमाने पुनः स्थान-ग्रहणस्य प्रयोजनम्—'यत्रानेकविधमान्तर्यं तत्र स्थानत एवाान्तर्यं बलीयो भवति' इति।

वर्णसमाम्नाये जातिपक्षाधिकरणम्

(25. **पूर्वपक्ष्याक्षेपवार्त्तिकम्**- 1)

* तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् *

भाष्यम्- तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति—'अस्य च्वौ' 'यस्येति च'। किं कारणम्? अनण्त्वात्। न ह्येतेऽणो येऽनुवृत्तौ। के तर्हि? येऽक्षरसमाम्नाय उपदिश्यन्ते।

(एकदेशिनो व्यक्त्येकत्वेन समाधाने भाष्यवार्त्तिकम्)

* एकत्वादकारस्य सिद्धम् *

भाष्यम्- एकोऽयमकारो यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ, यश्च धात्वादिस्थः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(26. आक्षेपवार्त्तिकम्-2)

*** अनुबन्धकसङ्करस्तु ***

भाष्यम्- अनुबन्धसङ्करस्तु प्राप्नोति। 'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति केऽपि णित्कृतं प्राप्नोति।

(27. द्वितीयाक्षेपवार्त्तिकम्-3)

*** एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ***

भाष्यम्- एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति। तत्र को दोषः? किरिणा-गिरिणा— इत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति। इह च घटेन तरति घटिक इति, द्व्यज्लक्षणष्ठन् न प्राप्नोति।

(28. तृतीयाक्षेपवार्त्तिकम्-4)

*** द्रव्यवच्चोपचाराः ***

भाष्यम्- द्रव्यवच्चोपचाराः प्राप्नुवन्ति। तद्यथा—द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति। एवमिममकारं नानेको युगपदुच्चारयेत्।

(प्रथमाक्षेपनिराकरणे भाष्यवार्त्तिकम्)

*** विषयेण तु नानालिङ्गकरणात्सिद्धम् ***

भाष्यम्- यदयं विषये विषये नानालिङ्गमकारं करोति—'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति । तेन ज्ञायते—नानुबन्धसङ्करोऽस्तीति। यदि हि स्यात्, नानलिङ्गकरणमनर्थकं स्यात्, एकमेवायं सर्वगुणमुच्चारयेत्।

ज्ञापकनिराकरणभाष्यम्- नैतदस्ति ज्ञापकम्। इत्सञ्ज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्। न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम्। इत्सञ्ज्ञायां हि दोषः स्यात्। आयम्य हि द्वयोरित्सञ्ज्ञा स्यात्। कयोः? आद्यन्तयोः।

न्यासान्तरेण व्याख्याभाष्यम्- एवं तर्हि—'विषयेण तु पुनर्लिङ्गकरणात्सिद्धम्'। यदयं विषये विषये पुनर्लिङ्गमकारं करोति—'प्राग्दीव्यतोऽण्' 'शिवादिभ्योऽण्' इति, तेन ज्ञायते—नानुबन्धसङ्करोऽतीति। यदि हि स्यात्पुनर्लिङ्गकरणमनर्थकं स्यात्।

प्रथमव्याख्याभ्युपगमभाष्यम्- अथवा पुनरस्तु—'विषयेण तु नानालिङ्गकरणात् सिद्धम्' इत्येव।

ज्ञापकनिराकरणस्मारणभाष्यम्- ननु चोक्तम्—इत्सञ्ज्ञाप्रक्लृप्त्यर्थमेतत् स्यादिति।

ज्ञापकसाधकभाष्यम्- नैष दोषः, लोकत एतत्सिद्धम्। तद्यथा लोके कश्चिदेवं देवदत्तमाह—इह मुण्डो भव, इह जटिलो भव, इह शिखी भवेति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते। एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते।

द्वितीयाक्षेपानुवादभाष्यम्- यदप्युच्यते—'एकाजनेकाज्ग्रहणेषु चानुपपत्तिः' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(29. **द्वितीयाक्षेपनिराकरणवार्त्तिकम्**- 5)

* एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् *

भाष्यम्- एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति। तद्यथा—'सप्तदश सामिधेन्यो भवन्ति' इति 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इत्यावृत्तितः सप्तदशत्वं भवति। एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति।

आक्षेपभाष्यम्- भवेदावृत्तितः कार्यं परिहृतम्। इह तु खलु—किरिणा गिरिणा—इत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव।

समाधानभाष्यम्- एतदपि सिद्धम्। कथम्? लोकतः। तद्यथा—ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः सम्पन्नाः। एवमिहाप्यनेकाच्त्वं भविष्यति।

तृतीयाक्षेपनिराकरणभाष्यम्- यदप्युच्यते—द्रव्यवच्चोपचाराः प्राप्नुवन्तीति। भवेद् यदसम्भवि कार्यं तन्नानेको युगपत्कुर्यात्। यत्तु खलु सम्भवि कार्यमनेकोऽपि तद्युगपत्करोति। तद्यथा—घटस्य दर्शनं स्पर्शनं च। सम्भवि चेदं कार्यमकारस्योच्चारणं नाम, अनेकोऽपि तद्युगपत्करिष्यति।

(30. **पूर्वपक्षिसम्मतनानात्वसाधकवार्त्तिकम्**- 6)

* आन्यभाव्यं तु कालशब्दव्यवायात् *

भाष्यम्- आन्यभाव्यं त्वकारस्य। कुतः? कालशब्दव्यवायात्। कालव्यवायाच्छब्द-व्यवायाच्च। कालव्यवायात्—दण्ड अग्रम्। शब्दव्यवायात्—दण्डः। न चैकस्यात्मनो व्यवायेन भवितव्यम्। भवति चेद्भवत्यान्यभाव्यमकारस्य।

(31. **नानात्वहेतुवार्त्तिकम्**- 7)

* युगपच्च देशपृथक्त्वदर्शनात् *

भाष्यम्- युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे—आन्यभाव्यमकारस्येति। यदयं युग-पच्च देशपृथक्त्वेषूपलभ्यते—अश्वः, अर्कः, अर्थ इति। न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मधुरायां च।

एकत्वसाधकभाष्यम्- यदि पुनरिमे वर्णाः—'शकुनिवत्स्युः'। तद्यथा—शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद् दृश्यन्ते। एवमयमकारो 'द' इत्यत्र दृष्टः 'ण्ड' इत्यत्र दृश्यते।

नानात्ववादिभाष्यम्- नैवं शक्यम्। अनित्यत्वमेवं स्यात्। नित्याश्च शब्दाः। नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। यदि चायं 'द' इत्यत्र दृष्टो 'ण्ड' इत्यत्र दृश्येत, नायं कूटस्थः स्यात्।

एकत्वसाधकभाष्यम्- यदि पुनरिमे वर्णाः—'आदित्यवत्स्युः'। तद्यथा—एक आदि-त्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानात्ववादिभाष्यम्- विषम उपन्यासः। नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते। अकारं पुनरुपलभते।

एकत्ववादिभाष्यम्- अकारमपि नोपलभते। किं कारणम्? श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः। एकं च पुनराकाशम्।

नानात्ववादिभाष्यम्- आकाशदेशा अपि बहवः। यावता बहवः, तस्मादान्यभाव्यमकारस्य।

सिद्धान्तसमाधानभाष्यम्- 'आकृतिग्रहणात्सिद्धम्'। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः, तथोवर्णाकृतिः।

सिद्धान्तसमाधानभाष्यम्- 'तद्वच्च तपरकरणम्'। एवं च कृत्वा तपराः क्रियन्ते—आकृतिग्रहणेनातिप्रसक्तमिति।

सिद्धान्तदूषकभाष्यम्- ननु च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन्।

सिद्धान्तभूषकभाष्यम्- प्रत्याख्यायते तत्—'सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च' इति।

सिद्धान्ते आकृतिग्रहणावश्यकत्वबोधकं भाष्यम्- 'हल्ग्रहणेषु च'। किम्? 'आकृतिग्रहणात् सिद्धम्' इत्येव। 'झलो झलि'—अवात्ताम् अवात्त। यत्रैतन्नास्ति—अण् सवर्णान् गृह्णाति—इति।

(32. सिद्धान्तसमाधानवार्त्तिकम्-8)

*** रूपसामान्याद्वा ***

भाष्यम्- रूपसामान्याद्वा सिद्धमेतत्। तद्यथा—'तानेव शाटकानाच्छादयामः, ये मथुरायाम्' 'तानेव शालीन् भुञ्ज्महे, ये मगधेषु' 'तदेवेदं भवतः कार्षापणं, यन्मथुरायां गृहीतम्' अन्यस्मिंश्चान्यस्मिंश्च रूपसामान्यात् 'तदेवेदम्' इति भवति। एवमिहापि रूपसामान्यात्सिद्धम्।।1।।

(शिवसूत्रम्)

ऋलृक्-2

लृकारप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- अथ लृकारोपदेशः किमर्थः?

आक्षेपबाधकभाष्यम्- किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्येत। यदि किञ्चिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति, लृकारोपदेशस्यापि तद् भवितुमर्हति। को वा विशेषः?

आक्षेपसाधकभाष्यम्- अयमस्ति विशेषः। अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः। यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्य। क्लृपेश्च लत्वमसिद्धम्, तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति। नार्थ लृकारोपदेशेन।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्- अत उत्तरं पठति—

(33. **समाधानवार्त्तिकम्**- 1)

*** ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः ***

भाष्यम्- ऌकारोपदेशः क्रियते—यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च। यदृच्छाशब्दार्थस्तावत्—यदृच्छया कश्चिद् ऌतको नाम। तस्मिन्नच्कार्याणि यथा स्युः—दध्ल्तकाय देहि मध्ल्तकाय देहि, उदङ्ङ्ल्तकोऽगमत् प्रत्यङ्ङ्ल्तकोऽगमत्। चतुष्टयी शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः।

वार्तिकविवरणभाष्यम्- अशक्तिजानुकरणार्थः। अशक्त्या कयाचिद् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये ऌतक इति प्रयुक्तम्। तस्यानुकरणं—ब्राह्मण्य्ल्तक इत्याह, कुमार्य्ल्तक इत्याहेति। प्लुत्याद्यर्थश्च ऌकारोपदेशः कर्तव्यः। के पुनः प्लुत्यादयः? प्लुतिद्विर्वचनस्वरिताः। क्लृ3प्तशिखः। क्लृप्प्तः। प्रक्लृप्तः। प्लुत्यादिषु कार्येषु कृपेर्लत्वं सिद्धम्, तस्य सिद्धत्वादच् कार्याणि न सिद्ध्यन्ति। तस्माद् ऌकारोपदेशः क्रियते।

प्रयोजननिराकरणभाष्यम्- नैतानि सन्ति प्रयोजनानि।

(34. **प्रयोजनप्रत्याख्यानवार्त्तिकम्**- 2)

*** न्याय्यभावात्कल्पनं सञ्ज्ञादिषु ***

भाष्यम्- न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं सञ्ज्ञादिषु साधु मन्यन्ते—ऋतक एवासौ, न ऌतक इति।

व्याख्यान्तरभाष्यम्- अपर आह—न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति। स कल्पयितव्यः साधुः सञ्ज्ञादिषु। ऋतक एवासौ, न ऌतकः।

प्रत्याख्यानबाधकभाष्यम्- अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः—ऌफिडः ऌफिड्डश्चेति।

प्रत्याख्यानसाधकभाष्यम्- एषोऽपि ऋफिडः ऋफिड्डश्च। कथम्? अर्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते। फिडफिड्डावौणादिकौ प्रत्ययौ। त्रयी च शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दा इति। न सन्ति यदृच्छाशब्दाः।

प्रयोजनवादिभाष्यम्- अन्यथा कृत्वा प्रयोजनमुक्तम्, अन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः। समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निर्वतको भवति। तद्यथा—देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन्।

प्रत्याख्यानभाष्यम्- नैष दोषः। पक्षान्तरैरपि परिहारा भवन्ति।

(35. **द्वितीयप्रयोजनप्रत्याख्यानवार्त्तिकम्**- 3)

*** अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ***

भाष्यम्- अनुकरणं हि शिष्टस्य साधु भवति, अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति, नाभ्युददाय। यथा लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावत्—य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते—इति तस्यानुकुर्वन् दद्याच्च यजेत, वाधीयीत च सोऽप्यभ्युदयेन युज्यते। वेदेऽपि—'य एवं विश्वसृजः सत्त्राण्यध्यासते' इति तेषामनुकुर्वन् तद्वत्सत्त्राण्यध्यासीत सोऽप्यभ्युदयेन युज्यते। अशिष्टाप्रतिषिद्धं यथा—य एवमसौ हिक्कति, य एवमसौ हसति, य एवमसौ कण्डूयतीति तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च, नैव तद्दोषाय स्यान्नाभ्युदयाय। यस्तु खल्वेवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात्।

प्रयोजनसमर्थनभाष्यम्- विषमः उपन्यासः । यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः। यश्चापि पिबति, यश्चानुपिबति, उभौ तौ पिबतः। यस्तु खल्वेवमसौ ब्राह्मणं हन्ति—एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन्स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्पयो वा पिबेत्, न स मन्ये पतितः स्यात्।

वार्तिकार्थनिगमनभाष्यम्- एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति—तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत, सोप्यपशब्दभाक् स्यात्।

उपदेशप्रयोजनभाष्यम्- अयं त्वन्योपशब्दपदार्थकः शब्दः, यदर्थ उपदेशः कर्तव्यः। न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते—अपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्दः स्यात्। न चैषोऽपशब्दः।

प्रयोजनान्तरभाष्यम्- अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः, यदर्थ उपदेशः कर्तव्यः—साध्ळृकारमधीतेमध्ळृकारमधीते इति।

अन्यथासिद्धिबोधकभाष्यम्- क्वस्थस्य पुनरेतदनुकरणम्? क्लृपिस्थस्य। यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम्। तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति।

प्रयोजनभाष्यम्- भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः, यदर्थ उपदेशः कर्तव्यः।

खण्डनभाष्यम्- न कर्तव्यः। इदमवश्यं कर्तव्यम्—'प्रकृतिवदनुकरणं भवति' इति। किं प्रयोजनम्? 'द्विः पचन्त्वित्याह' 'तिङ्ङतिङ' (8.1.28) इति निघातो यथा स्यात्। 'अग्नी इत्याह' 'ईदूदेद्द्विवचनं प्रगृह्यसंज्ञं भवति' इति प्रगृह्यसञ्ज्ञा यथा स्यात्।

खण्डनोपसंहारभाष्यम्- यदि प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति—कुमार्य्ऌतक इत्याह, ब्राह्मण्य्ऌतक इत्याह। अपशब्दो ह्यस्य प्रकृतिः।

प्रयोजनभाष्यम्- न चापशब्दः प्रकृतिः। न ह्यपशब्दा उपदिश्यन्ते। न चानुपदिष्टा प्रकृतिरस्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(36. **तृतीयप्रयोजनप्रत्याख्यानवार्त्तिकम्**- 4)

* एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः *

भाष्यम्- 'एकदेशविकृतमनन्यवद्भवति' इति प्लुत्यादयोऽपि भविष्यन्ति।

प्रयोजनाद्याक्षेपभाष्यम्- यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्यते, 'राज्ञः क च' राजकीयम्, 'अल्लोपोऽनः' इति प्राप्नोति।

प्रत्याख्यातृसमाधानभाष्यम्- एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य।

प्रयोजनवादिभाष्यम्- यदि षष्ठीनिर्दिष्टस्येत्युच्यते, 'क्लृप्तशिख' इति प्लुतो न प्राप्नोति। न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः। कस्तर्हि? रेफः।

प्रत्याख्यातृभाष्यम्- ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः। कथम्? अविभक्तिको निर्देशः— कृप-उः-रः-लः—'कृपो रो लः' इति।

प्रत्याख्यातुरेव भाष्यम्- अथवा पुनरस्तु अविशेषेण।

आक्षेपस्मारणभाष्यम्- ननु चोक्तं—'राज्ञः क च' राजकीयम् 'अल्लोपोऽनः' इति प्राप्नोतीति।

आक्षेपबाधकभाष्यम्- नैष दोषः। वक्ष्येतत्—'श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्' इति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते—'अल्लोपोऽनः' नकारान्तस्येति।

प्रयोजनवाद्याक्षेपभाष्यम्- इह तर्हि कल्३प्तशिख 'अनृतः' इति प्रतिषेधः प्राप्नोति।

(37. **प्रत्याख्यातृसमाधानवार्त्तिकम्**- 5)

* रवत्प्रतिषेधाच्च *

भाष्यम्- रवत्प्रतिषेधाच्चैतत्सिध्यति। 'गुरोररवतः' इति वक्ष्यामि।

आक्षेपभाष्यम्- यदि अरवतः इत्युच्यते, होतृ+ऋकारः—होतॄकारः अत्र न प्राप्नोति।

आक्षेपबाधकभाष्यम्- गुरोररवतो ह्रस्वस्य इति वक्ष्यामि।

सिद्धान्तिभाष्यम्- स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते।।2।।

(शिवसूत्रे)

एओङ्- 3

ऐऔच्- 4

अतपरत्वव्यवस्थाधिकरणम्

वार्तिकावतरणभाष्यम्- इदं विचार्यते—इमानि सन्ध्यक्षराणि तपराणि वोपदिश्येरन् 'एत-ओत्-ङ्' 'ऐत्-औत्-च्' इति, अतपराणि वा यथान्यासम्—इति।

भाष्यम्- कश्चात्र विशेषः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(38. **तपरपक्षदूषणवार्त्तिकम्**-1)

* सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् *

भाष्यम्- सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम्।

(39. **तपरत्वपक्षदूषणवार्त्तिकम्**-2)

* प्लुत्यादिष्वज्विधिः *

भाष्यम्- प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति। गो3त्रात 'नौ4त्रात' इत्यत्र 'अनचि च' (8.4.47) अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति। इह च 'प्रत्यङ्ङैतिकायन' 'उदङ्ङौ4पगव' इति 'अचि' इति ङमुण्न प्राप्नोति।

(40. **तपरत्वपक्षदूषणवार्त्तिकम्**-3)

* प्लुतसञ्ज्ञा च *

भाष्यम्- प्लुतसञ्ज्ञा च न सिध्यति। ऐ3तिकायन औ3पगव ऊकालोज् ह्रस्वदीर्घप्लुतसंज्ञो भवतीति प्लुतसञ्ज्ञा न प्राप्नोति।

अतपरपक्षाभ्युपगमभाष्यम्- सन्तु तर्ह्यतपराणि।

(41. **अतपरक्षदूषणवार्त्तिकम्**-4)

* अतपर एच इग्घ्रस्वादेशे *

भाष्यम्- यद्यतपराणि 'एच इग्घ्रस्वादेशे' इति वक्तव्यम्। किं प्रयोजनम्? एचो ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध एकारः अर्ध ओकारो वा मा भूदिति।

अतपरवादिनः शङ्काभाष्यम्- ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम्। इमावैचौ समाहारवर्णौ—मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः। तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात्, कदाचिदिवर्णोवर्णौ; मा कदाचिदवर्णं भूदिति।

तपरवादिन उत्तरभाष्यम्- प्रत्याख्यायत एतत्—ऐचोश्चोत्तरभूयस्त्वात्' इति।

अतपरवादिन उत्तरभाष्यम्- यदि प्रत्याख्यानपक्षः, इदमपि प्रत्याख्यायते 'सिद्धमेङः सस्थानत्वात्' इति।

आक्षेपभाष्यम्- ननु चैङः सस्थानतरावर्ध एकारोऽर्ध ओकारः।

समाधानभाष्यम्- न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्।

आक्षेपभाष्यम्- ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते—'सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिः सुतम्, शुक्रं ते एन्यद्यजतं ते एन्यत्' इति।

समाधानभाष्यम्- पार्षदकृतिरेषा तत्रभवताम्। नैव हि लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारोऽस्ति।

(42. **अतपरपक्षदूषणवार्त्तिकम्**-5)

* एकादेशे दीर्घग्रहणम् *

भाष्यम्- एकादेशे दीर्घग्रहणं कर्तव्यम्—'आद्गुणः' दीर्घः, 'वृद्धिरेचि' दीर्घः इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं प्रयोजनम्? आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकं, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति।

आक्षेपभाष्यम्- तत्तर्हि दीर्घग्रहणं कर्तव्यम्।

समाधानभाष्यम्- न कर्तव्यम्। उपरिष्टाद्योगविभागः करिष्यते—'अकः सवर्णे' एको भवति। ततो—'दीर्घः' दीर्घश्च स भवति, यः स 'एकः पूर्वपरयोः' इत्येवं निर्दिष्ट इति।

दीर्घग्रहणाक्षेपभाष्यम्- इहापि तर्हि प्राप्नोति—पशुं, विद्धं, पचन्तीति।

समाधानभाष्यम्- नैष दोषः। इह तावत्पशुमिति, 'अम्येकः' इतीयता सिद्धम्। सऽयमेवं सिद्धे सति यत्पूर्वग्रहणं तस्यैतत्प्रयोजनम्—यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति। विद्धमिति पूर्व इत्येवानुवर्तते। अथवाचार्यप्रवृत्तिर्ज्ञापयति—नानेन सम्प्रसारणदीर्घो भवतीति, यदयं हल उत्तरस्य सम्प्रसारणस्य दीर्घत्वं शास्ति। पचन्तीति 'अतो गुणे पर इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति, तस्यैतत्प्रयोजनम्—यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति।

दीर्घग्रहणाक्षेपभाष्यम्- इह तर्हि खट्वश्यों मालश्यं इति। दीर्घवचनादकारो न, अनान्तर्यादिकारौकारौ न। तत्र को दोषः? विगृहीतस्य श्रवणं प्रसज्येत।

वार्तिकैकदेशिनः समाधानभाष्यम्- न ब्रूमः—यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति। किं तर्हि? यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति।

आक्षेपभाष्यम्- क्व च क्रियमाणे न दोषः?

समाधानभाष्यम्- सञ्ज्ञाविधौ। वृद्धिरादैज् दीर्घः अदेङ् गुणो दीर्घ इति।

आक्षेपभाष्यम्- तत्तर्हि दीर्घग्रहणं कर्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्- न कर्तव्यम्। कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणा! स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति? तपरे गुणवृद्धी।

आक्षेपभाष्यम्- ननु च तः परो यस्मात्सोऽयं तपरः।

समाधानभाष्यम्- नेत्याह, तादपि परस्तपर इति।

आक्षेपभाष्यम्- यदि तादपि परस्तपरः 'ऋदोरप्' इतीहैव स्यात्—यवः स्तवः; लवः पव इत्यत्र न स्यात्।

समाधानभाष्यम्- नैष तकारः। कस्तर्हि? दकारः।

आक्षेपभाष्यम्- किं दकारे प्रयोजनम्?

प्रतिबन्दिसमाधानभाष्यम्- अथ किं तकारे? यद्यसन्देहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः दकारोऽपीति।

वर्णैकदेशग्रहणाग्रहणनिर्णयाधिकरणम्

पक्षद्वयोपस्थापकभाष्यम्- इदं विचार्यते—य एते वर्णेषु वर्णैकदेशा वर्णान्तर-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समानाकृतयः, एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति। कुतः पुनरियं विचारणा? इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि। अभ्यन्तरश्च समुदायेऽवयवः तद्यथा—वृक्षः प्रचलन् सहावयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा। कश्चात्र विशेषः।

(42. ग्रहणपक्ष आक्षेपवार्त्तिकम्-1)

* वर्णैकदेशा वर्णग्रहणेन चेत्सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः *

भाष्यम्- वर्णैकदेशा वर्णग्रहणेन चेत्सन्ध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति। स प्रतिषेध्यः। अग्ने इन्द्र, वायो उदकम्,'अकः सवर्णे दीर्घः' इति दीर्घत्वं प्राप्नोति।

(43. आक्षेपान्तरवार्त्तिकम्-2)

* दीर्घे ह्रस्वविधिप्रतिषेधः *

भाष्यम्- दीर्घे ह्रस्वाक्षराश्रयो विधिः प्राप्नोति, स प्रतिषेध्यः। आलूय, प्रलूय 'ह्रस्वस्य पिति कृति तुग्भवति' इति तुक् प्राप्नोति।

आक्षेपबाधकभाष्यम्- नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति—'न दीर्घे ह्रस्वाश्रयो विधिर्भवति' इति। यदयं दीर्घाच्छे तुकं शास्ति।

आक्षेपसाधकभाष्यम्- नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? 'पदान्ताद्वा' इति विभाषां वक्ष्यामीति।

आक्षेपबाधकभाष्यम्- यत्तर्हि योगविभागं करोति। इतरथा हि 'दीर्घात्पदान्ताद्वा' इत्येव ब्रूयात्।

आक्षेपभाष्यम्- इह तर्हि—खट्वाभिः मालाभिः, 'अतो भिस ऐस्' इत्यैस्भावः प्राप्नोति।

आक्षेपबाधकभाष्यम्- तपरकरणसामर्थ्यान्न भविष्यति।

आक्षेपभाष्यम्- इह तर्हि—याता, वाता, 'अतो लोपः' आर्धधातुके—इत्यकारलोपः प्राप्नोति।

आक्षेपबाधकभाष्यम्- ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति।

आक्षेपसाधकभाष्यम्- अस्ति ह्यन्यत्तपरकरणे प्रयोजनम्। किम्? सर्वस्य लोपो मा भूदिति।

प्रयोजनबाधकभाष्यम्- अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति?

प्रयोजनसाधकभाष्यम्- परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च।

समाधानसाधकभाष्यम्- एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'नाकारस्थस्याकारस्य लोपो भवति' इति। यदयम् 'आतोऽनुपसर्गे कः' इति ककारमनुबन्धं करोति। कथं कृत्वा ज्ञापकम्? कित्करणे एतत्प्रयोजनम्—कितीत्याकारलोपो यथा स्यादिति। यद्याकारस्थस्य केकारस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोपः स्यात्, कित्करणमनर्थकं स्यात्। परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्यात्—गोदः, कम्बलद इति। पश्यति त्वाचार्यः—नाकारस्थस्याकारस्य लोपः स्यादिति, अतः ककारमनुबन्धं करोति।

समाधानबाधकभाष्यम्- नैतदस्ति ज्ञापकम्। उत्तरार्थमेतत्स्यात्—'तुन्दशोकयोः परिमृजानुपदोः' इति।

समाधानसाधकभाष्यम्- यत्तर्हि 'गापोष्टक्' इत्यनन्यार्थं ककारमनुबन्धं करोति।

(44. **आक्षेपवार्त्तिकम्**-3)

* एकवर्णवच्च *

भाष्यम्- एकवर्णवच्च दीर्घो भवतीति वक्तव्यम्। किं प्रयोजनम्? वाचा तरतीति द्व्यज्लक्षणष्ठन्मा भूदिति। इह च वाचो निमित्तम्, 'तस्य निमित्तं संयोगोत्पातौ' इत्यनुवर्तमाने 'गोद्व्यचः' इति द्व्यज्लक्षणो यन्मा भूदिति।

आक्षेपबाधकभाष्यम्- अत्रापि गोनौग्रहणं ज्ञापकम्—'दीर्घे द्व्यज्लक्षणो विधिर्न भवति' इति।

सर्वाक्षेपपरिहारभाष्यम्- अयं तु सर्वेषामेव परिहारः—

(45. **सिद्धान्तसमाधानवार्त्तिकम्**-4)

* नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु *

भाष्यम्- नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु—'सप्तदश सामिधेन्यो भवन्ति' इति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते।

दृष्टान्तवैषम्यभाष्यम्- विषम उपन्यासः। प्रत्यृचं चैव हि तत्कर्म चोद्यते। असम्भवश्चाग्नौ वेद्यां च।

दृष्टान्तान्तरभाष्यम्- यथा तर्हि—'सप्तदश प्रादेशमात्रीराश्वत्थीः समिधोऽभ्यादधीत' इति न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते।

दृष्टान्तवैषम्यभाष्यम्- अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते। तुल्यश्चासम्भवोऽग्नौ वेद्यां च।

सिद्धान्तिदृष्टान्तभाष्यम्- यथा तर्हि—'तैलं न विक्रेतव्यम्' 'मांसं न विक्रेतव्यम्' इति व्यपवृक्तं च न विक्रीयते। अव्यपवृक्तं—गावः सर्षपाश्च विक्रीयन्ते। तथा 'लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्' इति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम्, अव्यपवृक्ते कामचारः।

आक्षेपभाष्यम्- यत्र तर्हि व्यपवर्गोऽस्ति। क्व च व्यपवर्गोऽस्ति? सन्ध्यक्षरेषु।

समाधानभाष्यम्- 'सन्ध्यक्षेरषु विवृतत्वात्'। यदत्रावर्णं विवृततरं तदन्यस्मादवर्णात्। ये अपीवर्णोवर्णे विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम्।

अग्रहणपक्षाभ्युपगमभाष्यम्- अथवा पुनर्न गृह्यन्ते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(46. अग्रहणपक्षदूषणवार्त्तिकम्-5)

*** अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् ***

भाष्यम्- अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारस्य ग्रहणं कर्तव्यम्। 'तस्मान्नुड् द्विहलः' ऋकारे चेति वक्तव्यम्। इहापि यथा स्यात्—आनृधतुः, आनृधुरिति। यस्य पुनर्गृह्यन्ते 'द्विहलः' इत्येव तस्य सिद्धम्।

अग्रहणपक्षदूषणोद्धारभाष्यम्- यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः। द्विहल्ग्रहणं न करिष्यते। तस्मान्नुड् भवति—इत्येव। यदि न क्रियते, आटतुः-आटुरित्यत्रापि प्राप्नोति। अश्नोतिग्रहणं नियमार्थं भविष्यति—अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति।

वार्तिकोक्तद्वितीयदूषणभाष्यम्- लादेशे च ऋकारग्रहणं कर्तव्यम्। 'कृपो रो लः' ऋकारस्य चेति वक्तव्यम्। इहापि यथा स्यात्— क्लृप्तः-क्लृप्तवानिति। यस्य पुनगृह्यन्ते, 'रः' इत्येव तस्य सिद्धम्।

द्वितीयदूषणोद्धारभाष्यम्- यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। ऋकारोऽप्यत्र निर्दिश्यते। कथम्? अविभक्तिको निर्देशः—कृप-उः-रः-लः = 'कृपो रो लः' इति। अथवा उभयतः स्फोटमात्रं निर्दिश्यते—रश्रुतेर्लश्रुतिर्भवतीति।

वार्तिकोक्ततृतीयदूषणभाष्यम्- विनामे ऋकारग्रहणं कर्तव्यम्। 'रषाभ्यां नो णः समानपदे' ऋकाराच्चेति वक्तव्यम्। इहपि यथा स्यात्—मातृणां-पितृणामिति। यस्य पुनर्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम्।

अग्रहणवादिभाष्यम्- न सिध्यति। यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति।

ग्रहणवादिभाष्यम्- मा भूदेवम्। अड्व्यवाय इत्येव सिद्धम्।

अग्रहणवादिभाष्यम्- न सिध्यति। वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति। यच्चापि रेफात्परं भक्तेः, न तत्क्वचिदपि व्यपवृक्तं दृश्यते।

ग्रहणवादिभाष्यम्- एवं तर्हि योगविभागः करिष्यते—'रषाभ्यां नो णः समानपदे'; ततः—'व्यवाये' व्यवाये च रषाभ्यां नो णो भवतीति । ततः—'अट्कुप्वाङ्नुम्भिः' इति। इदमिदानीं किमर्थम्? नियमार्थम्—'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैः' इति।

अग्रहणवादिभाष्यम्- यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—भवत्यृकारान्नो णत्वमिति। यदयं क्षुभ्नादिषु नृनमनशब्दं पठति।

ग्रहणवादिभाष्यम्- नैतदस्ति ज्ञापकम्। वृद्ध्यर्थमेतत्स्यात्—नार्नमनिः।

अग्रहणवादिभाष्यम्- यत्तर्हि तृप्नोतिशब्दं पठति।

एकदेशिभाष्यम्- यच्चापि नृनमनशब्दं पठति।

बाधकस्मारणभाष्यम्- ननु चोक्तम्—वृद्ध्यर्थमेतत्स्यात्।

समाधानभाष्यम्- बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे। अथवा उपरिष्टाद्योगविभागः करिष्यते—'ऋतः' नो णो भवति। ततः—'छन्दस्यवग्रहात्' ऋत इत्येव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- 'प्लुतावैच इदुतौ'। एतच्च वक्तव्यम्। यस्य पुनर्गृह्यन्ते गुरोष्टेरित्येव प्लुत्या तस्य सिद्धम्।

आक्षेपबाधकभाष्यम्- यस्यापि न गृह्यन्ते तस्याप्येष न दोष:। क्रियत एतन्न्यास एव।

(47. आक्षेपवार्त्तिकम्-6)

* तुल्यरूपे संयोगे द्विव्यञ्जनविधि: *

भाष्यम्- तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति—कु3क्कुट:, पि3प्पल:, पि3त्तमिति। यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ।

आक्षेपबाधकभाष्यम्- यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ। कथम्? मात्राकालोऽत्र गम्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्। असच्च कथं शक्यं प्रतिपत्तुम्।

आक्षेपसाधकभाष्यम्- यद्यपि तावदत्रैतच्छक्यते वक्तुं—यत्रैतन्नास्ति 'अण् सवर्णान् गृह्णाति' इति। इह तु कथम्—सँय्यन्ता-सँव्वत्सर:-यँल्लोकम्-तँल्लोकमिति यत्रैतदस्ति 'अण् सवर्णान् गृह्णाति' इति?

आक्षेपबाधकभाष्यम्- अत्रापि मात्राकालो गृह्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्। असच्च कथं शक्यं प्रतिपत्तुम्।

(शिवसूत्रम्)

हयवरट्-5

अथ हकाराधिकरणम्

वार्तिकावतरणभाष्यम्- सर्वे वर्णा: सकृदुपदिष्टा:, अयं हकारो द्विरुपदिश्यते—पूर्वश्चैव परश्च। यदि पुन: पूर्व एवोपदिश्येत, पर एव वा। कश्चात्र विशेष:?

(48. पूर्वत्रानुपदेशे दूषणवार्त्तिकम्-1)

* हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम् *

भाष्यम्- हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम्। 'आतोऽटि नित्यम्' 'शश्छोऽटि' 'दीर्घादटि समानपदे' हकारे चेति वक्तव्यम्। इहापि यथा स्यात्—महाँ हि स:।

(49. पूर्वत्रानुपदेशे दूषणवार्त्तिकम्-2)

* उत्त्वे च *

भाष्यम्- उत्त्वे च हकारग्रहणं कर्तव्यम्। 'अतो रोरप्लुतादप्लुते' 'हशि च' हकारे चेति वक्तव्यम्। इहापि यथा स्यात्—पुरुषो हसति, ब्राह्मणो हसतीति।

पूर्वोपदेशाङ्गीकारभाष्यम्- अस्तु तर्हि पूर्वोपदेश:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(परत्रानुपदेशे दूषणभाष्यवार्त्तिकम्)

*** पूर्वोपदेशे कित्त्वक्सेड्विधयो झल्ग्रहणानि च ***

भाष्यम्- यदि पूर्वोपदेशः कित्त्वं विधेयम्—स्निहित्वा-स्नेहित्वा, सिस्निहिषति-सिस्नेहिषति, 'रलोऽव्युपधाद्धलादेः' इति कित्त्वं न प्राप्नोति। क्सविधिः। क्सश्च विधेयः—अधुक्षत्, अलिक्षत्, 'शल इगुपधादनिटः क्सः' इति क्सो न प्राप्नोति। इड्विधिः। इट् च विधेयः—रुदिहि, स्वपिहि। वलादिलक्षण इण् न प्राप्नोति। 'झल्ग्रहणानि च'। किम्? अहकाराणि स्युः। तत्र को दोषः? 'झलो झलि' इतीह न स्यात्—अदाग्धाम्, अदाग्धम्। तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च।

उपसंहारभाष्यम्- यदि न किञ्चिदन्यत्राप्युपदेशे प्रयोजनमस्ति, तत्राप्युपदेशः कर्तव्यः।

रेफाधिकरणम्

वार्तिकावतरणभाष्यम्- इदं विचार्यते—अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत—हयवरडिति, पर एव वा यथान्यासमिति। कश्चात्र विशेषः?

(50. यथान्यासोपदेशे दूषणवार्त्तिकम्- 1)

*** रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः ***

भाष्यम्- रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः। अनुनासिकस्य—स्वर्नयति प्रातर्नयति इति। 'यरोऽनुनासिकेऽनुनासिको वा' इत्यनुनासिकः प्राप्नोति। द्विर्वचनं—मद्रह्रदः, भद्रह्रदः, 'यरः' इति द्विवर्चनं प्राप्नोति। परसर्वणस्य—कुण्डं रथेन, वनं रथेन, 'अनुस्वारस्य ययि' इति परसवर्णः प्राप्नोति।

यकारात्पूर्वपाठाभ्युपगमभाष्यम्- अस्तु तर्हि पूर्वोपदेशः।

(पूर्वोपदेशदूषणवार्तिकम्)

*** पूर्वोपदेशे कित्त्वप्रतिषेधो व्यलोपवचनं च ***

भाष्यम्- यदि पूर्वोपदेशः कित्त्वं प्रतिषेध्यम्। देवित्वा, दिदेविषति। 'रलोऽव्युपधात्' इति कित्त्वं प्राप्नोति।

दूषणनिराकरणभाष्यम्- नैष दोषः, नैवं विज्ञायते—'रलो व्युपधात्' इति। किं तर्हि? 'रलः-अव्-व्युपधात्' इति? किमिदम्—अव् व्युपधात् इति? अवकारान्तात् व्युपधात्—अव्व्युपधादिति।

व्याख्याभाष्यम्- व्यलोपवचनं च। व्योश्च लोपो वक्तव्यः। गौधेरः, पचेरन्, यजेरन्। 'जीवेरदानुक्'—जीरदानुः। वलीति लोपो न प्राप्नोति।

दूषणनिराकरणभाष्यम्- नैष दोषः, रेफोऽप्यत्र निर्दिश्यते—'लोपो व्योर्वलि' इति, रेफे च वलि चेति।

यथान्यासाऽभ्युपगमभाष्यम्- अथवा पुनरस्तु परोपदेशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषस्मारणभाष्यम्- ननु चोक्तम्—'रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्ण-प्रतिषेधः' इति।

समाधानभाष्यम्- अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः। रेफोष्मणां सवर्णा न सन्ति।

द्विर्वचनांशसमाधानभाष्यम्- द्विर्वचनेऽपि—नेमौ रहौ कार्यिणौ द्विर्वचनस्य। किं तर्हि? निमित्तमिमौ रहौ द्विर्वचनस्य। तद्यथा—'ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टाम्' इति। नेदानीं तौ भुञ्जाते।

अयोगवाहोपदेशाधिकरणम्

वार्तिकावतरणभाष्यम्- इदं विचार्यते—इमेऽयोगावाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च। तेषां कार्यार्थ उपदेशः कर्तव्यः। के पुनरयोगवाहाः? विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः। कथं पुनरयोगवाहाः? यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते। क्व: पुनरेषामुपदेशः कर्तव्यः?

(51. सिद्धान्तवार्त्तिकम्-1)

*** अयोगवाहानामट्सु णत्वम् ***

भाष्यम्- अयोगवाहानामट्सूपदेशः कर्तव्यः। किं प्रयोजनम्? णत्वम्। उरःकेण, उर ≍ केण, उरःपेण, उर ≍ पेण। 'अड्व्यवाये' इति णत्वं सिद्धं भवति।

(52. सिद्धान्तवार्त्तिकम्-2)

*** शर्षु जश्भावषत्वे ***

भाष्यम्- शर्षूपदेशः कर्तव्यः। किं प्रयोजनम्? जश्भावषत्वे। अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते 'उब्जिता उब्जितुम्' इत्येतद् रूपं यथा स्यात्।

उपध्मानीयोपधदूषणभाष्यम्- यद्युपध्मानीयोपधः पठ्यते, उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनर् 'नन्द्राः संयोगादयः' इति प्रतिषेधः सिद्धो भवति।

दकारोपधदूषणभाष्यम्- यदि दकारोपधः पठ्यते, का रूपसिद्धिः—उब्जिता, उब्जितुमिति?

दकारोपधदूषणनिराकरणभाष्यम्- 'असिद्धे भ उब्जेः'। इदमस्ति—'स्तोः श्चुना श्चुः' इति, ततो वक्ष्यामि—'भ उब्जेः' उब्जेः श्चुना सन्निपाते भो भवतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्, निपातनादेव सिद्धम्। किं निपातनम्? 'भुजन्युब्जौ पाण्युपतापयोः' इति। इहपि तर्हि प्राप्नोति—अभ्युद्गः, समुद्ग इति। अकुत्वविषये तन्निपातम्। अथवा नैतदुब्जे रूपं, गमेरेतत् ह्युपसर्गाड्डो विधीयते। अभ्युद्गतः—अभ्युद्गः, समुद्गतः—समुद्ग इति।

प्रयोजनवार्तिकांशव्याख्याभाष्यम्- षत्वं च प्रयोजनम्। सर्पिःषु, धनुःषु। 'शर्व्यवाये' इति षत्वं सिद्धं भवति, 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति विसर्जनीयग्रहणं न कर्तव्यं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम्। कथं—सर्पींषि धनूंषि? अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम्।

समाधानभाष्यम्- अवश्यं नुमो ग्रहणं कर्तव्यम्। अनुस्वारविशेषणं नुम्ग्रहणम्। नुमो योऽनुस्वारस्तत्र यथा स्यात्, इह मा भूत्—पुंस्विति।

वार्तिकावतरणभाष्यम्- अथवाऽविशेषणोपदेशः कर्तव्यः।

भाष्यम्- किं प्रयोजनम्?

(53. सिद्धान्तवार्त्तिकम्-3)

*** अविशेषेण संयोगोपधासञ्ज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ***

भाष्यम्- अविशेषेण संयोगसञ्ज्ञा प्रयोजनम्। उ३ब्जकः। 'हलोऽनन्तराः संयोगः' इति संयोगसञ्ज्ञा, 'संयोगे गुरु' इति गुरुसञ्ज्ञा, 'गुरोः' इति प्लुतो भवति।

प्रयोजनवार्तिकांशव्याख्याभाष्यम्- उपधासञ्ज्ञा च प्रयोजनम्—दुष्कृतं, निष्कृतं, दुंष्पीतं, निष्पीतम्। 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वं सिद्धं भवति।

प्रयोजननिरासभाष्यम्- नैतदस्ति प्रयोजनम्। न इदुदुपधग्रहणेन विसर्जनीयो विशेष्यते। किं तर्हि? सकारो विशेष्यते—इदुदुपधस्य सकारस्य यो विसर्जनीय इति। अथवोपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः—इदुद्भ्यामुत्तरस्य विर्सजीयस्येति।

प्रयोजनवार्तिकांशव्याख्याभाष्यम्- अलोन्त्यविधिश्च प्रयोजनम्-—वृक्षस्तरस्ति प्लक्ष-स्तरति। 'अलोऽन्त्यस्य' विधयो भवन्तीत्यलोऽन्त्यस्य सत्वं सिद्धं भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्—'निर्दिश्यमानस्यादेशा भवन्ति' इति विर्सजनीयस्यैव भविष्यति।

प्रयोजनवार्तिकांशव्याख्याभाष्यम्- द्विर्वचनं प्रयोजनम्—उर ⨯ कः, उर ⨯ पः। 'अनचि च' अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति।

प्रयोजनवार्तिकांशव्याख्याभाष्यम्- स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्। यथेह भवति—उरःकेण-उरःपेणेति। 'अड्व्यवाय' इति णत्वम्, एवमिहापि स्थानिवद्भावा-त्राप्नोति—व्यूढोरस्केन-महोरस्केनेति। तत्र 'अनल्विधौ' इति प्रतिषेधः सिद्धो भवति।

वर्णार्थवत्ताधिकरणम्

वार्तिकावतरणभाष्यम्- किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः?

(54. अर्थवत्तासाधकप्रथमवार्त्तिकम्-1)

*** अर्थवन्तो वर्णा धातुप्रतिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ***

भाष्यम्- अर्थवन्तो वर्णाः। कुतः? धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थ-दर्शनात्। धातव एकवर्णा अर्थवन्तो दृश्यन्ते—एति, अध्येति, अधीत इति। प्रातिपदि-कान्येकवर्णान्यर्थवन्ति—आभ्याम्, एभिः, एषु। प्रत्यया एकवर्णा अर्थवन्तः—औपगवः, कापटवः। निपाता एकवर्णा अर्थवन्तः—अ-अपेपि, इ-इन्द्रं पश्य, उ-उत्तिष्ठ, अ-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपक्राम। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे—अर्थवन्तो वर्णा इति।

(55. अर्थवत्तासाधकद्वितीयवार्त्तिकम्-2)

*** वर्णव्यत्यये चार्थान्तरगमनात् ***

भाष्यम्- वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहेऽर्थवन्तो वर्णा इति। कूपः सूपो यूप इति। कूप इति सककारेण कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते। यूप इति ककारसकारापाये यकारोपजनेऽर्थान्तरं गम्यते। तेन मन्यामहे—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति।

(56. अर्थवत्तासाधकतृतीयवार्त्तिकम्-3)

*** वर्णानुपलब्धौ चानर्थगतेः ***

भाष्यम्- वर्णानुपलब्धौ चानर्थगतेर्मन्यामहेऽर्थवन्तो वर्णा इति। वृक्ष ऋक्षः, काण्डीर आण्डीरः। वृक्ष इति सवकारेण कश्चिदर्थो गम्यते। ऋक्ष इति वकारापाये सोऽर्थो न गम्यते। काण्डीर इति सककारेण कश्चिदर्थो गम्यते, आण्डीर इति ककारापाये सोऽर्थो न गम्यते।

आक्षेपभाष्यम्- किं तर्ह्युच्यते—'अनर्थगतेः' इति। न साधीयो ह्यत्रार्थस्य गतिर्भवति?

समाधानभाष्यम्- एवं तर्हीदं पठितव्यं स्यात्—'वर्णानुपलब्धौ चातदर्थगतेः' इति। किमिदम्—अतदर्थगतेरिति? तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः, न तदर्थगतिरतदर्थगतिः अतदर्थगतेरिति। अथवा सोऽर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगतिः, न तदर्थगतिरतदर्थगतिः, अतदर्थगतेरिति।

आक्षेपभाष्यम्- स तर्हि तथा निर्देशः कर्तव्यः?

सिद्धान्तभाष्यम्- न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवमतदर्थगतेरनर्थगतेरिति।

(57. अर्थवत्तासाधकचतुर्थवार्तिकम्-4)

*** संघातार्थवत्त्वाच्च ***

भाष्यम्- संघातार्थवत्त्वाच्च मन्यामहेऽर्थवन्तो वर्णा इति । येषां संघाता अर्थवन्तोऽवयवा अपि तेषामर्थवन्तः। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा—एकश्चक्षुष्मान्दर्शने समर्थः, तत्समुदायश्च शतमपि समर्थम्। एकश्च तिलस्तैलदाने समर्थः, तत्समुदायश्च खार्यपि समर्था। येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः। तद्यथा—एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम्। एका च सिकता तैलदानेऽसमर्था, तत्समुदायश्च खारीशतमप्यसमर्थम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थवत्तादूषणभाष्यम्- यदि तर्हीमे वर्णा अर्थवन्तः, अर्थवत्कृतानि प्राप्नुवन्ति। क़ानि? 'अर्थवत्प्रातिपदिकम्' इति प्रातिपदिकसञ्ज्ञा। 'प्रातिपदिकात्' इति स्वाद्युत्पत्तिः, 'सुबन्तं पदम्' इति पदसञ्ज्ञा। तत्र को दोषः? 'पदस्य' इति नलोपादीनि प्राप्नुवन्ति— धनं वनमिति।

(वर्णस्यार्थवत्तायां दोषनिराकरणे भाष्यवार्त्तिकम्)

*** सङ्घातस्यैकार्थ्यात्सुबभावो वर्णात् ***

भाष्यम्- सङ्घातस्यैकत्वमर्थः। तेन वर्णात्सुबुत्पत्तिर्न भविष्यति।

(58. अनर्थकतासाधकप्रथमवार्त्तिकम्-1)

*** अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः ***

भाष्यम्- अनर्थकास्तु वर्णाः। कुतः? प्रतिवर्णमर्थानुपलब्धेः। न हि प्रतिवर्णमर्था उपलभ्यन्ते। किमिदं प्रतिवर्णमिति? वर्णं वर्णं प्रति प्रतिवर्णम्।

(59. अनर्थकत्वसाधकद्वितीयवार्त्तिकम्-2)

*** वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् ***

भाष्यम्- वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे—अनर्थका वर्णा इति। वर्णव्यत्यये—कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्ययः। अपायो लोपः—घ्नन्ति, घ्नन्तु, अघ्नन्। वर्णापायो नार्थापायः। उपजन आगमः— लविता, लवितुम्। वर्णोपजनो नार्थोपजनः। विकार आदेशः—घातयति, घातकः। वर्णविकारो नार्थविकारः। यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम्। न चेह तद्वत्। अतो मन्यामहे—अनर्थका वर्णा इति।

तटस्थाक्षेपभाष्यम्- उभयमिदं वर्णेषूक्तम्—अर्थवन्तोऽनर्थका इति च। किमत्र न्याय्यम्?

समाधानभाष्यम्- उभयमित्याह। कुतः? स्वभावतः। तद्यथा—समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम्? यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोऽन्येऽनर्थका इति। स्वाभाविकमेतत्।

आक्षेपभाष्यम्- कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः—'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनात् वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्च इति?

समाधानभाष्यम्- संघातान्तराण्येवैतान्येवंजातीयकानि अर्थान्तरेषु वर्तन्ते—कूपः सूपः यूप इति। यदि हि वर्णव्यत्ययकृतमर्थान्तरगमनं स्यात्, भूयिष्ठः कूपार्थः स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे, यूपार्थश्च कूपे, यूपार्थश्च सूपे। यतस्तु खलु न किञ्चित्सूपस्य वा यूपे, यूपस्य वा कूपे, कूपस्य वा यूपे, यूपस्य वा सूपे; अतो मन्यामहे—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति। इदं खल्वपि—भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम्। यो हि मन्यते—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति। ऊपशब्दस्त्वस्यानर्थकः स्यात्।

आक्षेपभाष्यम्- तत्रेदमपरिहृतम्—'संघातार्थवत्त्वाच्च' इति।

समाधानभाष्यम्- एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति।

प्रत्याहारेष्विद्ग्रहणाभावाधिकरणम्

सूत्रानुवादभाष्यम्- अइउण्-ऋऌक्-एओङ्-ऐऔच्।

(आक्षेपश्लोकवार्त्तिकम्- 1)

*** प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ***

भाष्यम्- य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति? किं च स्यात्? दधि णकारीयति, मधु णकारीयति 'इको यणचि' इति यणादेशः प्रसज्येत।

(सिद्धान्तसमाधानश्लोकवार्तिकखण्डनम्)

*** आचारात् ***

भाष्यम्- किमिदमाचारादिति? आचार्याणामुपचारात्। नैतेष्वाचार्या अच्कार्याणि कृत-वन्तः।

(सिद्धान्तसमाधानश्लोकवार्तिकखण्डम्)

*** अप्रधानत्वात् ***

भाष्यम्- अप्रधानत्वाच्च। न खल्वप्येतेषामक्षु प्राधान्येनोपदेशः क्रियते। क्व तर्हि? हल्षु। कुत एतत्? एषा ह्याचार्यस्य शैली लक्ष्यते—यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति—अचोऽक्षु हलो हल्षु।

(सिद्धान्तसमाधानश्लोकवार्तिकखण्डम्)

*** लोपश्च बलवत्तरः ***

भाष्यम्- लोपः खल्वपि तावद्भवति।

(सिद्धान्तसमाधानरीत्यन्तरश्लोकवार्त्तिकम्)

*** ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्।**
अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति॥ *

भाष्यम्- अथवा योगविभागः करिष्यते—'ऊकालोऽच्' उ-ऊ-उ३ इत्येवंकालोज्भवति। ततो 'ह्रस्वदीर्घप्लुतः' ह्रस्वदीर्घप्लुतसंज्ञश्च भवति—ऊकालोऽच्।

आक्षेपभाष्यम्- एवमपि 'कुक्कुटः' इत्यत्रापि प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- तस्मात्पूर्वोक्त एव परिहारः।

भाष्यम्- एष एवार्थः।

(श्लोकवार्त्तिकम्)

अपर आह—

*** ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोऽस्तु।**
अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि ॥ *

अन्तःस्थोपदेशाधिकरणम्

आक्षेपभाष्यम्- अथ किमर्थमन्तःस्थानामण्सूपदेशः क्रियते?

समाधानभाष्यम्- इह सँय्यन्ता, सँव्वत्सरः, यँल्लोकं, तँल्लोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम्। तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन ग्रहणात् पूर्वस्यापि परसवर्णो यथा स्यात्।

समाधानबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्—'द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्' इति। यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति।

समाधानसाधकभाष्यम्- परसवर्णे तर्हि कृते तस्य यर्ग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यात्।

समाधानभाष्यम्- मा भूद् द्विर्वचनम्।

समधानसाधकभाष्यम्- ननु च भेदो भवति—सति द्विर्वचने त्रियकारम्, असति द्विर्वचने द्वियकारम्।

समाधानबाधकभाष्यम्- नास्ति भेदः, सत्यपि द्विर्वचने द्वियकारमेव। कथम्? 'हलो यमां यमि लोपः' इत्येवमेकस्य लोपेन भवितव्यम्।

समाधानबाधकभाष्यम्- एवमपि भेदः। सति द्विर्वचने कदाचिद् द्वियकारम्, कदाचित् त्रियकारम्। स एष कथं भेदो न स्यात्? यदि नित्यो लोपः स्यात्। विभाषा स लोपः।

समाधानबाधकैकदेशिभाष्यम्- यथाऽभेदस्तथास्तु।

(समाधानसाधकसिद्धान्तिश्लोकवार्त्तिकम्)

*** अनुवर्तते विभाषा, शरोऽचि यद्वारयत्ययं द्वित्वम् ***

भाष्यम्- यदयं 'शरोऽचि' इति द्विर्वचनप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यः—अनुवर्तते विभाषेति।

जिज्ञासाभाष्यम्- कथं कृत्वा ज्ञापकम्?

(तस्यैव हेतुसूचकमुत्तरार्धम्)

*** नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात् ॥1॥ ***

भाष्यम्- यदि नित्यो लोपः स्यात्, प्रतिषेधवचनमनर्थकं स्यात्। अस्त्वत्र द्विर्वचनम्,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'झरो झरि सवर्णे' इति लोपो भविष्यति। पश्यति त्वाचार्यः—विभाषा स लोप इति, ततो द्विर्वचनप्रतिषेधं शास्ति।

समाधानबाधकभाष्यम्- नैतदस्ति ज्ञापकम्। नित्येऽपि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः। यदेतत्—'अचो रहाभ्याम्' इति द्विवर्चनम्, लोपापवादः स विज्ञायते। कथम्? यर इत्युच्यते। एतावन्तश्च यरः—यदुत झरो वा यमो वा। यदि चात्र लोपः स्याद् द्विर्वचनमर्थकं स्यात्। किं तर्हि तयोर्योगयोरुदाहरणम्? यदकृते द्विर्वचने त्रिव्यञ्जनः संयोगः—प्रत्तम्, अवत्तम्, आदित्यः। इहेदानीं कर्त्ता-हर्त्तेति द्विर्वचनसामर्थ्याल्लोपो न भवति। एवमिहापि लोपो न स्यात्कर्षति-वर्षतीति। तस्मान्नित्येऽपि लोपेऽवश्यं स प्रतिषेधो वक्तव्यः।

उपसंहारभाष्यम्- तवेतदत्यन्तं सन्दिग्धं वर्त्तते—आचार्याणां विभाषानुवर्त्तते न वेति।

(शिवसूत्रम्)

लण् - 6

व्याख्यानत इति परिभाषाधिकरणम्

आक्षेपभाष्यम्- अयं णकारो द्विरनुबध्यते—पूर्वश्चैव परश्च। तत्राण्ग्रहणेष्विण्ग्रहणेषु च सन्देहो भवति—पूर्वेण वा स्युः परेण वेति।

प्रत्याक्षेपभाष्यम्- कतमस्मिंस्तावदण्ग्रहणे सन्देहः?

सन्देहोदाहरणभाष्यम्- 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति।

(सिद्धान्तिनः समाधानश्लोकवार्त्तिकम्)

* असन्दिग्धम् *

भाष्यम्- पूर्वेण, न परेण।

हेत्वाक्षेपभाष्यम्- कुत एतत्?

(सिद्धान्त्येकदेशिहेतुश्लोकवार्त्तिकम्)

* पराभावात् *

भाष्यम्- न हि ढ्रलोपे परेऽणः सन्ति।

हेतुनिरासभाष्यम्- ननु चायमस्ति—आतृढः, आवृढः इति।

सिद्धान्तिसमाधानभाष्यम्- एवं तर्हि—सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्, 'ढ्रलोपे पूर्वस्य दीर्घोऽचः' इत्येव ब्रूयात्। अथवा एतदपि न ब्रूयात्। अचो ह्येतद्भवति—ह्रस्वः-दीर्घः-प्लुत इति।

द्वितीयं सन्देहोदाहरणभाष्यम्- अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः—'केऽणः' इति।

समाधानभाष्यम्- असन्दिग्धं पूर्वेण, न परेण। कुत एतत्? पराभावात्। न हि कपरेऽणः सन्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुनिरासभाष्यम्- ननु चायमस्ति—गोका, नौकेति।

सिद्धान्तिभाष्यम्- एवं तर्हि—सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यादण् ग्रहणनमर्थकं स्यात्, 'केऽचः' इत्येव ब्रूयात्। अथवा एतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति।

तृतीयं सन्देहोदाहरणभाष्यम्- अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः—'अणोऽप्रगृह्यस्यानुनासिकः' इति।

समाधानभाष्यम्- असन्दिग्धं पूर्वेण, न परेण। कुत एतत्? पराभावात्। न हि पदान्ताः परेऽणः सन्ति।

हेतुनिरासभाष्यम्- ननु चायमस्ति—कर्तृ हर्तृ।

सिद्धान्तिभाष्यम्- एवं तर्हि—सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यात्, अण्ग्रहणमनर्थकं स्यात्। 'अचोऽप्रगृह्यस्यानुनासिकः' इत्येव ब्रूयात्। अथवा एतदपि न ब्रूयात्, अच एव हि प्रगृह्या भवन्ति।

चतुर्थसन्देहभाष्यम्- अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः—'उरण् रपरः' इति।

समाधानभाष्यम्- असन्दिग्धं पूर्वेण, न परेण। कुत एतत्? पराभावात्। न ह्युः स्थाने परेऽणः सन्ति।

हेतुनिरासभाष्यम्- ननु चायमस्ति—कर्त्रर्थं हर्त्रर्थमिति।

आपत्तिप्रश्नभाष्यम्- किं च स्यात्—यद्यत्र रपरत्वं स्यात्?

आपत्तिदर्शनभाष्यम्- द्वयो रेफयोः श्रवणं प्रसज्येत।

आपत्तिबाधकभाष्यम्- 'हलो यमां यमि लोपः' इत्येवमेकस्यात्र लोपो भविष्यतीति।

आपत्तिसाधकभाष्यम्- विभाषा स लोपः, विभाषाश्रवणं प्रसज्येत।

आपत्तिबाधकभाष्यम्- अयं तर्हि नित्यो लोपः—'रो रि' इति।

आपत्तिसाधकभाष्यम्- 'पदान्तस्य' इत्येव सः।

आपत्तिबाधकभाष्यम्- न शक्यः सः 'पदान्तस्य' इत्येव विज्ञातुम्। इह हि लोपो न स्यात्—जर्गृधेर्लङ् अजर्घाः इति।

आपत्तिसाधकभाष्यम्- इह तर्हि—मातॄणां पितॄणामिति रपरत्वं प्रसज्येत।

आपत्तिबाधकभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—नात्र रपरत्वं भवतीति। यदयम् 'ॠत इद्धातोः' इति धातुग्रहणं करोति। कथं कृत्वा ज्ञापकम्? धातुग्रहणस्यैतत्प्रयोजनम्—इह मा भूत्—मातॄणां पितॄणामिति। यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात्। रपरत्वे कृतेऽनन्यत्वादित्त्वं न भविष्यति। पश्यति त्वाचार्यः—नात्र रपरत्वं भवतीति। ततो धातुग्रहणं करोति।

आपत्तिसाधकभाष्यम्- इहापि तर्हि न प्राप्नोति—चिकीर्षति, जिहीर्षतीति।

आपत्तिबाधकभाष्यम्- मा भूदेवम्। 'उपाधायाश्च' इत्येवं भविष्यति।

आपत्तिसाधकभाष्यम्- इहापि तर्हि प्राप्नोति—मातॄणां पितॄणामिति। तस्मात्तत्र धातुग्रहणं कर्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तिसमाधानभाष्यम्- एवं तर्हि—सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यात्, अण्ग्रहणमनर्थकं स्यात् 'उरञ्रपर:' इत्येव ब्रूयात्।

पञ्चमसन्देहभाष्यम्- अस्मिंस्तर्ह्यण्ग्रहणे सन्देह:—'अणुदित्सवर्णस्य चाप्रत्यय:' इति।

समाधानभाष्यम्- असन्दिग्धं परेण, न पूर्वेण।

हेत्वाक्षेपभाष्यम्- कुत एतत्?

(सिद्धान्तश्लोकवार्त्तिकम्)

* सवर्णेऽण् तपरं ह्युरृत् *

भाष्यम्- यदयम्—'उरृत्' इत्यृकारे तपरकरणं करोति, तज्ज्ञापयत्याचार्य:—परेण, न पूर्वेणेति।

आक्षेपभाष्यम्- इण्ग्रहणेषु तर्हि सन्देह:।

समाधानभाष्यम्- असन्दिग्धम्—परेण, न पूर्वेण।

हेतुजिज्ञासाभाष्यम्- कुत एतत्?

(सिद्धान्तिहेतुश्लोकवार्त्तिकम्)

* य्वोरन्यत्र परेणेण् स्यात् *

भाष्यम्- यत्रेच्छति पूर्वेण, सम्मृद्य ग्रहणं तत्र करोति—य्वोरिति। तच्च गुरु भवति। कथं कृत्वा ज्ञापकम्? तत्र विभक्तिनिर्देशे सम्मृद्यग्रहणे चार्धचतस्रो मात्रा:, प्रत्याहारग्रहणे पुनस्तिस्रो मात्रा:। सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्य:—परेण, न पूर्वेणेति।

आक्षेपभाष्यम्- किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते?

समाधानभाष्यम्- एतज्ज्ञापत्यत्याचार्य:—भवत्येषा परिभाषा—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। अणुदित्सवर्णं परिहाय पूर्वेणाण्ग्रहणम्, परेणेण्ग्रहणम् इति व्याख्यास्याम:।

(शिवसूत्रे)

ञमङणनम्-7

झभञ्-8

सूत्रैक्यसाधनाधिकरणम्

आक्षेपभाष्यम्- किमर्थमिमौ मुखनासिकावचनौ वर्णावुभावनुबध्येते, न ञकार एवानुबध्येत?

प्रत्याक्षेपभाष्यम्- कथं यानि मकारेण ग्रहणानि—'हलो यमां यमि लोप:' इति?

प्रत्याक्षेपसमाधानभाष्यम्- सन्तु ञकारेण, 'हलो यञां यञि लोप:' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इष्टापत्तिबाधकभाष्यम्- नैवं शक्यम्। झकारभकारयोरपि झकारभकारयोर्लोपः प्रसज्येत।

इष्टापत्तिसाधकभाष्यम्- न झकारभकारौ झकारभकारयोः स्तः।

द्वितीयाक्षेपभाष्यम्- कथं 'पुमः खय्यम्परे' इति?

इष्टापत्तिभाष्यम्- एतदप्यस्तु ञकारेण—'पुमः खय्यञ्परे' इति।

इष्टापत्तिबाधकभाष्यम्- नैवं शक्यम्। झकारभकारपरेऽपि हि खयि रुः प्रसज्येत।

इष्टापत्तिसाधकभाष्यम्- न झकारभकारपरः खयस्ति।

तृतीयाक्षेपभाष्यम्- कथं 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति।

इष्टापत्तिभाष्यम्- एतदप्यस्तु ञकारेण—'ङञो ह्रस्वादचि ङञुण्नित्यम्' इति।

इष्टापत्तिबाधकभाष्यम्- नैवं शक्यम्। झकारभकारयोरपि पदान्तयोर्झकारभकारावागमौ स्याताम्।

इष्टापत्तिसाधकभाष्यम्- न झकारभकारौ पदान्तौ स्तः।

इष्टापत्तिबाधकैकदेशिभाष्यम्- एवमपि पञ्चागमास्त्रय आगमिनः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति।

इष्टापत्तिसाधकैकदेशिभाष्यम्- सन्तु तावद्येषामागमानामागमिनः सन्ति। झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः।

अक्षरसमाम्नायाधिकरणं तत्राक्षरनिर्वचनम्

वार्तिकावतरणभाष्यम्- अथ किमिदमक्षरमिति?

(सिद्धान्तश्लोकवार्त्तिकम्)

*** अक्षरं न क्षरं विद्यात् ***

भाष्यम्- न क्षीयते, न क्षरतीति वाऽक्षरम्।

(सिद्धान्तश्लोकवार्त्तिकम्)

*** अश्नोतेर्वा सरोऽक्षरम् ***

भाष्यम्- अश्नोतेर्वा पुनरयमौणादिकः सरन् प्रत्ययः। अश्नुते इत्यक्षरम्।

(सिद्धान्तान्तरश्लोकवार्त्तिकम्)

*** वर्णं वाऽऽहुः पूर्वसूत्रे ***

भाष्यम्- अथवा पूर्वसूत्रे वर्णस्याक्षरमिति सञ्ज्ञा क्रियते।

(वर्णोपदेशप्रयोजनप्रश्ने श्लोकवार्तिकम्)

*** किमर्थमुपदिश्यते ***

भाष्यम्- अथ किमर्थमुपदेशः क्रियते?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(समाधाने श्लोकवार्त्तिकम्)

*** वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।**
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥ *

भाष्यम्- सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्
(इति माहेश्वरीयं विधिशेषप्रकरणम्)

●

प्रथमेऽध्याये प्रथमे पादे तृतीयमाह्निकम्

पाणिनीयं विधिशेषप्रकरणम्

(1. **विधिसञ्ज्ञासूत्रम्**- 1.1.3. आ., 1)

वृद्धिरादैच् 1.1.1

सूत्रस्वरूपसाधनाधिकरणम्

आक्षेपभाष्यम्- कुत्वं कस्मान्न भवति 'चो कुः' पदस्य—इति।

समाधानभाष्यम्- भत्वात्।

आक्षेपभाष्यम्- कथं भसञ्ज्ञा?

समाधानभाष्यम्- 'अयस्मयादीनि च्छन्दसि' इति।

समाधानबाधकभाष्यम्- छन्दसीत्युच्यते, न चेदं छन्दः।

समाधानसाधिका भाष्येष्टिः- छन्दोवत्सूत्राणि भवन्ति।

आक्षेपभाष्यम्- यदि भसञ्ज्ञा, 'वृद्धिरादैजदेङ् गुणः' इति जश्त्वमपि न प्राप्नोति।

समाधानभाष्यम्- उभयसञ्ज्ञान्यपि छन्दांसि दृश्यन्ते। तद्यथा—'स सुष्टुभा स ऋक्वता गणेन'। पदत्वात्कुत्वम्, भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वाज्जश्त्वम्, भत्वात्कुत्वं न भविष्यति।

तद्भावितपक्षनिराकरणाधिकरणम्

उभयपक्षस्वरूप-तद्भावितपक्षदूषणभाष्यम्- किं पुनरिदं तद्भावितग्रहणम्—वृद्धि-रित्येवं ये आकारैकारौकारा भाव्यन्ते, तेषां ग्रहणम्, आहोस्विदादैज्मात्रस्य? किं चातः? यदि तद्भावितग्रहणम्, 'शालीयः-मालीयः' इति वृद्धलक्षणश्छो न प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आम्रमयम्-शालमयम्, वृद्धिलक्षणो मयण्न प्राप्नोति। आम्रगुप्तायनिः-शालगुप्तायानिः, वृद्धिलक्षणः फिञ् न प्राप्नोति।

द्वितीयपक्षे दूषणभाष्यम्- अथादैज्मात्रस्य ग्रहणम्, सर्वो भासः सर्वभास इति 'उत्तरपदवृद्धौ सर्वं च' इत्येष विधिः प्राप्नोति। इह तावती भार्या यस्य तावद्भार्यः-यावद्भार्यः 'वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधः प्राप्नोति।

सिद्धान्तभाष्यम्- अस्तु तर्हि—आदैज्मात्रस्य ग्रहणम्।

आक्षेपानुवादभाष्यम्- ननु चोक्तं—सर्वो भासः सर्वभास इति 'उत्तरपदवृद्धौ सर्वं च' इत्येष विधिः प्राप्नोतीति।

समाधानभाष्यम्- नैष दोषः। नैवं विज्ञायते—उत्तरपदस्य वृद्धिः उत्तरपदवृद्धिः, उत्तरपदवृद्धाविति। कथं तर्हि? 'उत्तरपदस्य' इत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपदे—इत्येवमेतद्विज्ञायते। अवश्यं चैतदेवं विज्ञेयम्। तद्भावितग्रहणे सत्यपीह प्रसज्येत—सर्वः कारकः सर्वकारक इति।

द्वितीयदूषणनिराकरणभाष्यम्- यदप्युच्यते—इह तावती भार्या यस्य तावद्भार्यः, यावद्भार्य इति 'वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधः प्राप्नोतीति। नैष दोषः। नैवं विज्ञायते—वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति। कथं तर्हि? वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तस्येति। किं च वृद्धेर्निमित्तम्? योऽसौ ककारो णकारो ञकारो वा। अथवा यः कृत्स्नाया वृद्धेर्निमित्तं तद्वृद्धिनिमित्तम्? कश्च कृत्स्नाया वृद्धेर्निमित्तम्? यस्त्रयाणामाकारैकारौकाराणाम्।

सञ्ज्ञासूत्रत्वसाधनाधिकरणम्

(60. आक्षेपवार्तिकम्- 1)

* सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थः *

भाष्यम्- 'अथ सञ्ज्ञा' इत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः। किं प्रयोजनम्? सञ्ज्ञासम्प्रत्ययार्थः। वृद्ध्यादीनां शब्दानां 'सञ्ज्ञा' इत्येष सम्प्रत्ययो यथा स्यात्।

(61. आक्षेपसाधकवार्तिकम्- 2)

* इतरथा ह्यसम्प्रत्ययो यथा लोके *

भाष्यम्- अक्रियमाणे हि सञ्ज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष सम्प्रत्ययो न स्यात्। इदमिदानीं बहुसूत्रमनर्थकं स्यात्। अनर्थकमित्याह। कथम्? 'यथा लोके'। लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवन्ति तावत्—'देवदत्त गामभ्याज शुक्लां दण्डेन' 'देवदत्त गामभ्याज कृष्णाम्' इति। अनर्थकानि—'दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः। अधोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीनः' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(62. आक्षेपान्तरवार्त्तिकम्-3)

*** सञ्ज्ञासञ्ज्यसन्देहश्च ***

भाष्यम्- क्रियमाणेऽपि सञ्ज्ञाधिकारे सञ्ज्ञासञ्ज्ञिनोरसन्देहो वक्तव्यः। कुतो ह्येतत्—वृद्धिशब्दः सञ्ज्ञा, आदैचः संज्ञिन इति। न पुनरादैचः सञ्ज्ञा, वृद्धिशब्दः सञ्ज्ञीति?

प्रथमाक्षेपानुवादभाष्यम्- यत्तावदुच्चयते—सञ्ज्ञाधिकारः कर्तव्यः सञ्ज्ञासम्प्रत्ययार्थः इति। न कर्तव्यः।

(63. सिद्धान्तवार्तिकम्-4)

*** आचार्याचारात्सञ्ज्ञासिद्धिः ***

भाष्यम्- आचार्याचारात्सञ्ज्ञासिद्धिर्भविष्यति। किमिदम्—आचार्याचारादिति? आचार्याणामुपचारात्।

(64. सिद्धान्तिवार्तिकम्-5)

*** यथा लौकिकवैदिकेषु ***

भाष्यम्- तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते—देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति। वेदे याज्ञिकाः सञ्ज्ञां कुर्वन्ति—स्फ्यो यूपश्चषाल इति। तत्रभवतामुपचारादन्येऽपि जानन्ति—इयमस्य सञ्ज्ञेति।

दार्ष्टान्तिकभाष्यम्- एवमिहापि। इहैव तावत्केचिद्व्याचक्षणा आहुः—वृद्धिशब्दः सञ्ज्ञा, आदैचः सञ्ज्ञिन इति। अपरे पुनः 'सिचि वृद्धिः' इत्युक्त्वाऽऽकारैकारौकारानुदाहरन्ति। तेन मन्यामहे—यया प्रत्याय्यन्ते सा सञ्ज्ञा, ये प्रतीयन्ते ते सञ्ज्ञिन इति।

आक्षेपान्तरानुवादभाष्यम्- यदप्युच्यते—'क्रियमाणेऽपि सञ्ज्ञाधिकारे सञ्ज्ञासञ्ज्ञिनोरसन्देहो वक्तव्यः' इति।

(65. सिद्धान्तवार्त्तिकम्-6)

*** सञ्ज्ञासञ्ज्यसन्देहश्च ***

भाष्यम्- सञ्ज्ञासञ्ज्ञिनोश्चासन्देहः सिद्धः। कुतः? आचार्याचारादेव। उक्त आचार्याचारः।

(66. सिद्धान्तहेतुवार्तिकम्-7)

*** अनाकृतिः ***

भाष्यम्- अथवा—अनाकृतिः सञ्ज्ञा, आकृतिमन्तः सञ्ज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति सञ्ज्ञा क्रियते।

(67. सिद्धान्तहेतुवार्तिकम्-8)

*** लिङ्गेन वा ***

भाष्यम्- अथवा—किञ्चिल्लिङ्गमासज्य वक्ष्यामि—इत्थंलिङ्गा सञ्ज्ञेति। वृद्धिशब्दे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च तल्लिङ्गं करिष्यते नादैच्छब्दे।

आक्षेपभाष्यम्- इदं तावदयुक्तम्। यत्तावदुच्यते—आचार्याचारादिति। किमत्रायुक्तम्? तमेवोपालभ्य—'अगमकं ते सूत्रम्' इति, तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तम्। अपरितुष्यन् खल्वपि भवाननेन परिहारेण 'अनाकृतिर्लिङ्गेन वा' इत्याह।

तृतीयहेतौ गौरवाक्षेपभाष्यम्- तच्चापि वक्तव्यम्।

तृतीयहेतुस्वीकारे लाघवप्रदर्शकभाष्यम्- यद्यप्येतदुच्यते। अथवैतर्हि इत्सञ्ज्ञा न वक्तव्या, लोपश्च न वक्तव्यः। सञ्ज्ञालिङ्गमनुबन्धेषु करिष्यते। न च सञ्ज्ञाया निवृत्तिरुच्यते, स्वभावतः सञ्ज्ञा सञ्ज्ञिनं प्रत्याय्य स्वयं निवर्तन्ते। तेनानुबन्धानामपि निवृत्तिर्भविष्यति।

आक्षेपभाष्यम्- सिद्ध्यत्येवम्। अपाणिनीयं तु भवति।

सिद्धान्तिभाष्यम्- यथान्यासमेवास्तु।

आक्षेपानुवादभाष्यम्- ननु चोक्तम्—'सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थ इतरथा ह्यसम्प्रत्ययो यथा लोके' इति।

अनर्थकत्वनिराकरणेन समाधानभाष्यम्- न यथा लोके, तथा व्याकरणे। प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण। किमतो यदशक्यम्? अतः सञ्ज्ञासञ्ज्ञिनावेव।

सञ्ज्ञेतरार्थाक्षेपभाष्यम्- कुतो नु खल्वेतत्—सञ्ज्ञासञ्ज्ञिनावेवेति। न पुनः साध्वनुशासनेऽस्मिन् शास्त्रे साधुत्वमनेन क्रियते?

आक्षेपनिराकरणभाष्यम्- कृतमनयोः साधुत्वम्। कथम्? वृधिरस्मायविशेषेणोपदिष्टः प्रकृतिपाठे, तस्मात् क्तिन्प्रत्ययः। आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः।

आक्षेपभाष्यम्- प्रयोगनियमार्थं तर्हीदं स्यात्—वृद्धिशब्दात्परे आदैचः प्रयोक्तव्या इति।

आक्षेपनिराकरणभाष्यम्- नेह प्रयोगनियम आरभ्यते। किं तर्हि? संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसम्बन्धो भवति। तद्यथा—आहर पात्रम्, पात्रमाहरेति।

आक्षेपभाष्यम्- आदेशास्तर्हीमे स्युर्वृद्धिशब्दस्यादैचः।

आक्षेपनिराकरणभाष्यम्- षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः।

आक्षेपभाष्यम्- आगमास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आगमाः।

आक्षेपनिरासभाष्यम्- आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते, लिङ्गेन च। न चात्र षष्ठीं, न खल्वप्यागमलिङ्गं पश्यामः।

सिद्धान्तिसमाधानभाष्यम्- इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वञ्च। द्वयोश्चैतद्भवति। कयोः? विशेषणविशेष्ययोर्वा सञ्ज्ञासंज्ञिनोर्वा। तत्रैतत्स्यात्—विशेषणविशेष्ये इति। तच्च न, द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति। न चादैच्छब्दः प्रतीतपदार्थकः। तस्मासञ्ज्ञासंज्ञिनावेव।

सिद्धान्तभाष्यम्- तत्र त्वेतावान्सन्देहः—कः सञ्ज्ञी का संज्ञेति। स चापि क्व

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहः ? यत्रोभे समानाक्षरे। यत्र त्वन्यतरल्लघु सा सञ्ज्ञा, यद्गुरु स सञ्ज्ञी। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति। किं तर्हि? अनाकृतितामपि। अनाकृतिः सञ्ज्ञा, आकृतिमन्तः संज्ञिनः। लोके ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति सञ्ज्ञा क्रियते।

समाधानान्तरभाष्यम्- अथवा—आवर्तिन्यः सञ्ज्ञा भवन्ति। वृद्धिशब्दश्चावर्तते, नादैच्छब्दः। तद्यथा—इतरत्रापि देवदत्तशब्द आवर्तते, न मांसपिण्डः।

अथवा—पूर्वोच्चारितः सञ्ज्ञी, परोच्चारिता सञ्ज्ञा। कुत एतत्? सतो हि कार्यिणः कार्येण भवितव्यम्? तद्यथा—इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति सञ्ज्ञा क्रियते।

आक्षेपभाष्यम्- कथं 'वृद्धिरादैच्' इति?

समाधानभाष्यम्- एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च। अध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः सञ्ज्ञी, परोच्चारिता सञ्ज्ञा। 'अदेङ् गुणः' इति यथा।

सिद्धान्तिभाष्यम्- दोषवान्खल्वपि सञ्ज्ञाधिकारः। अष्टमेऽपि हि सञ्ज्ञा क्रियते— 'तस्य परमाम्रेडितम्' इति। तत्रापीदमनुवर्त्यं स्यात्।

समाधानान्तरभाष्यम्- अथवा—अस्थानेऽयं यत्नः क्रियते। न हीदं लोकाद्भिद्यते। यदीदं लोकाद्भिद्येत ततो यत्नार्हं स्यात्। तद्यथा—अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति—अयं गौरिति। न चास्मायाचष्टे 'इयमस्य सञ्ज्ञा' इति। भवति चास्य सम्प्रत्ययः।

आक्षेपभाष्यम्- तत्रैतत्स्यात्—'कृतस्तत्र पूर्वैरभिसम्बन्धः' इति।

समाधानभाष्यम्- इहापि कृतः पूर्वैरभिसम्बन्धः। कैः? आचार्यैः।

आक्षेपभाष्यम्- तत्रैतत्स्यात्—यस्मै तर्हि सम्प्रत्युपदिशति तस्याकृत इति।

समाधानभाष्यम्- लोकेऽपि हि यस्मै सम्प्रत्युपदिशति तस्याकृतः। अथ तत्र कृतः, इहापि कृतो द्रष्टव्यः।

अन्योन्याश्रयपरिहाराधिकरणम्

(68. सञ्ज्ञासञ्ज्ञिभावाक्षेपवार्त्तिकम्-1)

* सतो वृद्ध्यादिषु सञ्ज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः *

भाष्यम्- सतः संज्ञिनः सञ्ज्ञाभावात् तदाश्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता? सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तद्यथा—नौर्नावि बद्धा नेतरेतरत्राणाय भवति।

इतरेतराश्रयिदृष्टान्तभाष्यम्- ननु च भोः—इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यथा—नौः शकटं वहति, शकटं च नावं वहति।

दृष्टान्तनिरासभाष्यम्- अन्यदपि तत्र किञ्चिद्भवति—जलं स्थलं वा। स्थले शकटं नावं वहति। जले नौः शकटं वहति।

इतरेतराश्रयिदृष्टान्तान्तरभाष्यम्- यथा तर्हि त्रिविष्टब्धकम्।

दृष्टान्तान्तरनिराकरणभाष्यम्- तत्राप्यन्ततः सूत्रकं भवति।

आक्षेपोपसंहारभाष्यम्- इदं पुनरितरेतराश्रयमेव।

(69. अन्योन्याश्रयवारकसिद्धान्तिवार्त्तिकम्-2)

* सिद्धं तु नित्यशब्दत्वात् *

भाष्यम्- सिद्धमेतत्। कथम्? नित्यशब्दत्वात्। नित्याः शब्दाः, नित्येषु शब्देषु सतामादैचां सञ्ज्ञा क्रियते, न च सञ्ज्ञया आदैचो भाव्यन्ते।

आक्षेपभाष्यम्- यदि तर्हि नित्याः शब्दाः, किमर्थं शास्त्रम्?

(आक्षेपवारकं भाष्यवार्त्तिकम्)

* किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् *

भाष्यम्- निवर्तकं शास्त्रम्। कथम्? मृजिरस्मायविशेषेणोपदिष्टः। तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता। तत्रानेन निवृत्तिः क्रियते—मृजेरक्ङित्सु प्रत्ययेषु मृजेः प्रसङ्गे मार्जिः साधुर्भवतीति।

समुदितसञ्ज्ञानिराकरणाधिकरणम्

वार्तिकावतरण आक्षेपभाष्यम्- प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम्। किं प्रयोजनम्? समुदाये मा भूतामिति।

(70. आक्षेपवारकसिद्धान्तिवार्त्तिकम्-3)

* अन्यत्र सहवचनात्समुदाये सञ्ज्ञाप्रसङ्गः *

भाष्यम्- अन्यत्र सहवचनात्समुदाये वृद्धिगुणसञ्ज्ञयोरप्रसङ्गः। यत्रेच्छति सहभूतानां कार्यं, करोति तत्र सहग्रहणम्। तद्यथा—'सह सुपा' 'उभे अभ्यस्तं, सह' इति।

(71. आक्षेपवारकसिद्धान्तिवार्त्तिकम्-4)

* प्रत्यवयवं च वाक्यपरिसमाप्तेः *

भाष्यम्- प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा—देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते।

आक्षेपभाष्यम्- ननु चायमप्यस्ति दृष्टान्तः—'समुदाये वाक्यपरिसमाप्तिः' इति। तद्यथा—'गर्गाः शतं दण्ड्यन्ताम्' इति। अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति।

समाधानभाष्यम्- सत्येतस्मिन्दृष्टान्ते यदि तत्र सहग्रहणं क्रियते, इहापि प्रत्येकमिति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्तव्यम्। अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति, इहापि नार्थः प्रत्येकमिति वचनेन।

तपरग्राह्यनिराकरणीयाधिकरणम्

आक्षेपभाष्यम्- अथ किमर्थमाकारस्तपरः क्रियते?

(73. सिद्धान्तसमाधानवार्त्तिकम्- 1)

*** आकारस्य तपरकरणं सवर्णार्थम् ***

भाष्यम्- आकारस्य तपरकरणं क्रियते। किं प्रयोजनम्? सवर्णार्थम्। 'तपरस्तत्कालस्य' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। केषाम्? उदात्तानुदात्तस्वरितानाम्।

कारणजिज्ञासाभाष्यम्- किं च कारणं न स्यात्?

(कारणप्रदर्शकैकदेशिवार्त्तिकम्)

*** भेदकत्वात्स्वरस्य ***

भाष्यम्- भेदका उदात्तादयः। कथं पुनर्ज्ञायते—भेदका उदात्तादय इति? एवं हि दृश्यते लोके—य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति अन्यत्त्वं करोषीति। अस्ति प्रयोजनमेतत्। किं तर्हि? इति—

कारणप्रदर्शकन्यासान्तरभाष्यम्- 'भेदकत्वाद्गुणस्येति वक्तव्यम्'। किं प्रयोजनम्? आनुनासिक्यं नाम गुणः, तद्भिन्नस्यापि ग्रहणं यथा स्यात्। किं च कारणं न स्यात्? भेदकत्वाद्गुणस्य। भेदका गुणाः। कथं पुनर्ज्ञायते—भेदका गुणा इति? एवं हि दृश्यते लोके—एकोऽयमात्मा उदकं नाम, तस्य गुणभेदादन्यत्वं भवति—अन्यदिदं शीतम्, अन्यदिदमुष्णमिति।

अभेदकत्वाक्षेपसिद्धान्तिभाष्यम्- ननु च भोः—अभेदका अपि गुणा दृश्यन्ते। तद्यथा—देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति। तथा—बालो युवा वृद्धः, वत्सो दम्यो बलीवर्द इति।

आक्षेपभाष्यम्- उभयमिदं गुणेषूक्तम्—भेदकाः, अभेदका इति। किं पुनरत्र न्याय्यम्?

सिद्धान्तसमाधानभाष्यम्- अभेदका गुणा इत्येव न्याय्यम्। कुत एतत्? यदयम्—'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्युदात्तग्रहणं करोति। यदि भेदका गुणाः स्युः, उदात्त-मेवोच्चारयेत्।

आक्षेपभाष्यम्- यदि तर्ह्यभेदका गुणाः, अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति।

समाधानभाष्यम्- नैष दोषः। आश्रीयमाणो गुणो भेदको भवति। तद्यथा— 'शुक्ल-मालभेत' 'कृष्णमालभेत'। तत्र यः शुक्ल आलब्धव्ये कृष्णमालभते, न हि तेन यथोक्तं कृतं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदेशिसमाधानभाष्यम्- असन्देहार्थस्तर्हि तकारः। ऐजित्युच्यमाने सन्देहः स्यात्—किमिमावैचावेव, आहोस्विदाकारोऽप्यत्र निर्दिश्यते?

समाधानबाधकभाष्यम्- सन्देहमात्रमेतद्भवति। सर्वसन्देहेषु चेदमुपतिष्ठते—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। त्रयाणां ग्रहणमिति व्याख्यास्यामः। अन्यत्रापि ह्ययमेवंजातीयकेषु सन्देहेषु न कञ्चिद्यत्नं करोति। तद्यथा—'औतोम्शसोः' इति।

सिद्धान्तिसमाधानभाष्यम्- इदं तर्हि प्रयोजनम्—आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकम्, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति।

आक्षेपभाष्यम्- अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति?

समाधानभाष्यम्- 'तपरस्तत्कालस्य' इति नियमात्।

समाधानबाधकभाष्यम्- ननु तः परो यस्मात्सोऽयं तपरः।

समाधानसाधकभाष्यम्- नेत्याह। तादपि परस्तपरः।

इष्टानुपपत्तिसाधकभाष्यम्- यदि तादपि परस्तपरः 'ऋदोरप्' इतीहैव स्यात्—यवः स्तवः, लवः पव इत्यत्र न स्यात्।

अनुपपत्तिबाधकभाष्यम्- नैष तकारः। कस्तर्हि? दकारः।

आक्षेपभाष्यम्- किं दकारे प्रयोजनम्?

प्रतिबन्द्या समाधानभाष्यम्- अथ किं तकारे? यद्यसन्देहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपि। वृद्धिरादैच्।

(2. इक्परिभाषासूत्रम् 1.1.3 आ. 2)

इको गुणवृद्धी 1.1.3

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- इग्ग्रहणं किमर्थम्?

(74. समाधानवार्त्तिकम्-1)

* इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम् *

भाष्यम्- इग्ग्रहणं क्रियते। किं प्रयोजनम्? आकारनिवृत्त्यर्थं सन्ध्यक्षरनिवृत्त्यर्थं व्यञ्जननिवृत्त्यर्थञ्च।

प्रथमप्रयोजनोपपादनभाष्यम्- आकारनिवृत्त्यर्थं तावत्—याता, वाता। आकारस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति।

द्वितीयप्रयोजनोपपादनभाष्यम्- सन्ध्यक्षरनिवृत्त्यर्थम्—ग्लायति, म्लायति। सन्ध्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षरस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति।

तृतीयप्रयोजनोपपादनभाष्यम्- व्यञ्जननिवृत्त्यर्थम्—उम्भिता, उम्भितुम्, उम्भितव्यम्। व्यञ्जनस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति।

प्रथमप्रयोजननिराकरणभाष्यम्- आकारनिवृत्त्यर्थेन तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति—नाकारस्य गुणो भवतीति। यदयम् 'आतोऽनुपसर्गे कः' इति ककारमनुबन्धं करोति। कथं कृत्वा ज्ञापकम्? कित्करण एतत्प्रयोजनम्—कितीत्याकारलोपो यथा स्यात्। यदि चाकारस्य गुणः स्यात्, कित्करणमनर्थकं स्यात्। गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात्—गोदः कम्बलद इति। पश्यति त्वाचार्यः—नाकारस्य गुणो भवतीति, ततः ककारमनुबन्धं करोति।

द्वितीयप्रयोजननिराकरणभाष्यम्- सन्ध्यक्षरनिवृत्त्यर्थेनापि नार्थः। उपदेशसामर्थ्यात् सन्ध्यक्षरस्य गुणो न भवति।

तृतीयप्रयोजननिराकरणभाष्यम्- व्यञ्जननिवृत्त्यर्थेनापि नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति—न व्यञ्जनस्य गुणो भवतीति। यदयं जनेर्डं शास्ति। कथं कृत्वा ज्ञापकम्? डित्करण एतत्प्रयोजनम्—डितीति टिलोपो यथा स्यात्। यदि व्यञ्जनस्य गुणः स्यात्, डित्करणमनर्थकं स्यात्। गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यात्—उपसरजो मन्दुरज इति। पश्यति त्वाचार्यः—न व्यञ्जनस्य गुणो भवतीति। ततो जनेर्डं शास्ति।

प्रथमप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्- नैतानि सन्ति ज्ञापकानि। यत्तावदुच्यते—कित्करणं ज्ञापकं आकारस्य गुणो न भवतीति। उत्तरार्थमेतत्स्यात्—'तुन्दशोकयोः परिमृजापनुदोः' इति।

प्रथमप्रयोजनबाधकज्ञापकान्तरभाष्यम्- यत्तर्हि 'गापोष्टक्' इत्यनन्यार्थं ककारमनुबन्धं करोति।

द्वितीयप्रयोजनबाधकसामर्थ्यदूषकभाष्यम्- यदप्युच्यते—उपदेशसामर्थ्यात् सन्ध्यक्षरस्य गुणो न भवतीति। यदि—यद्यत्सन्ध्यक्षरस्य प्राप्नोति, तत्तदुपदेशसामर्थ्याद्बाध्यते, आयादयोऽपि तर्हि न प्राप्नुवन्ति।

सामर्थ्यदूषणनिराकरणभाष्यम्- नैष दोषः। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। गुणं च प्रत्युपदेशोऽनर्थकः, आयादीनां पुनर्निमित्तमेव।

तृतीयप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्- यदप्युच्यते—जनेर्डवचनं ज्ञापकम्; न व्यञ्जनस्य गुणो भवतीति। सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति। न च जनेर्गुणेन सिद्ध्यति। कुतो ह्येतत्—जनेर्गुण उच्यमानोऽकारो भवति, न पुनरेकारो वा स्यादोकारो वेति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञापकसाधकभाष्यम्- आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिकोऽकारो भविष्यति।

ज्ञापकबाधकभाष्यम्- एवमप्यनुनासिकः प्राप्नोति।

ज्ञापकसाधकभाष्यम्- पररूपेण शुद्धो भविष्यति।

ज्ञापकबाधकभाष्यम्- एवं तर्हि गमेरप्ययं डो वक्तव्यः। गमेश्च गुण उच्यमान आन्तर्यत ओकारः प्राप्नोति। तस्मादिग्ग्रहणं कर्तव्यम्।

गुणवृद्धिशब्दानुवृत्त्यधिकरणम्

आक्षेपभाष्यम्- यदीग्ग्रहणं क्रियते, द्यौः-पन्थाः-सः-इममिति, एतेऽपीकः प्राप्नुवन्ति।

(75. **सिद्धान्तसमाधानवार्त्तिकम्**- 1)

*** संज्ञया विधाने नियमः ***

भाष्यम्- संज्ञया ये विधीयन्ते तेषु नियमः।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि; कथमनुच्यमानं गंस्यते? गुणवृद्धिग्रहणसामर्थ्यात्।

सामर्थ्याक्षेपभाष्यम्- कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम्?

समाधानभाष्यम्- प्रकृतं गुणवृद्धिग्रहणमनुवर्तते। क्व प्रकृतम्? 'वृद्धिरादैजदेङ्गुणः' इति।

आक्षेपभाष्यम्- यदि तदनुवर्तते 'अदेङ्गुणो वृद्धिश्च' इत्यदेङां वृद्धिसञ्ज्ञाऽपि प्राप्नोति।

समाधानभाष्यम् (1)- सम्बन्धमनुवर्तिष्यते—'वृद्धिरादैच्' 'अदेङ्गुणः'। वृद्धिरादैच् ततः—'इको गुणवृद्धी' इति। गुणवृद्धिग्रहणमनुवर्तते, आदैजदेङ्ग्रहणं निवृत्तम्।

समाधानभाष्यम् (2)- अथवा मण्डूकगतयोऽधिकाराः। यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः।

एकदेशिसमाधानभाष्यम् (3)- अथवैकयोगः करिष्यते—'वृद्धिरादैजदेङ्गुणः' ततः 'इको गुणवृद्धी' इति। न चैकयोगेऽनुवृत्तिर्भवति।

समाधानभाष्यम् (4)- अथवा—'अन्यवचनाच्चकाराकरणाच्च प्रकृतापवादो विज्ञायते, यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति'। अन्यस्याः सञ्ज्ञाया वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात्प्रकृताया वृद्धिसञ्ज्ञाया गुणसञ्ज्ञा बाधिका भविष्यति। यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति।

समाधानभाष्यम् (5)- अथवा वक्ष्यत्येतत्—'अनुवर्तन्ते च नाम विधयः, न चानुवर्तनादेव भवन्ति। किं तर्हि? यत्नाद्भवन्ति' इति।

समाधानभाष्यम् (6)- अथवा—उभयं निवृत्तम्। तदपेक्षिष्यामहे।

परिभाषात्वसाधकाधिकरणम्

पक्षद्वयोपस्थापकभाष्यम्- किं पुनरयमलोऽन्त्यशेषः, आहोस्विदलोऽन्त्यापवादः? कथं चायं तच्छेषः स्यात्, कथं वा तदपवादः? यद्येकं वाक्यम्—तच्चेदं च, अलोऽन्त्यस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधयो भवन्ति—'इको गुणवृद्धी अलोऽन्त्यस्य' इति। ततोऽयं तच्छेषः। अथ नानावाक्यम्—'अलोऽन्त्यस्य विधयो भवन्ति', 'इको गुणवृद्धी—अन्त्यस्य चानन्त्यस्य च' इति। ततोऽयं तदपवादः।

भाष्यम्- कश्चात्र विशेषः?

(76. **तच्छेषपक्षदूषणवार्त्तिकम्-** 3)

* वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम् *

व्याख्याभाष्यम्- वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्तव्यम्। 'मिदेर्गुणः' इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। 'मृजेर्वृद्धिः' इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। 'पुगन्तलघूपधस्य' गुणः, इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। ॠच्छेर्लिटि गुणः, इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। दृशेः 'ॠदृशोऽङि गुणः' इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। क्षिप्रक्षुद्रयोर्गुणः, इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति।

(77. **तच्छेषदूषणान्तरवार्त्तिकम्-** 4)

* सर्वादेशप्रसङ्गश्चानिगन्तस्य *

एकदेशिव्याख्याभाष्यम्- सर्वादेशश्च गुणोऽनिगन्तस्य प्राप्नोति। याता, वाता। किं कारणम्? 'अलोऽन्त्यस्य' इति षष्ठी। षष्ठी चैव ह्यन्त्यमिकमुपसंक्रान्ता, अङ्गस्येति च स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तस्य गुणः सर्वादेशः प्राप्नोति।

दूषणोद्धारभाष्यम्- नैष दोषः। यथैव ह्यलोऽन्त्यस्येति षष्ठी अन्त्यमिकमुपसंक्रान्ता, एवमङ्गस्येत्यपि स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तत्र षष्ठ्येव नास्ति, कुतो गुणः कुतः सर्वादेशः।

वार्तिकसमन्वयान्तरभाष्यम्- एवं तर्हि नायं दोषसमुच्चयः। किं तर्हि? पूर्वापेक्षोऽयं दोषः। ह्यर्थे चायं चः पठितः—'मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसङ्गो ह्यनिगन्तस्य' इति। मिदेर्गुणः 'इक' इति वचनादन्त्यस्य न, 'अलोऽन्त्यस्य' इति वचनादिको न। उच्यते च गुणः। स सर्वादेशः प्राप्नोति। एवं सर्वत्र।

तदपवादपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि तदपवादः।

(78. **तदपवादपक्षदूषणवार्त्तिकम्-** 5)

* इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः *

भाष्यम्- इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधो वक्तव्यः। जुसि गुणः, स यथेह भवति—'अजुहवुः-अबिभयुः' इति। एवम् 'अनेनिजुः-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्यवेविषुः' अत्रापि प्राप्नोति। सार्वधातुकार्धधातुकयोर्गुणः, स यथेह भवति—'कर्ता-हर्ता-नयति-तरति-भवति' इति। एवम् 'ईहिता-ईहितुम्-ईहितव्यम्' इत्यत्रापि प्राप्नोति। ह्रस्वस्य गुणः, स यथेह भवति—'हे अग्ने-हे वायो' इति। एवं 'हे अग्निचित्-हे सोम-सुत्' इत्यत्रापि प्राप्नोति। जसि गुणः, स यथेह भवति—'अग्नयः-वायवः' इति। एवं 'अग्नि-चितः-सोमसुतः' इत्यत्रापि प्राप्नोति। ऋतो ङिसर्वनामस्थानयोर्गुणः, स यथेह भवति—'कर्तरि-कर्तारौ-कर्तारः' इति। एवं 'सुकृति-सुकृतौ-सुकृतः' इत्यत्रापि प्राप्नोति। घेर्ङिति गुणः, स यथेह भवति—'अग्नये-वायवे' इति। एवम् 'अग्निचिते-सोमसुते' इत्यत्रापि प्राप्नोति। ओर्गुणः, स यथेह भवति—'बाभ्रव्यः-माण्डव्यः' इति। एवं 'सुश्रुत्-सौश्रुतः' इत्यत्रापि प्राप्नोति। नैष दोषः।

(79. सिद्धान्त्येकदेशिवार्त्तिकम्- 6)

* पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम् *

भाष्यम्- पुगन्तलघूपधग्रहणमनन्त्यनियमार्थं भविष्यति—पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्यानन्त्यस्येति।

नियमदूषणभाष्यम्- प्रकृतस्यैव नियमः स्यात्। किञ्च प्रकृतम्? सार्वधातुकार्ध-धातुकयोरिति। तेन भवेदिह नियमान्न स्यात'ईहिता-ईहितुमईहितव्यम्' इति। ह्रस्वाद्योर्गुणस्त्व-नियतः सोऽनन्त्यस्यापि प्राप्नोति।

नियमान्तरदूषणभाष्यम्- अथाऽप्येवं नियमः स्यात्—पुगन्तलघूपधस्य सार्वधातु-कार्धधातुकयोरेवेति। एवमपि सार्वधातुकार्धधातुकयोर्गुणोऽनियतः सोऽनन्त्यस्यापि प्राप्नोति—ईहिता-ईहितुम्-ईहितव्यमिति।

उभयविधनियमदूषणभाष्यम्- अथाप्युभयतो नियमः स्यात्—पुगन्तलघूपधस्यैव सार्वधातुकार्धधातुकयोः, सार्वधातुकार्धधातुकयोरेव पुगन्तलघूपधस्येति। एवमप्ययं जुसि-गुणोऽनियतः सोऽनन्त्यस्यापि प्राप्नोति—'अनेनिजुः-पर्यवेविषुः' इति।

असम्बद्धपरिभाषानिरासाधिकरणम्

भाष्यम्- एवं तर्हि—नायं तच्छेषः, नापि तदपवादः। अन्यदेवेदं परिभाषान्तरमसम्बद्ध-मनया परिभाषया।

परिभाषान्तरपक्षसमर्थकभाष्यम्- परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति—

(क्रोष्ट्रीयवार्त्तिकम्)

* नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन *

भाष्यम्- यदि चायं तच्छेषः स्यात्तेनैव तस्यायुक्तो विप्रतिषेधः। अथापि तदपवादः, उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेधः। तत्र नियमस्यावकाशः—'राज्ञः क च' राजकीयम्। 'इको गुणवृद्धी' इत्यस्यावकाशः—'चयनं चायको लवनं लावकः' इति। इहोभयं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्नोति—'मेद्यति-मार्ष्टि' इति। 'इको गुणवृद्धी' इत्येतद्भवति विप्रतिषेधेन।

विप्रतिषेधबाधकभाष्यम्- नैष युक्तो विप्रतिषेधः। 'विप्रतिषेधे परम्' इत्युच्यते। पूर्वश्चायं योगः, परो नियमः।

विप्रतिषेधसाधकभाष्यम्- इष्टवाची परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति।

विप्रतिषेधबाधकभाष्यम्- एवमप्ययुक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः।

विप्रतिषेधसाधकभाष्यम्- नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्हि? असम्भवोऽपि। स चास्त्यत्रासम्भवः। कोऽसावसम्भवः? इह तावत्—'वृक्षेभ्यः-प्लक्षेभ्यः' इति एकः स्थानी, द्वावादेशौ, न चास्ति सम्भवः—यदेकस्य स्थानिनो द्वावादेशौ स्याताम्। इहेदानीं—'मेद्यति, मेद्यतः, मेद्यन्ति' इति द्वौ स्थानिनौ, एक आदेशः, न चास्ति सम्भवः—यत् द्वयोः स्थानिनोरेक आदेशः स्यादित्येषोऽसम्भवः। सत्येतस्मिन्नसम्भवे युक्तो विप्रतिषेधः।

विप्रतिषेधबाधकभाष्यम्- एवमप्ययुक्तो विप्रतिषेधः। द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति। अनवकाशश्चायं योगः।

विप्रतिषेधोपपादनस्मरणभाष्यम्- ननु च—इदानीमेवास्यावकाशः प्रक्लृप्तः—चयनं चायको लवनं लावक इति।

विप्रतिषेधबाधकभाष्यम्- अत्रापि नियमः प्राप्नोति। नाप्राप्ते नियमेऽयं योग आरभ्यते। यावता च नाप्राप्ते नियमेऽयं योग आरभ्यते, ततस्तदपवादोऽयं योगो भवति। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः। अथापि कथञ्चित् 'इको गुणवृद्धी' इत्यस्यावकाशः स्यात्। एवमपि यथेह विप्रतिषेधादिको गुणो भवति—मेद्यति-मेद्यतः-मेद्यन्ति इति, एवमिहापि स्यात्—अनेनिजुः-पर्यवेविषुरिति।

सिद्धान्तभूतपदोपस्थितिपक्षनिरूपणम्

सिद्धान्तिभाष्यम्- एवं तर्हि—वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयात् 'इकः' इत्येतत्तत्रोपस्थितं द्रष्टव्यम्। किं कृतं भवति? द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः—गृह्यमाणेन वेकं विशेषयितुम्, इका वा गृह्यमाणम्। यावता कामचारः, इह तावन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेकं विशेषयिष्यामः—एतेषां य इगिति। इहेदानीं जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्विका गृह्यमाणं विशेषयिष्यामः—एतेषां गुणो भवति 'इकः' इगन्तानामिति।

तच्छेषपक्षोक्तदूषणनिराकरणभाष्यम्- अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते। इह तावन्मिदेरित्यविभक्तिको निर्देशः—मिद् एः मिदेः, मिदेरिति। अथवा षष्ठीसमासो भविष्यति—मिद इः मिदिः, मिदेरिति। पुगन्तलघूपधस्येति नैवं विज्ञायते—पुगन्ताङ्गस्य लघूपधस्य चेति। कथं तर्हि? पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधम्, पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयम्, अङ्गविशेषणे हि सतीह प्रसज्येत—भिनत्ति-छिनत्तीति। ऋच्छेरपि प्रश्लिष्टनिर्देशोऽयम्—ऋच्छति ऋ ऋ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋताम् 'ऋच्छत्यृताम्' इति। दृशेरपि योगविभागः करिष्यते—'उरङि गुणः' उः अङि गुणो भवति। ततो 'दृशेः' दृशेश्चाङि गुणो भवति। उरित्येव। क्षिप्रक्षुद्रयोरपि 'यणादिपरं गुणः' इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत् प्रयोजनम्—इको यथा स्यादनिको मा भूदिति।

वृद्धिपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- अथ वृद्धिग्रहणं किमर्थम्?

प्रत्याक्षेपभाष्यम्- किं विशेषेण वृद्धिग्रहणं चोद्यते, न पुनर्गुणग्रहणमपि। यदि किञ्चिद्गुणग्रहणस्य प्रयोजनमस्ति, वृद्धिग्रहणस्यापि तद्भवितुमर्हति। को वा विशेषः?

प्रत्याक्षेपसमाधानभाष्यम्- अयमस्ति विशेषः—गुणविधौ न क्वचित्स्थानी निर्दिश्यते, तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यम्। वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते—'अचो ञ्णिति' 'अत उपधायाः' 'तद्धितेष्वचामादेः' इति।

समाधानभाष्यम्- अत उत्तरं पठति—

(80. **सिद्धान्तिसमाधानवार्तिकप्रथमखण्डम्**- 1)

* वृद्धिग्रहणमुत्तरार्थम् *

भाष्यम्- वृद्धिग्रहणं क्रियते। किमर्थम्? उत्तरार्थम्। 'क्ङिति' इति प्रतिषेधं वक्ष्यति, स वृद्धेरपि यथा स्यात्।

पूर्वपक्षिण आक्षेपभाष्यम्- कश्चेदानीं क्ङित्प्रत्ययेषु वृद्धेः प्रसङ्गः। यावता 'ञ्णिति' इत्युच्यते?

वृद्धिग्रहणप्रयोजनभाष्यम्- 'तच्च मृज्यर्थम्'। मृजेर्वृद्धिरविशेषेणोच्यते। सा क्ङिति मा भूत्—मृष्टः-मृष्टवानिति।

प्रयोजनभाष्यम्- 'इहार्थं चापि'। मृज्यर्थं वृद्धिग्रहणं कर्तव्यम्। मृजेर्वृद्धिरविशेषेणोच्यते। सेको यथा स्यात्, अनिको मा भूदिति।

(प्रयोजननिरसनवार्त्तिकम्)

* मृज्यर्थमिति चेद्योगविभागात्सिद्धम् *

भाष्यम्- मृज्यर्थमिति चेद्योगविभागः करिष्यते—'मृजेर्वृद्धिरचः'। ततः—'ञ्णिति' ञिति णिति च वृद्धिर्भवति 'अचः' इत्येव।

आक्षेपभाष्यम्- यद्यचो वृद्धिरुच्यते, 'न्यमार्ट्' अटोऽपि वृद्धिः प्राप्नोति।

एकदेशिनः समाधानभाष्यम्- 'अटि चोक्तम्'। किमुक्तम्? 'अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति' इति।

(81. **सिद्धान्तवार्त्तिकम्**- 2)

* वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् *

भाष्यम्- वृद्धेस्तु प्रतिषेधो नोपपद्यते। किं कारणम्? इक्प्रकरणात्। इग्लक्षणयोर्गुण-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्ध्योः प्रतिषेधः। न चैवं सति मृजेरिग्लक्षणा वृद्धिर्भवति। तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या।

इक्परिभाषानुपस्थितिसूचकभाष्यम्- एवं तर्हि—इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते—परिमृजन्ति, परिमार्जन्ति, परिमृजतु, परिमार्जतु इत्याद्यर्थम्। तदिहापि साध्यम्। तस्मिन् साध्ये योगविभागः करिष्यते—'मृजेर्वृद्धिरचः' भवति। ततः—'अचि क्ङिति' अजादौ च क्ङिति मृजेर्वृद्धिर्भवति। परिमार्जन्ति-परिमार्जन्तु। किमर्थमिदम्? नियमार्थम्—अजादावेव क्ङिति, नान्यत्र। क्वान्यत्र मा भूत्? मृष्टः, मृष्टवानिति। ततो 'वा' वाचि क्ङिति मृजेर्वृद्धिर्भवति। परिमृजन्ति, परिमार्जन्ति, परिममृजतुः, परिममार्जतुरिति।

प्रयोजनान्तरसूचकभाष्यम्- इहार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम्। सिचि वृद्धिरविशेषेणोच्यते, सेको यथा स्यात्, अनिको मा भूदिति।

प्रयोजनाक्षेपभाष्यम्- कस्य पुनरनिकः प्राप्नोति?

समाधानभाष्यम्- अकारस्य। अचिकीर्षीत्, अजिहीर्षीत्।

प्रत्याक्षेपभाष्यम्- नैतदस्ति। लोपोऽत्र बाधको भविष्यति।

प्रयोजनभाष्यम्- आकारस्य तर्हि प्राप्नोति—अयासीत्, अवासीत्।

प्रयोजनाक्षेपभाष्यम्- नास्त्यत्र विशेषः, सत्यां वृद्धावसत्यां वा।

समाधानभाष्यम्- सन्ध्यक्षरस्य तर्हि प्राप्नोति। नैव सन्ध्यक्षरमन्त्यमस्ति।

उदाहरणभाष्यम्- ननु चेदमस्ति—ढलोपे कृते उदवोढाम्, उदवोढम्, उदवोढेति। नैतदस्ति। असिद्धो ढलोपः, तस्यासिद्धत्वान्नैतदन्त्यं भवति।

उदाहरणभाष्यम्- व्यञ्जनस्य तर्हि प्राप्नोति—अभैत्सीत्-अच्छैत्सीत्। हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति।

उदाहरणभाष्यम्- यत्र तर्हि सा प्रतिषिध्यते—'नेटि' इति। अकोषीत्-अमोषीत्।

उदाहरणाक्षेपभाष्यम्- सिचिवृद्धेरप्येष प्रतिषेधः। कथम्? लक्षणं हि नाम ध्वनति भ्रमति मुहूर्तमपि नावतिष्ठते।

आक्षेपे प्रकारविशेषभाष्यम्- अथवा 'सिचि वृद्धिः परस्मैपदेषु' इति सिचि वृद्धिः प्राप्नोति। तस्या हलन्तलक्षणा वृद्धिर्बाधिका। तस्या अपि 'नेटि' इति प्रतिषेधः।

दृष्टान्ताक्षेपभाष्यम्- अस्ति पुनः क्वचिदन्यत्रापि अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति?

इक्परिभाषानुपस्थितिभाष्यम्- अस्तीत्याह, सुजा॑ते॒ अश्व॑सूनृते, अध्व॑र्यो॒ अद्रि॑भिः सु॒तम्, शु॒क्रं तें॑ अ॒न्यदिति पूर्वरूपत्वे प्रतिषिद्धेऽयादयोऽपि न भवन्ति।

सिद्धान्तिनः प्रयोजनभाष्यम्- उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम्। सिचि वृद्धिरविशेषेणोच्यते, सा क्ङिति मा भूत्—न्यनुवीत्, न्यधुवीत्।

प्रयोजननिरासभाष्यम्- नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वादत्रोवङादेशे कृतेऽनन्त्यत्वाद्वृद्धिर्न भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तिभाष्यम्- यदि तर्हि सिच्यन्तरङ्गं भवति—अकार्षीत्-अहार्षीत्, गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति।

पूर्वप्येकदेशिनो भाष्यम्- मा भूदेवम्। 'हलन्तस्य-' इत्येवं भविष्यति।

सिद्धान्त्येकदेशिनः दूषणभाष्यम्- इह तर्हि—न्यस्तारीत्-न्यदारीत्। गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तक्षणायाश्च 'नेटि' इति प्रतिषेधः।

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- मा भूदेवम्। 'ल्रान्तस्य' इत्येवं भविष्यति।

सिद्धान्त्येकदेशिन आक्षेपभाष्यम्- इह तर्हि अलावीत्-अयावीत्। गुणे कृतेऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तलक्षणायाश्च 'नेटि' इति प्रतिषेधः।

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- मा भूदेवम्। 'ल्रान्तस्य' इत्येवं भविष्यति।

सिद्धान्त्येकदेशिन आक्षेपभाष्यम्- 'ल्रान्तस्य' इत्युच्यते, न चेदं ल्रान्तम्।

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- 'ल्रान्तस्य' इत्यत्र वकारोऽपि निर्दिश्यते।

सिद्धान्त्येकदेशिन आक्षेपभाष्यम्- किं वकारो न श्रूयते?

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- लुप्तनिर्दिष्टो वकारः।

सिद्धान्त्येकदेशिनो दूषणभाष्यम्- यद्येवम्—मा भवानवीत्, मा भवान् मवीत्—अत्रापि प्राप्नोति।

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- अविमव्योर्नेति वक्ष्यामि।

सिद्धान्त्येकदेशिन आक्षेपभाष्यम्- तद्वक्तव्यम्।

पूर्वपक्ष्येकदेशिनः समाधानभाष्यम्- न वक्तव्यम्। 'णिश्विभ्यां तौ निमातव्यौ'। यद्यप्येतदुच्यते, अथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति। गुणे कृतेऽयादेशे च यान्तानां नेत्येव प्रतिषेधो भविष्यति।

सिद्धान्त्येकदेशिन पूर्वोक्तदोषवारणाय ज्ञापकभाष्यम्- एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—न सिच्यन्तरङ्गं भवति इति। यदयम् 'अतो हलादेर्लघोः' इत्यकारग्रहणं करोति। कथं कृत्वा ज्ञापकम्? अकारग्रहणस्यैतत्प्रयोजनम्। इह मा भूत्—अकोषीत्-अमोषीत्। यदि सिच्यन्तरङ्गं स्यात्, अकारग्रहणमनर्थकं स्यात्। गुणे कृतेऽलघुत्वाद्वृद्धिर्न भविष्यति। पश्यति त्वाचार्यः—'न सिच्यन्तरङ्गं भवति' इति। ततोऽकारग्रहणं करोति।

पूर्वपक्ष्येकदेशिन आक्षेपभाष्यम्- नैतदस्ति ज्ञापकम्। अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्? यत्र गुणः प्रतिषिद्ध्यते तदर्थमेतत्स्यात्। न्यकुटीत्-न्यपुटीत् इति।

सिद्धान्त्येकदेशिनः समाधानभाष्यम्- यत्तर्हि णिश्व्योः प्रतिषेधं शास्ति, तेन 'नेहान्तरङ्गमस्ति' इति दर्शयति।

पूर्वोक्तज्ञापकस्थिरीकरणभाष्यम्- यच्च करोत्यकारस्य ग्रहणं लघोरिति कृतेऽपि।

(82. सिद्धान्तिन उपसंहारवार्तिकम्- 3)

*** तस्मादिग्लक्षणा वृद्धिः ***

भाष्यम्- तस्मादिग्लक्षणा वृद्धिरास्थेया।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रविधित्वनिराकरणाधिकरणम्

(83. आक्षेपवार्तिकम्-1)

*** षष्ठ्याः स्थानेयोगत्वादिङ्निवृत्तिः ***

भाष्यम्- षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति—दधि, मधु।

अस्य स्वतन्त्रत्वे दूषणभाष्यम्- पुनर्वचनमिदानीं किमर्थं स्यात्?

(84. स्वतन्त्रत्वे दूषणसमाधानवार्तिकम्-2)

*** अन्यतरार्थं पुनर्वचनम् ***

भाष्यम्- अन्यतरार्थमेतत्स्यात्—सार्वधातुकार्धधातुकयोर्गुण एवेति।

(85. समानन्यायेनेतरत्राक्षेपवार्तिकम्-3)

*** प्रसारणे च ***

भाष्यम्- प्रसारणे च सर्वेषां यणां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति—याता, वाता।

स्वातन्त्र्ये दूषणभाष्यम्- पुनर्वचनमिदानीं किमर्थं स्यात्?

(86. स्वातन्त्र्ये दूषणनिराकरणवार्तिकम्-4)

*** विषयार्थं पुनर्वचनम् ***

भाष्यम्- विषयार्थमेतत्स्यात्—वचिस्वपियजादीनां कित्येवेति ।

(87. समानन्यायेनाक्षेपवार्त्तिकम्-5)

*** उरण् रपरे च ***

भाष्यम्- उरण् रपरे च सर्वेषामृकाराणां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति—कर्तृ, हर्तृ।

(88. सर्वाक्षेपनिराकरणसिद्धान्तवार्त्तिकम्-6)

*** सिद्धं तु षष्ठ्यधिकारे वचनात् ***

भाष्यम्- सिद्धमेतत्। कथम्? षष्ठ्यधिकरो इमे योगाः कर्तव्याः। एकस्तावत् क्रियते तत्रैव। इमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्येते।

लौकिकाधिकारसम्पादकं भाष्यम्- अथवा—षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे।

समाधानान्तरभाष्यम्- अथवा इदं तावदयं प्रष्टव्यः—सार्वधातुकार्धधातुकयोर्गुणो भवति इति। इह कस्मान्न भवति—याता, वाता? इदं तत्रापेक्षिष्यते—'इको गुणवृद्धी' इति। यथैव तर्हि इदं तत्रापेक्ष्यते, एवमिहापि तदपेक्षिष्यामहे 'सार्वधातुकार्धधातुकयोः-इको गुणवृद्धी' इति।।3।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये

प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमेऽध्याये प्रथमे पादे चतुर्थमाह्निकम्

(3. परिभाषासूत्रम् 1.1.4 आ. 1)

न धातुलोप आर्धधातुके 1.1.4

पदकृत्याधिकरणम्

आक्षेपभाष्यम्- धातुग्रहणं किमर्थम्?

समाधानभाष्यम्- इह मा भूत्—लूञ् लविता-लवितुम्, पूञ् पविता-पवितुम्।

आक्षेपभाष्यम्- आर्धधातुक इति किमर्थम्?

समाधानभाष्यम्- 'त्रिधा॑ ब॒द्धो वृ॑ष॒भो रो॑रवीति' (ऋ. सं.-4.58.3)।

आर्धधातुकपदार्थान्वयाधिकरणम्

पक्षद्वयोपस्थापकभाष्यम्- किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणम्—'आर्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति।

आहोस्वित् गुणवृद्धिविशेषणमार्धधातुकग्रहणम्—'धातुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति? किं चातः?

पक्षद्वये दोषदर्शकं भाष्यम्- यदि लोपविशेषणम्, 'उपेद्धः, प्रेद्धः' अत्रापि प्राप्नोति। अथ गुणवृद्धिविशेषणम्, 'क्नोपयति' अत्रापि प्राप्नोति।

उभयेष्टापत्तिभाष्यम्- यथेच्छसि तथास्तु।

प्रथमपक्षाङ्गीकारभाष्यम्- अस्तु लोपविशेषणम्।

पूर्वोक्तदोषस्मारकभाष्यम्- कथम्—'उपेद्धः, प्रेद्धः' इति?

दोषोद्धारकं भाष्यम्- बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। 'असिद्धं बहिरङ्गमन्तरङ्गे'।

लाघवभाष्यम्- यद्येवं, नार्थो धातुग्रहणेन।

धातुग्रहणाभावे दोषस्मारकभाष्यम्- इह कस्मान्न भवति—लूञ्-लविता, लवितुम्, लवितव्यम् इति?

समाधानभाष्यम्- आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमित्तो लोपः।

द्वितीयपक्षस्वीकारभाष्यम्- अथवा—पुनरस्तु गुणवृद्धिविशेषणम्।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—क्नोपयतीत्यत्रापि प्राप्नोतीति।

समाधानभाष्यम्- नैष दोषः, निपातनात्सिद्धम्। किं निपातनम्? 'चेले क्नोपेः' इति।

परिगणनाधिकरणम्

वार्तिकावतरणभाष्यम्- परिगणनं कर्तव्यम्—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(89. परिगणनपूर्वपक्षिवार्त्तिकम्- 1)

*** यङ्यक्क्यवलोपे प्रतिषेधः ***

भाष्यम्- यङ्-यक्-क्य-वलोपे प्रतिषेधो वक्तव्यः। यङ्—बेभिदिता, मरीमृजः। यक्—कुषुभिता, मगधकः। क्य—समिधिता, दृषदकः। वलोपे—जीरदानुः। किं प्रयोजनम्।

(90. परिगणनप्रयोजनवार्तिकम्- 2)

*** नुम्लोपे स्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम् ***

भाष्यम्- नुम्लोपे स्त्रिवि अनुबन्धलोपे च प्रतिषेधो मा भूदिति। नुम्लोपे—अभाजि, रागः, उपबर्हणम्। स्त्रिवेः—आस्त्रेमाणम्। अनुबन्धलोपे— लूञ्-लविता, लवितुम्।

आक्षेपभाष्यम्- यदि परिगणनं क्रियते, 'स्यदः, प्रश्रथः, हिमश्रथः' इत्यत्रापि प्राप्नोति।

समाधानभाष्यम्- वक्ष्यत्येतत्—'निपातनात्स्यदादिषु' इति।

आक्षेपभाष्यम्- तर्त्तहि परिगणनं कर्तव्यम्।

परिगणनप्रत्याख्यानभाष्यम्- न कर्तव्यम्।

आक्षेपभाष्यम्- नुम्लोपे कस्मान्न भवति?

(सिद्धान्तसमाधानभाष्यवार्त्तिकम्)

*** इक्प्रकरणान्नुम्लोपे वृद्धिः ***

भाष्यम्- इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः।

आक्षेपभाष्यम्- यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः 'स्यदः, प्रश्रथः, हिमश्रथः' इत्यत्र न प्राप्नोति। इह च प्राप्नोति—'अवोदः, एधः, ओद्मः' इति।

(91. सिद्धान्तसमाधानवार्त्तिकम्- 3)

*** निपातनात्स्यदादिषु ***

भाष्यम्- निपातनात्स्यदादिषु प्रतिषेधो भविष्यति, न च भविष्यति।

आक्षेपभाष्यम्- यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, स्त्रिव्यनुबन्धलोपे कथम्? स्त्रिवेः—आस्त्रेमाणम्, लूञ्—लविता।

(सिद्धान्तसमाधानभाष्यवार्त्तिकम्)

*** प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ***

भाष्यम्- आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमित्तो लोपः।

आक्षेपभाष्यम्- यद्यार्धधातुकनिमित्ते लोपे प्रतिषेधः, 'जीरदानुः' (ऋ. सं.- 5.83.1) अत्र न प्राप्नोति।

(92. सिद्धान्तसमाधानवार्त्तिकम्- 4)

*** रकि ज्यः सम्प्रसारणम् ***

भाष्यम्- नैतज्जीवे रूपम् , रक्येतज्ज्यः सम्प्रसारणं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदेशिभाष्यम्- यावता चेदानीं रकि, जीवेरपि सिद्धं भवति। कथमुपबर्हणम्?

सिद्धान्तिभाष्यम्- बृहिः प्रकृत्यन्तरम्।

आक्षेपभाष्यम्- कथं ज्ञायते—बृहिः प्रकृत्यन्तरमिति?

सिद्धान्तिभाष्यम्- अचीति हि लोप उच्यते, अनजादावपि दृश्यते—निबृह्यते। अनिटीति चोच्यते, इडादावपि दृश्यते—निबर्हिता निबर्हितुमिति। अजादावपि न दृश्यते—बृंहयति, बृंहकः।

उपसंहारभाष्यम्- तस्मान्नार्थः परिगणनेन।

आक्षेपभाष्यम्- यदि परिगणनं न क्रियते 'भेद्यते, छेद्यते' अत्रापि प्राप्नोति।

समाधानभाष्यम्- नैष दोषः। धातुलोप इति नैवं विज्ञायते—'धातोर्लोपः धातुलोपः, धातुलोपे' इति। कथं तर्हि? 'धातोर्लोपो यस्मिंस्तदिदं धातुलोपं धातुलोपे' इति।

उपसंहारभाष्यम्- तस्मादिग्लक्षणा वृद्धिः।

इग्लक्षणत्वे दोषनिराकरणाधिकरणम्

आक्षेपभाष्यम्- यदि तर्हीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, 'पापचकः, पापठकः, मगधकः, दृषदकः' अत्र न प्राप्नोति।

(93. **सिद्धान्तिसमाधानवार्त्तिकम्**- 1)

*** अल्लोपस्य स्थानिवत्त्वात् ***

भाष्यम्- अकारलोपे कृते तस्य स्थानिवत्त्वाद् गुणवृद्धी न भविष्यतः।

सूत्रप्रत्याख्यानाधिकरणम्

(94. **सिद्धान्तवार्त्तिकम्**- 1)

*** अनारम्भो वा ***

भाष्यम्- अनारम्भो वा पुनरस्य योगस्य न्याय्यः।

आक्षेपभाष्यम्- कथं 'बेभिदिता-मरीमृजकः-कुषुभिता-समिधिता' इति?

समाधानभाष्यम्- अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः।

आक्षेपभाष्यम्- यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति? यत्र हलचोरादेशः—लोलुवः-पोपुवः-मरीमृजः-सरीसृप इति।

समाधानभाष्यम्- अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः।

समाधानबाधकभाष्यम्- लुकि कृते न प्राप्नोति।

समाधानसाधकभाष्यम्- इदमिह सम्प्रधार्यम्—लुक् क्रियतामल्लोप इति। किमत्र कर्तव्यम्? परत्वादल्लोपः।

समाधानबाधकभाष्यम्- नित्यो लुक्। कृतेऽप्यल्लोपे प्राप्नोति, अकृतेऽपि प्राप्नोति।

समाधानसाधकभाष्यम्- लुगप्यनित्यः। कथम्? अन्यस्य कृते लोपे प्राप्नोति,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यस्याकृते। 'शब्दान्तरस्य च प्राप्नुवन्बिधिरनित्यो भवति'।

समाधानबाधकभाष्यम्- अनवकाशस्तर्हि लुक्।

समाधानसाधकभाष्यम्- सावकाशो लुक्। कोऽवकाशः? अवशिष्टः।

अभ्युपेत्य समाधानभाष्यम्- अथापि कथञ्चिदनवकाशो लुक् स्यात्, एवमपि न दोषः। अल्लोपे योगविभागः करिष्यते—'अतो लोपः'। ततः—'यस्य', यस्य च लोपो भवति। अत इत्येव। किमर्थमिदम्? लुकं वक्ष्यति तद्बाधनार्थम्। ततः—'हलः' हल उत्तरस्य यस्य च लोपो भवतीति।

आक्षेपभाष्यम्- इहापि तर्हि परत्वाद्योगविभागाद्वा लोपो लुकं बाधेत—'कृष्णो नौनाव वृषभो यदीदम् (ऋ. सं.-1.79.2)' नोनूयतेर्नोनाव।

समाधानभाष्यम्- समानाश्रयो लुक् लोपेन बाध्यते। कश्च समानाश्रयः? यः प्रत्ययाश्रयः। अत्र च प्रागेव प्रत्ययोत्पत्तेर्लुग्भवति।

आक्षेपभाष्यम्- कथम्—स्यदः-प्रश्रथः-हिमश्रथः-जीरदानुः (ऋ. सं.-5.83.1)—निकुचित इति।

(समाधाने भाष्यवार्तिकम्)

* उक्तं शेषे *

भाष्यम्- किमुक्तम्? 'निपातनात्स्यदादिषु'। 'रकि ज्यः सम्प्रसारणम्' इति। निकुचितेऽप्युक्तम्। किम्? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। न धातुलोप०।

(5. निषेधसूत्रम्-1.1.4 आ. 2)

क्ङिति च 1.1.5

सप्तम्या निमित्तार्थत्वाधिकरणम्

(95. उपसङ्ख्यानवार्त्तिकम्-1)

* क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् *

व्याख्याभाष्यम्- क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम्। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम्। किं प्रयोजनम्?

(96. प्रयोजनवार्तिकम्-2)

* उपधारोरवीत्यर्थम् *

भाष्यम्- उपधार्थं रोरवीत्यर्थं च। उपधार्थं तावत्—भिन्नः, भिन्नवान्। किं पुनः कारणं न सिध्यति? क्ङितीत्युच्यते। तेन यत्र क्ङित्यनन्तरो गुणभाव्यस्ति तत्रैव स्यात्—चितम्, स्तुतम्। इह तु न स्यात्—भिन्नः, भिन्नवानिति।

प्रथमप्रयोजनबाधकभाष्यम्- ननु च यस्य गुण उच्यते, तं क्ङित्परत्वेन विशेष-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यिष्यामः। पुगन्तलघूपधस्य च गुण उच्यते। तच्चात्र क्ङित्परम्।

प्रथमप्रयोजनसाधकभाष्यम्- पुगन्तलघूपधस्येति नैवं विज्ञायते—पुगन्तस्याङ्गस्य लघूपधस्य चेति। कथं तर्हि? पुकि अन्तः पुगन्तः। लघ्वी उपधा लघूपधा। पुगन्तञ्च लघूपधा च पुगन्तलघूपधं, पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयम्। अङ्गविशेषणे हि सतीह प्रसज्येत—भिनत्ति, छिनत्तीति।

द्वितीयप्रयोजनसमन्वयभाष्यम्- रोरवीत्यर्थं च। 'त्रिधा॑ ब॒द्धो वृ॑ष॒भो रो॑रवीति'।

आक्षेपभाष्यम्- यदि तन्निमित्तग्रहणं क्रियते, शचङन्ते दोषः—रियति, पियति, धियति, प्रादुद्रुवत्, प्रासुस्रुवत्। अत्र न प्राप्नोति।

(सिद्धान्तसमाधाने भाष्यवार्त्तिकम्)

✻ शचङन्तस्यान्तरङ्गलक्षणत्वात् ✻

भाष्यम्- अन्तरङ्गलक्षणत्वादत्रेयङुवङोः कृतयोरनुपधात्वाद् गुणो न भविष्यति।

तन्निमित्तग्रहणस्य निर्दोषितोपसंहारभाष्यम्- एवं क्रियते चेदं तन्निमित्तग्रहणम्, न च कश्चिद्दोषो भवति।

सूत्रार्थप्रदर्शनाय फलान्तरप्रदर्शकभाष्यम्- इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि—हतः, हथः, उपोयते, औयत, लौयमानिः, पौयमानिः, नेनिक्ते इति।

फलान्तरप्रत्याख्यानभाष्यम्- नैतानि सन्ति प्रयोजनानि। इह तावत्—हतो हथ इति। प्रसक्तस्याभिनिर्वृतस्य प्रतिषेधेन निर्वृत्तिः शक्या कर्तुम्। अत्र धातूपदेशावस्थायामेवाकारः।

भाष्यम्- इह च—उपोयते-औयत-लौमयानिः-पौयमानिरिति। बहिरङ्गे गुणवृद्धी, अन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे। नेनिक्त इति। परेण रूपेण व्यवहितत्वान्न भविष्यति।

तन्निमित्तग्रहणप्रत्याख्यानभाष्यम्- उपधार्थेन तावन्नार्थः। धातोरिति वर्तते। धातुं क्ङित्परत्वेन विशेषयिष्यामः।

आक्षेपभाष्यम्- यदि धातुर्विशेष्यते, विकरणस्य न प्राप्नोति—चिनुतः, सुनुतः, लुनीतः, पुनीत इति।

समाधानभाष्यम्- नैष दोषः। विहितविशेषणं धातुग्रहणम्—धातोर्यो विहित इति।

आक्षेपभाष्यम्- धातोरेव तर्हि प्राप्नोति।

समाधानभाष्यम्- नैवं विज्ञायते—धातोर्विहितस्य क्ङितीति। कथं तर्हि? धातोर्विहिते क्ङितीति।

समाधानान्तरभाष्यम्- अथवा—कार्यकालं हि सञ्ज्ञापरिभाषं, यत्र कार्यं तत्र द्रष्टव्यम्। 'पुगन्तलघूपधस्य गुणो भवति' इत्युपस्थितमिदं भवति 'क्ङिति न' इति।

अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं तदनवकाशम्। तस्यानवकाशत्वात् गुणवृद्धी न भविष्यतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति—'भवत्युपधालक्षणस्य गुणस्य प्रतिषेधः' इति। यदयं 'त्रसिगृधिधृषिक्षिपेः क्नुः' 'इको झल्, हलन्ताच्च' इति क्नुसनौ कितौ करोति। कथं कृत्वा ज्ञापकम्? कित्करण एतत्प्रयोजनम्—गुणः कथं न स्यात् इति। यदि चात्र गुणप्रतिषेधो न स्यात्, कित्करणमनर्थकं स्यात्। पश्यति त्वाचार्यः—भवत्युपधालक्षणस्य प्रतिषेध—इति। ततः क्नुसनौ कितौ करोति।

द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्- रोरवीत्यर्थेनापि नार्थः। क्ङितीत्युच्यते, न चात्र क्ङितं पश्यामः।

आक्षेपभाष्यम्- प्रत्ययलक्षणेन प्राप्नोति।

समाधानभाष्यम्- 'न लुमता तस्मिन्' इति प्रत्ययलक्षणप्रतिषेधः। अथापि 'न लुमताङ्गस्य' इत्युच्यते, एवमपि न दोषः। कथम्? न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते। किं तर्हि? योऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवतीति। अथाप्यङ्गाधिकारः प्रतिनिर्दिश्यते। एवमपि न दोषः। कथम्? 'कार्यकालं सञ्ज्ञापरिभाषम्' यत्र कार्यं तत्र द्रष्टव्यम्। 'सार्वधातुकार्धधातुकयोर्गुणो भवति' इत्युपस्थितमिदं भवति 'क्ङिति न' इति।

समाधानान्तरभाष्यम्- अथवा छान्दसमेतत्। दृष्टानुविधिश्छन्दसि भवति। अथवा बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। 'असिद्धं बहिरङ्गमन्तरङ्गे'। अथवा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं, तदनवकाशम्। तस्यानवकाशत्वाद् गुणो भविष्यति।

आक्षेपभाष्यम्- इह कस्मान्न भवति—'लैगवायनः' 'कामयते'?

(सिद्धान्तसमाधाने भाष्यवार्त्तिकम्)

* तद्धितकाम्योरिक्प्रकरणात् *

भाष्यम्- इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैते इग्लक्षणे।

स्थानिवत्त्वप्राप्तदोषवारणम्

(128. आक्षेपवार्त्तिकम्-4)

* लकारस्य ङित्त्वादादेशेषु स्थानिवत्प्रसङ्गः *

भाष्यम्- लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावः प्राप्नोति—अचिनवम्, असुनवम्, अकरवम्।

(एकदेशिसमाधानभाष्यवार्त्तिकम्)

* लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम् *

व्यख्याभाष्यम्- यदयं यासुटो ङिद्वचनं शास्ति तज्ज्ञापयत्याचार्यः—न ङिदादेशा ङितो भवन्तीति।

आक्षेपभाष्यम्- यद्येतज्ज्ञाप्यते, कथं 'नित्यं ङितः' 'इतश्च' इति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- ङितो यत्कार्यं तद्भावति, ङिति यत्कार्यं तन्न भवतीति।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि।

आक्षेपभाष्यम्- कथमनुच्यमानं गंस्यते?

समाधानभाष्यम्- यासुट एव ङिद्वचनात्। अपर्याप्तश्चैव हि यासुट् समुदायस्य ङित्त्वे। ङितं चैनं करोति, तस्यैतत्प्रयोजनम्—ङितो यत्कार्यं तद्यथा स्याद्, ङिति यत्कार्यं तन्मा भूदिति। क्ङिति च।

(5. **निषेधसूत्रम्** 1.1.4 आ. 3)

दीधीवेवीटाम् 1.1.6

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थमिदमुच्यते?

समाधानभाष्यम्- गुणवृद्धी मा भूतामिति। आदीध्यनम्, आदीध्यकः। आवेव्यनम्, आवेव्यकः इति।

दीधीवेवीप्रत्याख्यानभाष्यम्- अयं योगः शक्योऽकर्तुम्। कथम्?

(130. **सिद्धान्तवार्त्तिकम्**-1)

* दीधीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधित्वाच्च छन्दसश्छन्दस्यदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः *

भाष्यम्- दीधीवेव्योश्छन्दोविषयत्वात्। दीधीवेव्यौ छन्दोविषयौ। दृष्टानुविधित्वाच्छन्दसः। दृष्टानुविधिश्च छन्दसि भवति। 'छन्दसि अदीधेददीधयुरिति च गुणस्य दर्शनादप्रतिषेधः'। अनर्थकः प्रतिषेधः अप्रतिषेधः। 'प्रजापतिर्वै यत्किञ्चिन्मनसाऽदीधेत्', 'होत्राय वृतः कृपयन्नदीधेत् (ऋ. सं.-10.98.7)' 'अदीधयुर्दाशराज्ञे वृतासः (ऋ. सं.-7.33.5)'।

आक्षेपभाष्यम्- भवेदिदं युक्तमुदाहरणम्—अदीधेदिति। इदं त्वयुक्तम्—अदीधयुरिति। अयं जुसि गुणः प्रतिषेधविषय आरभ्यते, स यथैव 'क्ङिति न' इत्येतं प्रतिषेधं बाधते, एवमिममपि बाधेत।

समाधानभाष्यम्- नैष दोषः, जुसि गुणः प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते। कश्च तुल्यजातीयः प्रतिषेधः? यः प्रत्ययाश्रयः। प्रकृत्याश्रयश्चायम्।

समाधानान्तरभाष्यम्- अथवा—येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते 'क्ङिति न' इत्येतस्मिन्प्रतिषेधे जुसि गुण आरभ्यते। अस्मिन्पुनः प्राप्ते चाप्राप्ते च।

आक्षेपभाष्यम्- यदि तर्ह्ययं योगो नारभ्यते। कथं—दिध्यदिति?

(131. **सिद्धान्तसमाधानवार्त्तिकम्**-2)

* दीध्यदिति च श्यन्व्यत्ययेन *

भाष्यम्- दीध्यदिति च श्यन् व्यत्ययेन भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदेशिप्रत्याख्यानभाष्यम्- इटश्चापि ग्रहणं शक्यमकर्तुम्।

आक्षेपभाष्यम्- कथम्—अकणिषम्, अरणिषम्, कणिता श्वः, रणिता श्व इति।

समाधानभाष्यम्- 'आर्धधातुकस्येड्वलादेः' इत्यत्र इडिति वर्तमाने पुनरिड्ग्रहणस्य प्रयोजनम्—इडेव यथा स्यात्, यदन्यत्प्राप्नोति तन्मा भूदिति। किञ्चान्यत्प्राप्नोति? गुणः।

आक्षेपभाष्यम्- यदि नियमः क्रियते, 'पिपठिषतेरप्रत्ययः पिपठीः' दीर्घत्वं न प्राप्नोति।

समाधानभाष्यम्- नैष दोषः। आङ्गं यत्कार्यं तन्नियम्यते। न चैतदाङ्गम्।

समाधानान्तरभाष्यम्- अथवा असिद्धं दीर्घत्वं तस्यासिद्धत्वान्नियमो न भविष्यति। दीधीवेवीटाम्।

(6. **संयोगसञ्ज्ञासूत्रम्** 1.2.4 आ. 4)

हलोऽनन्तराः संयोगः 1.1.7

अनन्तरपदार्थनिरूपणाधिकरणम्

आक्षेपभाष्यम्- अनन्तरा इति। कथमिदं विज्ञायते—अविद्यमानमन्तरमेषामिति, आहोस्विदविद्यमाना अन्तरा एषामिति?

प्रत्याक्षेपभाष्यम्- किं चातः?

प्रत्याक्षेपसमाधानभाष्यम्- यदि विज्ञायते—अविद्यमानमन्तरमेषामिति, अवग्रहे संयोगसञ्ज्ञा न प्राप्नोति—'अप्स्विति-अप्ऽसु' (ऋ. सं. पद.-1.23.19) इति। विद्यते ह्यत्रान्तरम्। अथ विज्ञायते—अविद्यमाना अन्तरा एषामिति, न दोषो भवति।

द्वितीयपक्षाभ्युपगमभाष्यम्- यथा न दोषस्तथाऽस्तु।

प्रथमपक्षाभ्युपगमभाष्यम्- अथवा पुनरस्तु—अविद्यमानमन्तरमेषामिति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—अवग्रहे संयोगसञ्ज्ञा न प्राप्नोति— 'अप्स्विति अप्ऽसु' इति। विद्यते ह्यत्रान्तरम्।

आक्षेपबाधकभाष्यम्- नैव दोषो न प्रयोजनम्।

प्रत्येकं संयोगसञ्ज्ञानिराकरणाधिकरणम्

(132. **आक्षेपवार्त्तिकम्**-1)

* संयोगसञ्ज्ञायां सहवचनं यथान्यत्र *

भाष्यम्- संयोगसञ्ज्ञायां सहग्रहणं कर्तव्यम्। 'हलोनन्तराः संयोगः सह' इति वक्तव्यम्। किं प्रयोजनम्? सहभूतानां संयोगसञ्ज्ञा यथा स्यादेकैकस्य मा भूदिति। 'यत्रान्यत्र'। तद्यथा अन्यत्रापि यत्रेच्छति सहभूतानां कार्यं, करोति तत्र सहग्रहणम्। तद्यथा—'सह सुपा' 'उभे अभ्यस्तं सह' इति।

दूषणप्रश्नभाष्यम्- किं च स्यात् यद्येकैकस्य सञ्ज्ञा स्यात्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषप्रदर्शनभाष्यम्- इह—निर्यायात्, निर्वायात्, 'वान्यस्य संयोगादेः' इत्येत्वं प्रसज्येत। इह—संह्षीष्टेति, 'ऋतश्च संयोगादेः' इतीट्प्रसज्येत। इह च—संह्रियत इति 'गुणोर्ति-संयोगाद्योः' इति गुणः प्रसज्येत। इह च—दृषत्करोति, समित्करोतीति, 'संयोगान्तस्य लोपः' इति लोपः प्रसज्येत। इह च—शक्ता, वस्तेति 'स्कोः संयोगाद्योरन्ते च' इति लोपः प्रसज्येत। इह च—निर्यातो निर्वातः 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं प्रसज्येत।

दोषपरिहारभाष्यम्- नैष दोषः। यत्तावदुच्यते—इह तावन्निर्यायात् निर्वायात् 'वान्यस्य संयोगादेः' इत्येत्वं प्रसज्येतेति। नैवं विज्ञायते—संयोग आदिर्यस्य सोऽयं संयोगादिः, संयोगादेरिति। कथं तर्हि? संयोगावादी यस्य सोऽयं संयोगादिः, संयोगादेरिति। एवं ताव-त्सर्वमाङ्गं परिहृतम्।

द्वितीयदूषणोद्धारभाष्यम्- यदप्युच्यते—इह च दृषत्करोति-समित्करोति इति 'संयोगान्तस्य' इति लोपः प्रसज्येतेति। नैवं विज्ञायते—संयोगोऽन्तो यस्य तदिदं संयोगान्तं, संयोगान्तस्येति। कथं तर्हि? संयोगावन्तौ यस्य तदिदं संयोगान्तं, संयोगान्तस्येति।

तृतीयदूषणोद्धारभाष्यम्- यदप्युच्यते—इह च शक्ता-वस्तेति 'स्कोः संयोगाद्योरन्ते च' इति लोपः प्रसज्येतेति। नैवं विज्ञायते—संयोगावादी संयोगादी, संयोगाद्योरिति। कथं तर्हि? संयोगयोरादी संयोगादी, संयोगाद्योरिति।

चतुर्थदूषणोद्धारभाष्यम्- यदप्युच्यते—इह च निर्यातो निर्वात इति 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं प्रस ज्येतेति। नैवं विज्ञायते—संयोग आदिर्यस्यासौ संयोगादिः, संयोगादेरिति। कथं तर्हि? संयोगावादी यस्य सोऽयं संयोगादिः, संयोगादेरिति।

आक्षेपभाष्यम्- 'प्रत्येकं कथं कृत्वा एकैकस्य संयोगसञ्ज्ञा प्राप्नोति?

समाधानभाष्यम्- 'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा' इति। तद्यथा वृद्धिगुणसञ्ज्ञे प्रत्येकं भवतः।

समाधानबाधकप्रतिबन्दीसिद्धान्तभाष्यम्- ननु चायमप्यस्ति दृष्टान्तः—समुदाये वाक्यपरिसमाप्तिः इति। तद्यथा—गर्गाः शतं दण्ड्यन्ताम् इति। अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति।

सहग्रहणप्रत्याख्यानभाष्यम्- सत्येतस्मिन्दृष्टान्ते यदि तत्र प्रत्येकमित्युच्यते, इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमितिवचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः, इहापि नार्थः सहग्रहणेन।

आक्षेपभाष्यम्- अथ यत्र बहूनामानन्तर्यं, किं तत्र द्वयोर्द्वयोः संयोगसञ्ज्ञा भवति, आहोस्विदविशेषेण।

भाष्यम्- कश्चात्र विशेषः?

(133. **आक्षेपवार्त्तिकम्**-2)

* समुदाये संयोगादिलोपो मस्जेः *

भाष्यम्- समुदाये संयोगादिलोपो मस्जेर्न सिद्ध्यति। मङ्क्ता, मङ्क्तुम्। इह च निर्ग्लेयात्-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्ग्लायात्, निर्म्लेयात्-निर्म्लायात्, 'वाऽन्यस्य संयोगादेः' इत्येत्वं न प्राप्नोति। इह च संस्वरिषीष्टेति, 'ऋतश्च संयोगादेः' इतीट् न प्राप्नोति। इह च संस्वर्यते इति 'गुणोऽर्तिसंयोगाद्योः' इति गुणो न प्राप्नोति। इह च गोमान्करोति-यवमान्करोतीति, 'संयोगान्तस्य लोपः' इति लोपो न प्राप्नोति। इह च निर्ग्लानो निर्म्लान इति, 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं न प्राप्नोति।

प्रथमपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि—द्वयोर्द्वयोः संयोगः।

(134. **आक्षेपवार्त्तिकम्**-3)

* हलोः संयोग इति चेद् द्विर्वचनम् *

भाष्यम्- द्वयोर्हलोः संयोग इति चेद्द्विर्वचनं न सिद्ध्यति। इन्द्रमिच्छति इन्द्रीयति। इन्द्रीयतेः सन् इन्दिद्रीयिषति। 'न न्द्राः संयोगादयः' इति द्विर्वचनं न प्राप्नोति।

(135. **समाधानवार्त्तिकम्**-4)

* न वाऽज्विधेः *

भाष्यम्- न वा एष दोषः। किं कारणम्? अज्विधेः। नदराः संयोगादयो न द्विरुच्यन्ते। अजादेरिति वर्तते।

आक्षेपभाष्यम्- अथ यद्येवं बहूनां संयोगसञ्ज्ञा, अथापि द्वयोर्द्वयोः। किं गतमेतदियता सूत्रेण, आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्?

समाधानभाष्यम्- गतमित्याह। कथम्? यदा तावद्बहूनां संयोगसञ्ज्ञा, तदैवं विग्रहः करिष्यते—'अविद्यमानमन्तरमेषाम्' इति।

समाधानशेषभाष्यम्- यदा द्वयोर्द्वयोः संयोगसञ्ज्ञा, तदैवं विग्रहः करिष्यते—'अविद्यमाना अन्तरा एषाम्' इति। द्वयोश्चैवान्तरा कश्चिद्विद्यते वा न वा।

आक्षेपभाष्यम्- एवमपि बहूनामेव प्राप्नोति। यान् हि भवानत्र षष्ठ्या प्रतिनिर्दिशति, एतेषामन्येन व्यवाये न भवितव्यम्।

समुदायसञ्ज्ञाभ्युपगमभाष्यम्- अस्तु तर्हि समुदाये सञ्ज्ञा।

समुदायसञ्ज्ञादूषणस्मारणभाष्यम्- ननु चोक्तं—'समुदाये संयोगादिलोपो मस्जेः' इति।

समुदायसञ्ज्ञादूषणनिराकरणसिद्धान्तिभाष्यम्- नैष दोषः। वक्ष्यत्येतत्—'अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्' इति।

समुदायसञ्ज्ञादूषणनिराकरणैकदेशिभाष्यम्- अथवाऽविशेषेण संयोगसञ्ज्ञा विज्ञास्यते—द्वयोरपि, बहूनामपि। तत्र द्वयोर्या संयोगसञ्ज्ञा, तदाश्रयो लोपो भविष्यति।

समुदायसञ्ज्ञापक्षोक्तदूषणान्तरनिराकरणसिद्धान्तिभाष्यम्- यदप्युच्यते—'इह च निर्ग्लेयात्-निर्ग्लायात्, निर्म्लेयात्-निर्म्लायादिति 'वान्यस्य संयोगादेः' इत्येत्वं न

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्नोति' इति। अङ्गेन संयोगादिं विशेषयिष्यामः—अङ्गस्य संयोगादेरिति। एवं तावत्सर्वमाङ्गं परिहृतम्। यदप्युच्यते—इह च गोमान्करोति-यवमान्करोतीति 'संयोगान्तस्य लोपः' इति लोपो न प्राप्नोति इति। पदेन संयोगान्तं विशेषयिष्यामः—पदस्य संयोगान्तस्येति। यदप्युच्यते—'इह च निर्ग्लानो निर्म्लान इति 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं न प्राप्नोति इति। धातुना संयोगादिं विशेषयिष्यामः—धातोः संयोगादेरिति।

अनन्तरशब्दार्थनिरूपणम्

(136. **आक्षेपवार्त्तिकम्-1**)

*** स्वरानन्तर्हितवचनम् ***

भाष्यम्- स्वरैरनन्तर्हिता हलः संयोगसञ्ज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्? व्यवहितानां मा भूत्। पचति, पनसम्।

आक्षेपबाधकभाष्यम्- ननु च 'अनन्तराः' इत्युच्यते। तेन व्यवहितानां न भविष्यति।

(आक्षेपसाधकं भाष्यवार्तिकम्)

*** दृष्टमानन्तर्यं व्यवहितेऽपि ***

भाष्यम्- व्यवहितेऽप्यनन्तरशब्दो दृश्यते। तद्यथा—'अनन्तराविमौ ग्रामौ' इत्युच्यते, तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्ति।

आक्षेपबाधकभाष्यम्- यदि तर्हि व्यवहितेऽप्यनन्तरशब्दो भवति। आनन्तर्यवचनमिदानीं किमर्थं स्यात्?

(आक्षेपसाधकं भाष्यवार्त्तिकम्)

*** आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम् ***

भाष्यम्- एकस्य हलः संयोगसञ्ज्ञा मा भूदिति। किञ्च स्याद्यद्येकस्य हलः संयोगसञ्ज्ञा स्यात्? इयेष-उवोष 'इजादेश्च गुरुमतोऽनृच्छः' इत्याम् प्रसज्येत।

(137. **समाधानवार्त्तिकम्-6**)

*** न वाऽतज्जातीयव्यवायात् ***

भाष्यम्- न वा एष दोषः। किं कारणम्? अतज्जातीयस्य व्यवायात्। अतज्जातीयकं हि लोके व्यवधायकं भवति।

अनुयोगभाष्यम्- कथं पुनर्ज्ञायते—अतज्जातीयकं लोके व्यवधायकं भवतीति?

उत्तरभाष्यम्- एवं हि कश्चित् कश्चित्पृच्छति—'अनन्तरे एते ब्राह्मणकुले' इति। स आह—'नानन्तरे, वृषलकुलमनयोरन्तरा' इति।

आक्षेपभाष्यम्- किं पुनः कारणं क्वचिदतज्जातीयं व्यवधायकं भवति, क्वचिन्न?

समाधानभाष्यम्- सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति।

आक्षेपभाष्यम्- कथम्—अनन्तराविमौ ग्रामाविति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते, तद्यथा—ग्रामो दग्ध इति। अस्ति वाटपरिक्षेपे वर्तते, तद्यथा—ग्रामं प्रविष्ट इति। अस्ति मनुष्येषु वर्तते, तद्यथा—ग्रामो गतो ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते, तद्यथा—ग्रामो लब्ध इति। तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते—अनन्तराविमौ ग्रामाविति। सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति। हलोनन्तराः।

(7. अनुनासिकसञ्ज्ञासूत्रम् 1.1.4 आ. 5)

मुखनासिकावचनोऽनुनासिकः 1.1.8

मुखनासिकावचनशब्दार्थनिरूपणम्

आक्षेपभाष्यम्- किमिदं 'मुखनासिकावचनः' इति?

समाधानभाष्यम्- मुखं च नासिका च मुखनासिकम्। मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः।

आक्षेपभाष्यम्- यद्येवं मुखनासिकवचन इति प्राप्नोति।

समाधानभाष्यम्- निपातनाद्दीर्घत्वं भविष्यति।

समाधानान्तरभाष्यम्- अथवा मुखनासिकमावचनमस्य सोऽयं मुखनासिकावचनः।

आक्षेपभाष्यम्- अथ किमिदमावचनमिति?

समाधानभाष्यम्- ईषद्वचनमावचनमिति। किञ्चिन्मुखवचनं, किञ्चिन्नासिकावचनम्।

समासान्तरभाष्यम्- मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः।

समाधानान्तरभाष्यम्- मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः।

पदकृत्यनिर्वचनायाक्षेपभाष्यम्- अथ मुखग्रहणं किमर्थम्?

समाधानभाष्यम्- 'नासिकावचनोऽनुनासिकः' इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत। मुखग्रहणे पुनः क्रियमाणे न दोषो भवति।

आक्षेपभाष्यम्- अथ नासिकाग्रहणं किमर्थम्?

समाधानभाष्यम्- 'मुखवचनोऽनुनासिकः' इतीयत्युच्यमाने क-च-य-त-पानामेव प्रसज्येत। नासिकाग्रहणे पुनः क्रियमाणे न दोषो भवति।

मुखग्रहणप्रत्याख्यानभाष्यम्- मुखग्रहणं शक्यमकर्तुम्।

आक्षेपभाष्यम्- केनेदानीमुभयवचनानां भविष्यति?

समाधानभाष्यम्- प्रासादवासिन्यायेन। तद्यथा—केचित्प्रासादवासिनः, केचिद्भूमिवासिनः, केचिदुभयवासिनः। ये प्रासादवासिनः, गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिनः, गृह्यन्ते ते भूमिवासिग्रहणेन। ये उभयवासिनः, गृह्यन्त एव ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च। एवमिहापि केचिन्मुखवचनाः, केचिन्नासिकावचनाः, केचिदुभयवचनाः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र ये मुखवचनाः, गृह्यन्ते ते मुखग्रहणेन। ये नासिकावचनाः, गृह्यन्ते ते नासिकाग्रहणेन। ये उभयवचनाः, गृह्यन्त एव ते मुखग्रहणेन नासिकाग्रहणेन च।

आक्षेपभाष्यम्- भवेदुभयवचनानां सिद्धम्। यमानुस्वाराणामपि प्राप्नोति।

समाधानभाष्यम्- नैव दोषो न प्रयोजनम्।

अन्योन्याश्रयपरिहारायाक्षेपभाष्यम्- 'इतरेतराश्रयं तु भवति'। का इतरेतराश्रयता? सतोऽनुनासिकस्य संज्ञया भवितव्यम्, संज्ञया च नामानुनासिको भाव्यते, तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

सिद्धान्तसमाधानभाष्यम्- अनुनासिकसञ्ज्ञायामितरेतराश्रये उक्तम्'। किमुक्तम्? 'सिद्धं तु नित्यशब्दत्वात्' इति। नित्याः शब्दाः। नित्येषु च शब्देषु सतोऽनुनासिकस्य सञ्ज्ञा क्रियते, न संज्ञयाऽनुनासिको भाव्यते। यदि तर्हि नित्याः शब्दाः, किमर्थं शास्त्रम्?

(सिद्धान्तभाष्यवार्त्तिकम्)

* किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् *

भाष्यम्- निवर्तकं शास्त्रम्। कथम्? आङस्मायविशेषेणोपदिष्टोऽननुनासिकः। तस्य सर्वत्राननुनासिकबुद्धिः प्रसक्ता, तस्यानेन निवृत्तिः क्रियते—छन्दस्यचि परत आङोऽननुनासिकस्य प्रसङ्गेऽनुनासिकः साधुर्भवतीति। मुखनासिकावचनोऽनुनासिकः।

सवर्णसञ्ज्ञाप्रकरणम्

(8. **सवर्णसञ्ज्ञासूत्रम्** 1.1.4 आ. 6)

तुल्यास्यप्रयत्नं सवर्णम् 1.1.9

तुल्यास्यप्रयत्नपदार्थनिरूपणम्

विग्रहदर्शकभाष्यम्- तुलया सम्मितं तुल्यम्। आस्यं च प्रयत्नश्च आस्यप्रयत्नम्। तुल्यास्यं तुल्यप्रयत्नं च सवर्णसंज्ञं भवति।

जिज्ञासाभाष्यम्- किं पुनरास्यम्?

समाधानभाष्यम्- लौकिकमास्यम्। ओष्ठात्प्रभृति प्राक्काकलकात्।

आक्षेपभाष्यम्- कथं पुनरास्यम्?

समाधानभाष्यम्- अस्यन्त्यनेन वर्णानिति आस्यम्। अन्नमेतदास्यन्दत इति वा आस्यम्।

आक्षेपभाष्यम्- अथ कः (पुनः) प्रयत्नः?

समाधानभाष्यम्- प्रयतनं प्रयत्नः। प्रपूर्वाद्यततेर्भावसाधनो नङ् प्रत्ययः।

आक्षेपभाष्यम्- यदि लौकिकमास्यम्। किमास्योपादाने प्रयोजनम्। सर्वेषां हि तत्तुल्यम्भवति?

समाधानभाष्यम्- वक्ष्यत्येतत्—'प्रयत्नविशेषणमास्योपादानम्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(138. आक्षेपवार्त्तिकम्- 1)

* सवर्णसञ्ज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात् *

भाष्यम्- सवर्णसञ्ज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति—जबगडदशाम्। किं कारणम्? प्रयत्नसामान्यात्। एतेषां हि समानः प्रयत्नः।

(139. न्यासान्तरेण समाधानवार्त्तिकम्- 2)

* सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् *

भाष्यम्- सिद्धमेतत्। कथम्? आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसञ्ज्ञा भवन्तीति वक्तव्यम्।

आक्षेपभाष्यम्- एवमपि किमास्योपादाने प्रयोजनम्, सर्वेषां हि तत्तुल्यम्?

समाधानभाष्यम्- प्रयत्नविशेषणमास्योपादानम्। सन्ति हि आस्याद्बाह्याः प्रयत्नाः, ते हापिता भवन्ति। तेषु सत्स्वसत्स्वपि सवर्णसञ्ज्ञा सिद्धा भवति। के पुनस्ते? विवारसंवारौ, श्वासनादौ, घोषवदघोषता, अल्पप्राणता महाप्राणता इति। तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः श्वासानुप्रदाना अघोषाः। एके—अल्पप्राणाः, अपरे—महाप्राणाः। तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः। एके—अल्पप्राणाः, अपरे—महाप्राणाः। यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यवर्जम्। आनुनासिक्यमेषामधिको गुणः।

आक्षेपभाष्यम्- एवमप्यवर्णस्य सवर्णसञ्ज्ञा न प्राप्नोति, बाह्यं ह्यास्यात्स्थानमवर्णस्य।

समाधानभाष्यम्- सर्वमुखस्थानमवर्णम् एक इच्छन्ति।

आक्षेपभाष्यम्- एवमपि व्यपदेशो न प्रकल्पते—'आस्ये येषां तुल्यो देशः' इति।

समाधानभाष्यम्- व्यपदेशिवद्भावेन व्यपदेशो भविष्यति।

आक्षेपभाष्यम्- सिध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिसमाधानभाष्यम्- यथान्यासमेवास्तु।

आक्षेपस्मारकभाष्यम्- ननु चोक्तम्—'सवर्णसञ्ज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्' इति।

सिद्धान्तिसमाधानभाष्यम्- नैष दोषः। न हि लौकिकमास्यम्। किं तर्हि? तद्धितान्तमास्यम्। आस्ये भवमास्यम्, 'शरीरावयवाद्यत्'। किं पुनरास्ये भवम्? स्थानं करणञ्च।

आक्षेपभाष्यम्- एवमपि प्रयत्नोऽविशेषितो भवति?

समाधानभाष्यम्- प्रयत्नश्च विशेषितः। कथम्? न हि प्रयतनं प्रयत्नः। किं तर्हि? प्रारम्भो यत्नस्य प्रयत्नः।

आक्षेपभाष्यम्- यदि प्रारम्भो यत्नस्य प्रयत्नः, एवमप्यवर्णस्य एङोश्च सवर्णसञ्ज्ञा प्राप्नोति।

समाधानभाष्यम्- प्रश्लिष्टावर्णावेतौ।

आक्षेपभाष्यम्- अवर्णस्य तर्ह्यैचोश्च सवर्णसञ्ज्ञा प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- विवृततरावर्णावेतौ।

आक्षेपभाष्यम्- एतयोरेव तर्हि मिथः सवर्णसञ्ज्ञा प्राप्नोति।

समाधानभाष्यम्- नैतो तुल्यस्थानौ।

आक्षेपभाष्यम्- उदात्तादीनां तर्हि सवर्णसञ्ज्ञा न प्राप्नोति।

समाधानभाष्यम्- अभेदका उदात्तादयः।

एकदेशिभाष्यम्- अथवा किं न एतेन—प्रारम्भो यत्नस्य प्रयत्न इति। किं तर्हि? प्रयतनमेव प्रयत्नः। तदेव च तद्धितान्तमास्यम्। यत्समानं तदाश्रयिष्यामः। किं सति भेदे? सतीत्याह। सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम्। कुत एतत्? भेदाधिष्ठाना हि सर्वणसञ्ज्ञा, यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसञ्ज्ञावचनमर्थकं स्यात्।

सिद्धान्तिन आक्षेपभाष्यम्- यदि तर्हि 'सति भेदे किञ्चित्समानम्' इति कृत्वा सवर्णसञ्ज्ञा भविष्यति। शकार-छकारयोः षकार-ठकारयोः सकार-थकारयोः सवर्णसञ्ज्ञा प्राप्नोति। एतेषां हि सर्वमन्यत्समानं करणवर्जम्।

एकदेशिसमाधानभाष्यम्- एवं तर्हि—प्रयतनमेव प्रयत्नः। तदेव तद्धितान्तमास्यम्। न त्वयं द्वन्द्वः—आस्यं च प्रयत्नश्च आस्यप्रयत्नमिति। किं तर्हि? त्रिपदोऽयं बहुव्रीहिः—तुल्य आस्ये प्रयत्न एषामिति।

भाष्यम्- अथवा पूर्वस्तत्पुरुषस्ततो बहुव्रीहिः—तुल्य आस्ये तुल्यास्यः, तुल्यास्यः प्रयत्न एषामिति। अथवा परस्तत्पुरुषस्ततो बहुव्रीहिः—आस्ये प्रयत्नः आस्यप्रयत्नः, तुल्य आस्यप्रयत्नो येषामिति।

अनिष्टसावर्ण्यनिराकरणाधिकरणम्

(140. **आक्षेपवार्त्तिकम्-3**)

*** तस्य ***

भाष्यम्- तस्येति तु वक्तव्यम्। किं प्रयोजनम्? यो यस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसञ्ज्ञो यथाा स्यात्। अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसञ्ज्ञो मा भूत् इति।

(141. **समाधानवार्त्तिकम्-4**)

*** तस्यावचनं वचनप्रामाण्यात् ***

भाष्यम्- तस्येति न वक्तव्यम्। अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति? वचनप्रामाण्यात्। सवर्णसञ्ज्ञावचनसामर्थ्यात्। यदि हि अन्यस्य तुल्यास्यप्रयत्नो-ऽन्यस्य सवर्णसंज्ञः स्यात् सवर्णसञ्ज्ञावचनमनर्थकं स्यात्।

(142. **समाधानवार्त्तिकम्-5**)

*** सम्बन्धिशब्दैर्वा तुल्यम् ***

भाष्यम्- सम्बन्धिशब्दैर्वा पुनस्तुल्यमेतत्। तद्यथा—सम्बन्धिशब्दाः 'मातरि वर्तितव्यम्'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पितरि शुश्रूषितव्यम्' इति। न चोच्यते—'स्वस्यां मातरि' 'स्वस्मिन् वा पितरि' इति। सम्बन्धाच्चैतद्गम्यते—या यस्य माता, यश्च यस्य पितेति। एवमिहापि—'तुल्यास्यप्रयत्नं सवर्णम्' इत्यत्र सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतदवगन्तव्यम्—यत्प्रति यत्तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवतीति।

ऋऌवर्णयोः सावर्ण्यम्

(143. आक्षेपवार्त्तिकम्-1)

*** ऋकारऌकारयोः सवर्णविधिः ***

भाष्यम्- ऋकारऌकारयोः सवर्णसञ्ज्ञा विधेया। होतृऌकारः होतृकार इति। किं प्रयोजनम्? 'अकः सवर्णे दीर्घः' इति दीर्घत्वं यथा स्यात्।

सावर्ण्यखण्डनभाष्यम्- नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्—'सवर्णदीर्घत्वे ऋति ॠ वा वचनम्' 'ऌति ॡ वा वचनम्' इति।

सावर्ण्यमण्डनभाष्यम्- तत्सवर्णे यथा स्यात्। इह मा भूत्—दध्य्ऌकारः, मध्व्ऌकार इति।

सावर्ण्यखण्डनभाष्यम्- यदेतत्सवर्णदीर्घत्वे ऋतीति, एतदृत इति वक्ष्यामि। ततः—'ऌति'। ऌकारे वा ॡ भवति, ऋत इत्येव।

सावर्ण्यमण्डनभाष्यम्- तत्र वक्तव्यं भवति।

सावर्ण्यखण्डनभाष्यम्- अवश्यं तद्वक्तव्यम्। ऊकालोऽच् ह्रस्वदीर्घप्लुतसञ्ज्ञो भवतीत्युच्यते। न च ऋकार ऌकारो वाऽजस्ति।

सावर्ण्यमण्डनभाष्यम्- ऋकारस्य ऌकारस्य चाच्त्वं वक्ष्यामि। तच्चावश्यं वक्तव्यम्, प्लुतो यथा स्यात्। होतृ ऋकारः होतॄकारः, होतॄ३कारः। होतृ ऌकारः होत्ॡकारः, होत्ॡ३कार इति।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- सवर्णसञ्ज्ञावचनमेव ज्यायः। दीर्घत्वं चैव हि सिद्धं भवति। अपि च ऋकारग्रहणे ऌकारग्रहणं सन्निहितं भवति। 'ऋत्यकः' खट्वऋष्यः मालऋष्यः। इदमपि सिद्धं भवति—खट्वऌकारो मालऌकार इति। 'वा सुप्यापिशलेः' उपर्कारीयति उपार्कारीयति। इदमपि सिद्धं भवति—उपल्कारीयति उपाल्कारीयति।

एकदेशिन आक्षेपभाष्यम्- यदि तर्हि ऋकारग्रहणे ऌकारग्रहणं सन्निहितं भवति, 'उरण् रपरः' ऌकारस्यापि रपरत्वं प्राप्नोति।

समाधानभाष्यम्- ऌकारस्य लपरत्वं वक्ष्यामि। तच्चावश्यं वक्तव्यम्। असत्यां सवर्णसञ्ज्ञायां विध्यर्थम्। तदेव सत्यां रेफबाधनार्थं भविष्यति।

एकदेशिन आक्षेपभाष्यम्- इह तर्हि—'रषाभ्यां नो णः समानपदे' इत्यृकारग्रहणं चोदितं मातॄणां पितॄणामित्येतदर्थम्। तदिहापि प्राप्नोति—क्ऌप्यमानं पश्येति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिबन्दीभाष्यम्– अथासत्यामपि सवर्णसञ्ज्ञायाम्, इह कस्मान्न भवति— प्रक्लृप्यमानं पश्येति।

प्रतिबन्दीसमाधानेनाक्षेपनिरासभाष्यम्– 'चुटुतुलशर्व्यवाये न' इति वक्ष्यामि। अपर आह—'त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये न' इति वक्ष्यामीति। वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ लृकारे लकारस्तदाश्रयः प्रतिषेधो भविष्यति।

सिद्धान्तोपसंहारभाष्यम्– यद्येवं, नार्थो रषाभ्यां णत्वे ऋकारग्रहणेन। वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ ऋकारे रेफः, तदाश्रयं णत्वं भविष्यति। तुल्यास्य.।

(9. सञ्ज्ञानिषेधसूत्रं परिभाषासूत्रं वा 1.1.4 आ. 7)

नाज्झलौ 1.1.10

(144. आक्षेपवार्त्तिकम्-1)

* अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात् *

भाष्यम्– अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसञ्ज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणम्? अज्झल्त्वात्। अच्चैव हि शकारो हल्च। इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्। हल्षु चोपदेशाद्धल्त्वम्।

वार्तिकांशावतरणभाष्यम्– तत्र को दोषः?

(145. आक्षेपसाधकवार्तिकम्-2)

* तत्र सवर्णलोपे दोषः *

भाष्यम्– तत्र सवर्णलोपे दोषो भवति। परश्शतानि कार्याणि—'झरो झरि सवर्णे' इति लोपो न प्राप्नोति।

(146. समाधानवार्त्तिकम्-3)

* सिद्धमनच्त्वात् *

भाष्यम्– सिद्धमेतत्? कथम्? अनच्त्वात्। कथमनच्त्वम्। 'स्पृष्टं करणं स्पर्शानाम्'। 'ईषत्स्पृष्टमन्तःस्थानाम्'। 'विवृतमूष्मणाम्'। ईषदित्येवानुवर्तते। 'स्वराणां च' विवृतम्। ईषदिति निवृत्तम्।

(147. समाधानान्तरवार्त्तिकम्-4)

* वाक्यापरिसमाप्तेर्वा *

भाष्यम्– वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत्। किमिदं वाक्यापरिसमाप्तेरिति? वर्णानामुपदेशस्तावत्। उपदेशोत्तरकाला इत्सञ्ज्ञा। इत्सञ्ज्ञोत्तरकालः 'आदिरन्त्येन सहेता' इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसञ्ज्ञा। सवर्णसञ्ज्ञोत्तरकालम् 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सवर्णग्रहणम्। एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति। न चात्रेकारः शकारं गृह्णाति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- यथैव तर्हीकारः शकारं न गृह्णाति। एवमीकारमपि न गृह्णीयात्। तत्र को दोषः? कुमारी ईहते कुमारीहते, 'अकः सवर्णे' (इति) दीर्घत्वं न प्राप्नोति।

समाधानभाष्यम्- नैष दोषः। यदेतत् 'अकः सवर्णे दीर्घः' इति प्रत्याहारग्रहणं, तत्रेकार ईकारं गृह्णाति, शकारं न गृह्णाति।

व्याख्यान्तरभाष्यम्- अपर आह—'अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्'। अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसञ्ज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणम्? अज्झल्त्वात्। अच्चैव हि शकारो हल्च। कथं तावदच्त्वम्? इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्, हल्षु चोपदेशाद्धल्त्वम्। तत्र को दोषः? 'तत्र सवर्णलोपे दोषः'। तत्र सवर्णलोपे दोषो भवति। परश्शतानि कार्याणि। 'झरो झरि सवर्णे' इति लोपो न प्राप्नोति। 'सिद्धमनच्त्वात्'। सिद्धमेतत्। कथम्? अनच्त्वात्। कथमनच्त्वम्? 'वाक्यापरिसमाप्तेर्वा'। उक्ता वाक्यापरिसमाप्तिः।

आक्षेपभाष्यम्- अस्मत्पक्षे—वेत्येतदसमर्थितं भवति।

समाधानभाष्यम्- एतच्च समर्थितम्। कथम्? अस्तु वा शकारस्य शकारेण सवर्णसञ्ज्ञा, मा वा भूत्।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—परश्शतानि कार्याणि, 'झरो झरि सवर्णे' इति लोपो न प्राप्नोति।

आक्षेपबाधकभाष्यम्- भा भूल्लोपः।

आक्षेपसाधकभाष्यम्- ननु च भेदो भवति—सति लोपे द्विशकारम्, असति लोपे त्रिशकारम्।

आक्षेपबाधकभाष्यम्- नास्ति भेदः; असत्यपि लोपे द्विशकारमेव। कथम्? विभाषा द्विर्वचनम्।

आक्षेपसाधकभाष्यम्- एवमपि भेदः, असति लोपे कदाचिद् द्विशकारम्, कदाचित् त्रिशकारम्। सति लोपे द्विशकारमेव।

तटस्थाक्षेपभाष्यम्- स एष कथं भेदो न?

तटस्थाक्षेपनिरासभाष्यम्- स्यात्, यदि नित्यो लोपः स्यात्। विभाषा तु स लोपः।

समाधानभाष्यम्- यथाऽभेदस्तथास्तु। नाज्झलौ।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमेऽध्याये प्रथमे पादे पञ्चममाह्निकम्

अथ प्रगृह्यसञ्ज्ञाप्रकरणम्

(10. **प्रगृह्यसञ्ज्ञासूत्रम्** 1.1.5 आ. 1)

ईदूदेद् द्विवचनं प्रगृह्यम् 1.1.11

तपरपाठप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थमिदानीं तपराणां प्रगृह्यसञ्ज्ञोच्यते?

समाधानभाष्यम्- 'तपरस्तत्कालस्य' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। केषाम्? उदात्तानुदात्तस्वरितानाम्।

भाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति? प्लुतानां तु प्रगृह्यसञ्ज्ञा न प्राप्नोति। किं कारणम्? अतत्कालत्वात्। न हि प्लुतास्तत्कालाः।

आक्षेपबाधकभाष्यम्- असिद्धः प्लुतः। तस्यासिद्धत्वात्तत्काला एव भवन्ति।

आक्षेपसाधकभाष्यम्- सिद्धः प्लुतः स्वरसन्धिषु। कथं ज्ञायते—सिद्धः प्लुतः स्वरसन्धिषु' इति। यदयं 'प्लुतः प्रकृत्या' इति प्लुतस्य प्रकृतिभावं शास्ति। कथं कृत्वा ज्ञापकम्सतो हि कार्यिणः कार्येण भवितव्यम्।

प्रयोजनजिज्ञासाभाष्यम्- किमेतस्य ज्ञापने प्रयोजनम्?

प्रयोजनभाष्यम्- 'अप्लुतादप्लुते' इत्येतन्न वक्तव्यं भवति।

आक्षेपबाधकभाष्यम्- किमतो यत्सिद्धः प्लुतः स्वरसन्धिषु। सञ्ज्ञाविधावसिद्धः। तस्यासिद्धत्वात्तत्काला एव भवन्ति।

आक्षेपसाधकभाष्यम्- सञ्ज्ञाविधौ च सिद्धः। कथम्? कार्यकालं हि सञ्ज्ञापरिभाषम्, यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्, 'प्रगृह्यः प्रकृत्या' इत्युपस्थितमिदं भवति—'ईदूदेद् द्विवचनं प्रगृह्यम्' इति।

प्रत्याक्षेपभाष्यम्- किं पुनः प्लुतस्य प्रगृह्यसञ्ज्ञावचने प्रयोजनम्?

समाधानभाष्यम्- प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्।

प्रत्याक्षेपबाधकभाष्यम्- मा भूदेवम्। प्लुतः प्रकृत्या—इत्येवं भविष्यति।

प्रत्याक्षेपसाधकभाष्यम्- नैवं शक्यम्। उपस्थिते हि दोषः स्यात्। 'अप्लुतवदुपस्थिते' इति। अत्र पठिष्यति ह्याचार्यः—'वद्वचनं प्लुतकार्यप्रतिषेधार्थम्। प्लुतप्रतिषेधे हि प्रगृह्य-प्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वात्' इति। तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या। प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्।

आक्षेपबाधकरीत्यन्तरनिराकरणभाष्यम्- यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसञ्ज्ञोच्यते, एवमप्येकार एव एकः सवर्णान्गृह्णीयात्, ईकारोकारौ न गृह्णीयाताम्। किं कारणम्? अनण्त्वात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकरीत्यन्तरनिराकरणभाष्यम्- यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसञ्ज्ञोच्यते। नैवं शक्यम्। इहापि प्रसज्येत—अकुर्वहि, अत्र अकुर्वह्यत्रेति।

आक्षेपोपसंहारभाष्यम्- तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसञ्ज्ञा वक्तव्या। दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति।

समाधानभाष्यम्- एवं तर्हि किं न एतेन यत्नेन यत्—'सिद्धः प्लुतः स्वरसन्धिषु' इति। असिद्धः प्लुतः। तस्यासिद्धत्वात्तत्काला एव भवन्ति।

आक्षेपभाष्यम्- कथं यत्तज्ज्ञापकमुक्तम्—'प्लुतप्रगृह्या अचि' इति?

समाधानभाष्यम्- प्लुतभावी प्रकृत्या—इत्येवमेतद्विज्ञायते।

आक्षेपभाष्यम्- कथं यत्तत्प्रयोजनमुक्तम्?

समाधानभाष्यम्- क्रियते तन्न्यास एव—'अप्लुतादप्लुते' इति।

आक्षेपभाष्यम्- एवमपि यत्सिद्धे प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति—'अणोऽप्रगृह्यस्यानुनासिकः' इति।

समाधानभाष्यम्- एवं तर्हि किं न एतेन यत्नेन—'कार्यकालं सञ्ज्ञापरिभाषम्' इति। यथोद्देशमेव सञ्ज्ञापरिभाषम्। अत्र चासावसिद्धः, तस्यासिद्धत्वात्तत्काला एव भवन्ति।

द्विवचनविशेषणताविचारभाष्यम्- कथं पुनरिदं विज्ञायते—ईदादयो यद् द्विवचनम्, आहोस्विदीदाद्यन्तं यद् द्विवचनमिति।

विशेषजिज्ञासाभाष्यम्- कश्चात्र विशेषः?

(148. **प्रथमपक्षे दोषप्रदर्शकवार्त्तिकम्**- 1)

* ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः *

भाष्यम्- ईदादयो द्विवचनं प्रगृह्या इति चेत्, अन्त्यस्य प्रगृह्यसञ्ज्ञा विधेया—पचेते इति, पचेथे इति।

दूषणबाधकभाष्यम्- वचनाद्भविष्यति।

दूषणसाधकभाष्यम्- अस्ति वचने प्रयोजनम्। किम्? खट्वे इति, माले इति।

दूषणबाधकद्वितीयपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि ईदाद्यन्तं यद् द्विवचनम् इति।

(149. **द्वितीयपक्षे दूषणवार्त्तिकम्**- 2)

* ईदाद्यन्तमिति चेदेकस्य विधिः *

भाष्यम्- ईदाद्यंन्तं द्विवचनमिति चेदेकस्य प्रगृह्यसञ्ज्ञा विधेया—खट्वे इति, माले इति।

(150. **द्वितीयपक्षे समाधानवार्त्तिकम्**- 3)

* न वाऽऽद्यन्तवत्त्वात् *

भाष्यम्- न वा एष दोषः। किं कारणम्? आद्यन्तवत्त्वात्। आद्यन्तवदेकस्मिन्कार्यं भवतीत्येवमेकस्यापि भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयपक्षाभ्युपगमभाष्यम्- अथवा एवं वक्ष्यामि—'ईदाद्यन्तम्'। ईदाद्यन्तं यद् द्विवचनान्तम् इति।

(151. आक्षेपवार्त्तिकम्-4)

* ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः *

भाष्यम्- ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधो वक्तव्यः। कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारम्। एतद्धीदाद्यन्तं श्रूयते, द्विवचनान्तं च भवति प्रत्ययलक्षणेन।

(152. समाधानवार्त्तिकम्-5)

* सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य *

भाष्यम्- यदयम् 'ईदूतौ च सप्तम्यर्थे' इत्यर्थग्रहणं करोति, तज्ज्ञापयत्याचार्यः—न प्रगृह्यसञ्ज्ञायां प्रत्ययलक्षणं भवतीति।

द्रौरवाक्षेपभाष्यम्- तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम्।

चतुर्थपक्षाश्रयणेन समाधानभाष्यम्- न कर्तव्यम्। ईदादिभिर्द्विवचनं विशेषयिष्यामः, ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति—ईदाद्यन्तं यद् द्विवचनं तदन्तमीदाद्यन्तमिति।

आक्षेपभाष्यम्- एवमप्यशुक्ले वस्त्रे शुक्ले समपद्येतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्राप्नोति। अत्र हीदादि च द्विवचनं, तदन्तं च भवति प्रत्ययलक्षणेन।

समाधानभाष्यम्- अत्राप्यकृते शीभावे लुग्भविष्यति।

आक्षेपसाधकभाष्यम्- इदमिह सम्प्रधार्यं—लुक् क्रियतां, शीभाव इति। किमत्र कर्तव्यम्? परत्वाच्छीभावः।

समाधानसाधकभाष्यम्- नित्यो लुक्। कृते शीभावे प्राप्नोत्यकृतेऽपि प्राप्नोति।

आक्षेपसाधकभाष्यम्- अनित्यो लुक्। अन्यस्य कृते शीभावे प्राप्नोत्यन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। शीभावोऽप्यनित्यः, न हि कृते लुकि प्राप्नोति। उभयोरनित्ययोः परत्वाच्छीभावः, शीभावे कृते लुक्।

आक्षेपदार्ढ्यभाष्यम्- अथापि कथञ्चिन्नित्यो लुक्स्यात्। एवमपि दोषः, वक्ष्यत्येतत्—'पदसञ्ज्ञायामन्तग्रहणमन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम्' इति। इदं चापि प्रत्ययग्रहणम्, अयं चापि सञ्ज्ञाविधिः। अवश्यं खल्वस्मिन्नपि पक्षे आन्तवद्भाव एषितव्यः। तस्मादस्तु स एव मध्यमः पक्षः। ईदूदेत्।

(11. प्रगृह्यसञ्ज्ञासूत्रम् 1.1.5 आ. 2)

अदसो मात् 1.1.12

मूत्वमीत्वयोरसिद्धत्वनिराकरणाधिकरणम्

(153. आक्षेपवार्त्तिकम्-1)

* मात्प्रगृह्यसञ्ज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्- मात्प्रगृह्यसञ्ज्ञायां तस्य ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवन्ति, तेषां प्रतिषेधो वक्तव्यः। अमी अत्र, अमी आसते, अमू अत्र, अमू आसते।

आक्षेपबाधकभाष्यम्- ननु च प्रगृह्यसञ्ज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति।

(आक्षेपसाधकं भाष्यवार्तिकम्)

* वचनार्थो हि सिद्धे *

भाष्यम्- नदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? यत्सिद्धे प्रगृह्यसंज्ञाकार्यं तदर्थमेतत्स्यात्—'अणोऽप्रगृह्यस्यानुनासिकः' इति।

आक्षेपबाधकभाष्यम्- नैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात्—'अणोऽप्रगृह्यस्यानुनासिकोऽदसो न' इति।

(154. **समाधानवार्त्तिकम्**-2)

* विप्रतिषेधाद्वा *

भाष्यम्- अथवा प्रगृह्यसञ्ज्ञा क्रियताम् अयादयो वेति। प्रगृह्यसञ्ज्ञा भविष्यति विप्रतिषेधेनेति।

समाधानबाधकभाष्यम्- नैष युक्तो विप्रतिषेधः। 'विप्रतिषेधे परम्' इत्युच्यते। पूर्वा च प्रगृह्यसञ्ज्ञा, परेऽयादयः।

समाधानसाधकभाष्यम्- परा प्रगृह्यसञ्ज्ञा करिष्यते।

समाधानबाधकभाष्यम्- सूत्रविपर्यासः कृतो भवति।

समाधानसाधकभाष्यम्- एवं तर्हि परैव प्रगृह्यसञ्ज्ञा। कथम्? 'कार्यकालं सञ्ज्ञा-परिभाषम्', यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। 'प्रगृह्यः प्रकृत्या' इत्युपस्थितमिदं भवति 'अदसो मात्' इति।

समाधानबाधकभाष्यम्- एवमप्ययुक्तो विप्रतिषेधः। कथम्? द्विकार्ययोगो हि विप्रति-षेधः। न चात्रैको द्विकार्ययुक्तः। एचामयादयः, ईदूतोः प्रगृह्यसञ्ज्ञा।

समाधानसाधकभाष्यम्- नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्हि? असम्भवो-ऽपि। स चात्रास्त्यसम्भवः। कोऽसावत्रासम्भवः? प्रगृह्यसञ्ज्ञाऽभिनिर्वर्तमाना अयादीन् बाधते, अयादयोऽभिनिर्वर्तमानाः प्रगृह्यसञ्ज्ञाया निमित्तं विघ्नन्तीत्येषोऽसम्भवः। सत्यसम्भवे युक्तो विप्रतिषेधः।

समाधानबाधकभाष्यम्- एवमप्ययुक्तो विप्रतिषेधः। सतोर्हि विप्रतिषेधो भवति। न चात्रेत्वोत्वे स्तः। नापि मकारः। उभयमप्यसिद्धम्।

(155. **समाधानसाधकवार्तिकम्**-3)

* आश्रयात्सिद्धत्वं यथा रोरुत्वे *

भाष्यम्- आश्रयात्सिद्धत्वं भविष्यति। तद्यथा—रुरुत्वे आश्रयात्सिद्धो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकाक्षेपभाष्यम्- किं पुनः कारणं रुरुत्वे आश्रयात्सिद्धो भवति, न पुनर्यत्रैव रुः सिद्धः, तत्रैवोत्वमप्युच्येत?

भाष्यम्- नैवं शक्यम्।

(156. **समाधानसाधकवार्तिकम्**- 4)

* असिद्धे ह्याद्गुणाप्रसिद्धिः *

भाष्यम्- असिद्धे ह्युत्वे आद्गुणस्याप्रसिद्धिः स्यात्—वृक्षऽत्र प्लक्षोऽत्र। तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यम्। यथा तत्राश्रयात्सिद्धत्वं भवति, एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति।

समाधानान्तरभाष्यम्- अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति।

अथवा योगविभागः करिष्यते। 'अदसः' अदसः ईदादयः प्रगृह्यसञ्ज्ञा भवन्तीति। ततो 'मात्' माच्च परे ईदादयः प्रगृह्यसञ्ज्ञा भवन्तीति। अदस इत्येव। किमर्थो योगविभागः? एको यत्तत्सिद्धे प्रगृह्यकार्यं तदर्थः, अपरो यदसिद्धे।

आक्षेपभाष्यम्- इहापि तर्हि प्राप्नोति—अमुया अमुयोरिति। किंच स्यात् यद्यत्र प्रगृह्यसञ्ज्ञा स्यात्? प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत।

आक्षेपनिरासभाष्यम्- नैष दोषः। पदान्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः।

आक्षेपभाष्यम्- एवमप्यमुकेत्र, अत्रापि प्राप्नोति।

आक्षेपबाधकभाष्यम्- द्विवचनमिति वर्तते।

आक्षेपसाधकभाष्यम्- यदि द्विवचनमिति वर्तते अमी अत्र, अत्र न प्राप्नोति।

आक्षेपबाधकभाष्यम्- एवं तर्हि एदन्तमिति निवृत्तम्।

भाष्यम्- अथवाऽऽहायम्—'अदसो मात्' इति। न च ईत्वोत्वे स्तः नापि मकारः। तत एवं विज्ञास्यामः—'मार्थादीदाद्यर्थानाम्' इति।

समाधानभाष्यम्- 'उक्तं वा'। किमुक्तम्? 'अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये, प्रगृह्यसञ्ज्ञायां च' इति।

अनिष्टापत्तिनिवारणाधिकरणम्

(157. **आक्षेपवार्त्तिकम्**- 1)

* तत्र सकि दोषः *

भाष्यम्- तत्र सककारे दोषो भवति—अमुकेऽत्र।

(158. **समाधानवार्त्तिकम्**- 2)

* न वा ग्रहणविशेषणत्वात् *

भाष्यम्- न वा एष दोषः। किं कारणम्? ग्रहणविशेषणत्वात्। न माद्ग्रहणेन ईदाद्यन्तं विशेष्यते। किं तर्हि? ईदादयो विशेष्यन्ते—मात्परे य ईदादय इति। अदसो मात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(12. प्रगृह्यसञ्ज्ञासूत्रम् 1.1.5 आ. 3)

शे 1.1.13

अनिष्टापत्तिनिराकरणम्

आक्षेपभाष्यम्- इह कस्मान्न भवति—काशे, कुशे, वंशे इति?

(159. समाधानवार्त्तिकम्-1)

*** शेऽर्थवद्ग्रहणात् ***

भाष्यम्- अर्थवतः शेशब्दस्य ग्रहणम्। न चैषोऽर्थवान्।

एकदेशिन आक्षेपभाष्यम्- एवमपि हरिशे, बभ्रुशे इत्यत्रापि प्राप्नोति।

समाधानभाष्यम्- एवं तर्हि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इत्येवं न भविष्यति।

सिद्धान्तिसमाधानभाष्यम्- अथवा पुनरस्तु—'अर्थवद्ग्रहणे नानर्थकस्य' इति। कथं तर्हि—हरिशे बभ्रुशे इति? एकोऽत्र विभक्त्यर्थेनार्थवान्, अपरस्तद्धितार्थेन। समुदायोऽनर्थकः। शे।

(13. प्रगृह्यसञ्ज्ञासूत्रम् 1.1.5 आ. 4)

निपात एकाजनाङ् 1.1.14

पदकृत्याधिकरणम्

आक्षेपभाष्यम्- निपात इति किमर्थम्?

समाधानभाष्यम्- चकारात्र जहारात्र।

आक्षेपभाष्यम्- एकाजिति किमर्थम्?

आक्षेपबाधकभाष्यम्- प्रेदं ब्रह्म। प्रेदं क्षत्त्रम्।

आक्षेपबाधानुपपत्तिभाष्यम्- एकाजित्यप्युच्यमानेऽत्रापि प्राप्नोति। एषोऽपि ह्येकाच्।

आक्षेपबाधोपपत्तिभाष्यम्- एकाजिति नायं बहुव्रीहिः—एकोऽज् यस्मिन् सोऽयमेकाच् एकाजिति। किं तर्हि? तत्पुरुषोऽयं समानाधिकरणः—एकः अच् एकाच्, एकाजिति।

आक्षेपभाष्यम्- यदि तत्पुरुषोऽयं समानाधिकरणः, नार्थ एकग्रहणेन।

प्रत्याक्षेपभाष्यम्- इह कस्मान्न भवति—प्रेदं ब्रह्म। प्रेदं क्षत्त्रम्।

प्रत्याक्षेपबाधकभाष्यम्- अजेव यो निपात इत्येवं विज्ञायते।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि?

आक्षेपभाष्यम्- कथमनुच्यमानं गंस्यते?

समाधानभाष्यम्- अज्ग्रहणसामर्थ्यात्। यदि हि अच्चान्यच्च तत्र स्यात्, अज्ग्रहणमनर्थकं स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामर्थ्यानुपपत्तिभाष्यम्- अस्ति ह्यन्यदज्ग्रहणस्य प्रयोजनम्। किम्? अजन्तस्य यथा स्यात्। हलन्तस्य मा भूत्।

सामर्थ्योपपत्तिभाष्यम्- नैव दोषो न प्रयोजनम्।

सामर्थ्यानुपपत्तिभाष्यम्- एवमपि कुत एतत्—द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः 'आद्यन्तवदेकस्मिन्' 'येन विधिस्तदन्तस्य' इति च—इयमिह परिभाषा भविष्यति—'आद्यन्तवदेकस्मिन्' इति। इयं च न भविष्यति—'येन विधिस्तदन्तस्य' इति?

सामर्थ्यानुपपत्तिनिराकरणभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—इयमिह परिभाषा भवति 'आद्यन्तवदेकस्मिन्' इति, इयं च न भवति 'येन विधिस्तदन्तस्य' इति। यदयम् 'अनाङ्' इति प्रतिषेधं शास्ति।

समाधानभाष्यम्- एवं तर्हि—सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति, तज्ज्ञापयत्याचार्यः—'अन्यत्र वर्णग्रहणे जातिग्रहणं भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? 'दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्' इति यदुक्तं तदुपपन्नं भवति।

आक्षेपभाष्यम्- अनाङिति किमर्थम्?

समाधानभाष्यम्- आ उदकान्ताद् ओदकान्तात्।

आक्षेपभाष्यम्- इह कस्मान्न भवति—आ एवं नु मन्यसे, आ एवं किल तदिति?

समाधानभाष्यम्- सानुबन्धकस्येदमाकारस्य ग्रहणम्, अननुबन्धकश्चात्राऽऽकारः।

आक्षेपभाष्यम्- क्व पुनरयं सानुबन्धकः क्व पुनरयं निरनुबन्धकः?

समाधानभाष्यम्- ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्।।

(14. सञ्ज्ञासूत्रम् 1.1.5 आ. 5)

ओत् 1.1.15

सूत्रवैयर्थ्यनिराकरणाधिकरणम्

आक्षेपभाष्यम्- किमुदाहरणम्?

समाधानभाष्यम्- आहो इति, उताहो इति।

समाधानबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। निपातसमाहारोऽयम्। आह उ आहो इति। उत आह उ उताहो इति। तत्र 'निपात एकाजनाङ्' इत्येव सिद्धम्।

समाधानबाधकभाष्यम्- एवं तर्ह्येकनिपाता इमे।

समाधानान्तरभाष्यम्- अथवा प्रतिषिद्धार्थोऽयमारम्भः। ओ षु यातं मरुतः। ओ षु यातं बृहती च शक्वरी। ओ चि॒त्सखायं स॒ख्या व॑वृत्याम् (ऋ.-10.10.1)।

च्व्यन्ते सूत्रप्रवृत्तिनिराकरणाधिकरणम्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(160. आक्षेपवार्त्तिकम्-1)

*** ओतश्च्विप्रतिषेधः ***

भाष्यम्- ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्य:। अनद: अद: अभवत्=अदोऽभवत्, अतिर: तिर: अभवत्=तिरोऽभवत्।

आक्षेपबाधकभाष्यम्- न वक्तव्य:। 'लक्षणप्रतिपदोक्तयो: प्रतिपदोक्तस्य' इत्येवं न भविष्यति।

आक्षेपसाधकभाष्यम्- एवमपि—अगौ: गौ: समपद्यत गोऽभवत्। अत्र प्राप्नोति।

समाधानभाष्यम्- एवं तर्हि 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय:' इति। तद्यथा— 'गौरनुबन्ध्योऽजोऽग्निषोमीय:' इति न वाहीकोऽनुबध्यते।

समाधानबाधकभाष्यम्- कथं तर्हि वाहीके वृद्ध्यात्वे भवत:—गौस्तिष्ठति गामानयेति?

समाधानसाधकभाष्यम्- अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयम्, शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्वे। ओत्।

(15-16. प्रगृह्यसञ्ज्ञादेशिसूत्रम् 1.1.5 आ. 6-7)

उञः 1.1.17

ऊँ 1.1.18

अनिष्टापत्तिवारणाधिकरणम्

आक्षेपभाष्यम्- इह कस्मान्न भवति—आहो इति, उताहो इति?

आक्षेपबाधकभाष्यम्- उञ: इत्युच्यते। न चात्रोञं पश्याम:।

आक्षेपसाधकभाष्यम्- उञोऽयमन्येन सहैकादेश उञ्ग्रहणेन गृह्यते।

आक्षेपबाधकभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—'नोञ एकादेश उञ्ग्रहणेन गृह्यते' इति। यदयम् 'ओत्' इत्योदन्तस्य निपातस्य प्रगृह्यसञ्ज्ञां शास्ति।

आक्षेपसाधकभाष्यम्- नैतदस्ति ज्ञापकम्। उक्तमेतत्—'प्रतिषिद्धार्थोऽयमारम्भ:' इति। दोष: खल्वपि स्यात्, यद्युञेकादेश उञ्ग्रहणेन न गृह्येत। जानु उ अस्य रुजति, जानू अस्य रुजति, जान्वस्य रुजति, 'मय उञो वो वा' इति वत्वं न स्यात्।

सिद्धान्तिनः समाधानभाष्यम्- एवं तर्ह्येकनिपाता इमे। अथवा द्वावुकाराविमौ। एकोऽननुबन्धक:। अपर: सानुबन्धक:। तद्योऽननुबन्धकस्तस्यैष एकादेश:।

योगविभागाधिकरणम्

(161. सिद्धान्तवार्तिकम्-1)

*** 'उञ' इति योगविभागः ***

भाष्यम्- 'उञ' इति योगविभाग: कर्तव्य:। 'उञ:' शाकल्यस्याचार्यस्य मतेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रगृह्यसञ्ज्ञा भवति। उ इति, विति। तत: 'ऊँ', उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन। दीर्घोऽनुनासिक: प्रगृह्यसञ्ज्ञकश्च ऊँ इति।

योगविभागवैयर्थ्यभाष्यम्- किमर्थो योगविभाग:?

(162. **योगविभागप्रयोजनवार्तिकम्**-1)

*** ऊँ वा शाकल्यस्य ***

भाष्यम्- शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात्। ऊँ इति उ इति। अन्येषामाचार्याणां मतेन—विति। उञ, ऊँ।

(17. **प्रगृह्यसञ्ज्ञासूत्रम्** 1.1.5 आ. 8)

ईदूतौ च सप्तम्यर्थे 1.1.18

अर्थग्रहणप्रयोजननिरूपणाधिकरणम्

(अर्थग्रहणाक्षेपे श्लोकवार्त्तिकम्)

*** ईदूतौ सप्तमीत्येव ***

भाष्यम्- ईदूतौ सप्तमीत्येव सिद्धम्, नार्थोऽर्थग्रहणेन।

(समाधाने श्लोकवार्त्तिकम्)

*** लुप्तेऽर्थग्रहणाद्भवेत् ***

भाष्यम्- लुप्तायां सप्तम्यां प्रगृह्यसञ्ज्ञा न प्राप्नोति। क्व? सोमो॑ गौ॒री अधि॑श्रि॒त: (ऋ.-9.12.3)। इष्यते चात्रापि स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणम्।

समाधानबाधकभाष्यम्- नात्र सप्तमी लुप्यते। किं तर्हि? पूर्वसवर्णोऽत्र।

(समाधानसाधकं श्लोकवार्त्तिकम्)

*** पूर्वस्य चेत् सवर्णोऽसावाडाम्भाव: प्रसज्यते ***

भाष्यम्- यदि पूर्वसवर्ण:, आट् आम्भावश्च प्राप्नोति।

समाधानबाधकभाष्यम्- एवं तर्हि आहायम्—ईदूतौ सप्तमीति। न चास्ति सप्तमी ईदूतौ, तत्र वचनाद्भविष्यति।

(समाधाने श्लोकवार्त्तिकम्)

*** वचनाद्यत्र दीर्घत्वम् ***

भाष्यम्- नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? यत्र सप्तम्या दीर्घत्वमुच्यते—'दृति॒ं न शुष्क॑ं सर॒सी शया॑नम्' (ऋ.-7.103.2) इति। सति प्रयोजने इह न प्राप्नोति—'सोमो॑ गौ॒री अधि॑श्रि॒त:' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(समाधानबाधकं श्लोकवार्त्तिकम्)

*** तत्रापि सरसी यदि ***

भाष्यम्- तत्रापि सिद्धम्। कथम्? यदि सरसीशब्दस्य प्रवृत्तिरस्ति। अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः। कथम्? दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते।

(समाधाने श्लोकवार्त्तिकम्)

*** ज्ञापकं स्यात् तदन्तत्वे ***

भाष्यम्- एवं तर्हि ज्ञापयत्याचार्यो 'न प्रगृह्यसञ्ज्ञायां प्रत्ययलक्षणं भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारम्। प्रत्ययलक्षणेन प्रगृह्यसञ्ज्ञा न भवति।

(समाधाने श्लोकवार्त्तिकम्)

*** मा वा पूर्वपदस्य भूत् ***

भाष्यम्- अथवा पूर्वपदस्य मा भूदित्येवमर्थमर्थग्रहणम्। वाप्यामश्वो वाप्यश्वः, नद्या-मातिः नद्यातिः।

आक्षेपभाष्यम्- अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति?

समाधानभाष्यम्- जहत्स्वार्था वृत्तिरिति।

आक्षेपभाष्यम्- अथाजहत्स्वार्थायां वृत्तौ दोष एव।

समाधानभाष्यम्- अजहत्स्वार्थायां च न दोषः। समुदायार्थोऽभिधीयते।

(श्लोकवार्त्तिकसंग्रहः)

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत्।
पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते।।1।।
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत्।।2।।

ईदूतौ च सप्तम्यर्थे।

(18. घुसञ्ज्ञासूत्रम् 1.1.5 आ. 9)

दा धा घ्वदाप् 1.1.20

इष्टानुपपत्तिनिराकरणाधिकरणम्

(163. आक्षेपवार्त्तिकम्-1)

*** घुसञ्ज्ञायां प्रकृतिग्रहणं शिदर्थम् ***

भाष्यम्- घुसञ्ज्ञायां प्रकृतिग्रहणं कर्तव्यम्। दाधाप्रकृतयो घुसञ्ज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्? आत्वभूतानामियं सञ्ज्ञा क्रियते। सा आत्वभूतानामेव स्यात्, अनात्वभूतानां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न स्यात्। ननु च भूयिष्ठानि घुसञ्ज्ञाकार्याणि आर्धधातुके, तत्र चैते आत्वभूता दृश्यन्ते। 'शिदर्थम्'। शिदर्थं प्रकृतिग्रहणं कर्तव्यम्। शित्यात्वं प्रतिषिध्यते तदर्थम्। प्रणिदयते प्रणिधयतीति। भारद्वाजीयाः पठन्ति—

(164. भारद्वाजीयमाक्षेपवार्त्तिकम्-2)

*** घुसञ्ज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम् ***

भाष्यम्- घुसञ्ज्ञायां प्रकृतिग्रहणं क्रियते। किं प्रयोजनम्? शिदर्थं विकृतार्थं च। शित्युदाहृतम्। विकृतार्थं खल्वपि—प्रणिदाता प्रणिधाता। किं पुनः कारणं न सिध्यति? 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इति प्रतिपदं ये आत्वभूतास्तेषामेव स्यात्, लक्षणेन ये आत्वभूतास्तेषां न स्यात्।

प्रकृतिग्रहणानन्वयबोधकं भाष्यम्- अथ क्रियमाणेऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते—दाधाः प्रकृतय इति, आहोस्विद्दाधां प्रकृतय इति? किं चातः? यदि विज्ञायते—दाधाः प्रकृतय इति, स एव दोषः—आत्वभूतानामेव स्यात्, अनात्वभूतानां न स्यात्। अथ विज्ञायते—दाधां प्रकृतय इति, अनात्वभूतानामेव स्यादात्वभूतानां न स्यात्।

प्रकृतिग्रहणान्वयबोधकं भाष्यम्- एवं तर्हि नैवं विज्ञायते—दाधाः प्रकृतय इति, नापि दाधां प्रकृतय इति। कथं तर्हि? दा धा घुसञ्ज्ञा भवन्ति, प्रकृतयश्चैषामिति।

प्रकृतिग्रहणोपसंहारभाष्यम्- तत्तर्हि प्रकृतिग्रहणं कर्तव्यम्?

प्रकृतिग्रहणार्थस्य प्रकारान्तरेण साधकं भाष्यम्- न कर्तव्यम्। इदं प्रकृतमर्थग्रहणमनुवर्तते। क्व प्रकृतम्? 'ईदूतौ च सप्तम्यर्थे' इति। ततो वक्ष्यामि—'दा धा घ्वदाप्' 'अर्थे' इति।

बाधकभाष्यम्- नैवं शक्यम्। ददातिना समानार्थान् रातिरासतिदासतिमंहतिप्रीणातिप्रभृतीनाहुः, एतेषामपि घुसञ्ज्ञा प्राप्नोति। तस्मान्नैवं शक्यम्। न चेदेवं, प्रकृतिग्रहणं कर्तव्यमेव।

प्रकारान्तरेण साधकं भाष्यम्- न कर्तव्यम्। शिदर्थेन तावन्नार्थः। अवश्यं तत्र मार्थं प्रकृतिग्रहणं कर्तव्यम्। प्रणिमयते प्रण्यमयते—इत्येवमर्थम्। तत् पुरस्तादपक्रक्ष्यते घुप्रकृतौ माप्रकृतौ चेति।

आक्षेपभाष्यम्- यदि प्रकृतिग्रहणं क्रियते, प्रनिमिनोति-प्रनिमीनाति। अत्रापि प्राप्नोति।

प्रतिबन्दीभाष्यम्- अथाक्रियमाणेऽपि प्रकृतिग्रहणे इह कस्मान्न भवति—प्रनिमाता, प्रनिमातुं, प्रनिमातव्यमिति।

प्रतिबन्दीसमाधानभाष्यम्- आकारान्तस्य ङितो ग्रहणं विज्ञायते।

समाधानभाष्यम्- यथैव तर्हि अक्रियमाणे प्रकृतिग्रहणे आकारान्तस्य ङितो ग्रहणं विज्ञायते, एवं क्रियमाणेऽपि प्रकृतिग्रहणे आकारान्तस्य ङितो ग्रहणं विज्ञास्यते।

भारद्वाजीयप्रयोजननिराकरणभाष्यम्- विकृतार्थेन चापि नार्थः। दोष एवैतस्याः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिभाषायाः—'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इति, 'गामादाग्रहणेष्वविशेषः' इति।

यदागमन्यायाधिकरणम्

(165. आक्षेपवार्त्तिकम्-3)

*** समानशब्दप्रतिषेधः ***

भाष्यम्- समानशब्दानां प्रतिषेधो वक्तव्यः। प्रनिदारयति, प्रनिधारयति। दा धा घुसञ्ज्ञा भवन्तीति घुसञ्ज्ञा प्राप्नोति।

(166. समाधानवार्त्तिकम्-4)

*** समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात् ***

भाष्यम्- समानशब्दानामप्रतिषेधः, अनर्थकः प्रतिषेधोऽप्रतिषेधः। घुसञ्ज्ञा कस्मान्न भवति? अर्थवद्ग्रहणात्, अर्थवतोर्दाधोर्ग्रहणात्। न चैतावर्थवन्तौ।

(समाधानहेत्वन्तरभाष्यवार्त्तिकम्)

*** अनुपसर्गाद्वा ***

भाष्यम्- अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति। न चैतौ दाधौ प्रति क्रियायोगः।

आक्षेपभाष्यम्- यद्येवम्, इहापि तर्हि न प्राप्नोति—प्रणिदापयति प्रणिधापयतीति। अत्रापि नैतौ दाधावर्थवन्तौ, नाप्येतौ दाधौ प्रति क्रियायोगः।

(167. समाधानवार्त्तिकम्-5)

*** न वाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथाऽन्यत्र ***

भाष्यम्- न वा एष दोषः। किं कारणम्? अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते। 'यथान्यत्र'। तद्यथा—अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते। क्वान्यत्र? लविता चिकीर्षितेति।

आगमाक्षेपभाष्यम्- युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात्? न। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामापूर्वः शब्दोपजनः?

आदेशाक्षेपभाष्यम्- अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः।

आदेशसमर्थनभाष्यम्- बाढं युक्तम्। शब्दान्तरैरिह भवितव्यम्। तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता।

सिद्धान्तोपसंहारभाष्यम्- आदेशास्तर्हीमे भविष्यन्ति—अनागमकानां सागमकाः। तत् कथम्?

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्निपातन्यायाधिकरणम्

(168. आक्षेपवार्त्तिकम्-1)

*** दीङः प्रतिषेधः स्थाघ्वोरित्त्वे ***

भाष्यम्- दीङः प्रतिषेधः स्थाघ्वोरित्त्वे वक्तव्यः। उपादास्तास्य स्वरः शिक्षकस्येति। 'मीनातिमिनोति' इत्यात्वे कृते 'स्थाघ्वोरिच्च' इतीत्त्वं प्राप्नोति।

प्रत्याक्षेपभाष्यम्- कुतः पुनरयं दोषो जायते—किं प्रकृतिग्रहणात्, आहोस्विद्रूपग्रहणात्?

प्रत्याक्षेपसमाधानभाष्यम्- रूपग्रहणादित्याह।

प्रकृतिग्रहणदोषभाष्यम्- इह खलु प्रकृतिग्रहणाद्दोषो जायते—उपदिदीषते। 'सनि मीमाघुरभलभ' इति।

दोषनिराकरणभाष्यम्- नैष दोषः। दाप्रकृतिरित्युच्यते। न चेयं दाप्रकृतिः। आकारान्तानामेजन्ताः प्रकृतयः, एजन्तानामपीकारान्ताः। न च प्रकृतेः प्रकृतिः प्रकृतिग्रहणेन गृह्यते।

आक्षेपोपसंहारभाष्यम्- स तर्हि प्रतिषेधो वक्तव्यः।

समाधानभाष्यम्- न वक्तव्यः।

आक्षेपभाष्यम्- घुसञ्ज्ञा कस्मान्न भवति?

समाधानभाष्यम्- 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येवं न भविष्यति।

नानुबन्धकृतमनेजन्तत्वन्यायाधिकरणम्

(169. आक्षेपवार्त्तिकम्-1)

*** दाप्प्रतिषेधे न दैप्यनेजन्तत्वात् ***

भाष्यम्- दाप्प्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति—अवदातं मुखम्। ननु चाऽऽत्त्वे कृते भविष्यति। तद्भ्यात्त्वं न प्राप्नोति। किं कारणम्? अनेजन्तत्वात्।

(170. समाधानवार्त्तिकम्-2)

*** सिद्धमनुबन्धस्याऽनेकान्तत्वात् ***

भाष्यम्- सिद्धमेतत्। कथम्? अनुबन्धस्यानेकान्तत्वात्। अनेकान्ता ह्यनुबन्धाः।

(समाधानान्तरभाष्यवार्त्तिकम्)

*** पित्प्रतिषेधाद्वा ***

भाष्यम्- अथवा 'दाधा घ्वपित्' इति वक्ष्यामि। तच्चाऽवश्यं वक्तव्यम्। अदाबिति ह्युच्यमाने इहापि प्रसज्येत—प्राणिदापयतीति।

आवश्यकतानिराकरणभाष्यम्- शक्यं तावदनेनादाविति ब्रुवता वान्तस्य प्रतिषेधो विज्ञातुम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- सूत्रं तर्हि भिद्यते।

सिद्धान्तिभाष्यम्- यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम् 'दाप्प्रतिषेधे न दैपि' इति।

परिहारस्मारणभाष्यम्- परिहृतमेतत् 'सिद्धमनुबन्धस्यानेकान्तत्वात्' इति।

आक्षेपभाष्यम्- अथैकान्तेषु दोष एव।

समाधानभाष्यम्- एकान्तेष्वपि न दोषः। आत्त्वे कृते भविष्यति।

समाधानानुपपत्तिभाष्यम्- ननु चोक्तम्—'तद्ध्यात्वं न प्राप्नोति, किं कारणम्। अनेजन्तत्वात्' इति।

समाधानोपपत्तिभाष्यम्- पकारलोपे कृते भविष्यति।

आक्षेपभाष्यम्- न ह्ययं तदा दाप् भवति।

समाधानभाष्यम्- भूतपूर्वगत्या भविष्यति।

समाधानसाधकभाष्यम्- एतच्चात्र युक्तम्—यत्सर्वेष्वेव सानुबन्धकग्रहणेषु भूतपूर्वगतिर्विज्ञायते। अनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवति।

समाधानान्तरभाष्यम्- अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति—'नानुबन्धकृतमनेजन्तत्वम्' इति। यदयम् 'उदीचां माङो व्यतीहारे' इति मेङः सानुबन्धकस्याऽऽत्त्वभूतस्य ग्रहणं करोति।

समाधानान्तरभाष्यम्- अथवा दाबेवायम्। न दैबस्ति। कथम्—'अवदायति' इति? श्यन्विकरणो भविष्यति। दाधाघ्वदाप्।

(20. **अतिदेशसूत्रम्** 1.1.5 आ. 9)

आद्यन्तवदेकस्मिन् 1.1.21

सूत्रप्रयोजनाधिकरणम्

प्रयोजनाक्षेपभाष्यम्- किमर्थमिदमुच्यते?

(171. **प्रयोजनवार्त्तिकम्**-1)

*** सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम् ***

भाष्यम्- सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिरित्युच्यते। सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्तः इत्युच्यते। सत्यन्यस्मिन्नाद्यन्तवद्भावादेतस्मात् कारणात् एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति, इष्यते च स्युरिति। तान्यन्तरेण यत्नं न सिध्यन्ति इत्येकस्मिन्नाद्यन्तवद्वचनम्। एवमर्थमिदमुच्यते।

वार्तिकावतरणभाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति?

(172. **न्यासान्तरबोधकं वार्त्तिकम्**-2)

*** तत्र व्यपदेशिवद्वचनम् ***

भाष्यम्- तत्र व्यपदेशिवद्भावो वक्तव्यः। व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यासप्रयोजनभाष्यम्- किं प्रयोजनम्?

(न्यासप्रयोजनभाष्यवार्तिकम्)

*** एकाचो द्वे प्रथमार्थम् ***

भाष्यम्- वक्ष्यति—'एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः' इति। तस्मिन् क्रियमाणे इहैव स्यात्—पपाच-पपाठ, इयाय-आर इत्यत्र न स्यात्। व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति।

(प्रयोजनभाष्यवार्तिकम्)

*** षत्वे चाऽऽदेशसम्प्रत्ययार्थम् ***

भाष्यम्- वक्ष्यति—'आदेशप्रत्यययोरित्यवयवषष्ठ्येषा' इति। एतस्मिन् क्रियमाणे इहैव स्यात्—करिष्यति-हरिष्यति इति। इह न स्यात्—'इन्द्रो मा वक्षत् (ऋ.-1.135.4)' 'स देवान्यक्षत् (ऋ.-3.4.3)' इति। व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति।

आक्षेपोपसंहारभाष्यम्- स तर्हि व्यपदेशिवद्भावो वक्तव्यः?

सिद्धान्तिसमाधानभाष्यम्- न वक्तव्यः।

(समाधाने भाष्यवार्त्तिकम्)

*** अवचनाल्लोकविज्ञानात् सिद्धम् ***

भाष्यम्- अन्तरेणैव वचनं लोकविज्ञानात् सिद्धमेतत्।

एकदेशिदृष्टान्तभाष्यम्- तद्यथा लोके—'शालासमुदायो ग्रामः' इत्युच्यते। भवति चैतदेकस्मिन्नपि—'एकशालो ग्रामः' इति।

दृष्टान्तविघटनभाष्यम्- विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते। तद्यथा—'ग्रामो दग्धः' इति। अस्ति वाटपरिक्षेपे वर्तते। तद्यथा—'ग्रामं प्रविष्टः' इति। अस्ति च मनुष्येषु वर्तते। तद्यथा—'ग्रामो गतो ग्राम आगतः' इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते। तद्यथा—'ग्रामो लब्धः' इति। तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते, तमभिसमीक्ष्यैतत्प्रयुज्यते—'एकशालो ग्रामः' इति।

एकदेशिदृष्टन्तान्तरभाष्यम्- यथा तर्हि—'वर्णसमुदायः पदम्' 'पदसमुदाय ऋक्' 'ऋक्समुदायः सूक्तम्' इत्युच्यते। भवति चैतदेकस्मिन्नपि—'एकवर्णं पदम्', एकपदा ऋक्', 'एकर्चं सूक्तम्' इति।

दृष्टन्तान्तरविघटनभाष्यम्- अत्राप्यर्थेन युक्तो व्यपदेशः। पदं नाम अर्थः, ऋङ् नाम अर्थः, सूक्तं नाम अर्थ इति।

सिद्धान्तिनो दृष्टान्तभाष्यम्- यथा तर्हि बहुषु पुत्रेष्वेतदुपपन्नं भवति—अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनीयानिति। भवति चैतदेकस्मिन्नपि—अयमेव मे ज्येष्ठः, अयमेव मे मध्यमः, अयमेव मे कनीयान् इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तिनो द्वितीयदृष्टान्तभाष्यम्- तथा—असूतायामसोष्यमाणायां च भवति—'प्रथमगर्भेण हता' इति।

सिद्धान्तिनस्तृतीयदृष्टान्तभाष्यम्- तथा—अनेत्यानाज़िगमिषुराह—'इदं मे प्रथम-मागमनम्' इति।

सूत्रप्रत्याख्याने वार्तिकावतरणभाष्यम्- आद्यन्तवद्भावश्च शक्योऽवक्तुम्। कथम्?

(173. **प्रत्याख्यानसाधकवार्त्तिकम्**-4)

* अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् *

भाष्यम्- अपूर्वलक्षण आदिः, अनुत्तरलक्षणोऽन्तः, एतच्चैकस्मिन्नपि भवति। अपूर्वानुत्तरलक्षणत्वात्—एतस्मात् कारणात् एकस्मिन्नप्याद्यन्तापदिष्टानि कार्याणि भविष्यन्ति। नार्थ आद्यन्तवद्भावेन।

प्रत्याख्यानासम्भवभाष्यम्- गोनर्दीयस्त्वाह—सत्यमेतत्, 'सति त्वन्यस्मिन्' इति।

सूत्रप्रयोजनाधिकरणम्

प्रयोजनजिज्ञासाभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि?

(174. **प्रयोजनवार्त्तिकम्**-1)

* आदिवत्त्वे प्रयोजनं—प्रत्ययञ्नितदाद्युदात्तत्वे *

भाष्यम्- प्रत्ययस्यादिरुदात्तो भवतीति। इहैव स्यात्—कर्तव्यं, तैत्तिरीयः। औपगवः-कापटवः इत्यत्र न स्यात्। 'ञ्नित्यादिर्नित्यम्' इति, इहैव स्यात्—अहिचुम्बकायनिः आग्निवेश्यः। गार्ग्यः-कृतिरित्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

* वलादेरार्धधातुकस्येट् प्रयोजनम् *

भाष्यम्- वलादेरार्धधातुकस्येट् प्रयोजनम्। 'आर्धधातुकस्येड्वलादेः' इतीहैव स्यात् करिष्यति-हरिष्यति। जोषिषत् (ऋ0-2.35.1) मन्दिषदित्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

* यस्मिन्विधिस्तदादित्वे प्रयोजनम् *

भाष्यम्- यस्मिन्विधिस्तदादित्वे प्रयोजनम्। वक्ष्यति—'यस्मिन्विधिस्तदादावल्ग्रहणे' इति। तस्मिन् क्रियमाणे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इहैव स्यात्—श्रियः-भ्रुवः। श्रियौ-भ्रुवौ इत्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

* अजाद्याट्त्वे प्रयोजनम् *

भाष्यम्- अजाद्याट्त्वे प्रयोजनम्। 'आडजादीनाम्' इहैव स्यात्—ऐक्षिष्ट, ऐहिष्ट। अध्यैष्टेत्यत्र न स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तवत्त्वप्रयोजनजिज्ञासाभाष्यम्- अथान्तवत्त्वे कानि प्रयोजनानि?

(प्रयोजनभाष्यवार्त्तिकम्)

*** अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम् ***

भाष्यम्- अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम्। 'ईदूदेद् द्विवचनं प्रगृह्यम्' इहैव स्यात्—पचेते इति, पचेथे इति। खट्वे इति, माले इतीत्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

*** मिदचोऽन्त्यात्परः ***

भाष्यम्- 'मिदचोऽन्त्यात्परः' प्रयोजनम्। इहैव स्यात्—कुण्डानि, वनानि। तानि यानीत्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

*** अचोऽन्त्यादि टि प्रयोजनम् ***

भाष्यम्- 'अचोऽन्त्यादि टि' प्रयोजनम्। 'टित आत्मनेपदानां टेरे' इति। इहैव स्यात्—कुर्वाते, कुर्वाथे। कुरुते-कुर्वे इत्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

*** अलोऽन्त्यस्य प्रयोजनम् ***

भाष्यम्- 'अलोऽन्त्यस्य' प्रयोजनम्। 'अतो दीर्घो यञि सुपि च' इहैव स्यात्—पटाभ्यां, घटाभ्यामिति। आभ्यामित्यत्र न स्यात्।

(प्रयोजनभाष्यवार्त्तिकम्)

*** येन विधिस्तदन्तत्वे प्रयोजनम् ***

भाष्यम्- येन विधिस्तदन्तत्वे प्रयोजनम्। 'अचो यत्' इहैव स्यात्—चेयम्, जेयम्। एयम्-अध्येयमित्यत्र न स्यात्। 'आद्यन्तवदेकस्मिन्' कार्यं भवतीत्यत्रापि सिद्धं भवति। आद्यन्तवदेकस्मिन्।

(21. घसञ्ज्ञासूत्रम् 1.1.5 आ. 10)

तरप्तमपौ घः 1.1.22

औपदेशिकाधिकरणम्

(175. आक्षेपवार्त्तिकम्-1)

*** घसञ्ज्ञायां नदीतरे प्रतिषेधः ***

भाष्यम्- घसञ्ज्ञायां नदीतरे प्रतिषेधो वक्तव्यः। नद्यास्तरो नदीतरः इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(176. समाधानवार्तिकम्-2)

* घसञ्ज्ञायां नदीतरेऽप्रतिषेधः *

भाष्यम्- घसञ्ज्ञायां नदीतरेऽप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। नद्यास्तरः नदीतरः।

दोषस्मारकभाष्यम्- घसञ्ज्ञा कस्मान्न भवति?

(दोषवारकं भाष्यवार्तिकम्)

* तरब्ग्रहणं ह्यौपदेशिकम् *

भाष्यम्- औपदेशिकस्य तरपो ग्रहणम्। न चैष उपदेशे तरप्शब्दः।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि।

आक्षेपभाष्यम्- कथमनुच्यमानं गंस्यते?

सिद्धान्तिसमाधानभाष्यम्- इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते—यत्रास्यैतद्रूपमिति। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते। कोऽसौ? उपदेशो नाम। न चैष उपदेशे तरप्शब्दः।

घसञ्ज्ञाभ्युपगमेऽपि दोषाभावप्रदर्शकभाष्यम्- अथवाऽस्त्वस्य घसञ्ज्ञा, को दोषः?

दोषदर्शनभाष्यम्- घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत।

समाधानभाष्यम्- समानाधिकरणेषु घादिष्वित्येवं तत्।

आक्षेपभाष्यम्- यदा तर्हि सैव नदी, स एव तरस्तदा प्राप्नोति।

समाधानभाष्यम्- स्त्रीलिङ्गेषु घादिष्वित्येवं तत्। अवश्यं चैतदेवं विज्ञेयम्। समानाधिकरणेषु घादिष्वित्युच्यमाने इह प्रसज्येत—महिषी रूपमिव, ब्राह्मणी रूपमिवेति। तरप्तमपौ।

(22. संख्यासञ्ज्ञासूत्रम् 1.1.5 आ. 11)

बहुगणवतुडति संख्या 1.1.23

लोकप्रसिद्धसङ्ख्यावाचिनां सङ्ख्यात्वसाधनाधिकरणम्

(177. आक्षेपवार्तिकम्-1)

* संख्यासञ्ज्ञायां संख्याग्रहणं संख्यासम्प्रत्ययार्थम् *

भाष्यम्- संख्यासञ्ज्ञायां संख्याग्रहणं कर्तव्यम्। बहुगणवतुडतयः संख्यासंज्ञा भवन्ति, संख्या च संख्यासञ्ज्ञा भवतीति वक्तव्यम्। किं प्रयोजनम्? 'संख्यासम्प्रत्ययार्थम्' एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येत्येष सम्प्रत्ययो यथा स्यात्।

आक्षेपबाधकभाष्यम्- ननु चैकादिका संख्या लोके संख्येति प्रतीता। तेनास्याः संख्याप्रदेशेषु संख्यासम्प्रत्ययो भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपसाधकभाष्यम्- एवमपि कर्तव्यम्।

(178. **आक्षेपसाधकवार्तिकम्**-2)

*** इतरथा ह्यसम्प्रत्ययोऽकृत्रिमत्वाद्यथा लोके ***

भाष्यम्- अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येष सम्प्रत्ययो न स्यात्। किं कारणम्? अकृत्रिमत्वात्। बह्वादीनां कृत्रिमा सञ्ज्ञा। 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति'। यथा लोके। तद्यथा लोके—'गोपालकमानय' 'कटजकमानय' इति यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः।

आक्षेपभाष्यम्- यदि तर्हि कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति, 'नदीपौर्णमास्याग्रहायणीभ्यः' इत्यत्रापि प्रसज्येत।

समाधानभाष्यम्- पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति।

आक्षेपभाष्यम्- तद्विशेषेभ्यस्तर्हि प्राप्नोति।

समाधानभाष्यम्- अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—'तद्विशेषेभ्यो न भवति' इति। यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति।

आक्षेपभाष्यम्- इह तर्हि प्राप्नोति—'नदीभिश्च' इति।

समाधानभाष्यम्- बहुवचननिर्देशान्न भविष्यति।

आक्षेपभाष्यम्- स्वरूपविधिस्तर्हि प्राप्नोति।

समाधानभाष्यम्- बहुवचननिर्देशादेव न भविष्यति।

उपसंहारभाष्यम्- एवं च न चेदमकृतं भवति—'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति। न च कश्चिद्दोषो भवति।

(179. **आक्षेपसाधकवार्त्तिकम्**-3)

*** उत्तरार्थं च ***

भाष्यम्- उत्तरार्थं च संख्याग्रहणं कर्तव्यम्। 'ष्णान्ता षट्'। षकारनकारान्तायाः संख्यायाः षट्सञ्ज्ञा यथा स्यात्। इह मा भूत्—पामानः-विप्रुष इति।

वार्तिकोक्ताक्षेपनिराकरणभाष्यम्- इहार्थेन तावन्नार्थः संख्याग्रहणेन।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'इतरथा ह्यसम्प्रत्ययोऽकृत्रिमत्वाद्यथा लोके' इति?

आक्षेपपरिहारभाष्यम्- नैष दोषः। अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति। अर्थो वाऽस्यैवंसंज्ञकेन भवति। प्रकृतं वा तत्र भवति—इदमेवंसंज्ञकेन कर्तव्यमिति। आतश्चार्थात् प्रकरणाद्वा। अङ्ग हि भवान् ग्राम्यं पांशुलपादमप्रकरणज्ञमागतं ब्रवीतु—गोपालकमानय, कटजकमानयेति। उभयगतिस्तस्य भवति। साधीयो वा यष्टिहस्तं गमिष्यति।

आक्षेपभाष्यम्- यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे सम्प्रत्ययो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति, एवमिहापि प्राप्नोति। जानाति ह्यसौ बह्वादीनामियं सञ्ज्ञा कृतेति।

समाधानसाधकभाष्यम्- न यथा लोके, तथा व्याकरणे। उभयगतिः पुनरिह भवति।

उभयगत्युदाहरणभाष्यम्- अन्यत्रापि नावश्यमिहैव। तद्यथा 'कर्तुरीप्सिततमं कर्म' इति कृत्रिमा कर्मसञ्ज्ञा। कर्मप्रदेशेषु चोभयगतिर्भवति—'कर्मणि द्वितीया' इति कृत्रिमस्य ग्रहणम्, 'कर्तरि कर्मव्यतिहारे' इत्यत्राकृत्रिमस्य।

उभयगत्युदाहरणभाष्यम्- तथा 'साधकतमं करणम्' इति कृत्रिमा करणसञ्ज्ञा। करणप्रदेशेषु चोभयगतिर्भवति—'कर्तृकरणयोस्तृतीया' इति कृत्रिमस्य ग्रहणम्, 'शब्दवैर-कलहाभ्रकण्वमेघेभ्यः करणे' इत्यत्राकृत्रिमस्य।

उभयगत्युदाहरणभाष्यम्- यथा—'आधारोऽधिकरणम्' इति कृत्रिमा अधिकरणसञ्ज्ञा। अधिकरणप्रदेशेषु चोभयगतिर्भवति—'सप्तम्यधिकरणे च' इति कृत्रिमस्य ग्रहणम्, 'विप्रति-षिद्धं चानधिकरणवाचि' इत्यकृत्रिमस्य।

वार्तिकोक्ताक्षेपे द्वितीयसमाधानभाष्यम्- अथवा—नेदं सञ्ज्ञाकरणम्। तद्वदतिदेशो-ऽयम्—बहुगणवतुडतयः संख्यावद्भवन्तीति।

आक्षेपभाष्यम्- स तर्हि वतिनिर्देशः कर्तव्यः।

समाधानभाष्यम्- न कर्तव्यः।

आक्षेपसाधकभाष्यम्- न ह्यन्तरेण वतिमतिदेशो गम्यते।

आक्षेपबाधकभाष्यम्- अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा—'एष ब्रह्मदत्तः' अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यसंख्यां संख्येत्याह, संख्यावदिति गम्यते।

वार्तिकोक्ताक्षेपे तृतीयसमाधानभाष्यम्- अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति—भवत्येकादि-कायाः संख्यायाः संख्याप्रदेशेषु सम्प्रत्यय इति। यदयं 'संख्याया अतिशदन्तायाः कन्' इति तिशदन्तायाः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? न हि कृत्रिमा त्यन्ता शदन्ता वा संख्याऽस्ति।

समाधानबाधकभाष्यम्- ननु चेयमस्ति डतिः।

समाधानसाधकभाष्यम्- यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति।

सम्पूर्णसूत्रज्ञापकताभ्युपगमभाष्यम्- यच्चापि त्यन्तायाः प्रतिषेधं शास्ति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'डत्यर्थमेतत् स्यात्' इति।

समाधानभाष्यम्- 'अर्थवद्ग्रहणे नानर्थकस्य' इति अर्थवतस्तिशब्दस्य ग्रहणम्। न च डतेस्तिशब्दोऽर्थवान्।

चतुर्थं समाधानभाष्यम्- अथवा महतीयं सञ्ज्ञा क्रियते। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करण एतत्प्रयो-जनम्—अन्वर्थसञ्ज्ञा यथा विज्ञायेत—संख्यायते अनया संख्येति। एकादिकया चापि संख्यायते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरार्थञ्चेति वार्तिकोक्तप्रयोजनप्रत्याख्यानभाष्यम्- उत्तरार्थेन चापि नार्थः संख्याग्रहणेन। इदं प्रकृतमुत्तरत्रानुवर्तिष्यते।

आक्षेपभाष्यम्- इदं वै सञ्ज्ञार्थम्, उत्तरत्र च संज्ञिविशेषणेनार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवति।

आक्षेपप्रथमयुक्तिसमाधानभाष्यम्- यत्तावदुच्यते—न चान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा—शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च, शालयश्च भाव्यन्ते।

आक्षेपद्वितीययुक्तिसमाधानभाष्यम्- यदप्युच्यते—'न खल्वप्यन्यत् प्रकृतमनुवर्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवती'ति। भवेत् द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येन येन विशेषेणाभिसम्बध्यते, तस्य तस्य विशेषको भवति।

समाधानयुक्त्यन्तरभाष्यम्- अथवा—सापेक्षोऽयं निर्देशः क्रियते। न चान्यत् किञ्चि-दपेक्ष्यमस्ति। ते संख्यामेवापेक्षिष्यामहे।

(180. **आक्षेपवार्त्तिकम्**-4)

* अध्यर्धग्रहणं च समासकन्विध्यर्थम् *

भाष्यम्- अध्यर्धग्रहणं च कर्तव्यम्। किं प्रयोजनम्? समासकन्विध्यर्थम्। समासविध्यर्थम्, कन्विध्यर्थञ्च। समासविध्यर्थं तावत्—अध्यर्धशूर्पम्। कन्विध्यर्थम्—अध्यर्धकम्।

(181. **आक्षेपप्रयोजनवार्त्तिकम्**-5)

* लुकि चाऽग्रहणम् *

भाष्यम्- लुकि चाध्यर्धग्रहणं न कर्तव्यं भवति—'अध्यर्धपूर्वाद् द्विगोर्लुगसञ्ज्ञायाम्' इति। 'द्विगोः' इत्येव सिद्धम्।

(182. **आक्षेपवार्त्तिकम्**-6)

* अर्धपूर्वपदश्च पूरणप्रत्ययान्तः *

भाष्यम्- अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासञ्ज्ञो भवतीति वक्तव्यम्। किं प्रयोजनम्? समासकन्विध्यर्थमेव। समासविध्यर्थं कन्विध्यर्थञ्च । समासविध्यर्थं तावत्—अर्धपञ्चमशूर्पम्। कन्विध्यर्थम्—अर्धपञ्चमकम्।

(183. **आक्षेपवार्त्तिकम्**-7)

* अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थम् *

भाष्यम्- अधिकग्रहणं चालुकि कर्तव्यम्। किं प्रयोजनम्? समासोत्तरपदवृद्ध्यर्थम्। समासविध्यर्थमुत्तरपदवृद्ध्यर्थं च। समासविध्यर्थं तावत्—अधिकषाष्टिकः। अधिकसाप्ततिकः। उत्तरपदवृद्ध्यर्थम्—अधिकषाष्टिकः। अधिकसाप्ततिकः। अलुकीति किमर्थम्? अधिकषाष्टिकः। अधिकसाप्ततिकः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(184. आक्षेपप्रयोजनवार्त्तिकम्-8)

*** बहुव्रीहौ चाग्रहणम् ***

भाष्यम्- बहुव्रीहौ चाधिकशब्दस्य ग्रहणं न कर्तव्यं भवति। 'संख्ययाऽव्ययासन्ना-दूराधिकसंख्याः संख्येये' इति। संख्येत्येव सिद्धम्।

(185. प्रत्याख्यानवार्तिकम्-9)

*** बह्वादीनामग्रहणम् ***

भाष्यम्- बह्वादीनां ग्रहणं शक्यमकर्तुम्।

आक्षेपभाष्यम्- केनेदानीं संख्याप्रदेशेषु संख्यासम्प्रत्ययो भविष्यति?

(प्रत्याख्यानसाधकभाष्यवार्तिकम्)

*** ज्ञापकात्सिद्धम् ***

भाष्यम्- ज्ञापकात् सिद्धमेतत्। ज्ञापकं किम्? यदयं—'वतोरिड्वा' इति संख्याया विहितस्य कनो वत्वन्तादिटं शास्ति।

आक्षेपभाष्यम्- वतोरेव तज्ज्ञापकं स्यात्।

समाधानभाष्यम्- नेत्याह। योगापेक्षं ज्ञापकम्। बहुगण।

(23. षट्सञ्ज्ञासूत्रम् 1.1.5 आ. 12)

ष्णान्ता षट् 1.1.24

अनिष्टापत्तीष्टानुपपत्तिनिराकरणाधिकरणम्

(186. आक्षेपवार्त्तिकम्-1)

*** षट्सञ्ज्ञायामुपदेशवचनम् ***

भाष्यम्- षट्सञ्ज्ञायामुपदेशग्रहणं कर्तव्यम्। उपदेशे षकारनकारान्ता संख्या षट्सञ्ज्ञा भवतीति वक्तव्यम्। किं प्रयोजनम्? शताद्यष्टनोर्नुम्नुडर्थम्। शतानि, सहस्राणि। नुमि कृते 'ष्णान्ता षट्' इति षट्सञ्ज्ञा प्राप्नोति। उपदेशग्रहणान्न भवति। अष्टानामित्यत्राऽऽत्वे कृते षट्सञ्ज्ञा न प्राप्नोति। उपदेशग्रहणाद्भवति।

प्रत्याख्यानभाष्यम्- 'उक्तं वा'। किमुक्तम्? इह तावच्छतानि सहस्राणीति 'सन्निपात-लक्षणो विधिरनिमित्तं तद्विघातस्य' इति। अष्टनोऽप्युक्तम्। किमुक्तम्? 'अष्टनो दीर्घग्रहणं षट्सञ्ज्ञाज्ञापकमाकारान्तस्य नुडर्थम्' इति।

एकदेशिसमाधानभाष्यम्- अथवाऽऽकारोऽप्यत्र निर्दिश्यते—षकारान्ता नकारान्ता आकारान्ता च संख्या षट्सञ्ज्ञा भवतीति।

समाधानबाधकभाष्यम्- इहापि तर्हि प्राप्नोति—'सधमादो द्युम्न एकास्ताः' एका इति।

समाधानसाधकभाष्यम्- नैष दोषः। एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यापदम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यथा—एको द्वौ बहव इति। अस्त्यसहायवाची। तद्यथा—एकाग्नयः, एकहलानि, एकाकिभिः क्षुद्रकैर्जितमिति। असहायैरित्यर्थः। अस्त्यन्यार्थे वर्तते। तद्यथा—'प्रजामेका रक्षत्यूर्जमेका' इति। अन्येत्यर्थः। 'सधमादो द्युम्न एकास्ताः' अन्या इत्यर्थः। तद्योऽन्यार्थे वर्तते तस्यैष प्रयोगः।

समाधानबाधकभाष्यम्- इह तर्हि प्राप्नोति—'द्वाभ्यामिष्टये विंशत्या च' इति।

सिद्धान्तिसमाधानान्तरभाष्यम्- एवं तर्हि सप्तमे योगविभागः करिष्यते—'अष्टाभ्य औश्'। ततः 'षड्भ्यः' षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति। ततो 'लुक्' लुक् च भवति षड्भ्य इति।

समाधानान्तरभाष्यम्- अथवा—उपरिष्टाद् योगविभागः करिष्यते—'अष्टन आ विभक्तौ'। ततः 'रायः' रायश्च विभक्तावाकारादेशो भवति। 'हलि' इत्युभयोः शेषः ।

आक्षेपभाष्यम्- यद्येवम्—प्रियाष्टौ-प्रियाष्टा इति न सिध्यति, प्रियाष्टानौ-प्रियाष्टानः इति प्राप्नोति।

समाधानसिद्धान्तिभाष्यम्- यथालक्षणमप्रयुक्ते। ष्णान्ता षट्।

(24. षट्सञ्ज्ञासूत्रम् 1.1.5 आ. 13)

डति च 1.1.25

प्रत्याख्यानभाष्यम्- इदं डतिग्रहणं द्विः क्रियते—संख्यासञ्ज्ञायां, षट्सञ्ज्ञायां च। एकं शक्यमकर्तुम्। कथम्? यदि तावत् संख्यासञ्ज्ञायां क्रियते, षट्सञ्ज्ञायां न करिष्यते। कथम्? 'ष्णान्ता षट्' इत्यत्र डतीत्यनुवर्तिष्यते।

अथ षट्सञ्ज्ञायां क्रियते संख्यासञ्ज्ञायां न करिष्यते। 'डति च' इत्यत्र संख्या-संज्ञाऽप्यनुवर्तिष्यते। डति च।

(25. निष्ठासञ्ज्ञासूत्रम् 1.1.5 आ. 14)

क्तक्तवतू निष्ठा 1.1.26

अनिष्टापत्तिनिराकरणाधिकरणम्

(187. आक्षेपवार्त्तिकम्-1)

*** निष्ठासञ्ज्ञायां समानशब्दप्रतिषेधः ***

भाष्यम्- निष्ठासञ्ज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। लोपः, गर्त इति।

(188. आक्षेपबाधकवार्त्तिकम्-2)

*** निष्ठासञ्ज्ञायां समानशब्दाप्रतिषेधः ***

भाष्यम्- निष्ठासञ्ज्ञायां समानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधः अप्रतिषेधः।

आक्षेपभाष्यम्- निष्ठासंज्ञा कस्मान्न भवति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(आक्षेपबाधको वार्त्तिकैकदेशः)

* अनुबन्धोऽन्यत्त्वकरः *

भाष्यम्- अनुबन्धः क्रियते सोऽन्यत्त्वं करिष्यति।

(189. आक्षेपबाधकहेतुनिराकरणवार्त्तिकम्-3)

* अनुबन्धोऽन्यत्त्वकर इति चेन्न लोपात् *

भाष्यम्- अनुबन्धोऽन्यत्त्वकर इति चेत्, तन्न। किं कारणम्? लोपात्। लुप्यतेऽत्रानुबन्धः। लुप्ते चानुबन्धे नान्यत्त्वं भवति। तद्यथा—कतरद्देवदत्तस्य गृहम्? 'अदो यत्रासौ काकः' इति। उत्पतिते काके नष्टं तद्गृहं भवति। एवमिहापि लुप्तेऽनुबन्धे नष्टः प्रत्ययो भवति।

आक्षेपबाधकसाधकभाष्यम्- यद्यपि लुप्यते, जानाति त्वसौ—सानुबन्धकस्येयं सञ्ज्ञा कृतेति। तद्यथा—इतरत्रापि कतरद्देवदत्तस्य गृहम्? 'अदो यत्रासौ काकः' इति। उत्पतिते काके यद्यपि नष्टं तद्गृहं भवति अन्ततस्तमुद्देशं जानातीति।

(190. आक्षेपवार्त्तिकम्-4)

* सिद्धविपर्यासश्च *

भाष्यम्- सिद्धश्च विपयर्यासः। यद्यपि जानाति, सन्देहस्तु तस्य भवति—अयं स तशब्दः लोतः गर्त इति, अयं स तशब्दः लूनः गीर्ण इति। तद्यथा—इतरत्रापि 'कतरद्देवदत्तगृहम्? 'अदो यत्रासौ काकः' इति। उत्पतिते काके यद्यपि तमुद्देशं जानाति सन्देहस्तु तस्य भवति—इदं तद्गृहमिदं तद्गृहमिति।

आक्षेपनिराकरणभाष्यम्- एवं तर्हि—

(समाधाने भाष्यवार्त्तिकम्)

* कारककालविशेषात् सिद्धम् *

भाष्यम्- कारककालविशेषावुपादेयौ। भूते यस्तशब्दः कर्मणि कर्तरि भावे चेति। तद्यथा—इतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति सोऽध्रुवेण निमित्तेन ध्रुवं निमित्तमुपादत्ते—वेदिकां पुण्डरीकं वा।

आक्षेपभाष्यम्- एवमपि 'प्राकीर्ष्ट' इत्यत्र प्राप्नोति।

(191. समाधानवार्त्तिकम्-5)

* लुङि सिजाददर्शनात् *

भाष्यम्- लुङि सिजाददर्शनान्न भविष्यति।

आक्षेपभाष्यम्- यत्र तर्हि सिजादयो न दृश्यन्ते—प्राभित्त इति।

समाधानभाष्यम्- दृश्यन्तेऽत्रापि सिजादयः। किं वक्तव्यमेतत्? न हि। कथमनुच्यमानं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गंस्यते? यथैवायमनुपदिष्टान् कारककालविशेषानवगच्छति एवमेतदप्यवगन्तुमर्हति—यत्र सिजादयो नेति। क्तक्तवतू।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम्

●

प्रथमेऽध्याये प्रथमे पादे षष्ठमाह्निकम्

सर्वनामसञ्ज्ञाप्रकरणम्

(26. **सर्वनामसञ्ज्ञासूत्रम्** 1.1.6 आ. 1)

सर्वादीनि सर्वनामानि 1.1.27

तद्गुणाधिकरणम्

पूर्वपक्षिभाष्यम्- 'सर्वादीनि' इति कोऽयं समासः?

समाधानभाष्यम्- बहुव्रीहिरित्याह।

अनुयोगभाष्यम्- कोऽस्य विग्रहः?

समाधानभाष्यम्- सर्वशब्द आदिर्येषां तानीमानीति। यद्येवं सर्वशब्दस्य सर्वनामसञ्ज्ञा न प्राप्नोति। किं कारणम्? अन्यपदार्थत्वाद्बहुव्रीहेः। बहुव्रीहिरयमन्यपदार्थे वर्तते, तेन यदन्यत् सर्वशब्दात्तस्य सर्वनामसञ्ज्ञा प्राप्नोति। तद्यथा 'चित्रगुरानीयताम्' इत्युक्ते यस्य ता गावो भवन्ति स आनीयते, न गावः। नैष दोषः, भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा 'चित्रवाससमानय' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति।

सर्वनामपदसाधुत्वाधिकरणम्

शङ्काभाष्यम्- इह सर्वनामानीति 'पूर्वपदात्सञ्ज्ञायामगः' इति णत्वं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः।

(192. **समाधानवार्तिकम्**-1)

*** सर्वनामसञ्ज्ञायां निपातनाण्णत्वाभावः ***

भाष्यम्- सर्वनामसञ्ज्ञायां निपातनाण्णत्वं न भविष्यति।

आक्षेपभाष्यम्- किमेतन्निपातनं नाम?

प्रतिबन्दीभाष्यम्- अथ कः प्रतिषेधो नाम?

प्रतिषेधप्रतिपादकभाष्यम्- अविशेषेण किञ्चिदुक्त्वा विशेषेण 'न' इत्युच्यते, तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते—'इदं न भवति' इति।

निपातनप्रतिपादकभाष्यम्- निपातनमप्येवंजातीयकमेव। अविशेषेण णत्वमुक्त्वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषेण निपातनं क्रियते, तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते—'इदं न भवति' इति।

आक्षेपभाष्यम्- ननु च—निपातनाच्चाणत्वं स्यात्, यथाप्राप्तं च णत्वम्।

प्रतिबन्दीभाष्यम्- किमन्येऽप्येवं विधयः?

प्रतिबन्द्युत्तरभाष्यम्- भवन्ति।

आक्षेपभाष्यम्- इह—'इको यणचि' इति वचनाद्यण् स्यात्। यथाप्राप्तश्चेक् श्रूयेत।

समाधानभाष्यम्- नैष दोषः। अस्त्यत्र विशेषः। षष्ठ्यात्र निर्देशः क्रियते। षष्ठी च पुनः स्थानिनं निवर्तयति।

आक्षेपभाष्यम्- इह तर्हि 'कर्तरि शप्' 'दिवादिभ्यः श्यन्' इति वचनाच्च श्यन् स्यात्। यथाप्राप्तश्च शप् श्रूयेत।

समाधानभाष्यम्- नैष दोषः। शबादेशाः श्यन्नादयः करिष्यन्ते।

आक्षेपभाष्यम्- तत्तर्हि शपो ग्रहणं कर्तव्यम्?

आक्षेपबाधकभाष्यम्- न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'कर्तरि शप्' इति।

आक्षेपसाधकभाष्यम्- तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः।

आक्षेपबाधकभाष्यम्- दिवादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति।

आक्षेपसाधकभाष्यम्- प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति।

आक्षेपबाधकभाष्यम्- नायं प्रत्ययविधिः। विहितः प्रत्ययः। प्रकृतश्चानुवर्तते।

आक्षेपभाष्यम्- इह तर्हि—'अव्ययसर्वनाम्नामकच् प्राक् टेः' इति वचनाच्चाकच् स्यात्। यथाप्राप्तश्च कः श्रूयेत।

समाधानभाष्यम्- नैष दोषः। नाप्राप्ते हि केऽकजारभ्यते स बाधको भविष्यति।

उपसंहारभाष्यम्- निपातमप्येवंजातीयकमेव। नाप्राप्ते णत्वे निपातनमारभ्यते, तद्बाधकं भविष्यति।

आक्षेपभाष्यम्- यदि तर्हि निपातनान्यप्येवंजातीयकानि भवन्ति, समस्तते दोषो भवति। इहान्ये वैयाकरणाः समस्तते विभाषालोपमारभन्ते—'समो हिततयोर्वा' इति। सततम्, संततम्, सहितम्, संहितमिति। इह पुनर्भवान्निपातनाल्लोपमिच्छति—'अपरस्पराः क्रियासातत्ये' इति। यथाप्राप्तं चालोपम्—संततमिति। एतन्न सिध्यति।

सिद्धान्तिसमाधानभाष्यम्- कर्तव्योऽत्र यत्नः। बाधकान्येव हि निपातनानि भवन्ति।

सञ्ज्ञोपसर्जनाधिकरणम्

(193. आक्षेपवार्तिकम्-2)

*** सञ्ज्ञोपसर्जनप्रतिषेधः ***

भाष्यम्- सञ्ज्ञोपर्जनीभूतानां सर्वादीनां प्रतिषेधो वक्तव्यः। सर्वो नाम कश्चित्तस्मै

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाय देहि। अतिसर्वाय देहि।

आक्षेपभाष्यम्- स कथं कर्तव्यः?

(194. **समाधानवार्तिकम्**-3)

*** पाठात्पर्युदासः, पठितानां सञ्ज्ञाकरणम् ***

भाष्यम्- पाठादेव पर्युदासः कर्तव्यः। शुद्धानां पठितानां सञ्ज्ञा कर्तव्या। सर्वादीनि सर्वनामसञ्ज्ञानि भवन्ति, सञ्ज्ञोपसर्जनीभूतानि न सर्वादीनि।

आक्षेपभाष्यम्- किमविशेषण?

समाधानभाष्यम्- नेत्याह विशेषेण च।

भाष्यम्- किं प्रयोजनम्?

(195. **प्रयोजनवार्तिकम्**-4)

*** सर्वाद्यानन्तर्यकार्यार्थम् ***

भाष्यम्- सर्वादीनामानन्तर्येण यदुच्यते कार्यं तदपि सञ्ज्ञोपसर्जनीभूतानां मा भूदिति।

प्रश्नभाष्यम्- किं प्रयोजनम्?

(196. **प्रयोजनवार्तिकम्**-5)

*** प्रयोजनं डतरादीनामद्ड्भावे ***

भाष्यम्- डतरादीनामद्ड्भावे प्रयोजनम्। अतिक्रान्तमिदं ब्राह्मणकुलं कतरत् अतिकतरं ब्राह्मणकुलमिति।

(197. **प्रयोजनवार्तिकम्**-6)

*** त्यदादिविधौ च ***

भाष्यम्- त्यदादिविधौ च प्रयोजनम्। अतिक्रान्तोऽयं ब्रह्मणस्तम् अतितद् ब्राह्मण इति।

सञ्ज्ञाप्रतिषेधप्रत्याख्यानभाष्यम्- सञ्ज्ञाप्रतिषेधस्तावन्न वक्तव्यः। उपरिष्टाद्योगविभागः करिष्यते—'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्'। ततः—'असञ्ज्ञायाम्' इति। सर्वादीनीत्येवं यान्युकान्तानि, असञ्ज्ञायां तानि द्रष्टव्यानि।

उपसर्जनप्रतिषेधप्रत्याख्यानभाष्यम्- उपसर्जनप्रतिषेधश्च न कर्तव्यः। 'अनुपसर्जनात्' इत्येष योगः प्रत्याख्यायते। तमेवमभिसम्भन्त्स्यामः—अनुपसर्जन-अ-अदिति। किमिदम् अ-अत् इति? अकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ।

आक्षेपभाष्यम्- यद्येवम् अतियुष्मद् अत्यस्मद् इति न सिध्यति।

समाधानभाष्यम्- प्रश्लिष्टनिर्देशोऽयम्—अनुपसर्जन-अ-अ-अदिति। अकारान्तात् अकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ।

एकदेशिसमाधानन्तरभाष्यम्- अथवा—अङ्गाधिकारे यदुच्यते, गृह्यमाणविभक्तेस्तद्भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्- यद्येवम्, परमपञ्च-परमसप्त 'षड्भ्यो लुक्' इति लुक् न प्राप्नोति।

समाधानबाधकभाष्यम्- नैष दोषः। षट्प्रधान एष समासः।

समाधानबाधकभाष्यम्- इह तर्हि—प्रियसक्थ्ना ब्रह्मणेन, अनङ् न प्राप्नोति।

समाधानसाधकभाष्यम्- सप्तमीनिर्दिष्टे यदुच्यते, प्रकृतविभक्तौ तद्भवति।

समाधानबाधकभाष्यम्- यद्येवम् अतितद् अतितदौ अतितद इति अत्वं प्राप्नोति। तच्चापि वक्तव्यम्।

पक्षान्तरेण समाधानभाष्यम्- न वक्तव्यम्। इह तावत्—'अद्ड्डतरादिभ्यः पञ्चभ्यः' इति पञ्चमी, अङ्गस्येति षष्ठी, तत्राशक्यं वि(भिन्न)विभक्तित्वात् 'डतरादिभ्यः' इति पञ्चम्याऽङ्गं विशेषयितुम्। तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययात्—डतरादिभ्यो यो विहित इति।

पक्षान्तरेण समाधानभाष्यपरिशिष्टाम्- इहेदानीम्—'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति त्यदादीनामो भवतीति। अस्थ्यादीनामित्येषा षष्ठी, अङ्गस्येत्यपि। त्यदीनामित्यपि षष्ठी, अङ्गस्येत्यपि। तत्र कामचारः—गृह्यमाणेन विभक्तिं विशेषयितुमङ्गेन वा। यावता कामचारः। इह तावत् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'। अङ्गेन विभक्तिं विशेषयिष्यामः, अस्थ्यादिभिरनङम्—अङ्गस्य विभक्तावनङ् भवति अस्थ्यादीनामिति। इहेदानीं—त्यदीनामो भवतीति, गृह्यमाणेन विभक्तिं विशेषयिष्यामः, अङ्गेनाकारम्—त्यदादीनां विभक्तावो भवति अङ्गस्येति।

समाधानाक्षेपपरिहारभाष्यम्- यद्येवम्, 'अतिसः' अत्वं न प्राप्नोति। नैष दोषः, त्यदादिप्रधान एष समासः।

सिद्धान्तिभाष्यम्- अथवा—नेदं सञ्ज्ञाकरणम्, पाठविशेषणमिदम्। सर्वेषां यानि नामानि तानि सर्वादीनि। सञ्ज्ञोपसर्जने च विशेषेऽवतिष्ठेते।

समाधानबाधकभाष्यम्- यद्येवम्, सञ्ज्ञाश्रयं यत्कार्यं तन्न सिध्यति—'सर्वनाम्नः स्मै' 'आमि सर्वनाम्नः सुट्' इति।

समाधानसाधकभाष्यम्- अन्वर्थग्रहणं तत्र विज्ञायते। सर्वेषां यन्नाम तत्सर्वनाम। सर्वनाम्न उत्तरस्य ङेः स्मै भवति। सर्वनाम्न उत्तरस्यामः सुट् भवति।

समाधानबाधकभाष्यम्- यद्येवम्, सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति। एतेषां चापि शब्दानामेकैकस्य स स विषयः, तस्मिन् तस्मिन् विषये यो यः शब्दो वर्तते तस्य तस्य तस्मिंस्तस्मिन्वर्तमानस्य सर्वनामकार्यं प्राप्नोति।

समाधानसाधकभाष्यम्- एवं तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते सञ्ज्ञा च।

आक्षेपभाष्यम्- कथं पुनरेकेन यत्नोभयं लभ्यम्?

समाधानभाष्यम्- लभ्यमित्याह। (कथम्?) एकशेषनिर्देशात्। एकशेषनिर्देशोऽयम्—सर्वादीनि च सर्वादीनि च सर्वादीनि। सर्वनामानि च सर्वनामानि च सर्वनामानि। सर्वा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीनि सर्वनामसञ्ज्ञानि भवन्ति, सर्वेषां यानि च नामानि तानि सर्वादीनि। सञ्ज्ञोपसर्जने च विशेषेऽवतिष्ठेते।

समाधानान्तरभाष्यम्- अथवा—महतीयं सञ्ज्ञा क्रियते। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करणे एतत्प्रयोजनम्—अन्वर्थसञ्ज्ञा यथा विज्ञायेत। सर्वादीनि सर्वनामसञ्ज्ञानि भवन्ति। सर्वेषां नामानीति चातः सर्वनामानि इति। सञ्ज्ञोपसर्जने च विशेषेऽवतिष्ठेते।

उभशब्दपाठप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- अथोभस्य सर्वनामत्वे कोऽर्थः?

(198. **समाधानवार्तिकम्**-7)

*** उभस्य सर्वनामत्वेऽकजर्थः ***

भाष्यम्- उभस्य सर्वनामत्वेऽकजर्थः पाठः क्रियते उभकौ।

आक्षेपभाष्यम्- किमुच्यतेऽकजर्थ इति। न पुनरन्यान्यपि सर्वनामकार्याणि?

(199. **समाधानहेतुवार्तिकम्**-8)

*** अन्याभावो द्विवचनटाब्विषयत्वात् ***

भाष्यम्- अन्येषां सर्वनामकार्याणामभावः। किं कारणम्? द्विवचनटाब्विषयत्वात्। उभशब्दोऽयं द्विवचनटाब्विषयः। अन्यानि च सर्वनामकार्याण्येकवचनबहुवचनेषूच्यन्ते।

आक्षेपभाष्यम्- यदा पुनरुभशब्दो द्विवचनटाब्विषयः, क इदानीमस्यान्यत्र भवति?

(200. **समाधानवार्तिकम्**-9)

*** उभयोऽन्यत्र ***

भाष्यम्- उभयशब्दोऽस्यान्यत्र भवति। उभये देवमनुष्याः, उभयो मणिरिति।

आक्षेपभाष्यम्- किञ्च स्यात्, यद्यत्राकज् न स्यात्?

समाधानभाष्यम्- कः प्रसज्येत।

आक्षेपभाष्यम्- कश्चेदानीं काकचोर्विशेषः?

समाधानभाष्यम्- 'उभशब्दोऽयं द्विवचनटाब्विषयः' इत्युक्तम्। तत्राकचि सति अकचस्तन्मध्यपतितत्वाच्छक्यते एतद्वक्तुं—द्विवचनपरोऽयमिति। के पुनः सति नायं द्विवचनपरः स्यात्। तत्र द्विवचनपरता वक्तव्या।

आक्षेपभाष्यम्- यथैव तर्हि के सति नायं द्विवचनपरः, एवमाप्यपि सति नायं द्विवचनपरः स्यात्। तत्रापि द्विवचनपरता वक्तव्या।

(समाधाने वार्तिकांशानुवादः)

*** अवचनादपि तत्परविज्ञानम् ***

भाष्यम्- अन्तरेणापि वचनमापि द्विवचनपरोऽयं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि।

आक्षेपभाष्यम्- कथमनुच्यमानं गंस्यते?

समाधानभाष्यम्- एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेन।

(प्रत्याख्याने भाष्यवार्तिकम्)

*** अवचनादापि तत्परविज्ञानमिति चेत्केऽपि तुल्यम् ***

भाष्यम्- अवचनादापि तत्परविज्ञानमिति चेत्केऽपि अन्तरेण वचनं द्विवचनपरो भविष्यति। कथम्? 'स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्ति'' इति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति।

भवच्छब्दपाठप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- अथ भवतः सर्वनामत्वे कानि प्रयोजनानि?

समाधानभाष्यम्- भवतोऽकच्छेषात्वानि प्रयोजनानि। अकच्—भवकान्। शेषः स च भवांश्च भवन्तौ। आत्वम्—भवादृगिति।

आक्षेपभाष्यम्- किं पुनरिदं परिगणनम्, आहोस्विदुदाहरणमात्रम्?

समाधानभाष्यम्- उदाहरणमात्रमित्याह। तृतीयादयोऽपि हीष्यन्ते। 'सर्वनाम्नस्तृतीया च' भवता हेतुना, भवतो हेतोरिति। सर्वादीनि।

(26. सर्वनामसञ्ज्ञासूत्रम् 1.1.1 आ. 2)

विभाषा दिक्समासे बहुव्रीहौ 1.1.28

तत्तत्पदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- दिग्ग्रहणं किमर्थम्?

समाधानभाष्यम्- 'न बहुव्रीहौ' इति प्रतिषेधं वक्ष्यति। तत्र न ज्ञायते—'क्व विभाषा, क्व प्रतिषेध' इति। दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति—'दिगुपदिष्टे विभाषा, अन्यत्र प्रतिषेधः।

आक्षेपभाष्यम्- अथ समासग्रहणं किमर्थम्?

समाधानभाष्यम्- समास एव यो बहुव्रीहिस्तत्र यथा स्यात्, बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति। दक्षिणदक्षिणस्यै देहि।

आक्षेपभाष्यम्- अथ बहुव्रीहिग्रहणं किमर्थम्?

समाधानभाष्यम्- द्वन्द्वे मा भूत्—दक्षिणोत्तरपूर्वाणामिति।

समाधाननिराकरणभाष्यम्- नैतदस्ति प्रयोजनम्। 'द्वन्द्वे च' इति प्रतिषेधो भविष्यति।

समाधानसाधकभाष्यम्- नाप्राप्ते प्रतिषेधे इयं विभाषा आरभ्यते। सा यथैव 'न बहुव्रीहौ' इत्येतं प्रतिषेधं बाधते एवं 'द्वन्द्वे च' इत्येतमपि बाधेत।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्- न बाधते। किं कारणम्? येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते 'न बहुव्रीहौ' इत्येतस्मिन्प्रतिषेधे इयं विभाषा आरभ्यते, 'द्वन्द्वे च' इत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च।

समाधानबाधकान्तरभाष्यम्- अथवा—'पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते, नोत्तरान्' इत्येवमियं विभाषा 'न बहुव्रीहौ' इत्येतं प्रतिषेधं बाधिष्यते, 'द्वन्द्वे च' इत्येतं प्रतिषेधं न बाधिष्यते।

समाधानबाधकान्तरभाष्यम्- अथवेदं तावदयं प्रष्टव्यः—इह कस्मान्न भवति—या पूर्वा सोत्तरा अस्योन्मुग्धस्य सोऽयं पूर्वोत्तर उन्मुग्धः, तस्मै पूर्वोत्तराय देहीति? लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति।

उपसंहारप्रत्याख्यानभाष्यम्- यद्येवं नार्थो बहुव्रीहिग्रहणेन।

आक्षेपभाष्यम्- द्वन्द्वे कस्मान्न भवति?

समाधानभाष्यम्- लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति।

प्रयोजनान्तरभाष्यम्- उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यम्।

बाधकभाष्यम्- न कर्तव्यम्। क्रियते तत्रैव—'न बहुव्रीहौ' इति।

साधकभाष्यम्- द्वितीयं कर्तव्यम्। बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्यात्। बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्—एकैकस्मै देहि।

बाधकभाष्यम्- एतदपि नास्ति प्रयोजनम्। 'समासे' इति वर्तते। तेन बहुव्रीहिं विशेषयिष्यामः—समासो यो बहुव्रीहिरिति।

एकदेशिभाष्यम्- इदं तर्हि प्रयोजनम्—अवयवभूतस्याऽपि बहुव्रीहेः प्रतिषेधो यथा स्यात्। इह मा भूत्—वस्त्रमन्तरमेषां त इमे वस्त्रान्तराः, वसनमन्तरमेषां त इमे वसनान्तराः, वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः। विभाषा दिक्समासे।

(27. **सर्वनामसञ्ज्ञानिषेधसूत्रम्** 1.1.6 आ. 3)

न बहुव्रीहौ 1.1.29

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमुदाहरणम्?

समाधानभाष्यम्- प्रियविश्वाय।

समाधानबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। सर्वाद्यन्तस्य बहुव्रीहेः प्रतिषेधेन भवितव्यम्। वक्ष्यति चैतत्—'बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्' इति। तत्र विश्वप्रियायेति भवितव्यम्।

समाधानान्तरभाष्यम्- इदं तर्हि द्व्यन्याय, त्र्यन्याय।

समाधानबाधकभाष्यम्- ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यम्।

समाधानसाधकभाष्यम्- नैष दोषः। वक्ष्यत्येतत्—'संख्यासर्वनाम्नोर्यो बहुव्रीहिः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परत्वात्तत्र संख्यायाः पूर्वनिपातो भवती'ति।

पूर्वोक्तसमाधानाभ्युपगमभाष्यम्- इदं चाप्युदाहरणम्—प्रियविश्वाय।

बाधकस्मारणभाष्यम्- ननु चोक्तम्—'विश्वप्रियायेति भवितव्यमि'ति।

बाधकनिराकरणभाष्यम्- वक्ष्यत्येतत्—'वा प्रियस्य' इति।

सूत्रार्थान्तरप्रदर्शनभाष्यम्- न खल्वप्यवश्यं सर्वाद्यन्तस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यम्। किं तर्हि? असर्वाद्यन्तस्यापि भवितव्यम्। किं प्रयोजनम्? अकज् मा भूदिति।

आक्षेपभाष्यम्- किञ्च स्यात्।

समाधानभाष्यम्- यद्यत्राकच् स्यात्, को न स्यात्।

आक्षेपभाष्यम्- कश्चेदानीं काकचोर्विशेषः?

समाधानभाष्यम्- व्यञ्जनान्तेषु विशेषः—अहकं पिता अस्य मकत्पितृकः, त्वकं पिता अस्य त्वकत्पितृक इति प्राप्नोति। मत्कपितृकः त्वत्कपितृक इति चेष्यते।

आक्षेपभाष्यम्- कथं पुनरिच्छताऽपि भवता बहिरङ्गेण प्रतिषेधेनान्तरङ्गो विधिः शक्यो बाधितुम्?

समाधानभाष्यम्- अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते गोमत्प्रिय इति यथा।

दृष्टान्तवैषम्येण समाधानबाधकभाष्यम्- क्रियते तत्र यत्नः—'प्रत्ययोत्तरपदयोश्च' इति।

दृष्टान्तसाम्येन समाधानसाधकभाष्यम्- ननु चेहापि क्रियते—'न बहुव्रीहौ' इति।

वैयर्थ्यपरिहारेण समाधानबाधकभाष्यम्- अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्? प्रियविश्वाय।

वैयर्थ्यस्थित्या समाधानसाधकभाष्यम्- उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम्।

मतान्तरेण समाधानान्तरभाष्यम्- अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः, यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यम्, बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति। तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्।

प्रत्याख्यानभाष्यम्- गोनर्दीयस्त्वाह—

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ।

त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति।

न्यूनतापरिहाराधिकरणम्

(201. आक्षेपवार्तिकम्-1)

*** प्रतिषेधे भूतपूर्वस्योपसंख्यानम् ***

भाष्यम्- प्रतिषेधे भूतपूर्वस्योपसंख्यानं कर्तव्यम्। आढ्यो भूतपूर्व आढ्यपूर्वः, आढ्यपूर्वाय देहीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(202. उपसंख्यानानर्थक्ये वार्तिकम्-2)

*** प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात् ***

भाष्यम्- प्रतिषेधे भूतपूर्वस्योपसंख्यानमनर्थकम्। किं कारणम्? पूर्वादीनां व्यवस्थाया-मितिवचनात्। पूर्वादीनां व्यवस्थायां सर्वनामसञ्ज्ञोच्यते। न चात्र व्यवस्था गम्यते। न बहुव्रीहौ।

(28. सर्वनामसञ्ज्ञानिषेधसूत्रम् 1.1.6 आ. 4)

तृतीयासमासे 1.1.30

अर्थसाधनाधिकरणम्

आक्षेपभाष्यम्- समासे इति वर्तमाने पुनः समासग्रहणं किमर्थम्?

समाधानभाष्यम्- अयं तृतीयासमासोऽस्त्येव प्राथमकल्पिकः, यस्मिन्नैकपद्यमैकस्वर्य-मेकविभक्तिकत्वं चेति। अस्ति तादर्थ्यात्ताच्छब्द्यम्। तृतीयासमासार्थानि पदानि तृतीया-समास इति। यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्।

समाधानान्तरभाष्यम्- अथवा समास इति वर्तमाने 'पुनः समासग्रहणस्यैतत्प्रयो-जनम्—योगाङ्गं यथोपजायेत। सति च योगाङ्गे योगविभागः करिष्यते—'तृतीया' तृतीया-समासे सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति। मासपूर्वाय देहि, संवत्सरपूर्वाय देहि। ततः—'असमासे' असमासे च तृतीयायाः सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति। मासेन पूर्वाय देहि, संवत्सरेण पूर्वाय देहीति। तृतीया स.।

(29. द्वन्द्वे सर्वनामसञ्ज्ञाविकल्पसूत्रम् 1.1.6 आ. 5)

विभाषा जसि 1.1.32

अर्थप्रदर्शनाधिकरणम्

भाष्यम्- जसः कार्यं प्रति विभाषा। अकज्झि न भवति, 'द्वन्द्वे च' इति प्रतिषेधात्। विभाषा जसि।

(30. जसि सर्वनामसञ्ज्ञाविकल्पनसूत्रम् 1.1.6 आ. 6)

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम् 1.1.34

गण-सूत्रपाठयोः कालनिर्णयाधिकरणम्

(203. आक्षेपवार्तिकम्-2)

*** अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात् ***

भाष्यम्- अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकम्। किं कारणम्? गणे पठितत्वात्। गणे ह्येतानि पठ्यन्ते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्- कथं पुनर्ज्ञायते—स पूर्वः पाठः, अयं पुनः पाठ इति?

आक्षेपसाधकभाष्यम्- तानि हि पूर्वादीनि, इमान्यवरादीनि।

आक्षेपबाधकभाष्यम्- इमान्यपि पूर्वादीनि।

आक्षेपसाधकभाष्यम्- एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'स पूर्वः पाठः, अयं पुनः पाठः' इति। यदयं 'पूर्वादिभ्यो नवभ्यो वा' इति नवग्रहणं करोति। नवैव हि पूर्वादीनि।

समाधानभाष्यम्- इदं तर्हि प्रयोजनम्—व्यवस्थायामसञ्ज्ञायामिति वक्ष्यामीति।

समाधानबाधकभाष्यम्- एतदपि नास्ति प्रयोजनम्। एवं विशिष्टान्येवैतानि गणे पठ्यन्ते।

समाधानभाष्यम्- इदं तर्हि प्रयोजनम्—द्व्यादिपर्युदासेन पर्युदासो मा भूदिति।

समाधानबाधकभाष्यम्- एतदपि नास्ति प्रयोजनम्—आचार्यप्रवृत्तिर्ज्ञापयति—नैषां द्व्यादिपर्युदासेन पर्युदासो भवतीति। यदयं 'पूर्वत्रासिद्धम्' इति निपातनं करोति। वार्तिककारश्च पठति—'जश्भावादिति चेदुत्तरत्र ढस्याभावादपवादप्रसङ्गः' इति।

समाधानभाष्यम्- इदं तर्हि प्रयोजनम्—जसि विभाषां वक्ष्यामीति। पूर्वपरावरदक्षिणोत्तरापराधराणि।

(31. **सर्वनामसञ्ज्ञाविकल्पनसूत्रम्** 1.1.6 आ. 7)

स्वमज्ञातिधनाख्यायाम् 1.1.35

आख्याप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- आख्याग्रहणं किमर्थम्?

समाधानभाष्यम्- ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्यात्, इह मा भूत्—स्वे पुत्राः-स्वाः पुत्राः, स्वे गावः-स्वाः गावः। स्वमज्ञातिधनाख्यायाम्।

(32. **सर्वनामसञ्ज्ञाविकल्पनसूत्रम्** 1.1.6 आ. 8)

अन्तरं बहिर्योगोपसंव्यानयोः 1.1.36

उपसंव्यानग्रहणप्रयोजनाधिकरणम्

(204. **प्रत्याख्यानाक्षेपवार्तिकम्**-1)

*** उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात् ***

भाष्यम्- उपसंव्यानग्रहणमनर्थकम्। किं कारणम्? 'बहिर्योगेण कृतत्वात्'। बहिर्योग इत्येव सिद्धम्।

(205. **प्रत्याख्यानबाधकवार्तिकम्**-2)

*** न वा शाटकयुगाद्यर्थम् ***

भाष्यम्- न वाऽनर्थकम्। किं कारणम्? 'शाटकयुगाद्यर्थम्'। शाटकयुगाद्यर्थं तर्हीदं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात्। यत्रैतन्न ज्ञायते—किमन्तरीयं किमुत्तरीयमिति।

प्रत्याख्यानसाधकभाष्यम्- अत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति, निर्ज्ञातं तस्य भवति—इदमन्तरीयमिदमुत्तरीयमिति।

अनिष्टापत्तिपरिहारः

(उपसंख्यानभाष्यवार्तिकम्)

* अपुरीति वक्तव्यम् *

भाष्यम्- अपुरीति वक्तव्यम्। इह मा भूत्—अन्तरायां पुरि वसति।

इष्टानुपपत्तिनिराकरणाधिकरणम्

(206. **पूर्वपक्षिण उपसंख्यानवार्तिकम्**- 1)

* वाप्रकरणे तीयस्य ङित्सूपसंख्यानम् *

भाष्यम्- वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यम्। द्वितीयायै-द्वितीयस्यै, तृतीयायै-तृतीयस्यै। 'विभाषा द्वितीयातृतीयाभ्याम्' इत्येतन्न वक्तव्यं भवति।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- उपसंख्यानमेवाऽत्र ज्यायः। इदमपि सिद्ध भवति—द्वितीयाय-द्वितीयस्मै, तृतीयाय-तृतीयस्मै। अन्तरं बहिर्योगोपसंव्यानयोः।

अव्ययसञ्ज्ञाप्रकरणम्

(33. **अव्ययसञ्ज्ञासूत्रम्** 1.1.6 आ. 9)

स्वरादिनिपातमव्ययम् 1.1.37

स्वरादीनां चादिभ्यः पृथक्करणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थं पृथग्ग्रहणं स्वरादीनां क्रियते, न चादिष्वेव पठ्येरन्?

समाधानभाष्यम्- चादीनां वै असत्त्ववचनानां निपातसञ्ज्ञा। स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां च।

आक्षेपभाष्यम्- अथ किमर्थमुभे संज्ञे क्रियेते, न निपातसंज्ञैव स्यात्।

समाधानभाष्यम्- नैवं शक्यम्। 'निपात एकाजनाङ्' इति प्रगृह्यसञ्ज्ञोक्ता, सा स्वरादीनामप्येकाचां प्रसज्येत।

आक्षेपभाष्यम्- एवं तर्ह्यव्ययसंज्ञैव स्यात्।

समाधानभाष्यम्- तच्चाशक्यम्। वक्ष्यत्येतत्—'अव्यये नञ्कुनिपातानाम्' इति। तद्गरीयसा न्यासेन परिगणनं कर्तव्यं स्यात्। तस्मात् पृथग्ग्रहणं कर्तव्यम्। उभे च संज्ञे कर्तव्ये। स्वरादिनिपात.।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(34. अव्ययसञ्ज्ञासूत्रम् 1.1.6 आ. 10)

तद्धितश्चासर्वविभक्तिः 1.1.38

इष्टानुपपत्तिपरिहाराधिकरणम्

(207. आक्षेपवार्तिकम्-1)

*** असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् ***

भाष्यम्- असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यम्। विना, नाना।

आक्षेपभाष्यम्- किं पुनः कारणं न सिध्यति?

(208. आक्षेपहेतुवार्तिकम्-2)

*** सर्वविभक्तिर्ह्यविशेषात् ***

भाष्यम्- सर्वविभक्तिर्ह्येष भवति। किं कारणम्? अविशेषेण विहितत्वात्।

(209. आक्षेपहेतुवार्तिकम्-3)

*** त्रलादीनां चोपसंख्यानम् ***

भाष्यम्- त्रलादीनां चोपसंख्यानं कर्तव्यम्। तत्र-यत्र, ततः-यतः।

आक्षेपबाधकभाष्यम्- ननु च विशेषे एते विधीयन्ते—'पञ्चम्यास्तसिल्' 'सप्तम्यास्त्रल्' इति।

आक्षेपसाधकभाष्यम्- वक्ष्यत्येतत्—'इतराभ्योऽपि दृश्यन्ते' इति।

न्यासान्तरनिराकरणम्

न्यासान्तरभाष्यम्- यदि पुनरविभक्तिश्शब्दोऽव्ययसञ्ज्ञो भवतीत्युच्यते।

(210. आक्षेपवार्तिकम्-4)

*** अविभक्तावितरेतराऽऽश्रयत्वादप्रसिद्धिः ***

भाष्यम्- अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः सञ्ज्ञायाः। का इतरेतराश्रयता? सत्यविभक्तित्वे संज्ञया भवितव्यं, संज्ञया चाऽविभक्तित्वं भाव्यते, तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

(211. न्यासान्तरवार्तिकम्-5)

*** अलिङ्गमसंख्यमिति वा ***

भाष्यम्- अथवाऽलिङ्गमसंख्यमव्ययसंज्ञं भवतीति वक्तव्यम्। एवमपीतरेतराश्रयमेव भवति। का इतरेतराश्रयता? सत्यलिङ्गासंख्यत्वे संज्ञया भवितव्यम्। संज्ञया चालिङ्गासंख्यत्वं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

दूषणपरिहारभाष्यम्- नेदं वाचनिकम्—अलिङ्गता असंख्यता च। किं तर्हि? स्वाभाविकमेतत्। तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न। तत्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमस्माभिः कर्तुं शक्यम्। स्वाभाविकमेतत्।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्—अलिङ्गमसंख्यमिति।

समाधानभाष्यम्- न वक्तव्यम्।

(212. समाधानहेतुवार्तिकम्-6)

* सिद्धं तु पाठात् *

भाष्यम्- पाठाद्वा सिद्धमेतत्। कथं पाठः कर्तव्यः? तसिलादयः पाक् पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। मान्तः। तसिवती। कृत्वोऽर्थः। नानाञाविति।

प्रथमन्यासाङ्गीकरणभाष्यम्- अथवा पुनरस्तु—अविभक्तिश्शब्दोऽव्ययसञ्ज्ञो भवतीत्येव।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'अविभक्ताावितरेतराश्रयत्वादप्रसिद्धिः' इति।

आक्षेपबाधकभाष्यम्- नैष दोषः। इदं तावदयं प्रष्टव्यः—'यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान्प्रयुञ्जते। ये त्वेते वैयाकरणेभ्योऽन्ये मनुष्याः कथं तेऽविभक्तिकाञ्छब्दान्प्रयुञ्जते' इति। अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानाम्। आतश्चाभिज्ञाः। अन्येन हि वस्नेनैकं गां क्रीणन्ति, अन्येन द्वौ, अन्येन त्रीन्। अभिज्ञाश्च न च प्रयुञ्जते। तदेतदेवं सन्दृश्यताम्—अर्थरूपमेवैतदेवंजातीयकं येनात्र विभक्तिर्न भवतीति।

उपपत्तिभाष्यम्- तच्चाप्येतदेवमनुगम्यमानं दृश्यताम्। किञ्चिदव्ययं विभक्त्यर्थप्रधानं, किञ्चित् क्रियाप्रधानम्। उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम्, हिरुक् पृथगिति क्रियाप्रधानम्। तद्धितश्चापि कश्चिद् विभक्त्यर्थप्रधानः, कश्चित् क्रियाप्रधानः। तत्र यत्रेति विभक्त्यर्थप्रधानः, विना-नानेति क्रियाप्रधानः। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति।

सूत्रसमर्थनभाष्यम्- अथाऽप्यसर्वविभक्तिरित्युच्यते। एवमपि न दोषः। कथम्? इदं चाऽप्यद्यत्वे अतिबहु क्रियते—एकस्मिन्नेकवचनम्, द्वयोर्द्विवचनम्, बहुषु बहुवचनमिति। कथं तर्हि? एकवचनमुत्सर्गः करिष्यते। तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः।

मतान्तरभाष्यम्- न चाप्येवं विग्रहः करिष्यते—न सर्वा असर्वाः, असर्वा विभक्तयो यस्मादिति। कथं तर्हि? न सर्वा असर्वा, असर्वा विभक्तिरस्मादिति। त्रिकं पुनर्विभक्तिसंज्ञम्।

लाघवभाष्यम्-

एवंगते कृत्यपि तुल्यमेतन्मान्तस्य कार्यं ग्रहणं न तत्र।
ततः परे चाभिमता न कार्यास्त्रयः कृदर्था ग्रहणेन योगाः।। 1।।

गौरवप्रदर्शकभाष्यम्- कृत्तद्धितानां ग्रहणन्तु कार्यं संख्याविशेषं ह्यभिनिश्चिता ये। तेषां प्रतिषेधो भवतीति वक्तव्यम्। इह मा भूत्—एको द्वौ बहव इति।

उपसंहारभाष्यम्- तस्मात् स्वरादिग्रहणं च कार्यं कृत्तद्धितानां ग्रहणञ्च पाठे।। 2।।

आक्षेपभाष्यम्- पाठेनेयमव्ययसञ्ज्ञा कृता, सेह न प्राप्नोति परमोच्चैः परमनीचैरिति।

समाधानभाष्यम्- तदन्तविधिना भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- इहापि तर्हि प्राप्नोति—अत्युच्चैः अत्युच्चैसौ अत्युच्चैस इति।

आक्षेपबाधकभाष्यम्- उपसर्जनस्य नेति प्रतिषेधो भविष्यति।

आक्षेपभाष्यम्- स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। सर्वनामसञ्ज्ञायां प्रकृतः प्रतिषेध इहानुवर्तिष्यते।

आक्षेपसाधकभाष्यम्- स वै तत्र प्रत्याख्यायते।

समाधानभाष्यम्- यथा स तत्र प्रत्याख्यायते। इहापि तथा शक्यः प्रत्याख्यातुम्।

अनुयोगभाष्यम्- कथं च स तत्र प्रत्याख्यायते?

समाधानभाष्यम्- महतीयं सञ्ज्ञा क्रियत इति। इयमपि च महती सञ्ज्ञा क्रियते। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करण एतत्प्रयोजनम्—अन्वर्थसञ्ज्ञा यथा विज्ञायेत—न व्येतीत्यव्ययमिति।

अनुयोगभाष्यम्- क्व पुनर्न व्येति?

समाधानभाष्यम्- स्त्रीपुन्नपुंसकानि सत्त्वगुणाः, एकत्वद्वित्वबहुत्वानि च। एतानर्थान् केचिद्वियन्ति केचिन्न वियन्ति। ये न वियन्ति तदव्ययम्।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।। 1।।

तद्धितश्चासर्वविभक्तिः।

(35. अव्ययसञ्ज्ञासूत्रम् 1.1.6 आ. 11)

कृन्मेजन्तः 1.1.39

अन्वयाधिकरणम्

आक्षेपभाष्यम्- कथमिदं विज्ञायते—कृद्यो मान्त इति, आहोस्वित्—कृदन्तं यत् मकारान्तमिति। किं चातः? यदि विज्ञायते—कृद्यो मान्त इति, 'कारयाञ्चकार-हारयाञ्चकारे'-त्यत्र न प्राप्नोति। अथ विज्ञायते—कृदन्तं यन्मान्तमिति, 'प्रतामौ प्रतामः' अत्रापि प्राप्नोति।

समाधानभाष्यम्- यथेच्छसि तथास्तु। अस्तु तावत्—कृद्यो मान्त इति।

आक्षेपभाष्यम्- कथं कारयाञ्चकार-हारयाञ्चकारेति?

प्रत्याक्षेपभाष्यम्- किं पुनरत्राव्ययसंज्ञया प्रार्थ्यते?

प्रत्याक्षेपसमाधानभाष्यम्- 'अव्ययात्' इति लुग् यथा स्यादिति।

समाधानबाधकभाष्यम्- मा भूदेवम्। 'आमः' इत्येवं भविष्यति।

समाधानसाधकभाष्यम्- न सिध्यति। लिग्रहणं तत्रानुवर्तते।

समाधानबाधकभाष्यम्- लिग्रहणं निवर्तिष्यते।

समाधानसाधकभाष्यम्- यदि निवर्तते, प्रत्ययमात्रस्य लुक् प्राप्नोति।

समाधानबाधकभाष्यम्- इष्यते च प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह—'कृञ्चानुप्रयुज्यते लिटि' इति। यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षान्तरभाष्यम्- अथवा पुनरस्तु—कृदन्तं यन्मान्तमिति।

आक्षेपभाष्यम्- कथं प्रतामौ-प्रताम इति?

समाधानभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—'न प्रत्ययलक्षणेनाव्ययसञ्ज्ञा भवति' इति। यदयं प्रशान्शब्दं स्वरादिषु पठति।

सन्निपातपरिभाषाधिकरणम्

(213. उपसंख्यानवार्तिकम्-1)

* कृन्मेजन्तश्चानिकारोकारप्रकृतिः *

भाष्यम्- कृन्मेजन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम्। इह मा भूत्—आधये-आधेः, चिकीर्षवे-चिकीर्षोरिति।

(214. प्रकारान्तरप्रदर्शकवार्तिकम्-2)

* अनन्यप्रकृतिरिति वा *

भाष्यम्- अथवा अनन्यप्रकृतिः कृदव्ययसञ्ज्ञो भवतीति वक्तव्यम्।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- अनन्यप्रकृतिरिति वचनमेव ज्यायः। इदमपि सिद्धं भवति—कुम्भकारेभ्यो नगरकारेभ्य इति।

तृतीयाक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्?

(215. सिद्धान्तिसमाधानवार्तिकम्-3)

* न वा सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति *

भाष्यम्- नवा वक्तव्यम्। किं कारणम्? 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येषा परिभाषा कर्तव्या।

आक्षेपभाष्यम्- कः पुनरत्र विशेषः। एषा वा परिभाषा क्रियेत, अनन्यप्रकृतिरिति वोच्येत।

समाधानभाष्यम्- अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि?

प्रयोजनप्रश्नभाष्यम्- कानि पुनस्तानि?

(प्रयोजनपरं भाष्यवार्तिकम्)

* प्रयोजनं ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम् *

भाष्यम्- ग्रामणिकुलं सेनानिकुलमित्यत्र ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुक् प्राप्नोति। 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- नैतदस्ति प्रयोजनम्। बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक्। 'असिद्धं बहिरङ्गमन्तरङ्गे'।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रयोजनपरं भाष्यवार्तिकम्)

* नलोपो वृत्रहभिः *

भाष्यम्- वृत्रहभिर्भ्रूणहभिरिति। अत्र नलोपे कृते ह्रस्वस्य पिति कृति तुक् भवतीति तुक् प्राप्नोति। 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। असिद्धो नलोपः, तस्यासिद्ध-त्वान्न भविष्यति।

(216. प्रयोजनवार्तिकम्-6)

* उदुपधत्वमकित्त्वस्य निकुचिते *

भाष्यम्- उदुपधत्वमकित्त्वस्यानिमित्तम्। क्व? निकुचिते। निकुचितमित्यत्र नलोपे कृते 'उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' इत्यकित्त्वं प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। अस्त्वत्राकित्त्वम्। 'न धातु-लोप आर्धधातुके' इति प्रतिषेधो भविष्यति।

(217. प्रयोजनवार्तिकम्-7)

* नाभावो यञि दीर्घत्वस्यामुना *

भाष्यम्- नाभावो यञि दीर्घत्वस्यानिमित्तम्। क्व? अमुना। नाभावे कृते 'अतो दीर्घो यञि' 'सुपि च' इति दीर्घत्वं प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्—'न मु टादेशे' इति।

(218. प्रयोजनवार्तिकम्-8)

* आत्वं कित्त्वस्योपादास्त *

भाष्यम्- आत्त्वं कित्त्वस्यानिमित्तम्। क्व? उपादास्तास्य स्वरः शिक्षकस्येति। आत्त्वे कृते 'स्थाघ्वोरिच्च' इतीत्त्वं प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। उक्तमेतत्—'दीङः प्रतिषेधः स्थाघ्वोरित्त्वे' इति।

(219. प्रयोजनवार्तिकम्-9)

* तिसृचतसृत्वं ङीब्विधेः *

भाष्यम्- तिसृचतसृत्वं ङीब्विधेरनिमित्तम्। क्व? तिस्रस्तिष्ठन्ति-चतस्रस्तिष्ठन्ति। तिसृचतसृभावे कृते 'ऋन्नेभ्यो ङीप्' इति ङीप् प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—न तिसृचतसृभावे कृते ङीब् भवतीति। यदयं 'न तिसृचतसृ' नामि दीर्घत्वस्य प्रतिषेधं शास्ति।

प्रयोजनभाष्यम्- इमानि तर्हि प्रयोजनानि—शतानि-सहस्राणि। नुमि कृते 'ष्णान्ता षट्' इति षट्सञ्ज्ञा प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

शकटौ-पद्धतौ। अत्त्वे कृते 'अतः' इति टाप् प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

इयेष-उवोष। गुणे कृते 'इजादेश्च गुरुमतोऽनृच्छः' इत्याम् प्राप्नोति। 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति।

परिभाषादोषाः

(220. **दूषणवार्तिकम्**-10)

* तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य *

भाष्यम्- तस्यैतस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्। क्व? 'अत इञ्' दाक्षिः-प्लाक्षिः।

दूषणबाधकभाष्यम्- न प्रत्ययः सन्निपातलक्षणः।

दूषणसाधकभाष्यम्- अङ्गसञ्ज्ञा तर्ह्यनिमित्तं स्यात्।

(221. **दूषणवार्तिकम्**-11)

* आत्वं पुग्विधेः क्रापयति *

भाष्यम्- आत्वं पुग्विधेरनिमित्तं स्यात्। क्व? क्रापयतीति।

(222. **दूषणवार्तिकम्**-12)

* पुक् ह्रस्वत्वस्यादीदपत् *

भाष्यम्- पुक् ह्रस्वत्वस्यानिमित्तं स्यात्। क्व? अदीदपत्।

(223. **दूषणवार्तिकम्**-13)

* त्यदाद्यकारष्टाब्विधेः *

भाष्यम्- त्यदाद्यकारष्टाब्विधेरनिमित्तं स्यात्। क्व? या सेति।

(224. **दूषणवार्तिकम्**-14)

* इड्विधिराकारलोपस्य पपिवान् *

भाष्यम्- इड्विधिराकारलोपस्यानिमित्तं स्यात्। क्व? पपिवान्-तस्थिवानिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(225. दूषणवार्तिकम्-15)

*** मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य ***

भाष्यम्- मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्याऽनिमित्तं स्यात्। क्व? अग्निमान्वायुमान्, परमवाचा-परमवाचे इति।

(226. दूषणवार्तिकम्-16)

*** नदीह्रस्वत्वं सम्बुद्धिलोपस्य ***

भाष्यम्- नदीह्रस्वत्वं सम्बुद्धिलोपस्यानिमित्तं स्यात्। क्व? नदि कुमारि ब्राह्मणि किशोरि ब्रह्मबन्धु इति। ह्रस्वत्वे कृते 'एङ्ह्रस्वात्सम्बुद्धेः' इति सम्बुद्धिलोपो न प्राप्नोति।

दूषणबाधकभाष्यम्- मा भूदेवम्। ङ्यन्तादित्येवं भविष्यति।

दूषणसाधकभाष्यम्- न सिध्यति। दीर्घादित्युच्यते, ह्रस्वान्ताच्च न प्राप्नोति। इदमिह सम्प्रधार्यम्—ह्रस्वत्वं क्रियताम्, सम्बुद्धिलोप इति। किमत्र कर्तव्यम्? परत्वाद् ह्रस्वत्वम्।

दूषणबाधकभाष्यम्- नित्यः सम्बुद्धिलोपः। कृते ह्रस्वत्वे प्राप्नोति, अकृतेऽपि।

दूषणसाधकभाष्यम्- अनित्यः सम्बुद्धिलोपः। न हि कृते ह्रस्वत्वे प्राप्नोति। किं कारणम्? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति।

आक्षेपोपसंहारभाष्यम्- एते दोषाः समा भूयांसो वा। तस्मान्नार्थोऽनया परिभाषया।

सिद्धान्तिसमाधानभाष्यम्- नहि दोषाः सन्तीति परिभाषा न कर्तव्या, लक्षणं वा न प्रणेयम्। नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्तीति यवा नोप्यन्ते। दोषाः खल्वपि साकल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रम्। कुत एतत्? नहि दोषाणां लक्षणमस्ति। तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या, प्रतिविधेयं दोषेषु। कृन्मेजन्तः।

(37. अव्ययसञ्ज्ञासूत्रम् 1.1.6 आ. 12)

अव्ययीभावश्च 1.1.41

(226. प्रयोजनवार्तिकम्-1)

*** अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः ***

भाष्यम्- अव्ययीभावस्याव्ययत्वे प्रयोजनम्। किम्? लुङ्मुखस्वरोपचाराः। लुक्—उपाग्नि-प्रत्यग्नि। 'अव्ययात्' इति लुक् सिद्धो भवति।

मुखस्वर—उपाग्निमुखः-प्रत्यग्निमुखः। 'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः' इत्येष प्रतिषेधः सिद्धो भवति।

उपचारः—उपपयःकारः-उपपयःकाम इति। 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' इति प्रतिषेधः सिद्धो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम्।

समाधानभाष्यम्- परिगणनमित्याह। अपि खल्वप्याहुः—'यदन्यदव्ययीभावस्याव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः' इति।

अनुयोगभाष्यम्- किं पुनस्तत्?

परिगणनाभावे दूषणभाष्यम्- पराङ्गवद्भावेऽव्ययप्रतिषेधश्चोदितः, उच्चैरधीयाननीचैरधीयानेत्येवमर्थम्। स इहापि प्राप्नोति—उपाग्न्यधीयान-प्रत्यग्न्यधीयान इति।

अकच्यव्ययग्रहणं क्रियते, उच्चकैर्नीचकैरित्येवमर्थम्। स इहापि प्राप्नोति—उपाग्निकं-प्रत्यग्निकम्।

मुमि अव्ययप्रतिषेधश्चोद्यते, दोषामन्यमहर्दिवामन्या रात्रिरित्येवमर्थम्। स इहापि प्राप्नोति—उपकुम्भम्मन्यः-उपमणिकम्मन्य इति।

'अस्य च्वौ' अव्ययप्रतिषेधश्चोद्यते—दोषाभूतमहर्दिवाभूता रात्रिरित्येवमर्थम्। स इहापि प्राप्नोति—उपकुम्भीभूतम्-उपमणिकीभूतम्।

प्रत्याख्यानभाष्यम्- यदि परिगणनं क्रियते, नार्थोऽव्ययीभावस्याव्ययसंज्ञया।

आक्षेपभाष्यम्- कथं यान्यव्ययीभावस्याव्ययत्वे प्रयोजनानि?

प्रथमप्रयोजननिरासभाष्यम्- नैतानि सन्ति। यत्तावदुच्यते—लुगिति। आचार्यप्रवृत्तिर्ज्ञापयति—भवत्यव्ययीभावाल्लुगिति। यदयम्—'नाव्ययीभावात्' इति प्रतिषेधं शास्ति।

तृतीयप्रयोजननिरासभाष्यम्- उपचारः—अनुत्तरपदस्थस्येति वर्तते।

द्वितीयप्रयोजने समाधानभाष्यम्- तत्र मुखस्वर एकः प्रयोजयति। न चैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात्—'नाव्ययादव्ययीभावाच्च' इति। अव्ययीभावश्च।

सर्वनामस्थानसञ्ज्ञाप्रकरणम्

(37. **सर्वनामस्थानसञ्ज्ञासूत्रम्** 1.1.6 आ. 13)

शि सर्वनामस्थानम् 1.1.42

(38. **सर्वनामस्थानसञ्ज्ञासूत्रम्** 1.1.6 आ. 14)

सुडनपुंसकस्य 1.1.43

(228. **आक्षेपवार्तिकम्**-1)

*** शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः ***

भाष्यम्- शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शेः प्रतिषेधः प्राप्नोति। कुण्डानि तिष्ठन्ति, वनानि तिष्ठन्ति।

दूषणान्तरभाष्यम्- असमर्थसमासश्चायं द्रष्टव्यः—अनपुंसकस्येति। न हि नञो नपुंसकेन सामर्थ्यम्। केन तर्हि? भवतिना। न भवति नपुंसकस्येति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- यत्तावदुच्यते—'शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः' इति।

(229. समाधानवार्तिकम्- 2)

*** नाप्रतिषेधात् ***

भाष्यम्- नायं प्रसज्यप्रतिषेधः—नपुंसकस्य नेति। किं तर्हि? पर्युदासोऽयम्—यदन्यन्नपुंसकादिति। नपुंसके न व्यापारः। यदि केनचित्प्राप्नोति, तेन भविष्यति। पूर्वेण च प्राप्नोति।

(230. समाधानवार्तिकम्- 3)

*** अप्राप्तेर्वा ***

भाष्यम्- अनन्तरा या प्राप्तिः सा निषिध्यते। कुत एतत्? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा, तया भविष्यति।

आक्षेपभाष्यम्- ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते।

समाधानभाष्यम्- नोत्सहते प्रतिषिद्धा सती पूर्वां बाधितुम्।

दूषणान्तरसमाधानभाष्यम्- यदप्युच्यते—असमर्थसमासश्चायं द्रष्टव्यः—इति। यद्यपि वक्तव्यः। अथवैतर्हि बहूनि प्रयोजनानि। कानि? असूर्यम्पश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मण इति। सुड।

(39. विभाषासञ्ज्ञासूत्रम् 1.1.6 आ. 15)

न वेति विभाषा 1.1.44

अर्थसञ्ज्ञाधिकरणम्

(231. आक्षेपवार्तिकम्- 1)

*** नवेतिविभाषायामर्थसञ्ज्ञाकरणम् ***

भाष्यम्- नवेतिविभाषायामर्थस्य सञ्ज्ञा कर्तव्या। नवाशब्दस्य योऽर्थस्तस्य सञ्ज्ञा भवतीति वक्तव्यम्। किं प्रयोजनम्?

(232. आक्षेपसाधकवार्तिकद्वितीयखण्डम्- 1)

*** शब्दसञ्ज्ञायां ह्यर्थासम्प्रत्ययो यथान्यत्र ***

भाष्यम्- शब्दसञ्ज्ञायां हि सत्यामर्थस्यासम्प्रत्ययः स्यात्। यथान्यत्र। अन्यत्रापि हि शब्दसञ्ज्ञायां शब्दस्यैव सम्प्रत्ययो भवति, नार्थस्य। क्वान्यत्र? 'दाधा घ्वदाप्' 'तरप्तमपौ घः' इति। घुग्रहणेषु घग्रहणेषु च शब्दस्य सम्प्रत्ययो भवति, नार्थस्य।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- न वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(233. समाधानवार्तिकम्-2)

*** इतिकरणोऽर्थनिर्देशार्थः ***

भाष्यम्- इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति।

आक्षेपभाष्यम्- किं गतमेतदितिना, आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्?

समाधानभाष्यम्- गतमित्याह। कुतः?

(समाधाने भाष्यवार्तिकम्)

*** लोकतः ***

भाष्यम्- तद्यथा 'गौरित्ययमाह' इति गोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात् पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासावर्थपदार्थकता तस्याः शब्दपदार्थकः सम्पद्यते। एवमिहापि नवाशब्दादितिकरणः प्रयुज्यमानो नवाशब्दं स्वस्मात्पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासौ शब्दपदार्थकता तस्याः लौकिकमर्थं सम्प्रत्याययति—नवेति यद्गम्यते, नवेति यत्प्रतीयते—इति।

समानशब्दसञ्ज्ञानिरसनाधिकरणम्

(234. आक्षेपवार्तिकम्-1)

*** समानशब्दप्रतिषेधः ***

भाष्यम्- समानशब्दानां प्रतिषेधो वक्तव्यः। नवा कुण्डिका-नवा घटिकेति।

आक्षेपभाष्यम्- किञ्च स्यात्, यद्येतेषामपि विभाषा सञ्ज्ञा स्यात्?

समाधानभाष्यम्- 'विभाषा दिक्समासे बहुव्रीहौ'—दक्षिणपूर्वस्यां शालायाम्। अचिर-कृतायां सम्प्रत्ययः स्यात्।

(235. समाधानवार्तिकम्-2)

*** न वा विधिपूर्वकत्वात् प्रतिषेधसम्प्रत्ययो यथा लोके ***

भाष्यम्- न वा एष दोषः। किं कारणम्? 'विधिपूर्वकत्वात्।' विधाय किञ्चिन्न वेत्युच्यते, तेन प्रतिषेधवाचिनः सम्प्रत्ययो भवति। तद्यथा लोके—ग्रामो भवता गन्तव्यो न वा, नेति गम्यते।

समाधानबाधकभाष्यम्- अस्ति कारणम्—येन नवेत्युक्ते लोके प्रतिषेधवाचिनः सम्प्रत्ययो भवति। किं कारणम्? विलिङ्गं हि भवान् लोके निर्देशं करोति। अङ्ग हि समानलिङ्गो निर्देशः क्रियतां प्रत्यग्रवाचिनः सम्प्रत्ययो भविष्यति। तद्यथा—'ग्रामो भवता गन्तव्यो नवः' प्रत्यग्र इति गम्यते।

समाधानसाधकभाष्यम्- एतच्चैव न जानीमः—क्वचिद्व्याकरणे समानलिङ्गो निर्देशः क्रियत इति।

समाधानसाधकशेषभाष्यम्- अपि चात्र कामचारः प्रयोक्तुः शब्दानामभिसम्बन्धे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यथा—'यवागूर्भवता भोक्तव्या न वा'। यदा यवागूशब्दो भुजिना सम्बध्यते, भुजिर्नवाशब्देन, तदा प्रतिषेधवाचिनः सम्प्रत्ययो भवति—'यवागूर्भवता भोक्तव्या न वा' नेति गम्यते। यदा यवागूशब्दो नवाशब्देनाभिसम्बध्यते न भुजिना, तदा प्रत्यग्रवाचिनः सम्प्रत्ययो भवति। यथा—'यवागूर्नवा भवता भोक्तव्या', प्रत्यग्रेति गम्यते। न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसम्बध्नीमः—दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवन्तीति। किं तर्हि? भवतिरभिसम्बध्यते—दिक्समासे सर्वादीनि भवन्ति विभाषेति।

विध्यनित्यत्वसाधनाधिकरणम्

(236. आक्षेपवार्तिकम्-1)

*** विध्यनित्यत्वमनुपपन्नं प्रतिषेधसञ्ज्ञाकरणात् ***

भाष्यम्- विधेरनित्यत्वं नोपपद्यते। शुशाव-शुशुवतुः-शुशुवुः। शिश्वाय-शिश्वियतुः-शिश्वियुः। किं कारणम्? 'प्रतिषेधसञ्ज्ञाकरणात्'। प्रतिषेधस्येयं सञ्ज्ञा क्रियते। तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव सम्प्रत्ययः स्यात्।

(237. समाधानवार्तिकम्-2)

*** सिद्धं तु प्रसज्य प्रतिषेधात् ***

भाष्यम्- सिद्धमेतत्। कथम्? 'प्रसज्य प्रतिषेधात्'। विधाय किञ्चिन्नवेत्युच्यते तेनोभयं भविष्यति।

(238. आक्षेपवार्तिकम्-3)

*** विप्रतिषिद्धं तु ***

भाष्यम्- विप्रतिषिद्धं तु भवति। अत्र न ज्ञायते—केनाभिप्रायेण प्रसजति, केन निवृत्तिं करोतीति।

(239. समाधानवार्तिकम्-4)

*** न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात् ***

भाष्यम्- न वा एष दोषः। किं कारणम्? 'प्रसङ्गसामर्थ्यात्'। प्रसङ्गसामर्थ्याच्च विधिर्भविष्यति—अन्यत्र प्रतिषेधविषयात्। प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यति—अन्यत्र विधिविषयात्।

आक्षेपभाष्यम्- तदेतत् क्व सिद्धं भवति—या अप्राप्ते विभाषा। या हि प्राप्ते विभाषा, कृतसामर्थ्यस्तत्र पूर्वेणैव विधिरिति कृत्वा प्रतिषेधस्यैव सम्प्रत्ययः स्यात्।

समाधानभाष्यम्- एतदपि सिद्धम्। कथम्? विभाषेति महती सञ्ज्ञा क्रियते। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करणे एतत्प्रयोजनम्—उभयोः सञ्ज्ञा यथा स्यात्, नेति च वेति च। तत्र या तावदप्राप्ते विभाषा, तत्र प्रतिषेध्यं नास्तीति कृत्वा वेत्यनेन विकल्पो भविष्यति। या हि प्राप्ते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभाषा, तत्रोभयमुपस्थितं भवति—नेति च वेति च। तत्र नेत्यनेन प्रतिषिद्धे, वेत्यनेन विकल्पो भविष्यति।

भाष्यम्- एवमपि—

(240. **आक्षेपवार्तिकम्**-5)

*** विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः ***

भाष्यम्- विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते। शुशाव, शुशुवतुः, शुशुवुः। शिश्वाय, शिश्वियतुः, शिश्वियुः। किं कारणम्?

(241. **आक्षेपसाधकवार्तिकम्**-6)

*** भवतीति चेन्न प्रतिषेधः ***

भाष्यम्- भवतीति चेत् प्रतिषेधो न प्राप्नोति।

(242. **आक्षेपसाधकवार्तिकम्**-7)

*** नेति चेन्न विधिः ***

भाष्यम्- नेति चेद्विधिर्न सिध्यति।

(243. **समाधानवार्तिकम्**-8)

*** सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात् ***

भाष्यम्- सिद्धमेतत्। कथम्? पूर्वं विधिमुत्तरो विधिर्बाधते। इतिकरणोऽर्थनिर्देशार्थ इत्युक्तम्।

कार्यशब्दवादनिरासः

(244. **आक्षेपवार्तिकम्**-9)

*** साध्वनुशासनेऽस्मिन् शास्त्रे यस्य विभाषा तस्य साधुत्वम् ***

भाष्यम्- साध्वनुशासनेऽस्मिन् शास्त्रे यस्य विभाषा क्रियते सा विभाषा साधुः स्यात्। समासश्चैव हि विभाषा क्रियते, तेन समासस्यैव विभाषा साधुत्वं स्यात्।

आक्षेपसाधकभाष्यम्- अस्तु। यः साधुः स प्रयोक्ष्यते। असाधुर्न प्रयोक्ष्यते।

आक्षेपसाधकभाष्यम्- न चैव हि कदाचिद् राजपुरुष इत्येतस्यामवस्थायामसाधुत्वमिष्यते।

भाष्यम्- अपि च—

(245. **आक्षेपवार्तिकम्**-10)

*** द्वेधाऽप्रतिपत्तिः ***

भाष्यम्- द्वैधं शब्दानामप्रतिपत्तिः स्यात्। इच्छामश्च—पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, एतच्च न सिध्यति। यस्य पुनः कार्याः शब्दाः, विभाषाऽसौ समासं निर्वर्तयति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्- यस्यापि नित्याः शब्दास्तस्याप्येष दोषो न भवति। कथम्? न विभाषाग्रहणेन साधुत्वमभिसम्बध्यते। किं तर्हि? सामससञ्ज्ञाभिसम्बध्यते—समास इत्येषा सञ्ज्ञा विभाषा भवतीति। तद्यथा—'मेध्यः पशुर्विभाषितो मेध्योऽनड्वान् विभाषितः'- इति। नैतद्विचार्यते—अनड्वान्नानड्वानिति। किं तर्हि? आलब्धव्यो नालब्धव्य इति।

(246. आक्षेपवार्तिकम्-11)

* कार्येषु युगपदन्वाचययौगपद्यम् *

भाष्यम्- कार्येषु शब्देषु युगपदन्वाचयेन च यदुच्यते, तस्य युगपद्वचनता प्राप्नोति— 'तव्यत्तव्यानीयरः' 'ढक् च मण्डूकात्' इति। यस्य पुनर्नित्याः शब्दाः, प्रयुक्तानामसौ साधुत्वमन्वाचष्टे।

आक्षेपबाधकभाष्यम्- ननु यस्यापि कार्यास्तस्याप्येष न दोषः। कथम्? प्रत्ययः परो भवतीत्युच्यते। न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन सम्भवोऽस्ति।

आक्षेपाभिप्रायभाष्यम्- नापि ब्रूमः—प्रत्ययमाला प्राप्नोतीति। किं तर्हि? कर्तव्यमिति प्रयोक्तव्ये युगपद् द्वितीयस्य तृतीयस्य च प्रयोगः प्राप्नोतीति।

आक्षेपबाधकभाष्यम्- नैष दोषः। अर्थगत्यर्थः शब्दप्रयोगः। अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य च तृतीयस्य च प्रयोगेण न भवितव्यम्, 'उक्तार्थानामप्रयोगः' इति।

(246. आक्षेपवार्तिकम्-12)

* आचार्यदेशशीलनेन च तद्विषयता *

भाष्यम्- आचार्यशीलनेन देशशीलनेन च यदुच्यते, तस्य तद्विषयता प्राप्नोति। 'इको ह्रस्वोऽङ्यो गालवस्य' 'प्राचामवृद्धात् फिन् बहुलम्' इति। गालवा एव ह्रस्वान्प्रयुञ्जीरन्, प्राक्षु चैव हि फिन् स्यात्। तद्यथा 'जमदग्निर्वा एतत्पञ्चममवदानमवाद्यत्। तस्मान्नाजामदग्न्यः पञ्चावत्तं जुहोति'। यस्य पुनर्नित्याः शब्दाः, गालवग्रहणं तस्य पूजार्थम्, देशग्रहणं च कीर्त्यर्थम्।

आक्षेपबाधकभाष्यम्- ननु च—यस्यापि कार्याः शब्दाः, तस्यापि गालवग्रहणं पूजार्थं स्यात्, देशग्रहणं च कीर्त्यर्थम्।

(247. आक्षेपवार्तिकम्-13)

* तत्कीर्तने च द्वेधाऽप्रतिपत्तिः *

भाष्यम्- तत्कीर्तने च द्वैधं शब्दानामप्रतिपत्तिः स्यात्। इच्छामश्च पुनराचार्यग्रहणेषु देशग्रहणेषु च द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, तच्च न सिध्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रप्रत्याख्यानम्

(248. **सिद्धान्तवार्तिकम्**-1)

*** अशिष्यो वा विदितत्वात् ***

भाष्यम्- अशिष्यो वा पुनरयं योगः। किं कारणम्? 'विदितत्वात्'। यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात्। येऽपि ह्येतां संज्ञां नारभन्ते तेऽपि विभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति। याज्ञिकाः खल्वपि सञ्ज्ञामनारभमाणा विभाषेत्युक्तेऽनित्यत्त्वमवगच्छन्ति। तद्यथा—'मेध्यः पशुर्विभाषितो मेध्योऽनड्वान्विभाषितः' इति। आलब्धव्यो नालब्धव्य इति गम्यते। आचार्यः खल्वपि सञ्ज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं सम्प्रत्याययति—बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषाम् इति।

अप्राप्तविभाषाप्रकरणम्

(249. **अधिकारवार्तिकम्**-1)

*** अप्राप्ते त्रिसंशयाः ***

भाष्यम्- इत उत्तरं या विभाषा अनुक्रमिष्यामः, अप्राप्ते ता द्रष्टव्याः। त्रिसंशयास्तु भवन्ति—प्राप्ते, अप्राप्ते, उभयत्र वेति।

(1. अप्राप्तविभाषोदाहरणभाष्यवार्तिकम्)

*** द्वन्द्वे च विभाषा जसि ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

आक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहसाधकभाष्यम्- उभयशब्दः सर्वादिषु पठ्यते। तयपश्चायजादेशः क्रियते। तेन वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। अयच् प्रत्ययान्तरम्।

समाधानबाधकभाष्यम्- यदि प्रत्ययान्तरम्, उभयीति ईकारो न प्राप्नोति।

समाधानसाधकभाष्यम्- मा भूदेवम्, मात्रचः इत्येवं भविष्यति। कथम्? मात्रजिति नेदं प्रत्ययग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः। मात्रशब्दात्प्रभृति आ अयचश्चकारात्।

समाधानबाधकभाष्यम्- यदि प्रत्याहारग्रहणम्, 'कति तिष्ठन्ति' अत्रापि प्राप्नोति।

समाधानसाधकभाष्यम्- अत इति वर्तते।

समाधानबाधकभाष्यम्- एवमपि—'तैलमात्रा-घृतमात्रा' अत्रापि प्राप्नोति।

समाधानसाधकभाष्यम्- सदृशस्याप्यसन्निविष्टस्य न भविष्यति प्रत्याहारेण ग्रहणम्।

(2. उदाहरणभाष्यवार्तिकम्)

*** ऊर्णोतेर्विभाषा ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

आक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'असंयोगाल्लिट् कित्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते।

सन्देहाक्षेपभाष्यम्- अन्यद्धि कित्त्वम्, अन्यद्धि ङित्त्वम्।

(250. सन्देहसाधकवार्तिकम्-2)

* एकं चेन्ङित्कितौ *

सन्देहसाधकभाष्यम्- यद्येकं ङित्-कितौ, ततः सन्देहः।

तृतीयाक्षेपभाष्यम्- अथ हि नाना, नास्ति सन्देहः।

समाधानभाष्यम्- यद्यपि नाना, एवमपि सन्देहः—प्रौर्णुवि।

सन्देहोपादकभाष्यम्- 'सार्वधातुकमपित्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते।

(3. उदाहरणभाष्यवार्तिकम्)

* विभाषोपयमने *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- गन्धन इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। गन्धन इति निवृत्तम्।

(4. उदाहरणभाष्यवार्तिकम्)

* अनुपसर्गाद्वा *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'वृत्तिसर्गतायनेषु क्रमः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। वृत्त्यादिष्विति निवृत्तम्।

(5. उदाहरणभाष्यवार्तिकम्)

* विभाषा वृक्षमृगादीनाम् *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'जातिरप्राणिनाम्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। 'जातिरप्राणिनाम्' इति निवृत्तम्।

(6. उदाहरणभाष्यवार्तिकम्)

*** उषविदजागृभ्योऽन्यतरस्याम् ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- प्रत्ययान्तादिति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। प्रत्ययान्ता धात्वन्तराणि।

(7. उदाहरणभाष्यवार्तिकम्)

*** दीपादीनां विभाषा ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

आक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'भावकर्मणोः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। कर्तरीति हि वर्तते।

आक्षेपभाष्यम्- एवमपि सन्देहः—न्याय्ये वा कर्तरि, कर्मकर्तरि वेति।

समाधानभाष्यम्- नास्ति सन्देहः। सकर्मकस्य कर्ता कर्मवद्भवति। अकर्मकाश्च दीपादयः।

समाधानबाधकभाष्यम्- अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति।

समाधानसाधकभाष्यम्- कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां च भवन्ति। कर्तृस्थभावकाश्च दीपादयः।

(8. उदाहरणभाष्यवार्तिकम्)

*** विभाषाग्रेप्रथमपूर्वेषु ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'आभीक्ष्ण्ये' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। 'आभीक्ष्ण्ये' इति निवृत्तम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(9. उदाहरणभाष्यवार्तिकम्)

* तृन्नादीनां विभाषा *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देह:।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'आक्रोशे' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। 'आक्रोशे' इति निवृत्तम्।

(10. उदाहरणभाष्यवार्तिकम्)

* एकहलादौ पूरयितव्येऽन्यतरस्याम् *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देह:।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'उदकस्योद: सञ्ज्ञायाम्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। सञ्ज्ञायामिति निवृत्तम्।

(11. उदाहरणभाष्यवार्तिकम्)

* श्वादेरिञि, पदान्तस्यान्यतरस्याम् *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देह:।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- इञीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। इञीति निवृत्तम्।

(12. उदाहरणभाष्यवार्तिकम्)

* सपूर्वाया: प्रथमाया विभाषा *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देह:।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- चादिभिर्योग इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। चादिभिर्योग इति निवृत्तम्।

(13. उदाहरणभाष्यवार्तिकम्)

* ग्रो यङन्यचि विभाषा *

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देह:।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहोपपादकभाष्यम्- यङीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- अप्राप्ते। यङीति निवृत्तम्।

प्राप्तविभाषाप्रकरणम्

(251. अधिकारवार्तिकम्-1)

*** प्राप्ते च ***

भाष्यम्- इत उत्तरं या विभाषा अनुक्रमिष्यामः, प्राप्ते ता द्रष्टव्याः। त्रिसंशयास्तु भवन्ति—प्राप्ते, अप्राप्ते, उभयत्र वेति।

(1. उदाहरणभाष्यवार्तिकम्)

*** विभाषा विप्रलापे ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'व्यक्तवाचाम्' वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- प्राप्ते। व्यक्तवाचामिति हि वर्तते।

(2. उदाहरणभाष्यवार्तिकम्)

*** विभाषोपपदेन प्रतीयमाने ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- स्वरितञितः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- प्राप्ते। 'स्वरितञितः' इति हि वर्तते।

(3. उदाहरणभाष्यवार्तिकम्)

*** तिरोऽन्तर्धौ, विभाषा कृञि ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'अन्तर्धौ' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- प्राप्ते। 'अन्तर्धौ' इति हि वर्तते।

(4. उदाहरणभाष्यवार्तिकम्)

*** अधिरीश्वरे, विभाषा कृञि ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'ईश्वरे' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- प्राप्ते। 'ईश्वरे' इति हि वर्तते।

(5. उदाहरणभाष्यवार्तिकम्)

*** दिवस्तदर्थस्य, विभाषोपसर्गे ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- तदर्थस्येति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- प्राप्ते। 'तदर्थस्य' इति हि वर्तते।

उभयत्र विभाषाप्रकरणम्

(252. अधिकारवार्तिकम्- 1)

*** उभयत्र च ***

भाष्यम्- इत उत्तरं या विभाषा अनुक्रमिष्यामः, उभयत्र ता द्रष्टव्याः। त्रिसंशयास्तु भवन्ति—प्राप्ते, अप्राप्ते, उभयत्र वेति।

(1. उदाहरणभाष्यवार्तिकम्)

*** हृक्रोरन्यतरस्याम् ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- उभयत्र। प्राप्ते तावत्—अभ्यवहारयति सैन्धवान्, अभ्यवहारयति सैन्धवैः। विकारयति सैन्धवान्, विकारयति सैन्धवैः। अप्राप्ते—हरति भारं देवदत्तः, हारयति भारं देवदत्तम्, हारयति भारं देवदत्तेन। करोति कटं देवदत्तः, कारयति कटं देवदत्तम्, कारयति कटं देवदत्तेन।

(2. उदाहरणभाष्यवार्तिकम्)

*** यदि, विभाषा साकाङ्क्षे ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- यदीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- उभयत्र। प्राप्ते तावत्—अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्कश्मीरेष्ववसाम। यत्तत्रौदनं भोक्ष्यामहे, यत्तत्रौदनमभुञ्ज्महि। अप्राप्ते—अभिजानासि देवदत्त कश्मीरान् गमिष्यामः, कश्मीरानगच्छाम। तत्रौदनं भोक्ष्यामहे, तत्रौदनमभुञ्ज्महि।

(3. उदाहरणभाष्यवार्तिकम्)

*** विभाषा श्वेः ***

भाष्यम्- प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- कितीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- उभयत्र। प्राप्ते तावत्—शुशुवतुः-शुशुवुः, शिश्वियतुः-शिश्वियुः। अप्रापते—शुशाव-शुशविथ, शिश्वाय-शिश्वयिथ।

(4. उदाहरणभाष्यवार्तिकम्)

*** विभाषा सङ्घुषास्वनाम् ***

भाष्यम्- सम्पूर्वाद्धुषे—प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- 'घुषिरविशब्दने' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- उभयत्र। प्राप्ते तावत्—सङ्घुष्टा रज्जुः, सङ्घुषिता रज्जुः। अप्राप्ते—सङ्घुष्टं वाक्यमाह, सङ्घुषितं वाक्यमाह।

आस्वनोदाहरणभाष्यम्- आङ्पूर्वात्स्वने—प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः।

सन्देहाक्षेपभाष्यम्- कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

सन्देहोपपादकभाष्यम्- मनसीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

सिद्धान्तभाष्यम्- उभयत्र। प्राप्ते तावत्—आस्वान्तं मनः, आस्वनितं मनः। अप्राप्ते—आस्वान्तो देवदत्तः, आस्वनितो देवदत्त इति।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम्

●

प्रथमेऽध्याये प्रथमे पादे सप्तममाह्निकम्

(40. सम्प्रसारणसञ्ज्ञासूत्रम् 1.1.7 आ. 1)

इग्यणः सम्प्रसारणम् 1.1.45

उभयसञ्ज्ञात्वस्थापनाधिकरणम्

आक्षेपभाष्यम्- किमियं वाक्यस्य संप्रसारणसञ्ज्ञा क्रियते—इग्यण इत्येतद्वाक्यं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रसारणसंज्ञं भवतीति। आहोस्विद्वर्णस्य—इग्यो यणः स्थाने वर्णः स सम्प्रसारणसञ्ज्ञो भवतीति। कश्चात्र विशेषः?

(253. वाक्यसञ्ज्ञापक्षदूषणवार्तिकम्-1)

* सम्प्रसारणसञ्ज्ञायां वाक्यस्य सञ्ज्ञा चेद्वर्णविधिः *

भाष्यम्- सम्प्रसारणसञ्ज्ञायां वाक्यस्य सञ्ज्ञा चेद्वर्णविधिर्न सिध्यति—सम्प्रसारणात्परः पूर्वो भवतीति, सम्प्रसारणस्य दीर्घो भवतीति। न हि वाक्यस्य सम्प्रसारणसञ्ज्ञायामेष निर्देश उपपद्यते। नाप्येतयोः कार्ययोः सम्भवोऽस्ति।

द्वितीयपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि वर्णस्य।

(254. वर्णसञ्ज्ञापक्षदूषणवार्तिकम्-2)

* वर्णसञ्ज्ञा चेन्निर्वृत्तिः *

भाष्यम्- वर्णस्य सञ्ज्ञा चेन्निर्वृत्तिर्न सिध्यति—'ष्यङः सम्प्रसारणम्' इति। स एव हि तावदिह दुर्लभः, यस्य सञ्ज्ञा क्रियते। अथापि कथञ्चिल्लभ्येत, केनासौ यणः स्थाने स्यात्। अनेन ह्यसौ व्यवस्थाप्यते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

(255. समाधानवार्तिकम्-3)

* विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसञ्ज्ञात्वस्य *

भाष्यम्- यदयं विभक्तिविशेषैर्निर्देशं करोति—संप्रसारणात्परः पूर्वो भवति, सम्प्रसारणस्य दीर्घो भवति, ष्यङः सम्प्रसारणं भवतीति। तेन ज्ञायते—उभयोः संज्ञा भवतीति। यत्तावदाह—सम्प्रसारणात्परः पूर्वो भवति, सम्प्रसारणस्य दीर्घो भवतीति। तेन ज्ञायते—वर्णस्य भवतीति। यदप्याह—ष्यङः सम्प्रसारणमिति। तेन ज्ञायते—वाक्यस्य सञ्ज्ञा भवतीति।

प्रथमपक्षाभ्युपगमभाष्यम्- अथवा पुनरस्तु वाक्यस्यैव।

उक्ताक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'सम्प्रसारणसञ्ज्ञायां वाक्यस्य सञ्ज्ञा चेद्वर्ण-विधिः' इति।

समाधानभाष्यम्- नैष दोषः। यथा काकाज्जातः काकः, श्येनाज्जातः श्येनः, एवं सम्प्रसारणाज्जातं सम्प्रसारणमिति। यत्तत्सम्प्रसारणाज्जातं सम्प्रसारणमिति तस्मात्परः पूर्वो भवति, तस्य दीर्घो भवतीति।

समाधानान्तरभाष्यम्- अथवा—दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः, पदेषु च पदैकदेशान्। वाक्येषु तावद्वाक्यैकदेशान्—प्रविश पिण्डीम्, प्रविश तर्पणमिति। पदेषु पदैकदेशान्—देवदत्तः-दत्तः, सत्यभामा-भामेति। एवमिहापि—'सम्प्रसारणनिर्वृत्तात् सम्प्रसारणनिर्वृत्तस्य' इत्येतस्य वाक्यस्यार्थे 'सम्प्रसारणात्सम्प्रसारणस्य' इत्येष वाक्यैकदेशः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयुज्यते। तेन निर्वृत्तस्य विधिं विज्ञास्यामः—सम्प्रसारणनिर्वृत्तात्सम्प्रसारणनिर्वृत्तस्येति।

समाधानान्तरभाष्यम्- अथवा आहायं सम्प्रसारणात्परः पूर्वो भवति, सम्प्रसारणस्य दीर्घो भवतीति। न च वाक्यस्य सम्प्रसारणसञ्ज्ञायां सत्यामेष निर्देश उपपन्नः, नाप्येतयोः कार्ययोः सम्भवोऽस्ति। तत्र वचनाद्भविष्यति।

द्वितीयपक्षाभ्युपगमभाष्यम्- अथवा पुनरस्तु वर्णस्य।

उक्ताक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'वर्णसञ्ज्ञा चेन्निर्वृत्तिः' इति।

समाधानभाष्यम्- नैष दोषः। इतरेतराश्रयमात्रमेतच्चोदितम्। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि—'सिद्धं तु नित्यशब्दत्वात्' इति।

समाधानबाधकभाष्यम्- नेदं तुल्यमन्यैरितरेतराश्रयैः। न हि तत्र किञ्चिदुच्यते—अस्य स्थाने ये आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवन्तीति। इह हि पुनरुच्यते—इग्यो यणः स्थाने वर्णः स सम्प्रसारणसञ्ज्ञो भवतीति।

समाधानसाधकभाष्यम्- एवं तर्हि भाविनीयं सञ्ज्ञा विज्ञास्यते। तद्यथा—कश्चित्कञ्चित् तन्तुवायमाह—'अस्य सूत्रस्य शाटकं वय' इति। स पश्यति—'यदि शाटकः न वातव्यः, अथ वातव्यः न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य सञ्ज्ञाऽभिप्रेता। स मन्ये वातव्यः—यस्मिन्नुते शाटक इत्येतद्भवति इति। एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य सम्प्रसारणमित्येषा सञ्ज्ञा भविष्यति।

समाधानान्तरभाष्यम्- अथवा—इजादिप्रवृत्तिर्यजादिप्रवृत्तिश्चैव हि लोके लक्ष्यते। यजाद्युपदेशात्तु इजादिनिवृत्तिः प्रसक्ता। प्रयुञ्जते च पुनर्लोकाः—इष्टम्-उप्तमिति। ते मन्यामहे—अस्य यणः स्थाने इममिकं प्रयुञ्जते इति। तत्रासाध्वभिमतस्य शास्त्रेण साधुत्वमन्वाख्यायते—किति साधुर्भवति, ङिति साधुर्भवतीति। इग्यणः सम्प्रसारणम्।

परिभाषाप्रकरणम्

(41. **परिभाषासूत्रम्** 1.1.7 आ. 2)

आद्यन्तौ टकितौ 1.1.46

अन्वयानुपपत्तिनिराकरणाधिकरणम्

आक्षेपभाष्यम्- समासनिर्देशोऽयम्। तत्र न ज्ञायते—क आदिः कोऽन्त इति। तद्यथा—'अजाविधनौ देवदत्तयज्ञदत्तौ' इत्युक्ते तत्र न ज्ञायते—कस्याजा धनम्, कस्यावयः इति।

समाधानभाष्यम्- यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति।

आक्षेपभाष्यम्- अस्ति वेह कश्चित्पुरुषारम्भः।

समाधानभाष्यम्- अस्तीत्याह। कः? संख्यातानुदेशो नाम।

टकितोरागमविषयत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्- कौ पुनष्टकितावाद्यन्तौ भवतः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- आगमावित्याह।

आदेशवादिन आगमवादिनं प्रति आक्षेपभाष्यम्- युक्तं पुनर्यन्नित्येषु शब्देषु आगमशासनं स्यात्। न। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामापूर्वः शब्दोपजनः।

आगमवादिन आदेशवादिनं प्रति आक्षेपभाष्यम्- अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः।

आदेशवादिनः समाधानभाष्यम्- बाढं युक्तम्। शब्दान्तरैरिह भवितव्यम्। तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता।

इष्टापत्तिभाष्यम्- आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः।

आक्षेपभाष्यम्- तत्कथम्?

एकदेशिसमाधानभाष्यम्- सञ्ज्ञाधिकारोऽयम्। आद्यन्तौ चेह सञ्ज्ञीत्र्येते। टकारककारावितावुदाह्रियेते। तत्राद्यन्तयोष्टकारककारावितौ संज्ञे भविष्यतः। तत्र 'आर्धधातुकस्येड्वलादेः' इत्युपस्थितमिदं भवति—आदिरिति। तेनेकारादिरादेशो भविष्यति।

आक्षेपभाष्यम्- एतावदिह सूत्रम् 'इट्' इति। कथं पुनरियता सूत्रेण इकारादिरादेशो लभ्यः?

समाधानभाष्यम्- लभ्य इत्याह। कथम्? बहुव्रीहिनिर्देशात्। बहुव्रीहिनिर्देशोऽयम्—इकारः ट्-आदिरस्येति।

आक्षेपभाष्यम्- यद्यपि तावदत्रैतच्छक्यते वक्तुम्। इह तु कथम्—'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति, यत्राशक्यमुदात्तग्रहणेनाकारो विशेषयितुम्।

प्रत्याक्षेपभाष्यम्- तत्र को दोषः?

प्रत्याक्षेपसमाधानभाष्यम्- अङ्गस्योदात्तत्वं प्रसज्येत।

समाधानभाष्यम्- नैष दोषः। त्रिपदोऽयं बहुव्रीहिः। तत्र वाक्य एवोदात्तग्रहणेनाकारो विशेष्यते—अकार उदात्त आदिरस्येति।

आक्षेपभाष्यम्- यत्र तर्ह्यनुवृत्त्यैतद्भवति—'आडजादीनाम्' इति।

समाधानभाष्यम्- वक्ष्यत्येतत्—'अजादीनामटा सिद्धम्' इति।

सिद्धान्तिभाष्यम्- अथवा—यत्तावदयं सामान्येनोपदेष्टुं शक्नोति, तत्तावदुपदिशति—प्रकृतिम्, ततो वलाद्यार्धधातुकम्, ततः पश्चादिकारम्। तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते। तद्यथा—खदिरबर्बुरयोः—खदिरबर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ। ततः पश्चादाह—कङ्कटवान् खदिर इति। तेनाऽसौ विशेषेण द्रव्यान्तरं समुदायं प्रतिपद्यते।

समाधानान्तरभाष्यम्- अथवा एतयानुपूर्व्याऽयं शब्दान्तरमुपदिशति प्रकृतिम्। ततो वलाद्यार्धधातुकम्। ततः पश्चादिकारं, यस्मिंस्तस्यागमबुद्धिर्भवति।

(256. आक्षेपवार्तिकम्-1)

* टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः *

भाष्यम्- टकितोराद्यन्तविधाने प्रत्ययस्य प्रतिषेधो वक्तव्यः। प्रत्यय आदिरन्तो वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा भूत्। 'चरेष्टः' 'आतोऽनुपसर्गे कः' इति।

समाधाने वार्तिकांशानुवादभाष्यम्- 'परवचनात्सिद्धम्'। परवचनात्प्रत्यय आदिरन्तो वा न भविष्यति।

(257. समाधानबाधकैकदेशिवार्तिकम्-2)

*** परवचनात्सिद्धमिति चेन्नापवादत्वात् ***

भाष्यम्- परवचनात्सिद्धमिति चेत्। तन्न। किं कारणम्? 'अपवादत्वात्'। अपवादोऽयं योगः। तद्यथा—'मिदचोन्त्यात्परः' इत्येष योगः स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः।

समाधानसाधकदृष्टान्तवैषम्यभाष्यम्- विषम उपन्यासः। युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते। इह तु पुनरुभयं सावकाशम्। कोऽवकाशः? टित्करणस्यावकाशः—'टितः' इति ईकारो यथा स्यात्। कित्करणस्यावकाशः—'किति' इत्याकारलोपो यथा स्यात्।

समाधानबाधकापवादत्वसाधकभाष्यम्- प्रयोजनं नाम तद्वक्तव्यम्, यन्नियोगतः स्यात्। यदि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत्—टित्करणादयं परो भविष्यति इति, न पुनरादिरिति। कित्करणाच्च परो भविष्यति इति, न पुनरन्त इति?

किदंशेऽपवादत्वबाधकभाष्यम्- टितः खल्वप्येष परिहारः। यत्र नास्ति संभवः—यत्परश्च स्यादादिश्च। कितस्त्वपरिहारः, अस्ति हि सम्भवो यत्परश्च स्यादन्तश्च।

आक्षेपभाष्यम्- तत्र को दोषः?

समाधानभाष्यम्- 'उपसर्गे घोः किः' आध्योः-प्रध्योः। 'नोङ्धात्वोः' इति प्रतिषेधः प्रसज्येत।

टिदंशेऽप्यपवादत्वबाधकभाष्यम्- स्यादेव ह्ययं टित्करणादादिः, न पुनः परः।

आक्षेपभाष्यम्- क्व तर्हि इदानीमिदं स्यात्—टित ईकारो भवतीति?

समाधानभाष्यम्- य उभयवान्—'गापोष्टक्' इति।

(258. सिद्धान्त्येकदेशिसमाधानवार्तिकम्-3)

*** सिद्धं तु षष्ठ्यधिकारे वचनात् ***

भाष्यम्- सिद्धमेतत्। कथम्? षष्ठ्यधिकारेऽयं योगः कर्तव्यः—'आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्य' इति।

(259. सिद्धान्त्येकदेशिसमाधानान्तरवार्तिकम्-4)

*** आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसम्प्रत्ययः ***

भाष्यम्- आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे षष्ठ्यभावे असम्प्रत्ययः स्यात्—आदिरन्तो वा न भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात्। नार्थनिमित्तकेन नाम शब्देन भवितव्यम्।

समाधानभाष्यम्- अर्थनिमित्तक एव शब्दः। तत्कथम्? आद्यन्तौ षष्ठ्यर्थौ। न चात्र षष्ठीं पश्यामः। ते मन्यामहे—आद्यन्तावेवात्र न स्तः। तयोरभावे षष्ठ्यपि न भवतीति। आद्यन्तौ टकितौ।

(42. **परिभाषासूत्रम्** 1.1.7 आ. 3)

मिदचोऽन्त्यात्परः 1.1.47

सूत्रबाध्यनिर्णयः

आक्षेपभाष्यम्- किमर्थमिदमुच्यते?

(260. **सिद्धान्तवार्तिकम्**-1)

* मिदचोऽन्त्यात्पर इति स्थानपरप्रत्ययापवादः *

भाष्यम्- मिदचोऽन्त्यात्पर इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः। स्थानेयोगत्वस्य तावत्—कुण्डानि-वनानि-पयांसि-यशांसि। प्रत्ययपरत्वस्य—भिनत्ति-छिनत्ति।

आक्षेपभाष्यम्- भवेदिदं युक्तमुदाहरणम्—कुण्डानि, वनानि इति। यत्र नास्ति सम्भवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति। इदं त्वयुक्तम्—पयांसि, यशांसीति। अस्ति हि सम्भवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने च।

समाधानभाष्यम्- एतदपि युक्तम्। कथम्? नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति—अपवादैरुत्सर्गा बाध्यन्तामिति। किं तर्हि? लौकिकोऽयं दृष्टान्तः। लोके हि सत्यपि सम्भवे बाधनं भवति। तद्यथा—'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति, सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि सम्भवे अचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते।

सूत्राप्रवृत्तिनिरूपणम्

(261. **सिद्धान्ताक्षेपवार्तिकम्**-1)

* अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम् *

भाष्यम्- अन्त्यात्पूर्वो मस्जेर्मिद्वक्तव्यः। किं प्रयोजनम्? अनुषङ्गसंयोगादिलोपार्थम्। अनुषङ्गलोपार्थं संयोगादिलोपार्थं च। अनुषङ्गलोपार्थं तावत्—मग्नः, मग्नवान्। संयोगादि-लोपार्थम्—मङ्क्ता, मङ्क्तुम्, मङ्क्तव्यम्।

(262. **आक्षेपवार्तिकम्**-2)

*भर्जिमच्योंश्च *

भाष्यम्- भर्जिमच्योंश्चान्त्यात्पूर्वो मिद्वक्तव्यः। भरूजा, मरीचय इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपस्मारणभाष्यम्- स तर्हि वक्तव्यः।

आक्षेपनिरासभाष्यम्- न वक्तव्यः, निपातनात् सिद्धम्। किं निपातनम्? भरूजा-शब्दोऽङ्गुल्यादिषु पठ्यते। मरीचिशब्दो बाह्वादिषु।

पूर्वान्तत्वस्थापनम्

आक्षेपभाष्यम्- किं पुनरयं पूर्वान्तः, आहोस्वित् परादिः, आहोस्विदभक्तः?

प्रत्याक्षेपभाष्यम्- कथं वायं पूर्वान्तः स्यात्? कथं वा परादिः? कथं वाऽभक्तः?

समाधानभाष्यम्- यद्यन्त इति वर्तते, ततः पूर्वान्तः। अथादिरिति वर्तते, ततः परादिः। अथोभयं निवृत्तं, ततोऽभक्तः।

भाष्यम्- कश्चात्र विशेषः?

(263. **दूषणवार्तिकम्**- 1)

*** अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः ***

दीर्घोदाहरणभाष्यम्- यद्यभक्तो दीर्घत्वं न प्राप्नोति—कुण्डानि वनानि। 'नोपधायाः, सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घत्वं न प्राप्नोति। दीर्घ।

नलोपोदाहरणभाष्यम्- नलोप—नलोपश्च न सिध्यति। 'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्'। 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति। नलोप।

स्वरोदाहरणभाष्यम्- स्वर—स्वरश्च न सिध्यति—'सर्वाणि ज्योतींषि'। 'सर्वस्य सुपि' इत्याद्युदात्तत्वं न प्राप्नोति। स्वर।

णत्वोदाहरणभाष्यम्- णत्व—णत्वं च न सिध्यति। माषवापाणि, व्रीहिवापाणि। पूर्वान्ते प्रातिपदिकान्तनकारस्येति सिद्धम्, परादौ विभक्तिनकारस्येति। अभक्ते नुमो ग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते एतन्न्यास एव—'प्रातिपदिकान्तनुम्विभक्तिषु च' इति। णत्व।

अनुस्वारोदाहरणभाष्यम्- अनुस्वार—अनुस्वारश्च न सिध्यति। द्विषंतपः, परंतपः। 'मोऽनुस्वारो हलि' इत्यनुस्वारो न प्राप्नोति। मा भूदेवम्। 'नश्चापदान्तस्य झलि' इत्यनुस्वारो भविष्यति। यस्तर्हि न झल्परः—वहंलिहो गौः, अभ्रंलिहो वायुः। अनुस्वार।

शीभावोदाहरणभाष्यम्- शीभाव—शीभावश्च न सिध्यति। त्रपुणी, जतुनी, तुम्बुरुणी। नपुंसकादुत्तरस्यौङः शीभावो भवतीति शीभावो न प्राप्नोति। शीभाव।

परादिपक्षाभ्युपगमभाष्यम्- एवं तर्हि परादिः करिष्यते।

(264. **परादिपक्षे दूषणवार्तिकम्**- 2)

*** परादौ गुणवृद्ध्यौत्वदीर्घनलोपानुस्वारशीभावे नकारप्रतिषेधाः ***

भाष्यम्- यदि परादिः, गुणः प्रतिषेध्यः—त्रपुणे, जतुने, तुम्बुरुणे। 'घेर्ङिति' इति गुणः प्राप्नोति। गुण।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्ध्युदाहरणभाष्यम्- वृद्धि—वृद्धिः प्रतिषेध्या—अतिसखीनि ब्राह्मणकुलानि। 'सख्युरसम्बुद्धौ' इति णित्त्वे 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति। वृद्धि।

औत्त्वोदाहरणभाष्यम्- औत्त्वं—औत्त्वं च प्रतिषेध्यम्। त्रपुणि, जतुनि, तुम्बुरुणि। 'इदुद्भ्यामौदच्च घेः' इत्यौत्त्वं प्राप्नौति। औत्त्व।

दीर्घोदाहरणभाष्यम्- दीर्घ—दीर्घत्वं च न सिध्यति—कुण्डानि, वनानि। 'नोपधायाः सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घत्वं न प्राप्नोति। मा भूदेवम्। 'अतो दीर्घो यञि सुपि च' इत्येवं भविष्यति। इह तर्हि—अस्थीनि, दधीनि, प्रियसखीनि ब्राह्मणकुलानि। दीर्घ।

नलोपोदाहरणभाष्यम्- नलोप—नलोपश्च न सिध्यति—'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्'। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति। नलोप।

अनुस्वारोदाहरणभाष्यम्- अनुस्वार—अनुस्वारश्च न सिध्यति—द्विषन्तप, परन्तपः। 'मोऽनुस्वारो हलि' इत्यनुस्वारो न प्राप्नोति।

उदाहरणनिरासभाष्यम्- मा भूदेवम्। 'नश्चापदान्तस्य झलि' इत्यनुस्वारो भविष्यति।

उदाहरणान्तरभाष्यम्- यस्तर्हि न झल्परः—वहंलिहो गौः, अभ्रंलिहो वायुः। अनुस्वार।

उदाहरणभाष्यम्- शीभावे नकारप्रतिषेधः। शीभावे नकारस्य प्रतिषेधो वक्तव्यः—त्रपुणी, जतुनी, तुम्बुरुणी। सनुम्कस्य शीभावः प्राप्नोति।

उदाहरणनिरासभाष्यम्- नैष दोषः, 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येवं न भविष्यति।

उदाहरणसाधकभाष्यम्- यस्तर्हि निर्दिश्यते तस्य न प्राप्नोति। कस्मात्? नुमा व्यवहितत्वात्।

पूर्वान्तपक्षाभ्युपगमभाष्यम्- एवं तर्हि पूर्वान्तः करिष्यते।

(265. **पूर्वान्तपक्षे दूषणवार्तिकम्**- 3)

* पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च *

भाष्यम्- यदि पूर्वान्तः क्रियते, नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति।

उदाहरणभाष्यम्- नपुंसकोपसर्जनह्रस्वत्वम्—आराशस्त्रिणी, धानाशष्कुलिनी, निष्कौशाम्बिनी, निर्वाराणसिनी।

द्विगुस्वर—पञ्चारत्निनी, दशारत्निनी। नुमि कृते अनजन्तत्वादेते विधयो न प्राप्नुवन्ति।

(266. **दूषणबाधकवार्तिकम्**- 4)

* न वा बहिरङ्गलक्षणत्वात् *

भाष्यम्- न वा एष दोषः। किं कारणम्? 'बहिरङ्गलक्षणत्वात्'। बहिरङ्गो नुम्, अन्तरङ्गा एते विधयः। असिद्धं बहिरङ्गमन्तरङ्गे'। द्विगुस्वरे भूयात् परिहारः—सङ्घातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा द्विगुस्वरो भविष्यति। मिदचोऽन्त्यात्परः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदेशनियामकप्रकरणम्

(43. **परिभाषासूत्रम्** 1.1.7 आ. 4)

एच इग्घ्रस्वादेशे 1.1.48

सूत्रारम्भप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थमिदमुच्यते?

(267. **प्रयोजनवार्तिकम्**-1)

* एच इग्वचनं सवर्णाकारनिवृत्त्यर्थम् *

भाष्यम्- एच इग्भवतीत्युच्यते। सवर्णनिवृत्त्यर्थमकारनिवृत्त्यर्थं च। सवर्णनिवृत्त्यर्थं तावत्—एङो ह्रस्वादेशशासनेषु अर्ध एकारोऽर्ध ओकारो वा मा भूदिति। अकारनिवृत्त्यर्थं च—इमावैचौ समाहारवर्णौ मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः। तयोर्ह्रस्वशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ। मा कदाचिदवर्णं भूदित्येवमर्थमिदमुच्यते।

भाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति?

अनिष्टापत्तिनिराकरणाधिकरणम्

(268. **आक्षेपवार्तिकम्**-2)

* दीर्घप्रसङ्गस्तु *

भाष्यम्- दीर्घास्त्विकः प्राप्नुवन्ति। किं कारणम्? स्थानेऽन्तरतमो भवतीति।

आक्षेपबाधकभाष्यम्- ननु च ह्रस्वादेश इत्युच्यते, तेन दीर्घा न भविष्यन्ति।

आक्षेपसाधकभाष्यम्- विषयार्थमेतत् स्यात्—एचो ह्रस्वप्रसङ्गे इग्भवतीति।

(269. **समाधानवार्तिकम्**-3)

* दीर्घाप्रसङ्गस्तु निवर्तकत्वात् *

भाष्यम्- दीर्घाणां त्विकामप्रसङ्गः। किं कारणम्? 'निवर्तकत्वात्'। नानेनेको निर्वर्त्यन्ते। किं तर्हि? अनिको निवर्त्यन्ते। सिद्धा ह्यत्र ह्रस्वा इकश्चानिकश्च। तत्रानेनानिको निवर्त्यन्ते।

सूत्रप्रत्याख्यानाधिकरणम्

प्रथमप्रयोजनप्रत्याख्यानभाष्यम्- सवर्णनिवृत्त्यर्थेन तावन्नार्थः।

(270. **प्रत्याख्यानसाधकवार्तिकम्**-4)

* सिद्धमेङः सस्थानत्वात् *

भाष्यम्- सिद्धमेतत्। कथम्? 'एङः सस्थानत्वात्'। इकारोकारौ भविष्यतः, अर्ध एकारोऽर्ध ओकारो वा न भविष्यति।

आक्षेपभाष्यम्- ननु च एङः सस्थानतरावर्धैकारार्द्धौकारौ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- न तौ स्त:। यदि हि तौ स्यातां तावेवायमुपदिशेत्।

समाधानबाधकभाष्यम्- ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्ध-मोकारं चाधीयते—'सुजाते एश्व सूनृते', 'अध्वर्यो ओद्रिभि: सुतम्' 'शुक्रन्ते एन्यत्' 'यजतं ते एन्यत्' इति।

समाधानसाधकभाष्यम्- पार्षदकृतिरेषा तत्रभवताम्। नैव लोके नाप्यन्यस्मिन्वेदे—अर्ध एकार:, अर्ध ओकारो वास्ति।

द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्- अकारनिवृत्त्यर्थेनापि नार्थ:।

(271. **प्रत्याख्यानसाधकवार्तिकम्**- 5)

*** ऐचोश्चोत्तरभूयस्त्वात् ***

भाष्यम्- एचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति। भूयसी मात्रेवर्णोवर्णयो:, अल्पीयस्य-वर्णस्य। भूयस एव ग्रहणानि भविष्यन्ति। तद्यथा—'ब्राह्मणग्राम आनीयताम्' इत्युच्यते। तत्र चावरत: पञ्चकारुकी भवति। एच इग्घ्रस्वादेशे।

(44. **परिभाषासूत्रम्** 1.1.7 आ. 5)

षष्ठी स्थानेयोगा 1.1.49

स्थानेयोगशब्दार्थनिरूपणम्

आक्षेपभाष्यम्- किमिदम्—स्थानेयोगेति?

समाधानभाष्यम्- स्थाने योगोऽस्या: सेयं स्थानेयोगा। सप्तम्यलोपो निपातनात्। तृतीयाया वा एत्वम्। स्थानेन योगोऽस्या: सेयं स्थानेयोगेति।

सूत्रप्रयोजनम्

भाष्यम्- किमर्थं पुनरिदमुच्यते?

(272. **समाधानवार्तिकम्**- 1)

*** षष्ठ्या: स्थानेयोगवचनं नियमार्थम् ***

भाष्यम्- नियमार्थोऽयमारम्भ:। एकशतं षष्ठ्यर्था:, यावन्तो वा। ते सर्वे षष्ठ्यामुच्चारि-तायां प्राप्नुवन्ति। इष्यते च—व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति षष्ठ्या: स्थानेयोगवचनं नियमार्थम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति?

अनिष्टापत्तिनिराकरणम्

(273. **आक्षेपवार्तिकम्**- 2)

*** अवयवषष्ठ्यादिष्वतिप्रसङ्ग: शासो गोह इति ***

भाष्यम्- अवयवषष्ठ्यादस्तु न सिध्यन्ति। तत्र को दोष:? 'शास इदङ्हलो:' इति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शासेश्चान्त्यस्य स्यादुपधामात्रस्य च। 'ऊदुपधाया गोहः' इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च।

(274. आक्षेपबाधकसमाधानवार्तिकम्-3)

* अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसन्दिग्धत्वात् *

भाष्यम्- अवयवषष्ठ्यादीनां च नियमस्याप्राप्तिः। किं कारणम्? 'योगस्यासन्दिग्धत्वात्'। सन्देहे नियमः। न चावयवषष्ठ्यादिषु सन्देहः।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि। कथमनुच्यमानं गंस्यते? लौकिकोऽयं दृष्टान्तः। तद्यथा लोके कश्चित् कञ्चित् पृच्छति—ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति। स तस्मायाचष्टे—अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुष्मिन्नवकाशे हस्तवाम इति। यस्तत्र तिर्यक्पथो भवति, न तस्मिन् सन्देह इति कृत्वा नासावुपदिश्यते। एवमिहापि सन्देहे नियमः। न चावयवषष्ठ्यादिषु सन्देहः।

समाधानान्तरभाष्यम्- अथवा स्थाने अयोगा स्थानेयोगा। किमिदमयोगेति? अव्यक्तयोगा अयोगा।

समाधानान्तरभाष्यम्- अथवा योगवती योगा। का पुनर्योगवती? यस्या बहवो योगाः। कुत एतत्? भूम्नि हि मतुब् भवति।

(275. आक्षेपबाधकवार्तिकम्-4)

* विशिष्टा वा षष्ठी स्थानेयोगा *

भाष्यम्- अथवा किञ्चिल्लिङ्गमासज्य वक्ष्यामि—इत्थंलिङ्गा षष्ठी स्थानेयोगा भवतीति। न च तल्लिङ्गमवयवषष्ठ्यादिषु करिष्यते।

आक्षेपभाष्यम्- यद्येवं, 'शास इदङ्हलोः' 'शा हौ' शासिग्रहणं कर्तव्यम्—स्थानेयोगार्थं लिङ्गमासङ्क्ष्यामीति।

आक्षेपबाधकभाष्यम्- न कर्तव्यम्। यदेवादः पुरस्तादवयवषष्ठ्यर्थं प्रकृतम्। एतदुत्तरत्रानुवृत्तं सत् स्थानेयोगार्थं भविष्यति। कथम्? अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति। अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगेयोगे उपतिष्ठते। तद्यदैष पक्षः—अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति। तदा हि यदेवादः पुरस्तादवयवषष्ठ्यर्थम्, एतदुत्तरत्रानुवृत्तं सत् स्थानेयोगार्थं भविष्यति।

आक्षेपभाष्यम्- सम्प्रत्ययमात्रमेतद्भवति। न ह्यनुच्चार्य शब्दं लिङ्गं शक्यमासङ्क्तुम्।

आक्षेपबाधकभाष्यम्- एवं तर्ह्यादेशे तल्लिङ्गं करिष्यते, तत्प्रकृतिमास्कन्त्स्यति।

प्रत्याख्यानभाष्यम्- यदि नियमः क्रियते, यत्रैका षष्ठी अनेकं च विशेष्यं तत्र न सिध्यति। अङ्गस्य-हलः-अणः-सम्प्रसारणस्येति हलपि विशेष्यः, अणपि विशेष्यः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रसारणपि विशेष्यम्। असति पुनर्नियमे कामचारः—एकया षष्ठ्या अनेकं विशेषयितुम्। तद्यथा—देवदत्तस्य पुत्रः पाणिः कम्बल इति। तस्मान्नार्थो नियमेन।

उक्ताक्षेपस्मारणभाष्यम्- ननु चोक्तम्—एकशतं षष्ठ्यर्थाः, यावन्तो वा। ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्तीति।

आक्षेपबाधकभाष्यम्- नैष दोषः, यद्यपि लोके बहवोऽभिसम्बन्धाः—आर्था यौना मौखाः स्रौवाश्च। शब्दस्य तु शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हति—अन्यदतः स्थानात्।

आक्षेपसाधकभाष्यम्- शब्दस्यापि शब्देनानन्तरादयोऽभिसम्बन्धाः। अस्तेर्भूर्भवतीति सन्देहः—स्थाने-अनन्तरे-समीपे इति।

आक्षेपबाधकभाष्यम्- सन्देहमात्रमेतद्भवति। सर्वसन्देहेषु चेदमुपतिष्ठते—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। स्थान इति व्याख्यास्यामः।

निर्दिश्यमानपरिभाषाधिकरणम्

आक्षेपभाष्यम्- न तर्हीदानीमयं योगो वक्तव्यः।

समाधानभाष्यम्- वक्तव्यश्च। किं प्रयोजनम्? षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता। किं कृतं भवति? 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येषा परिभाषा न कर्तव्या भवति। षष्ठी स्थानेयोगा।

(45. अन्तरतमपरिभाषासूत्रम् 1.1.7 आ. 6)

स्थानेऽन्तरतमः 1.1.50

सूत्रोदाहरणाधिकरणम्

आक्षेपभाष्यम्- किमुदाहरणम्?

समाधानभाष्यम्- 'इको यणचि'। दध्यत्र, मध्वत्र। तालुस्थानस्य तालुस्थानः, ओष्ठस्थानस्य ओष्ठस्थानो यथा स्यादिति।

समाधानबाधकभाष्यम्- नैतदस्ति। संख्यातानुदेशेनाप्येतत्सिद्धम्।

उदाहरणप्रदर्शकभाष्यम्- इदं तर्हि—'तस्थस्थमिपां तांतंतामः' इति। एकार्थस्यैकार्थः, द्व्यर्थस्य द्व्यर्थः, बह्वर्थस्य बह्वर्थो यथा सयादिति।

उदाहरणबाधकभाष्यम्- ननु च एतदपि संख्यातानुदेशेनैव सिद्धम्।

उदाहरणान्तरभाष्यम्- इदं तर्हि—'अकः सवर्णे दीर्घः' इति। दण्डाग्रम्, कूपाग्रम्, दधीन्द्रः, मधूष्ट्रः। कण्ठस्थानयोः कण्ठस्थानः, तालुस्थानयोः तालुस्थानः, ओष्ठस्थानयोरोष्ठस्थानो यथा स्यात्।

यत्रानेकविधपरिभाषासाधनाधिकरणम्

आक्षेपभाष्यम्- अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- यत्रानेकमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्। किं पुनस्तत्? चेता, स्तोता। प्रमाणतोऽकारो गुणः प्राप्नोति, स्थानत एकारौकारौ। पुनः स्थानग्रहणादेकारौकारौ भवतः।

तमग्रहणप्रयोजनम्

आक्षेपभाष्यम्- अथ तमग्रहणं किमर्थम्?

समाधानभाष्यम्- 'झयो होऽन्यतरस्याम्' इत्यत्र 'सोष्मणः सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्तः' इति तृतीयाः प्रसक्ताः। तमग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः—वाग्घसति त्रिष्टुब्भसति इति।

सूत्रप्रयोजनम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(276. **समाधानवार्तिकम्-1**)

*** स्थनिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गस्तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम् ***

भाष्यम्- स्थान्येकत्वेन निर्दिश्यते—अक इति। अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते—दीर्घ इति। 'स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गः'। सर्वे सर्वत्र प्राप्नुवन्ति। इष्यते चान्तरतमा एव स्युरिति। तच्चान्तरेण यत्नं न सिध्यति। तस्मात् स्थानेऽन्तरमवचनं नियमार्थम्। एवमर्थमिदमुच्यते।

काकुभाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति।

प्रथमान्तपाठनिर्णयः

आक्षेपभाष्यम्- यथा पुनरियमन्तरतमनिर्वृत्तिः, सा किं प्रकृतितो भवति—स्थानिन्यन्तरतमे षष्ठीति। आहोस्विदादेशतः—स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति। कुतः पुनरियं विचारणा? उभयथा हि तुल्या संहिता 'स्थानेऽन्तरतम उरण् रपरः' इति।

भाष्यम्- किं चातः?

सप्तम्यन्तपाठदूषणभाष्यम्- यदि प्रकृतितः इति, 'इको यणचि' इति यणां येऽन्तरतमा एकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्—दध्यत्र, मध्वत्र। कुमार्यर्थम्, ब्रह्मबन्ध्वर्थमित्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति।

सप्तम्यन्तपाठदूषणान्तरभाष्यम्- तथा 'इको गुणवृद्धी' गुणवृद्ध्योर्येऽन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्—नेता, लविता, नायकः, लावकः। चेता, स्तोता, चायकः, स्तावक इत्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्त्रत्र षष्ठी, यत्र षष्ठी तत्रादेशा भन्तीति सर्वत्र सिद्धं भवतीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा—ॠवर्णस्य गुणवृद्धिप्रसङ्गे गुणवृद्ध्योर्यदन्तरतममृवर्णं तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्—कर्ता, हर्ता, आस्तारकः, निपारक इति। आस्तरिता, निपरिता, कारकः, हारक इत्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवतीति।

प्रथमान्तपाठदूषणभाष्यम्- अथादेशतोऽन्तरतमनिर्वृत्तौ सत्यामयं दोषः—'वान्तो यि प्रत्यये' स्थानिनिर्देशः कर्तव्यः—ओकारौकारयोरिति वक्तव्यम्, एकारैकारयोर्मा भूदिति। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्य एक्षु याऽन्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेण स्थानिनिर्देशं सिद्धं भवति।

दूषणोद्धारभाष्यम्- आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। कथम्? वान्तग्रहणं न करिष्यते—'यि प्रत्यये' एचोऽयादयो भवन्तीत्येव।

आक्षेपभाष्यम्- यदि न क्रियते, चेयं-जेयमित्यत्रापि प्राप्नोति।

आक्षेपबाधकभाष्यम्- 'क्षय्यजय्यौ शक्यार्थे' इत्येतन्नियमार्थं भविष्यति—क्षिज्योरेवैच इति।

आक्षेपसाधकभाष्यम्- तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति क्षेयं पापं, जेयो वृषलः।

आक्षेपबाधकभाष्यम्- उभयतो नियमो विज्ञास्यते—क्षिज्योरेवैचः इति, तयोश्च शक्यार्थ एव इति।

इष्टानुपपत्तिभाष्यम्- इहापि तर्हि नियमान्न प्राप्नोति—लव्यं-पव्यम्। अवश्यलाव्यम्-अवश्यपाव्यमिति। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः? यथाजातीयकः क्षिज्योरेच्। कथंजातीयकः क्षिज्योरेच्? एकारः।

अनिष्टापत्तिभाष्यम्- एवमपि रायमिच्छति रैयतीत्यत्र प्राप्नोति।

अनिष्टापत्तिवारणभाष्यम्- रा यि छान्दसः। दृष्टानुविधिश्छन्दसि भवति।

प्रथमान्तपाठे दूषणान्तरभाष्यम्- 'ऊदुपधाया गोहः' आदेशतोऽन्तरतमनिर्वृत्तौ सत्यामुपधाग्रहणं कर्तव्यम्। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यामूकारस्य गोहो याऽन्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणोपधाग्रहणं सिद्धं भवति।

दूषणोद्धारभाष्यम्- आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। क्रियते एतन्न्यास एव।

प्रथमान्तपाठे दूषणान्तरभाष्यम्- 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' आदेशतोऽन्तरतमनिर्वृत्तौ सत्यां तकारग्रहणं कर्तव्यम्। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां नकारस्य निष्ठायां यान्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणापि तकारग्रहणं सिद्धं भवति।

दूषणपरिहारभाष्यम्- आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। क्रियत एतन्न्यास एव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रविधित्वनिराकरणम्

आक्षेपभाष्यम्- किं पुनरिदं निर्वर्तकम्—अन्तरतमा अनेन निर्वर्त्यन्ते। आहोस्वित् प्रतिपादकम्—अन्येन निर्वृत्तानामनेन प्रतिपत्तिः?

भाष्यम्- कश्चात्र विशेषः?

(277. **प्रथमपक्षदूषणवार्तिकम्**-1)

*** स्थानेऽन्तरतमे निर्वर्तके सर्वस्थानिनिवृत्तिः ***

भाष्यम्- स्थानेऽन्तरतमे निर्वर्तके सर्वस्थनिनां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति—दधि, मधु।

आक्षेपबाधकभाष्यम्- अस्तु, न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतो दधिशब्दस्य दधिशब्द एव, मधुशब्दस्य मधुशब्द एवादेशो भविष्यति।

आक्षेपसाधकभाष्यम्- यदि चैवम्, क्वचिद्वैरूप्यं तत्र दोषः स्यात्—बिसम्मुसलमिति 'इण्कोः' इति षत्वं प्राप्नोति।

आक्षेपान्तरभाष्यम्- अपि च—इष्टा व्यवस्था न प्रकल्प्येत। तद्यथा—तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठन्ते। एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन्।

द्वितीयपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि प्रतिपादकम्—अन्येन निर्वृत्तानामनेन प्रतिपत्तिः।

(278. **आक्षेपवार्तिकम्**-2)

*** निर्वृत्तप्रतिपत्तौ निर्वृत्तिः ***

भाष्यम्- निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्न सिध्यति। सर्वे सर्वत्र प्राप्नुवन्ति।

आक्षेपतात्पर्यप्रश्नभाष्यम्- किं तर्ह्युच्यते—निर्वृत्तिर्न सिध्यतीति? न साधीयो निर्वृत्तिः सिद्धा भवति।

आक्षेपतात्पर्यवर्णनभाष्यम्- न ब्रूमः—निर्वृत्तिर्न सिध्यतीति। किं तर्हि? इष्टा व्यवस्था न प्रकल्प्येत। न सर्वे सर्वत्रेष्यन्ते।

प्रत्याक्षेपभाष्यम्- इदमिदानीं किमर्थं स्यात्?

(279. **प्रत्याक्षेपसमाधानवार्तिकम्**-3)

*** अनर्थकं च ***

भाष्यम्- अनर्थकमेतत्स्यात्। यो हि भुक्तवन्तं ब्रूयात् 'मा भुक्थाः' इति, किं तेन कृतं स्यात्।

आनर्थक्यपरिहारेण समाधानभाष्यम्- 'उक्तं वा'। किमुक्तम्? 'सिद्धं तु षष्ठ्यधिकारे वचनात्' इति। षष्ठ्यधिकारेऽयं योगः कर्तव्यः—स्थानेऽन्तरतमः, षष्ठीनिर्दिष्टस्य इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टनिराकरणम्

(आक्षेपे वार्तिकांशानुवादः)

*** प्रत्यात्मवचनं च ***

भाष्यम्- प्रत्यात्ममिति च वक्तव्यम्। किं प्रयोजनम्? यो यस्यान्तरतमः स तस्य स्थाने यथा स्यात्। अन्यस्यान्तरतमोऽन्यस्य स्थाने मा भूदिति।

(280. समाधानवार्तिकम्-1)

*** प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात् ***

भाष्यम्- प्रत्यात्मवचनमशिष्यम्। किं कारणम्? 'स्वभावसिद्धत्वात्'। स्वभावत एतत्सिद्धम्। तद्यथा—समाजेषु-समाशेषु-समवायेषु चाऽस्यतामित्युक्ते न चोच्यते—प्रत्यात्ममिति, प्रत्यात्मं चासते।

सूत्रप्रत्याख्यानाधिकरणम्

(281. प्रत्याख्यानवार्तिकम्-1)

*** अन्तरतमवचनं च ***

भाष्यम्- अन्तरतमवचनं चाशिष्यम्—योगश्चाप्ययमशिष्यः। कुतः? 'स्वाभावसिद्धत्वादेव'। तद्यथा—समाजेषु-समाशेषु-समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषामेव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते। तथा—गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते। तथा—यान्येतानि गोयुक्तकानि सङ्घुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति।

दृष्टान्तबाधकभाष्यम्- एवं तावच्चेतनावत्सु।

दृष्टान्तान्तरभाष्यम्- अचेतनेष्वपि। तद्यथा—लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्र्यतः। तथा—या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः। स धूम आकाशे निवाते नैव तिर्यग्गच्छति, नार्वागवरोहति। अब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा—ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति, नार्वागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः।

सूत्रसत्ताप्राप्तदूषणनिराकरणम्

(282. दूषणवार्तिकम्-1)

*** व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः ***

भाष्यम्- व्यञ्जनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालता प्राप्नोति। व्यञ्जनव्यतिक्रमे—इष्टम्, उप्तम्। आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्याऽर्धमात्रिक इक् प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूषणबाधकभाष्यम्- नैव लोके नैव वेदेऽर्धमात्रिक इगस्ति। कस्तर्हि? मात्रिकः। योऽस्ति स भविष्यति।

द्वितीयदूषणभाष्यम्- स्वरव्यतिक्रमे—दध्यत्र, मध्वत्र, कुमार्यत्र, ब्रह्मबन्ध्वर्थम्। आन्तर्यतो मात्रिकस्य द्विमात्रिकस्येको मात्रिको द्विमात्रिको यण् प्राप्नोति।

दूषणबाधकभाष्यम्- नैव लोके नैव वेदे मात्रिको द्विमात्रिको वा यणस्ति। कस्तर्हि? अर्धमात्रिकः। योऽस्ति स भविष्यति।

(283. दूषणवार्तिकम्-2)

*** अक्षु चानेकवर्णादिशेषु ***

भाष्यम्- अक्षु चानेकवर्णादिशेषु तत्कालता प्राप्नोति। 'इदम् इश्'। आन्तर्यतोऽर्धतृतीयमात्रिकस्येदमः स्थानेऽर्धतृतीयमात्रमिवर्णं प्राप्नोति।

दूषणबाधकभाष्यम्- नैष दोषः। 'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं न भविष्यति।

(284. दूषणवार्तिकम्-3)

*** गुणवृद्ध्येज्भावेषु च ***

भाष्यम्- गुणवृद्ध्येज्भावेषु च तत्कालता प्राप्नोति। खट्वा + इन्द्रः खट्वेन्द्रः। खट्वा + उदकम् खट्वोदकम्। खट्वा + ईषा खट्वेषा। खट्वा + ऊढा खट्वोढा। खट्वा + एलका खट्वैलका। खट्वा + ओदनः खट्वौदनः। खट्वा + ऐतिकायनः खट्वैतिकायनः। खट्वा + औपगवः खट्वौपगव इति। आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रतुर्मात्रा आदेशाः प्राप्नुवन्ति।

दूषणबाधकभाष्यम्- नैष दोषः। तपरे गुणवृद्धी।

दूषणसाधकभाष्यम्- ननु च तः परो यस्मात्सोऽयं तपरः।

दूषणबाधकभाष्यम्- नेत्याह। तादपि परस्तपर इति।

आक्षेपभाष्यम्- यदि तादपि परस्तपरः, 'ऋदोरप्' इतीहैव स्यात्—यवः, स्तवः। लवः, पव इत्यत्र न स्यात्।

आक्षेपबाधकभाष्यम्- नैष तकारः। कस्तर्हि? दकारः।

आक्षेपसाधकभाष्यम्- किं दकारे प्रयोजनम्?

प्रतिबन्दीभूतं समाधानभाष्यम्- अथ किं तकारे? यद्यसन्देहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपि।

दूषणवार्तिकशेषभाष्यम्- एज्भावे—कुर्वाते, कुर्वाथे। आन्तर्यतोऽर्धतृतीयमात्रस्य टिसंज्ञकस्यार्धतृतीयमात्र एच् प्राप्नोति।

दूषणोद्धारभाष्यम्- नैव लोके न च वेदेऽर्धतृतीयमात्र एजस्ति।

(285. आक्षेपवार्तिकम्-4)

*** ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गोऽविशेषात् ***

भाष्यम्- ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गः। सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थाने प्राप्नुवन्ति। किं कारणम्? अविशेषात्। न हि कश्चिद्विशेष उपादीयते—एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति। अनुपादीयमाने विशेषे सर्वप्रसङ्गः।

(286. समाधानवार्तिकम्-5)

*** न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम् ***

भाष्यम्- न वा एष दोषः। किं कारणम्? ऋवर्णस्य स्थाने रपरप्रसङ्गात्। उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। तत्र ऋवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति।

(287. आक्षेपवार्तिकम्-6)

*** सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात् ***

भाष्यम्- सर्वादेशस्तु गुणवृद्धिसंज्ञक ऋवर्णस्य प्राप्नोति। किं कारणम्? अनेकाल्त्वात्। 'अनेकाल्शित्सर्वस्य' इति।

(288. समाधानवार्तिकम्-7)

*** न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः ***

भाष्यम्- न वा एष दोषः। किं कारणम्? 'अनेकाल्त्वस्य तदाश्रयत्वात्'। यदायमुः स्थानेऽण्, तदायमनेकाल्। अनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्य विघातो न भविष्यति।

समाधानान्तरभाष्यम्- अथवाऽनान्तर्यमेवैतयोरान्तर्यम्। एकस्यान्तरतमा प्रकृतिर्नास्ति, अपरस्याप्यन्तरतम आदेशो नास्ति। एतदेवैतयोरान्तर्यम्।

(289. समाधानान्तरवार्तिकम्-8)

*** सम्प्रयोगो वा नष्टाश्वदग्धरथवत् ***

भाष्यम्- अथवा नष्टाश्वदग्धरथवत्सह सम्प्रयोगो भवति। तद्यथा—'तवाश्वो नष्टो ममापि रथो दग्धः, उभौ सम्प्रयुज्यावहै' इति। एवमिहापि—'तवाप्यन्तरतमा प्रकृतिर्नास्ति, ममाप्यन्तरतम आदेशो नास्ति, अस्तु नौ सम्प्रयोगः' इति।

समाधानबाधकभाष्यम्- विषम उपन्यासः। चेतनावत्स्वर्थात्प्रकरणाद्वा लोके सम्प्रयोगो भवति। वर्णाश्च पुनरचेतनाः, तत्र किंकृतः सम्प्रयोगः?

समाधानसाधकभाष्यम्- यद्यपि वर्णा अचेतनाः। यस्त्वसौ प्रयुङ्क्ते स चेतनावान्।

एकादेशे दूषणनिराकरणम्

(290. आक्षेपवार्तिकम्-9)

*** एजवर्णयोरादेशेऽवर्णं स्थानिनोऽवर्णप्रधानत्वात् ***

भाष्यम्- एजवर्णयोरादेशेऽवर्णं प्राप्नोति। खट्वैलका मालौपगवः। किं कारणम्? स्थानिनोऽवर्णप्रधानत्वात्। स्थानी ह्यत्रावर्णप्रधानः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(291. समाधानवार्तिकम्-10)

*** सिद्धं तूभयान्तर्यात् ***

भाष्यम्- सिद्धमेतत्। कथम्? उभयान्तर्यात्। उभयोर्योऽन्तरतमस्तेन भवितव्यम्। न चावर्णमुभयोरन्तरतमम्। स्थानेऽन्तरतमः।

(46. परिभाषासूत्रम् 1.1.7 आ. 7)

उरण् रपरः 1.1.51

सूत्रस्य रपरत्वमात्रविधायकत्वम्

आक्षेपभाष्यम्- किमिदमुरण् रपरवचनमन्यनिवृत्त्यर्थम्—'उः स्थाने अणेव भवति रपरश्च' इति। आहोस्विद्रपरत्वमात्रमनेन विधीयते—'उः स्थाने अण् च अनण् च। अण् तु रपरः' इति?

भाष्यम्- कश्चात्र विशेषः?

(292. प्रथमपक्षाक्षेपवार्तिकम्-1)

*** उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः ***

भाष्यम्- उरण् रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषो भवति। के पुनरुदात्तादयः? उदात्तानुदात्तस्वरितानुनासिकाः। कृतिः-हृतिः, कृतं-हृतम्, प्रकृतं-प्रहृतम्, नॄँः पाहि।

द्वितीयपक्षाभ्युपगमभाष्यम्- अस्तु तर्ह्युः स्थाने अण् चानण् च। अण् रपर इति।

(293. द्वितीयपक्षदूषणवार्तिकम्-2)

*** य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिः ***

भाष्यम्- यः उः स्थाने अण् स रपर इति चेद् गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः। कर्ता-हर्ता-वार्षगण्यः।

द्वितीयपक्षदूषणशेषाक्षेपभाष्यम्- किं हि साधीयः—ॠवर्णस्यासवर्णे यदवर्णं स्यात्, न पुनरेङैचौ?

द्वितीयपक्षवादिभाष्यम्- पूर्वस्मिन्नपि पक्षे एष दोषः। किं हि साधीयस्तत्रापि ॠवर्णस्यासवर्णे यदवर्णं स्यात्, न पुनरिवर्णोवर्णौ।

प्रथमपक्षवादिभाष्यम्- अथ मतमेतत्—उः स्थाने अणश्चानणश्च प्रसङ्गे अणेव भवति रपरश्चेति। सिद्धा पूर्वस्मिन् पक्षेऽवर्णस्य प्रतिपत्तिः।

आक्षेपभाष्यम्- यत्तु तदुक्तम्—'उदात्तादिषु दोषः' इति। स इह दोषो जायते, न जायते?

समाधानभाष्यम्- जायते स दोषः। कथम्? उदात्त इत्यनेनाणोऽपि प्रतिनिर्दिश्यन्ते, अनणोऽपि।

समाधानबाधकभाष्यम्- यद्यपि—अणोऽपि प्रतिनिर्दिश्यन्ते। न तु प्राप्नुवन्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं कारणम्? स्थानेऽन्तरतमो भवतीति।

समाधानसाधकभाष्यम्- कुतो नु खल्वेतत्—द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः—'स्थानेऽन्तरतम' इति 'उरण् रपरः' इति च, 'स्थानेन्तरतम' इत्यनया परिभाषया व्यवस्था भविष्यति, न पुनर् 'उरण् रपरः' इति? अतः किम्? अत एष दोषो जायते—'उदात्तादिषु दोषः' इति।

आक्षेपभाष्यम्- ये चाप्येते ऋवर्णस्य स्थाने प्रतिपदमादेशा उच्यन्ते, तेषु रपरत्वं न प्राप्नोति—'ऋत इद्धातोः' 'उदोष्ठ्यपूर्वस्य' इति।

(294. समाधानवार्तिकम्-3)

*** सिद्धं तु प्रसङ्गे रपरत्वात् ***

भाष्यम्- सिद्धमेतत्। कथम्? 'प्रसङ्गे रपरत्वात्' उः स्थाने अण् प्रसज्यमान एव रपरो भवति।

आक्षेपभाष्यम्- किं वक्तव्यमेतत्?

समाधानभाष्यम्- न हि। कथमनुच्यमानं गंस्यते? 'स्थाने' इति वर्तते। स्थानशब्दश्च प्रसङ्गवाची।

आक्षेपभाष्यम्- यद्येवमादेशोऽविशेषितो भवति।

समाधानभाष्यम्- आदेशश्च विशेषितः। कथम्? द्वितीयं स्थानग्रहणं प्रकृतमनुवर्तते। तत्रैवमभिसम्बन्धः करिष्यते—'उः स्थाने अण् स्थाने' इति। उः प्रसङ्गे अण् प्रसज्यमान एव रपरो भवति।

अण्ग्रहणप्रयोजनम्

आक्षेपभाष्यम्- अथाण्ग्रहणं किमर्थम्, न ऊ रपरो भवतीत्येवोच्येत?

प्रत्याक्षेपभाष्यम्- 'ऊ रपरः' इतीयत्युच्यमाने क इदानीं रपरः स्यात्?

प्रत्याक्षेपसमाधानभाष्यम्- य उः स्थाने भवति? कश्च उः स्थाने भवति? आदेशः।

(295. आक्षेपबाधकवार्तिकम्-1)

*** आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः ***

भाष्यम्- आदेशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः। के पुना रीरिविधयः? अकङ्लोपाऽऽनङनङ्रीङ्रिङादेशाः। अकङ्—सौधातकिः। अकङ्। लोप—पैतृष्वसेयः। लोप। आनङ्—होतापोतारौ। आनङ्। अनङ्—कर्ता-हर्ता। अनङ्। रीङ्—भात्रीयति-पित्रीयति। रीङ्। रिङ्—क्रियते-ह्रियते। रिङ्।

(आक्षेपबाधकं भाष्यवार्तिकम्)

*** उदात्तादिषु च ***

भाष्यम्- किम्? रपरत्वस्य प्रतिषेधो वक्तव्यः। कृतिः-हृतिः। कृतं-हृतम्। प्रकृतम्-प्रहृतम्। नॄँः पाहि। तस्मादण् ग्रहणं कर्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकादेशे रपरत्वसाधनम्

(296. आक्षेपवार्तिकम्-1)

*** एकादेशस्योपसंख्यानम् ***

भाष्यम्- एकादेशस्योपसंख्यानं कर्तव्यम्। खट्वर्श्यः, मालर्श्यः। किं पुनः कारणं न सिध्यति? उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। न चायमुरेव स्थानेऽण् शिष्यते। किं तर्हि? उश्चान्यस्य च।

(समाधाने वार्तिकांशानुवादः)

*** अवयवग्रहणात्सिद्धम् ***

भाष्यम्- यदत्र ऋवर्णं तदाश्रयं रपरत्वं भविष्यति। तद्यथा—'माषा न भोक्तव्याः' इत्युक्ते मिश्रा अपि न भुज्यन्ते।

(297. समाधाननिरासवार्तिकम्-2)

*** अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः ***

भाष्यम्- अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तस्य प्रतिषेधो वक्तव्यः। होतापोतारौ। यथैव—उश्चान्यस्य च स्थानेऽण् रपरो भवति, एवं य उः स्थानेऽण् चानण् च सोऽपि रपरः स्यात्।

व्याख्यान्तरे दूषणभाष्यम्- यदि पुन—ऋवर्णान्तस्य स्थानिनो रपरत्वमुच्येत। खट्वर्श्यः, मालर्श्यः। नैवं शक्यम्। इह न प्रसज्येत—कर्ता-हर्ता, किरति-गिरति। ऋवर्णान्तस्येत्युच्यते, न चैतदृवर्णान्तम्।

दूषणबाधकभाष्यम्- ननु चैतदपि व्यपदेशिवद्भावेन ऋवर्णान्तम्।

दूषणसाधकभाष्यम्- अर्थवता व्यपदेशिवद्भावः। न चैषोऽर्थवान्। तस्मान्नैवं शक्यम्। न चेदेवम्, उपसंख्यानं कर्तव्यम्। इह च रपरत्वस्य प्रतिषेधो वक्तव्यः— मातुः-पितुरिति।

समाधानभाष्यम्- उभयं न वक्तव्यम्। कथम्? यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति, लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा—देवदत्तस्य पुत्रः-देवदत्तायाः पुत्र इति।

आक्षेपभाष्यम्- कथं मातुः-पितुरिति?

आक्षेपबाधकभाष्यम्- अस्त्वत्र रपरत्वम्।

आक्षेपसाधकभाष्यम्- का रूपसिद्धिः?

आक्षेपबाधकभाष्यम्- 'रात्सस्य' इति सकारस्य लोपः। रेफस्य विसर्जनीयः।

आक्षेपसाधकभाष्यम्- नैवं शक्यम्। इह हि—मातुः करोति-पितुः करोतीति, 'अप्रत्ययविसर्जनीयस्य' इति षत्वं प्राप्नोति।

आक्षेपबाधकभाष्यम्- अप्रत्ययविसर्जनीयस्येत्युच्यते। प्रत्ययविसर्जनीयश्चायम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपसाधकभाष्यम्- लुप्यतेऽत्र प्रत्ययः 'रात्सस्य' इति।

समाधानवार्तिकशेषभाष्यम्- एवं तर्हि—

(समाधाने भाष्यवार्तिकम्)

*** भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य ***

भाष्यम्- यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति, तज्ज्ञापयत्याचार्यः—नैकादेशनिमित्तात् षत्वं भवतीति।

पूर्वान्तत्वसाधनाधिकरणम्

आक्षेपभाष्यम्- किं पुनरयं पूर्वान्तः, आहोस्वित्परादिः, आहोस्विदभक्तः?

प्रत्याक्षेपभाष्यम्- कथं वाऽयं पूर्वान्तः स्यात्? कथं वा परादिः? कथं वा अभक्तः?

प्रत्याक्षेपसमाधानम्- यद्यन्त इति वर्तते, ततः पूर्वान्तः। अथादिरिति वर्तते, ततः परादिः। अथोभयं निवृत्तम्, ततोऽभक्तः।

भाष्यम्- कश्चात्र विशेषः?

(298. अभक्तपक्षे दूषणवार्तिकम्- 1)

*** अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिःशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था च ***

भाष्यम्- यद्यभक्तः दीर्घत्वं न प्राप्नोति—गीः, पूः। रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति।

दूषणानुपपत्तिभाष्यम्- किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते, न पुनः पदं विशेष्येत—रेफवकारान्तस्य पदस्येति?

दूषणोपपत्तिभाष्यम्- नैवं शक्यम्। इहापि प्रसज्येत—अग्निर्वायुरिति।

दूषणानुपपत्तिभाष्यम्- एवं तर्हि रेफवकाराभ्यां पदं विशेषयिष्यामः, धातुनेकम्। रेफवकारान्तस्य पदस्येको धातोरिति।

दूषणोपपत्तिभाष्यम्- एवमपि—प्रियं ग्रामणि कुलमस्य प्रियग्रामणिः, प्रियसेनानिः अत्रापि प्राप्नोति। तस्माद्धातुरेव विशेष्यते। धातौ च विशेष्यमाणे इह दीर्घत्वं न प्राप्नोति—गीः पूः। दीर्घ।

लत्वोदाहरणभाष्यम्- लत्व। लत्वं च न सिध्यति—निजेगिल्यते। 'ग्रो यङि' इति लत्वं न प्राप्नोति।

दोषबाधकभाष्यम्- नैष दोषः। 'ग्र' इत्यनन्तरयोगैषा षष्ठी।

दोषसाधकभाष्यम्- एवमपि स्वर्जेगिल्यत इत्यत्रापि प्राप्नोति।

दोषबाधकभाष्यम्- एवं तर्हि यङा आनन्तर्यं विशेषयिष्यामः। अथवा 'ग्रः' इति पञ्चमी। लत्व।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यक्स्वरोदाहरणभाष्यम्- यक्स्वर। यक्स्वरश्च न सिध्यति—गीर्यते स्वयमेव, पूर्यते स्वयमेव। 'अचः कर्तृयकि' इत्येष स्वरो न प्राप्नोति, रेफेण व्यवहितत्वात्।

दोषोद्धारभाष्यम्- नैष दोषः। 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति' इति नास्ति व्यवधानम्। यक्स्वर।

अभ्यस्तस्वरोदाहरणभाष्यम्- अभ्यस्तस्वर। अभ्यस्तस्वरश्च न सिध्यति—मा हि स्म ते पिपरुः, मा हि स्म ते बिभरुः। 'अभ्यस्तानामादिरुदात्तो भवतीति अजादौ लसार्वधातुके' इत्येष स्वरो न प्राप्नोति, रेफेण व्यवहितत्वात्।

दोषोद्धारकभाष्यम्- नैष दोषः। 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति' इति नास्ति व्यवधानम्। अभ्यस्तस्वर।

हलादिःशेषोदाहरणभाष्यम्- हलादिःशेष। हलादिःशेषश्च न सिध्यति—ववृते, ववृधे। अभ्यासस्येति हलादिःशेषो न प्राप्नोति। हलादिशेष।

विसर्जनीयप्रतिषेधोदाहरणभाष्यम्- विसर्जनीयः। विसर्जनीयस्य प्रतिषेधो वक्तव्यः। नार्कुटः, नार्पत्यः। 'खरवसानयोर्विसर्जनीयः' इति विसर्जनीयः प्राप्नोति। विसर्जनीय।

प्रत्ययाव्यवस्थोदाहरणभाष्यम्- प्रत्ययाव्यवस्था च। प्रत्यये च व्यवस्था न प्रकल्प्येत—किरतः, गिरतः। रेफोऽप्यभक्तः, प्रत्ययोऽपि। तत्र व्यवस्था न प्रकल्पते।

पूर्वान्तपक्षाभ्युपगमभाष्यम्- एवं तर्हि पूर्वान्तः करिष्यते।

(299. पूर्वान्तपक्षे दूषणाक्षेपवार्तिकम्-2)

⁕ पूर्वान्ते र्ववधारणं विसर्जनीयप्रतिषेधो यक्स्वरश्च ⁕

भाष्यम्- यदि पूर्वान्तः, रोरवधारणं कर्तव्यम्—'रोः सुपि' रोरेव सुपि नान्यस्य। सर्पिष्षु, धनुष्षु। इह मा भूत्—गीर्षु, पूर्षु।

इतरपक्षेऽपि लाघवाभावभाष्यम्- परादावपि सत्यवधारणं कर्तव्यम्—चतुर्ष्वित्येवमर्थम्। (र्ववधारणम्)

विसर्जनीयप्रतिषेधोदाहरणभाष्यम्- विसर्जनीयप्रतिषेधः। विसर्जनीयस्य च प्रतिषेधो वक्तव्यः—नार्कुटः, नार्पत्यः। 'खरवसानयोर्विसर्जनीय' इति विसर्जनीयः प्राप्नोति।

इतरपक्षेऽपि लाघवाभावभाष्यम्- परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यः, नाकल्पिरित्येवमर्थम्। कल्पिपदसङ्घातभक्तोऽसौ नोत्सहतेऽवयवस्य पदान्ततां विहन्तुमिति विसर्जनीयः प्राप्नोति। (विसर्जनीयप्रतिषेधः)।

यक्स्वरोदाहरणभाष्यम्- यक्स्वरश्च। यक्स्वरश्च न सिध्यति—गीर्यते स्वयमेव, पूर्यते स्वयमेव। 'अचः कर्तृयकि' इत्येष स्वरो न प्राप्नोति।

दूषणबाधकभाष्यम्- नैष दोषः। उपदेश इति वर्तते। (यक्स्वरः)।

परादिपक्षाभ्युपगमभाष्यम्- अथवा पुनरस्तु परादिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(300. परादिपक्षे दूषणाक्षेपवार्तिकम्-3)

∗ परादावकारलोपौत्वपुक्प्रतिषेधश्चङ्युपधाह्रस्वत्वमिटो व्यवस्था-ऽभ्यासलोपोऽभ्यस्ततादिस्वरो दीर्घत्वं च ∗

भाष्यम्- यदि परादिः, अकारलोपः प्रतिषेध्यः—कर्ता-हर्ता। 'अतो लोपः' 'आर्द्धधातुके' इत्यकारलोपः प्राप्नोति।

दूषणबाधकभाष्यम्- नैष दोषः, उपदेश इति वर्तते।

दूषणसाधकभाष्यम्- यद्युपदेश इति वर्तते, 'धिनुतः, कृणुतः' अत्र लोपो न प्राप्नोति।

दूषणबाधकभाष्यम्- नोपदेशग्रहणेन प्रकृतिरभिसम्बध्यते। किं तर्हि? आर्धधातुकमभि-सम्बध्यते—आर्धधातुकोपदेशे यदकारान्तमिति। अकारलोप।

औत्वोदाहरणभाष्यम्- औत्व। औत्वं च प्रतिषेध्यम्। चकार, जहार। 'आत औ णलः' इत्यौत्वं प्राप्नोति।

दोषोद्धारभाष्यम्- नैष दोषः। 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येवं न भविष्यति।

आक्षेपभाष्यम्- यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति?

समाधानभाष्यम्- रेफेण व्यवहितत्वात्। औत्व।

उदाहरणभाष्यम्- पुक्प्रतिषेधः। पुक् च प्रतिषेध्यः—कारयति, हारयति। 'आतां पुक्' इति पुक् प्राप्नोति। पुक्प्रतिषेधः।

चङ्युपधाह्रस्वत्वम्। चङ्युपधाह्रस्वत्वं च न सिध्यति—अचीकरत्, अजीहरत्। 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वत्वं न प्राप्नोति। चङ्युपधाह्रस्वत्वम्।

इटो व्यवस्था। इटश्च व्यवस्था न कल्पते—आस्तरिता, निपरिता। इडपि परादिः, रेफोऽपि। तत्र व्यवस्था न प्रकल्पते। इटो व्यवस्था।

अभ्यासलोपः। अभ्यासलोपश्च वक्तव्यः—ववृते, ववृधे। 'अभ्यासस्य' इति हलादिःशेषो न प्राप्नोति। अभ्यासलोपः।

अभ्यस्तस्वरः। अभ्यस्तस्वरश्च न सिध्यति—मा हि स्म ते पिपरुः, मा हि स्म ते बिभरुः। 'अभ्यस्तानामादिरुदात्तो भवतीत्यजादौ लसार्वधातुके' इत्येष स्वरो न प्राप्नोति। अभ्यस्तस्वर।

तादिस्वरः। तादिस्वरश्च न सिद्ध्यति—प्रकर्ता, प्रकर्तुम्। 'तादौ च निति कृत्यतौ' इत्येष स्वरो न प्राप्नोति।

दूषणबाधकभाष्यम्- नैष दोषः। उक्तमेतत्—'कृदुपदेशे वा ताद्यर्थमिडर्थम्' इति।

उदाहरणभाष्यम्- दीर्घः। दीर्घत्वं च न सिध्यति—गीः, पूः। 'रेफवकारान्तस्य धातोः' इति दीर्घत्वं न प्राप्नोति। दीर्घः। उरण् रपरः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(47. **परिभाषासूत्रम्** 1.1.7 आ. 8)

अलोऽन्त्यस्य 1.1.52

अल्ग्रहणविशेषणताविचारः

आक्षेपभाष्यम्- किमिदमल्ग्रहणमन्त्यविशेषणम् आहोस्वित्—आदेशविशेषणम्?

भाष्यम्- किं चातः?

अन्त्यविशेषणत्वे दूषणभाष्यम्- यद्यन्त्यविशेषणम्, आदेशोऽविशेषितो भवति। तत्र को दोषः? अनेकालप्यादेशोऽन्त्यस्य प्रसज्येत।

आदेशविशेषणपक्षे लाघवभाष्यम्- यदि पुनः 'अलन्त्यस्य' इत्युच्येत, तत्रायमप्यर्थः—'अनेकाल्शित्सर्वस्य' इत्येतन्न वक्तव्यं भवति। इदं नियमार्थं भविष्यति—अलेवान्त्यस्य भवति, नान्य इति।

आदेशविशेषणत्वपक्षे आक्षेपभाष्यम्- एवमप्यन्त्योऽविशेषितो भवति। तत्र को दोषः? वाक्यस्यापि पदस्याप्यन्त्यस्य प्रसज्येत।

अन्त्यविशेषणत्वेऽपि गौरवनिरासभाष्यम्- यदि खल्वप्येषोऽभिप्रायस्तत्र क्रियेतेति, अन्त्यविशेषणेऽपि सति तन्न करिष्यते। कथम्? 'ङिच्च, अलोऽन्त्यस्य' इत्येतन्नियमार्थं भविष्यति—ङिदेवानेकालन्त्यस्य भवति नान्य इति।

स्थानषष्ठीविषयत्वस्थापनम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(301. **समाधानवार्तिकप्रथमखण्डम्**-1)

* अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः *

भाष्यम्- अलोऽन्त्यस्येत्युच्यते, स्थाने विज्ञातस्यानुसंहारः क्रियते—स्थाने प्रसक्तस्य।

(302. **समाधानसाधकवार्तिकद्वितीयखण्डम्**-2)

* इतरथा ह्यनिष्टप्रसङ्गः *

भाष्यम्- इतरथा ह्यनिष्टं प्रसज्येत। टित्किन्मितोऽप्यन्त्यस्य स्युः।

दूषणाप्राप्तिसम्भावनाभाष्यम्- यदि पुनरयं योगशेषो विज्ञायेत।

(**समाधानसाधकभाष्यवार्तिकम्**)

* योगशेषे च *

भाष्यम्- किम्? अनिष्टं प्रसज्येत। टित्किन्मितोऽप्यन्त्यस्य स्युः। तस्मात्सुष्ठूच्यते—'अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः, इतरथा ह्यनिष्टप्रसङ्ग' इति। अलोऽन्त्यस्य।

(48. **परिभाषासूत्रम्** 1.1.7 आ. 9)

ङिच्च 1.1.53

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तातङि सर्वादिशत्वसाधनाधिकरणम्

आक्षेपभाष्यम्- तातङन्त्यस्य स्थाने कस्मान्न भवति? 'ङिच्चालोऽन्त्यस्य' इति प्राप्नोति।

(303. **समाधानवार्तिकम्**-1)

*** तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः ***

भाष्यम्- तातङि ङित्करणं सावकाशम्। कोऽवकाशः? गुणवृद्धिप्रतिषेधार्थो ङकारः। तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति।

समाधानबाधकभाष्यम्- प्रयोजनं नाम तद्वक्तव्यं, यन्नियोगतः स्यात्। यदि चायं नियोगतः सर्वादेशः स्यात्, तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत्—ङित्करणादयं सर्वादेशो भविष्यति, न पुनरन्त्यस्य स्यादिति।

समाधानसाधकभाष्यम्- एवं तर्हेतदेव ज्ञापयति—न तातङन्त्यस्य स्थाने भवतीति। यदेतं ङितं करोति। इतरथा हि लोट एरुप्रकरण एव ब्रूयात्—'तिह्योस्तादाशिष्यन्यतरस्याम्' इति। ङिच्च।

(49. **परिभाषासूत्रम्** 1.1.7 आ. 10)

आदेः परस्य 1.1.54

आदिनियमतः सर्वादेशबलीयस्त्वाधिकरणम्

(304. **सिद्धान्तवार्तिकम्**-1)

*** अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः ***

भाष्यम्- 'अलोऽन्त्यस्य' इत्युत्सर्गः। तस्य 'आदेः परस्य' 'अनेकाल् शित्सर्वस्य' इत्यपवादौ। अपवादविप्रतिषेधात् सर्वादेशो भविष्यति। 'आदेः परस्य' इत्यस्यावकाशः—'द्व्यन्तरुपसर्गेभ्योऽप ईत्' द्वीपम्, अन्तरीपम्, समीपम्। 'अनेकाल्शित्सर्वस्य' इत्यस्याऽवकाशः—'अस्तेर्भूः' भविता, भवितुम्। इहोभयं प्राप्नोति—'अतो भिस ऐस्'। 'अनेकाल् शित्सर्वस्य' इत्येतद्भवति विप्रतिषेधेन।

'शित्सर्वस्य' इत्यस्यावकाशः—'इदम् इश्' इतः, इह। 'आदेः परस्य' इत्यस्यावकाशः—स एव। इहोभयं प्राप्नोति—'अष्टाभ्य औश्'। 'शित्सर्वस्य' इत्येतद्भवति विप्रतिषेधेन। आदेः परस्य।

(50. **परिभाषासूत्रम्** 1.1.7 आ. 11)

अनेकाल् शित्सर्वस्य 1.1.55

शिद्ग्रहणप्रयोजनप्रत्याख्यानम्

आक्षेपभाष्यम्- शित्सर्वस्येति किमुदाहरणम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजनभाष्यम्- 'इदम इश्' इतः, इह।

प्रयोजनबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। शित्करणादेवात्र सर्वादेशो भविष्यति।

प्रयोजनान्तरभाष्यम्- इदं तर्हि—'अष्टाभ्य औश्'।

प्रयोजनबाधकस्मारणभाष्यम्- ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति।

प्रयोजनान्तरभाष्यम्- इदं तर्हि—'जसः शी' जश्शसोः शिः'।

प्रयोजनबाधकस्मारणभाष्यम्- ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति।

प्रयोजनसाधकभाष्यम्- अस्त्यन्यच्छित्करणे प्रयोजनम्। किम्? विशेषणार्थः शकारः। क्व विशेषणार्थेनार्थः? 'शि सर्वनामस्थानम्' 'विभाषा ङिश्योः' इति।

'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषासाधनाधिकरणम्

वचनवैयर्थ्योपपादनभाष्यम्- शित्सर्वस्येति शक्यमकर्तुम्। कथम्? अन्त्यस्यायं स्थाने भवन्न प्रत्ययः स्यात्। असत्यां प्रत्ययसञ्ज्ञायामित्सञ्ज्ञा न स्यात्। असत्यामित्संज्ञायां लोपो न स्यात्। असति लोपे अनेकाल्। यदा अनेकाल्, तदा सर्वादेशः। यदा सर्वादेशः, तदा प्रत्ययः। यदा प्रत्ययः, तदेत्संज्ञा। यदेत्सञ्ज्ञा, तदा लोपः।

नानुबन्धकृतमनेकाल्त्वपरिभाषाज्ञापनभाष्यम्- एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह तज्ज्ञापयत्याचार्यः—अस्त्येषा परिभाषा—'नानुबन्धकृतमनेकाल्त्वं भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? 'तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्देशोऽनाकारान्तत्वात्' इत्युक्तम्, तन्न वक्तव्यं भवति। अनेकाल्।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम्

प्रथमेऽध्याये प्रथमे पादे अष्टममाह्निकम्

अतिदेशप्रकरणम्

(51. **अतिदेशसूत्रम्** 1.1.8 आ. 1)

स्थानिवदादेशोऽनल्विधौ 1.1.56

पदकृत्याधिकरणम्

आक्षेपभाष्यम्- वत्करणं किमर्थम्?

समाधानभाष्यम्- 'स्थान्यादेशोऽनल्विधौ' इतीयत्युच्यमाने सञ्ज्ञाधिकारोऽयम्, तत्र स्थानी आदेशस्य सञ्ज्ञा स्यात्। तत्र को दोषः? 'आङो यमहनः' आत्मनेपदं भवतीति वधेरेव स्यात्, हन्तेर्न स्यात्। वत्करणे पुनः क्रियमाणे न दोषो भवति। स्थानिकार्यमादेशे अतिदिश्यते 'गुरुवद् गुरुपुत्रे' इति यथा।

आक्षेपभाष्यम्- अथादेशग्रहणं किमर्थम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याक्षेपभाष्यम्- 'स्थानिवदनल्विधौ' इतीयत्युच्यमाने क इदानीं स्थानिवत्स्यात्? यः स्थाने भवति। कश्च स्थाने भवति? आदेशः।

समाधानभाष्यम्- इदं तर्हि प्रयोजनम्—आदेशमात्रं स्थानिवद्यथा स्यात्। एकदेशविकृतस्योपसंख्यानं चोदयिष्यति, तत्र वक्तव्यं भवति।

आक्षेपभाष्यम्- अथ विधिग्रहणं किमर्थम्?

विधिग्रहणप्रयोजनभाष्यम्- सर्वविभक्त्यन्तः समासो यथा विज्ञायेत—अलः परस्य विधिः—अल्विधिः, अलो विधिः—अल्विधिः, अलि विधिः—अल्विधिः, अला विधिः—अल्विधिरिति।

विधिग्रहणप्रयोजननिरासभाष्यम्- नैतदस्ति प्रयोजनम्। प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति, न काञ्चित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या।

विधिग्रहणप्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—उत्तरपदलोपो यथा विज्ञायेत। अलमाश्रयते अलाश्रयः, अलाश्रयो विधिः अल्विधिरिति। यत्र प्राधान्येनालाश्रीयते, तत्रैव प्रतिषेधः स्यात्। यत्र विशेषणत्वेनालाश्रीयते, तत्र प्रतिषेधो न स्यात्। किं प्रयोजनम्? प्रदीव्य-प्रसीव्येति वलादिलक्षण इण् मा भूदिति।

लौकिकन्यायेन सूत्रार्थसाधनम्

सूत्राक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(305. **समाधानवार्तिकम्**-1)

* स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद् गुरुपुत्र इति यथा *

भाष्यम्- अन्यः स्थानी, अन्य आदेशः। स्थान्यादेशपृथक्त्वादेतस्मात्कारणात् स्थानिकार्यमादेशे न प्राप्नोति। तत्र को दोषः? 'आङो यमहनः' आत्मनेपदं भवतीति हन्तेरेव स्यात्, वधेर्न स्यात्। इष्यते च—वधेरपि स्यादिति। तच्चान्तरेण यत्नं न सिद्ध्यति। तस्मात्स्थानिवदनुदेशः। एवमर्थमिदमुच्यते। 'गुरुवद्गुरुपुत्र इति यथा'। तद्यथा—'गुरुवद् गुरुपुत्रे वर्तितव्यम्' इति। गुरौ यत्कार्यं तद् गुरुपुत्रऽतिदिश्यते। एवमिहापि स्थानिकार्यमादेशेऽतिदिश्यते।

सूत्रारम्भप्रयोजनबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। लोकत एतत् सिद्धम्। तद्यथा—लोके यो यस्य प्रसङ्गे भवति, लभतेऽसौ तत्कार्याणि। तद्यथा—उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते।

सूत्रारम्भप्रयोजनसाधकभाष्यम्- यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति।

आक्षेपभाष्यम्- अस्ति वेह कश्चित्पुरुषारम्भः?

समाधानभाष्यम्- अस्तीत्याह। कः? स्वरूपविधिर्नाम। हन्तेरात्मनेपदमुच्यमानं हन्तेरेव स्यात्, वधेर्न स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रारम्भप्रयोजननिराकरणभाष्यम्- एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—स्थानिवदादेशो भवतीति। यदयं 'युष्मदस्मदोरनादेशे' इत्यादेशे प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? युष्मदस्मदोर्विभक्तौ कार्यमुच्यमानं कः प्रसङ्गो यदादेशे स्यात्। पश्यति त्वाचार्यः—स्थानिवदादेशो भवतीति। अत आदेशे प्रतिषेधं शास्ति।

सूत्रारम्भप्रयोजनभाष्यम्- इदं तर्हि प्रयोजनम्। अनल्विधाविति प्रतिषेधं वक्ष्यामीति। इह मा भूत्—द्यौः-पन्थाः-सः इति।

सूत्रारम्भप्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—अल्विधौ स्थानिवद्भावो न भवतीति, यदयम्—'अदो जग्धिर्ल्यप्ति किति' इति 'ति किति' इत्येव सिद्धे ल्यब्ग्रहणं करोति। तस्मान्नार्थोऽनेन योगेन।

सूत्रसत्त्वेऽनल्विधिग्रहणवैयर्थ्यनिराकरणम्

वार्तिकोपक्रमभाष्यम्- आरभ्यमाणेऽप्येतस्मिन् योगे—

(306. **वैयर्थ्याक्षेपवार्तिकम्**-1)

*** अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात् ***

भाष्यम्- अल्विधौ प्रतिषेधेऽसत्यपि, विशेषणे समाश्रीयमाणे असति तस्मिन् विशेषणे अप्राप्तिर्विधेः। प्रदीव्य, प्रसीव्य। किं कारणम्? तस्यादर्शनात्। वलादेरित्युच्यते। न चात्र वलादिं पश्यामः।

वार्तिकावतरणभाष्यम्- ननु चैवमर्थ एवायं यत्नः क्रियते—अन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति। सत्यम्। एवमर्थो यत्नः क्रियते, न तु प्राप्नोति। किं कारणम्?

(307. **वैयर्थ्याक्षेपसाधकवार्तिकम्**-2)

*** सामान्यातिदेशे हि विशेषानतिदेशः ***

भाष्यम्- सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति। तद्यथा—'ब्रह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इति। सामान्यं यद् ब्राह्मणकार्यं, तत् क्षत्रियेऽतिदिश्यते। यद्विशिष्टं माठरे कौण्डिन्ये वा, न तदतिदिश्यते। एवमिहापि यत्सामान्यं प्रत्ययकार्यं तदतिदिश्यते, यद्विशिष्टं वलादेरिति न तदतिदिश्यते।

वैयर्थ्यबाधकसिद्धान्तिभाष्यम्- यद्येवम्—अग्रहीत्, 'इट ईटि' इति सिचो लोपो न प्राप्नोति। अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति—प्रदीव्य-प्रसीव्येति, विशिष्टं ह्येषोऽलमाश्रयते वलं नाम। इह च प्रतिषेधो न भविष्यति अग्रहीदिति, विशिष्टं ह्येषोऽनलमाश्रयते इटं नाम।

आक्षेपवार्तिकादिशेषभाष्यम्- यदि तर्हि सामान्यमप्यतिदिश्यते, विशेषश्च।

(308. **आक्षेपसाधकं वार्तिकम्**-3)

*** सत्याश्रये विधिरिष्टः ***

भाष्यम्- सति च वलादित्वे इटा भवितव्यम्। अरुदिताम्। अरुदितम्। अरुदित।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्ताशयानभिज्ञभाष्यम्- किमतो यत्सति भवितव्यम्?

(309. **आक्षेपवार्तिकम्**-4)

*** प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात् ***

भाष्यम्- प्रतिषेधस्तु प्राप्नोति। किं कारणम्? अल्विधित्वात्। अल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति।

(310. **सिद्धान्तिसमाधानवार्तिकम्**-5)

*** न वानुदेशिकस्य प्रतिषेधादितरेण भावः ***

भाष्यम्- न वा एष दोषः। किं कारणम्? आनुदेशिकस्य प्रतिषेधात्। अस्त्वत्रानुदेशिकस्य वलादित्वस्य प्रतिषेधः। स्वाश्रयमत्र वलादित्वं भविष्यति। नैतद्विवदामहे—वलादिर्न वलादिरिति। किं तर्हि? स्थानिवद्भावात् सार्वधातुकत्वमेषितव्यम्।

आक्षेपोपसंहारभाष्यम्- तत्रानल्विधाविति प्रतिषेधः प्राप्नोति।

स्थान्यलाश्रयविधौ प्रतिषेधसाधनम्

आक्षेपभाष्यम्- किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्याहोस्विदविशेषेण आदेशे, आदेशिनि च? कश्चात्र विशेषः?

(311. **प्रथमपक्षाक्षेपवार्तिकम्**-1)

*** आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः ***

भाष्यम्- आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्ध्योः प्रतिषेधो वक्तव्यः। कुर्वित्यत्र स्थानिवद्भावादङ्गसञ्ज्ञा, स्वाश्रयं च लघूपधत्वम्। तत्र लघूपधगुणः प्राप्नोति। वधक इत्यत्र स्थानिवद्भावादङ्गसञ्ज्ञा, स्वाश्रयं चादुपधत्वम्। तत्र वृद्धिः प्राप्नोति। पिबेत्यत्र स्थानिवद्भावादङ्गसञ्ज्ञा, स्वाश्रयं च लघूपधत्वम्। तत्र 'लघूपध'गुणः प्राप्नोति।

द्वितीयपक्षाङ्गीकारभाष्यम्- अस्तु तर्ह्यविशेषेण—आदेश आदेशिनि च।

(312. **द्वितीयपक्षाक्षेपवार्तिकम्**-2)

*** आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम् ***

भाष्यम्- आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानं कर्तव्यम्। सुप्—वृक्षाय-प्लक्षाय। स्थानिवद्भावात्सुप्सञ्ज्ञा, स्वाश्रयं च यञादित्वं, तत्र प्रतिषेधः प्राप्नोति। सुप्।

तिङ्—अरुदिताम्। अरुदितम्। अरुदित। स्थानिवद्भावात्सार्वधातुकसञ्ज्ञा, स्वाश्रयं च वलादित्वं, तत्र प्रतिषेधः प्राप्नोति। तिङ्।

कृदतिदिष्ट—भुवनं सुवनं धुवनम्। स्थानिवद्भावात्प्रत्ययसञ्ज्ञा, स्वाश्रयं चाजादित्वं, तत्र प्रतिषेधः प्राप्नोति।

तटस्थाक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव ज्यायः। कुत एतत्? तया ह्ययं विशिष्टं स्थानिकार्यमादेशोऽतिदिशति—'गुरुवद् गुरुपुत्रे' इति यथा। तद्यथा—'गुरुवदस्मिन्गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्च' इति। यदि च गुरुपुत्रोऽपि गुरुर्भवति। तदपि कर्तव्यं भवति।

प्रथमपक्षाभ्युगमभाष्यम्- अस्तु तर्ह्यादेशिन्यल्याश्रीयमाणे प्रतिषेधः।

उक्ताक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'आदेशयल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः' इति।

आक्षेपनिराकरणभाष्यम्- नैष दोषः। 'करोतौ तपरनिर्देशात् सिद्धम्'। पिबिरदन्तः। वधकमिति नायं ण्वुल्। अन्योऽयमकशब्दः किदौणादिकः, रुचक इति यथा।

एकदेशविकृतन्यायाधिकरणम्

(313. आक्षेपवार्तिकम्-1)

* एकदेशविकृतस्योपसंख्यानम् *

भाष्यम्- एकदेशविकृतस्योपसंख्यानं कर्तव्यम्। किं प्रयोजनम्? पचतु, पचन्तु। तिङ्ग्रहणेन ग्रहणं यथा स्यात्।

(समाधाने भाष्यवार्तिकम्)

* एकदेशविकृतस्यानन्यत्वात्सिद्धम् *

भाष्यम्- 'एकदेशविकृतमनन्यवद्भवति' इति तिङ्ग्रहणेन ग्रहणं भविष्यति। तद्यथा—श्वा कर्णे वा पुच्छे वा छिन्ने श्वैव भवति, नाश्वो न गर्दभ इति।

(314. एकदेश्याक्षेपसाधकवार्तिकम्-2)

* अनित्यविज्ञानं तु तस्मादुपसंख्यानम् *

भाष्यम्- अनित्यविज्ञानं तु भवति। नित्याः शब्दाः। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। तत्र स एवायं विकृतश्चेत्येतन्नित्येषु नोपपद्यते। तस्मादुपसंख्यानं कर्तव्यम्।

ऋष्यन्तरसंवादभाष्यम्- भारद्वाजीयाः पठन्ति—

(भारद्वाजीयवार्तिकम्)

* एकदेशविकृतेषूपसंख्यानम् *

भाष्यम्- एकदेशविकृतेषूपसंख्यानं कर्तव्यम्। किं प्रयोजनम्? पचतु, पचन्तु। तिङ्ग्रहणेन ग्रहणं यथा स्यात्। किञ्च कारणं न स्यात्?

(भारद्वाजीयवार्तिकम्)

* अनादेशत्वात् *

भाष्यम्- आदेशः स्थानिवदित्युच्यते। न चेमे आदेशाः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(भारद्वाजीयवार्तिकम्)

*** रूपान्यत्वाच्च ***

भाष्यम्- अन्यत्खल्वपि रूपं पचतीति, अन्यत्पचत्विति।

आक्षेपनिराकरणभाष्यम्- इमेऽप्यादेशाः। कथम्? आदिश्यते यः स आदेशः। इमे चाप्यादिश्यन्ते।

(315. आक्षेपसाधकवार्तिकम्-3)

*** आदेशः स्थानिवदिति चेन्नानाश्रितत्वात् ***

भाष्यम्- आदेशः स्थानिवदिति चेत्। न। किं कारणम्? अनाश्रितत्वात्। योऽत्रादेशो नासावाश्रीयते। यश्चाश्रीयते नासावादेशः।

आक्षेपबाधकभाष्यम्- नैतन्मन्तव्यम्—'समुदाय आश्रीयमाणेऽवयवो नाश्रीयते' इति। अभ्यन्तरो हि समुदायस्यावयवः। तद्यथा—वृक्षः प्रचलन्सहावयवैः प्रचलति।

(316. आक्षेपवार्तिकम्-4)

*** आश्रय इति चेदल्विधिप्रसङ्गः ***

भाष्यम्- आश्रय इति चेदल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति।

आक्षेपबाधकभाष्यम्- नैष दोषः। नैवं सति कश्चिदनल्विधिः स्यात्। उच्यते चेदमनल्विधाविति। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो योऽल्विधिरिति। कश्च साधीयः? यत्र प्राधान्येनालाश्रीयते। यत्र नान्तरीयकोऽलाश्रीयते नासावल्विधिरिति।

सिद्धान्तिसमाधानभाष्यम्- अथवोक्तमादेशग्रहणस्य प्रयोजनम्—आदेशमात्रं स्थानिवद्यथा स्यादिति।

शब्दनित्यत्वेऽप्यनुपपत्तिपरिहारः

(317. आक्षेपवार्तिकम्-1)

*** अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात् ***

भाष्यम्- स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपपद्यते। किं कारणम्? नित्यत्वात्। स्थानी हि नाम—यो भूत्वा न भवति। आदेशो हि नाम—योऽभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते—यत्सतो नाम विनाशः स्यात्, असतो वा प्रादुर्भाव इति।

(318. समाधानवार्तिकम्-2)

*** सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात् ***

भाष्यम्- सिद्धमेतत्। कथम्? यथा लौकिकवैदिकेषु कृतान्तेषु अभूतपूर्वेऽपि स्थानशब्दप्रयोगो वर्तते। लोके तावत्—'उपाध्यायस्य स्थाने शिष्यः' इत्युच्यते, न च तत्र उपाध्यायो भूतपूर्वो भवति। वेदेऽपि—'सोमस्य स्थाने पूतीकतृणान्यभिषुणुयात्' इत्युच्यते। न च तत्र सोमो भूतपूर्वो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(समाधानान्तरभाष्यवार्तिकम्)

*** कार्यविपरिणामाद्वा सिद्धम् ***

भाष्यम्- अथवा कार्यविपरिणामाद्वा सिद्धमेतत्। किमिदं कार्यविपरिणामांदिति? कार्या—बुद्धिः, सा विपरिणम्यते।

प्रयोगासिद्धिभाष्यम्- ननु च कार्याविपरिणामादिति भवितव्यम्।

प्रयोगसाधकभाष्यम्- सन्ति चैव ह्यौत्तरपदिकानि ह्रस्वत्वानि।

प्रयोगसाधकयुत्त्यन्तरभाष्यम्- अपि च 'बुद्धिः-सम्प्रत्ययः' इत्यनर्थान्तरम्। कार्या—बुद्धिः, कार्यः—सम्प्रत्ययः। कार्यस्य—सम्प्रत्ययस्य विपरिणामः कार्यविपरिणामः, कार्यविपरिणामादिति।

समाधानान्तरबाधकभाष्यम्- परिहारान्तरमेवेदं मत्वा पठितम्।

उपपत्तिप्रश्नभाष्यम्- कथं चेदं परिहारान्तरं स्यात् ?

समाधानान्तरबाधकभाष्यम्- यदि भूतपूर्वे स्थानशब्दो वर्तते।

समाधानान्तरसाधकभाष्यम्- भूतपूर्वे चापि स्थानशब्दो वर्तते। कथम्? बुद्ध्या। तद्यथा कश्चित्कस्मैचिदुपदिशति—'प्राचीनं ग्रामादाम्राः' इति। तस्य सर्वत्राम्रबुद्धिः प्रसक्ता। ततः पश्चादाह—'ये क्षीरिणोऽवरोहवन्तः पृथुपर्णास्ते न्यग्रोधाः' इति। स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते। स ततः पश्यति—बुद्ध्या आम्रांश्चापकृष्यमाणान् न्यग्रोधांश्चोपधीयमानान्। नित्या एव च स्वस्मिन्विषये आम्राः, नित्याश्च न्यग्रोधाः। बुद्धिस्त्वस्य विपरिणम्यते। एवमिहाप्यस्तिरस्मायविशेषेणोपदिष्टः, तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता। सः 'अस्तेर्भूः' इत्यनेनास्तिबुद्ध्या भवतिबुद्धिं प्रतिपद्यते। स ततः पश्यति—बुद्ध्या अस्तिं चापकृष्यमाणम्, भवतिं चोपाधीयमानम्, नित्य एव च स्वस्मिन्विषयेऽस्तिर्नित्यो भवतिश्च। बुद्धिस्त्वस्य विपरिणम्यते।

उत्सर्गकार्यनिराकरणम्

(319. आक्षेपवार्तिकम्-1)

*** अपवादप्रसङ्गस्तु स्थानिवत्त्वात् ***

भाष्यम्- अपवादे तु उत्सर्गकृतं च प्राप्नोति। 'कर्मण्यण्'। 'आतोऽनुपसर्गे कः' इति केऽपि अणि कृतं प्राप्नोति। किं कारणम्? स्थानिवत्त्वात्।

(आक्षेपबाधकभाष्यवार्तिकम्)

*** उक्तं वा ***

भाष्यम्- किमुक्तम्? 'विषयेण तु नानालिङ्गकरणात् सिद्धम्' इति।

पक्षान्तरोपक्रमभाष्यम्- अथवा—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(320. समाधानवार्तिकम्-2)

*** सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ***

भाष्यम्- सिद्धमेतत्। कथम्? षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यम्।

आक्षेपभाष्यम्- तत्तर्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यम्।

समाधानभाष्यम्- न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'षष्ठी स्थानेयोगा' इति।

समाधानान्तरभाष्यम्- अथवा आचार्यप्रवृत्तिर्ज्ञापयति—नापवादे उत्सर्गकृतं भवतीति। यदयं श्यन्नादीन् कांश्चिच्छितः करोति—श्यन्, श्नम्, श्ना, शः, श्नुरिति।

स्थानिवत्त्वप्राप्तदूषणनिराकरणम्

(321. आक्षेपवार्तिकम्-1)

*** तस्य दोषस्तयादेश उभयप्रतिषेधः ***

भाष्यम्- तस्येतस्य लक्षणस्य दोषः—तयादेश उभयप्रतिषेधो वक्तव्यः। उभये देवमनुष्याः। तयपो ग्रहणेन ग्रहणाद् जसि विभाषा प्राप्नोति।

आक्षेपनिराकरणसिद्धान्तिभाष्यम्- नैष दोषः। अयच् प्रत्ययान्तरम्।

आक्षेपसाधकभाष्यम्- यदि प्रत्ययान्तरम्, उभयीति ईकारो न प्राप्नोति।

आक्षेपबाधकभाष्यम्- मा भूदेवम्। मात्रच् इत्येवं भविष्यति। कथम्? मात्रजिति नेदं प्रत्ययग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः? मात्रशब्दात्प्रभृति आ अयचश्चकारात्।

आक्षेपसाधकभाष्यम्- यदि प्रत्याहारग्रहणम्, 'कति तिष्ठन्ति' अत्रापि प्राप्नोति।

आक्षेपबाधकभाष्यम्- अत इति वर्तते।

आक्षेपसाधकभाष्यम्- एवमपि 'तैलमात्रा-घृतमात्रा' अत्रापि प्राप्नोति।

आक्षेपबाधकभाष्यम्- सदृशस्याप्यसन्निविष्टस्य न भवति प्रत्याहारग्रहणेन ग्रहणम्।

(322. आक्षेपवार्तिकम्-2)

*** जात्याख्यायां वचनादेशे स्थानिवद्भावप्रतिषेधः ***

भाष्यम्- जात्याख्यायां वचनादेशे स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः। व्रीहिभ्य आगत इत्यत्र 'घेर्ङिति' इति इति गुणः प्राप्नोति।

आक्षेपनिरासभाष्यम्- नैष दोषः। उक्तमेतत्—'अर्थातिदेशात्सिद्धम्' इति।

(323. आक्षेपवार्तिकम्-3)

*** ङ्याब्ग्रहणेऽदीर्घः ***

भाष्यम्- ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति वक्तव्यम्। किं प्रयोजनम्? निष्कौशाम्बिः। अतिखट्वः। ङ्याब्ग्रहणेन ग्रहणात्सुलोपो मा भूदिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्- ननु च दीर्घादित्युच्यते।

आक्षेपसाधकलाघवभाष्यम्- तत्र वक्तव्यं भवति।

तटस्थाक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

तटस्थाक्षेपसमाधानभाष्यम्- स्थानिवद्भावप्रतिषेध एव ज्याथान्। इदमपि सिद्धं भवति—अतिखट्वाय अतिमालाय। 'याडापः' इति याड् न भवति।

आक्षेपभाष्यम्- अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिच्चासौ भूतपूर्व इति कृत्वा 'याडापः' इति याट् कस्मान्न भवति?

समाधानभाष्यम्- लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति।

आक्षेपभाष्यम्- ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमिहोपस्थातुम्।

समाधानभाष्यम्- नेत्याह। न तर्हीदानीं क्वचिदपि स्थानिवद्भावः स्यात्।

तृतीयाक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- न वक्तव्यम्।

(समाधानभाष्यवार्तिकम्)

* प्रश्लिष्टनिर्देशात्सिद्धम् *

भाष्यम्- प्रश्लिष्टनिर्देशोऽयम्, ङी ई ईकारान्तात्—आ आप् आकारान्तादिति।

(324. आक्षेपवार्तिकम्-4)

* आहिभुवोरीट्प्रतिषेधः *

भाष्यम्- आहिभुवोरीट्प्रतिषेधो वक्तव्यः। आत्थ, अभूत्। अस्तिब्रूग्रहणे ग्रहणादीट् प्राप्नोति।

आह्यंशे आक्षेपनिराकरणभाष्यम्- आहेस्तावन्न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति—नाहेरीड् भवतीति। यदयम्—'आहस्थः' इति झलादिप्रकरणे थत्वं शास्ति।

ज्ञापकबाधकभाष्यम्- नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? भूतपूर्वगतिर्यथा विज्ञायेत। झलादिर्यो भूतपूर्व इति।

ज्ञापकसमाधानभाष्यम्- यद्येवं थवचनमनर्थकं स्यात्। आथिमेवायमुच्चारयेत्—'ब्रुवः पञ्चानामादित आथो ब्रुवः' इति।

भ्वंशेऽप्याक्षेपनिराकरणभाष्यम्- भवतेश्चापि न वक्तव्यः। 'अस्तिसिचोऽपृक्ते' इति द्विसकारको निर्देशः। अस्तेः सकारान्तादिति।

(325. आक्षेपवार्तिकम्-5)

* वध्यादेशे वृद्धितत्त्वप्रतिषेधः *

भाष्यम्- वध्यादेशे वृद्धितत्त्वयोः प्रतिषेधो वक्तव्यः। वधकं पुष्करमिति। स्थानिवद्भावाद् वृद्धितत्त्वे प्राप्नुतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपनिराकरणभाष्यम्- नैष दोष:। उक्तमेतत्—'नायं ण्वुल्, किन्तु अन्योऽयमक-शब्द: किदौणादिको रुचक इति यथा'।

(326. आक्षेपवार्तिकम्-6)

*** इड्विधिश्च ***

भाष्यम्- इड्विधेय:। आवधिषीष्ट। 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेध: प्राप्नोति।

आक्षेपनिराकरणभाष्यम्- नैष दोष:। आद्युदात्तनिपातनं करिष्यते। स निपातनस्वर: प्रकृतिस्वरस्य बाधको भविष्यति।

प्रत्याक्षेपभाष्यम्- एवमप्युपदेशिवद्भावो वक्तव्य:। यथैव हि निपातनस्वर: प्रकृतिस्वरं बाधते, एवं प्रत्ययस्वरमपि बाधेत—आवधिषीष्टेति।

आक्षेपपरिहारभाष्यम्- नैष दोष:। आर्धधातुकीया: सामान्येन भवन्ति अनवस्थितेषु प्रत्ययेषु। तत्रार्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात् प्रत्ययस्वरो भविष्यति।

(327. आक्षेपवार्तिकम्-7)

*** आकारान्तान्नुक्षुक्प्रतिषेध: ***

भाष्यम्- आकारान्तान्नुक्षुको: प्रतिषेधो वक्तव्य:। विलापयति। भापयते। लीभीग्रहणेन ग्रहणान्नुक्-षुकौ प्राप्नुत:।

(आक्षेपपरिहारकभाष्यवार्तिकम्)

*** लीभियो: प्रश्लिष्टनिर्देशात्सिद्धम् ***

भाष्यम्- लीभियो: प्रश्लिष्टनिर्देशोऽयम्—ली ई ईकारानतस्य, भी ई ईकारान्तस्य चेति।

(328. आक्षेपवार्तिकम्-8)

*** लोडादेशे शाभावजभावधित्वहिलोपैत्त्वप्रतिषेध: ***

भाष्यम्- एषां लोडादेशे प्रतिषेधो वक्तव्य:। शिष्टात्। हतात्। भिन्तात्। कुरुतात्। स्तात्। लोडादेशे कृते शाभावो जभावो धित्वं हिलोप एत्त्वमित्येते विधय: प्राप्नुवन्ति।

आक्षेपपरिहारभाष्यम्- नैष दोष:। इदमिह सम्प्रधार्यम्—लोडादेश: क्रियताम्, एते विधय इति। किमत्र कर्तव्यम्? परत्वाल्लोडादेश:।

आक्षेपभाष्यम्- अथेदानीं लोडादेशे कृते पुन:प्रसङ्गविज्ञानात् कस्मादेते विधयो न भवन्ति?

आक्षेपबाधकभाष्यम्- 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बधितमेव' इति कृत्वा।

(329. आक्षेपवातिकम्-9)

*** त्रयादेशे स्रन्तप्रतिषेध: ***

भाष्यम्- त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्य:। 'तिसृणाम्'। तिसृभावे कृते 'त्रेस्त्रय:' इति त्रयादेश: प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपनिराकरणभाष्यम्- नैष दोषः। इदमिह सम्प्रधार्यम्—तिसृभावः क्रियताम्, त्रयादेश इति। किमत्र कर्तव्यम्? परत्वात्तिसृभावः।

आक्षेपभाष्यम्- अथेदानीं तिसृभावे कृते पुनःप्रसङ्गविज्ञानात् त्रयादेशः कस्मान्न भवति?

समाधानभाष्यम्- सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति।

(330. आक्षेपवार्तिकम्-10)

* आम्विधौ च *

भाष्यम्- आम्विधौ च स्रन्तस्य प्रतिषेधो वक्तव्यः। 'चतस्रस्तिष्ठन्ति'। चतसृभावे कृते 'चतुरनडुहोरामुदात्तः' इत्याम् प्राप्नोति।

आक्षेपनिराकरणभाष्यम्- नैष दोषः। इदमिह सम्प्रधार्यम्—चतसृभावः क्रियताम्, 'चतुरनडुहारामुदात्तः' इत्यामिति। किमत्र कर्तव्यम्? परत्वाच्चतसृभावः।

आक्षेपभाष्यम्- अथेदानीं चतसृभावे कृते पुनःप्रसङ्गविज्ञानादाम् कस्मान्न भवति?

समाधानभाष्यम्- सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति।

(331. आक्षेपवार्तिकम्-11)

* स्वरे च वस्वादेशे *

भाष्यम्- स्वरे च वस्वादेशे प्रतिषेधो वक्तव्यः। विदुषः पश्य। 'शतुरनुमो नद्यजादी' अन्तोदात्तादित्येष स्वरः प्राप्नोति।

आक्षेपनिराकरणभाष्यम्- नैष दोषः। 'अनुमः' इति प्रतिषेधो भविष्यति।

अनुपपत्तिभाष्यम्- अनुम इत्युच्यते, न चात्र नुमं पश्यामः।

अनुपपत्तिपरिहारभाष्यम्- अनुम इति नेदमागमग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः? उकारात्प्रभृत्या नुमो मकारात्।

अनिष्टापत्तिभाष्यम्- यदि प्रत्याहारग्रहणं 'लुनता-पुनता' अत्रापि प्राप्नोति।

अनिष्टापत्तिवारणभाष्यम्- अनुम् ग्रहणेन न शत्रन्तं विशेष्यते। किं तर्हि? शतैव विशेष्यते—शता योऽनुम्क इति। अवश्यं चैतदेवं विज्ञेयम्। आगमग्रहणे हि सतीह प्रसज्येत—मुञ्चता, मुञ्चतः इति।

(332. आक्षेपवार्तिकम्-12)

* गोः पूर्वणित्त्वात्वस्वरेषु *

भाष्यम्- गोः पूर्वणित्वात्वस्वरेषु प्रतिषेधो वक्तव्यः। चित्रग्वग्रं, शबलग्वग्रम्। 'सर्वत्र विभाषा गोः' इति विभाषा पूर्वत्वं प्राप्नोति।

दूषणप्रथमाक्षेपनिराकरणभाष्यम्- नैष दोषः। एङ इति वर्तते। तत्रानल्विधाविति प्रतिषेधो भविष्यति।

समाधाननिरासभाष्यम्- एवमपि 'हे चित्रगोऽगम्' अत्र प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयतृतीयाक्षेपभाष्यम्- णित्त्वम्। चित्रगुः, चित्रगू, चित्रगवः। 'गोतो णित्' इति णित्त्वं प्राप्नोति। आत्वम्। चित्रगुं पश्य, शबलगुं पश्य। 'आओतः' इत्यात्वं प्राप्नोति। नैष दोषः।

(द्वितीयतृतीयाक्षेपवारणभाष्यवार्तिकम्)

*** तपरकरणात्सिद्धम् ***

द्वितीयतृतीयाक्षेपवारणभाष्यम्- तपरकरणसामर्थ्यात् णित्त्वात्वे न भविष्यतः।

आक्षेपभाष्यम्- स्वर—बहुगुमान्। 'न गोश्वन्साववर्ण-' इति प्रतिषेधः प्राप्नोति।

(333. आक्षेपवार्तिकम्-13)

*** करोतिपिबत्योः प्रतिषेधः ***

भाष्यम्- करोतिपिबत्योः प्रतिषेधो वक्तव्यः। कुरु-पिबेति। स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति।

(आक्षेनिराकरणे भाष्यवार्तिकम्)

*** उक्तं वा ***

आक्षेपनिराकरणभाष्यम्- किमुक्तम्? 'करोतौ तपरकरणनिर्देशात्सिद्धम्'। 'पिबिरदन्तः' इति। स्थानिवदादेशोऽनल्विधौ।

(52. अतिदेशसूत्रम् 1.1.8 आ. 2)

अचः परस्मिन् पूर्वविधौ 1.1.57

पदकृत्याधिकरणम्

अच्पदप्रयोजनम्

आक्षेपभाष्यम्- अच इति किमर्थम्?

प्रयोजनप्रदर्शनभाष्यम्- विश्नः, प्रश्नः। द्यूत्वा, स्यूत्वा। आक्राष्टाम्। आगत्य। प्रश्नो विश्न इत्यत्र छकारस्य शकारः परनिमित्तकस्तस्य स्थानिवद्भावात् 'छे च' इति तुक् प्राप्नोति। अच इति वचनान्न भवति।

दोषवारणभाष्यम्- नैतदस्ति प्रयोजनम्। क्रियमाणेऽपि वाऽज्ग्रहणेऽवश्यमत्र तुगभावे यत्नः कर्तव्यः। अन्तरङ्गत्वाद्धि तुक् प्राप्नोति।

द्वितीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—द्यूत्वा, स्यूत्वा। वकारस्य ऊठ् परनिमित्तकः। तस्य स्थानिवद्भावादचीति यणादेशो न प्राप्नोति। अच इति वचनाद्भवति।

दोषवारणभाष्यम्- एतदपि नास्ति प्रयोजनम्। स्वाश्रयमत्राच्त्वं भविष्यति। अथवा ोऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नासावादेशः।

तृतीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—अक्राष्टाम्। सिचो लोपः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परनिमित्तकः। तस्य स्थानिवद्भावात् 'षढोः कः सि' इति कत्वं प्राप्नोति। अच इति वचनान्न भवति।

दूषणनिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्—'पूर्वत्रासिद्धे न स्थानिवदि'ति।

अखण्डितप्रयोजनभाष्यम्- इदं तर्हि प्रयोजनम्—आगत्य, अभिगत्य। अनुनासिकलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद्ध्रस्वस्येति तुङ् न प्राप्नोति। अच इति वचनाद्भवति।

परस्मिन्नित्येतत्प्रयोजनम्

आक्षेपभाष्यम्- अथ परस्मिन्निति किमर्थम्?

प्रयोजनभाष्यम्- युवजानिः वधूजानिः। द्विपदिका। वैयाघ्रपद्यः। आदीध्ये।

प्रथमप्रयोजनोपपादनभाष्यम्- युवजानिः वधूजानिरिति 'जायाया निङ्' न परनिमित्तकः। तस्य स्थानिवद्भावाद् 'वलि' इति यलोपो न प्राप्नोति। परस्मिन्निति वचनाद्भवति।

प्रथमप्रयोजननिराकरणभाष्यम्- नैतदस्ति प्रयोजनम्। स्वाश्रयमत्र वल्त्वं भविष्यति। अथवा योऽत्रादेशो नासावाश्रीयते। यश्चाश्रीयते नासावादेशः।

द्वितीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—द्विपदिका, त्रिपदिका। पादस्य लोपोऽपरनिमित्तकः, तस्य स्थानिवद्भावात्पद्भावो न प्राप्नोति। परस्मिन्निति वचनाद्भवति।

द्वितीयप्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। पुनर्लोपवचनसामर्थ्यात् स्थानिवद्भावो न भविष्यति।

तृतीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—वैयाघ्रपद्यः।

प्रयोजनबाधकाक्षेपभाष्यम्- ननु चात्रापि पुनर्वचनसामर्थ्यादेव न भविष्यति।

प्रयोजनसाधकभाष्यम्- अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनम्। किम्? यत्र भसञ्ज्ञा न—व्याघ्रपात् श्येनपादिति।

चतुर्थप्रयोजनोपपादनभाष्यम्- इदं चाप्युदाहरणम्—आदीध्ये-आवेव्ये। इकारस्यैकारो न परनिमित्तकः। तस्य स्थानिवद्भावाद् 'यीवर्णयोर्दीधीवेव्योः' इति लोपः प्राप्नोति। परस्मिन्निति वचनान्न भवति।

पूर्वविधिग्रहणप्रयोजनम्

आक्षेपभाष्यम्- अथ पूर्वविधाविति किमर्थम्?

समाधानभाष्यम्- हे गौः। बाभ्रवीयाः। नैधेयः।

प्रथमप्रयोजनोपपादनभाष्यम्- हे गौरित्यौकारः परनिमित्तकः। तस्य स्थानिवद्भावाद् 'एङ्ह्रस्वात्सम्बुद्धेः' इति लोपः प्राप्नोति। पूर्वविधाविति वचनान्न भवति।

प्रयोजननिराकरणभाष्यम्- नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—'न

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बुद्धि-लोपे स्थानिवद्भावो भवति' इति। यदयम् 'एङ्ह्रस्वात्सम्बुद्धेः' इत्येङ्ग्रहणं करोति।

प्रयेजनसाधकभाष्यम्- नैतदस्ति ज्ञापकम्। गोऽर्थमेतत् स्यात्।

प्रयोजनबाधकज्ञापकाशयान्तरभाष्यम्- यत्तर्हि प्रत्याहारग्रहणं करोति। इतरथा हि 'ओह्रस्वात्' इत्येव ब्रूयात्।

द्वितीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—बाभ्रवीयाः, माधवीयाः। वान्तादेशः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'हलस्तद्धितस्य' इति यलोपो न प्राप्नोति। पूर्वविधाविति वचनाद्भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। स्वाश्रयमत्र हल्त्वं भविष्यति। अथवा—योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नाऽसावादेशः।

तृतीयप्रयोजनोपपादनभाष्यम्- इदं तर्हि प्रयोजनम्—नैधेयः। आकारलोपः परनिमित्तकः। तस्य स्थानिवद्भावाद् द्व्यज्लक्षणो ढग् न प्राप्नोति। पूर्वविधाविति वचनाद्भवति।

अथ विधिग्रहणप्रयोजननिरूपणम्

आक्षेपभाष्यम्- अथ विधिग्रहणं किमर्थम्?

समाधानभाष्यम्- सर्वविभक्त्यन्तः समासो यथा विज्ञायेत—पूर्वस्य विधिः पूर्वविधिः, पूर्वस्माद्विधिः पूर्वविधिरिति।

अथ पञ्चमीसमासप्रयोजननिरूपणम्

आक्षेपभाष्यम्- कानि पुनः पूर्वस्माद्विधौ स्थानिवद्भावस्य प्रयोजनानि?

प्रयोजनोद्देशभाष्यम्- बेभिदिता, चेच्छिदिता। माथितिकः। अपीपचन्।

प्रथमप्रयोजनोपपादनभाष्यम्- बेभिदिता चेच्छिदितेति। अकारलोपे कृते एकाज्लक्षण इट्प्रतिषेधः प्राप्नोति। स्थानिवद्भावान्न भवति।

द्वितीयप्रयोजनोपपादनभाष्यम्- माथितिक इत्यकारलोपे कृते 'तान्तात्कः' इति कादेशः प्राप्नोति। स्थानिवद्भावान्न भवति।

तृतीयप्रयोजनोपपादनभाष्यम्- अपीपचन्नित्येकादेशे कृते 'अभ्यस्ताज्झेर्जुस् भवति' इति जुस्भावः प्राप्नोति। स्थानिवद्भावान्न भवति।

उक्तप्रयोजननिराकरणभाष्यम्- नैतानि सन्ति प्रयोजनानि। प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति, न काञ्चित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते, सा साश्रयितव्या।

विधिग्रहणप्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्। विधिमात्रे स्थानिवद्यथा यथा स्यात्। अनाश्रीयमाणायामपि प्रकृतौ—वाय्वोरध्वर्य्वोः। 'लोपो व्योर्वलि' इति यलोपो मा भूदिति।

भाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वविधौ स्थानिवद्भावनिरूपणम्

(आक्षेपबाधकं भाष्यवार्तिकम्)

* अपरविधाविति तु वक्तव्यम् *

भाष्यम्- किं प्रयोजनम्? स्वविधावपि स्थानिवद्भावो यथा स्यात्।

आक्षेपभाष्यम्- कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि?

प्रयोजनोद्देशभाष्यम्- आयन्, आसन्। धिन्वन्ति, कृण्वन्ति। दध्यत्र, मध्वत्र। चक्रतुः, चक्रुः।

प्रथमप्रयोजनोपपादनभाष्यम्- इह तावदायन्नासन्निति। इणस्त्योर्यण्लोपयोः कृतयोर-नजादित्वात् 'आडजादीनाम्' इत्याट् न प्राप्नोति। स्थानिवद्भावाद् भवति।

द्वितीयप्रयोजनोपपादनभाष्यम्- धिन्वन्ति, कृण्वन्तीति। यणादेशे कृते वलादिलक्षण इट् प्राप्नोति। स्थानिवद्भावान्न भवति।

तृतीयप्रयोजनोपपादनभाष्यम्- दध्यत्र मध्वत्रेति। यणादेशे कृते 'संयोगान्तस्य लोपः' प्राप्नोति। स्थानिवद्भावान्न भवति।

चतुर्थप्रयोजनोपपादनभाष्यम्- चक्रतुः, चक्रुः। यणादेशे कृते अनच्कत्वाद् द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद् भवति।

अनिष्टापत्तिभाष्यम्- यदि तर्हि स्वविधावपि स्थानिवद्भावो भवति। 'द्वाभ्याम्, देयम्, लवनम्' अत्रापि प्राप्नोति। द्वाभ्यामित्यत्रात्त्वस्य स्थानिवद्भावाद् दीर्घत्वं न प्राप्नोति। देय-मितीत्त्वस्य स्थानिद्भावाद् गुणो न प्राप्नोति। लवनमित्यत्र गुणस्य स्थानिवद्भावादवादेशो न प्राप्नोति।

अनिष्टापत्तिवारणभाष्यम्- नैष दोषः। स्वाश्रया अत्रैते विधयो भविष्यन्ति।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्—अपरविधाविति।

समाधानभाष्यम्- न वक्तव्यम्। पूर्वविधावित्येव सिद्धम्। कथम्? न पूर्वग्रहणेनादेशोऽ-भिसम्बध्यते—'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति। कुतः पूर्वस्य? आदेशात्' इति। किं तर्हि? निमित्तमभिसम्बध्यते—'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति। कुतः पूर्वस्य? निमित्तात्' इति।

आक्षेपभाष्यम्- अथ निमित्तेऽभिसम्बध्यमाने यत्तदस्य योगस्य मूर्द्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति। किं पुनस्तत्? पट्व्या मृद्व्येति।

समाधानभाष्यम्- बाढं संगृहीतम्।

समाधानबाधकभाष्यम्- ननु च ईकारयणा व्यवहितत्वान्नासौ निमित्तात्पूर्वो भवति।

समाधानसाधकभाष्यम्- व्यवहितेऽपि पूर्वशब्दो वर्तते। तद्यथा—पूर्वं मथुरायाः पाटलिपुत्रमिति।

पक्षान्तराभ्युपगमभाष्यम्- अथवा पुनरस्त्वादेश एवाभिसम्बध्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि?

सिद्धान्तिभाष्यम्- नैतानि सन्ति। इह तावदायन्-आसन्-धिन्वन्ति-कृण्वन्तीति। अयं विधिशब्दोऽस्त्येवकर्मसाधनः—विधीयते विधिरिति। अस्ति च भावसाधनः—विधानं विधिरिति। तत्र कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते—पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्थानिवद्भवतीति। एवमाड् भविष्यति, इट् च न भविष्यति।

सिद्धान्तिशेषभाष्यम्- दध्यत्र मध्वत्र चक्रतुश्चक्रुरिति परिहारं वक्ष्यति।

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि?

प्रयोजनश्लोकभाष्यम्-

*** स्तोष्याम्यहं पादिकमौदवाहिं ततः**
श्वोभूते शातनीं पातनीं च।
नेतारावागच्छतं धारणिं रावणिं च ततः
पश्चात्स्त्रंस्यते ध्वंस्यते च ॥1॥ *

उपपादनभाष्यम्- इह तावत् पादिकमौदवाहिं शातनीं पातनीं धारणिं रावणिमिति। अकारलोपे कृते पद्भावः—ऊठ्-अल्लोपः-टिलोप इत्येते विधयः प्राप्नुवन्ति। स्थानिवद्भावान्न भवन्ति। स्त्रंस्यते-ध्वंस्यते। णिलोपे कृते 'अनिदितां हल उपधायाः क्ङिति' इति नलोपः प्राप्नोति। स्थानिवद्भावान्न भवति।

प्रयोजननिराकरणभाष्यम्- नैतानि सन्ति प्रयोजनानि। 'असिद्धवदत्राभात्' इत्यनेना-प्येतानि सिद्धानि।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—याज्यते-वाप्यते। णिलोपे कृते 'यजादीनां किति' इति सम्प्रसारणं प्राप्नोति। स्थानिवद्भावान्न भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। यजादिभिरत्र कितं विशेषयि-ष्यामः—यजादीनां यः किदिति। कश्च यजादीनां कित्? यजादिभ्यो यो विहित इति। न चायं यजादिभ्यो विहितः।

मूर्धाभिषिक्तप्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—पट्व्या मृद्व्येति। परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति, ईकारयणा व्यवहितत्वात्। स्थानिवद्भावाद्भवति।

आक्षेपभाष्यम्- किं पुनः कारणं परस्य तावद्भवति, न पुनः पूर्वस्य?

आक्षेपनिराकरणभाष्यम्- नित्यत्वात्। नित्यः परयणादेशः। कृतेऽपि पूर्वयणादेशे प्राप्नोति, अकृतेऽपि प्राप्नोति। नित्यत्वात्परयणादेशे कृते पूर्वस्य न प्राप्नोति। स्थानिवद्भावा-द्भवति।

असिद्धपरिभाषया सूत्रप्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य परयणादेशस्यान्तरङ्गलक्षणः पूर्वयणादेशो भविष्यति। अवश्यं चैषा परिभाषा आश्रयितव्या स्वरार्थम्। कर्त्र्याहर्त्र्यैति 'उदात्तयणो हल्पूर्वात्' इत्येष स्वरो यथा स्यात्।

सूत्रप्रयोजनवादिभाष्यम्- अनेनापि सिद्धः स्वरः। कथम्?

(सिद्ध्युपायश्लोकवार्तिकम्)

*** आरभ्यमाणे नित्योऽसौ ***

व्याख्याभाष्यम्- आरभ्यमाणे त्वस्मिन् योगे नित्यः पूर्वयणादेशः। कृतेऽपि परयणादेशे प्राप्नोति, अकृतेऽपि।

प्रयोजननिराकर्तृभाष्यम्- परयणादेशोऽपि नित्यः। कृतेऽपि पूर्वयणादेशे प्राप्नोति, अकृतेऽपि।

(सिद्ध्युपायबाधकश्लोकवार्तिकम्)

*** परश्चासौ व्यवस्थया ***

व्याख्याभाष्यम्- व्यवस्थया चासौ परः।

(सिद्ध्युपायबाधकश्लोकवार्तिकम्)

*** युगपत्सम्भवो नास्ति ***

व्याख्याभाष्यम्- न चास्ति यौगपद्येन सम्भवः।

(सिद्ध्युपायसाधकश्लोकवार्तिकम्)

*** बहिरङ्गेण सिध्यति ***

भाष्यम्- 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्यनेन सिध्यति।

सूत्रप्रयोजनवादिभाष्यम्- एवं तर्हि योऽत्रोदात्तयण् तदाश्रयः स्वरो भविष्यति।

इष्टानुपपत्तिभाष्यम्- ईकारयणा व्यवहितत्वान्न प्राप्नोति।

इष्टोपपत्तिभाष्यम्- 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति' इति नास्ति व्यवधानम्।

असिद्धपरिभाषावादिभाष्यम्- सा तर्हि एषा परिभाषा कर्तव्या।

स्थानिवद्भाववादिभाष्यम्- ननु चेयमपि कर्तव्या—'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति।

असिद्धपरिभाषावादिभाष्यम्- बहुप्रयोजनैषा परिभाषा। अवश्यमेवैषा कर्तव्या।

असिद्धपरिभाषावादिनो लाघवभाष्यम्- सा चाप्येषा लोकतः सिद्धा। कथम्? प्रत्यङ्गवर्ती लोको लक्ष्यते। तद्यथा—पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति, ततः सुहृदाम्, ततः सम्बन्धिनाम्। प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्तते। सामान्ये वर्तमानस्य व्यक्तिरुपजायते। व्यक्तस्य सतो लिङ्गसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवति। ययैव चाऽनुपूर्व्याऽर्थानां प्रादुर्भावस्तयैव शब्दानामपि। तद्वत्कार्यैरपि भवितव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रारम्भवादिभाष्यम्- इमानि तर्हि प्रयोजनानि—पटयति, अवधीत्, बहुखट्वकः।

प्रयोजनोपपादनभाष्यम्- पटयति, लघयति। णिचि टिलोपे कृते 'अत उपधायाः' इति वृद्धिः प्राप्नोति। स्थानिवद्भावान्न भवति।

द्वितीयप्रयोजनोपपादनभाष्यम्- अवधीदित्यकारलोपे कृते 'अतो हलादेर्लघोः' इति वृद्धिः प्राप्नोति। स्थानिवद्भावान्न भवति।

तृतीयप्रयोजनोपपादनभाष्यम्- बहुखट्वक इति 'आपोऽन्यतरस्याम्' इति ह्रस्वे कृते 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इत्येष स्वरः प्राप्नोति। स्थानिवद्भावान्न भवति।

स्थानिवद्भावप्राप्तानिष्टनिराकरणम्

आक्षेपभाष्यम्- इह वैयाकरणः सौवश्व इति य्वोः स्थानिवद्भावादायावौ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यः।

(समाधाने भाष्यवार्तिकम्)

* अचः पूर्वविज्ञानादैचोः सिद्धम् *

भाष्यम्- योनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः। आदिष्टाच्चैषोऽचः पूर्वः। किं वक्तव्यमेतत्? न हि। कथमनुच्यमानं गंस्यते? अच इति पञ्चमी। अचः पूर्वस्य।

आक्षेपभाष्यम्- यद्येवमादेशोऽविशेषितो भवति।

आक्षेपबाधकभाष्यम्- आदेशश्च विशेषितः। कथम्? न ब्रूमः—यत् षष्ठीनिर्दिष्टमज्ग्रहणं तत्पञ्चमीनिर्दिष्टं कर्तव्यम्—इति। किं तर्ह्यन्यत्कर्तव्यम्? अन्यच्च न कर्तव्यम्। यदेवादः षष्ठीनिर्दिष्टमज्ग्रहणम्, तस्य दिक्छब्दैर्योगे पञ्चमी भवति—अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति। कुतः पूर्वस्य? अच इति। तद्यथा—आदेशः प्रथमानिर्दिष्टः, तस्य दिक्छब्दैर्योगे पञ्चमी भवति—अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति। कुतः पूर्वस्य? आदेशादिति।

भावाभावातिदेशसाधनम्

(335. आक्षेपवार्तिकम्-1)

* तत्रादेशलक्षणप्रतिषेधः *

भाष्यम्- तत्रादेशलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। वाय्वोः। अध्वर्य्वोः। 'लोपो व्योर्वलि' इति लोपः प्राप्नोति।

(वार्तिकैकदेशेन समाधानम्)

* असिद्धवचनात्सिद्धम् *

भाष्यम्- अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम्।

(336. समाधानबाधकाक्षेपवार्तिकम्-2)

* असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः *

भाष्यम्- असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः। पट्व्या मृद्व्येति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- ननु चैतदप्यसिद्धवचनात्सिद्धम्।

(337. **समाधानबाधकाक्षेपवार्तिकम्**- 3)

*** असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः ***

भाष्यम्- असिद्धवचनात्सिद्धमिति चेत्। तन्न। किं कारणम्? 'नान्यस्यासिद्धवचनादन्यस्य भावः'। न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। तद्यथा—न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति।

(338. **आक्षेपोपसंहारवार्तिकम्**- 4)

*** तस्मात्स्थानिवद्वचनम् ***

भाष्यम्- तस्मात्स्थानिवद्भावो वक्तव्यः, असिद्धत्वं च। पट्व्या मृद्व्येत्यत्र स्थानिवद्भावो वक्तव्यः। वाय्वोरध्वर्य्वोरित्यत्रासिद्धत्वम्।

परिहारवार्तिकस्मारकभाष्यम्- 'उक्तं वा'। किमुक्तम्? 'स्थानिवद्वचनानर्थक्यं शास्त्राऽसिद्धत्वात्' इति।

समाधानबाधकभाष्यम्- विषम उपन्यासः। युक्तं तत्र यदेकादेशशास्त्रं तुक्छास्त्रे असिद्धं स्यात्—अन्यदन्यस्मिन्। इह पुनरयुक्तम्। कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात्?

समाधानसाधकभाष्यम्- तदेव चापि तस्मिन्नसिद्धं भवति। वक्ष्यति ह्याचार्यः—'चिणो लुकि तग्रहणानर्थक्यं सङ्घातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वात्' इति। चिणो लुक् चिणो लुक्येवासिद्धो भवति।

(**समाधानश्लोकवार्तिकम्**)

*** काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति।**
कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि॥ *

भाष्यम्- अथवा वतिनिर्देशोऽयम्। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम्। तद्यथा—'उशीनरवन्मद्रेषु यवाः' सन्ति, न सन्तीति। 'मातृवदस्याः कलाः' सन्ति, न सन्तीति। एवमिहापि स्थानिवद्भवति, स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे। इह तावत्पट्व्या मृद्व्येति। यथा स्थानिनि यणादेशो भवति, एवमादेशेऽपि भवति। इहेदानीं वाय्वोरध्वर्य्वोरिति। यथा स्थानिनि यलोपो न भवति, एवमादेशेऽपि न भवतीति।

पूर्वशब्दार्थनिर्णयः

भाष्यम्- किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भावः, आहोस्वित्पूर्वमात्रस्य? कश्चात्र विशेषः।

(339. **अनन्तरग्रहणदूषणवार्तिकम्**- 1)

*** अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूसंख्यानम् ***

भाष्यम्- अनन्तरस्येति चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानं कर्तव्यम्। एकाननु-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दात्त—लुनीह्यत्र पुनीह्यत्र इति। 'अनुदात्तं पदमेकवर्जम्' इत्येष स्वरो न प्राप्नोति।

उदाहरणभाष्यम्- गतिनिघातः। यत्रलुनीह्यत्र यत्रपुनीह्यत्र इति। 'तिङि चोदात्तवति' इत्येष स्वरो न प्राप्नोति।

द्वितीयपक्षाङ्गीकारभाष्यम्- अस्तु तर्हि पूर्वमात्रस्य।

(पूर्वमात्रग्रहणदूषणभाष्यवार्तिकम्)

* पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यम् *

भाष्यम्- वादितवन्तं प्रयोजितवान्—अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति? योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद् ह्रस्वत्वं प्राप्नोति।

(340. दूषणान्तरवार्तिकम्-2)

* गुरुसञ्ज्ञा च *

भाष्यम्- गुरुसञ्ज्ञा च न सिद्ध्यति। श्लेष्मा३घ्न। पित्ता३घ्न। दा३ध्यश्व। मा३ध्वश्व। 'हलोऽनन्तराः संयोगः' इति संयोगसञ्ज्ञा, 'संयोगे गुरु' इति गुरुसञ्ज्ञा, 'गुरोरनृतः' इति प्लुतो न प्राप्नोति।

पूर्वमात्रवादिभाष्यम्- ननु च यस्याप्यनन्तरस्य विधिं प्रति स्थानिवद्भावः, तस्याप्यनन्तरलक्षणो विधिः संयोगसञ्ज्ञा विधेया।

(341. समाधानवार्तिकम्-3)

* न वा संयोगस्यापूर्वविधित्वात् *

भाष्यम्- न वा एष दोषः। किं कारणम्? संयोगस्यापूर्वविधित्वात्। न पूर्वविधिः संयोगः। किं तर्हि? पूर्वपरविधिः संयोगः।

एकादेशे स्थानिवद्भावसाधनम्

(342. आक्षेपवार्तिकम्-1)

* एकादेशस्योपसंख्यानम् *

भाष्यम्- एकादेशस्योपसंख्यानं कर्तव्यम्। श्रायसौ, गौमतौ, चातुरौ, आनडुहौ, पादे, उदवाहे। एकादेशे कृते नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति।

प्रत्याक्षेपभाष्यम्- किं पुनः कारणं न सिध्यति?

(प्रत्याक्षेपबाधकभाष्यवार्तिकम्)

* उभयनिमित्तत्वात् *

भाष्यम्- अजादेशः परनिमित्तक इत्युच्यते। उभयनिमित्तश्चायम्।

(प्रत्याक्षेपबाधकभाष्यवार्तिकण्डम्)

* उभयादेशत्वाच्च *

भाष्यम्- अच आदेश इत्युच्यते। अचोश्चायमादेशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपसाधकप्रथमहेतुनिरासभाष्यम्- नैष दोषः। यत्तावदुच्यते---'उभयनिमित्तत्वात्' इति। इह यस्य ग्रामे नगरे वा अनेकं कार्यं भवति, शक्नोत्यसौ तत्राऽन्यत् व्यपदेष्टुम्। तद्यथा—'गुरुनिमित्तं वसामः' इति, 'अध्ययननिमित्तं वसामः' इति।

आक्षेपसाधकद्वितीयहेतुनिरासभाष्यम्- यदप्युच्यते—'उभयादेशत्वाच्च' इति। इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति, लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा— देवदत्तस्य पुत्रः, देवदत्तायाः पुत्र इति।

अथ हल्चसमुदायादेशस्थानिवत्त्वाभावनिर्णयः

आक्षेपभाष्यम्- अथ हलचोरादेशः स्थानिवद् भवति, उताहो न।

भाष्यम्- कश्चात्र विशेषः।

(343. **समुदायादेशस्थानिवत्त्वे दूषणवार्तिकम्**-1)

*** हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः ***

भाष्यम्- हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोपे एकादेशो वक्तव्यः। विंशकः। विंशं शतम्।

(344. **दूषणान्तरवार्तिकम्**-2)

*** स्थूलादीनां यणादिलोपेऽवादेशः ***

भाष्यम्- स्थूलादीनां यणादिलोपे कृते अवादेशो वक्तव्यः। स्थवीयान्, दवीयान्।

(345. **दूषणान्तरवार्तिकम्**-3)

*** केकयमित्रय्वोरियादेश एत्वम् ***

भाष्यम्- केकयमित्रय्वोरियादेशे एत्वं न सिध्यति। कैकेयः। मैत्रेयः। अचीत्येत्वं न सिध्यति।

(346. **दूषणान्तरवार्तिकम्**-4)

*** उत्तरपदलोपे च ***

भाष्यम्- उत्तरपदलोपे च दोषो भवति। दध्युपसिक्ताः सक्तवो दधिसक्तवः। अचीति यणादेशः प्राप्नोति।

(347. **आक्षेपवार्तिकम्**-5)

*** यङ्लोपे यणियङुवङः ***

भाष्यम्- यङ्लोपे यणियङुवङो न सिध्यन्ति। चेच्यः, नेन्यः। चेक्षियः, चेक्रियः। लोलुवः, पोपुवः। अचीति यणियङुवङो न सिध्यन्ति।

पक्षान्तराश्रयणभाष्यम्- अस्तु तर्हि न स्थानिवत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(348. आक्षेपवार्तिकम्- 6)

*** अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः ***

भाष्यम्- अस्थानिवत्त्वे यङ्लोपे गुणवृद्ध्योः प्रतिषेधो वक्तव्यः। लोलुवः, पोपुवः, सरीसृपः, मरीमृज इति।

आक्षेपबाधकभाष्यम्- नैष दोषः। 'न धातुलोप आर्धधातुके' इति प्रतिषेधो भविष्यति।

अथ स्थान्याश्रयणानाश्रयणम्

आक्षेपभाष्यम्- किं पुनराश्रीयमाणायां प्रकृतौ स्थानिवद्भवति, आहोस्विदविशेषेण?

भाष्यम्- कश्चात्र विशेषः?

(349. द्वितीयपक्षे दूषणवार्तिकम्- 1)

*** अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः ***

भाष्यम्- अविशेषेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति। श्लेष्मा३घ्न। पित्ता३घ्न। दा३ध्यश्व। मा३ध्वश्व। 'हलोऽनन्तराः संयोगः' इति संयोगसञ्ज्ञा, 'संयोगे गुरु' इति गुरुसञ्ज्ञा, 'गुरोः' इति प्लुतो न प्राप्नोति।

(350. दूषणान्तरवार्तिकम्- 2)

*** द्विर्वचनादयश्च प्रतिषेधे ***

भाष्यम्- द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः। 'द्विर्वचनवरेयलोप' इति।

(351. दूषणान्तरवार्तिकम्- 3)

*** क्सलोपे लुग्वचनम् ***

भाष्यम्- क्सलोपे लुग्वक्तव्यः। अदुग्ध, अदुग्धाः। 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति।

(352. दूषणान्तरवार्तिकम्- 4)

*** हन्तेर्घत्वम् ***

भाष्यम्- हन्तेश्च घत्वं वक्तव्यम्। घ्नन्ति-घ्नन्तु-अघ्नन्।

प्रथमपक्षाश्रयणभाष्यम्- अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति।

(353. प्रथमपक्षे दूषणवार्तिकम्- 5)

*** ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः ***

भाष्यम्- ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिषु आदेशस्य प्रतिषेधो वक्तव्यः। निराद्य, समाद्य। 'अदो जग्धिर्ल्यप्ति किति' इति अदो जग्धिभावः प्राप्नोति।

(354. दूषणान्तरवार्तिकम्- 6)

*** यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः ***

भाष्यम्- यणादेशे युलोपेत्वानुनासिकात्वानां प्रतिषेधो वक्तव्यः। वाय्वोः, अध्वर्य्वोः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'लोपो व्योर्वलि' इति यणादेशे लोपः प्राप्नोति।

उलोप—अकुर्वि-आशाम्-अकुर्व्याशाम्। 'नित्यं करोतेः' 'ये च' इत्युकारलोपः प्राप्नोति।

ईत्व—अलुनि-आशाम्-अलुन्याशाम्। 'ई हल्यघोः' इतीत्वं प्राप्नोति।

अनुनासिकात्व—अजज्ञि-आशाम्-अजज्ञ्याशाम्। 'ये विभाषा' इत्यनुनासिकात्वं प्राप्नोति।

(355. आक्षेपवार्तिकम्-7)

* रायात्वप्रतिषेधश्च *

भाष्यम्- राय आत्वस्य च प्रतिषेधो वक्तव्यः। रायि आशाम् राय्याशाम्। 'रायो हलि' इत्यात्वं प्राप्नोति।

(356. आक्षेपवार्तिकम्-8)

* दीर्घे यलोपप्रतिषेधः *

भाष्यम्- दीर्घे यलोपस्य प्रतिषेधो वक्तव्यः। सौर्ये नाम हिमवतः शृङ्गे, तद्वान् सौर्यी हिमवानिति। सौ इन्नाश्रये दीर्घत्वे कृते 'सूर्यतिष्या-' इति यलोपः प्राप्नोति।

(357. आक्षेपवार्तिकम्-9)

* अतो दीर्घे यलोपवचनम् *

भाष्यम्- अतो दीर्घे यलोपो वक्तव्यः। गार्गाभ्यां वात्साभ्याम्। दीर्घे कृते 'आपत्यस्य च तद्धितेऽनाति' इति प्रतिषेधः प्राप्नोति।

आक्षेपबाधकभाष्यम्- नैष दोषः। आश्रीयते तत्र प्रकृतिस्तद्धित इति।

सर्वाक्षेपपरिहारभाष्यम्- सर्वेषामेव परिहारः। उक्तं विधिग्रहणस्य प्रयोजनम्—विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायां प्रकृताविति।

द्वितीयपक्षाभ्युपगमभाष्यम्- अथवा पुनरस्त्वविशेषेण स्थानिवदिति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः द्विर्वचनादयश्च क्सलोपे लुग्वचनम्' 'हन्तेर्घत्वम्' इति।

आक्षेपनिराकरणभाष्यम्- नैष दोषः। यत्तावदुच्यते—'अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः' इति। उक्तमेतत्—'न वा संयोगस्यापूर्वविधित्वात्' इति। यदप्युच्यते—'द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः' इति। उच्यन्ते न्यास एव। 'क्सलोपे लुग्वचनम्' इति। क्रियते न्यास एव। 'हन्तेर्घत्वम्' इति। सप्तमे परिहारं वक्ष्यति। अचः परस्मिन्।

(53. स्थानिवद्भावनिषेधसूत्रम् 1.1.8 आ. 3)

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु 1.1.58

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पदान्तपदार्थनिरूपणम्

आक्षेपभाष्यम्- पदान्तविधिं प्रति न स्थानिवदित्युच्यते। तत्र वेतस्वानिति रु: प्राप्नोति।

समाधानभाष्यम्- नैष: दोष:। भसञ्ज्ञाऽत्र बाधिका भविष्यति—'तसौ मत्वर्थे' इति।

पूर्वपक्ष्याक्षेपसाधकभाष्यम्- अकारान्तमेतद्भसञ्ज्ञां प्रति, पदसञ्ज्ञां प्रति तु सकारान्तम्।

सिद्धान्त्येकदेशिसमाधानभाष्यम्- ननु चैवं विज्ञायते—य: सम्प्रतिपदान्त इति।

पूर्वपक्ष्याक्षेपसाधकभाष्यम्- कर्मसाधनस्य विधिशब्दस्योपादाने एतदेवं स्यात्।

सिद्धान्त्येकदेशिभाष्यम्- अयं च विधिशब्दोऽस्त्येव कर्मसाधन:—विधीयत इति विधिरिति।

पूर्वपक्ष्याक्षेपसाधकभाष्यम्- अस्ति च भावसाधन:—विधानं विधिरिति। तत्र भावसाधनस्य विधिशब्दस्योपादाने एष दोषो भवति। इह च—ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै। धकारस्य जश्त्वं प्राप्नोति।

सिद्धान्त्येकदेशिप्रश्नभाष्यम्- अस्ति पुन: किञ्चिद्भावसाधनस्य विधिशब्दस्योपादाने सतीष्टं संगृहीतम्, आहोस्विद्दोषान्तमेवेति?

पूर्वपक्षिप्रतिवाक्यभाष्यम्- अस्तीत्याह। इह—कानि सन्ति, यानि सन्ति, कौ स्त:, यौ स्त इति। योऽसौ पदान्तो यकारो वकारो वा श्रूयेत, स न श्रूयते। षडिकश्चाऽपि सिद्धो भवति।

सिद्धान्त्येकदेशिन आक्षेपभाष्यम्- वाचिकस्तु न सिध्यति।

तटस्थभाष्यम्- अस्तु तर्हि कर्मसाधन:।

सिद्धान्त्येकदेशिभाष्यम्- यदि कर्मसाधन:, षडिको न सिध्यति।

तटस्थभाष्यम्- अस्तु तर्हि भावसाधन:।

सिद्धान्त्येकदेशिभाष्यम्- वाचिको न सिध्यति।

तटस्थभाष्यम्- वाचिकषडिकौ न संवदेते।

सिद्धान्तिभाष्यम्- कर्तव्योऽत्र यत्न:।

आक्षेपभाष्यम्- कथं ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै?

समाधानभाष्यम्- उभयत आश्रयणे नान्तादिवदिति।

आक्षेपभाष्यम्- कथं वेतस्वान्।

समाधानभाष्यम्- नैवं विज्ञायते—पदस्यान्त: पदान्त:, पदान्तस्य विधि: पदान्तविधि:, पदान्तविधिं प्रतीति। कथं तर्हि? पदे अन्त: पदान्त:, पदान्तस्य विधि: पदान्तविधि:, पदान्तविधिं प्रतीति।

समाधानान्तरभाष्यम्- अथवा यथैवान्यान्यपि पदकार्याण्युपप्लवन्ते रुत्वं जश्त्वं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च। एवमिदमपि पदकार्यमुपप्लोष्यते। किम्? भसञ्ज्ञा नाम।

वरे यलोपपदार्थनिरूपणम्

आक्षेपभाष्यम्- वरे यलोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते। तत्र ते—'अप्सु यायावरः प्रवपेत पिण्डान्' अवर्णलोपविधिं प्रति स्थानिवत्स्यात्।

समाधानभाष्यम्- नैष दोषः। नैवं विज्ञायते—वरे यलोपविधिं प्रति न स्थानिवदिति। कथं तर्हि? वरे अयलोपविधिं प्रतीति। किमिदमयलोपविधिं प्रतीति? अवर्णलोपविधिं प्रति यलोपविधिं च प्रतीति।

समाधानान्तरभाष्यम्- अथवा योगविभागः करिष्यते—'वरे लुप्तं न स्थानिवत्' ततो 'यलोपविधिं प्रति न स्थानिवत्' इति।

आक्षेपभाष्यम्- यलोपे किमुदाहरणम्?

समाधानभाष्यम्- कण्डूयतेरप्रत्ययः कण्डूरिति।

समाधानबाधकभाष्यम्- नैतदस्ति। क्वौ लुप्तं न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—सौरी बलाका।

बाधकभाष्यम्- नैतदस्ति। उपधात्वविधिं प्रति न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—आदित्यः।

बाधकभाष्यम्- नैतदस्ति। पूर्वत्रासिद्धे न स्थानिवत्।

प्रयोजनभाष्यम्- इदं तर्हि—कण्डूतिर्वल्गूतिः।

बाधकभाष्यम्- नैतदस्ति प्रयोजनम्। कण्डूया वल्गूया इति भवितव्यम्।

समाधानान्तरभाष्यम्- इदं तर्हि—कण्डूयतेः क्तिच्। ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिः।

(358. **नियमाक्षेपवार्तिकम्-1**)

* प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् *

आक्षेपभाष्यम्- प्रतिषेधे स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति वक्तव्यम्।

स्वरोदाहरणोपपादनभाष्यम्- स्वर—आकर्षिकः। जिहीर्षकः। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति—पञ्चारत्न्यः, दशारत्न्यः। स्वरः।

दीर्घोदाहरणोपपादनभाष्यम्- दीर्घ—प्रतिदीव्ना प्रतिदीव्ने। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति—किर्योः गिर्योः। दीर्घ।

यलोपोदाहरणोपपादनभाष्यम्- यलोपः—ब्राह्मणकण्डूतिः, क्षत्रियकण्डूतिः। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति—वाय्वोरध्वर्य्वोरिति। यलोप।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- न वक्तव्यम्। इह हि लोपोऽपि प्रकृतः, आदेशोऽपि। विधिग्रहणमपि प्रकृतमनुवर्तते। दीर्घादयोऽपि निर्दिश्यन्ते। केवलं तत्राभिसम्बन्धमात्रं कर्तव्यम्—स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसम्बन्धः शक्यते कर्तुम्। न चैतान्यानुपूर्व्येण सन्निविष्टानि।

समाधानभाष्यम्- अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमभिसम्बन्धो भवति। तद्यथा— अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं, भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसम्बन्धो भवति—उदहारि भगिनि या त्वं कुम्भं हरसि शिरसा, अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति।

(359. न्यूनताक्षेपवार्तिकम्-2)

* क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् *

भाष्यम्- क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यम्।

क्विग्रहणोदाहरणम्

आक्षेपभाष्यम्- क्वौ किमुदाहरणम्?

समाधानभाष्यम्- कण्डूयतेरप्रत्ययः कण्डूरिति।

समाधानबाधकभाष्यम्- नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि—पिपठिषतेरप्रत्ययः। पिपठीः।

बाधकभाष्यम्- नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि—लावयतेर्लौः। पावयतेः पौः।

बाधकभाष्यम्- नैतदस्ति। अकृत्वा वृद्ध्यावादेशौ णिलोपः। प्रत्ययलक्षणेन वृद्धिर्भविष्यति।

समाधानान्तरभाष्यम्- इदं तर्हि—लवमाचष्टे लवयति। लवयतेरप्रत्यये लौः पौः। स्थानिवद्भावात् णेरूट् न प्राप्नोति। क्वौ लुप्तं न स्थानिवदिति भवति।

समाधानबाधकभाष्यम्- एवमपि न सिध्यति। कथम्? क्वौ णिलोपः णावकारलोपः, तस्य स्थानिवद्भावादूठ् न प्राप्नोति।

समाधानसाधकभाष्यम्- नैष दोषः। नैवं विज्ञायते—क्वौ लुप्तं न स्थानिवदिति। कथं तर्हि? क्वौ विधिं प्रति न स्थानिवदिति।

लुग्ग्रहणोदाहरणम्

आक्षेपभाष्यम्- लुकि किमुदाहरणम्?

समाधानभाष्यम्- विम्बं, वदरम्।

समाधानबाधकभाष्यम्- नैतदस्ति। पुंवद्भावेनाप्येतत्सिद्धम्।

समाधानान्तरभाष्यम्- इदं तर्हि—आमलकम्।

समाधानबाधकभाष्यम्- एतदपि नास्ति। वक्ष्यत्येतत्—'फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात्' इति।

समाधानान्तरभाष्यम्- इदं तर्हि—पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुर्दशपटुरिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्- ननु चैतदपि पुंवद्भावेनैव सिद्धम्। कथं पुंवद्भावः? 'भस्याढे तद्धिते' पुंवद्भवतीति।

समाधानसाधकभाष्यम्- भस्येत्युच्यते। यजादौ च भसञ्ज्ञा भवति। न चात्र यजादिं पश्यामः।

समाधानबाधकभाष्यम्- प्रत्ययलक्षणेन यजादिः।

समाधानसाधकभाष्यम्- वर्णाश्रये नास्ति प्रत्ययलक्षणम्।

समाधानबाधकभाष्यम्- एवं तर्हि—'ठक्छसोश्च' इत्येवं भविष्यति।

समाधानसाधकभाष्यम्- ठक्छसोश्चेत्युच्यते। न चात्र ठक्छसौ पश्यामः।

बाधकभाष्यम्- प्रत्ययलक्षणेन।

समाधानसाधकभाष्यम्- 'न लुमता तस्मिन्' इति प्रत्ययलक्षणस्य प्रतिषेधः। न खल्वप्यवश्यं ठगेव क्रीतप्रत्ययः, क्रीताद्यर्था एव वा तद्धिताः। किं तर्हि? अन्येऽपि तद्धिता ये लुकं प्रयोजयन्ति। पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः। दशेन्द्रः। पञ्चाग्निः। दशाग्निः।

उपधात्वोदाहरणनिरूपणम्

आक्षेपभाष्यम्- उपधात्वे किमुदाहरणम्?

समाधानभाष्यम्- पिपठिषतेरप्रत्ययः पिपठीरिति।

समाधानबाधकभाष्यम्- नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि—सौरी बलाका।

समाधानबाधकभाष्यम्- नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्।

समाधानान्तरभाष्यम्- इदं तर्हि—पारिखीयः।

चङ्परनिर्ह्रासोदाहरणनिरूपणम्

(चङ्परनिर्ह्रासोदाहरणनिरूपणे भाष्यवार्तिकम्)

*** चङ्परनिर्ह्रासे चोपसंख्यानं कर्तव्यम् ***

भाष्यम्- वादितवन्तं प्रयोजितवान्—अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति? योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद् ह्रस्वत्वं न प्राप्नोति।

बाधकभाष्यम्- ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येव सिद्धम्।

साधकभाष्यम्- विशेषत एतद्वक्तव्यम्। क्व? प्रत्ययविधाविति। इह मा भूत्—पटयति, लघयतीति।

कुत्वोदाहरणनिरूपणम्

भाष्यम्- कुत्वे चोपसंख्यानं कर्तव्यम्। अर्चयतेरर्कः, मर्चयतेर्मर्कः।

उपसंख्यानबाधकभाष्यम्- नैतद् घञन्तम्। औणादिक एष कशब्दस्तस्मिन्नाष्टमिकं कुत्वम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपसंख्यानसाधकभाष्यम्- एतदपि णिचा व्यवहितत्वान्न प्राप्नोति।

(360 **आक्षेपवार्तिकम्**- 1)

*** पूर्वत्रासिद्धे च ***

भाष्यम्- पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम्। किं प्रयोजनम्?

(361. **प्रयोजनवार्तिकम्**- 2)

*** प्रयोजनं क्सलोपः सलोपे ***

भाष्यम्- क्सलोपः सलोपे प्रयोजनम्। अदुग्ध, अदुग्धाः। 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति लुग्ग्रहणं न कर्तव्यं भवति।

(प्रयोजने भाष्यवार्तिकम्)

*** दध आकारलोप आदिचतुर्थत्वे प्रयोजनम् ***

भाष्यम्- धत्से-धद्ध्वे-धद्ध्वमिति। 'दधस्तथोश्च' इति चकारो न कर्तव्यो भवति।

(प्रयोजने भाष्यवार्तिकम्)

*** हलो यमां यमि लोपे प्रयोजनम् ***

भाष्यम्- आदित्यः। 'हलो यमां यमि लोपः' सिद्धो भवति।

(प्रयोजने भाष्यवार्तिकम्)

*** अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम् ***

भाष्यम्- पापच्यतेः पापक्तिः। यायज्यतेर्यायष्टिः। पाचयतेः पाक्तिः। याजयतेर्याष्टिः।

(362. **प्रयोजनवार्तिकम्**- 3)

*** द्विर्वचनादीनि च ***

भाष्यम्- द्विर्वचनादीनि च न पठितव्यानि भवन्ति। पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति। किमविशेषेण? नेत्याह।

(363. **शेषवार्तिकम्**- 4)

*** वरेयलोपस्वरवर्जम् ***

भाष्यम्- वरेयलोपं स्वरं च वर्जयित्वा।

(364. **प्रतिप्रसवतार्तिकम्**- 5)

*** तस्य दोषः संयोगादिलोपलत्वणत्वेषु ***

भाष्यम्- तस्यैतस्य लक्षणस्य दोषः संयोगादिलोपलत्वणत्वेषु।

उदाहरणभाष्यम्- संयोगादिलोपे—काक्यर्थम्, वास्यर्थम्। 'स्कोः संयोगाद्योरन्ते च' इति लोपः प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लत्वम्—निगार्यते, निगाल्यते। 'अचि विभाषा' इति लत्वं न प्राप्नोति।

णत्वम्—माषवपन, व्रीहिवपनी। 'प्रातिपदिकान्तस्य' इति णत्वं प्राप्नोति। न पदान्त-द्विर्वचनः।

(54. अतिदेशसूत्रम् 1.1.8 आ. 4)

द्विर्वचनेऽचि 1.1.59

इष्टानुपपत्तिपरिहारः

(365. आक्षेपसाधकवार्तिकम्-1)

*** आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम् ***

भाष्यम्- आदेशे स्थानिवदनुदेशात् तद्वतः। किंवतः? आदेशवतः। द्विर्वचनं प्राप्नोति।

प्रत्याक्षेपभाष्यम्- तत्र को दोषः।

(366. आक्षेपवार्तिकम्-2)

*** तत्राभ्यासरूपम् ***

भाष्यम्- तत्राभ्यासरूपं न सिद्ध्यति। चक्रतुश्चक्रुरिति।

(367. समाधानवार्तिकम्-3)

*** अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य ***

भाष्यम्- यदयमज्ग्रहणं करोति तज्ज्ञापयत्याचार्यः—रूपं स्थानिवद्भवतीति। कथं कृत्वा ज्ञापकम्? अज्ग्रहणस्यैतत्प्रयोजनम्—इह मा भूत्—जेघ्रीयते, देध्मीयते। यदि च रूपं स्थानिवद्भवति, ततोऽज्ग्रहणमर्थवद्भवति। अथ हि कार्यम्, नाऽर्थोऽज्ग्रहणेन। भवत्येवाऽत्र द्विर्वचनम्।

(368. समाधानबाधकाक्षेपवार्तिकम्-4)

*** तत्र गाङः प्रतिषेधः ***

भाष्यम्- तत्र गाङः प्रतिषेधो वक्तव्यः। अधिजगे। इवर्णाभ्यासता प्राप्नोति।

समाधानसाधकभाष्यम्- न वक्तव्यः। 'गाङ् लिटि' इति द्विलकारको निर्देशः। लिटि लकारादाविति।

(369. आक्षेपान्तरवार्तिकम्-5)

*** कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम् ***

भाष्यम्- कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिद्ध्यति। कृति—अचिकीर्तत्। कृति। एजन्त—जग्ले, मम्ले। एजन्त। दिवादि—दुद्यूषति, सुस्यूषति। दिवादि। नामधातु—भवनमिच्छति भवनीयति, भवनीयतेः सन् बिभवनीयिषति।

पक्षान्तरेण समाधानभाष्यम्- एवं तर्हि प्रत्यय इति वक्ष्यामि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(370. द्वितीयपक्षदूषणवार्तिकम्-6)

*** प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपम् ***

भाष्यम्- प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपं न सिद्ध्यति। दिवादय एके परिहृताः।

तृतीयपक्षाङ्गीकारे समाधानभाष्यम्- एवं तर्हि—द्विर्वचननिमित्ते अच्यजादेशः स्थानिवत् इति वक्ष्यामि।

तृतीयपक्षे दूषणभाष्यम्- स तर्हि निमित्तशब्द उपादेयः। न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते।

समाधानभाष्यम्- अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते। तद्यथा—'दधित्रपुसं प्रत्यक्षो ज्वरः' ज्वरनिमित्तमिति गम्यते। 'नड्वलोदकं पादरोगः' पादरोगनिमित्तमिति गम्यते। 'आयुर्घृतम्' आयुषो निमित्तमिति गम्यते।

समाधानान्तरभाष्यम्- अथवा अकारो मत्वर्थीयः। द्विर्वचनमस्मिन्नस्ति सोऽयं द्विर्वचनः, द्विर्वचने इति।

आक्षेपभाष्यम्- एवमपि न ज्ञायते—कियन्तमसौ कालं स्थानिवद्भवतीति।

समाधानभाष्यम्- यः पुनराह 'द्विर्वचने कर्तव्ये' इति, कृते तस्य द्विर्वचने स्थानिवन्न भविष्यति।

आदेशनिषेधरूपचतुर्थपक्षाभ्युपगमभाष्यम्- एवं तर्हि—प्रतिषेधः प्रकृतः सोऽनुवर्तिष्यते। क्व प्रकृतः? 'न पदान्तद्विर्वचन' इति। द्विर्वचननिमित्ते अचि अजादेशो न भवतीति।

आक्षेपभाष्यम्- एवमपि न ज्ञायते—कियन्तमसौ कालमादेशो न भवतीति।

समाधानभाष्यम्- यः पुनराह—द्विर्वचने कर्तव्य इति। कृते तस्य द्विर्वचने अजादेशो भविष्यति।

पञ्चमपक्षाभ्युपगमभाष्यम्- एवं तर्हि—उभयमनेन क्रियते—प्रत्ययश्च विशेष्यते, द्विर्वचनं च।

आक्षेपभाष्यम्- कथं पुनरेकेन यत्नेनोभयं लभ्यम्?

समाधानभाष्यम्- लभ्यमित्याह। कथम्? एकशेषनिर्देशात्। एकशेषनिर्देशोऽयम्—द्विर्वचनं च द्विर्वचनञ्च द्विर्वचनम्। द्विर्वचने कर्तव्ये द्विर्वचनेऽचि प्रत्यय इति।

(371. पञ्चमपक्षे दूषणवार्तिकम्-7)

*** द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् ***

भाष्यम्- द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्भावो वक्तव्यः। अवनुनावयिषति, अवचुक्षावयिषति।

समाधानभाष्यम्- न वक्तव्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(372. **समाधानसाधकवार्तिकम्-8)**

* ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य *

भाष्यम्- 'ओः पुयण्ज्यपरे' इत्याह, तज् ज्ञापयत्याचार्यः—भवति णौ स्थानिवत् इति।

आक्षेपभाष्यम्- यद्यत् ज्ञाप्यते 'अचिकीर्तत्' अत्रापि प्राप्नोतिं।

समाधानभाष्यम्- तुल्यजातीयस्य ज्ञापकम् ।

आक्षेपभाष्यम्- कश्च तुल्यजातीयः?

समाधानभाष्यम्- यथाजातीयकाः पुयण्जयः।

आक्षेपभाष्यम्- कथंजातीयकाश्चैते?

समाधानभाष्यम्- अवर्णपराः।

आक्षेपभाष्यम्- कथं जग्ले मम्ले?

समाधानभाष्यम्- अनैमित्तिकमात्वम्, शिति तु प्रतिषेधः।

सूत्रप्रयोजननिरूपणम्

आक्षेपभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि?

समाधानभाष्यम्- पपतुः, पपुः। तस्थतुस्तस्थुः। जग्मतुर्जग्मुः। आटिटत्, आशिशत्। चक्रतुश्चक्रुरिति। आल्लोपोपधालोपणिलोपयणादेशेषु कृतेष्वनच्कत्वाद् द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद्भवति।

समाधानबाधकभाष्यम्- नैतानि सन्ति प्रयोजनानि। पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि। कथम्? वक्ष्यति ह्याचार्यः—'द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनो-रुत्वेभ्यः' इति।

समाधानसाधकभाष्यम्- स पूर्वविप्रतिषेधो न पठितव्यो भवति।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- स्थानिवद्भाव एव ज्यायान्। पूर्वविप्रतिषेधे हि सतीदं वक्तव्यं स्यात्—'औदोदादेशस्य उद्भवति चुटुतुशरादेरभ्यासस्य' इति।

उत्ववादिन आक्षेपभाष्यम्- ननु च त्वयापि इत्वं वक्तव्यम्।

इत्ववादिनो लाघवभाष्यम्- परार्थं मम भविष्यति—'सन्यतः' इद्भवतीति।

उत्ववादिनो गौरवपरिहारभाष्यम्- ममापि तर्ह्युत्वं परार्थं भविष्यति—'उत्परस्यातः, ति च' इति।

इत्ववादिभाष्यम्- इत्वमपि त्वया वक्तव्यम्। यत्समानाश्रयं तदर्थम्—उत्पिपविषते, संयियविषतीत्येवमर्थम्। तस्मात्स्थानिवदित्येष एव पक्षो ज्यायान्। द्विर्वचनेऽचि।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये

प्रथमस्याध्यायस्य प्रथमे पादे अष्टममाह्निकम्

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमेऽध्याये प्रथमे पादे नवममाह्निकम्

(55. लोपसञ्ज्ञासूत्रम् 1.1.9 आ. 1)

अदर्शनं लोपः 1.1.60

अनिष्टापत्तिनिराकरणम्

आक्षेपभाष्यम्- अर्थस्य सञ्ज्ञा कर्तव्या। शब्दस्य मा भूदिति। इतरेतराश्रयं च भवति। का इतरेतराश्रयता? सतोऽदर्शनस्य संज्ञया भवितव्यम्, संज्ञया चादर्शनं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते।

(समाधाने भाष्यवार्तिकम्)

*** लोपसञ्ज्ञायामर्थसतोरुक्तम् ***

समाधानभाष्यम्- किमुक्तम्? अर्थस्य तावदुक्तम्—'इतिकरणोऽर्थनिर्देशार्थः' इति। सतोऽप्युक्तम्—'सिद्धं तु नित्यशब्दत्वात्' इति। नित्याः शब्दाः। नित्येषु शब्देषु सतोऽदर्शनस्य सञ्ज्ञा क्रियते, न संज्ञयाऽदर्शनं भाव्यते।

(373. आक्षेपवार्तिकम्-1)

*** सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात् ***

भाष्यम्- सर्वप्रसङ्गस्तु भवति। सर्वस्यादर्शनस्य लोपसञ्ज्ञा प्राप्नोति। किं कारणम्? सर्वस्यान्यत्रादृष्टत्वात्। सर्वो हि शब्दो यो यस्य प्रयोगविषयः, स ततोऽन्यत्र न दृश्यते। त्रपु-जपु इत्यत्राणोऽदर्शनम्। तत्र 'अदर्शनं लोपः' इति लोपसञ्ज्ञा प्राप्नोति।

भाष्यम्- तत्र को दोषः।

(304. आक्षेपवार्तिकम्-2)

*** तत्र प्रत्ययलक्षणप्रतिषेधः ***

भाष्यम्- तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति।

आक्षेपबाधकभाष्यम्- नैष दोषः। ञ्णित्यङ्गस्याचो वृद्धिरुच्यते। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति। यस्माच्चात्र प्रत्ययविधिः, न तत्प्रत्यये परतः। यच्च प्रत्यये परतः, न तस्मात्प्रत्ययविधिः।

आक्षेपसाधकभाष्यम्- क्विपस्तर्ह्यदर्शनम्। तत्र 'अदर्शनं लोपः' इति लोपसञ्ज्ञा प्राप्नोति। तत्र को दोषः? तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। 'ह्रस्वस्य पिति कृति तुग्' इति तुक् प्राप्नोति।

(375. समाधानवार्तिकम्-3)

*** सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात् ***

भाष्यम्- सिद्धमेतत्। कथम्? प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते, ग्रामणीः सेनानीः— अत्र वृद्धिः प्राप्नोति।

समाधानभाष्यम्- प्रसक्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य।

प्रसक्तादर्शनवादिन आक्षेपभाष्यम्- यदि षष्ठीनिर्दिष्टस्येत्युच्यते 'चाहलोप एवेत्यवधारणम्' 'चादिलोपे विभाषा' अत्र लोपसञ्ज्ञा न प्राप्नोति।

षष्ठीनिर्दिष्टवादिन आक्षेपभाष्यम्- अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत् सिद्ध्यति?

प्रसक्तादर्शनवादिनः समाधानभाष्यम्- को हि शब्दस्य प्रसङ्गः? यत्र गम्यते चार्थः, न च प्रयुज्यते।

उपसंहारभाष्यम्- अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव।

आक्षेपस्मारणभाष्यम्- कथं ग्रामणीः-सेनानीः?

समाधानभाष्यम्- योत्राऽणः प्रसङ्गः क्विपाऽसौ बाध्यते। अदर्शनं लोपः।

(56. लुक्श्लुलुप्सञ्ज्ञासूत्रम् 1.1.9 आ. 2)

प्रत्ययस्य लुक्श्लुलुपः 1.1.61

प्रत्ययपदप्रयोजनम्

आक्षेपभाष्यम्- प्रत्ययग्रहणं किमर्थम्?

(समाधाने भाष्यवार्तिकम्)

* लुमति प्रत्ययग्रहणमप्रत्ययसञ्ज्ञाप्रतिषेधार्थम् *

भाष्यम्- लुमति प्रत्ययग्रहणं क्रियते। अप्रत्ययस्यैताः सञ्ज्ञा मा भूवन्निति। किं प्रयोजनम्।

(प्रयोजने भाष्यवार्तिकम्)

* प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् *

भाष्यम्- तद्धितलुकि गोनिवृत्त्यर्थम्। कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थम्। 'लुक्तद्धितलुकि' इति गोरपि लुक् प्राप्नोति, प्रत्ययग्रहणान्न भवति। 'कंसीयपरशव्ययोर्यञञौ लुक् च'' इति प्रकृतेरपि लुक् प्राप्नोति। प्रत्ययग्रहणान्न भवति।

प्रत्याख्यानभाष्यम्- गोनिवृत्त्यर्थेन तावन्नार्थः।

(प्रत्याख्यानसाधकं भाष्यवार्तिकम्)

* योगविभागात् सिद्धम् *

भाष्यम्- योगविभागः करिष्यते—'गोरुपसर्जनस्य' गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततः 'स्त्रियाः' स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततो 'लुक्तद्धितलुकि' इति। स्त्रिया इति वर्तते। गोरिति निवृत्तम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रत्याख्यानसाधकं भाष्यवार्तिकम्)

*** कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम् ***

भाष्यम्- कंसीयपरशव्ययोर्विशिष्टनिर्देशः कर्तव्यः। कंसीयपरशव्ययोर्यञञौ भवतश्छ-यतोश्च लुग्भवतीति।

विशिष्टनिर्देशावश्यकताभाष्यम्- स चावश्यं विशिष्टनिर्देशः कर्तव्यः। क्रियमाणेऽपि वै प्रत्ययग्रहणे उकारसशब्दयोर्मा भूदिति। 'कमेः सः' कंसः; परान् शृणातीति परशुरिति।

विशिष्टनिर्देशावश्यकताबाधकभाष्यम्- नैष दोषः। उणादयोऽव्युत्पन्नानि प्रातिपदि-कानि।

उपसंहारभाष्यम्- स एषोऽनन्यार्थो विशिष्टनिर्देशः कर्तव्यः, प्रत्ययग्रहणं वा कर्तव्यम्।

(प्रत्याख्याने भाष्यवार्तिकम्)

*** उक्तं वा ***

भाष्यम्- किमुक्तम्? 'ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसञ्ज्ञार्थं यच्छयोश्च लुगर्थम्' इति।

(376. प्रयोजनवार्तिकम्-1)

*** षष्ठीनिर्देशार्थं तु ***

भाष्यम्- षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। षष्ठीनिर्देशो यथा प्रकल्पेत।

(377. प्रयोजनसाधकं वार्तिकम्-2)

*** अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ***

भाष्यम्- अक्रियमाणे हि प्रत्ययग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात्। कस्य? स्थानेयोग-त्वस्य।

प्रत्याख्यानसाधकमाक्षेपभाष्यम्- क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रहणेन। यावता सर्वत्रैव षष्ठ्युच्चार्यते—अणिञोः, तद्राजस्य, यञञोः, शप इति।

समाधानभाष्यम्- इह न काचित् षष्ठी—'जनपदे लुप्' इति।

समाधानबाधकभाष्यम्- अत्रापि प्रकृतं प्रत्ययग्रहणमनुवर्तते। क्व प्रकृतम्? 'प्रत्ययः, परश्च' इति।

समाधानसाधकभाष्यम्- तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः।

समाधानबाधकभाष्यम्- 'ङ्याप्प्रातिपदिकात्' इत्येषा पञ्चमी प्रत्यय इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति।

समाधानसाधकभाष्यम्- प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्- नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते।

(378. **प्रयोजनवार्तिकम्**-3)

* सर्वादेशार्थं वा वचनप्रामाण्यात् *

भाष्यम्- सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। लुक्श्लुलुपः सर्वादेशा यथा स्युः। अथ क्रियमाणेऽपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशा लभ्याः? वचनप्रामाण्यात्। प्रत्ययग्रहणसामर्थ्यात्।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—लुक्श्लुलुपः सर्वादेशा भवन्तीति। यदयं—'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति लोपे प्रकृते लुकं शास्ति।

(379. **प्रयोजनवार्तिकम्**-4)

* उत्तरार्थं तु *

भाष्यम्- उत्तरार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्।

प्रयोजनबाधकभाष्यम्- क्रियते तत्रैव—'प्रत्ययलोपे प्रत्ययलक्षणम्' इति।

प्रयोजनसाधकभाष्यम्- द्वितीयं कर्तव्यम्। कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्, एकदेशलोपे मा भूदिति 'आघ्नीत' 'संरायस्पोषेण ग्मीय' इति। प्रत्ययस्य०।

(57. **प्रत्ययलक्षणातिदेशसूत्रम्** 1.1.9 आ. 3)

प्रत्ययलोपे प्रत्ययलक्षणम् 1.1.62

प्रथमप्रत्ययग्रहणप्रयोजनम्

आक्षेपभाष्यम्- प्रत्ययग्रहणं किमर्थम्?

समाधानभाष्यम्- 'लोपे प्रत्ययलक्षणम्' इतीयत्युच्यमाने सौरथी वैहतीति गुरूपोत्तम-लक्षणः ष्यङ् प्रसज्येत।

समाधाननिराकरणभाष्यम्- नैष दोषः। नैवं विज्ञायते—लोपे प्रत्ययलक्षणं भवति= प्रत्ययस्य प्रादुर्भाव इति। कथं तर्हि? प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवति इति।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्। सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणं यथा स्यात्। लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणं मा भूदिति। किं प्रयोजनम्? ग्रामणिकुलं सेनानिकुलमित्यत्रौत्तरपदिके ह्रस्वत्वे कृते 'ह्रस्वस्य पिति कृति तुक्' इति तुक् प्राप्नोति, स मा भूदिति।

प्रयोजननिराकरणभाष्यम्- यदि तर्हि यत्सति प्रत्यये प्राप्नोति, तत्प्रत्ययलक्षणेन भवति। लोपोत्तरकालं यत् प्राप्नोति, तन्न भवति। जगत्-जनगदित्यत्र तुग् न प्राप्नोति, लोपोत्तरकालं ह्यत्र तुगागमः। तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- कस्मान्न भवति—ग्रामणिकुलं, सेनानिकुलम्?

समाधानभाष्यम्- बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक्। 'असिद्धं बहिरङ्गमन्तरङ्गे'।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यादेकदेशलोपे मा भूदिति। 'आघ्नीत' 'सं रायस्पोषेण ग्मीय' इति।

आक्षेपभाष्यम्- पूर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तम्।

समाधानभाष्यम्- अन्यतरच्छक्यमकर्तुम्।

द्वितीयप्रत्ययग्रहणप्रयोजनम्

आक्षेपभाष्यम्- अथ द्वितीयं प्रत्ययग्रहणं किमर्थम्?

समाधानभाष्यम्- प्रत्ययलक्षणं यथा स्यात्, वर्णलक्षणं मा भूदिति। गवे हितं गोहितम्। रायः कुलं रैकुलमिति।

सूत्रप्रणयने युक्तिप्रदर्शनम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(380. समाधानवार्तिकम्-1)

*** प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य ***

भाष्यम्- 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्युच्यते। सदन्वाख्यानाच्छास्त्रस्य। सच्छास्त्रेणान्वाख्यायते सतो वा शास्त्रमन्वाख्यायकं भवति। सदन्वाख्यानाच्छास्त्रस्य 'उगिदचां सर्वनामस्थानेऽधातोः' इतीहैव स्यात्—गोमन्तौ-यवमन्तौ। गोमान्-यवमानित्यत्र न स्यात्। इष्यते च स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्यतः प्रत्ययलोपे प्रत्ययलक्षणवचनम्। एवमर्थमिदमुच्यते।

आक्षेपभाष्यम्- अस्ति प्रयोजनमेतत्।

समाधानभाष्यम्- किं तर्हीति?

लुकि प्रत्ययलक्षणसाधनम्

(381. आक्षेपवार्तिकम्-1)

*** लुक्युपसंख्यानम् ***

भाष्यम्- लुक्युपसंख्यानं कर्तव्यम्। पञ्च, सप्त।

प्रत्याक्षेपभाष्यम्- किं पुनः कारणं न सिध्यति?

(382. आक्षेपसाधकवार्तिकम्-2)

*** लोपे हि विधानम् ***

भाष्यम्- लोपे हि प्रत्ययलक्षणं विधीयते। तेन लुकि न प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(383. समाधानवार्तिकम्- 3)

*** न वाऽदर्शनस्य लोपसंज्ञित्वात् ***

भाष्यम्- न वा कर्तव्यम्। किं कारणम्? अदर्शनस्य लोपसंज्ञित्वात्। अदर्शनं लोपसंज्ञं भवतीत्युच्यते। लुमत्सञ्ज्ञाश्चाप्यदर्शनस्य क्रियन्ते। तेन लुक्यपि भविष्यति।

साङ्कर्यपरिहारः

सङ्गतिभाष्यम्- यद्येवम्—

(384. साङ्कर्याक्षेपवार्तिकम्- 1)

*** प्रत्ययादर्शनं तु लुमत्संज्ञम् ***

भाष्यम्- प्रत्ययादर्शनं तु लुमत्संज्ञमपि प्राप्नोति।

आक्षेपभाष्यम्- तत्र को दोषः?

(385. दोषदर्शनवार्तिकम्- 2)

*** तत्र लुकि श्लुविधिप्रतिषेधः ***

भाष्यम्- तत्र लुकि श्लुविधिरपि प्राप्नोति, स प्रतिषेध्यः। अस्ति-हन्ति 'श्लौ' इति द्विर्वचनं प्राप्नोति।

(386. साङ्कर्यवारणवार्तिकम्- 3)

*** न वा पृथक्सञ्ज्ञाकरणात् ***

भाष्यम्- न वा एष दोषः। किं कारणम्? पृथक्सञ्ज्ञाकरणात्। पृथक्सञ्ज्ञाकरणसामर्थ्याल्लुकि श्लुविधिर्न भविष्यति।

लोपसञ्ज्ञाया व्यापकत्वोपसंहारभाष्यम्- तस्माददर्शनसामान्याल्लोपसञ्ज्ञा लुमत्संज्ञा अवगाहते।

साङ्कर्यसाधकभाष्यम्- यथैव तर्हि अदर्शनसामान्याल्लोपसञ्ज्ञा लुमत्सञ्ज्ञा अवगाहते, एवं लुमत्सञ्ज्ञा अपि लोपसञ्ज्ञामवगाहेरन्। तत्र को दोषः? अगोमती गोमती सम्पन्ना गोमतीभूता 'लुक् तद्धितलुकि' इति ङीपो लुक् प्रसज्येत।

साङ्कर्यबाधकभाष्यम्- ननु चात्रापि 'न वा पृथक्सञ्ज्ञाकरणात्' इत्येव सिद्धम्।

आक्षेपभाष्यम्- यथैव तर्हि पृथक्सञ्ज्ञाकरणसामर्थ्यादत्र लुमत्सञ्ज्ञा लोपसञ्ज्ञां नावगाहन्ते, एवं लोपसञ्ज्ञापि लुमत्सञ्ज्ञां नावगाहेत। तत्र स एव दोषः—लुक्युपसंख्यानमिति।

समाधानभाष्यम्- अस्त्यन्यल्लोपसञ्ज्ञायाः पृथक्सञ्ज्ञाकरणे प्रयोजनम्। किम्? लुमत्सञ्ज्ञासु यदुच्यते तल्लोपमात्रे मा भूदिति।

(समाधानान्तरभाष्यवार्तिकम्)

*** लुमति प्रतिषेधाद्वा ***

भाष्यम्- अथवा यदयं—'न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधं शास्ति,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तज्ज्ञापय-त्याचार्यः—भवति लुकि प्रत्ययलक्षणमिति।

इष्टानुपपत्तिपरिहारः

(387. आक्षेपवार्तिकम्-1)

*** सतो निमित्ताभावात्पदसञ्ज्ञाऽभावः ***

भाष्यम्- सन् प्रत्ययो येषां कार्याणां न निमित्तं राज्ञः पुरुष इति, स लुप्तोऽप्यनिमित्तं स्यात्—राजपुरुष इति।

समाधानभाष्यम्- अस्तु तस्या अनिमित्तम्—या स्वादौ पदमिति पदसञ्ज्ञा। या तु 'सुबन्तं पदम्' इति पदसञ्ज्ञा सा भविष्यति।

आक्षेपसाधकभाष्यम्- सत्येतत् प्रत्यय आसीत्। अनया भविष्यत्यनया न भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसञ्ज्ञा तावत एव सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन यजादिपरतेति कृत्वा भसञ्ज्ञा प्राप्नोति।

(388. आक्षेपान्तरवार्तिकम्-2)

*** तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति ***

भाष्यम्- तुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते। क्व? परिवीरिति। किं कारणम्? एकयोगलक्षणत्वात्। एकयोगलक्षणे हि तुग्दीर्घत्वे। इह लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवपन्नानि। तान्येतेन प्रत्युत्थाप्यन्ते। अनेनैव तुक्, अनेनैव च दीर्घत्वमिति, तदेकयोगलक्षणं भवति। एकयोगलक्षणानि च न प्रकल्पन्ते।

(389. न्यासान्तरेण समाधानवार्तिकम्-3)

*** सिद्धं तु स्थानिसञ्ज्ञानुदेशादान्यभाव्यस्य ***

भाष्यम्- सिद्धमेतत्। कथम्? स्थानिसञ्ज्ञाऽन्यभूतस्य भवतीति वक्तव्यम्। किं कृतं भवति? सत्तामात्रमनेन क्रियते। यथाप्राप्ते तुग्दीर्घत्वे भविष्यतः।

आक्षेपभाष्यम्- तद्वक्तव्यं भवति।

न्यासान्तरसाधकसमाधानभाष्यम्- यद्यप्येतदुच्यते, अथवैतर्हि स्थानिवद्भावो नारभ्यते। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वक्ष्यामि।

आक्षेपभाष्यम्- यद्येवम् 'आङो यमहनः' आत्मनेपदं भवतीति हन्तेरेव स्यात्, वधेर्न स्यात्। न हि काचिद्धन्तेः सञ्ज्ञास्ति, या वधेरतिदिश्येत।

समाधानभाष्यम्- हन्तेरपि सञ्ज्ञास्ति। का? हन्तिरेव। कथम्? 'स्वं रूपं शब्दस्या-शब्दसञ्ज्ञा' इति वचनात्स्वं रूपं शब्दस्य सञ्ज्ञा भवतीति हन्तेरपि हन्तिः सञ्ज्ञा भविष्यति।

(390. न्यासान्तरप्रयोजनान्तरवार्तिकम्-4)

*** भसञ्ज्ञाङीष्फगोरात्वेषु च सिद्धम् ***

भाष्यम्- भसञ्ज्ञाङीष्फगोरात्वेषु च सिद्धं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणोपपादनभाष्यम्- भसंज्ञा—राज्ञः पुरुषः-राजपुरुषः। प्रत्ययलक्षणेन 'यचि भम्' इति भसंज्ञा प्राप्नोति, 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति।

ङीप्—चित्रायां जाता-चित्रा। प्रत्ययलक्षणेनाणन्ताति ईकारः प्राप्नोति। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति।

ष्फ—वतण्डी। प्रत्ययलक्षणेन 'यञन्तात्' इति ष्फः प्राप्नोति। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति।

गोरात्वम्—गामिच्छति गव्यति। प्रत्ययलक्षणेनामि 'औतोऽम्शसोः' इत्यात्वं प्राप्नोति। 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति।

(391. **न्यासान्तरदूषणवार्तिकम्**- 5)

* तस्य दोषो ङौनकारलोपेत्त्वेम्विधयः *

भाष्यम्- तस्यैतस्य लक्षणस्य दोषः।

उदाहरणोपपादनभाष्यम्- ङौ नकारलोपः—आर्द्रे चर्मन्; लोहिते चर्मन्। प्रत्ययलक्षणेन 'यचि भम्' इति भसञ्ज्ञा सिद्धा भवति। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति।

इत्त्वम्—आशीः। प्रत्ययलक्षणेन 'हलि' इतीत्त्वं सिद्धं भवति। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति।

इम्—अतृणेट्। प्रत्ययलक्षणेन हलीति इम् सिद्धो भवति। 'स्थानिसञ्ज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति।

तटस्थभाष्यम्- सूत्रं च भिद्यते।

सिद्धान्तिभाष्यम्- यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'सतो निमित्ताभावात्पदसञ्ज्ञाऽभावः, तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीः' इति।

प्रथमदूषणपरिहारभाष्यम्- नैष दोषः। वक्ष्यत्यत्र परिहारम्।

द्वितीयदूषणपरिहारभाष्यम्- इहापि परिवीरिति। शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति।

सूत्रप्रयोजनम्

आक्षेपभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि?

(392. **यथान्याससूत्रे प्रयोजनवार्तिकम्**- 1)

* प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धी दीर्घत्वेमडाट्श्नम्विधयः *

भाष्यम्- अपृक्तलोपे शिलोपे च कृते नुम्-अमामौ-गुणवृद्धी-दीर्घत्वमिम्-अडाटौ श्नम्विधिरिति प्रयोजनानि।

उदाहरणोपपादनभाष्यम्- नुम्—अग्ने त्री ते वाजिना त्री षधस्था। ता ता पिण्डानाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमामौ—हे अनड्वन्, अनड्वान्।

गुणः—अधोक् अलेट्।

वृद्धिः—न्यमार्ट्।

दीर्घत्वम्—अग्ने त्री ते वाजिना त्री षधस्था, ता ता पिण्डानाम्।

इम्—अतृणेट्।

अडाटौ—अधोक्, अलेट्, ऐयः, औनः।

श्नम्विधिः—अभिनोऽत्र। अच्छिनोऽत्र।

अपृक्तशिलोपयोः कृतयोरेते विधयो न प्राप्नुवन्ति। प्रत्ययलक्षणेन भवन्ति।

प्रत्याख्यानभाष्यम्- नैतानि सन्ति प्रयोजनानि। स्थानिवद्भावेनाप्येतानि सिद्धानि।

सूत्रावश्यकताभाष्यम्- न सिध्यन्ति। आदेशः स्थानिवदित्युच्यते। न च लोप आदेशः।

प्रत्याख्यानसाधकभाष्यम्- लोपोऽप्यादेशः। कथम्? आदिश्यते यः स आदेशः, लोपश्चाप्यादिश्यते।

लोपेऽप्यादेशत्वसाधकभाष्यम्- दोषः खल्वपि स्यात् यदि लोपो नादेशः स्यात्। इह 'अचः परस्मिन् पूर्वविधौ' इत्येतस्य योगस्य भूयिष्ठानि लोप उदाहरणानि तानि न स्युः।

सूत्रारम्भावश्यकताभाष्यम्- यत्र तर्हि स्थानिवद्भावो नास्ति, तदर्थमयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति? योऽल्विधिः।

आक्षेपभाष्यम्- किं प्रयोजनम्?

प्रयोजनभाष्यम्- प्रयोजनं ङौनकारलोपेत्त्वेम्विधयः।

सूत्रारम्भदूषणभाष्यम्- भसञ्ज्ञाङीष्फगोरात्वेषु च दोषो भवति।

सूत्रारम्भवादिभाष्यम्- भसञ्ज्ञायां तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—न प्रत्ययलक्षणेन भसञ्ज्ञा भवतीति। यदयम्—'न ङिसम्बुद्ध्योः' इति ङौ प्रतिषेधं शास्ति। ङीप्यपि, नैवं विज्ञायते—अणन्तादकारान्तादिति। कथं तर्हि? अण्योऽकार इति। ष्फेपि, नैवं विज्ञायते—यञन्तादकारान्तादिति। कथं तर्हि? यञ् योऽकार इति। गोरात्वेऽपि, नैवं विज्ञायते—अमि अचीति। कथं तर्हि? अच्यमीति।

प्रत्याख्यानभाष्यम्- प्रयोजनान्यपि तर्हि नैतानि सन्ति।

दूषणोद्धारभाष्यम्- यत्तावदुच्यते—ङौ नकारलोप इति। क्रियत एतन्न्यास एव—'न ङिसम्बुद्ध्योः' इति।

दूषणोद्धारभाष्यम्- इत्त्वमपि। वक्ष्यत्येतत्—'शास इत्त्वे आशासः क्वौ' इति। इम्विधिरपि। हलीति निवृत्तम्।

आक्षेपभाष्यम्- यदि हलीति निवृत्तं तृणहानि अत्रापि प्राप्नोति।

समाधानभाष्यम्- एवं तर्हि—'अचि न' इत्यनुवर्तिष्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटस्थाक्षेपभाष्यम्- न तर्हीदानीमयं योगो वक्तव्यः।

सिद्धान्तिसमाधानभाष्यम्- वक्तव्यश्च। किं प्रयोजनम्? प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात्। शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनम्? शोभना दृषदोऽस्य सुदृषद् ब्राह्मणः, 'सोर्मनसी अलोमोषसी' इत्येष स्वरो मा भूदिति। प्रत्ययलोपे प्रत्ययलक्षणम्।

(58. प्रत्ययलक्षणनिषेधसूत्रम् 1.1.9 आ. 4)

न लुमताङ्गस्य 1.1.63

न्यूनतापरिहारः

(393. आक्षेपवार्तिकम्-1)

* लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम् *

भाष्यम्- लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं कर्तव्यम्। एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं नेति वक्तव्यम्।

प्रत्याक्षेपभाष्यम्- किमविशेषेण?

प्रत्याक्षेपसमाधानभाष्यम्- नेत्याह।

(394. आक्षेपशेषवार्तिकम्-2)

* सर्वामन्त्रितसिज्लुक्स्वरवर्जम् *

भाष्यम्- सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा।

उदाहरणोपपादनभाष्यम्- सर्वस्वर—सर्वस्तोमः। 'सर्वस्य सुपि' इत्याद्युदात्तत्वं यथा स्यात्।

आमन्त्रितस्वर—सर्पिरागच्छ, सप्ताऽऽगच्छत। 'आमन्त्रितस्य च' इत्याद्युदात्तत्वं यथा स्यात्।

सिज्लुक्स्वर—मा हि दाताम्, मा हि धाताम्। 'आदिः सिचोऽन्यतरस्याम्' इत्येष स्वरो यथा स्यात्।

भाष्यम्- किं प्रयोजनम्?

(395. प्रयोजनवार्तिकम्-3)

* प्रयोजनं ञिनिकिल्लुकि स्वराः *

भाष्यम्- ञिनिकित्स्वरा लुकि प्रयोजयन्ति। गर्गाः-वत्साः-विदाः-उर्वाः-उष्ट्रग्रीवा वामरज्जुः। 'ञ्निति' इत्याद्युदात्तत्वं मा भूदिति। इह च अत्रयः। 'कितः' इत्यन्तोदात्तत्वं मा भूदिति।

(396. प्रयोजनान्तरवार्तिकम्-4)

* पथिमथोः सर्वनामस्थाने लुकि *

भाष्यम्- पथिमथोः सर्वनामस्थाने लुकि प्रयोजनम्। लुमता लुप्ते प्रत्ययलक्षणं न

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतीति वक्तव्यम्। पथिप्रियः, मथिप्रियः। 'पथिमथोः सर्वनामस्थाने' इत्येष स्वरो मा भूदिति।

(397. आक्षेपवार्तिकम्-5)

* अह्नो रविधौ *

भाष्यम्- अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। अहर्ददाति, अहर्भुङ्क्ते। 'रोऽसुपि' इति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति।

(398. आक्षेपवार्तिकम्-6)

* उत्तरपदत्वे चापदादिविधौ *

भाष्यम्- उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। परमवाचा, परमवाचे, परमगोदुहा, परमगोदुहे, परमश्वलिहा, परमश्वलिहे। पदस्येति प्रत्ययलक्षणेन कुत्वादीनि मा भूवन्निति। अपदादिविधाविति किमर्थम्? दधिसेचौ, दधिसेचः। 'सात्पदाद्योः' इति प्रतिषेधो यथा स्यात्।

आक्षेपभाष्यम्- यद्यपदादिविधावित्युच्यते, उत्तरपदाधिकारो न प्रकल्प्येत। तत्र को दोषः? 'कर्णो वर्णलक्षणात्' इत्येवमादिविधिर्न सिध्यति।

आक्षेपबाधकन्यासान्तरभाष्यम्- यदि पुनः 'नलोपादिविधौ प्लुत्यन्ते' लुमता लुप्ते प्रत्ययलक्षणं न भवतीत्युच्येत।

न्यासान्तरनिराकरणभाष्यम्- नैवं शक्यम्। इह हि राजकुमार्यौ-राजकुमार्य इति शाकलं प्रसज्येत।

न्यासान्तरसाधकभाष्यम्- नैष दोषः। यदेतत्—'सिति शाकलं न' इति। एतत्—'प्रत्यये शाकलं न' इति वक्ष्यामि।

आक्षेपभाष्यम्- यदि 'प्रत्यये शाकलं न' इत्युच्यते, 'दधि अधुना, मधु अधुना' अत्राऽपि न प्रसज्येत।

निराकरणभाष्यम्- प्रत्यये शाकलं न भवति। कतरस्मिन्? यस्माद्यः प्रत्ययो विहित इति।

आक्षेपंभाष्यम्- इह तर्हि परमदिवा, परमदिवे। 'दिव उत्' इत्युत्त्वं प्राप्नोति।

विशेषानभ्युपगमभाष्यम्- अस्तु तर्ह्यविशेषेण।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—उत्तरपदाधिकारो न प्रकल्पेतेति।

परिहारभाष्यम्- वचनादुत्तरपदाधिकारो भविष्यति।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- न वक्तव्यम्। अनुवृत्तिः करिष्यते। इदमस्ति 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्', 'सुप्तिङन्तं पदम्', यस्मात्सुप्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च। 'नः क्ये' नान्तं क्ये पदसंज्ञं भवति, यस्मात् क्यविधिस्तदादि सुबन्तं च। 'सिति च' सिति पूर्वं पदसंज्ञं भवति, यस्मात्सिद्विधिस्तदादि सुबन्तं च। 'स्वादिष्वसर्वनामस्थाने',

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वादिष्व-सर्वनामस्थाने पूर्वं पदसंज्ञं भवति, यस्मात्स्वादिविधिस्तदादि सुबन्तं च। 'यचि भम्' यजादिप्रत्यये पूर्वं भं भवति, यस्माद्यजादिविधिस्तदादि सुबन्तं च।

आक्षेपभाष्यम्- इह तर्हि परमवाक्। 'असर्वनामस्थाने' इति प्रतिषेधः प्राप्नोति।

समाधानभाष्यम्- अस्तु तस्याः प्रतिषेधः—या स्वादौ पदमिति पदसञ्ज्ञा। या तु सुबन्तं पदमिति पदसञ्ज्ञा सा भविष्यति।

आक्षेपभाष्यम्- सत्येतत्प्रत्यय आसीत्—अनया भविष्यत्यनया न भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसञ्ज्ञा, तावत एवावधेः सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन सर्वनामस्थानपरतेति कृत्वा 'प्रतिषेधाश्च बलीयांसो भवन्ति' इति प्रतिषेधः प्राप्नोति।

(समाधाने भाष्यवार्तिकम्)

* नाप्रतिषेधात् *

भाष्यम्- नायं प्रसज्यप्रतिषेधः—सर्वनामस्थाने नेति। किं तर्हि? पर्युदासोऽयम्—यदन्यत्सर्वनामस्थानादिति। सर्वनामस्थांने अव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति।

(समाधाने भाष्यवार्तिकम्)

* अप्राप्तेर्वा *

भाष्यम्- अथवा—अनन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति।

आक्षेपभाष्यम्- ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते।

समाधानभाष्यम्- नोत्सहते प्रतिषिद्धा सती बाधितुम्।

आक्षेपभाष्यम्- यद्येवं परमवाचौ-परमवाच इति 'सुप्तिङन्तं पदम्' इति पदसञ्ज्ञा प्राप्नोति।

समाधानभाष्यम्- एवं तर्हि योगविभागः करिष्यते—'स्वादिषु' पूर्वं पदसंज्ञं भवति। ततः—'सर्वनामस्थाने अयचि' पूर्वं पदसंज्ञं भवति। ततो—'भम्'। भसंज्ञं भवति यजादावसर्वनामस्थान इति।

आक्षेपभाष्यम्- यदि तर्हि—सावपि पदं भवति, एचः प्लुतविकारे पदान्तग्रहणं चोदयिष्यति, इह मा भूत्—भद्रं करोषि गौरिति। तस्मिन् क्रियमाणेऽपि प्राप्नोति।

समाधानभाष्यम्- वाक्यपदयोरन्त्यस्येत्येवं तत्।

आक्षेपभाष्यम्- इह तर्हि—दधिसेचौ-दधिसेचः इति 'सात्पदाद्योः' इति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति।

समाधानभाष्यम्- मा भूदेवम्—पदस्यादिः पदादिः, पदादेर्नेति। कथं तर्हि? पदादादिः पदादिः, पदादेर्नेत्येवं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- नैवं शक्यम्। इहापि प्रसज्येत—ऋक्षु-वाक्षु-त्वक्षु-कुमारीषु किशोरीष्विति।

समाधानभाष्यम्- सात्प्रतिषेधो ज्ञापकः—स्वादिषु पदत्वेन येषां पदसञ्ज्ञा, न तेभ्यः प्रतिषेधो भवतीति।

आक्षेपभाष्यम्- इह तर्हि—'बहुसेचौ, बहुसेचः' बहुजयं प्रत्ययः। अत्र पदादादिः पदादिः, पदादेर्नेत्युच्यमानेऽपि न सिध्यति।

वार्तिकन्यासान्तरेण समाधानभाष्यम्- एवं तर्हि—

*** उत्तरपदत्वे च पदादिविधौ ***

भाष्यम्- लुमता लुप्ते 'प्रत्ययलक्षणं भवति' इति वक्ष्यामि। तन्नियमार्थं भविष्यति—पदादिविधावेव, न पदान्तविधाविति।

आक्षेपभाष्यम्- कथं बहुसेचौ-बहुसेचः इति?

(399. समाधानवार्तिकम्-8)

*** बहुच्पूर्वस्य च ***

भाष्यम्- बहुच्पूर्वस्य च पदादिविधावेव, न पदान्तविधाविति।

(400. आक्षेपवार्तिकम्-9)

*** द्वन्द्वेऽन्त्यस्य ***

भाष्यम्- द्वन्द्वेऽन्त्यस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। वाक् च स्रक् च त्वक् च वाक्स्रक्त्वम्।

आक्षेपभाष्यम्- इह अभूवन्निति प्रत्ययलक्षणेन जुस्भावः प्राप्नोति।

(401. समाधानवार्तिकम्-10)

*** सिचि जुसोऽप्रसङ्ग आकारप्रकरणात् ***

भाष्यम्- सिचि सिज्निमित्तस्य जुसोऽप्रसङ्गः। किं कारणम्? 'आकारप्रकरणात्'। 'आतः' इत्येतन्नियमार्थं भविष्यति—आत एव च सिज्लुगन्तात्, नान्यस्मात्सिज्लुगन्तादिति।

आक्षेपभाष्यम्- इह—इति युष्मत्पुत्रो ददाति, इत्यस्मत्पुत्रो ददातीत्यत्र प्रत्ययलक्षणेन 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ' इति वान्नावादयः प्राप्नुवन्ति।

(समाधाने भाष्यवार्तिकम्)

*** युष्मदस्मदोः स्थग्रहणात् ***

भाष्यम्- स्थग्रहणं तत्र क्रियते, तच्छ्रूयमाणविभक्तिविशेषणं विज्ञास्यते।

समाधानबाधकभाष्यम्- अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम्। किम्? सविभक्तिकस्य वान्नावादयो यथा स्युरिति।

समाधानसाधकभाष्यम्- नैतदस्ति प्रयोजनम्। पदस्येति वर्तते। विभक्त्यन्तं च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदम्। तत्राऽन्तरेणापि स्थग्रहणं सविभक्तिकस्यैव भविष्यति।

समाधानबाधकभाष्यम्- भवेत्सिद्धम्—यत्र विभक्त्यन्तं पदम्। यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति—ग्रामो वां दीयते; जनपदो वां दीयते, ग्रामो नौ दीयते, जनपदो नौ दीयते।

समाधानसाधकभाष्यम्- सर्वग्रहणमपि प्रकृतमनुवर्तते। तेन सविभक्तिकस्यैव भविष्यति।

आक्षेपभाष्यम्- इह—चक्षुष्कामं याजयांचकारेति 'तिङ्ङतिङ' इति, तस्य च निघातः, तस्माच्चानिघातः प्राप्नोति।

(402. **समाधानवार्तिकम्**-11)

* आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः *

भाष्यम्- आमि लिलोपात्तस्य चानिघातः, तस्माच्च निघातः सिद्धो भविष्यति।

अङ्गशब्दवाच्यार्थनिरूपणम्

(403. **आक्षेपवार्तिकम्**-1)

* अङ्गाधिकार इटो विधिप्रतिषेधौ *

भाष्यम्- अङ्गाधिकारे इटो विधिप्रतिषेधौ न सिध्यतः। जिगमिष, संविवृत्स। अङ्गस्येतीटो विधिप्रतिषेधौ न प्राप्नोति।

(आक्षेपे भाष्यवार्तिकम्)

* क्रमेर्दीर्घत्वं च *

प्रश्नभाष्यम्- किं च?

एकदेशिसमाधानभाष्यम्- इटश्च विधिप्रतिषेधौ।

सिद्धान्तिभाष्यम्- नेत्याह। अदेशेऽयं चः पठितः। क्रमेश्च दीर्घत्वम्। उत्क्रामसंक्रामेति।

अङ्गाधिकारपरत्वदूषणोपसंहारभाष्यम्- इह किञ्चिदङ्गाधिकारे लुमता लुप्ते प्रत्ययलक्षणे भवति, किञ्चिच्चान्यत्र न भवति।

न्यासान्तरेण दूषणोद्धारः

न्यासान्तरसाधकभाष्यम्- यदि पुनः—'न लुमता तस्मिन्' इत्युच्येत।

आक्षेपभाष्यम्- अथ 'न लुमता तस्मिन्' इत्युच्यमाने किं सिद्धमेतद्भवति—इटो विधिप्रतिषेधौ क्रमेर्दीर्घत्वं च।

समाधानभाष्यम्- बाढं सिद्धम्। न इटो विधिप्रतिषेधौ परस्मैपदेष्वित्युच्यते। कथं तर्हि? सकारादाविति। तद्विशेषणं परस्मैपदग्रहणम्। न खल्वपि क्रमेर्दीर्घत्वं परस्मैपदेष्वित्युच्यते। कथं तर्हि? शितीति। तद्विशेषणं परस्मैपदग्रहणम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(404. आक्षेपवार्तिकम्-2)

* न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे *

भाष्यम्- न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे न सिध्यन्ति। अवधि भवता दस्युः। अगायि भवता ग्रामः। अध्यगायि भवताऽनुवाकः। तलोपे कृते लुङीति हनिणिङादेशा न प्राप्नुवन्ति।

समाधानभाष्यम्- नैष दोषः। न लुङीति हनिणिङादेशा उच्यन्ते। किं तर्हि? आर्धधातुक इति। तद्विशेषणं लुङ्ग्रहणम्।

आक्षेपभाष्यम्- इह च—सर्वस्तोमः, सर्वपृष्ठः, 'सर्वस्य सुपि' इत्याद्युदात्तत्वं न प्राप्नोति।

एकदेशिसमाधानभाष्यम्- तच्चापि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्- न वक्तव्यम्। 'न लुमताङ्गस्य' इत्येव सिद्धम्। कथम्? न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते। किं तर्हि? योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति।

आक्षेपभाष्यम्- एवमपि—सर्वस्वरो न सिध्यति।

समाधानभाष्यम्- कर्तव्योऽत्र यत्नः। न लुमताङ्गस्य।

(59. उपधासञ्ज्ञासूत्रम् 1.1.9 आ. 5)

अलोऽन्त्यात्पूर्व उपधा 1.1.65

अल इत्यस्य पञ्चम्यन्तत्वनिर्णयः

आक्षेपभाष्यम्- किमिदमल्ग्रहणमन्त्यविशेषणम्?

इष्टापत्तिभाष्यम्- एवं भवितुमर्हति।

(405. आक्षेपवार्तिकम्-1)

* उपधासञ्ज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्सङ्घातप्रतिषेधः *

भाष्यम्- उपधासञ्ज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्सङ्घातस्य प्रतिषेधो वक्तव्यः। सङ्घातस्यो-पधासञ्ज्ञा प्राप्नोति। तत्र को दोषः? 'शास इदङ्हलोः' शिष्टः, शिष्टवान्। सङ्घातस्येत्त्वं प्राप्नोति।

प्रथमान्तपक्षाभ्युपगमभाष्यम्- यदि पुनरलन्त्यादित्युच्यते।

प्रथमान्तपक्षे दूषणभाष्यम्- एवमप्यन्त्योऽविशेषितो भवति। तत्र को दोषः? सङ्घातादपि पूर्वस्योपधासञ्ज्ञा प्रसज्येत। तत्र को दोषः? 'शास इदङ्हलोः' शिष्टः, शिष्टवान्। शकारस्येत्त्वं प्रसज्येत। सूत्रं च भिद्यते।

सिद्धान्तभाष्यम्- यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम् 'उपधासञ्ज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत् सङ्घातप्रतिषेधः' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिहारभाष्यम्- नैष दोषः।

(समाधाने भाष्यवार्तिकम्)

*** अन्त्यविज्ञानात्सिद्धम् ***

भाष्यम्- सिद्धमेतत्। कथम्? अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति।

परिभाषोपक्रमभाष्यम्- अन्त्यविज्ञानात् सिद्धमिति चेत्। तन्न। किं कारणम्। 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे'। अनर्थकेऽलोन्त्यविधिर्नेत्येषा परिभाषा कर्तव्या। किमविशेषेण? नेत्याह। अनभ्यासविकारे—अभ्यासविकारान् वर्जयित्वा। 'भृञामित्' 'अर्तिपिपर्त्योश्च' इति।

प्रयोजनजिज्ञासाभाष्यम्- कान्येतस्याः परिभाषायाः प्रयोजनानि?

(परिभाषाप्रयोजने भाष्यवार्तिकम्)

*** प्रयोजनमव्यक्तानुकरणस्यात इतौ ***

भाष्यम्- अन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्न भवतीति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—नान्त्यस्य पररूपं भवतीति। यदयम्—'नाम्रेडितस्यान्त्यस्य तु वा' इत्याह।

(406. प्रयोजनवार्तिकम्-2)

*** ध्वसोरेद्धावभ्यासलोपश्च***

भाष्यम्- ध्वसोरेद्धावभ्यासलोपश्चेत्यन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति।

निराकरणयुक्त्यन्तरैकदेशिभाष्यम्- अथवा—शिल्लोपः करिष्यते। स 'शित्सर्वस्य' इति सर्वादेशो भविष्यति।

आक्षेपभाष्यम्- स तर्हि शकारः कर्तव्यः।

समाधानभाष्यम्- न कर्तव्यः। क्रियते न्यास एव द्विशकारको निर्देशः='ध्वसोरेद्धावभ्यासलोपश्च' इति।

(प्रयोजने भाष्यवार्तिकम्)

*** आपि लोपोऽकोऽनचि ***

न्यासान्तरत्वशङ्कानिराकरणभाष्यम्- तिष्ठति सूत्रम्। अन्यथा व्याख्यायते।

वार्तिकव्याख्याभाष्यम्- आपि हलि लोप इत्यन्तस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। अन एव लोपं वक्ष्यामि।

गौरवाक्षेपभाष्यम्- तदनो ग्रहणं कर्तव्यम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौरवनिराकरणभाष्यम्- न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'अनाप्यक:' इति।

अनुवृत्तिबाधकभाष्यम्- तद्वै प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थ:।

अनुवृत्तिसाधकभाष्यम्- हलीत्येषा सप्तमी अन्निति प्रथमाया: षष्ठीं प्रकल्पयिष्यति—'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति।

(प्रयोजने भाष्यवार्तिकम्)

* अत्र लोपोऽभ्यासस्य *

भाष्यम्- अन्त्यस्य प्राप्नोति। 'नानर्थकेऽलोऽन्त्यविधि:' इति न दोषो भवति।

प्रयोजननिराकरणभाष्यम्- एतदपि नास्ति प्रयोजनम्। 'अत्र'ग्रहणसामर्थ्यात्सर्वस्य भविष्यति।

प्रयोजनसाधकभाष्यम्- अस्त्यन्यदत्रग्रहणस्य प्रयोजनम्। किम्? सन्नधिकारोऽपेक्ष्यते। इह मा भूत्—दधौ, ददौ।

प्रयोजनबाधकभाष्यम्- अन्तरेणाप्यत्रग्रहणं सन्नधिकारमपेक्षिष्यामहे।

प्रयोजनसाधकभाष्यम्- संस्तर्हि सकारादिरपेक्ष्यते—सनि सकारादाविति। इह मा भूत्—जिज्ञापयिषतीति।

प्रयोजनबाधकभाष्यम्- अन्तरेणाप्यत्रग्रहणं सनं सकारादिमपेक्षिष्यामहे।

प्रयोजनसाधकभाष्यम्- प्रकृतयस्तर्ह्यपेक्ष्यन्ते—एतासां प्रकृतीनां लोपो यथा स्यात्। इह मा भूत्—पिपक्षति, यियक्षति।

प्रयोजनबाधकभाष्यम्- अन्तरेणाप्यत्रग्रहणमेता: प्रकृतीरपेक्षिष्यामहे।

प्रयोजनसाधकभाष्यम्- विषयस्तर्ह्यपेक्ष्यते—'मुचोऽकर्मकस्य गुणो वा' इति। इह मा भूत्—मुमुक्षति गामिति।

प्रयोजनबाधकभाष्यम्- अन्तरेणाप्यत्रग्रहणमेतं विषयमपेक्षिष्यामहे। कथम्? अकर्मकस्येत्युच्यते, तेन यत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति। तस्मान्नार्थोऽनया परिभाषया—नानर्थकेऽलोऽन्त्यविधिरिति।

(न्यासान्तरे भाष्यवार्तिकम्)

* अलोऽन्त्यात् पूर्वोऽलुपधेति वा *

भाष्यम्- अथवा व्यक्तमेव पठितव्यम्—अलोऽन्त्यात्पूर्वोऽलुपधासञ्ज्ञो भवतीति।

आक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्?

परिहारभाष्यम्- न वक्तव्यम्?

(समाधाने भाष्यवार्तिकम्)

* अवचनाल्लोकविज्ञानात् सिद्धम् *

भाष्यम्- अन्तरेणापि वचनं लोकविज्ञानात् सिद्धमेतत्। तद्यथा लोके—अमीषां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणानामन्त्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोऽन्त्यस्तथाजातीयकोऽन्त्यात्पूर्व आनीयते। अलोन्त्यात्पूर्व उपधा।

(60-61. **परिभाषासूत्रे** 1.1.9 आ. 6-7)

तस्मिन्निति निर्दिष्टे पूर्वस्य 1.1.66

तस्मादित्युत्तरस्य 1.1.67

उदाहरणनिरूपणम्

आक्षेपभाष्यम्- किमुदाहरणम्?

समाधानभाष्यम्- इह तावत् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति। 'इको यणचि' दध्यत्र-मध्वत्र। इह 'तस्मादित्युत्तरस्य' इति। 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' द्वीपम्-अन्तरीपम्-समीपम्।

समाधानबाधकभाष्यम्- अन्यथाजातीयकेन शब्देन निर्देशः क्रियते, अन्यथाजातीयक उदाह्रियते।

प्रत्याक्षेपभाष्यम्- किं तर्ह्युदाहरणम्?

प्रत्याक्षेपसमाधानभाष्यम्- इह तावत् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति 'तस्मिन्नणि च युष्माकास्माकौ' इति'तस्मादित्युत्तरस्य' इति 'तस्माच्छसो नः पुंसि' इति।

सिद्धान्तिभाष्यम्- इदं चाप्युदाहरणम्—'इको यणचि',द्व्यन्तरुपसर्गेभ्योऽप ईत्' इति। कथम्? सर्वनाम्नायं निर्देशः क्रियते। सर्वनाम च सामान्यवाची। तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति।

आक्षेपभाष्यम्- किं पुनः सामान्यम्, को विशेषः?

समाधानभाष्यम्- गौः सामान्यम्। कृष्णो विशेषः।

आक्षेपभाष्यम्- न तर्हीदानीं कृष्णः सामान्यम्, गौर्विशेषो भवति?

समाधानभाष्यम्- भवति च।

आक्षेपभाष्यम्- यदि तर्हि सामन्यमपि विशेषः, विशेषोऽपि सामान्यम्, सामान्यविशेषौ न प्रकल्पेते।

समाधानभाष्यम्- प्रकल्पेते च। कथम्? विवक्षातः। यदाऽस्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन, तदा गौः सामान्यम्, कृष्णो विशेषः। यदाऽस्य कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन विवक्षितः, तदा कृष्णः सामान्यम्, गौर्विशेषः।

दृष्टान्तान्तरभाष्यम्- अपर आह—'प्रकल्पेते च'। कथम्? पितापुत्रवत्। तद्यथा—स एव कञ्चित्प्रति पिता भवति, कञ्चित्प्रति पुत्रो भवति। एवमिहापि स एव कञ्चित्प्रति सामान्यं कञ्चित्प्रति विशेषः। एते खल्वपि नैर्देशिकानां वार्ततरका भवन्ति, ये सर्वनाम्ना निर्देशाः क्रियन्ते। एतैर्हि बहुतरकं व्याप्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- अथ किमर्थमुपसर्गेण निर्देशः क्रियते?

समाधानभाष्यम्- शब्दे सप्तम्या निर्दिष्टे पूर्वस्य कार्यं यथा स्यात्। अर्थे मा भूत्—जनपदे अतिशायने इति।

आक्षेपभाष्यम्- किं गतमेतदुपसर्गेण, आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्।

समाधानभाष्यम्- गतमित्याह। कथम्? निरयं बहिर्भावे वर्तते। तद्यथा—निष्क्रान्तो देशाद् निर्देशः, बहिर्देश इति गम्यते। शब्दश्च शब्दाद्बहिर्भूतः। अर्थः अबहिर्भूतः।

आक्षेपभाष्यम्- अथ निर्दिष्टग्रहणं किमर्थम्?

(407. **समाधानवार्तिकम्**- 1)

* निर्दिष्टग्रहणमानन्तर्यार्थम् *

भाष्यम्- निर्दिष्टग्रहणं क्रियते। आन्तर्यमात्रे कार्यं यथा स्यात्—'इको यणचि', दध्यत्र, मध्वत्र। इह मा भूत्—समिधौ-समिधः, दृषदौ-दृषदः।

सूत्रस्य नियमार्थत्वम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(408. **समाधानवार्तिकम्**- 1)

* तस्मिँस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम् *

भाष्यम्- तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थोऽयमारम्भः। ग्रामे देवदत्तः, पूर्वः पर इति सन्देहः। ग्रामाद्देवदत्तः, पूर्वः पर इति सन्देहः। एवमिहापि—'इको यणचि', दध्युदकम्-पचत्योदनम्। उभाविकौ, उभावचौ। अचि पूर्वस्य-अचि परस्येति सन्देहः। 'तिङ्ङतिङः' इति। अतिङः पूर्वस्य, अतिङः परस्येति सन्देहः। इष्यते चात्राचि पूर्वस्य स्यात्, अतिङः परस्येति। तच्चान्तरेण वचनं न सिध्यतीति नियमार्थ वचनम्। एवमर्थमिदमुच्यते।

काकुभाष्यम्- अस्ति प्रयोजनमेतत्?

समाधानभाष्यम्- किं तर्हीति?

उभयनिर्दिशे पञ्चमीनिर्देशबलीयस्त्वबोधनम्

आक्षेपभाष्यम्- अथ यत्रोभयं निर्दिश्यते, किं तत्र पूर्वस्य कार्यं भवति। आहेस्वित् परस्येति?

(409. **समाधानवार्तिकम्**- 1)

* उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः *

भाष्यम्- उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशो भविष्यति। किं प्रयोजनम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रयोजने भाष्यवार्तिकम्)

*** प्रयोजनमतो लसार्वधातुकानुदात्तत्वे ***

भाष्यम्- वक्ष्यति—'तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिजर्थः' इति। तस्मिन् क्रियमाणे तास्यादिभ्यः परस्य लसार्वधातुकस्य, लसार्वधातुके परतस्तास्यादीनामिति सन्देहः। तास्यादिभ्यः परस्य लसार्वधातुकस्य।

(प्रयोजने भाष्यवार्तिकम्)

*** बहोरिष्ठादीनामादिलोपे ***

भाष्यम्- 'बहोरुत्तरेषामिष्ठेमेयसाम्' इष्ठेमेयःसु परतो बहोरिति सन्देहः। बहोरुत्तरेषामिष्ठेमेयसाम्।

(प्रयोजने भाष्यवार्तिकम्)

*** गोतो णित् ***

भाष्यम्- गोतः परस्य सर्वनामस्थानस्य, सर्वनामस्थाने परतो गोत इति सन्देहः। गोतः परस्य सर्वनामस्थानस्य।

(प्रयोजने भाष्यवार्तिकम्)

*** रुदादिभ्यः सार्वधातुके ***

भाष्यम्- रुदादिभ्यः परस्य सार्वधातुकस्य, सार्वधातुके परतो रुदादीनामिति सन्देहः। रुदादिभ्यः परस्य सार्वधातुकस्य।

(प्रयोजने भाष्यवार्तिकम्)

*** आने मुगीदासः ***

भाष्यम्- आस उत्तरस्यानस्य, आने परत आस इति सन्देहः। आस उत्तरस्यानस्य।

(प्रयोजने भाष्यवार्तिकम्)

*** आमि सर्वनाम्नः सुट् ***

भाष्यम्- सर्वनाम्न उत्तरस्यामः, आमि परतः सर्वनाम्न इति सन्देहः। सर्वनाम्न उत्तरस्यामः।

(प्रयोजने भाष्यवार्तिकम्)

*** घेर्ङित्याण् नद्याः ***

भाष्यम्- नद्या उत्तरेषां ङिताम्, ङित्सु परतो नद्या इति सन्देहः। नद्या उत्तरेषां ङिताम्।

(प्रयोजने भाष्यवार्तिकम्)

*** याडापः ***

भाष्यम्- आप उत्तर ङितः, ङिति परस्य आप इति सन्देहः। आप उत्तरस्य ङितः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रयोजने भाष्यवार्तिकम्)

*** ङमो ह्रस्वादचि ङमुण् नित्यम् ***

भाष्यम्- ङम उत्तरस्याऽचः, अचि परतो ङमः इति सन्देहः। ङम उत्तरस्याचः।

(410. समाधानहेत्वनुपपत्तिवार्तिकम्-2)

*** विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः ***

भाष्यम्- विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तोऽयं विप्रतिषेधः। सर्वत्रैवात्र कृत-सामर्थ्या सप्तमी-अकृतसामर्थ्या पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति।

(411. एकदेशिसमाधानवार्तिकम्-3)

*** यथार्थं वा षष्ठीनिर्देशः ***

भाष्यम्- यथार्थं वा षष्ठीनिर्देश कर्तव्यः। यत्र पूर्वस्य कार्यमिष्यते तत्र पूर्वस्य षष्ठी कर्तव्या। यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या।

आक्षेपभाष्यम्- स तर्हि तथा निर्देशः कर्तव्यः।

आक्षेपनिरासैकदेशिभाष्यम्- न कर्तव्यः। अनेनैव प्रक्लृप्तिर्भविष्यति—तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी, तस्मादित्युत्तरस्य षष्ठीति।

आक्षेपभाष्यम्- तत्तर्हि षष्ठीग्रहणं कर्तव्यम्।

समाधानभाष्यम्- न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'षष्ठी स्थानेयोगा' इति।

(412. प्रकल्पकपक्षे दूषणवार्तिकम्-4)

*** प्रकल्पकमिति चेन्नियमाभावः ***

भाष्यम्- प्रकल्पकमिति चेन्नियमस्याभावः। उक्तं चैतत्—नियमार्थोऽयमारम्भ इति।

दूषणान्तरभाष्यम्- प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः। तत्र को दोषः? 'गुप्तिज्किद्भ्यः सन्'। गुप्तिज्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्—'तस्मादित्युत्तरस्य' इति।

दूषणान्तरबाधकभाष्यम्- अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतः सनः सन्नेव भविष्यति।

दूषणान्तरसाधकभाष्यम्- नैवं शक्यम्। इत्सञ्ज्ञा न प्रकल्पेत। उपदेश इत्सञ्ज्ञोच्यते।

(413. प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्-5)

*** प्रकृतिविकाराव्यवस्था च ***

भाष्यम्- प्रकृतिविकारयोश्च व्यवस्था न प्रकल्पते। 'इको यणचि' अचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्—'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(414. प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्-6)

*** सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः ***

भाष्यम्- सप्तमीपञ्चम्योश्च भावादुभयत्रैव षष्ठी प्राप्नोति। 'तास्यादिभ्यः' एषा पञ्चमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्—'तस्मादित्युत्तरस्य' इति। तथा 'लसार्वधातुके' इत्येषा सप्तमी 'तास्यादिभ्यः' इति पञ्चम्याः षष्ठीं प्रकल्पयेत्—'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति। तत्र को दोषः? तत्रोभयकार्यप्रसङ्गः। तत्र उभयोः कार्यं प्राप्नोति।

प्रकल्पकपक्षे दूषणोद्धारभाष्यम्- नैष दोषः। यत्तावदुच्यते—'प्रकल्पकमिति चेन्नियमाभावः' इति। मा भून्नियमः। सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते, पञ्चमीनिर्दिष्टे परस्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते, पञ्चमीनिर्दिष्टे परस्य। नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं, नापि पञ्चमीनिर्दिष्टे पूर्वस्य।

आक्षेपबाधकभाष्यम्- यदप्युच्यते—'प्रत्ययविधौ पञ्चम्यः प्रकल्पिकाः स्युः' इति। सन्तु प्रकल्पिकाः।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—'गुप्तिज्किद्भ्यः सन्' इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्—'तस्मादित्युत्तरस्य' इति।

परिहारस्मारणभाष्यम्- परिहृतमेतत्—न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतः सनः सन्नेव भविष्यति इति।

परिहारबाधकस्मारणभाष्यम्- ननु चोक्तम्—'नैवं शक्यमित्संज्ञा न प्रकल्पेत। उपदेश इति इत्सञ्ज्ञोच्यते' इति।

परिहारबाधानुपपत्तिभाष्यम्- स्यादेष दोषो यदीत्सञ्ज्ञा आदेशं प्रतीक्षेत। तत्र खलु कृतायामित्सञ्ज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्सञ्ज्ञोच्यते।

परिहारान्तरभाष्यम्- अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्। यदा चोत्पन्नः सन्, तदा कृतसामर्थ्या पञ्चमीति कृत्वा प्रक्लृप्तिर्न भविष्यति।

आक्षेपान्तरबाधकभाष्यम्- यदप्युच्ते—'प्रकृतिविकाराव्यवस्था च' इति। तत्रापि कृता प्रकृतौ षष्ठी 'इकः' इति, विकृतौ प्रथमा 'यण्' इति। यत्र च नाम सौत्री षष्ठी नास्ति, तत्र प्रक्लृप्त्या भवितव्यम्।

भाष्यम्- अथवा—अस्तु तावदिको यणिति यत्र नाम सौत्री षष्ठी। यदि चेदानीमचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्—'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति। अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतो यणो यणेव भविष्यति।

आक्षेपान्तरबाधकभाष्यम्- यदप्युच्यते—'सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः' इति। आचार्यप्रवृत्तिर्ज्ञापयति—'नोभे युगपत्प्रकल्पिके भवतः' इति। यदयम् 'एकः पूर्वपरयोः' इति पूर्वपरग्रहणं करोति। तस्मिन्निति निर्दिष्टे पूर्वस्य। तस्मादित्युत्तरस्य।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(62. सञ्ज्ञासूत्रम् 1.1.9 आ. 8)

स्वं रूपं शब्दस्याशब्दसञ्ज्ञा 1.1.68

अर्थवत्परिभाषासाधनम्

आक्षेपभाष्यम्- रूपग्रहणं किमर्थम्। न 'स्वं शब्दस्याशब्दसञ्ज्ञा' भवतीत्येव रूपं शब्दस्य सञ्ज्ञा भविष्यति। न ह्यन्यत्स्वं शब्दस्यास्त्यन्यदतो रूपात्?

समाधानभाष्यम्- एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्य:—अस्त्यन्यद्रूपात्स्वं शब्दस्येति। किं पुनस्तत्? अर्थ:। किमेतस्य ज्ञापने प्रयोजनम्? 'अर्थवद् ग्रहणे नानर्थकस्य' इत्येषा परिभाषा न कर्तव्या भवति।

सूत्रप्रयोजनम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(415. समाधानवार्तिकम्-1)

*** शब्देनार्थगतेरर्थस्यासम्भवात्तद्वाचिन: सञ्ज्ञाप्रतिषेधार्थं स्वंरूपवचनम् ***

भाष्यम्- शब्देनोच्चारितेनार्थो गम्यते—गामानय दध्यशावेति। अर्थ आनीयते अर्थश्च भुज्यते। 'अर्थस्यासम्भवात्'। इह च व्याकरणे अर्थे कार्यस्यासम्भव:—'अग्नेर्ढग्' इति, न शक्यतेऽङ्गारेभ्य: परो ढक् कर्तुम्। शब्देनार्थगतेरर्थस्यासम्भवाद् यावन्तस्तद्वाचिन: शब्दास्तावद्भ्य: सर्वेभ्य उत्पत्ति: प्राप्नोति। इष्यते च—तस्मादेव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति तद्वाचिन: सञ्ज्ञाप्रतिषेधार्थं स्वंरूपवचनम्। एवमर्थमिदमुच्यते।

(416. समाधाननिराकरणवार्तिकम्-2)

*** न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्ति: ***

भाष्यम्- न वा एतत्प्रयोजनमस्ति। किं कारणम्? शब्दपूर्वको ह्यर्थे सम्प्रत्यय:। आतश्च शब्दपूर्वक:। योऽपि ह्यसावाहूयते नाम्ना। नाम च यदानेन नोपलब्धं भवति, तदा पृच्छति—'किं भवानाह' इति, शब्दपूर्वकश्चास्य सम्प्रत्यय:। इह च व्याकरणे शब्दे कार्यस्य सम्भव:, अर्थेऽसम्भव:। तस्मादर्थनिवृत्ति:। तस्मादर्थस्य निवृत्तिर्भविष्यति।

प्रयोजनभाष्यम्- इदं तर्हि प्रयोजनम्—अशब्दसंज्ञेति वक्ष्यामीति। इह मा भूत्—'दाधाघ्वदाप्' 'तरप्तमपौ घ:' इति।

(417. प्रयोजननिराकरणवार्तिकम्-3)

*** शब्दसञ्ज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् ***

भाष्यम्- शब्दसञ्ज्ञाया: प्रतिषेधोऽनर्थक:। शब्दसञ्ज्ञायां स्वरूपविधि: कस्मान्न भवति? वचनप्रामाण्यात्। शब्दसञ्ज्ञावचनसामर्थ्यात्।

प्रयोजनसाधकभाष्यम्- ननु च वचनप्रामाण्यात् संज्ञिनां सम्प्रत्यय: स्यात्, स्वरूपग्रहणाच्च संज्ञाया:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजनबाधकभाष्यम्- एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति— शब्दसञ्ज्ञायां न स्वरूपविधिर्भवतीति। यदयम्—'ष्णान्ता षड्' इति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति। इतरथा हि वचनप्रामाण्याच्च नकारान्तायाः संख्यायाः सम्प्रत्ययः स्यात्, स्वरूपग्रहणाच्च षकारान्तायाः।

प्रयोजनसाधकभाष्यम्- नैतदस्ति ज्ञापकम्। न हि षकारान्ता सञ्ज्ञा। का तर्हि? डकारान्ता।

प्रयोजनबाधकभाष्यम्- असिद्धं जश्त्वम्। तस्यासिद्धत्वात् षकारान्ता।

प्रयोजनभाष्यम्- मन्त्राद्यर्थं तर्हीदं वक्तव्यम्। मन्त्रे-ऋचि-यजुषीति यदुच्यते, तन्मन्त्रशब्दे ऋक्शब्दे यजुःशब्दे च मा भूत्।

(प्रयोजननिराकरणे भाष्यवार्तिकम्)

*** मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम् ***

भाष्यम्- मन्त्राद्यर्थमिति चेत्। तन्न। किं कारणम्? शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति। मन्त्रे ऋचि यजुषीति यदुच्यते, मन्त्रशब्दे ऋक्शब्दे यजुश्शब्दे च तस्य कार्यस्य सम्भवो नास्तीति कृत्वा मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्।

न्यूनतानिराकरणम्

(418. आक्षेपवार्तिकम्-1)

*** सित्तद्विशेषाणां वृक्षाद्यर्थम् ***

भाष्यम्- सिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्—'तद्विशेषाणां ग्रहणं भवति' इति। किं प्रयोजनम्? वृक्षाद्यर्थम्। 'विभाषा वृक्षमृग-' इति। प्लक्षन्यग्रोधं, प्लक्षन्यग्रोधाः।

(419. आक्षेपवार्तिकम्-2)

*** पित्पर्यायवचनस्य च स्वाद्यर्थम् ***

भाष्यम्- पिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्—पर्यायवचनस्य। तद्विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्येति। किं प्रयोजनम्? स्वाद्यर्थम्। 'स्वे पुषः'। स्वपोषं पुष्यति, रैपोषम्, धनपोषम्, विद्यापोषम्, अश्वपोषम्, गोपोषम्।

(420. आक्षेपवार्तिकम्-3)

*** जित्पर्यायवचनस्यैव राजाद्यर्थम् ***

भाष्यम्- जिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्—पर्यायवचनस्यैव ग्रहणं भवति। किं प्रयोजनम्? राजाद्यर्थम्। 'सभा राजामनुष्यपूर्वा' इनसभम् ईश्वरसभम्। तस्यैव न भवति— राजसभा। तद्विशेषाणां च न भवति—पुष्पमित्रसभा, चन्द्रगुप्तसभा।

(421. आक्षेपवार्तिकम्-4)

*** झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ***

भाष्यम्- झिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्—'तस्य च तद्विशेषाणां च' ग्रहणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति इति। किं प्रयोजनम्? मत्स्याद्यर्थम्। 'पक्षिमत्स्यमृगान् हन्ति' मात्स्यिकः। तद्विशेषाणाम्—शाफरिकः, शाकुलिकः। पर्यायवचनानां न भवति—अजिह्मान् हन्ति, अनिमिषान् हन्ति।

भाष्येष्टिः- 'अस्यैकस्य पर्यायवचनस्येष्यते'। मीनान् हन्ति मैनिकः। स्वं रूपं शब्दस्याशब्दसञ्ज्ञा।

(63. **ग्रहणकशास्त्रम्** 1.1.9 आ. 9)

अणुदित्सवर्णस्य चाप्रत्ययः 1.1.69

भाव्यमानेनेतिपरिभाषाज्ञापनम्

आक्षेपभाष्यम्- अप्रत्यय इति किमर्थम्?

समाधानभाष्यम्- 'सनाशंसभिक्ष उः' 'अ साम्प्रतिके'।

आक्षेपभाष्यम्- अत्यल्पमिदमुच्यते—अप्रत्यय इति। 'अप्रत्ययादेशटित्किन्मितः' इति वक्तव्यम्। प्रत्यये—उदाहृतम्। आदेशे—'इदम इश्' इतः, इह। टिति—लविता, लवितुम्। किति—बभूव। मिति—हे अनड्वन्।

टिद्ग्रहणवैयर्थ्यसाधकभाष्यम्- टितः परिहारः—आचार्यप्रवृत्तिर्ज्ञापयति—'न टिता सवर्णानां ग्रहणं भवति' इति। यदयम्—ग्रहोऽलिटि दीर्घत्वं शास्ति।

ज्ञापकत्वनिराकरणभाष्यम्- नैतदस्ति ज्ञापकम्। नियमार्थमेतत् स्यात्—ग्रहोऽलिटि दीर्घ एवेति।

ज्ञापकान्तरभाष्यम्- यत्तर्हि 'वृतो वा' इति विभाषां शास्ति।

यौगिकत्वे पर्युदासवैयर्थ्यभाष्यम्- सर्वेषामेष परिहारः—'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं न भविष्यति।

सञ्ज्ञापरत्वेऽपि पर्युदासवैयर्थ्यभाष्यम्- प्रत्यये भूयान् परिहारः—अनभिधानात्प्रत्ययः सवर्णान् न ग्रहीष्यति। यान् हि प्रत्ययः सवर्णग्रहणेन गृह्णीयात् न तैरर्थस्याभिधानं स्यात्। अनभिधानान्न भविष्यति।

प्रयोजनभाष्यम्- इदं तर्हि प्रयोजनम्—इह केचित्प्रतीयन्ते, केचित्प्रत्याय्यन्ते। ह्रस्वाः प्रतीयन्ते दीर्घाः प्रत्याय्यन्ते। यावच्च ब्रूयात्—प्रत्याय्यमानेन सवर्णानां ग्रहणं नेति, तावदप्रत्यय इति।

आक्षेपभाष्यम्- कं पुनर्दीर्घः सवर्णग्रहणेन गृह्णीयात्?

प्रयोजनसाधकभाष्यम्- ह्रस्वम्।

प्रयोजननिराकरणभाष्यम्- यत्नाधिक्यान्न ग्रहीष्यति।

प्रयोजनसाधकभाष्यम्- प्लुतं तर्हि गृह्णीयात्।

प्रयोजननिराकरणभाष्यम्- अनण्त्वान्न ग्रहीष्यति।

सिद्धान्तप्रयोजनभाष्यम्- एवं तर्हि सिद्धे सति यद् 'अप्रत्ययः' इति प्रतिषेधं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्ति, तज्ज्ञापयत्याचार्यः—भवत्येषा परिभाषा 'भाव्यमानेन सवर्णानां ग्रहणं न' इति।

अण्ग्रहणप्रयोजनम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

(422. **समाधानवार्तिकम्**-1)

*** अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात् ***

भाष्यम्- अण् सवर्णस्येत्युच्यते। स्वरभेदादानुनासिक्यभेदात् कालभेदाच्चाण् सवर्णान्न गृह्णीयात्। इष्यते च—सवर्ण ग्रहणं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति?

(423. **आक्षेपवार्तिकम्**-2)

*** तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् ***

भाष्यम्- तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति—'अकः सवर्णे दीर्घः' इति। किं कारणम्? अनुपदेशात्। यथाजातीयकानां सञ्ज्ञा कृता तथाजातीयकानां सम्प्रत्यायिका स्यात्। ह्रस्वानां च क्रियते। ह्रस्वानामेव सम्प्रत्यायिका स्याद्दीर्घाणां न स्यात्।

आक्षेपभाष्यम्- ननु च ह्रस्वा प्रतीयमाना दीर्घान् सम्प्रत्याययिष्यन्ति।

(424. **आक्षेपसाधकवार्तिकम्**-3)

*** ह्रस्वसम्प्रत्ययादिति चेदुच्चार्यमाणशब्दसम्प्रत्यायकत्वाच्छब्दस्यावचनम् ***

भाष्यम्- ह्रस्वसम्प्रत्ययादिति चेत्, तन्न। किं कारणम्? उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति, न सम्प्रतीयमानः। तद्यथा—ऋगित्युक्ते सम्पाठमात्रं गम्यते, नास्या अर्थो गम्यते।

समाधानभाष्यम्- एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते।

(425. **समाधानबाधकवार्तिकम्**-4)

*** वर्णपाठ उपदेश इति चेदवरंकालत्वात् परिभाषाया अनुपदेशः ***

भाष्यम्- वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः।

आक्षेपभाष्यम्- किं परा सूत्रात् क्रियत इत्यतोऽवरकाला?

समाधानभाष्यम्- नेत्याह। सर्वथाऽवरकालैव। वर्णानामुपदेशस्तावत्। उपदेशोत्तरकाला इत्सञ्ज्ञा। इत्सञ्ज्ञोत्तरकालः 'आदिरन्त्येन सहेता' इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसञ्ज्ञा। सवर्णसञ्ज्ञोत्तरकालम् 'अणुदित्सवर्णस्य चाप्रत्ययः' इति। सैषा उपदेशोत्तरकाला-अवरकाला सती वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यत इत्येतन्न।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(426. समाधानबाधकवार्तिकम्- 5)

*** तस्मादुपदेश: ***

भाष्यम्- तस्मादुपदेश: कर्तव्य:।

अण्ग्रहणप्रत्याख्यानम्

(427. आक्षेपवार्तिकम्- 1)

*** तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ***

भाष्यम्- तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति—'अस्य च्वौ' 'यस्येति च'। किं कारणम्? अनण्त्वात्। न ह्येतेऽण:, येऽनुवृत्तिनिर्देशे। के तर्हि? येऽक्षरसमाम्नाय उपदिश्यन्ते।

आक्षेपबाधकभाष्यम्- एवं तर्ह्यनण्त्वादनुवृत्तौ न, अनुपदेशाच्च प्रत्याहारे न। उच्यते चेदम्—अण् सवर्णान् गृह्णातीति। तत्र वचनाद्भविष्यति।

(आक्षेपसाधकं श्लोकवार्तिकम्)

*** वचनाद्यत्र तन्नास्ति ***

भाष्यम्- नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? य एते प्रत्याहाराणामादितो वर्णास्तै: सवर्णानां ग्रहणं यथा स्यात्।

समाधानान्तरभाष्यम्- एवं तर्हि—

(428. सिद्धान्तसमाधान अणप्रत्याख्यानवार्तिकम्- 2)

*** सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ***

भाष्यम्- सवर्णेऽण्ग्रहणमपरिभाष्यम्। कुत:? आकृतिग्रहणात्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिस्तथोवर्णाकृति:।

आक्षेपभाष्यम्- ननु चान्याऽऽकृतिरकारस्यान्याऽऽकारस्य च।

(429. समाधानवार्तिकम्- 3)

*** अनन्यत्वाच्च ***

भाष्यम्- अनन्याकृतिरकारस्याकारस्य च।

(430. समाधानसाधकं वार्तिकम्- 4)

*** अनेकान्तो ह्यनन्यत्वकर: ***

भाष्यम्- यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति। तद्यथा—न यो गोश्च गोश्च भेद: सोऽन्यत्वं करोति। यस्तु खलु गोश्चाश्वस्य च भेद: सोऽन्यत्वं करोति।

मतान्तरनिदर्शकं भाष्यम्- अपर आह—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(जातिपक्षोपस्थापकमन्यदीयवार्तिकम्)

*** सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वम् ***

भाष्यम्- सवर्णेऽण्ग्रहणमपरिभाष्यम्, आकृतिग्रहणादनन्यत्वं भविष्यति। अनन्याऽऽकृतिरकारस्याकारस्य च।

(अन्यदीयं वार्तिकम्)

*** अनेकान्तो ह्यनन्यत्वकरः ***

भाष्यम्- यो ह्यनेकान्तेन भेदो नासावनन्यत्वं करोति। तद्यथा—न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति। यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति।

(सिद्धान्तसाधकं भाष्यवार्तिकम्)

*** तद्वच्च हल्ग्रहणेषु ***

भाष्यम्- एवं च कृत्वा हल्ग्रहणेषु सिद्धं भवति। 'झलो झलि'—अवात्ताम्, अवात्तम्, अवात्त। यत्रैतन्नास्ति—अण् सवर्णान् गृह्णातीति।

(सिद्धान्तसाधकं भाष्यवार्तिकम्)

*** अनेकान्तो ह्यनन्यत्वकरः ***

भाष्यम्- इत्युक्तार्थम्।

(सिद्धान्तसाधकं भाष्यवार्तिकम्)

*** द्रुतविलम्बितयोश्चानुपदेशात् ***

भाष्यम्- द्रुतविलम्बितयोश्चानुपदेशान्मन्यामहे—'आकृतिग्रहणात् सिद्धम्' इति। यदयं कस्यांचिद् वृत्तौ वर्णानुपदिश्य सर्वत्र कृती भवति।

काकुभाष्यम्- अस्ति प्रयोजनमेतत्। किं तर्हीति?

वृत्तिपृथक्त्वबोधनम्

(431. आक्षेपवार्तिकम्-1)

*** वृत्तिपृथक्त्वं तु नोपपद्यते ***

भाष्यम्- वृत्तेस्तु पृथक्त्वं नोपपद्यते।

(समाधाने भाष्यवार्तिकम्)

*** तस्मात्तत्र तपरनिर्देशात्सिद्धम् ***

भाष्यम्- तस्मात्तत्र तपरनिर्देशः कर्तव्यः।

समाधानभाष्यम्- न कर्तव्यः। क्रियते न्यास एव—'अतो भिस ऐस्' इति। अणुदित्सवर्णस्य चाप्रत्ययः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(64. तपरसञ्ज्ञासूत्रम् 1.1.9 आ. 10)

तपरस्तत्कालस्य 1.1.70

तत्कालपदसाधनम्

आक्षेपभाष्यम्- अयुक्तोऽयं निर्देशः। 'तत्' इत्यनेन कालः प्रतिनिर्दिश्यते, तदित्ययं च वर्णः। तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम्।

प्रत्याक्षेपभाष्यम्- कथं तर्हि निर्देशः कर्तव्यः?

प्रत्याक्षेपसमाधानभाष्यम्- तत्कालकालस्येति।

आक्षेपभाष्यम्- किमिदं तत्कालकालस्येति?

समाधानभाष्यम्- तस्य कालस्तत्कालः, तत्कालः कालो यस्येति सोऽयं तत्कालकालः, तत्कालकालस्येति।

तटस्थाक्षेपभाष्यम्- स तर्हि तथा निर्देशः कर्तव्यः।

सिद्धान्तिसमाधानभाष्यम्- न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा—उष्ट्रमुखमिव मुखं यस्य सोऽयमुष्ट्रमुखः। खरमुखः। एवं तत्कालकालस्तत्कालस्तत्कालस्येति।

समाधानान्तरभाष्यम्- अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णः, वर्णोऽपि काल एव।

विध्यर्थत्वनिर्णयः

आक्षेपभाष्यम्- किं पुनरिदं नियमार्थम्, आहोस्वित् प्रापकम्?

प्रत्याक्षेपभाष्यम्- कथं च नियमार्थं स्यात्? कथं वा प्रापकम्?

प्रत्याक्षेपसमाधानभाष्यम्- यद्यत्राण्ग्रहणमनुवर्तते, ततो नियमार्थम्। अथ निवृत्तम्, ततः प्रापकम्।

विशेषजिज्ञासाभाष्यम्- कश्चात्र विशेषः?

(432. नियमपक्षे दूषणवार्तिकम्- 1)

*** तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम् ***

भाष्यम्- 'तपरस्तत्कालस्य' इति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति। केषाम्? उदात्तानुदात्तस्वरिता(नुनासिका)नाम्।

प्रापकपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि प्रापकम्।

(433. प्रापकपक्षे दूषणवार्तिकम्- 2)

*** प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः ***

भाष्यम्- प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतयोस्तु प्रतिषेधो वक्तव्यः।

समाधानभाष्यम्- न वक्तव्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(समाधाने भाष्यवार्तिकम्)

*** विप्रतिषेधात् सिद्धम् ***

भाष्यम्- अण् सवर्णान् गृह्णातीत्येतदस्तु, 'तपरस्तत्कालस्य' इति वा। 'तपरस्तत्कालस्य' इत्येतद्भवति विप्रतिषेधेन। अण् सवर्णान् गृह्णातीत्यस्यावकाशः—ह्रस्वा अतपरा अणः। 'तपरस्तत्कालस्य' इत्यस्यावकाशः—दीर्घास्तपराः। ह्रस्वेषु तपरेषूभयं प्राप्नोति। 'तपरस्तत्कालस्य' इत्येतद्भवति विप्रतिषेधेन।

स्फोटस्यैकत्वनिरूपणम्

भाष्यम्- यद्येवम्—

(434. आक्षेपवार्तिकम्-1)

*** द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ***

भाष्यम्- द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्। तथा मध्यमायां द्रुतविलम्बितयोः। तथा विलम्बितायां द्रुतमध्यमयोः। किं पुनः कारणं न सिध्यति? कालभेदात्। ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। ये च मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम्।

(435. समाधानवार्तिकम्-2)

*** सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते ***

भाष्यम्- सिद्धमेतत्। कथम्? अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु। किं कृतस्तर्हि वृत्तिविशेषः? वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते। वक्तैव कश्चिदाश्वभिधायी भवति, आशु वर्णानभिधत्ते कश्चिच्चिरेण कश्चिच्चिरतरेण। तद्यथा तमेवाध्वानं कश्चिदाशु गच्छति, कश्चिच्चिरेण गच्छति, कश्चिच्चिरतरेण गच्छति। रथिक आशु गच्छति, आश्विकश्चिरेण, पदातिश्चिरतरेण।

समाधानबाधकभाष्यम्- विषम उपन्यासः। अधिकरणमत्राध्वा व्रजतिक्रियायाः। तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम्।

समाधानसाधकभाष्यम्- एवं तर्हि—स्फोटः शब्दः। ध्वनिः शब्दगुणः।

आक्षेपभाष्यम्- कथम्?

(436. समाधाने दृष्टान्तवार्तिकम्-3)

*** भेर्याघातवत् ***

भाष्यम्- तद्यथा—भेर्याघातो भेरीमाहत्य कश्चिद्विंशतिपदानि गच्छति, कश्चित्त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः।।1।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपरस्तत्कालस्य।

(65. प्रत्याहारसञ्ज्ञासूत्रम् 1.1.9 आ. 11)

आदिरन्त्येन सहेता 1.1.71

संज्ञिनिरूपणम्

(437. आक्षेपवार्तिकम्-1)

* आदिरन्त्येन सहेतेत्यसम्प्रत्यय: संज्ञिनोऽनिर्देशात् *

भाष्यम्- आदिरन्त्येन सहेतेति असम्प्रत्यय:। किं कारणम्? संज्ञिनोऽनिर्देशात्। न हि संज्ञिनो निर्दिश्यन्ते।

(438. न्यासान्तरेण समाधानवार्तिकम्-2)

* सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् *

भाष्यम्- सिद्धमेतत्। कथम्? आदिरन्त्येन सह गृह्यमाण: स्वस्य च रूपस्य ग्राहक:, तन्मध्यानां चेति वक्तव्यम्।

(439. यथान्यासेनैव समाधानवार्तिकम्-3)

* सम्बन्धिशब्दैर्वा तुल्यम् *

भाष्यम्- सम्बन्धिशब्दैर्वा तुल्यमेतत्। तद्यथा—सम्बन्धिशब्दा:—मातरि वर्तितव्यम्, पितरि शुश्रूषितव्यमिति। न चोच्यते—स्वस्यां मातरि, स्वस्मिन् पितरीति। सम्बन्धाच्च गम्यते—या यस्य माता, यो यस्य पितेति। एवमिहाप्यादिरन्त्य इति सम्बन्धिशब्दावेतौ। तत्र सम्बन्धादेतद्गन्तव्यम्—यं प्रति य आदिरन्त्य इति च भवति, तस्य ग्रहणं भवति, स्वस्य च रूपस्येति। आदिरन्त्येन सहेता।

(66. सञ्ज्ञासूत्रम् 1.1.9 आ. 12)

येन विधिस्तदन्तस्य 1.2.72

तदन्तविधिविषयनिर्णय:

आक्षेपभाष्यम्- इह कस्मान्न भवति—'इको यणचि'। दध्यत्र, मध्वत्र?

समाधानभाष्यम्- अस्तु। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति।

अनिष्टापत्तिभाष्यम्- नैवं शक्यम्। ये अनेकाल आदेशास्तेषु दोष: स्यात्—'एचोऽयवायाव:' इति।

अनिष्टापत्तिनिराकरणभाष्यम्- नैष दोष:। यथैव प्रकृतितस्तदन्तविधिर्भवति, एवमादेशतोऽपि भविष्यति। तत्रैजन्तस्यायाद्यन्ता आदेशा भविष्यन्ति।

आक्षेपभाष्यम्- यदि चैव क्वचिद्वैरूप्यं तत्र दोष: स्यात्।

आक्षेपान्तरभाष्यम्- अपि चान्तरङ्गबहिरङ्गे न प्रकल्पेयाताम्। तत्र को दोष:?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्योनः, स्योना। अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। ऊनशब्दमाश्रित्य यणादेशः, नशब्दमाश्रित्य गुणः। अल्विधिश्च न प्रकल्पेत—द्यौः, पन्थाः, स इति।

न्यासान्तरोपसंहारभाष्यम्- तस्मात्—'प्रकृते तदन्तविधिः' इति वक्तव्यम्।

न्यासान्तरनिराकरणभाष्यम्- न वक्तव्यम्। येनेति करण एषा तृतीया। अन्येन चान्यस्य विधिर्भवति। तद्यथा—देवदत्तस्य समाशं शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्ते। तथा—संग्रामं हस्त्यश्वरथपदातिभिः। एवमिहाप्यचा धातोर्यतं विधत्ते। अकारेण प्रातिपदिकस्य इञं विधत्ते।

विशेषणविषेष्यभावयोर्यथेष्टत्वम्

(440. आक्षेपवार्तिकम्-1)

*** येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः ***

भाष्यम्- येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः। ये ग्रहणो-पाधयस्ते तदन्तोपाधयः स्युः। तत्र को दोषः? 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति असंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात्। तत्र को दोषः? असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात्—अक्ष्णुहि, तक्ष्णुहीति। इह न स्यात्—आप्नुहि शक्नुहीति। तथा 'उदोष्ठ्यपूर्वस्य' इति ओष्ठ्यपूर्वग्रहणमृकारान्तविशेषणं स्यात्। तत्र को दोषः? ओष्ठ्य-पूर्वग्रहणेन इह प्रसज्येत—संकीर्णम्, संगीर्णमिति। इह च न स्यात्—निपूर्ताः पिण्डा इति।

(441. समाधानवार्तिकम्-2)

*** सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात् ***

भाष्यम्- सिद्धमेतत्। कथम्? यथेष्टं विशेषणविशेष्ययोर्योगो भवति। यावता यथेष्टम्। इह तावत्—'उतश्च प्रत्ययादसंयोगपूर्वात्' इति नासंयोगपूर्वग्रहणेन उकारान्तं विशेष्यते। किं तर्हि? उकार एव विशेष्यते—उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति। तथा—'उदोष्ठ्यपूर्वस्य' इति नौष्ठ्यपूर्वग्रहणेन ॠकारान्तं विशेष्यते। किं तर्हि? ॠकार एव विशेष्यते—ॠकारो य ओष्ठ्यपूर्वस्तदन्तस्य धातोरिति।

तदन्तसञ्ज्ञाप्रतिषेधः

(442. आक्षेपवार्तिकम्-1)

*** समासप्रत्ययविधौ प्रतिषेधः ***

भाष्यम्- समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः। समासविधौ तावत्—द्वितीया श्रितादिभिः समस्यते—कष्टश्रितः, नरकश्रितः। कष्टं परमश्रित इत्यत्र मा भूत्।

प्रत्ययविधौ—'नडादिभ्यः फक्', नडस्यापत्यं नाडायनः। इह न भवति—सूत्र-नडस्यापत्यं सौत्रनाडिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याक्षेपभाष्यम्- किमविशेषण?

समाधानभाष्यम्- नेत्याह।

(443. आक्षेपपरिशेषवार्तिकम्-2)

*** उगिद्वर्णग्रहणवर्जम् ***

भाष्यम्- उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा। उगिद्ग्रहणम्—'उगितश्च'। भवती-अतिभवती, महती-अतिमहती। वर्णग्रहणम्—'अत इञ्'। दाक्षिः, प्लाक्षिः।

आक्षेपभाष्यम्- अस्ति चेदानीं कश्चित्केवलोऽकारः प्रातिपदिकं यदर्थो विधिः स्यात्।

समाधानभाष्यम्- अस्तीत्याह—अततेर्डः—अः, तस्यापत्यम् 'अत इञ्'—इः।

तन्मध्यपतितन्यायः

(आक्षेपे भाष्यवार्तिकम्)

*** अकच्श्नम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम् ***

भाष्यम्- अकज्वतः—सर्वके, स्वके। अव्ययविधौ—उच्चकैः, नीचकैः। श्नम्वतः—भिनत्ति, छिनत्ति। किं पुनः कारणं न सिध्यति? इह—तस्य वा ग्रहणं तदन्तस्य वा। न चेदं तत्, नापि तदन्तम्।

(444. समाधानबाधकवार्तिकम्-1)

*** सिद्धं तु तदन्तान्तवचनात् ***

भाष्यम्- सिद्धमेतत्। कथम्? तदन्तान्तवचनात्। तदन्तान्तस्येति वक्तव्यम्। किमिदं तदन्तान्तस्येति? तस्यान्तस्तदन्तस्तदन्तोऽन्तो यस्य तदिदं तदन्तान्तं तदन्तान्तस्येति।

तटस्थाक्षेपभाष्यम्- स तर्हि तथा निर्देशः कर्तव्यः।

सिद्धान्तिसमाधानभाष्यम्- न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः, खरमुखः। एवमिहापि तदन्तः अन्तो यस्य, तदन्तस्तदन्तस्येति।

(यथान्यासेऽपि समाधानभाष्यवार्तिकम्)

*** तदेकदेशविज्ञानाद्वा सिद्धम् ***

भाष्यम्- तदेकदेशविज्ञानाद्वा पुनः सिद्धमेतत्। तदेकदेशभूतस्तद्ग्रहणेन गृह्यते। तद्यथा—गङ्गा, यमुना, देवदत्तेति। अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते। तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते।

समाधानबाधकभाष्यम्- विषम उपन्यासः। इह केचिच्छब्दा अव्यक्तपरिमाणानामर्थानां वाचका भवन्ति—य एते संख्याशब्दाः परिमाणशब्दाश्च। पञ्च, सप्तेति एकेनाप्यपाये न भवन्ति। द्रोणः, खारी, आढकमिति नैवाधिके भवन्ति, न न्यूने। केचिद् यावदेव तद्भवति तावदेवाहुः—य एते जातिशब्दा गुणशब्दाश्च। तैलं घृतमिति खार्यामपि भवन्ति, द्रोणेऽपि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति, वटकणिकामात्रेऽपि द्रव्ये। इमाश्चापि सञ्ज्ञा अक्तपरिमाणानामर्थानां क्रियन्ते ताः केनाधिकस्य स्युः।

समाधानसाधकभाष्यम्- एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति। यदयं 'नेदमदसोरकोः' इति सककारयोरिदमदसोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात्। पश्यति त्वाचार्यः—'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति। ततः सककारयोः प्रतिषेधं शास्ति।

तदन्तसञ्ज्ञोदाहरणम्

आक्षेपभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि।

(प्रयोजने भाष्यवार्तिकम्)

*** प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम् ***

भाष्यम्- सर्वनामाव्ययसञ्ज्ञायां प्रयोजनम्। सर्वे, परमसर्वे, विश्वे, परमविश्वे। उच्चैः, परमोच्चैः, नीचैः, परमनीचैरिति।

(प्रयोजने भाष्यवार्तिकम्)

*** उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम् ***

भाष्यम्- उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम्। भयंकरः, अभयंकरः। आढ्यंकरणं, स्वाढ्यंकरणम्।

(प्रयोजने भाष्यवार्तिकम्)

*** ङीब्विधावुगिद्ग्रहणं प्रयोजनम् ***

भाष्यम्- ङीब्विधावुगिद्ग्रहणं प्रयोजनम्। भवती, अतिभवती। महती, अतिमहती।

(प्रयोजने भाष्यवार्तिकम्)

*** प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम् ***

भाष्यम्- ङीप्प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम्। स्वसा, परमस्वसा। दुहिता, परमदुहिता।

(प्रयोजने भाष्यवार्तिकम्)

*** अपरिमाणबिस्तादिग्रहणं च प्रतिषेधे प्रयोजनम् ***

भाष्यम्- अपरिमाणबिस्तादिग्रहणं च ङीप्प्रतिषेधे प्रयोजनम्। 'अपरिमाणबिस्ताचित-कम्बल्येभ्यो न तद्धितलुकि' द्विबिस्त, द्विपरमबिस्ता। त्रिबिस्ता, त्रिपरमबिस्ता। द्व्याचिता, द्विपरमाचिता।

(445. प्रयोजनवार्तिकम्-1)

*** दिति ***

भाष्यम्- दितिग्रहणं च प्रयोजनम्। दितेरपत्यं दैत्यः, अदितेरपत्यमादित्यः इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदितिग्रहणं न कर्तव्यं भवति।

(446. प्रयोजनवार्तिकम्-2)

*** रोण्या अण् ***

भाष्यम्- रोण्या अण्ग्रहणं च प्रयोजनम्। आजकरोणः। सैंहिकरोणः।

(447. आक्षेपवार्तिकम्-3)

*** तस्य च ***

भाष्यम्- तस्य चेति वक्तव्यम्। रौणः।

प्रत्याक्षेपभाष्यम्- किं पुनः कारणं न सिध्यति। न तदन्ताच्च तदन्तविधिना सिद्धम्, केवलाच्च व्यपदेशिवद्भावेन ?

समाधानभाष्यम्- 'व्यपदेशिवद्भावोऽप्रातिपदिकेन'।

आक्षेपभाष्यम्- किं पुनः कारणं 'व्यपदेशिवद्भावोऽप्रातिपदिकेन'।

समाधानभाष्यम्- इह सूत्रान्ताट्ठग्भवति, दशान्ताड्डो भवतीति केवलादुत्पत्तिर्मा भूदिति।

समाधानबाधकभाष्यम्- नैतदस्ति प्रयोजनम्। सिद्धमत्र तदन्ताच्च तदन्तविधिना, केवलाच्च व्यपदेशिवद्भावेन। सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः— सूत्रान्तादेव दशान्तादेवेति।

समाधानसाधकभाष्यम्- नात्र तदन्तादुत्पत्तिः प्राप्नोति। इदानीमेव ह्युक्तम्— 'समास-प्रत्ययविधौ प्रतिषेधः' इति।

गौरवाक्षेपभाष्यम्- सा तर्ह्येषा परिभाषा कर्तव्या।

गौरवनिराकरणभाष्यम्- न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति—'व्यपदेशिवद्भावोऽ-प्राति-पदिकेन' इति। यदयम्—'पूर्वादिनिः' 'सपूर्वाच्च' इत्याह।

ज्ञापकनिराकरणभाष्यम्- नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? सपूर्वात् पूर्वादिनिं वक्ष्यामीति।

ज्ञापकान्तरभाष्यम्- यत्तर्हि योगविभागं करोति। इतरथा 'पूर्वात्सपूर्वादिनिः' इत्येव ब्रूयात्।

आक्षेपभाष्यम्- किं पुनरयमस्यैव शेषः—'तस्य च' इति?

समाधानभाष्यम्- नेत्याह। यच्चानुक्रान्तं यच्चानुक्रंस्यते, सर्वस्यैव शेषः— 'तस्य च' इति।

(प्रयोजने भाष्यवार्तिकम्)

*** रथसीताहलेभ्यो यद्विधौ प्रयोजनम् ***

भाष्यम्- रथ्यः, परमरथ्यः। सीत्यं, परमसीत्यम्। हल्या, परमहल्या।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रयोजने भाष्यवार्तिकम्)

*** सुसर्वार्धदिक्छब्देभ्यो जनपदस्य प्रयोजनम् ***

भाष्यम्- सु—सुपाञ्चालकः, सुमागधव, सु। सर्व—सर्वपाञ्चालकः, सर्वमागधकः, सर्व। अर्ध—अर्धपाञ्चालकः, अर्धमागधकः, अर्ध। दिक्छब्द—पूर्वपाञ्चालकः, पूर्वमागधकः।

(प्रयोजने भाष्यवार्तिकम्)

*** ऋतोर्वृद्धिमद्विधाववयवानां प्रयोजनम् ***

भाष्यम्- पूर्वशारदम्। अपरशारदम्। पूर्वनैदाघम्। अपरनैदाघम्।

(प्रयोजने भाष्यवार्तिकम्)

*** ठञ्विधौ संख्यायाः प्रयोजनम् ***

भाष्यम्- द्विषाष्टिकं, पञ्चषाष्टिकम्।

(प्रयोजने भाष्यवार्तिकम्)

*** धर्मान्नञः प्रयोजनम् ***

भाष्यम्- धर्मं चरति धार्मिकः। अधर्मं चरति अधार्मिकः। 'अधर्माच्च' इति न वक्तव्यं भवति।

पदाङ्गाधिकारपरिभाषासाधनम्

(448. प्रयोजनवार्तिकम्-1)

*** पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ***

भाष्यम्- पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वक्तव्यम्। पदाधिकारे किं प्रयोजनम्?

(प्रयोजने भाष्यवार्तिकम्)

*** प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु ***

भाष्यम्- इष्टकचितं चिन्वीत। पक्वेष्टचितं चिन्वीत। इषीकतूलेन, मुञ्जेषीकतूलेन। मालभारिणी कन्या, उत्पलमालभारिणी कन्या। अङ्गाधिकारे किं प्रयोजनम्?

(प्रयोजने भाष्यवार्तिकम्)

*** प्रयोजनं महदप्स्वसृनप्तॄणां दीर्घविधौ ***

भाष्यम्- महान्, परममहान्। महत्। अप्—आपस्तिष्ठन्ति, स्वापस्तिष्ठन्ति। अप्। स्वसृ—स्वसा, स्वसारौ, स्वसारः। एवं परमस्वसा, परमस्वसारौ, परमस्वसारः। स्वसृ। नप्तृ—नप्ता, नप्तारौ, नप्तारः। एवं परमनप्ता, परमनप्तारौ, परमनप्तारः। नप्तृ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(449. प्रयोजनवार्तिकम्-2)

*** पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् ***

व्याख्याभाष्यम्- पद्भावः प्रयोजनम्। द्विपदः पश्य।

आक्षेपभाष्यम्- अस्ति चेदानीं कश्चित्केवलः पाच्छदो यदर्थो विधिः स्यात्?

समाधानभाष्यम्- नास्तीत्याह।

प्रयोजनदर्शकभाष्यम्- एवं तर्हि अङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्य प्रयोजनमुक्तम्—'हिमकाषिहतिषु च'। यथा—पत्काषिणौ, पत्काषिणः। एवं परमपत्काषिणौ, परमपत्काषिणः।

आक्षेपभाष्यम्- यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति। 'पादस्य पदाज्यातिगोपहतेषु'। यथेह भवति—पादेनोपहतं पदोपहतम्। एवमत्रापि स्यात्—दिग्धपादेनोपहतं दिग्धपादोपहतमिति।

समाधानभाष्यम्- एवं तर्ह्यङ्गाधिकार एव प्रयोजनम्।

आक्षेपभाष्यम्- ननु चोक्तम्—नास्ति केवलः पाच्छब्द इति।

समाधानभाष्यम्- अयमस्ति—पादयतेरप्रत्ययः-पात्, पदः, पदा, पदे। पत्।

भाष्यम्- युष्मत् अस्मत्—यूयं, वयम्। अतियूयं, अतिवयम्। अस्थ्यादि—अस्थ्ना, दध्ना, सक्थ्ना। परमास्थ्ना, परमदध्ना, परमसक्थ्ना। अनडुहो नुम् अनड्वान्, परमानड्वान्।

(प्रयोजने भाष्यवार्तिकम्)

*** द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणं प्रयोजनम् ***

भाष्यम्- द्यौः, सुद्यौः। पन्थाः, सुपन्थाः। मन्थाः, परममन्थाः। पुमान्, परमपुमान्। गौः, सुगौः। सखा, सखायौ, सखायः, सुसखा, सुसखायौ, सुसखायः, परमसखा, परमसखायौ, परमसखायः। चत्वारः, परमचत्वारः। अनड्वाहः, परमानड्वाहः। त्रयाणां, परमत्रयाणाम्।

(प्रयोजनभाष्यवार्तिकम्)

*** त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च प्रयोजनम् ***

भाष्यम्- सः, अतिसः। भस्त्रका, भस्त्रिका, बहुभस्त्रका, बहुभस्त्रिका, निर्भस्त्रका, निर्भस्त्रिका। स्त्रीग्रहणं च प्रयोजनम्। स्त्रियौ, स्त्रियः। राजस्त्रियौ, राजस्त्रियः।

(450. प्रयोजनवार्तिकम्-2)

*** वर्णग्रहणं च सर्वत्र ***

भाष्यम्- वर्णग्रहणं च सर्वत्र प्रयोजनम्। क्व सर्वत्र? अङ्गाधिकारे चान्यत्र च। अन्यत्रोदाहृतम्। अङ्गाधिकारे—'अतो दीर्घो यञि, सुपि च' इहैव स्यात्—आभ्याम्। घटाभ्यामित्यत्र न स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(451. प्रयोजनवार्तिकम्-3)

*** प्रत्ययग्रणं चापञ्चम्याः ***

भाष्यम्- प्रत्ययग्रहणं च अपञ्चम्याः प्रयोजनम्। यञिञोः फग्भवति—गार्ग्यायणः, वात्स्यायनः, परमगार्ग्यायणः, परमवात्स्यायनः। अपञ्चम्या इति किमर्थम्? दृषत्तीर्णा, परिषत्तीर्णा।

(452. आक्षेपवार्तिकम्-4)

*** अलैवानर्थकेन ***

भाष्यम्- नान्येनानर्थकेनेति वक्तव्यम्। किं प्रयोजनम्? हन्ग्रहणे प्लीहन्ग्रहणं मा भूत्। उद्ग्रहणे गर्मुद्ग्रहणम्। स्त्रीग्रहणे शस्त्रीग्रहणम्। संग्रहणे पायसंग्रहणम्।

वार्तिकवैयर्थ्याक्षेपभाष्यम्- किमर्थमिदमुच्यते, न 'पदाङ्गाधिकरो तस्य च तदुत्तरपदस्य च' इत्येव सिद्धम्। न चेदं तत्, नापि तदुत्तरपदम्।

परिभाषानावश्यकत्वलाघवभाष्यम्- तन्न वक्तव्यं भवति।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- तदन्तविधिरेव ज्यायान्। इदमपि सिद्धं भवति—परमातिमहान्। एतद्धि नैव तत्, नापि तदुत्तरपदम्।

(453. प्रयोजनवार्तिकम्-5)

*** अनिनस्मन्ग्रहणानि च ***

भाष्यम्- अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। अन्—राज्ञेत्यर्थवता, साम्नेत्यनर्थकेन। इन्—दण्डीत्यर्थवता, वाग्मीत्यनर्थकेन। अस्—सुपया इत्यर्थवता, सुस्रोता इत्यनर्थकेन। मन्—सुशर्मा इत्यर्थवता, सुप्रथिमा इत्यनर्थकेन।

तदन्तसञ्ज्ञापवादनिरूपणम्

(454. आक्षेपवार्तिकम्-1)

*** यस्मिन्विधिस्तदादावल्ग्रहणे ***

भाष्यम्- यस्मिन्विधिस्तदादाविति वक्तव्यम्। किं प्रयोजनम्? 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इहैव स्यात्—श्रियौ, भ्रुवौ। श्रियः, भ्रुव इत्यत्र न स्यात्। येन विधिस्तदन्तस्य।

अथ वृद्धसञ्ज्ञाप्रकरणम्

(67. वृद्धसञ्ज्ञासूत्रम् 1.1.9 आ. 13)

वृद्धिर्यस्याचामादिस्तद् वृद्धम् 1.1.73

पदकृत्यनिर्वचनम्

आक्षेपभाष्यम्- वृद्धिग्रहणं किमर्थम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- 'यस्याचामादिस्तद् वृद्धम्' इतीयत्युच्यमाने 'दात्ताः, राक्षिताः।' अत्रापि प्रसज्येत। वृद्धिग्रहणे पुनः क्रियमाणे न दोषो भवति।

आक्षेपभाष्यम्- अथ यस्यग्रहणं किमर्थम्?

समाधानभाष्यम्- यस्येति व्यपदेशाय।

आक्षेपभाष्यम्- अथाज्ग्रहणं किमर्थम्?

समाधानभाष्यम्- 'वृद्धिर्यस्यादिस्तद्वृद्धम्' इतीयत्युच्यमाने इहैव स्यात्—ऐतिकायनीयाः औपगवीयाः। इह न स्यात्—गार्गीयाः, वात्सीया इति। अज्ग्रहणे पुनः क्रियमाणे न दोषो भवति।

आक्षेपभाष्यम्- अथादिग्रहणं किमर्थम्?

समाधानभाष्यम्- 'वृद्धिर्यस्याचां तद् वृद्धम्' इतीयत्युच्यमाने—सभासन्नयने भवः साभासन्नयनः—इत्यत्रापि प्रसज्येत। आदिग्रहणे पुनः क्रियमाणे न दोषो भवति।

सूत्रोपपादनम्

(455. आक्षेपवार्तिकम्-1)

* वृद्धसञ्ज्ञायामजसंनिवेशादनादित्वम् *

भाष्यम्- वृद्धसञ्ज्ञायामजसंनिवेशादादिरित्येतन्नोपपद्यते। न ह्यचां संनिवेशोऽस्ति।

आक्षेपबाधकभाष्यम्- ननु चैवं विज्ञायते—अजेवादिरिति।

आक्षेपसाधकभाष्यम्- नैवं शक्यम्। इहैव प्रसज्येत—औपगवीयाः, ऐतिकायनीयाः। इह न स्यात्—गार्गीयाः, वात्सीया इति।

आक्षेपबाधकभाष्यम्- एकान्तादित्वं तर्हि विज्ञायते।

(आक्षेपसाधकभाष्यवार्तिकम्)

* एकान्तादित्वे च सर्वप्रसङ्गः *

भाष्यम्- इहापि प्रसज्येत—सभासन्नयने भवः साभासन्नयन इति।

(456. समाधानवार्तिकम्-2)

* सिद्धमजाकृतिनिर्देशात् *

भाष्यम्- सिद्धमेतत्। कथम्? अजाकृतिर्निर्दिश्यते।

आक्षेपभाष्यम्- एवमपि व्यञ्जनैर्व्यवहितत्वान्न प्राप्नोति।

(457. समाधानवार्तिकम्-3)

* व्यञ्जनस्याऽविद्यमानत्वं यथान्यत्र *

भाष्यम्- व्यञ्जनस्याविद्यमानवद्भावो वक्तव्यः। यथाऽन्यत्र। अन्यत्रापि व्यञ्जनस्याविद्यमानवद्भावो भवति। क्वान्यत्र? स्वरे।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यूनतापूर्तिः

(458. आक्षेपवार्तिकम्- 1)

*** वा नामधेयस्य ***

भाष्यम्- वा नामधेयस्य वृद्धसञ्ज्ञा वक्तव्या। देवदत्तीयाः। दैवदत्ताः। यज्ञदत्तीयाः। याज्ञदत्ताः।

(459. आक्षेपवार्तिकम्- 2)

*** गोत्रोत्तरपदस्य च ***

भाष्यम्- गोत्रोत्तरपदस्य च वृद्धसञ्ज्ञा वक्तव्या। कम्बलचारायणीयाः। ओदनपाणिनीयाः। घृतरौढीयाः।

(460. न्यासान्तरेण वार्तिकम्- 3)

*** गोत्रान्ताद्वाऽसमस्तवत् ***

भाष्यम्- गोत्रान्ताद्वा असमस्तवत्प्रत्ययो भवतीति वक्तव्यम्। एतान्येवोदाहरणानि।

आक्षेपभाष्यम्- किमविशेषेण?

समाधानभाष्यम्- नेत्याह।

(461. शेषवार्तिकम्- 4)

*** जिह्वाकात्यहरितकात्यवर्ज्जम् ***

भाष्यम्- जिह्वाकात्यं हरितकात्यं च वर्जयित्वा। जैह्वाकाताः। हारितकाताः।

आक्षेपभाष्यम्- किं पुनरत्र ज्यायः?

समाधानभाष्यम्- 'गोत्रान्ताद्वाऽसमस्तवत्' इत्येव ज्यायः। इदमपि सिद्धं भवति—पिङ्गलकाण्व्यस्य छात्राः पैङ्गलकाण्वाः। वृद्धिर्यस्याचामादिस्तद्वृद्धम्।

(68. वृद्धसञ्ज्ञासूत्रम् 1.1.9 आ. 14)

त्यदादीनि च 1.1.74

अनुवृत्तिनिर्णयः

आक्षेपभाष्यम्- यस्याचामादिग्रहणमनुवर्तते, उताहो न।

भाष्यम्- किं चातः?

अनुवृत्तिपक्षे दूषणभाष्यम्- यद्यनुवर्तते, इह च प्रसज्येत—त्वत्पुत्रस्य च्छात्राः त्वात्पुत्राः, मात्पुत्राः। इह च न स्यात्—त्वदीयः, मदीय इति।

निवृत्तिपक्षे दूषणभाष्यम्- अथ निवृत्तम्, 'एङ् प्राचां देशे' यस्माचामादिग्रहणं कर्तव्यम्।

अनुवृत्तिपक्षाभ्युपगमभाष्यम्- एवं तर्ह्यनुवर्तते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्- कथं त्वात्पुत्रा मात्पुत्रा इति?

समाधानभाष्यम्- सम्बन्धमनुवर्तिष्यते—'वृद्धिर्यस्याचामादिस्तद् वृद्धम्'। 'त्यदादीनि च' वृद्धसञ्ज्ञानि भवन्ति, वृद्धिर्यस्याचामादिस्तद् वृद्धम्। 'एङ् प्राचां देशे' यस्याचामादिग्रहणमनुवर्तते, वृद्धिग्रहणं निवृत्तम्। तद्यथा—कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति। त्यदादीनि च।

(69. वृद्धसञ्ज्ञासूत्रम् 1.1.9 आ. 15)

एङ् प्राचां देशे 1.1.75

विषयनिर्णयः

(आक्षेपभाष्यवार्तिकम्)

*** एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम् ***

भाष्यम्- सैपुरिकी, सैपुरिका। स्कौनगरिकी, स्कौनगरिकेति। एङ् प्राचां देशे।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम्; पादश्चायं समाप्तः

●

प्रथमेऽध्याये द्वितीये पादे प्रथममाह्निकम्

विधिशेषप्रकरणे ङित्प्रकरणम्

(69. ङित्त्वातिदेशसूत्रम् 1.2.1 आ. 1 सू.)

75. गाङ्कुटादिभ्योऽञ्णिन् ङित् 1.2.1

अतिदेशत्वनिर्णयाधिकरणम्

(569. सम्बन्धपक्षनिराकरणवार्त्तिकम्-1)

*** ङित्किद्वचने तयोरभावादप्रसिद्धिः ***

भाष्यम्- ङित्किद्वचने तयोरभावात् ङकारककारयोरभावात् ङित्त्वकित्त्वयोरप्रसिद्धिः। सता ह्यभिसम्बन्धः शक्यते कर्तुम्। न चात्र ङकारककारावितौ पश्यामः। तद्यथा—'चित्रगुर्देवदत्तः' इति यस्य ता गावो भवन्ति स एव ताभिः शक्यतेभिसम्बन्धुम्।

भावनपक्षाभ्युपगमभाष्यम्- भाव्येते तर्ह्यनेन—गाङ्कुटादिभ्योऽञ्णिन् ङिद्भवतीति असंयोगाल्लिट् किद् भवतीति।

(570. भावनपक्षनिराकरणवार्त्तिकम्-2)

*** भवतीति चेदादेशप्रतिषेधः ***

भाष्यम्- भवतीति चेदादेशस्य प्रतिषेधो वक्तव्यः। ङकारककारावितावादेशौ प्राप्नुतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कथं पुनरित्सञ्ज्ञो नामादेशः स्यात्?

आदेशत्वसाधकभाष्यम्– किं हि वचनान्न भवति?

ओदशत्वबाधकभाष्यम्– एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः।

आदेशत्वसाधकभाष्यम्– गाङ्कुटादिभ्य इत्येषा पञ्चमी अञ्णिदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति।

सञ्ज्ञाकरणपक्षाभ्युपगमभाष्यम्– सञ्ज्ञाकरणं तर्हीदम्—गाङ्कुटादिभ्योऽञ्णित् ङित्सञ्ज्ञो भवतीति। असंयोगाल्लिट् कित्सञ्ज्ञो भवतीति।

(571. सञ्ज्ञाकरणपक्षदूषणवार्त्तिकम्-3)

* सञ्ज्ञाकरणे क्ङिद्ग्रहणेऽसम्प्रत्ययः शब्दभेदात् *

भाष्यम्– सञ्ज्ञाकरणे क्ङिद्ग्रहणे असम्प्रत्ययः स्यात्। किं कारणम्? शब्दभेदात्। अन्यो हि शब्दः क्ङितीति। अन्यः कितीति ङितीति च। तथा किद्ग्रहणेषु ङिद्ग्रहणेषु चानयोरेव सम्प्रत्ययः स्यात्।

तद्वदतिदेशपक्षाभ्युपगमभाष्यम्– तद्वदतिदेशस्तर्ह्ययम्—गाङ्कुटादिभ्यः अञ्णित् ङिद्वद्भवतीति। असंयोगाल्लिट् किद्वद्भवतीति।

आक्षेपभाष्यम्– स तर्हि वतिनिर्देशः कर्तव्यः।

समाधानभाष्यम्– न कर्तव्यः।

आक्षेपसाधक (समाधानबाधक)भाष्यम्– नह्यन्तरेण वतिमतिदेशो गम्यते।

आक्षेपबाधक(समाधानसाधक)भाष्यम्– अन्तरेणापि वतिमतिदेशो गम्यते तद्यथा—'एष ब्रह्मदत्तः' अब्रह्मदत्तं ब्रह्मदत्त इत्याह। ते मन्यामहे—ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यङितं ङिदित्याह, ङिद्वदिति गम्यते। अकितं किदित्याह, किद्वदिति गम्यते।

(572. अतिदेशपक्षदूषणवार्त्तिकम्-4)

* तद्वदतिदेशेऽकिद्विधिप्रसङ्गः *

भाष्यम्– तद्वदतिदेशे अकिद्विधिरपि प्राप्नोति। 'सृजिदृशोर्झल्यमकिति' सिसृक्षति दिदृक्षते, अकिल्लक्षणोऽमागमः प्राप्नोति।

(573. समाधानवार्त्तिकम्-5)

* सिद्धं तु प्रसज्यप्रतिषेधात् *

भाष्यम्– सिद्धमेतत्। कथम्? प्रसज्यायं प्रतिषेधः क्रियते—किति नेति।

(574. आक्षेपवार्त्तिकम्-6)

* सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः *

भाष्यम्– सर्वेषु पक्षेषु सन्नन्तादात्मनेपदं प्राप्नोति। उच्चुकुटिषति निचुकुटिषति। 'ङितः' इत्यात्मनेपदं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(575. समाधानवार्त्तिकम्-7)

*** सिद्धं तु पूर्वस्य कार्यातिदेशात् ***

भाष्यम्– सिद्धमेतत्। कथम्? पूर्वस्य यत्कार्यं तदतिदिश्यते।

आक्षेपभाष्यम्– किं वक्तव्यमेतत्?

समाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? सप्तम्यर्थेऽपि वतिर्भवति। तद्यथा—मधुरायामिव 'मधुरावत्' पाटलिपुत्र इव 'पाटलिपुत्रवत्'। एवं ङितीव 'ङिद्वत्', कितीव 'किद्वत्'।

पृथगनुबन्धप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ किमर्थं पृथङ्ङित्कितौ क्रियेते, न सर्वं किदेव स्यात्, ङिदेव वा।

(576. प्रयोजनवार्त्तिकम्-8)

*** पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसम्प्रसारणं सार्वधातुकचङादिषु ***

भाष्यम्– पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसम्प्रसारणं सार्वधातुके चङादिषु च। सार्वधातुके प्रयोजनम्—यथेह भवति सुप्तः सुप्तवानिति, एवं 'स्वपितः, स्वपिथः' इत्यत्रापि प्राप्नोति। चङादिषु च प्रयोजनम्। के पुनश्चङादयः?

चङङ्नजिङ्ङ्वनिबथङ्नङः। चङ्—यथेह भवति 'शूनः शूनवानिति, एवम् 'अशिश्वियत्' अत्रापि प्राप्नोति। अङ्—यथेह भवति शून उक्त इति। एवम् 'अश्वद् अवोचद्' अत्रापि प्राप्नोति। नजिङ्—यथेह भवति सुप्तः सुप्तवान् इति, एवं 'स्वप्नग्' इत्यत्रापि प्राप्नोति। ङ्वनिप्—यथेह भवतीष्टमिष्टवानिति, एवं 'यज्वा' अत्रापि प्राप्नोति। अथङ्—यथेह भवत्युषित इति, एवम् 'आवसथः' अत्रापि प्राप्नोति। नङ्—यथेह भवतीष्टमिति, एवं 'यज्ञः' अत्रापि प्राप्नोति।

(577. प्रयोजनवार्त्तिकम्-9)

*** जाग्रोगुणविधिः ***

भाष्यम्– जागर्तेरगुणविधिः प्रयोजनम्। यथेह भवति—जागृतः जागृथ इत्यङितीति पर्युदासः। एवं जागरितः जागरितवानित्यत्रापि प्राप्नोति।

भाष्यम्—अपर आह—'जाग्रो गुणविधिः।' जागर्तेर्गुणविधिः प्रयोजनम्। यथेह भवति—जागरितः जागरितवानिति। एवं जागृतः जागृथ इत्यत्रापि प्राप्नोति।

(578. प्रयोजनवार्त्तिकम्-10)

*** कुटादीनामिट्प्रतिषेधः ***

भाष्यम्– कुटादीनामिट्प्रतिषेधः प्रयोजनम्। यथेह भवति—'लूत्वा, धूत्वा' इति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'श्र्युकः क्किति' इतीट्प्रतिषेधः, एवं 'नुविता, धुविता' अत्रापि प्राप्नोति।

(579. प्रयोजनवार्त्तिकम्-11)

*** क्त्वायां कित्प्रतिषेधश्च ***

भाष्यम्– 'क्त्वायां कित्प्रतिषेधश्च प्रयोजनम्' किं 'च' इट्प्रतिषेधः? नेत्याह। अदेशेयं चः पठितः—'क्त्वायां च कित्प्रतिषेध' इति। यथेह भवति—देवित्वा सेवित्वेति 'न क्त्वा सेट्' इति कित्त्वप्रतिषेधः। एवं 'कुटित्वा, पुटित्वा' अत्रापि प्राप्नोति।

यथान्याससमर्थनभाष्यम्– अथवा देश एवायं चः पठितः—क्त्वायां कित्प्रतिषेधश्चेट्प्रतिषेधश्च। कित्प्रतिषेध उदाहृतम्। इट्प्रतिषेधो यथेह भवति 'लूत्वा धूत्वा' 'श्र्युकः क्किति' इति। एवं 'नुवित्वा, धुवित्वा' अत्रापि प्राप्नोति।

यथान्याससमर्थनबाधकभाष्यम्– स्यादेतत्प्रयोजनं यद्यस्य नियोगत आतिदेशिकेन ङित्त्वेनौपदेशिकं कित्त्वं बाध्येत। सत्यपि तु ङित्त्वे किदेवैषः। तस्मान्नूत्वा धूत्वेत्येव भवितव्यम्। गाङ्कुटादिभ्योऽञ्णिन्ङित्।।1।।

(70. ङित्त्वातिदेशसूत्रम् 1.2.1 आ. 2)

78. सार्वधातुकमपित् 1.2.4

सार्वधातुकपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– सार्वधातुकग्रहणं किमर्थम्?

समाधानभाष्यम्– अपिदितीयत्युच्यमाने आर्धधातुकस्याप्यनेनापितो ङित्त्वं प्रसज्येत—कर्ता हर्ता।

समाधाननिराकरणभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—नानेनार्धधातुकस्यापितो ङित्त्वं भवतीति। यदयमार्धधातुकीयान् कांश्चिद् ङितः करोति चङङ्नजिङ्ङ्वनिबथङ्नङः।

निराकरणबाधकभाष्यम्– सार्वधातुकेप्येतज्ज्ञापकं स्यात्।

निराकरणसाधकभाष्यम्– नेत्याह। तुल्यजातीयस्य ज्ञापकम्। कश्च तुल्यजातीयः? यथाजातीयकाश्चङङ्नजिङ्ङ्वनिबथङ्नङः। आर्धधातुकीयः।

समाधानसाधकभाष्यम्– यद्येतदस्ति तुल्यजातीयस्य ज्ञपकमिति, चङ्ङौ लुङ्विकरणानां ज्ञापकौ स्याताम्, नजिङ्वर्तमानकालानाम्, ङ्वनिब् भूतकालानाम्, अथङ्शब्द औणादिकानाम, नङ्शब्दो घञर्थानाम्। तस्मात्सार्वधातुकग्रहणं कर्तव्यम्।

पर्युदासप्रसज्यप्रतिषेधनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं पुनरयं पर्युदासः—यदन्यत्पित इति, आहोस्वित्प्रसज्यायं प्रतिषेधः—पिन्नेति?

प्रत्याक्षेपभाष्यम्– कश्चात्र विशेषः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(580. आक्षेपवार्त्तिकम्-1)

*** अपिद् ङिदिति चेत् शबेकादेशप्रतिषेध आदिवत्त्वात् ***

पर्युदासपक्षेदूषणभाष्यम्– अपिन् ङिदिति चेत् शबेकादेशे प्रतिषेधो वक्तव्यः। च्यवन्ते प्लवन्ते। किं कारणम्? आदिवत्त्वात्। पिदपितोरेकादेशोपित आदिवत्स्यात्। अस्त्यन्यत्पित इति कृत्वा ङित्त्वं प्राप्नोति।

प्रसज्यप्रतिषेधाभ्युपगमभाष्यम्– अस्तु तर्हि प्रसज्यप्रतिषेधः—पिन्नेति।

(581. आक्षेपवार्त्तिकम्-2)

*** न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः ***

भाष्यम्– न पिन्ङिदिति चेदुत्तमैकादेशे प्रतिषेधः प्राप्नोति। तुदानि लिखानि। किं कारणम्? आदिवत्त्वादेव। पिदपितोरेकादेशः पित आदिवत् स्यात्। तत्र पिन्नेति प्रतिषेधः प्राप्नोति।

सिद्धान्तिभाष्यम्– यथेच्छसि तथास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तमुभयथापि—दोष इति।

समाधानभाष्यम्– उभयथापि न दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावादण्यवधानम्। सार्वधातुकमपित्।।4।।

कित्प्रकरणम्

(71. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 3)

79. असँय्योगाल्लिट्कित् 1.2.5

(582. सिद्धान्तवार्त्तिकम्-1)

*** ऋदुपधेभ्यो लिटः कित्वं गुणाद्विप्रतिषेधेन ***

भाष्यम्– ऋपधेभ्यो लिटः कित्त्वं गुणाद्भवति विप्रतिषेधेन। ववृते ववृधे।

(583. वार्त्तिकम्-2)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्? 'न वा क्सस्यानवकाशत्वादपवादो गुणस्य' इति।

अनवकाशत्वबाधकभाष्यम्– विषम उपन्यासः। युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधते। इह पुनरुभयं सावकाशम्—कित्करणस्यावकाशः—ईजतुः, ईजुः। गुणस्यावकाशः—वर्तिता वर्द्धिता। इहोभयं प्राप्नोति—ववृते ववृधे। परत्वाद् गुणः प्राप्नोति।

भाष्यम्– इदं तर्ह्युक्तम्—'इष्टवाची परशब्दः' इति। विप्रतिषेधे परं यदिष्टं तद्भवति इति। असंयोगाल्लिट्कित्।।5।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(72. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 4)

80. इन्धिभवतिभ्यां च 1.2.6

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

समाधानभाष्यम्– इन्धेः संयोगार्थं वचनम्। भवतेः पिदर्थम्।

प्रत्याख्यानभाष्यम्– अयं योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्?

(584. प्रत्याख्यानवार्त्तिकम्-1)

*** इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां किद्वचनानर्थक्यम् ***

भाष्यम्– इन्धेश्छन्दोविषयो लिट्। नह्यन्तरेण छन्द इन्धेरनन्तरो लिट् लभ्यः। आमा भाषायां भवितव्यम्। भुवो वुको नित्यत्वाद्। भवतेरपि नित्यो वुक् कृते गुणे प्राप्नोति, अकृतेपि प्राप्नोति। ताभ्यां किद्वचनानर्थक्यम्। ताभ्यामिन्धिभवतिभ्यां किद्वचनमनर्थकम्।।इन्धिभवतिभ्यां च।।6।।

(73. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 5)

81. मृडमृदगुधकुषक्लिशवदवसः क्त्वा 1.2.7

आक्षेपभाष्यम्– किमर्थं मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते। न किदेव हि क्त्वा?

समाधानभाष्यम्– 'न क्त्वा सेड्' इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्।

लाघवभाष्यम्– यदि तर्हि मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते नार्थो 'न क्त्वा सेड्' इत्यनेन कित्त्वप्रतिषेधेन। इदं नियमार्थं भविष्यति—मृडादिभ्य एव परस्य क्त्वः कित्त्वं भवति नान्येभ्य इति।

आक्षेपभाष्यम्– यदि नियमः क्रियते, इहापि तर्हि नियमात्र प्राप्नोति—लूत्वा पूत्वा। अत्राप्यकित्त्वं प्राप्नोति।

आक्षेपबाधकभाष्यम्– तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः? यथाजातीय को मृडादिभ्यः परः क्त्वा। कथंजातीयकश्च मृडादिभ्यः परः क्त्वा? सेट्।

आक्षेपसाधकभाष्यम्– एवमप्यस्त्यत्र कश्चिद्विभाषितेट् सोनिटां नियामकः स्यात्।

आक्षेपबाधकभाष्यम्– अस्तु तावद्ये सेटस्तेषां ग्रहणं नियमार्थम्। य इदानीं विभाषितेट् तस्य ग्रहणं विध्यर्थं भविष्यति। रुदविदमुषग्रहिस्वपिप्रच्छ्गोः सन्नर्थं ग्रहणम्। किदेव हि क्त्वा। मृडमृदगुधकुष।।7।।

(74. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 6)

83. इको झल् 1.2.9

योगविभागप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिकः परस्य सनः कित्त्वमुच्यते?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(585. समाधानवार्त्तिकम्-1)

*** इक: कित्त्वं गुणो मा भूत् ***

भाष्यम्– इक: कित्त्वं क्रियते गुणो मा भूदिति। चिचीषति। तुष्टूषति।

समाधाननिराकरणभाष्यम्– नैतदस्ति प्रयोजनम्।

(586. निराकरणहेतुवार्त्तिकम्-2)

*** दीर्घारम्भात् ***

भाष्यम्– दीर्घत्वमत्र बाधकं भविष्यति।

(587. समाधानबाधकवार्त्तिकम्-3)

*** कृते भवेत् ***

भाष्यम्– कृते खलु दीर्घत्वे गुण: प्राप्नोति।

(588. आक्षेपवार्त्तिकम्-4)

*** अनर्थकं तु ***

भाष्यम्– अनर्थकमेवं सति दीर्घत्वं स्यात्। नानर्थकम्।

(589. आक्षेपसमाधानवार्त्तिकम्-5)

*** ह्रस्वार्थम् ***

भाष्यम्– ह्रस्वानां दीर्घवचनसामर्थ्याद् गुणो न भविष्यति।

आक्षेपशेषभाष्यम्– भवेद् ह्रस्वानां दीर्घवचनसामर्थ्याद् गुणो न स्यात्।

(590. आक्षेपवार्त्तिकम्-6)

*** दीर्घाणां तु प्रसज्यते ***

भाष्यम्– दीर्घाणां तु खलु गुण: प्राप्नोति।

आक्षेपबाधकभाष्यम्– दीर्घाणामपि दीर्घवचनसामर्थ्याद् गुणो न भविष्यति।

आक्षेपसाधकभाष्यम्– न दीर्घाणां दीर्घा: प्राप्नुवन्ति। किं कारणम्? नहि भुक्तवान् पुनर्भुङ्क्ते, कृतश्मश्रुश्च पुन: श्मश्रूणि कारयति।

आक्षेपबाधकभाष्यम्– ननु च पुन: प्रवृत्तिरपि दृष्टा—भुक्तवानपि पुनर्भुङ्क्ते, कृतश्मश्रुश्च पुन: श्मश्रूणि कारयति।

(591. आक्षेपसाधकवार्त्तिकम्-7)

*** सामर्थ्याद्धि पुनर्भाव्यम् ***

भाष्यम्– सामर्थ्याद्धि पुन: प्रवृत्तिर्भवति। भोजनविशेषाच्छिल्पिविशेषाद्वा। दीर्घाणां पुनर्दीर्घत्ववचने न किञ्चित्प्रयोजनमस्ति। 'अकृतकारि खल्वपि शास्त्रमग्निवत्। तद्यथा—अग्निर्यददग्धं तद्दहति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्– दीर्घाणामपि दीर्घवचन एतत्प्रयोजनं गुणो मा भूदिति। 'कृतकारि खल्वपि शास्त्रं पर्जन्यवत्' तद्यथा—पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति।

आक्षेपभाष्यम्– यथैव तर्हि दीर्घत्ववचनसामर्थ्याद् गुणो न भवति। एवमृदित्त्वमपि न प्राप्नोति—चिकीर्षति जिहीर्षति।

(592. **समाधानवार्त्तिकम्**-8)

*** ऋदित्त्वं दीर्घसंश्रयम् ***

भाष्यम्– नाकृते दीर्घे ऋदित्त्वं प्राप्नोति। किं कारणम्? ऋत इत्युच्यते।

समाधानबाधकभाष्यम्– भवेद् ह्रस्वानां नाकृते दीर्घे ऋदित्त्वं स्याद्, दीर्घाणां तु खल्वकृतेपि दीर्घत्वे ऋदित्त्वं प्राप्नोति।

(593. **समाधानसाधकवार्त्तिकम्**-9)

*** दीर्घाणां नाकृते दीर्घे ***

भाष्यम्– दीर्घाणामपि नाकृते दीर्घत्वे ऋदित्त्वं प्राप्नोति। यदा दीर्घत्वेन गुणो बाधितः तत उत्तरकालमृदित्त्वं भवति।

(594. **समाधानवार्त्तिकम्**-10)

*** णिलोपस्तु प्रयोजनम् ***

भाष्यम्– इदं तर्हि प्रयोजनम्। णिलोपो यथा स्यात्—ज्ञीप्सति।

समाधानबाधकभाष्यम्– क्वास्ताः क्व निपतिताः क्व कित्त्वं क्व णिलोपः। को वाऽभिसम्बन्धः—यत्सति कित्त्वे णिलोपः स्याद्, असति कित्त्वे न स्यात्?

समाधानसाधकभाष्यम्– एषोभिसम्बन्धः—यत्सति कित्त्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधते। असति पुनः कित्त्वेनवकाशं दीर्घत्वं यथैव गुणं बाधते, एवं णिलोपमपि बाधेत। तत्र णिलोपस्यावकाशः—कारणा हारणा। दीर्घत्वस्यावकाशः– चिचीषति तुष्टूषति। इहोभयं प्राप्नोति—ज्ञीप्सति। परत्वाण्णिलोपः।

समाधानबाधकभाष्यम्– असत्यपि कित्त्वे सावकाशं दीर्घत्वम्। कोवकाशः? इस्भावः—निमित्सति प्रमित्सति। मीनातिमिनोत्योर्दीर्घत्वे कृते मीग्रहणेन ग्रहणं यथा स्यात्।

समाधानसाधकभाष्यम्– यथैव तर्ह्यसति कित्त्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधते, एवं गुणोपि बाधेत। तस्मात्कित्त्वं वक्तव्यम्। इकः कित्त्वं गुणो मा भूद् दीर्घारम्भात्कृते भवेत्। अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते।।1।।

सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम्। दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम्।।2।।

(75. **कित्त्वातिदेशसूत्रम्** 1.2.1 आ. 7)

84. हलन्ताच्च 2.2.10

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौत्रनिर्देशोपपादनाधिकरणम्

आक्षेपभाष्यम्– अयुक्तोयं निर्देशः। कथं हि इको नाम हलन्तः स्यादन्यस्यान्यः?

प्रत्याक्षेपभाष्यम्– कथं तर्हि निर्देशः कर्तव्यः?

प्रत्याक्षेपसमाधानभाष्यम्– 'इग्वतो हलः' इति।

आक्षेपबाधकभाष्यम्– यद्येवं 'यियक्षति' अत्रापि प्राप्नोति।

न्यासान्तराशयभाष्यम्– एवं तर्हि 'इगुपधाद्धलन्ताद्' इति वक्ष्यामि।

न्यसान्तरदूषणभाष्यम्– एवमपि दम्भेर्न प्राप्नोति। सूत्रं च भिद्यते।

सिद्धान्तिसमाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'अयुक्तोयं निर्देशः' इति।

समाधानभाष्यम्– नायुक्तः। अयमन्तशब्दोऽस्त्येवावयववाची। तद्यथा—'वस्त्रान्तः, वसनान्तः' इति, वस्त्रावयवो वसनावयव इति गम्यते। अस्ति सामीप्ये वर्तते। तद्यथा—'उदकान्तं गतः' इति, उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्तते, तस्येदं ग्रहणम्।

आक्षेपभाष्यम्– एवमपि दम्भेर्न सिध्यति। यो ह्यत्रेक्समीपो हल्, न तस्मादुत्तरः सन्, यस्मादुत्तरः सन् नासाविक्समीपे।

समाधानभाष्यम्– एवं तर्हि—

(595. सिद्धान्तसमाधानवार्त्तिकम्-1)

*** दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् ***

भाष्यम्– हल्जातिर्निर्दिश्यते—इक उत्तरा या हल्जातिरिति। हलन्ताच्च।।10।।

(76. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 8)

85. लिङ्सिचावात्मनेपदेषु 1.2.11

आत्मनेपदपदान्वयाधिकरणम्

आक्षेपभाष्यम्– कथमिदं विज्ञायते—आत्मनेपदं यौ लिङ्सिचाविति। आहोस्विदात्मनेपदेषु परतो यौ लिङ् सिचाविति?

फलभेदजिज्ञासाभाष्यम्– किं चातः?

अनुपपत्तिभाष्यम्– यदि विज्ञायते—आत्मनेपदं यौ लिङ्सिचाविति। लिङ् विशेषितः, सिजविशेषितः। अथ विज्ञायते—आत्मनेपदेषु परतो यौ लिङ्सिचाविति। सिज्विशेषितः, लिङविशेषितः।

अनुपपत्तिपरिहारभाष्यम्– यथेच्छसि तथास्तु।

प्रथमपक्षाभ्युपगमभाष्यम्– अस्तु तावद्—'आत्मनेपदं यौ लिङ्सिचौ' इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'लिङ् विशेषितः, सिजविशेषितः' इति।

आक्षेपनिरसनभाष्यम्– सिच्च विशेषितः। कथम्! आत्मनेपदं सिज्नास्तीति कृत्वा आत्मनेपदपरे सिचि कार्यं विज्ञास्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु—आत्मनेपदेषु परतो यौ लिङ्सिचौ—इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—सिज्विशेषितो लिङविशेषितः—इति।

आक्षेपनिरसनभाष्यम्– लिङ् च विशेषितः। कथम्? आत्मनेपदेषु परतो लिङ् नास्तीति कृत्वाऽऽत्मनेपदे लिङि कार्यं विज्ञास्यते।

आक्षेपवैयर्थ्यभाष्यम्– नैव वा पुनरर्थो लिङ्विशेषणेनात्मनेपदग्रहणेन। किं कारणम्? झलिति वर्तते। आत्मनेपदेषु नैव लिङ् झलादिः, न परस्मैपदेषु। तदेतत्सिज्विशेषणमात्मनेपदग्रहणम्।

आक्षेपभाष्यम्– अथ सिज्विशेषणे आत्मनेपदग्रहणे सति किं प्रयोजनम्?

प्रयोजनभाष्यम्– इह मा भूत्—अपाक्षीत्। अवाप्सीत्।

प्रयोजनबाधकभाष्यम्– नैतदस्ति। इक इति वर्तते।

प्रयोजनान्तरभाष्यम्– एवमपि—अचैषीत् अनैषीत्, अत्रापि प्राप्नोति।

प्रयोजनान्तरनिरसनभाष्यम्– एतदपि नास्ति प्रयोजनम्। हलन्तादिति वर्तते।

प्रयोजनान्तरभाष्यम्– एवमपि अकोषीद् अमोषीद् अत्रापि प्राप्नोति।

प्रयोजनान्तरनिरसनभाष्यम्– नैतदस्ति। झलिति वर्तते।

प्रयोजनान्तरभाष्यम्– एवमपि—अभैत्सीत् अच्छैत्सीत् अत्रापि प्राप्नोति।

प्रयोजनान्तरनिरसनभाष्यम्– नैतदस्ति। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः।

प्रयोजनभाष्यम्– इदं तर्हि प्रयोजनम्—इह मा भूत्—अस्राक्षीदद्राक्षीदिति। किं च स्याद्? अकिल्लक्षणोऽमागमो न स्यात्। लिङ्सिचावात्मनेपदेषु ।।11।।

(77. **कित्त्वातिदेशसूत्रम्** 1.2.1 आ. 9)

91. स्थाध्वोरिच्च 1.2.17

तपरनिर्देशप्रयोजनाधिकरणम्

(596. **आक्षेपवार्त्तिकम्**- 1)

*** इच्च कस्य तकारेत्त्वम् ***

भाष्यम्– कस्य हेतोरिकारस्तपरः क्रियते।

(597. **समाधानवार्त्तिकम्**- 2)

*** दीर्घो मा भूत् ***

भाष्यम्– दीर्घो मा भूदिति।

(598. **समाधानबाधकवार्त्तिकम्**- 3)

*** ऋतेपि सः ***

भाष्यम्– अन्तरेणाप्यारम्भं सिद्धोऽत्र दीर्घः 'घुमास्थागापाजहातिसां हलि' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(599. **समाधानबाधकवार्त्तिकम्**-4)

* अनन्तरे प्लुतो मा भूत् *

भाष्यम्– इदं तर्हि प्रयोजनम्—अनन्तरे प्लुतो मा भूदिति। कुतो नु खल्वेतत्—अनन्तरार्थ आरम्भे ह्रस्वो भविष्यति, न पुनः प्लुत इति?

(600. **प्रयोजनान्तरनिराकरणवार्त्तिकम्**-5)

* प्लुतश्च विषये स्मृतः *

भाष्यम्– विषये प्लुत उच्यते। यदा च स विषयो, भवितव्यमेव तदा प्लुतेन। इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेपि सः। अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः।।1।। स्थाध्वोरिच्च।।17।।

(78. **कित्त्वाभावातिदेशसूत्रम्** 1.2.1 आ. 10)

92. न क्त्वा सेट् 1.2.18

क्त्वाग्रहणप्रत्याख्यानाधिकरणम्

(601. **सिद्धान्तवार्त्तिकम्**-1)

* न सेडिति कृतेऽकित्त्वे *

भाष्यम्– न सेडित्येव सिद्धम्, नार्थः क्त्वाग्रहणेन।

आक्षेपभाष्यम्– निष्ठायामपि तर्हि प्राप्नोति—गुधितः गुधितवानिति।

(602. **समाधानवार्त्तिकम्**-2)

* निष्ठायामवधारणात् *

भाष्यम्– निष्ठायामवधारणान्न भविष्यति। किमवधारणम्? 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः' इति।

आक्षेपभाष्यम्– परोक्षायां तर्हि प्राप्नोति। किं च स्यात्? पपिवपपिम क्ङितीत्याकारलोपो न स्यात्।

आक्षेपबाधकभाष्यम्– मा भूदेवम्, इटीत्येवं भविष्यति।

आक्षेपसाधकभाष्यम्– इदं तर्हि—जग्मिव जघ्निव क्ङितीत्युपधालोपो न स्यात्।

(603. **समाधानवार्त्तिकम्**-3)

* ज्ञापकान्न परोक्षायाम् *

भाष्यम्– ज्ञापकात्परोक्षायां न भविष्यति।

आक्षेपभाष्यम्– किं ज्ञापकम्?

(604. **समाधानवार्त्तिकम्**-4)

* सनि झल्ग्रहणं विदुः *

भाष्यम्– यदयम् 'इको झल्' इति झल्ग्रहणं करोति तज् ज्ञापयत्याचार्यः—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्य' इति। कथं कृत्वा ज्ञापकम्? झल्ग्रहणस्यैतत्प्रयोजनं झलादौ यथा स्यात्। इहमा भूत्—शिशयिषत इति। यदि चात्रातिदेशिकस्यापि कित्त्वस्य प्रतिषेधः स्यात्, झल्ग्रहणमनर्थकं स्यात्। अस्त्वत्र कित्त्वम्, 'न सेड्' इति प्रतिषेधो भविष्यति। पश्यति त्वाचार्य औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति, ततो झल्ग्रहणं करोति।

समाधानबाधकभाष्यम्– नैतदस्ति ज्ञापकम्। उत्तरार्थमेतत्स्यात् 'स्थाघ्वोरिच्च' झलादौ यथा स्यात्। इह मा भूत्—उपास्थायिषाताम् उपास्थायिषत।

(605. **समाधानसाधकवार्त्तिकम्**-5)

*** इत्त्वं कित्संनियोगेन ***

भाष्यम्– कित्त्वसंनियोगेनेत्त्वमुच्यते। तेनासति कित्त्वे इत्त्वं न भविष्यति।

(606. **दृष्टान्तवार्त्तिकम्**-6)

*** रेण तुल्यं सुधीवनि ***

भाष्यम्– तद्यथा—सुधीवा सुपीवेति ङीप्संनियोगेन र उच्यमानोऽसति ङीपि न भवति।

इत्त्वेपीष्टापत्तिभाष्यम्– अथवाऽस्त्वत्रेत्त्वम्। का रूपसिद्धिः? वृद्धौ कृतायामायादेशो भविष्यति।

(607. **प्रयोजनवार्त्तिकम्**-7)

*** वस्वर्थम् ***

भाष्यम्– वस्वर्थं तर्हि क्त्वाग्रहणं कर्तव्यम्। वसोर्ह्यौपदेशिकं कित्त्वम्। किं च स्यात्? पपिवान् तस्थिवान् कितीत्याकारलोपो न स्यात्।

प्रयोजनबाधकभाष्यम्– 'मा भूदेवम्' इटीत्येवं भविष्यति।

प्रयोजनसाधकभाष्यम्– इदं तर्हि जग्मिवान् जघ्निवान् कितीत्युपधालोपो न स्यात्।

(608. **प्रयोजनबाधकवार्त्तिकम्**-8)

*** किदतिदेशात् ***

भाष्यम्– अस्त्वत्रौपदेशिकस्य कित्त्वस्य प्रतिषेधः। आतिदेशिकमत्र कित्त्वं भविष्यति।

प्रयोजनसाधकभाष्यम्– यत्र तर्हि तत्प्रतिषिध्यते—अञ्जेः—आजिवानिति।

प्रयोजनबाधकभाष्यम्– एवं तर्हि च्छान्दसः क्वसुः। लिट् च च्छन्दसि सार्वधातुकमपि भवति। तत्र सार्वधातुकमपिन्ङिद्भवतीति ङित्युपधालोपो भविष्यति।

(609. **प्रयोजनवार्त्तिकम्**-9)

*** (नि) गृहीतिः ***

भाष्यम्– इदं तर्हि प्रयोजनम्। इह मा भूत—निगृहीतिः। उपस्निहितिः निकुचितिः।

आक्षेपभाष्यम्– तत्तर्हि क्त्वाग्रहणं कर्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याख्यानभाष्यम्– न कर्तव्यम्।

(610. **प्रत्याख्यानसाधकवार्त्तिकम्**-10)

*** क्त्वा च विग्रहात् ***

भाष्यम्– उपरिष्टाद् योगविभागः करिष्यते—'न सेड् निष्ठा शीङस्विदिमेदिक्ष्विदिधृषः' 'मृषस्तितिक्षायाम्' 'उदुपधाद्भावादिकर्मणोरन्यतरस्याम्'। ततः—'पूङ' पूङश्च निष्ठा सेट् किन्न भवति। ततः—'क्त्वा च' क्त्वा च सेट् किन्न भवति। पूङ इति निवृत्तम्।

न सेडिति कृतेऽकित्त्वे निष्ठायामवधारणात्। ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः।।1।। इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि। वस्वर्थं किदतीदेशाद् गृहीतिः क्त्वा च विग्रहात्।।2।। न क्त्वा सेट्।।18।।

(79. **कित्त्वाभावातिदेशसूत्रम्** 1.2.1 आ. 11)

95. उदुपधाद्भावादिकर्मणोरन्यतरस्याम् 1.2.21

आक्षेपभाष्यम्– इह कस्मान्न भवति—गुधितः गुधितवान्?

(611. **समाधानवार्त्तिकम्**-1)

*** उदुपधाच्छपः ***

भाष्यम्– शब्विकरणेभ्य इष्यते।। उदुपधाद्।।21।

(80. **कित्त्वातिदेशसूत्रम्** 1.2.1 आ. 12)

96. पूङः क्त्वा च 1.2.22

(612. **आक्षेपवार्त्तिकम्**-1)

*** पूङः क्त्वानिष्ठयोरिटि वाप्रसङ्गः सेट्प्रकरणात् ***

भाष्यम्– पूङः क्त्वानिष्ठयोरिटि विभाषा कित्त्वं प्राप्नोति। किं कारणम्? सेट्प्रकरणात्। सेडिति वर्तते।

(613. **समाधानवार्त्तिकम्**-2)

*** न वा सेट्त्वस्याकिदाश्रयत्वादनिटि वा कित्त्वम् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? सेट्त्वस्याकिदाश्रयत्वाद् । अकिदाश्रयं सेट्त्वम्। यदा अकित्त्वं तदेटा भवितव्यम्। सेट्त्वस्याकिदाश्रयत्वादनिट्येव विभाषा कित्त्वं भविष्यति।

आक्षेपभाष्यम्– इड्विधौ पूङो ग्रहणं क्रियते। तेन वचनादिट्। सेट्प्रकरणाच्च इट्येव विभाषा कित्त्वं प्राप्नोति।

(614. **समाधानवार्त्तिकखण्डम्**-3)

*** इड्विधौ ह्यग्रहणम् ***

भाष्यम्– इड्विधौ हि पूङो ग्रहणं न कर्तव्यं भवति। भारद्वाजीयाः पठन्ति—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(वार्त्तिकम्)

*** नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम् ***

भाष्यम्– नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः सिद्धम्। कथम्? विभाषामध्येऽयं योगः क्रियते। विभाषामध्ये च ये विधयस्ते नित्या भवन्ति। किमर्थं तर्हि क्त्वाग्रहणम्? क्त्वाग्रहणमुत्तरार्थम्। उत्तरार्थं क्त्वाग्रहणं क्रियते—'नोपधात्थफान्ताद्वा' 'वञ्चिलुञ्च्यृतश्च' इति। पूङः क्त्वा च।।22।।

(81. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 13)

99. तृषिमृषिकृषेः काश्यपस्य 1.2.25

आक्षेपभाष्यम्– काश्यपग्रहणं किमर्थम्?

समाधानभाष्यम्– काश्यपग्रहणं पूजार्थम्। वेत्येव हि वर्तते। तृषिमृषिकृषेः काश्यपस्य।।25।।

(82. कित्त्वातिदेशसूत्रम् 1.2.1 आ. 14)

100. रलोव्युपधाद्धलादेः संश्च 1.2.26

आक्षेपभाष्यम्– किमिदं रलः क्त्वानोः कित्त्वं विधीयते। आहोस्वित्प्रतिषिध्यते? किं चातः? यदि विधीयते, क्त्वाग्रहणमनर्थकम्। किदेव कि क्त्वा। अथ प्रतिषिध्यते, सन्ग्रहणमनर्थकम्। अकिदेव हि सन्।

समाधानभाष्यम्– अत उत्तरं पठति—

(615. प्रथमपक्षाङ्गीकारवार्त्तिकम्-1)

*** रलः क्त्वासनोः कित्त्वम् ***

भाष्यम्– रलः क्त्वासनोः कित्त्वं विधीयते।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—क्त्वाग्रहणमनर्थकम्—इति।

समाधानभाष्यम्– नानर्थकम्। 'न क्त्वा सेड्' इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्। रलोव्युपधाद्धलादेः संश्च।।26।।

(83. ह्रस्वादिसञ्ज्ञासूत्रम् 1.2.1 आ. 15)

101. ऊकालोऽज्झ्रस्वदीर्घप्लुतः 1.2.27

सौत्रनिर्देशसाधुत्वाधिकरणम्

आक्षेपभाष्यम्– अयुक्तोऽयं निर्देशः। ऊ इत्यनेन कालः प्रतिनिर्दिश्यते। ऊ इत्ययं च वर्णः। तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम्। कथं तर्हि निर्देशः कर्तव्यः? ऊकालकाल इति। किमिदमूकालकाल इति? ऊ इत्येतस्य काल ऊकालः, ऊकालः कालो यस्य स ऊकालकाल इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटस्थाक्षेपभाष्यम्– स तर्हि तथानिर्देशः कर्तव्यः।

समाधानभाष्यम्– न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवमूकालकाल ऊकाल इति। अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णः। वर्णोऽपि काल एव।

यथासंख्योपपादनाधिकरणम्

(616. **आक्षेपवार्त्तिकम्**- 1)

*** ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात् ***

भाष्यम्– ह्रस्वादिषु समसंख्यत्वस्याप्रसिद्धिः। किं कारणम्? निर्देशवैषम्यात्। तिस्रः सञ्ज्ञा एकः सञ्ज्ञी। वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

(617. (1) **समाधानवार्त्तिकम्**- 2)

*** सिद्धं तु समसंख्यत्वात् ***

भाष्यम्– सिद्धमेतत्। कथम्? समसंख्यत्वात्।

आक्षेपभाष्यम्– कथं समसंख्यत्वम्?

(617. (2) **समाधानसाधकवार्त्तिकखण्डम्**- 3)

*** त्रयाणां हि विकारनिर्देशः ***

भाष्यम्– त्रयाणामयं प्रश्लिष्टनिर्देशः। कथं पुनर्ज्ञायते—त्रयाणामयं प्रश्लिष्टनिर्देश इति? तिसृणां सञ्ज्ञानां करणसामर्थ्यात्।

आक्षेपभाष्यम्– यद्यपि तावत्तिसृणां सञ्ज्ञानां करणसामर्थ्याज्ज्ञायते—त्रयाणामयं प्रश्लिष्टनिर्देश इति। कुतस्त्वेतदेतेनानुपूर्व्येण संनिविष्टानां सञ्ज्ञा भविष्यतीति आदौ मात्रिकस्ततो द्विमात्रस्ततस्त्रिमात्र इति। न पुनर्मात्रिको मध्ये वान्ते वा स्यात्। तथा द्विमात्र आदौ वा स्यादन्ते वा। तथा त्रिमात्र आदौ वा मध्ये वा स्यात्?

समाधानभाष्यम्– अयं तावत् त्रिमात्रोऽशक्य आदौ वा मध्ये वा कर्तुम्। कुतः? प्लुताश्रयो हि प्रकृतिभावः प्रसज्येत। मात्रिकद्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यति।

समाधानबाधकभाष्यम्– यत्तावदुच्यते—अयं तावत् त्रिमात्रोऽशक्य आदौ मध्ये वा कर्तुं प्लुताश्रयो हि प्रकृतिभावः प्रसज्येतेति। प्लुताश्रयः प्रकृतिभावः। प्लुतसञ्ज्ञा चानेनैव। यदि च त्रिमात्र आदौ वा मध्ये वा स्यात् प्लुतसञ्ज्ञैवास्य न स्यात्। कुतः प्रकृतिभावः। यदप्युच्यते मात्रिकद्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यतीति। ह्रस्वाश्रया हि घिसञ्ज्ञा, ह्रस्वसञ्ज्ञा चानेनैव। यदि च मात्रिको मध्ये वान्ते वा स्यात् ह्रस्वसञ्ज्ञैवास्य न स्यात्। कुतो घिसञ्ज्ञा कुतः पूर्वनिपातः। एवमेषा व्यवस्था न प्रकल्पते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानसाधकभाष्यम्– एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—न मात्रिकोऽन्ते भवतीति। यदयं—'विभाषा पृष्टप्रतिवचने हेः' इति मात्रिकस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकम्? यान्ते स प्लुतसञ्ज्ञः। यदि च मात्रिकोन्ते स्यात्। प्लुतसंज्ञाऽस्य स्यात्। तत्र हि मात्राकालस्य मात्राकालवचनमनर्थकं स्यात्।

मध्ये तर्हि स्यादिति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—न मात्रिको मध्ये भवतीति। यदयम्—'अतो दीर्घो यञि, सुपि च' इति दीर्घत्वं शास्ति। कथं कृत्वा ज्ञापकम्? यो मध्ये स दीर्घसञ्ज्ञकः। यदि च मात्रिको मध्ये स्याद्दीर्घसञ्ज्ञास्य स्यात्। तत्र मात्राकालस्य मात्राकालवचनमनर्थकं स्यात्।

द्विमात्रस्तर्ह्यन्ते स्यादिति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—न द्विमात्रोऽन्ते भवतीति। यदयम्—'ओमभ्यादाने' इति द्विमात्रिकस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकम्? योन्ते स प्लुतसञ्ज्ञः। यदि च द्विमात्रोऽन्ते स्यात् प्लुतसञ्ज्ञास्य स्यात्। तत्र द्विमात्राकालस्य द्विमात्राकालवचनमनर्थकं स्यात्। मात्रिकेण चास्य पूर्वनिपातो बाधित इति कृत्वा क्वान्यत्रोत्सहते भवितुमन्यदतो मध्यात्। एवमेषां व्यवथा प्रक्लृप्ता।

दीर्घादिषु ह्रस्वसञ्ज्ञावारणाधिकरणम्

आक्षेपवार्त्तिकशेषभाष्यम्– भवेद् व्यवस्था च प्रक्लृप्ता।

(618. आक्षेपवार्त्तिकम्-4)

*** दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः ***

भाष्यम्– दीर्घप्लुतयोरपि पूर्वसञ्ज्ञा प्राप्नोति। का? ह्रस्वसञ्ज्ञा। किं कारणम्? अण् सवर्णान् गृह्णातीति।

(619. समाधानवार्त्तिकम्-5)

*** सिद्धं तु तपरनिर्देशात् ***

भाष्यम्– सिद्धमेतत्। कथम्? तपरनिर्देशः कर्तव्यः—'उदूकाल' इति।

आक्षेपभाष्यम्– यद्येवं

(620. आक्षेपवार्त्तिकम्-6)

*** द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ***

भाष्यम्– (द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्। तथा मध्यमायां तपरकरणे द्रुतविलम्बितयोरुपसंख्यानं कर्तव्यम्। तथा विलम्बितायां तपरकरणे द्रुतमध्यमयोरुपसंख्यानं कर्तव्यम्। किं पुनः कारणं न सिध्यति? कालभेदात्। ये हि द्रुतायां वृतौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम् ये मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(621. **समाधानवार्त्तिकम्**-7)

* द्रुतादिषु चोक्तम् *

भाष्यम्– किमुक्तम्? 'सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते' इति।

आक्षेपभाष्यम्– स तर्हि तपरनिर्देशः कर्तव्यः।

समाधानभाष्यम्– न कर्तव्यः। इह कालग्रहणं क्रियते। यावच्च तपरकरणं तावच्च कालग्रहणम्। प्रत्येकं च कालशब्दः परिसमाप्यते—उकाल ऊकाल ऊ3काल इति।

समाधानान्तरभाष्यम्– अथवा एकसञ्ज्ञाधिकारेऽयं योगः कर्तव्यः। तत्रैका सञ्ज्ञा भविष्यति या परा अनवकाशा चेति एवं हि दीर्घप्लुतयोः पूर्वसञ्ज्ञा न भविष्यति।

अथवा 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञा' इत्ययं योगः प्रत्याख्यायते। तत्र यदेतद् 'अशब्द-सञ्ज्ञा' इति, यया विभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिष्टमुत्तरत्रानुवर्तिष्यते 'अणु-दित्सवर्णस्य चाप्रत्ययः' अशब्दसञ्ज्ञायामिति।

समाधानान्तरभाष्यम्– अथवा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसञ्ज्ञा न भविष्यति।

आक्षेपभाष्यम्– ननु चेदं प्रयोजनं स्यात्—सञ्ज्ञया विधाने नियमं वक्ष्यामीति ह्रस्व-सञ्ज्ञया यदुच्यते तदचः स्थाने यथा स्यादिति।

समाधानभाष्यम्– स्यादेतत्प्रयोजनं यदि किञ्चित्कराणि ह्रस्वशासनानि स्युः। यतस्तु खलु यावदज्ग्रहणं तावद् ह्रस्वग्रहणमतोऽकिञ्चित्कराणि ह्रस्वशासनानि।

समाधानबाधकप्रयोजनान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—'एच इग् ह्रस्वादेशे' इति वक्ष्यामीति। अनुच्यमाने ह्येतस्मिंस्त्रिर्ह्रस्वप्रदेशेष्वेच इग्भवतीति वक्तव्यं स्यात्। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' एच इग्भवतीति। 'णौ चङ्युपधाया ह्रस्वः' एव इग्भवतीति। 'ह्रस्वः (हलादिः शेषः)' एव इग्भवतीति। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि संज्ञाकरणम्।

समाधानसाधकभाष्यम्– लघीयश्च त्रिर्ह्रस्वप्रदेशेष्वेच इग्भवतीति, न पुनः सञ्ज्ञा-करणम्। त्रिर्ह्रस्वप्रदेशेषु एच इग्भवतीति षड् ग्रहणानि। सञ्ज्ञाकरणे पुनरष्टौ—ह्रस्वसञ्ज्ञा वक्तव्या, त्रिर्ह्रस्वप्रदेशेषु ह्रस्वग्रहणं कर्तव्यं ह्रस्वो ह्रस्वो ह्रस्व इति, एव इग्घ्रस्वादेश इति। सोयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तस्यैतत्प्रयोजनं दीर्घप्लुतयोस्तु पूर्वसञ्ज्ञा मा भूदिति।। ऊकालोऽज्झ्रस्व.।27।।

(84. **अच्परिभाषासूत्रम्** 1.2.1 आ. 16)

102. अचश्च 1.2.28

आक्षेपभाष्यम्– किमयमलोन्त्यशेष आहोस्विदलोन्त्यापवादः?

आक्षेपसाधकहेतुजिज्ञासाभाष्यम्– कथं वायं तच्छेषः स्यात् कथं वा तदपवादः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपसाधकभाष्यम्– यद्येकं वाक्यं तच्चेदं च—अलोन्त्यस्य विधयो भवन्त्यचो ह्रस्वदीर्घप्लुता अन्त्यस्येति, ततोऽयं तच्छेषः। अथ नानावाक्यमलोन्त्यस्य विधयो भवन्ति। अचो ह्रस्वदीर्घप्लुता अन्त्यस्यानन्त्यस्य चेति, ततोऽयं तदपवादः।

विशेषजिज्ञासाक्षेपभाष्यम्– कश्चात्र विशेषः?

(622. तच्छेषपक्षदूषणाक्षेपवार्त्तिकम्-1)

*** ह्रस्वादिविधिरलोन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिह निगमिदीर्घेष्वज्ग्रहणम् ***

भाष्यम्– ह्रस्वादिविधिरलोन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणं कर्तव्यम्। वचिपृच्छ्योर्दीर्घः 'अचः' इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। शमादीनां दीर्घः 'अच' इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। हनिगम्योर्दीर्घः 'अच' इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति।

तदपवादपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि तदपवादः।

(623. तदपवादपक्षदूषणाक्षेपवार्त्तिकम्-2)

*** अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः ***

भाष्यम्– अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यस्य प्रतिषेधो वक्तव्यः 'ह्रस्वो नपुंसके प्रातिपदिकस्य' यथेह भवति—रै अतिरि, नौ अतिनु। एवं सुवाक् ब्राह्मण-कुलमित्यत्रापि प्राप्नोति। 'अकृत्सार्वधातुकयोर्दीर्घः' यथेह भवति—चीयते सूयते। एवं छिद्यते भिद्यते अत्रापि प्राप्नोति। 'नामि' दीर्घः यथेह भवति—अग्नीनाम् वायूनाम्। एवं षण्णामित्यत्रापि प्राप्नोति।

आक्षेपबाधकभाष्यम्– नैष दोषः। 'नोपधायाः' इत्येतन्नियमार्थं भविष्यति।

आक्षेपसाधकभाष्यम्– प्रकृतस्यैष नियमः स्यात्। किं च प्रकृतम्? 'नामि' इति। तेन भवेदिह नियमान्न स्यात् षण्णामिति। अन्यते तन्यत इत्यत्रापि प्राप्नोति।

अथाप्येवं नियमः स्यात्—नोपधाया नाम्येवेति। एवमपि भवेदिह नियमान्न स्यात्—अन्यते तन्यत इति। षण्णामित्यत्र प्राप्नोति।

अथाप्युभयतोऽयं नियमः स्यात्—नोपधाया एव नामि, नाम्येव नोपधाया इति। एवमपि भिद्यते छिद्यते सुवाक् ब्राह्मणकुलमित्यत्रापि प्राप्नोति।

पदोपस्थितिपक्षस्थापनभाष्यम्– एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयाद्, 'अचः' इत्येतत्तत्रोपस्थितं द्रष्टव्यम्। किं कृतं भवति? द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः—गृह्यमाणेन वाऽचं विशेषयितुमचा वा गृह्यमाणम्। यावता कामचारः। इह तावद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेषु गृह्यमाणेनाचं विशेषयिष्यामः। एतेषां दीर्घो भवति अच इति। इहेदानीं नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वचा गृह्यमाणं विशेषयिष्यामः। नपुंसकस्य ह्रस्वो भवति, अचः अजन्तस्येति। अकृत्सार्वधातुकयोर्दीर्घो भवति, अचः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजन्तस्येति। नामि दीर्घो भवति 'अचः' अजन्तस्येति।

परिभाषोपस्थापकलिङ्गाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति द्यौः पन्थाः स इति।

(624. समाधानवार्त्तिकम्-3)

*** सञ्ज्ञया विधाने नियमः ***

भाष्यम्– सञ्ज्ञया ये विधीयन्ते तेषु नियमः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? अजिति हि वर्तते। तत्रैवमभिसम्बन्धः करिष्यते—अचः अज्भवति ह्रस्वो दीर्घः प्लुत इत्येवं भाव्यमान इति।

आक्षेपभाष्यम्– अथ पूर्वस्मिन् योगे अज्ग्रहणे सति किं प्रयोजनम्?

(625. समाधानवार्त्तिकम्-4)

*** अज्ग्रहणं संयोगाच्समुदायनिवृत्यर्थम् ***

भाष्यम्– अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थम्। अच्समुदायनिवृत्त्यर्थं च। संयोगनिवृत्त्यर्थं तावत्—प्रतक्ष्य प्ररक्ष्य 'ह्रस्वस्य पिति कृति तुग्' इति तुङ्मा भूदिति। अच्समुदायनिवृत्यर्थं तितउच्छत्रं तितउच्छाया 'दीर्घात्पदान्ताद्वा' इति विभाषा तुङ्मा भूदिति।। 28।।

(85-86. उदात्तानुदात्तसञ्ज्ञासूत्रे 1.2.1 आ. 17-18)

103. उच्चैरुदात्तः 1.2.29

104. नीचैरनुदात्तः 1.2.30

षष्ठीनिर्दिष्टाज्ग्रहणानुवृत्तिविचाराधिकरणम्

आक्षेपभाष्यम्– किं षष्ठीनिर्दिष्टमज्ग्रहणमनुवर्तते। उताहो न?

विशेषजिज्ञासाभाष्यम्– किं चातः?

विशेषप्रतिपादनभाष्यम्– यद्यनुवर्तते 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवति' इत्येषा परिभाषा न प्रकल्पते। कथं हलो नाम स्वरप्राप्तिः स्यात्। एवं तर्हि निवृत्तम्। बहून्येतस्याः परिभाषायाः प्रयोजनानि

अथ प्रथमानिर्दिष्टाज्ग्रहणानुवृत्तिविचाराधिकरणम्

आक्षेपभाष्यम्– अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्तते। उताहो न।

जिज्ञासाभाष्यम्– किं चार्थोनुवृत्त्या?

प्रयोजननिरासभाष्यम्– बाढमर्थः। यद्येते व्यञ्जनस्यापि गुणा लक्ष्यन्ते।

प्रयोजनसाधकभाष्यम्– ननु च प्रत्यक्षमुपलभ्यन्ते—इषे त्वोर्जे त्वा।

प्रयोजननिरासभाष्यम्– नैते व्यञ्जनस्य गुणाः, किं त्वच एव। तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। तद्यथा—द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजनसाधकभाष्यम्– कुतो नु खल्वेतत्—अच एते गुणाः स्युः, तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। न पुनर्व्यञ्जनस्यैते गुणाः स्युस्तत्सामीप्यात्त्वजपि तद्गुण उपलभ्येतेति?

प्रयोजननिराकरणभाष्यम्– अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते, न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति। अन्वर्थं खल्वपि निर्वचनम्—स्वयं राजन्त इति स्वराः, अन्वग्भवति व्यञ्जनमिति।

(626. आक्षेपवार्त्तिकम्-1)

*** उच्चनीचस्यानवस्थितत्वात्सञ्ज्ञाऽप्रसिद्धिः ***

भाष्यम्– इदमुच्चनीचमनवस्थितपदार्थकम्, तदेव हि कं चित्प्रत्युच्चैर्भवति, कं चित्प्रति नीचैः। एवं हि कश्चित्कं चिदधीयानमाह किमुच्चै रोरूयसे शनैर्वर्ततामिति। तमेव तथाऽधीयानमपर आह किमन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति। एवमुच्चनीचमनवस्थितपदार्थकम्, तस्यानवस्थितत्वात् सञ्ज्ञाया अप्रसिद्धिः।

आक्षेपबाधकभाष्यम्– एवं तर्हि लक्षणं करिष्यते—आयामो दारुण्यमणुता खस्येति उच्चैःकराणि शब्दस्य। आयामो गात्राणां निग्रहः। दारुण्यं स्वरस्य दारुणता रूक्षता। अणुता स्वस्य कण्ठस्य संवृतता। उच्चैः कराणि शब्दस्य। अन्ववसर्गो मार्दवमुरुता खस्येति नीचैः कराणि शब्दत्य। अन्ववसर्गो गात्राणां शिथिलताः। मादेवं स्वरस्य मृदुता स्निग्धता। उरुता स्वस्य महत्ता कण्ठस्येति नीचैःकराणि शब्दस्य।

आक्षेपसाधकभाष्यम्– एतदप्यनैकान्तिकम्। यद्ध्यल्पप्राणस्य सर्वोच्चैस्तद्धि महाप्राणस्य सर्वनीचैः।

(627. समाधानवार्त्तिकम्-2)

*** सिद्धं तु समानप्रक्रमवचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? समाने प्रक्रम इति वक्तव्यम्। कः पुनः प्रक्रमः? उरः कण्ठः शिर इति।। उच्चैरुदात्तः।।29।। नीचैरनुदात्तः।।30।।

(87. स्वरितसञ्ज्ञासूत्रम् 1.2.1 आ. 19)

105. समाहारः स्वरितः 1.2.31

समाह्रियमाणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– समाहारः स्वरित इत्युच्यते। कस्य समाहारः स्वरितसञ्ज्ञो भवति?
अच्समाहारस्वीकारेणसमाधानभाष्यम्– अचोरित्याह।

(628. अच्समाहारानुपपत्तिवार्त्तिकम्-1)

*** समाहारोऽचोश्चेन्नाभावात् ***

भाष्यम्– समाहारोचोश्चेत्, तन्न। किं कारणम्? अभावात्। नह्यचोः समाहारोऽस्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्समाहारोदाहरणभाष्यम्– नन्वयमस्ति गाङ्गेऽनूप इति।

अच्समाहारबाधकभाष्यम्– नैषोचोः समाहारः। अन्योयमुदात्तानुदात्तयोः स्थाने एक आदिश्यते।

गुणसमाहारपक्षाभ्युपगमभाष्यम्– एवं तर्हि गुणयोः।

(629. गुणसमाहारानुपपत्तिवार्त्तिकम्-2)

* गुणयोश्चेन्नाच्प्रकरणात् *

भाष्यम्– गुणयोः समाहार इति चेत्। तन्न। किं कारणम्? अच्प्रकरणात्। अजिति वर्तते।

(630. समाधानवार्त्तिकम्-3)

* सिद्धं त्वच्समुदायस्याभावात्तद्गुणसम्प्रत्ययः *

भाष्यम्– सिद्धमेतत्। कथम्? अच्समुदायो नास्तीति कृत्वा तद्गुणस्याचः समाहारगुणस्य सम्प्रत्ययो भविष्यति।

आक्षेपभाष्यम्– कथं पुनः समाहार इत्यनेनाच्छक्यः प्रतिनिर्देष्टुम्?

समाधानभाष्यम्– मतुब्लोपोऽत्र द्रष्टव्यः। तद्यथा—पुष्पका एषां ते पुष्पकाः कालका एषां ते कालका इति। एवं समाहारवान् समाहारः। अथवा अकारो मत्वर्थीयः। तद्यथा तुन्दो घाट इति।

आक्षेपभाष्यम्– यद्येवं त्रैस्वर्यं न प्रकल्पते। तत्र को दोषः? 'त्रैस्वर्येणाधीमहे' इत्येतन्नोपपद्यते।

समाधानभाष्यम्– नैतद्गुणापेक्षम्। किं तर्हि? अजपेक्षमेतत्—'त्रैस्वर्येणाधीमहे' त्रिप्रकारैरज्भिरधीमहे, कैश्चिदुदात्तगुणैः कैश्चिदनुदात्तगुणैः कैश्चिदुभयगुणैः। तद्यथा—शुक्लगुणः शुक्लः, कृष्णगुणः कृष्णः, य इदानीमुभयगुणः स तृतीयामाख्यां लभते—कल्माष इति वा सारङ्ग इति वा। एवमिहापि उदात्त उदात्तगुणः, अनुदात्तोऽनुदात्तगुणः य इदानीमुभयगुणः स तृतयामाख्यां लभते स्वरित इति। समाहारः स्वरितः।।31।।

(88. स्वरित उदात्तावस्थितिसूत्रम् 1.2.1 आ. 20)

106. तस्यादित उदात्तमर्धह्रस्वम् 1.2.32

आक्षेपभाष्यम्– अर्धह्रस्वमित्युच्यते। तत्र दीर्घप्लुतयोर्न प्राप्नोति। कन्या। शक्तिके3 शक्तिके।

समाधानभाष्यम्– नैष दोषः। मात्रचोऽत्र लोपो द्रष्टव्यः। अर्धह्रस्वमात्रमर्धह्रस्वमिति।

आक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

समाधानभाष्यम्– आमिश्रीभूतमिवेदं भवति। तद्यथा—क्षीरोदके सम्पृक्ते आमिश्रीभूतत्वान्न ज्ञायते—क्रियत् क्षीरम्, कियदुदकम्, कस्मिन्नवकाशे क्षीरम्, कस्मिन्वोदकमिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते—कियदुदात्तम्, कियदनुदात्तम्, कस्मिन्नवकाशे उदात्तम्, कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तम्, अस्मिन्नवकाशेनुदात्तमिति।

आक्षेपभाष्यम्– यद्ययमेवं सुहृत्किमन्यान्यप्येवञ्जातीयकानि नोपदिशति। कानि पुनस्तानि? स्थानकरणानुप्रदानानि।

समाधानभाष्यम्– व्याकरणं नामेयमुत्तरा विद्या। सोसौ छन्दः—शास्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते।

सूत्रप्रत्याख्यानभाष्यम्– यद्येवं नार्थोऽनेन। इदमप्युपलब्ध्याधिगमिष्यति।

सञ्ज्ञापक्षभाष्यम्– सञ्ज्ञाकरणं तर्हीदम्। तस्य स्वरितस्यादितोर्धह्रस्वमुदात्तसञ्ज्ञं भवतीति। किं कृतं भवति? त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं न कर्तव्यं भवति। 'उदात्तस्वरित-परस्य सन्नतरः'। 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य'। 'नोदात्तस्वरितोदयमगार्ग्यकाश्यप-गालवानाम्' इति।

सञ्ज्ञापक्षनिराकरणभाष्यम्– एतदपि नास्ति प्रयोजनम्। सञ्ज्ञाकरणं हि नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि सञ्ज्ञाकरणम्। लघीयश्च त्रिरुदात्तप्रदेशेषु स्वरित-ग्रहणं न पुनः सञ्ज्ञाकरणम्। त्रिरुदात्तप्रदेशेषु स्वरितग्रहणे नवाक्षराणि। सञ्ज्ञाकरणे पुनरे-कादश।

सञ्ज्ञापक्षसाधकभाष्यम्– एवं तर्ह्युभयमनेन क्रियते। अन्वाख्यानं च सञ्ज्ञा च। कथं पुनरेकेन यत्नेन उभयं लभ्यम्? लभ्यमित्याह। कथम्? तस्य स्वरितस्यादितोर्धह्रस्व-मुदात्तसञ्ज्ञं भवति। ऊर्ध्वमात्तमिति चात उदात्तम्।

सञ्ज्ञापक्षबाधकभाष्यम्– यदि तर्हि सञ्ज्ञाकरणम् उदात्तादेर्यदुच्यते तत्स्वरितादेरपि प्राप्नोति।

समाधानभाष्यम्– अन्वाख्यानमेव तर्हीदं मन्दबुद्धेः।

(631. **सूत्रपाठव्यत्ययवार्त्तिकम्**- 1)

*** स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम् ***

भाष्यम्– स्वरितस्यार्धह्रस्वोदात्ताद् आ 'उदात्तस्वरितपरस्य सन्नतरः' इत्येतस्मात् सूत्रादिदं सूत्रकाण्डमूर्ध्वम् 'उदात्तादनुदात्तस्य स्वरितः' इत्यतः कर्तव्यम्। किं प्रयोजनम्? स्वरितादिति सिद्ध्यर्थम्। स्वरितादिति सिद्धिर्यथा स्यात्—'स्वरितात्संहितायामनुदात्तानाम्' इति। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि। क्व तर्हि स्यात्? यः सिद्धः स्वरितः—कार्यं देवदत्तयज्ञदत्तौ।

(632. **प्रयोजनवार्त्तिकम्**- 2)

*** स्वरितोदात्तार्थं च ***

भाष्यम्– स्वरितोदात्तार्थं च तत्रैव कर्तव्यम्। 'न सुब्रह्मण्यायां स्वरितस्य तूदात्तः'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्र: आगच्छ। क्व तर्हि स्यात्? य:सिद्ध: स्वरित:—सुब्रह्मण्योमिन्द्रागच्छ:।

(633. प्रयोजनवार्त्तिकम्-3)

* स्वरितोदात्ताच्चास्वरितार्थम् *

भाष्यम्– स्वरितोदात्ताच्चास्वरितार्थं तत्रैव कर्तव्यम्। इन्द्रागच्छ हरिव आगच्छ।

(634. प्रयोजनवार्त्तिकम्-4)

* स्वरितपरसन्नतरार्थं च *

भाष्यम्– स्वरितपरसन्नतरार्थं च तत्रैव कर्तव्यम्। 'उदात्तस्वरितपरस्य सन्नतर:' माणवकजटिलकाध्यापकन्यङ्। क्व तर्हि स्यात्? य: सिद्ध: स्वरित: 'माणवक जटिलकाभि-रूपक क्व'।

समाधानभाष्यम्– न वक्तव्यम्।

(635. पाठव्यत्ययप्रत्याख्यानवार्त्तिकम्-5)

* देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य *

भाष्यम्– देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरित इति।

ज्ञापनबाधकभाष्यम्– यद्येतज् ज्ञाप्यते, स्वरितोदात्तात्परस्यानुदात्तस्य स्वरितत्वं प्राप्नोति।

ज्ञापनान्तरभाष्यम्– न ब्रूमो देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरित इति। किं तर्हि? परमेतत्सूत्रकाण्डमिति। तस्यादित उदात्तमर्धह्रस्वम्।।32।।

स्वरविधिप्रकरणम्

(89. एकश्रुतिविधानसूत्रम् 1.2.1 आ. 21)

107. एकश्रुति दूरात्सम्बुद्धौ 1.2.33

आक्षेपभाष्यम्– किमिदं पारिभाषिक्या: सम्बुद्धेर्ग्रहणम् 'एकवचनं सम्बुद्धि:' इति। आहोस्विदन्वर्थग्रहणं सम्बोधनं सम्बुद्धिरिति? किं चात:? यदि पारिभाषिक्या: सम्बुद्धेर्ग्रहणं देवा ब्रह्माण:, अत्र न प्राप्नोति। अथान्वर्थग्रहणं, न दोषो भवति।

समाधानभाष्यम्– यथा न दोषस्तथास्तु।

एकश्रुतिस्वरूपवर्णनभाष्यम्– आक्षेपभाष्यम्– किं पुनरियमेकश्रुतिरुदात्ता, आहोस्विदनुदात्ता?

समाधानभाष्यम्– नोदात्ता। कथं ज्ञायते? यदयम् 'उच्चैस्तरां वा वषट्कार:' इत्याह। कथं कृत्वा ज्ञापकम्? अतन्त्रं तरनिर्देश:। यावदुच्चैस्तावदुच्चैस्तराम्।

आक्षेपभाष्यम्– यदि तर्हि नोदात्ता अनुदात्ता।

समाधानभाष्यम्– अनुदात्ता च न। कथं ज्ञायते? यदयम् 'उदात्तस्वरितपरस्य सन्नतर:' इत्याह। कथं कृत्वा ज्ञापकम्? अतन्त्रं तरनिर्देश:। यावत्सन्नस्तावत्सन्नतर:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तरालं ह्रियते।

व्याख्यान्तरभाष्यम्– अपर आह—

आक्षेपभाष्यम्– किमियमेकश्रुतिरुदात्ता, आहोस्विदनुदात्ता?

समाधानभाष्यम्– उदात्ता। कथं ज्ञायते? यदयम् 'उच्चैस्तरां वा वषट्कार' इत्याह। कथं कृत्वा ज्ञापकम्? तन्त्रं तरनिर्देशः। उच्चैर्दृष्ट्वा उच्चैस्तरामित्येतद्भवति।

आक्षेपभाष्यम्– यदि तर्ह्युदात्ता नानुदात्ता।

समाधानभाष्यम्– अनुदात्ता च। कथं ज्ञायते? यदयम् 'उदत्तस्वरितपरस्य सन्नतरः' इत्याह। कथं कृत्वा ज्ञापकम्? तन्त्रं तरनिर्देशः। सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति। त एते तन्त्रे तरनिर्देशे सप्त स्वरा भवन्ति—उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोन्येन विशिष्टः, एकश्रुतिः सप्तमः।। एकश्रुतिदूरात्सम्बुद्धौ।।33।।

(90. एकश्रुतिनिषेधसूत्रम 1.2.1 आ. 22)

111. न सुब्रह्मण्यायां स्वरितस्य तूदात्तः 1.2.37

(636. सूत्रशेषवार्त्तिकम्-1)

*** सुब्रह्मण्यायामोकार उदात्तः ***

भाष्यम्– सुब्रह्मण्यायामोकार उदात्तो भवति। 'सुब्रह्मण्योम्'।

(637. सूत्रशेषवार्त्तिकम्-2)

*** आकार आख्याते परादिश्च ***

भाष्यम्– आकार आख्याते परादिश्चोदात्तो भवति। 'इन्द्र आगच्छ' हरिव आगच्छ।

(638. सूत्रशेषवार्त्तिकम्-3)

*** वाक्यादौ च द्वेद्वे ***

भाष्यम्– वाक्यादौ च द्वेद्वे उदात्ते भवतः। इन्द्र आगच्छ हरिव आगच्छ।

(639. सूत्रशेषवार्त्तिकम्-4)

*** मघवन्वर्जम् ***

भाष्यम्– आगच्छ मघवन्।

(640. शेषवार्त्तिकम्-5)

*** सुत्यापराणामन्तः ***

भाष्यम्– सुत्यापराणामन्त उदात्तो भवति। 'द्व्यहे सुत्याम्' 'त्र्यहे सुत्याम्'।

(641. शेषवार्त्तिकम्-6)

*** असावित्यन्तः ***

भाष्यम्– असावित्यन्त उदात्तो भवति। 'गार्ग्यो यजते' 'वात्स्यो यजते'।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(642. शेषवार्त्तिकम्-7)

*** अमुष्येत्यन्तः ***

भाष्यम्– अमुष्येत्यन्त उदात्तो भवति। 'दाक्षेः पिता यजते'।

(343. शेषवार्त्तिकम्-8)

*** स्यान्तस्योपोत्तमं च ***

भाष्यम्– स्यान्तस्योपोत्तममुदात्तं भवति। अन्त्यश्च। 'गार्ग्यस्य पिता यजते' 'वात्स्यस्य पिता यजते'।

(644. शेषवार्त्तिकम्-9)

*** वा नामधेयस्य ***

भाष्यम्– वा नामधेयस्य स्यान्तस्योपोत्तममुदात्तं भवति। 'देवदत्तस्य पिता यजते'। 'देवदत्तस्य पिता यजते'। न सुब्रह्मण्यायाम्।।37।।

(91. एकश्रुतिबाधकानुदात्तविधिसूत्रम् 1.2.1 आ. 23)

112. देवब्रह्मणोरनुदात्तः 1.2.38

(645. सूत्रस्य पाक्षिकत्वसूचकवार्त्तिकम्-1)

*** देवब्रह्मणोरनुदात्तत्वमेके ***

भाष्यम्– देवब्रह्मणोरनुदात्तत्वमेक इच्छन्ति। देवा ब्रह्माणः, देवा ब्रह्माणः। देवब्रह्मणोर-नुदात्त।।38।।

(92. एकश्रुतिविधिसूत्रम् 1.2.2 आ0 24)

स्वरितात्संहितायामनुदात्तानाम् 1.2.39

द्व्येकयोरप्येकश्रुतिसाधनाधिकरणम्

(645. आक्षेपवार्त्तिकम्-1)

*** स्वरितात्संहितायामनुदात्तानामिति चेद् द्व्येकयोरैकश्रुत्यवचनम् ***

भाष्यम्– स्वरितात्संहितायामनुदात्तानामिति चेद् द्व्येकयोरैकश्रुत्यं वक्तव्यम्। आग्निवेश्यः पचतीति। किं पुनः कारणं न सिध्यति? बहुवचननिर्देशात्। बहुवचनेनायं निर्देशः क्रियते। तेन बहूनामेवैकश्रुत्यं स्याद् द्व्येकयोर्न स्यात्।

आक्षेपबाधकभाष्यम्– नैष दोषः। नात्र बहुवचनेन निर्देशस्तन्त्रम्।

आक्षेपसाधकभाष्यम्– कथं पुनस्तेनैव च नाम निर्देशः क्रियते, तच्चातन्त्रं स्यात्? तत्कारी च भवांस्तद्द्वेषी च।

आक्षेपबाधकभाष्यम्– नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते—अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्यः इति। तद्यथा। कश्चिदन्नार्थी शालिकलापं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सपलालं सतुषमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् सशकलानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वाद् बहुवचननिर्देशः क्रियते। अविशेषेणैकश्रुत्यं भवति।

(646. आक्षेपवार्त्तिकम्-2)

*** अविशेषेणैकश्रुत्यमिति चेद् व्यवहितानामप्रसिद्धिः ***

भाष्यम्– अविशेषेणैकश्रुत्यमिति चेद् व्यवहितानामैकश्रुत्यं न प्राप्नोति—'इमं मे गङ्गे यमुने सरस्वति शुतुद्रि'।

(647. समाधानन्यासान्तरवार्त्तिकम्-2)

*** अनेकमपीति तु वचनात्सिद्धम् ***

भाष्यम्– अनेकमप्येकमपि स्वरितात्परं संहितायामेकश्रुति भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

समाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'स्वरितात्संहितायामनुदात्तानामिति चेद् द्व्येकयोरैकश्रुत्यवचनम्' 'अविशेषेणेति चेद् व्यवहितानामप्रसिद्धिः' इति।

दूषणनिराकरणभाष्यम्– नैष दोषः। कथम्? एकशेषनिर्देशोऽयम्। अनुदात्तस्य चानुदात्तयोश्चानुदात्तानां चानुदात्तानामिति।

आक्षेपभाष्यम्– एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते।

समाधानभाष्यम्– प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति द्व्येकयोरपि भविष्यति। स्वरितात्संहितायामनुदात्तानाम्।।39।।

(93. अपृक्तसञ्ज्ञासूत्रम् 1.2.1 आ. 25)

115. अपृक्त एकाल्प्रत्ययः 1.2.41

हल्ग्रहणे लाघवाभावोपपादनाधिकरणम्

(649. हल्ग्रहणवादिन आक्षेपवार्त्तिकम्-1)

*** अपृक्तसञ्ज्ञायां हल्ग्रहणं स्वादिलोपे हलोऽग्रहणार्थम् ***

भाष्यम्– अपृक्तसञ्ज्ञायां हल्ग्रहणं कर्तव्यम्। एकहल्प्रत्ययोऽपृक्तसञ्ज्ञो भवतीति वक्तव्यम्। किं प्रयोजनम्? स्वादिलोपे हलोऽग्रहणार्थम्। एवं हि स्वादिलोपे हलो ग्रहणं न कर्तव्यं भवति 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति। अपृक्तस्येत्येव सिद्धम्।

(650. अल्ग्रहणवादिनः प्रयोजनवार्त्तिकम्-2)

*** अणिञोर्लुगर्थमल्ग्रहणम् ***

भाष्यम्– अणिञोर्लुगर्थमल्ग्रहणं कर्तव्यम्। किं प्रयोजनम्? अणिञोर्लुकि ग्रहणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कर्तव्यं भवति 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' इति। अपृक्तस्येत्येव सिद्धम्।

(651. अल्ग्रहणे दूषणवार्त्तिकम्- 3)

*** अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गः ***

भाष्यम्– अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गो भवति। इहापि प्राप्नोति—फाण्टाहृतेरपत्यं माणवकः फाण्टाहृत इति।

अल्ग्रहणे दूषणबाधकभाष्यम्– णवचनसामर्थ्यान्न भविष्यति।

(652. अल्ग्रहणे दूषणसाधकवार्त्तिकम्- 4)

*** वचनप्रामाण्यादिति चेत् फङ्निवृत्त्यर्थं वचनम् ***

भाष्यम्– वचनप्रामाण्यादिति चेत् फङ्निवृत्यर्थमेतत्स्यात्। फगतो मा भूदिति।

(653. अल्ग्रहणे समाधानवार्त्तिकम्- 5)

*** पैलादिषु वचनात्सिद्धम् ***

भाष्यम्– यद्येतावत्प्रयोजनं स्यात् पैलादिष्वेवास्य पाठं कुर्वीत। तत्र पाठादन्येषामपि फको निवृत्तिर्भवति। एवं सिद्धे सति यदयं णं शास्ति तज्ज्ञापयत्याचार्यो नास्य लुग्भवतीति।

अल्ग्रहणे लाघवाभावभाष्यम्– तान्येतानि त्रीणि ग्रहणानि भवन्ति—अपृक्तसञ्ज्ञायां हल्ग्रहणं कर्तव्यम्। स्वादिलोपे हलो ग्रहणं न कर्तव्यम्। अणिञोर्लुकि ग्रहणं कर्तव्यम्! अल्ग्रहणेऽपि वै क्रियमाणे तान्येव त्रीणि ग्रहणानि भवन्ति—अपृक्तसञ्ज्ञायामल्ग्रहणं कर्तव्यम्। स्वादिलोपे हलो ग्रहणं कर्तव्यम्। अणिञोर्लुकि ग्रहणं न कर्तव्यं भवति, अपृक्तग्रहणं कर्तव्यम्, तत्र नास्ति लाघवकृतो विशेषः।

अल्ग्रहणे लाघवभाष्यम्– अयमस्ति विशेषः। अल्ग्रहणे क्रियमाणे एकग्रहणं न करिष्यते।

आक्षेपभाष्यम्– कस्मान्न भवति दर्विर्जागृविः?

समाधानभाष्यम्– अलेव यः प्रत्ययः। किं वक्तव्यमेतत्? नहि कथमनुच्यमानं गंस्यते? अल्ग्रहणसामर्थ्यात्। यदि च योऽल् चान्यश्च तत्र स्यात्, अल्ग्रहणमनर्थकं स्यात्।

हल्ग्रहणेऽपि लाघवभाष्यम्– हल्ग्रहणेऽपि वै क्रियमाणे एकग्रहणं न करिष्यते।

आक्षेपभाष्यम्– कस्मान्न भवति—दर्विः जागृविः?

समाधानभाष्यम्– हलेव यः प्रत्ययः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? हल्ग्रहणसामर्थ्यात्। यदि च यो हल् चान्यश्च तत्र स्यात्, हल्ग्रहणमनर्थकं स्यात्।

समाधानबाधकभाष्यम्– अस्त्यन्यद्धल्ग्रहणस्य प्रयोजनम्। किम्? हलन्तस्य यथा स्यादजन्तस्य मा भूदिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिभाषासाधनभाष्यम्– एवं तर्हि सिद्धे सति यदल्ग्रहणे क्रियमाणे एकग्रहणं करोति, तज्ज्ञापयत्याचार्यः—'अन्यत्र वर्णग्रहणे जातिग्रहणं भवति' इति।

किमेतस्य ज्ञापने प्रयोजनम्? 'दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्' इत्युक्तं तदुपपन्नं भवति। अपृक्त एकाल्प्रत्ययः।।41।।

(94. **कर्मधारयसञ्ज्ञासूत्रम्** 1.2.1 आ. 26)

116. तत्पुरुषः समानाधिकरणः कर्मधारयः 1.2.42

सामानाधिकरण्योपपादनाधिकरणम्

(654. **आक्षेपवार्त्तिकम्**-1)

*** तत्पुरुषस्समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः ***

भाष्यम्– तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वात् सञ्ज्ञाया अप्रसिद्धिः। एकोऽयमर्थस्तत्पुरुषो नाम। अनेकार्थाश्रयं च सामानाधिकरण्यम्।

(655. **न्यासान्तरसमाधानवार्त्तिकम्**-2)

*** सिद्धं तु पदसामानाधिकरण्यात् ***

भाष्यम्– सिद्धमेतत्। कथम्? तत्पुरुषस्समानाधिकरणपदः कर्मधारयसञ्ज्ञो भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वादप्रसिद्धिः' इति।

सिद्धान्तिसमाधानभाष्यम्– नैष दोषः। अयं तत्पुरुषोस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तित्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यं तत्पुरुषार्थानि पदानि तत्पुरुष इति। तद्यस्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्। तत्पुरुषः समानाधिकरणः कर्मधारयः।।42।।

(95. **उपसर्जनसञ्ज्ञासूत्रम्** 1.2.1 आ. 27)

117. प्रथमानिर्दिष्टं समास उपसर्जनम् 1.2.43

समासपदार्थनिरुपणाधिकरणम्

(656. **आक्षेपवार्त्तिकम्**-1)

*** प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे सञ्ज्ञाप्रसिद्धिः ***

भाष्यम्– प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे उपसर्जनसञ्ज्ञाया अप्रसिद्धिः। नहि कष्टादीनां समासे प्रथमां पश्यामः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(657. न्यासान्तरसमाधानवार्त्तिकम्-2)

*** सिद्धं तु समासविधाने वचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? समासविधाने प्रथमानिर्दिष्टमुपसर्जनसञ्ज्ञं भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

(658. समाधानवार्त्तिकम्-3)

*** न वा तादर्थ्यात्ताच्छब्द्यम् ***

भाष्यम्– न वा वक्तव्यम्। किं कारणम्? तादर्थ्यात्ताच्छब्द्यं भविष्यति। समासार्थं शास्त्रं समास इति।

अनिष्टापत्तिवारणाधिकरणम्

(659. आक्षेपवार्त्तिकम्-4)

*** यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्रोपसर्जनसञ्ज्ञाप्रसङ्गः ***

भाष्यम्– यस्य विधौ प्रथमानिर्देशः क्रियते ततोऽन्यत्रापि तस्योपसर्जनसञ्ज्ञा प्राप्नोति। राज्ञः कुमारीं राजकुमारीं श्रितः। श्रितादिसमासे द्वितीयान्तं प्रथमानिर्दिष्टं तस्य षष्ठीसमासेप्युपसर्जनसञ्ज्ञा प्राप्नोति।

(660. समाधानवार्त्तिकम्-5)

*** सिद्धं तु यस्य विधौ तं प्रतीति वचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? यस्य विधौ यत्प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनसञ्ज्ञं भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्– न वक्तव्यम्। उपसर्जनमिति हि महती सञ्ज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत अप्रधानमुपसर्जनमिति। प्रधानमुपसर्जनमिति च सम्बन्धिशब्दावेतौ। तत्र सम्बन्धादेतद्गन्तव्यम्—यं प्रति यदप्रधानं तं प्रति तदुपसर्जनसंज्ञां भवतीति।

आक्षेपभाष्यम्– अथ यत्र द्वे षष्ठ्यन्ते कस्मात्तत्र प्रधानस्योपसर्जनसञ्ज्ञा न भवति। राज्ञः पुरुषस्य राजपुरुषस्येति।

(661. समाधानवार्त्तिकम्-6)

*** षष्ठ्यन्तयोश्चोपसर्जनत्वे उक्तम् ***

भाष्यम्– किमुक्तम्? 'षष्ठ्यन्तयोः समासे अर्थाभेदात् प्रधानस्यापूर्वनिपातः' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं न चेदमकृतं भवति 'उपसर्जनं पूर्वम्' इति। अर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति।

आक्षेपभाष्यम्– यद्यपि तावदेतदुपसर्जनकार्यं परिहृतम्, इदमपरं प्राप्नोति राज्ञः कुमार्याः राजकुमार्याः 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वं प्राप्नोति।

(662. समाधानवार्त्तिकम्-7)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्? 'परवल्लिङ्गमिति शब्दशब्दार्थौ' इति तत्रौपदेशिकस्य ह्रस्वत्वम्, आतिदेशिकस्य श्रवणं भविष्यति। प्रथमानिर्दिष्टं समास उपसर्जनम्।।43।।

(96. उपसर्जनसञ्ज्ञासूत्रम् 1.2.1 आ. 28)

118. एकविभक्ति चापूर्वनिपाते 1.2.44

प्रथमानिर्दिष्टस्य पूर्वनिपातसाधकाधिकरणम्

आक्षेपभाष्यम्– द्वितीयादीनामप्यनेनोपसर्जनसंज्ञा प्राप्नोति। तत्र को दोषः? तत्रापूर्वनिपात इति प्रतिषेधः प्रसज्येत।

(663. समाधानवार्त्तिकम्-1)

*** नाप्रतिषेधात् ***

भाष्यम्– नायं प्रसज्यप्रतिषेधः—'पूर्वनिपाते न' इति। किं तर्हि? पर्युदासोऽयम्—'यदन्यत्पूर्वनिपातादिति। पूर्वनिपाते अव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति तेन भविष्यति।

(664. समाधानवार्त्तिकम्-2)

*** अप्राप्तेर्वा ***

भाष्यम्– अथवा अनन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्? 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति।

आक्षेपभाष्यम्– ननु चेयं प्राप्तिः पूर्वो प्राप्तिं बाधते।

समाधानभाष्यम्– नोत्सहते प्रतिषिद्धा सती बाधितुम्।

(665. आक्षेपवार्त्तिकम्-3)

*** एकविभक्तावषष्ठ्यन्तवचनम् ***

भाष्यम्– एकविभक्तावषष्ठ्यन्तानामिति वक्तव्यम्। इह मा भूत्—अर्धं पिप्पल्याः अर्धपिप्पलीति।

(666. समाधानवार्त्तिकम्-4)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्। 'परवल्लिङ्गमिति शब्दशब्दार्थौ' इति तत्रौपदेशिकस्य ह्रस्वत्वम्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आतिदेशिकस्य श्रवणं भविष्यति।

आक्षेपभाष्यम्- कानि पुनरस्य योगस्य प्रयोजनानि?

(667. **प्रयोजनवार्त्तिकम्**-5)

*** प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः ***

भाष्यम्- क्तार्थे द्विगुः—पञ्चभिर्गोभिः क्रीतः पञ्चगुः। दशगुः।

प्राप्तापन्न (पूर्व)—प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामापन्नजीविकः। अलंपूर्व—अलं कुमार्यै अलंकुमारिः। उपसर्गाः क्तार्थे—निष्कौशाम्बिः निर्वाराणसिः। एकविभक्ति.।।44।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्

●

प्रथमेऽध्याये द्वितीये पादे द्वितीयमाह्निकम्

(97. **प्रातिपदिकसञ्ज्ञासूत्रम्** 1.2.2 आ. 1)

119. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् 1.2.45

पदकृत्यनिरूपणाधिकरणम्

आक्षेपभाष्यम्- (अर्थवद्ग्रहणं किमर्थम्?)

समाधानभाष्यम्- अर्थवदिति व्यपदेशाय। वर्णानां मा भूदिति। किं च स्यात्? वनं धनमिति 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः प्रसज्येत।

आक्षेपभाष्यम्—अधातुरिति किमर्थम्?

समाधानभाष्यम्- 'अहन् वृत्रम्'।

समाधानबाधकभाष्यम्- अधातुरिति शक्यमवक्तुम्।

आक्षेपभाष्यम्- कस्मान्न भवति 'अहन्वृत्रम्' इति?

समाधानभाष्यम्- आचार्यप्रवृत्तिर्ज्ञापयति—न धातोः प्रातिपदिकसञ्ज्ञा भवति—इति, यदयं 'सुपो धातुप्रातिपदिकयाः' इति धातुग्रहणं करोति।

समाधानसाधकभाष्यम्- नैतदस्ति ज्ञापकम्। प्रतिषिद्धार्थमेतत्स्यात्—अपि काकः श्येनायत इति।

आक्षेपभाष्यम्- अप्रत्यय इति किम्?

समाधानभाष्यम्- काण्डे कुड्ये।

समाधानबाधकभाष्यम्- अप्रत्यय इति शक्यमवक्तुम्।

आक्षेपभाष्यम्- कस्मान्न भवति काण्डे कुड्य इति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– कृत्तद्धितग्रहणं नियमार्थं भविष्यति—कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसञ्ज्ञा भवति, नान्यस्येति।

अनिष्टापत्तिवारणाधिकरणम्

(668. आक्षेपवार्त्तिकम्- 1)

*** अर्थवत्यनेकपदप्रसङ्गः ***

भाष्यम्– अर्थवदिति प्रातिपदिकसञ्ज्ञायामनेकस्यापि पदस्य प्रातिपदिकसञ्ज्ञा प्राप्नोति—'दश दाडिमानि, षडपूपाः, कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन' इति।

समाधानभाष्यम्– समुदायोऽत्रानर्थकः।

(669. समाधानबाधकवार्त्तिकम्- 2)

*** समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं यथा लोके ***

भाष्यम्– समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वम्। अवयवैरर्थवद्भिः समुदाया अर्थवन्तो भवन्ति। यथा लोके। तद्यथा लोके—आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते। न च सर्वे तत्राढ्या भवन्ति, सर्वे वा गोमन्तः।

यथा लोके इत्युच्यते, लोके चावयवा एवार्थवन्तो न समुदायाः। अतश्चावयवा एवार्थवन्तो न समुदायाः। यस्य हि यद्द्रव्यं भवति स तेन कार्यं करोति। यस्य च या गावो भवन्ति स तासां क्षीरं घृतमुपभुङ्क्ते। अन्यैरेतद् द्रष्टुमप्यशक्यम्।

युक्तिप्रश्नभाष्यम्– का तर्हीयं वाचोयुक्तिराढ्यमिदं नगरं गोमदिदं नगरमिति?

युक्तिप्रदर्शनभाष्यम्– एषैषा वाचोयुक्तिः। इह तावदाढ्यमिदं नगरमित्यकारो मत्वर्थीयः—आढ्या अस्मिन्सन्ति तदिदमाढ्यमिति। गोमदिदं नगरमिति मत्वन्तात् मत्वर्थीयो लुप्यते।

आक्षेपशेषभाष्यम्– एवमपि—

(670. आक्षेपवार्त्तिकम्- 3)

*** वाक्यप्रतिषेधोर्थवत्त्वात् ***

भाष्यम्– वाक्यस्य प्रातिपदिकसञ्ज्ञायाः प्रतिषेधो वक्तव्यः। देवदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। किं कारणम्? अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यम्।

आक्षेपबाधकभाष्यम्– न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति वाक्ये।

(671. आक्षेपसाधकवार्त्तिकम्- 4)

*** पदार्थादन्यस्यानुपलब्धिरिति चेत् पदार्थाभिसम्बन्धस्योपलब्धिः**
(स्तस्मात्प्रतिषेधः) *

भाष्यम्– पदार्थादन्यस्यानुपलब्धिरिति चेद्। इदमुच्यते—पदार्थाभिसम्बन्धस्योप-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धिर्भवति वाक्ये। इह देवदत्त इत्युक्ते कर्ता निर्दिष्टः, कर्मक्रियागुणौ चानिर्दिष्टौ। गामित्युक्ते कर्म निर्दिष्टम्, कर्ता क्रियागुणौ चानिर्दिष्टौ। अभ्याजेत्युक्ते क्रिया निर्दिष्टा, कर्तृकर्मणी गुणश्चानिर्दिष्टः। शुक्लामित्युक्ते गुणो निर्दिष्टः, कर्तृकर्मणी क्रिया चानिर्दिष्टा। इहेदानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टम्—देवदत्त एव कर्ता नान्यः। गामेव कर्म नान्यत्। अभ्याजैव क्रिया नान्या। शुक्लामेव न कृष्णामिति। एषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः। तस्मात्प्रतिषेधः। तस्मात्प्रतिषेधो वक्तव्यः।

आक्षेपनिराकरणभाष्यम्– न वक्तव्यः।

(672. **समाधानवार्त्तिकम्**- 6)

*** अर्थवत्समुदायानां समासग्रहणं नियमार्थम् ***

भाष्यम्– अर्थवत्समुदायानां समासग्रहणं नियमार्थं भविष्यति। समास एवार्थवतां समुदायानां प्रातिपदिकसञ्ज्ञो भवति नान्य इति।

समाधानबाधकभाष्यम्– यदि नियमः क्रियते प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसञ्ज्ञा न प्राप्नोति बहुपटवः उच्चकैर्नीचकैरिति।

नियमवादिनः प्रश्नभाष्यम्– किं पुनरत्र प्रातिपदिकसञ्ज्ञया प्रार्थ्यते?

इतरस्य दूषणप्रदर्शकभाष्यम्– प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यादिति।

नियमवादिनोदोषवारकभाष्यम्– नैष दोषः। यथैवात्राप्रातिपदिकत्वात्सुबुत्पत्तिर्न भवति एवं लुगपि न भविष्यति। तत्र यैवासावन्तवर्तिनी विभक्तिस्तस्या एव श्रवणं भविष्यति।

इतरस्य दोषसाधकभाष्यम्– नैवं शक्यम्। स्वरे दोषः स्यात्—बहुपटव इत्येवं स्वरः स्यात्। बहुपटव इति चेष्यते। पठिष्यति ह्याचार्यः—'चितः सप्रकृतेर्बह्वकजर्थम्' इति। तस्यां पुनर्लुप्तायां यान्या विभक्तिरुत्पद्यते तस्याः प्रकृत्यनेकदेशत्वादन्तोदात्तत्वं न भविष्यति।

समाधानसाधकभाष्यम्– एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—भवति प्रकृतिप्रत्यय-समुदायस्य प्रातिपदिकसञ्ज्ञा—इति। यदयम् 'अप्रत्यय' इति प्रतिषेधं शास्ति। स च तदन्तप्रतिषेधः।

आक्षेपभाष्यम्– स तर्हि ज्ञापकार्थः प्रत्ययप्रतिषेधो वक्तव्यः।

प्रतिवन्दीभाष्यम्– ननु चायं प्राप्त्यर्थोऽपि वक्तव्यः।

प्रतिवन्दीनिरासभाष्यम्– नार्थः प्राप्त्यर्थेन। कृत्तद्धितग्रहणं नियमार्थं भविष्यति—कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसञ्ज्ञा भविष्यति, नान्यस्य प्रत्ययान्तस्येति।

आक्षेपभाष्यम्– स एषोनन्यार्थः प्रत्ययप्रतिषेधो वक्तव्यः। प्रकृतिप्रत्ययसमुदायस्य वा प्रातिपदिकसञ्ज्ञा वक्तव्या।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– उभं न वक्तव्यम्। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः? यथाजातीयकानां समासः। कथं जातीयकानां समासः? सुबन्तानाम्।

समाधानबाधकभाष्यम्– सुप्तिङ्समुदायस्य तर्हि प्रातिपदिकसञ्ज्ञा प्राप्नोति।

समाधानसाधकभाष्यम्– सुप्तिङ्समुदायस्यापि प्रातिपदिकसञ्ज्ञा आरभ्यते— 'जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति' इति। तन्नियमार्थं भविष्यति— एतस्यैव सुप्तिङ्समुदायस्य प्रातिपदिकसञ्ज्ञा भवति, नान्यस्येति।

समाधानबाधकभाष्यम्– तिङ्समुदायस्य तर्हि प्रातिपदिकसञ्ज्ञा प्राप्नोति।

समाधानसाधकभाष्यम्– तिङ्समुदायस्यापि प्रातिपदिकसञ्ज्ञाऽऽरभ्यते— 'आख्यातमाख्यातेन क्रियासातत्ये' इति। तन्नियमार्थं भविष्यति—एतस्यैव तिङ्समुदायस्य प्रातिपदिकसञ्ज्ञा भवति, नान्यस्येति।

(673. **आक्षेपवार्त्तिकम्**-7)

* अर्थवत्ता नोपपद्यते केवलेनावचनात् *

भाष्यम्– अर्थवत्ता नोपपद्यते वृक्षशब्दस्य। किं कारणम्? केवलेनावचनात्। न केवलेन वृक्षशब्देनार्थो गम्यते। केन तर्हि? सप्रत्ययकेन।

(674. **आक्षेपबाधकवार्त्तिकम्**-8)

* न वा प्रत्ययेन नित्यसम्बन्धात् केवलस्याप्रयोगः *

भाष्यम्– न वा एष दोषः। कि कारणम्? प्रत्ययेन नित्यसम्बन्धात्। नित्यसम्बद्धावेतावर्थौ प्रकृतिः प्रत्यय इति। प्रत्ययेन नित्यसम्बन्धात् केवलस्य प्रयोगो न भविष्यति।

आक्षेपबाधकानुपपत्तिभाष्यम्– अन्यद्भवान्पृष्टोन्यदाचष्टे। आम्रान् पृष्ठः कोविदारानाचष्टे 'अर्थवत्ता नोपपद्यते केवलेनावचनाद्' इति भवानस्माभिश्चोदितः केवलस्याप्रयोगे हेतुमाह।

आक्षेपसाधकभाष्यम्– एवं च किल नाम कृत्वा चोद्यते 'समुदायस्यार्थे प्रयोगादवयवानामप्रसिद्धिः' इति।

(675. **समाधानवार्त्तिकम्**-9)

* सिद्धं त्वन्वयव्यतिरेकाभ्याम् *

भाष्यम्– सिद्धमेतत्। कथम्? अन्वयाद्व्यतिरेकाच्च। कोसावन्वयो व्यतिरेको वा? इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दः अकारान्तः सकारश्च प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते मूलस्कन्धफलपलाशवान् एकत्वं च। वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी—सकारो हीयते औकार उपजायते वृक्षशब्द अकारान्तोऽन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी—एकत्वं हीयते द्वित्वमुपजायते मूलस्कन्धफलपलाशवानन्वयी। ते मन्यामहे—यः शब्दो हीयते तस्य।सावर्थो यो हीयते,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते, यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोन्वयीति।

समाधानबाधकभाष्यम्- विषय उपन्यासः। बहवो हि शब्दा एकार्था भवन्ति। तद्यथा—इन्द्रः शक्रः पुरुहूतः पुरन्दरः। कन्दुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा—अक्षाः पादा माषा इति।

आशयजिज्ञासाभाष्यम्- अतः किम्।

आक्षेपाशयभाष्यम्- न साधीयोऽर्थवत्ता सिद्धा भवति?

परिहारभाष्यम्- न ब्रूमः—अर्थवत्ता न सिध्यतीति। वर्णिता अर्थवत्तान्वयव्यतिरेकाभ्यामेव।

आशयान्तरभाष्यम्- तत्र कुत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्। प्रत्यय एव वा?

समाधानसाधकभाष्यम्- सामान्यशब्दा एते एवं स्युः। सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेस्ववतिष्ठन्ते। यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदर्थे प्रतीतिरुपजायते। अतो मन्यामहे—नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः, प्रकृतिः प्रकृत्यर्थे वर्तते, प्रत्ययः प्रत्ययार्थे।

वर्णानामर्थवत्तानर्थकत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्- किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः।

(676. **समाधानवार्त्तिकम्**-10)

*** वर्णस्यार्थवदनर्थकत्वे उक्तम् ***

भाष्यम्- किमुक्तम्? 'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः सङ्घातार्थवत्त्वाच्च। सङ्घातस्यैकार्थत्वात् सुबभावो वर्णात्'। 'अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेर्वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनाद्' इति।

आक्षेपभाष्यम्- तत्रेदमपरिहृतम् 'सङ्घातार्थवत्त्वाच्च' इति।

समाधानभाष्यम्- तस्य परिहारः—

(677. **समाधानवार्त्तिकम्**-11)

*** सङ्घातार्थवत्त्वाच्चेति चेद् दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः ***

भाष्यम्- सङ्घातार्थवत्त्वाच्चेति चेद् दृश्यते हि पुनरतदर्थेन गुणेन गुणिनोऽर्थभावः। तद्यथा—एकस्तन्तुस्त्वक्त्राणेऽसमर्थः, तत्समुदायश्च कम्बलः समर्थः। एकश्च तण्डुलः क्षुत्प्रतिघातेऽसमर्थः, तत्समुदायश्च वर्द्धितकं समर्थम्। एकश्च बल्वजो बन्धनेऽसमर्थः, तत्समुदायश्च रज्जुः समर्था भवति।

दृष्टान्तनिराकरणभाष्यम्- विषम उपन्यासः। भवति हि तत्र याचयावतीचार्थमात्रा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति हि कश्चित्प्रत्येकस्तन्तुस्त्वक्त्राणे समर्थः, एकश्च तण्डुलः क्षुत्प्रतिघाते समर्थः, एकश्च बल्वजो बन्धने समर्थः। इमे पुनर्वर्णा अत्यन्तमेवानर्थकाः।

दृष्टान्तान्तरभाष्यम्– यथा तर्हि रथाङ्गानि विहृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्थानि भवन्ति तत्समुदायश्च रथः समर्थः। एवमेषां वर्णानां समुदाया अर्थवन्तः, अवयवा अनर्थका इति।

अनर्थकनिपातप्रातिपदिकसञ्ज्ञासाधनम्

(678. **आक्षेपवार्त्तिकम्**-12)

* निपातस्यानर्थकस्य प्रातिपदिकत्वम् *

भाष्यम्– निपातस्यानर्थकस्य प्रातिपदिकसञ्ज्ञा वक्तव्या। खञ्जति। निख्ञ्जति। लम्बते। प्रलम्बते।

आक्षेपप्रयोजनजिज्ञासाभाष्यम्– किं पुनरत्र प्रातिपदिकसञ्ज्ञया प्रार्थ्यते?

प्रयोजनभाष्यम्– प्रातिपदिकादिति स्वाद्युत्पत्तिः। सुबन्तं पदमिति पदसञ्ज्ञा। 'पदस्य' 'पदाद्' इति निघातो यथा स्यात्।

प्रयोजननिराकरणभाष्यम्– नैतदस्ति प्रयोजनम्। सत्यामपि प्रातिपदिकसञ्ज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम्? नहि प्रातिपदिकसञ्ज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि? एकत्वादिष्वप्यर्थेषु स्वादयो विधीयन्ते। न चैषामेकत्वादयः सन्ति।

प्रयोजनसाधकभाष्यम्– नैष दोषः। अविशेषेणोत्पद्यन्ते। उत्पन्नानां नियमः क्रियते। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः? एकत्वादयः। एकस्मिन्नेवार्थ एकवचनं न द्वयोर्न बहुषु। द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न द्वयोरिति।

अथवा आचार्यप्रवृत्तिर्ज्ञापयति—अनर्थकानामप्येतेषां भवत्यर्थवत्कृत**म्–** इति। यदयम् 'अधिपरी अनर्थकौ' इत्यनर्थकयोर्गत्युपसर्गसञ्ज्ञाबाधिकां कर्मप्रवचनीयसञ्ज्ञां शास्ति।

अप्रत्यय इत्यत्र पर्युदासप्रसज्यप्रतिषेधविचारः

आक्षेपभाष्यम्– किं पुनरयं पर्युदासो यदन्यत्प्रत्ययादिति। आहोस्वित्प्रसज्यायं प्रतिषेधः—प्रत्ययो नेति? कश्चात्र विशेषः?

(679. **पर्युदासबाधकवार्त्तिकम्**-13)

* अप्रत्यय इति चेत् तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात् *

भाष्यम्– अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधो वक्तव्यः। काण्डे कुड्ये। किं कारणम्? अन्तवत्त्वात्। तिबतिपोरेकादेशः अतिपोऽन्तवत्स्यात्। अस्त्यन्यत्तिप इति कृत्वा प्रातिपदिकसञ्ज्ञा प्राप्नोति।

प्रसज्यप्रतिषेधाभ्युपगमभाष्यम्– अस्तु तर्हि प्रसज्यप्रतिषेधः—प्रत्ययो नेति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(680. **प्रसज्यप्रतिषेधबाधकवार्त्तिकम्**-14)

* न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात् *

भाष्यम्– न प्रत्यय इति चेदूङेकादेशे प्रतिषेधः प्राप्नोति। ब्रह्मबन्धूः। किं कारणम्? आदिवत्त्वात्। प्रत्ययाप्रत्यययोरेकादेशः प्रत्ययस्यादिवत्स्यात्। तत्र प्रत्ययो नेति प्रतिषेधः प्राप्नोति। किं पुनरत्र प्रातिपदिकसञ्ज्ञया प्रार्थ्यते? प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात्।

समाधानभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—उत्पद्यन्ते ऊङन्तात्स्वादय— इति। यदयं 'नोङ्धात्वोः' इति विभक्तिस्वरस्य प्रतिषेधं शास्ति। अथवा द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसञ्ज्ञा तयान्तवद्भावात्स्वाद्युत्पत्तिर्भविष्यति।

(681. **द्वितीयाक्षेपवार्त्तिकम्**-15)

* सुब्लोपे च प्रत्ययलक्षणत्वात् *

भाष्यम्– सुब्लोपे च प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोति। राजा। तक्षा। प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—न प्रत्ययलक्षणेन प्रतिषेधो भवतीति। यदयं—'न ङिसम्बुद्ध्योः' इति प्रतिषेधं शास्ति।

पर्युदासेऽपि दोषोद्धारभाष्यम्– अथवा पुनरस्तु पर्युदासः।

दोषस्मरणभाष्यम्– ननु चोक्तम् 'अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोऽन्तवत्त्वाद्' इति।

दोषसाम्यप्रतिपादनभाष्यम्– प्रसज्यप्रतिषेधेप्येष दोषः। द्वे ह्यत्र प्रातिपदिकसञ्ज्ञे अवयवस्यापि समुदायस्यापि। गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्यात्—ह्रस्वो नपुंसके यत्तस्येति। किं च नपुंसके? नपुंसकं यस्य गुणः। कस्य नपुंसकं गुणः? प्रातिपदिकस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।।45।।

(98. **प्रातिपदिकसञ्ज्ञासूत्रम्** 1.2.2 आ. 2)

120. कृत्तद्धितसमासाश्च 1.2.46

आक्षेपभाष्यम्– समासग्रहणं किमर्थम्?

(682. **समाधानवार्त्तिकम्**-1)

* समासग्रहण उक्तम् *

भाष्यम्– किमुक्तम्? 'अर्थवत्समुदायानां समासग्रहणं नियमार्थम्' इति। कृत्तद्धित समासाश्च।।46।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(99. ह्रस्वविधिसूत्रम् 1.2.2 आ. 3)

121. ह्रस्वो नपुंसके प्रातिपदिकस्य 1.2.47

प्रातिपदिकपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– प्रातिपदिकग्रहणं किमर्थम्?

(683. समाधानवार्त्तिकम्-1)

*** नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिब्निवृत्त्यर्थम् ***

भाष्यम्– नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं क्रियते। तिब्निवृत्त्यर्थम्। तिबन्तस्य ह्रस्वत्वं मा भूत् काण्डे कुड्ये। रमते ब्राह्मणकुलमिति।

(684. आक्षेपवार्त्तिकम्-2)

*** अव्ययप्रतिषेधः ***

भाष्यम्– अव्ययानां प्रतिषेधो वक्तव्यः। इह मा भूत्—दोषा ब्राह्मणकुलं दिवा ब्राह्मणकुलमिति।

तृतीयाक्षेपभाष्यम्– स तर्हि वक्तव्यः।

आक्षेपप्रयोजननिराकरणभाष्यम्– न वक्तव्यः। नात्राव्ययं नपुंसके वर्तते। किं तर्हि? अधिकरणमत्राव्ययं नपुंसकस्य।

प्रयोजनान्तरभाष्यम्– इह तर्हि प्राप्नोति काण्डीभूतं वृषलकुलं कुड्यीभूतं वृषलकुलमिति।

(685. समाधानवार्त्तिकम्-3)

*** न वा लिङ्गाभावात् ***

भाष्यम्– न वा वक्तव्यम्। किं कारणम्? लिङ्गाभावात्। अलिङ्गमव्ययम्।

आक्षेपभाष्यम्– किं पुनरयमव्ययस्यैव परिहारः आहोस्वित्तिबन्तस्यापि परिहारः।?

समाधानभाष्यम्– तिबन्तस्यापीत्याह। कथम्? अव्ययं हि किंचिद्विभक्त्यर्थप्रधानं किञ्चित्क्रियाप्रधानम्– उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम, हिरुक् पृथगिति क्रियाप्रधानम्। तिबन्तं चापि किञ्चिद्विभक्त्यर्थ प्रधानं किञ्चित्क्रियाप्रधानम्—काण्डे कुड्ये इति विभक्त्यर्थ-प्रधानं, रमते ब्राह्मणकुलमिति क्रियाप्रधानम्। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति। अवश्यं चैतदेवं विज्ञेयम्। क्रियमाणेऽपि हि प्रातिपदिकग्रहणे इह प्रसज्येत—काण्डे कुड्ये। द्वे ह्यत्र प्रातिपदिकसञ्ज्ञे। अवयवस्यापि समुदायस्यापि। गृह्यते च प्रातिपदिका-प्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामिति वक्तव्यं स्याद्—ह्रस्वो नपुंसके यत्तस्येति। किं च नपुंसके? नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः? प्रातिपदिकस्य।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टनिवारणाधिकरणम्

(686. आक्षेपवार्त्तिकम्- 4)

*** यञेकादेशदीर्घैत्त्वेषु प्रतिषेधः ***

भाष्यम्– यञेकादेशदीर्घैत्त्वेषु प्रतिषेधो वक्तव्यः। युगवरत्राय। युगवरत्रार्थम्। युगवरत्रेभ्यः।

(687. समाधानवार्त्तिकम्- 5)

*** यञेकादेशदीर्घैत्त्वेषु बहिरङ्गलक्षणत्त्वात्सिद्धम् ***

भाष्यम्– बहिरङ्गा एते विधयः। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे।

(688 प्रागुक्ताक्षेपसमाधानानुकर्षवार्त्तिकम्- 6)

*** उपसर्जनह्रस्वत्वे च ***

भाष्यम्– किम्? 'यञेकादेशदीर्घैत्त्वेषु प्रतिषेधो वक्तव्यः'। अतिखट्वाय। अतिखट्वार्थम्। अतिखट्वेभ्यः। 'बहिरङ्गलक्षणत्वात्सिद्धम्' इत्येव। बहिरङ्गा एते विधयः। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे। ह्रस्वो नपुंसके।।47।।

(100. ह्रस्वविधिसूत्रम् 1.2.2 आ. 4)

122. गोस्त्रियोरुपसर्जनस्य 1.2.48

न्यायान्तरनिराकरणाधिकरणम्

(689. आक्षेपवार्त्तिकम्- 2)

*** गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम् ***

भाष्यम्– गोटाङ्ग्रहणं कर्तव्यम्। किमिदं टाङिति? प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः? टापः प्रभृत्या ष्यङो ङकारात्। किं प्रयोजनम्? कृन्निवृत्त्यर्थम्। कृत्स्त्रिया धातुस्त्रियाश्च ह्रस्वत्वं मा भूदिति। अतितन्त्रीरतिश्रीरतिलक्ष्मीरिति।

तटस्थाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। स्त्रीग्रहणं स्वरयिष्यते। तत्र स्वरितेनाधिकारगतिर्भवति। 'स्त्रियाम्' इत्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति।

आक्षेपभाष्यम्– यद्येवं प्रत्ययग्रहणमिदं भवति। तत्र 'प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति' इतीह न प्राप्नोति—अतिराजकुमारिः, अतिसेनानीकुमारिरिति।

समाधानभाष्यम्– 'अस्त्रीप्रत्ययेन' इत्येवं तत्।

अनिष्टह्रस्वापत्तिवारणाधिकरणम्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(690. आक्षेपवार्त्तिकम्-3)

*** ईयसो बहुव्रीहौ पुंवद्वचनम् ***

भाष्यम्– ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी विद्यमानश्रेयसी।

(691. आक्षेपवार्त्तिकम्-4)

*** पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम् ***

भाष्यम्– पूर्वपदस्य च प्रतिषेधो वक्तव्यः। किं प्रयोजनम्? गोसमासनिवृत्त्यर्थम्। गोनिवृत्त्यर्थं समासनिवृत्यर्थं च। गोनिवृत्यर्थं तावत्—गोकुलं गोक्षीरं गोपालक इति। समासनिवृत्त्यर्थम्– राजकुमारीपुत्रः सेनानीकुमारीपुत्र इति।

प्रत्याक्षेपभाष्यम्– किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासोऽपि किञ्चित्पूर्वपदं यदर्थः प्रतिषेधः स्यात्?

प्रत्याक्षेपनिराकरणभाष्यम्– स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चान्तरेण समासं स्त्र्यन्तं प्रातिपदिकमुपसर्जनमस्ति।

निराकरणहेतुबाधकभाष्यम्– ननु चेदमस्ति खट्वापादो मालापाद इति। एकादेशे कृतेन्तादिवद्भावात्प्राप्नोति।

निराकरणसाधकभाष्यम्– उभयत आश्रयणे नान्तादिवत्।

प्रथमप्रयोजनप्रत्याख्यानभाष्यम्– गोनिवृत्त्यर्थेन तावन्नार्थः। गोऽन्तस्य प्रातिपत्दिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चैतद्गोऽन्तम्।

प्रत्याख्यानबाधकभाष्यम्– ननु चैतदपि व्यपदेशिवद्भावेन गोन्तम्।

प्रत्याख्यानसाधकभाष्यम्– व्यपदेशिवद्भावोऽप्रातिपदिकेन।

द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्– समासनिवृत्त्यर्थेन चापि नार्थः। स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। प्रधानमुपसर्जनमिति च सम्बन्धिशब्दावेतौ। तत्र सम्बन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तस्य चेत्सोऽन्तो भवतीति। अवश्यं चैतदेवं विज्ञेयम्। उच्यमानेऽपि हि प्रतिषेध इह प्रसज्येत—पञ्च कुमार्यः प्रिया अस्य पञ्चकुमारीप्रियः, दशकुमारीप्रिय इति।

(692. आक्षेपवार्त्तिकम्-5)

*** कपि च ***

भाष्यम्– कपि च प्रतिषेधो वक्तव्यः। बहुकुमारीकः। बहुवृषलीकः।

(693. आक्षेपवार्त्तिकम्-6)

*** द्वन्द्वे च ***

भाष्यम्– द्वन्द्वे च प्रतिषेधो वक्तव्यः। कुक्कुटमयूर्यौ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(694. **समाधानवार्त्तिकम्**-7)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्? कपि तावदुक्तं—'न कपि' इति प्रतिषेधः— इति।

निराकरणभाष्यम्– नैतदस्त्युक्तम्। 'केणः' इति या ह्रस्वप्राप्तिस्तस्याः प्रतिषेध इति। कुत एतत्? 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते या च यावती च ह्रस्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेध इति, इहापि तस्य प्रतिषेधः प्रसज्येत—प्रियं ग्रामणि ब्राह्मणकुलमस्य प्रियग्रामणिकः, प्रियसेनानिकः।

उक्त्यन्तरभाष्यम्– इदं तर्ह्युक्तम्—'कपि कृते अनन्त्यत्वाद् ह्रस्वत्वं न भविष्यति'। इदमिह सम्प्रधार्यम्– कप् क्रियतां, ह्रस्वत्वमिति। किमत्र कर्तव्यम्? परत्वात् कप्। अन्तरङ्गं ह्रस्वत्वम्। अन्तरङ्गतरः कप्।

आक्षेपभाष्यम्– न चायं कप् समासान्त इत्युच्यते।

आक्षेपबाधकभाष्यम्– तादर्थ्यात्ताच्छब्द्यं भविष्यति। येषां पदानां समासः न तावत्तेषामन्यद्भवति कपं तावत् प्रतीक्षते।

द्वन्द्वविषयकोक्तिभाष्यम्– द्वन्द्वेप्युक्तम्। किमुक्तम्? 'परवल्लिङ्गमिति शब्दशब्दार्थौ' इति तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति। गोस्त्रियोः।।48।।

(101. **लुग्विधिसूत्रम्** 1.2.2 आ. 5)

123. लुक्तद्धितलुकि 1.2.49

अनिष्टपरिहाराधिकरणम्

(695. **आक्षेपवार्त्तिकम्**-1)

*** तद्धितलुक्यवन्त्यादीनां प्रतिषेधः ***

भाष्यम्– तद्धितलुक्यवन्त्यादीनां प्रतिषेधो वक्तव्यः। अवन्ती। कुन्ती। कुरुः।

(696. **आक्षेपबाधकवार्त्तिकम्**-2)

*** तद्धितलुक्यवन्त्यादीनामप्रतिषेधोऽलुक्परत्वात् ***

भाष्यम्– तद्धितलुक्यवन्त्यादीनामप्रतिषेधः। अनर्थकः प्रतिषेधोप्रतिषेधः। लुक्कस्मान्न भवति? अलुक्परत्वात्। लुकीत्युच्यते, न चात्र लुकं पश्यामः।

आक्षेपसाधकभाष्यम्– लुकीति नैषा परसप्तमी शक्या विज्ञातुम्। नहि लुका पौर्वापर्यमस्ति। का तर्हि? सत्सप्तमी लुकि सतीति। सत्सप्तमी चेत् प्राप्नोति।

समाधानभाष्यम्– एवं तर्हीदमिह व्यपदेश्यं सद् आचार्यो न व्यपदिशति। किम्? उपसर्जनस्येति वर्तते इति। न च जातिरुपसर्जनम्। लुक्तद्धि।।49।।

(102. **इत्त्वविधिसूत्रम्** 1.2.2 आ. 6)

124. इद्गोण्याः 1.2.50

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(697. आक्षेपवार्त्तिकम्-1)

*** इद्गोण्या नेति वक्तव्यम् ***

भाष्यम्– गोण्या नेत्येव सिद्धम्। नार्थ इत्त्वेन।

प्रत्याक्षेपभाष्यम्– का रूपसिद्धिः—पञ्चगोणिर्दशगोणिः?

(698. प्रत्याक्षेपसमाधानवार्त्तिकम्-2)

*** ह्रस्वता हि विधीयते ***

भाष्यम्– ह्रस्वत्वमत्र विधीयते 'गोस्त्रियोरुपसर्जनस्य' इति।

(699. समाधानवार्त्तिकम्-3)

*** इति वा वचने तावत् ***

भाष्यम्– इदित्येवोच्येत नेति वा। को न्वत्र विशेषः।

(700. समाधानान्तरवार्त्तिकम्-4)

*** मात्रार्थं वा कृतं भवेत् ***

भाष्यम्– अथवा मात्रार्थमिदं वक्तव्यम्। गोणीमात्रमिदं गोणिः।

अपर आह—

(701. आक्षेपवार्त्तिकम्-5)

*** गोण्या इत्त्वं प्रकरणात् ***

भाष्यम्– अशिष्यं गोण्या इत्त्वम्। किं कारणम्? प्रकरणात्। प्रकृतं ह्रस्वत्वम्। ह्रस्व इति वर्तते।

आक्षेपभाष्यम्– न तु सूच्याः।

(702. समाधानवार्त्तिकम्-6)

*** सूच्याद्यर्थमथापि वा ***

भाष्यम्– सूच्याद्यर्थमिदं द्रष्टव्यम्। पञ्चसूचिः। दशसूचिः। इद्गोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते। इति वा वचने तावन्मात्रार्थं वा कृतं भवेत्। गोण्या इत्त्वं प्रकरणात् सूच्याद्यर्थमथापि वा।।1।। इद्गोण्याः।।50।।

(103 युक्तवद्भावातिदेशसूत्रम् 1.2.2 आ. 7)

125. लुपि युक्तवद्व्यक्तिवचने 1.2.51

पदकृत्यवर्णनाधिकरणम्

आक्षेपभाष्यम्– व्यक्तिवचने इति किमर्थम्?

समाधानभाष्यम्– शिरीषाणामदूरभवो ग्रामः शिरीषाः तस्य ग्रामस्य वनं शिरीषवनम्। किं च स्याद्? 'विभाषौषधिवनस्पतिभ्य' इति णत्वं प्रसज्येत।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतान्तरेणसमाधानभाष्यम्– अपर आह—कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी। षष्ठी युक्तवद्भावेन मा भूदिति।

प्रत्याक्षेपभाष्यम्– अथ व्यक्तिवचने इत्यप्युच्यमाने कस्मादेवात्र न भवति। षष्ठ्यति हि वचनम्?

प्रत्याक्षेपसमाधानभाष्यम्– नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्हि? अन्वर्थग्रहणम्—उच्यते वचनमिति।

समाधानबाधकभाष्यम्– एवमपि षष्ठी प्राप्नोति। षष्ठ्यपि ह्युच्यते।

समाधानसाधकभाष्यम्– लुपोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्। किं कारणम्? उक्तार्थानामप्रयोग इति।

आक्षेपभाष्यम्– आतिदेशिकी तर्हि प्राप्नोति।

समाधानशेषभाष्यम्– एवं तर्हि—

(703. **समाधानवार्त्तिकम्**-1)

*** प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम्।**
वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये॥ *

भाष्यम्– प्रागपि वृत्तेर्युक्तं वनस्पतिभिर्नगरम्। वृत्तं चापि युक्तं वनस्पतिभिर्नगरम्। वृत्ते च युक्तवद्भावो विधीयते। कामचारश्च प्रयोक्तुः—प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदेष्टुम्, वृत्तस्य वा ये लिङ्गसंख्ये ते। यावता कामचारः। वृत्तस्य ये लिङ्गसंख्ये ते अतिदेक्ष्येते, न प्राग्वृत्तेर्ये।

आक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

(704. **समाधानवार्त्तिकम्**-2)

*** अन्यत्राभिधेयस्य व्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः ***

भाष्यम्– अन्यत्राभिधेयवल्लिङ्गवचनानि भवन्ति। क्वान्यत्र? लुकि। लवणः सूपः। लवणा यवागूः। लवणं शाकमिति। अन्यत्राभिधेयवद्व्यक्तिवचनानि भवन्ति लुकि। इहाप्यभिधेयवल्लिङ्गवचनानि प्राप्नुवन्ति। इष्यन्ते चाभिधानवत्स्युरिति। तच्चान्तरेण यत्नं न सिध्यतीति लुपि युक्तवदनुदेशः। एवमर्थमिदमुच्यते।

काकुभाष्यम्– अस्ति प्रयोजनमेतत्। किं तर्हीति।

अर्थे कार्यसाधकाधिकरणम्

(705. **आक्षेपवार्त्तिकम्**-3)

*** लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते ***

भाष्यम्– लुब्नामेयमदर्शनस्य सञ्ज्ञा क्रियते। न चादर्शनस्य लिङ्गसंख्ये शक्येते अतिदेष्टुम्। लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(706. समाधानवार्त्तिकम्-4)

*** न वाऽदर्शनस्याशक्यत्वादर्थगतिः साहचर्यात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? अदर्शनस्याशक्यत्वात्। अदर्शनस्य लिङ्गसंख्ये अशक्ये अतिदेष्टुमिति कृत्वा अदर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति। साहचर्यात्।

(707. समाधानहेत्वन्तरवार्त्तिकम्-5)

*** योगाभावाच्चान्यस्य ***

भाष्यम्– अन्यस्यादर्शनेन योगो नास्तीति कृत्वा अदर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्।

(708. आक्षेपवार्त्तिकम्-6)

*** समास उत्तरपदस्य बहुवचनस्य लुपः ***

भाष्यम्– समासे उत्तरपदस्य बहुवचनस्य लुपो युक्तवद्भावो वक्तव्यः। मधुरापञ्चालाः। किं प्रयोजनम्? नियमार्थम्—समास उत्तरपदस्यैव। क्व मा भूत्? पञ्चालमधुरे इति। लुपि युक्तवत्।

(104. युक्तवद्भावातिदेशसूत्रम् 1.2.2 आ. 8)

126. विशेषणानां चाजातेः 1.2.52

जातिपदार्थान्वयनिर्णयाधिकरणम्

आक्षेपभाष्यम्– कथमिदं विज्ञायते जातिर्यद्विशेषणमिति, आहोस्विज्जातेर्यानि विशेषणानीति?

आक्षेपहेतुनिराकरणभाष्यम्– किं चातः?

आक्षेपसाधकभाष्यम्– यदि विज्ञायते—जातिर्यद्विशेषणमिति। **सिद्धम्–** पञ्चाला जनपद इति। सुभिक्षः सम्पन्नपानीयः बहुमाल्यफल इति सिद्ध्यति।

अथ विज्ञायते—जातेर्यानि विशेषणानीति सिद्धम्—सुभिक्षः सम्पन्नपानीयः बहुमाल्यफल इति। पञ्चाला जनपद इति न सिद्ध्यति।

समाधानभाष्यम्– एवं तर्हि नैवं विज्ञायते—जातिर्यद्विशेषणमिति, नापि—जातेर्यानि विशेषणानीति। कथं तर्हि? विशेषणानां युक्तवद्भावो भवति। आ जातेः। आजातिप्रयोगात्।

(709. समाधानवार्त्तिकम्-1)

*** विशेषणानां वचनं जातिनिवृत्त्यर्थम् ***

भाष्यम्– जातिनिवृत्त्यर्थोऽयमारम्भः।

आक्षेपभाष्यम्– किमुच्यते जातिनिवृत्त्यर्थ इति। न पुनर्विशेषणानामपि युक्तवद्भावो यथा स्यादिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(710. समाधानवार्त्तिकम्-2)

* समानाधिकरणत्वात्सिद्धम् *

भाष्यम्– समानाधिकरणत्वाद्विशेषणानां युक्तवद्भावो भविष्यति।

प्रत्याख्यानभाष्यम्– यद्येवं, नार्थोऽनेन। लुपोन्यत्रापि जातेर्युक्तवद्भावो न भवति। क्वान्यत्र? वदरी सूक्ष्मकण्टका मधुरा (वृक्ष) इति।

आक्षेपभाष्यम्– किं पुनः कारणमन्यत्रापि जातेर्युक्तवद्भावो न भवति?

समाधानभाष्यम्– आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते, उत्पत्तिप्रभृत्या विनाशान्न तद् लिङ्गं जहाति।

तटस्थाक्षेपभाष्यम्– न तर्हीदानीमयं योगो वक्तव्यः।

सिद्धान्तिसमाधानभाष्यम्– वक्तव्यश्च। किं प्रयोजनम्? इदं तत्र तत्रोच्यते— गुणवचनानां शब्दानामश्रयतो लिङ्गवचनानि भवन्तीति, तदनेन क्रियते।

(711. नियमवार्त्तिकम्-3)

* हरीतक्यादिषु व्यक्तिः *

भाष्यम्– हरीतक्यादिषु व्यक्तिर्भवति युक्तवद्भावेन। हरीतक्याः फलानि हरीतक्यः फलानि।

(712. नियमवार्त्तिकम्-4)

* खलतिकादिषु वचनम् *

भाष्यम्– खलतिकादिषु वचनं भवति युक्तवद्भावेन। खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि।

(713. आक्षेपवार्त्तिकम्-5)

* मनुष्यलुपि प्रतिषेधः *

भाष्यम्– मनुष्यलुपि प्रतिषेधो वक्तव्यः। चञ्चा अभिरूपः। वध्रिका दर्शनीयः। विशेषणानां चाजातेः।।51।।

(105. युक्तवद्भावप्रत्याख्यानसूत्रम् 1.2.2 आ. 9)

127. तदशिष्यं सञ्ज्ञाप्रमाणत्वात् 1.2.53

सञ्ज्ञाशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं या एताः कृत्रिमाष्टिघुभादिसञ्ज्ञास्तत्प्रामाण्यादशिष्यम्?

समाधानभाष्यम्– नेत्याह। सञ्ज्ञानं सञ्ज्ञा। तदशिष्यम्।।53।।

(106. बहुत्वातिदेशसूत्रम् 1.2.2 आ. 10)

132. जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् 1.2.58

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्वेबहुवचनसाधनाधिकरण्

आक्षेपभाष्यम्– इदमयुक्तं वर्तते। किमंत्रायुक्तम्? बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम्। तद्यदेकवचने शासितव्ये बहुवचनं शिष्यते एतदयुक्तम्। बहुष्वेकवचनमिति नाम वक्तव्यम्।

समाधानभाष्यम्– अत उत्तरं पठति—

(714. **समाधानवार्त्तिकम्-1**)

*** जात्याख्यायां सामान्याभिधानादैकार्थ्यम् ***

भाष्यम्– जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति। यत्तद् व्रीहौ व्रीहित्वम् यवे यवत्वम् गार्ग्ये गार्ग्यत्वम् तदेकम्, तच्च विवक्षितम्, तस्यैकत्त्वादेकवचनमेव प्राप्नोति। इष्यते च बहुवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति जात्याख्यायामेकस्मिन् बहुवचनम्। एवमर्थमिदमुच्यते।

काकुभाष्यम्– अस्ति प्रयोजनमेतत्। किं तर्हीति।

(715. **आक्षेपवार्त्तिकम्-2**)

*** तत्रैकवचनादेशे उक्तम् ***

भाष्यम्– किमुक्तम्? व्रीहिभ्य आगत इत्यत्र 'घेर्ङिति' इति गुणः प्राप्नोतीति।

समाधानभाष्यम्– नैष दोषः।

(716. **समाधानवार्त्तिकम्-6**)

*** अर्थातिदेशात्सिद्धम् ***

भाष्यम्– अर्थातिदेशोऽयम्। नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्हि? अन्वर्थग्रहणम्—उच्यते वचनम्। बहूनामर्थानां वचनं बहुवचनमिति। यावद् ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन् बहुवचनमिति।

(717. **प्रतिषेधाक्षेपवार्त्तिकम्-4**)

*** संख्याप्रयोगे प्रतिषेधः ***

भाष्यम्– संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः सम्पन्नः सुभिक्षं करोति। एको यवः सम्पन्नः सुभिक्षं करोति।

(718. **प्रतिषेधवार्त्तिकम्-5**)

*** अस्मदो नामयुवप्रत्यययोश्च ***

भाष्यम्– अस्मदो नामप्रयोगे युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः। नामप्रयोगे, अहं देवदत्तो ब्रवीमि। अहं यज्ञदत्तो ब्रवीमि। युवप्रत्ययप्रयोगे—अहं गार्ग्यायणो ब्रवीमि। अहं वात्स्यायनो ब्रवीमि।

वार्तिकेयुवग्रहणवैयर्थ्यभाष्यम्– युवग्रहणेन नार्थः—'अस्मदो नामप्रत्ययप्रयोगे न' इत्येव। इदमपि सिद्धं भवति—अहं गार्ग्यो ब्रवीमि। अहं वात्स्यो ब्रवीमि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अपर आह—'अस्मदः सविशेषणस्य प्रयोगे न' इत्येव। इदमपि सिद्धं भवति—अहं पटुर्ब्रवीमि। अहं पण्डितो ब्रवीमि।

(719. **प्रत्याख्यानवार्त्तिकम्**-6)

* अशिष्यं वा बहुवत् पृथक्त्वाभिधानात् *

भाष्यम्– अशिष्यो वा बहुवद्भावः। किं कारणम्? पृथक्त्वाभिधानात्। पृथक्त्वेन हि द्रव्याण्यभिधीयन्ते। बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम्।

आक्षेपभाष्यम्– किमुच्यते—पृथक्त्वाभिधानादिति। यावता इदानीमेवोक्तम्—'जात्या-ख्यायां सामान्याभिधानादैकार्थ्यम्' इति?

(720. **प्रत्याख्यानहेतुवार्त्तिकम्**-7)

* जातिशब्देन हि द्रव्याभिधानम् *

भाष्यम्– जातिशब्देन हि द्रव्यमप्यभिधीयते जातिरपि।

आक्षेपभाष्यम्– कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयत इति?

समाधानभाष्यम्– एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति—अस्त्यत्र काञ्चिद्गां पश्यसीति। स पश्यति—'पश्यति चायं गाः, पृच्छति च—'काञ्चिदत्र गां पश्यसि' इति, नूनमस्य द्रव्यं विवक्षितम्' इति। तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति। यदा सामान्याभिधानं तदैकवचनं भविष्यति। जात्याख्यायाम्।।58।।

(107. **बहुत्वातिदेशसूत्रम्** 1.2.2 आ. 11)

133. अस्मदो द्वयोश्च 1.2.59

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्—अहं ब्रवीमि आवां ब्रूवः वयं ब्रूमः?

समाधानभाष्यम्– इमानीन्द्रियाणि कदाचित्स्वातत्र्येण विवक्षितानि भवन्ति। तद्यथा—इदं मे अक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु शृणोतीति। कदाचित्पारतन्त्र्येण विवक्षितानि भवन्ति—अनेनाक्ष्णा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु शृणोमीति। तद्यदा स्वातन्त्र्येण विवक्षा तदा बहुवचनं भविष्यति। यदा पारतन्त्र्येण तदैकवचनद्विवचने भविष्यतः। अस्मदो।।59।।

(108. **बहुत्वातिदेशसूत्रम्** 1.2.2 आ. 12)

134. फल्गुनीप्रोष्ठपदानां च नक्षत्रे 1.2.60

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्—उदिते पूर्वे फल्गुन्यौ, उदिताः पूर्वाः फल्गुन्यः, उदिते पूर्वे प्रोष्ठपदे, उदिताः पूर्वाः प्रोष्ठपदाः?

समाधानभाष्यम्– फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो वर्तते। बहवस्तेऽर्थास्तत्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्तं बहुवचनम्। यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति। फल्गुनी।।60।।

(109-110. एकत्वातिदेशसूत्रे 1.2.2 आ. 13-14)

135. छन्दसि पुनर्वस्वोरेकवचनम् 1.2.61

136. विशाखयोश्च 1.2.62

प्रत्याख्यानभाष्यम्– इमावपि योगौ शक्यावक्तुम्।

आक्षेपभाष्यम्– कथम्?

(722. प्रत्याख्यानहेतुवार्त्तिकम्- 1)

*** पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम् ***

भाष्यम्– पुनर्वसुविशाखयोः 'सुपां सुलुक्पूर्वसवर्ण' इत्येव सिद्धम्। छन्दसि। विशाखयोः।।62।।

(111. द्वित्वातिदेशसूत्रम् 1.2.2 आ. 15)

137. तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् 1.2.63

आक्षेपभाष्यम्– तिष्यपुनर्वस्वोरिति किमर्थम्?

समाधानभाष्यम्– कृत्तिकारोहिण्यः।

आक्षेपभाष्यम्– नक्षत्र इति किमर्थम्?

समाधानभाष्यम्– तिष्यश्च माणवकः, पुनर्वसू च माणवकौ, तिष्यपुनर्वसवः।

आक्षेपभाष्यम्– अथ नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणं किमर्थम्?

समाधानभाष्यम्– अयं तिष्यपुनर्वसुशब्दोऽस्त्येव ज्योतिषि वर्तते। अस्ति च कालवाची। तद्यथा—बहवस्तिष्यपुनर्वसवोतिक्रान्ताः, कतरेण तिष्येण गत इति। तद्यो ज्योतिषि वर्तते तस्येदं ग्रहणम्।

समाधानान्तरभाष्यम्– अथवा नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनम्—विदेशस्थमपि तिष्यपुनर्वस्वोः कार्ये (तदपि) नक्षत्रस्यैव यथा स्यात्। 'तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्यः' इति नक्षत्रग्रहणं न कर्तव्यं भवति।

समाधानान्तरभाष्यम्– अथवा नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वसुपर्यायवाचिनामपि यथा स्यात्—तिष्यपुनर्वसू सिध्यपुनर्वसू।

आक्षेपभाष्यम्– अथ द्वन्द्व इति किमर्थम्?

समाधानभाष्यम्– यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसव उन्मुग्धाः।

सर्वो द्वन्द्वो विभाषैकवदिति परिभाषाधिकरणम्

आक्षेपभाष्यम्– बहुवचनस्येति किमर्थम्?

समाधानभाष्यम्– उदितं तिष्यपुनर्वसु।

प्रश्नभाष्यम्– कथं चात्रैकवचनम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– जातिद्वन्द्व एकवद्भवतीति।

समाधानबाधकभाष्यम्– अप्राणिनामिति प्रतिषेधः प्राप्नोति।

परिभाषासिद्धिसमाधानभाष्यम्– एवं तर्हि सिद्धे सति यद्बहुवचनग्रहणं करोति, तज् ज्ञापयत्याचार्यः—'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इत्येतत्सिद्धं भवति।

समाधानान्तरभाष्यम्– अथवा नात्रभवन्तः प्राणिनः, प्राणा एवात्रभवन्तः। तिष्यपुनर्वस्वोन्॥63॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्

●

प्रथमेऽध्याये द्वितीये पादे तृतीयमाह्निकम्

एकशेषप्रकरणम्

(112. **नियमसूत्रम्** 1.2.3 आ. 1)

138. सरूपाणामेकशेष एकविभक्तौ 1.2.64

पदकृत्याधिकरणम्

आक्षेपभाष्यम्– रूपग्रहणं किमर्थम्?

समाधानभाष्यम्– 'समानानामेकशेष एकविभक्तौ' इतीयत्युच्यमाने यत्रैव सर्वं समानं शब्दोऽर्थश्च, तत्रैव स्याद् वृक्षाः प्लक्षा इति। इह न स्याद्—अक्षाः पादा माषा इति। रूपग्रहणे पुनः क्रियमाणे न दोषो भवति। रूपं निमित्तत्वेनाश्रीयते। श्रुतौ च रूपग्रहणम्।

आक्षेपभाष्यम्– अथैकग्रहणं किमर्थम्?

समाधानभाष्यम्– 'सरूपाणां शेष एकविभक्तौ' इतीयत्युच्यमाने द्विबह्वोरपि शेषः प्रसज्येत। एकग्रहणे पुनः क्रियमाणे न दोषो भवति।

अथ शेषग्रहणप्रयोजनम्

आक्षेपभाष्यम्– अथ शेषग्रहणं किमर्थम्?

समाधानभाष्यम्– 'सरूपाणामेक एकविभक्तौ' इतीयत्युच्यमाने आदेशोऽयं विज्ञायेत।

आदेशविज्ञाने दूषणजिज्ञासाभाष्यम्– तत्र को दोषः?

दोषप्रदर्शकभाष्यम्– अश्वश्चाश्वश्चाश्वौ। आन्तर्यतो द्व्युदात्तवतः स्थानिनो द्व्युदात्तवानादेशः प्रसज्येत। लोप्यलोपिता च न प्रकल्पेत।

लोप्यलोपिप्रक्लृप्त्यभावे दूषणजिज्ञासाभाष्यम्– तत्र को दोषः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषप्रदर्शकभाष्यम्– गर्गा वत्सा विदा उर्वाः। यञ्यो बहुष्वञ्यो बहुष्वित्युच्यमानो लुङ् न प्राप्नोति।

समाधानबाधकभाष्यम्– मा भूदेवम्। यञन्तं यद्बहुषु अञन्तं यद्बहुष्वित्येवं भविष्यति।

समाधानसाधकभाष्यम्– नैवं शक्यम्, इह हि दोषः स्यात्—काश्यपप्रतिकृतयः काश्यपा इति।

आक्षेपभाष्यम्– एकविभक्ताविति किमर्थम्?

समाधानभाष्यम्– पयः पयो जरयति वासो वासश्छादयति ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीति।

सूत्रप्रयोजनम्

आक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

(723. समाधानवार्त्तिकप्रथमखण्डम्)

* प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् *

भाष्यम्– प्रत्यर्थं शब्दा अभिनिविशन्ते। किमिदं प्रत्यर्थमिति? अर्थमर्थं प्रति प्रत्यर्थम्। प्रत्यर्थं शब्दनिवेशाद्। एतस्मात्कारणाद् नैकेन शब्देनानेकस्यार्थस्याभिधानं प्राप्नोति।

आक्षेपभाष्यम्– तत्र को दोषः?

(724. समाधानवार्त्तिकद्वितीयखण्डम्-1)

* तत्रानेकार्थाभिधानेनेकशब्दत्वम् *

भाष्यम्– तत्रानेकार्थाभिधाने अनेकशब्दत्वं प्राप्नोति। इष्यते च एकेनाप्यनेकस्याभिधानं स्यादिति। तच्चान्तरेण यत्नं न सिध्यति। तस्मादेकशेषः। एवमर्थमिदमुच्यते।

काकुभाष्यम्– अस्ति प्रयोजनमेतत्। किं तर्हीति।

आक्षेपभाष्यम्– किमिदं प्रत्यर्थं शब्दा अभिनिविशन्त इत्येवं दृष्टान्तमास्थाय सरूपाणामेकशेष आरभ्यते, न पुनरप्रत्यर्थं शब्दा अभिनिविशन्त इत्येतं दृष्टान्तमास्थाय विरूपाणामनेकशेष आरभ्यते?

आक्षेपबाधकभाष्यम्– तत्रैतत्स्यात्—लघीयसी सरूपनिवृत्तिः, गरीयसी विरूपप्रतिपत्तिः।

आक्षेपसाधकभाष्यम्– तच्च न। लघीयसी विरूपप्रतिपत्तिः। किं कारणम्? यत्र हि बहूनां सरूपाणामेकः शिष्यते तत्रावरतो द्वयोः सरूपयोर्निवृत्तिर्वक्तव्या स्याद्।

समाधानभाष्यम्– एवमप्येतस्मिन् सति किञ्चिदाचार्य; सुकरतरकं चैकशेषारम्भं मन्यते।

एकशेषस्यानैमितिकत्वसाधनाधिकरणम्

आक्षेपभाष्यम्– किं पुनरयमेकविभक्तावेकशेषो भवति?

तटस्थभाष्यम्– एवं भवितुमर्हति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(725. पूर्वपक्ष्याक्षेपवार्त्तिकम्-3)

*** एकविभक्ताविति चेन्नाभावाद्विभक्तेः ***

भाष्यम्– एकविभक्ताविति चेत्तन्न। किं कारणम्? 'अभावाद्विभक्ते' नहि समुदायात्परा विभक्तिरस्ति। किं कारणम्? अप्रातिपदिकत्वात्।

आक्षेपबाधकभाष्यम्– ननु चार्थवत् प्रातिपदिकमिति प्रातिपदिकसञ्ज्ञा भविष्यति।

आक्षेपसाधकभाष्यम्– नियमात्र प्राप्नोति—अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति।

प्रथमपक्षाभ्युपगमभाष्यम्– यदि पुनः 'पृथक्सर्वेषां विभक्तिपराणामेकशेषः' उच्यते।

(726. दूषणवार्त्तिकम्-4)

*** पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात् ***

भाष्यम्– पृथक्सर्वेषामिति चेद् एकशेषे पृथग्विभक्त्युपलब्धिः प्राप्नोति। किमुच्यते एकशेषे पृथग्विभक्त्युपलब्धिरिति? यावता समयः कृतः—'न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः' इति। तदाश्रयत्वात् प्राप्नोति। यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति—अग्निचित्सोमसुदिति यथा। यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति—अधुना इयानिति यथा।

दूषणबाधकभाष्यम्– अस्तु। संयोगान्तलोपेन सिद्धम्।

दूषणसाधकभाष्यम्– कुतो नु खल्वेतत् परयोर्वृक्षशब्दयोर्निवृत्तिर्भविष्यति, न पुनः पूर्वयोरिति?

दूषणवाधकभाष्यम्– तत्रैतत्स्यात्पूर्वनिवृत्तावपि सत्यां संयोगादिलोपेन सिद्धमिति।

दूषणसाधकभाष्यम्– न सिध्यति। तत्रावरतो द्वयोस्सकारयोः श्रवणं प्रसज्येत।

दूषणान्तरभाष्यम्– यत्र च संयोगान्तलोपो नास्ति, तत्र च न सिध्यति। क्व च संयोगान्तलोपो नास्ति? द्विवचनबहुवचनयोः।

पक्षान्तरभाष्यम्– यदि पुनः समास एकशेष उच्यते।

आक्षेपभाष्यम्– किं कृतं भवति?

प्रयोजनभाष्यम्– कश्चिद्वचनलोपः परिहृतो भवति।

आक्षेपभाष्यम्– तत्तर्हि समासग्रहणं कर्तव्यम्।

आक्षेपबाधकभाष्यम्– न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' इति।

(727. दूषणवार्त्तिकम्-5)

*** समास इति चेत्स्वरसमासान्तेषु दोषः ***

भाष्यम्– समास इति चेत्स्वरसमासान्तेषु दोषो भवति। स्वर—अश्वश्चाश्वश्च अश्वौ। समासान्तोदात्तत्वे कृते एकशेषः प्राप्नोति। इदमिह सम्प्रधार्यम्—समासान्तोदात्तत्वं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियतामेकशेषः—इति, किमत्र कर्तव्यम्? परत्वात्समासान्तोदात्तत्वम्। समासान्तोदात्तत्वे च दोषो भवति। स्वर। समासान्त—ऋक्च ऋक्च ऋचौ। समासान्ते कृते असारूप्यादेकशेषो न प्राप्नोति। इदमिह सम्प्रधार्यम्—समासान्तः क्रियतामेकशेषः—इति। किमत्र कर्तव्यम्? परत्वात्समासान्तः। समासान्ते च दोषो भवति।

(728. दूषणवार्त्तिकम्-6)

*** अङ्गाश्रये चैकशेषवचनम् ***

भाष्यम्– अङ्गाश्रये च कार्ये एकशेषो वक्तव्यः। स्वसा च स्वसारौ च स्वसारः। अङ्गाश्रये कृतेऽसारूप्यादेकशेषो न प्राप्नोति। इदमिह सम्प्रधार्यमङ्गाश्रयं क्रियतामेकशेष इति। किमत्र कर्तव्यम्। परत्वादङ्गाश्रयम्।

(729. दूषणवार्त्तिकम्-7)

*** तिङ्समासे तिङ्समासवचनम् ***

भाष्यम्– तिङ्समासे तिङ्समासो वक्तव्यः।

आक्षेपभाष्यम्– एकं तिङ्ग्रहणमनर्थकम्– 'समासे तिङ्समास' इत्येव सिद्धम्।

आक्षेपबाधकभाष्यम्– नानर्थकम्। तिङ्समासे प्रकृते तिङ्समासो वक्तव्यः।

(730. दूषणवार्त्तिकम्-8)

*** तिङ्विधिप्रतिषेधश्च ***

भाष्यम्– तिङ् च कश्चिद्विधेयः कश्चित्प्रतिषेध्यः। पचति च पचति च पचतः तश्शब्दो विधेयः, तिशब्दः प्रतिषेध्यः।

(इति समस्तैकशेषरूपद्वितीयपक्षदूषणनिरूपणम्)

असमस्तैकशेषपक्षदूषणप्रकरणभाष्यम्– यदि पुनरसमास एकशेष उच्येत।

(731. दूषणवार्त्तिकम्-9)

*** असमासे वचनलोपः ***

भाष्यम्– यद्यसमासे वचनलोपो वक्तव्यः।

पुनरुक्तिदोषभाष्यम्– ननु चोत्पततैव वचनलोपं चोदिताः स्मः।

पुनरुक्तिपरिहारभाष्यम्– द्विवचनबहुवचनविधिं द्वन्द्वप्रतिषेधं च वक्ष्यति, तदर्थं पुनश्चोद्यते।

(732. दूषणवार्त्तिकम्-10)

*** द्विवचनबहुवचनविधिः ***

भाष्यम्– द्विवचनबहुवचनानि विधेयानि। वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षा इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(733. दूषणवार्त्तिकम्-11)

*** द्वन्द्वप्रतिषेधश्च ***

भाष्यम्– द्वन्द्वस्य च प्रतिषेधो वक्तव्यः। वृक्षश्च वृक्षश्च वृक्षौ, वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। 'चार्थे द्वन्द्व' इति द्वन्द्वः प्राप्नोति।

दूषणपरिहारभाष्यम्– नैष दोषः। अनवकाश एकशेषो द्वन्द्वं बाधिष्यते।

परिहारदूषणभाष्यम्– सावकाश एकशेषः। कोऽवकाशः? तिङन्तान्यवकाशः।

अथ विभक्त्यन्तैकशेषरूपचतुर्थपक्षनिरूपणभाष्यम्– यदि पुनः पृथक्सर्वेषां विभक्त्यन्तानामेकशेष उच्येत। किं कृतं भवति? कश्चिद्वचनलोपः परिहृतो भवति। विभक्त्यन्तानामेकशेषे विभक्त्यन्तानामेव तु निवृत्तिर्भवति।

(734. दूषणवार्त्तिकम्-12)

*** एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम् ***

भाष्यम्– एकविभक्त्यन्तानामिति तु वक्तव्यम्। किं प्रयोजनम्? पृथग्विभक्तिप्रतिषेधार्थं पृथग्विभक्त्यन्तानां मा भूत्। ब्राह्मणाभ्यां च देहि ब्राह्मणाभ्यां च कृतम्।

(735. दूषणनिराकरणवार्त्तिकम्-13)

*** न वार्थविप्रतिषेधाद्युगपद्वचनाभावः ***

भाष्यम्– न वा एष दोषः। किं कारणम्? अर्थविप्रतिषेधात्। विप्रतिषिद्धावेतावर्थौ कर्ता सम्प्रदानमिति अशक्यौ युगपन्निर्देष्टुम्। तयोर्विप्रतिषिद्धत्वाद् युगपद्वचनं न भविष्यति।

(736. दोषनिराकरणयुक्त्यन्तरवार्त्तिकम्-14)

*** अनेकार्थाश्रयश्च पुनरेकशेषः** (स्तस्मान्नैकशब्दत्वम्) *****

भाष्यम्– अनेकमर्थं सम्प्रत्याययिष्यामीति एकशेष आरभ्यते। तस्मान्नैकशब्दत्वम्। तस्मादेकशब्दत्वं न भविष्यति।

दूषणभाष्यम्– अयं तर्हि दोषः—कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति।

अथ पञ्चमपक्षनिरूपणम्

भाष्यम्– यदि पुनः प्रातिपदिकानामेकशेष उच्येत। किं कृतं भवति? वचनलोपः परिहृतो भवति।

(737. दूषणवार्त्तिकम्-15)

*** प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात् ***

भाष्यम्– प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्यः। माता च जनयित्री मातारौ च धान्यस्य मातृमातारः। किं कारणम्? सरूपत्वात्। सरूपाणि ह्येतानि प्रातिपदिकानि।

आक्षेपभाष्यम्– किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यः स्यात्। तस्यापि ह्येतानि क्वचिद्विभक्त्यन्तानि सरूपाणि मातृभ्यां च मातृभ्यां चेति?

दूषणाशयभाष्यम्– अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेति। प्रातिपदिकानामेवैकशेषे दोषो भवति। एवं च कृत्वा चोद्यते।

(738. **दूषणवार्त्तिकम्**-16)

*** हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम् ***

भाष्यम्– हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं कर्तव्यम्। हरितस्य स्त्री हरिणी हरिणस्यापि हरिणी हरिणी च हरिणी च हरिण्यौ। श्येतस्य स्त्री श्येनी, श्येनस्यापि स्त्री श्येनी, श्येनी च श्येनी च श्येन्यौ। रोहितस्य स्त्री रोहिणी रोहिणस्यापि रोहिणी रोहिणी च रोहिणी च रोहिण्यौ।

(739. **समाधानवार्त्तिकम्**-17)

*** न वा पदस्यार्थे प्रयोगात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते। विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सरूपाण्येतानि।

अपर आह—'न वा पदस्यार्थे प्रयेगात्' न वा एष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति। किं कारणम्? पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति।

पञ्चमपक्षसमर्थन आक्षेपभाष्यम्– अथानेन पक्षेणार्थः स्यात्प्रातिपदिकानामेकशेष इति।

समाधानभाष्यम्– बाढमर्थः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? एतेनैवाभिहितं सूत्रेण 'सरूपाणामेकशेष एकविभक्तौ' इति। कथम्? विभक्तिः सारूप्येणाश्रीयते। अनैमित्तिक एकशेषः। एकविभक्तौ लौकिके प्रयोगे यानि सरूपाणि तेषामेकशेषो भवति। क्व? यत्र वा तत्र वेति।

अथ तृतीयपक्षसमर्थनायाक्षेपभाष्यम्– अथानेन पक्षेणार्थः स्याद् 'विभक्त्यन्तानामेकशेषः' इति।

समाधानभाष्यम्– बाढमर्थः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? एतदप्येतेनैवाभिहितं सूत्रेण 'सरूपाणामेकशेष एकविभक्तौ' इति। कथम्? नेदं पारिभाषिक्या विभक्तेर्ग्रहणम्। किं तर्हि? अन्वर्थग्रहणं विभागो विभक्तिरिति। एकविभागे यानि सरूपाणि तेषामेकशेषो भवतीति।

प्रथमाक्षेपस्मारणभाष्यम्– ननु चोक्तम् कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्व-प्रतिषेधश्च इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपनिरासभाष्यम्– नैष दोष:। यत्तावदुच्यते कश्चिद्वचनलोपो द्विवचनबहुवचनविधि: इति।

(740. आक्षेपनिरासहेतुवार्त्तिकम्-19)

*** सहविवक्षायामेकशेष: ***

भाष्यम्– युगपद्विवक्षायामेकशेषेण भवितव्यम्।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—वृक्षश्च वृक्षश्च वृक्षौ, वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति।

इष्टापत्तिभाष्यम्– नैतत्सहविवक्षायां भवति। अथापि निदर्शयितुं बुद्धिरेवं निदर्शयितव्यम्—वृक्षौ च वृक्षौ च वृक्षौ, वृक्षाश्च वृक्षाश्च वृक्षाश्च वृक्षा इति।

द्वितीयाक्षेपनिरासभाष्यम्– यदप्युच्यते—'द्वन्द्वप्रतिषेधश्च वक्तव्य:' इति नैष दोष:। अनवकाश एकशेषो द्वन्द्वं बाधिष्यते।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—सावकाश एकशेष:। कोऽवकाश:? तिङन्तान्यवकाश इति।

आक्षेपनिरासभाष्यम्– न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति। किं कारणम्? यथाजातीयकानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति तथाजातीयकानामेकशेष:। न च तिङन्तानां द्वितीयपदस्य प्रयोगे सामर्थ्यमस्ति। किं कारणम्? एका हि क्रिया। एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्—उक्तार्थानामप्रयोग इति।

आक्षेपभाष्यम्– यदि तर्ह्येका क्रिया, द्विवचनबहुवचनानि न सिध्यन्ति पचत: पचन्ति।

आक्षेपनिरासभाष्यम्– नैतानि क्रियापेक्षाणि। किं तर्हि? साधनापेक्षाणि

अथ प्रथमपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु 'एकविभक्तौ' इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'एकविभक्ताविति चेन्नाभावाद्विभक्ते:' इति।

आक्षेपनिरासभाष्यम्– नैष दोष:। परिहृतमेतत् अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यतीति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—नियमान्न प्राप्नोति अर्थवत्समुदायानां समासग्रहणं नियमार्थम् इति।

आक्षेपनिरासभाष्यम्– नैष दोष:। तुल्यजातीयस्य नियम:। कश्च तुल्यजातीय:? यथाजातीयकानां समास:। कथं जातीयकानां समास:? सुबन्तानाम्।

(741. आक्षेपवार्त्तिकम्-20)

*** सर्वत्रापत्यादिषूपसंख्यानम् ***

भाष्यम्– सर्वेषु पक्षेष्वपत्यादिषूपसंख्यानं कर्तव्यम्। भिक्षाणां समूहो भैक्षमिति।

वार्तिके सर्वत्रपदासङ्गतिभाष्यम्– सर्वत्रेत्युच्यते प्रातिपदिकानां चैकशेषे सिद्धम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वत्रपदासङ्गतिनिरासभाष्यम्- अपत्यादिष्वित्युच्यते बहवश्चापत्यादयः। गर्गस्यापत्यं बहवो गर्गाः। एका प्रकृतिर्बहवश्च यञः। असारूप्यादेकशेषो न प्राप्नोति।

आक्षेपबाधकभाष्यम्- ननु च यथैव बहवो यञः, एवं प्रकृतयोपि बह्व्यः स्युः।

आक्षेपसाधकभाष्यम्- नैवं शक्यम्। इह हि दोषः स्याद्—गर्गा वत्सा विदा उर्वा इति। अञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुङ्न प्राप्नोति।

समाधानभाष्यम्- मा भूदेवम्। अञन्तं यद्बहुषु, यञन्तं यद्बहुष्वित्येवं भविष्यति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—नैवं शक्यमिह हि दोषः स्यात्—काश्यप-प्रतिकृतयः काश्यपा इति।

समाधानभाष्यम्- नैष दोषः। लौकिकस्य तत्र गोत्रस्य ग्रहणम्। न चैतल्लौकिकं गोत्रम्।

पक्षान्तराभ्युपगमभाष्यम्- अथवा पुनरस्तु एका प्रकृतिर्बहवश्च यञः।

आक्षेपस्मारणभाष्यम्- ननु चोक्तमसारूप्यादेकशेषो न प्राप्नोतीति।

(742. न्यासान्तरसमाधानवार्त्तिकम्-21)

*** सिद्धं तु समानार्थानामेकशेषवचनात् ***

भाष्यम्- सिद्धमेतत्। कथम्? समानार्थानामेकशेषो भवतीति वक्तव्यम्।

आक्षेपभाष्यम्- यदि समानार्थानामेकशेष उच्यते, कथमक्षाः पादा माषा इति?

(743. समाधानवार्त्तिकम्-22)

*** नानार्थानामपि सरूपाणाम् ***

भाष्यम्- नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः।

(744. न्यासान्तरवार्त्तिकफलितवार्त्तिकम्-23)

*** एकार्थानामपि विरूपाणाम् ***

भाष्यम्- एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः। वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डाविति वा।

(745. विभिन्नस्वराणामेकशेषनियामकवार्त्तिकम्-24)

*** स्वरभिन्नानां यस्योत्तरः स्वरविधिः ***

भाष्यम्- 'स्वरभिन्नानां यस्योत्तरः' स्वरविधिस्तस्यैकशेषो वक्तव्यः। अक्षश्च अक्षश्च अक्षौ, मीमांसकश्च मीमांसकश्च मीमांसकौ।

संख्याशब्दानामेकशेषाभावाधिकरणम्

आक्षेपभाष्यम्- इह कस्मान्न भवति—एकश्च एकश्च द्वौ च द्वौ चेति?

(746. समाधानवार्त्तिकम्-25)

*** संख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चानेकशेषः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– संख्याया अर्थासम्प्रत्ययादेकशेषो न भविष्यति। नह्येकावित्यनेनार्थो गम्यते। अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति। एकश्च एकश्चेत्यस्य 'द्वौ' इत्यर्थः। द्वौ च द्वौ चेत्यस्य 'चत्वारः' इत्यर्थः।

समाधानबाधकभाष्यम्– नैतौ स्तः परिहारौ। यत्तावदुच्यते—'संख्याया अर्था-सम्प्रतय्याद्' इति। अर्थासम्प्रत्यऽपि हि सत्येकशेषो भवति। तद्यथा गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। न चोच्यते वृद्धयुवानाविति। भवति चैकशेषः। यदप्युच्यते—'अन्यपदार्थत्वाच्च' इति। अन्यपदार्थेप्येकशेषो भवति। तद्यथा विंशतिश्च विंशतिश्च विंशती इति तयोश्चत्वा-रिंशदित्यर्थः।

समाधानवार्त्तिकाशयभाष्यम्– एवं तर्हि नेमौ पृथक्परिहारौ। एकपरिहारोऽयम् 'संख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्च' इति। यत्र ह्यर्थासम्प्रत्यय एव वा, अन्यपदार्थतैव वा, भवति तत्रैकशेषः गार्ग्यौ विंशती इति यथा।

पक्षान्तरभाष्यम्– अथवा नेमे एकशेषशब्दाः।

एकशेषशब्दत्वाभावेदूषणभाष्यम्– यदि तर्हि नेमे एकशेषशब्दाः समुदायशब्दास्तर्हि भवन्ति। तत्र को दोषः? एकवचनं प्राप्नोति। एकार्था हि समुदाया भवन्ति यूथं शतं वनमिति।

एकशेषशब्दत्वाङ्गीकारभाष्यम्– सन्तु तर्ह्येकशेषशब्दाः। किंकृतं सारूप्यम्? अन्योन्यकृतं सारूप्यम्।

दृष्टान्तपक्षभाष्यम्– सन्ति पुनः केचिद् अन्येपि शब्दाः येषामन्योन्यकृतो भावः?

दृष्टान्तप्रदर्शकभाष्यम्– सन्तीत्याह। माता पिता भ्रातेति।

दृष्टान्तवैषम्यभाष्यम्– विषम उपन्यासः। सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्ते। इह पुनरेकेनाप्यपाये न भवति चत्वार इति।

दृष्टान्तवैषम्यपरिहारभाष्यम्– अन्यदिदानीमेतदुच्यते—'सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्ते' इति। यत्तु भवानस्मांश्चोदयति—'सन्ति पुनः केचिदन्येऽपि शब्दा येषामन्योऽन्यकृतो भावः' इति। तत्रैतेस्माभिरुपन्यस्ताः। तत्रैतद्भवानाह—'सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्ते' इति। एतच्च वार्तम्। एकैको नोद्यन्तुं भारं शक्नोति यत्कथं तत्र। एकैकः कर्ता स्यात्सर्वे वा स्युः कथं युक्तम्।।1।।

कारणमुद्यमनं चेन्नोद्यच्छति चान्तरेण तत्तुल्यम्। तस्मात्पृथक् पृथक् ते कर्तारः सव्यपेक्षास्तु।।2।।

प्रथममध्यमोत्तमानामेकशेषविधानाधिकरणम्

(747. आक्षेपवार्त्तिकम्-26)

* प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात् *

भाष्यम्– प्रथममध्यमोत्तमानामेकशेषो वक्तव्यः। पचति च पचसि च पचथः। पचसि च पचामि च पचावः। पचति च पचसि च पचामि च पचामः। किं पुनः कारणं न सिध्यति? असरूपत्वात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रप्रत्याख्यानाधिकरणम्

(748. आक्षेपवार्त्तिकम्-27)

* द्विवचनबहुवचनाप्रसिद्धिरेकार्थत्वात् *

भाष्यम्– द्विवचनबहुवचनयोश्चाप्रसिद्धिः। किं कारणम्? 'एकार्थत्वाद्' एकोऽयमवशिष्यते तेनानेन तदर्थेन भवितव्यम्। किमर्थेन? यदर्थ एकः। किमर्थश्चैकः? एकार्थः।

(749. समाधानवार्त्तिकम्-28)

* नैकार्थ्यम् *

भाष्यम्– नायमेकार्थः। किं तर्हि? द्व्यर्थो बह्वर्थश्च।

(750. आक्षेपवार्त्तिकम्-29)

* नैकार्थ्यमिति चेदारम्भानर्थक्यम् *

भाष्यम्– नैकार्थ्यमिति चेदेकशेषारम्भोनर्थकः स्यात्। इह हि शब्दस्य स्वाभाविकी वाऽनेकार्थता स्यात्। वाचनिकी वा।

स्वाभाविकत्वे प्रत्याख्यानभाष्यम्– तद्यदि तावत्स्वाभाविकी—

(751. प्रत्याख्यानवार्त्तिकम्-30)

* अशिष्य एकशेष एकेनोक्तत्वात् *

भाष्यम्– अशिष्य एकशेषः। किं कारणम्। एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम् उक्तार्थानामप्रयोग इति।

वाचनिकत्वेवचनावश्यकत्वभाष्यम्– अथवाचनिकी, तद्वक्तव्यम्—'एकोऽयमवशिष्यते, स च द्व्यर्थो भवति बह्वर्थश्च' इति।

वचनानावश्यकताभाष्यम्– न वक्तव्यम् सिद्धमेकशेष इत्येव।

तृतीयस्याक्षेपभाष्यम्– कथं पुनरेकोऽयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता च शक्या लब्धुम्?

एकशेषवादिनः समाधानभाष्यम्– तच्चैकशेषकृतम्। नह्यन्तरेण तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवति। पश्यामश्च पुनरन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवति अग्निचित्सोमसुदिति यथा। ते मन्यामहे—लोपकृतमेतद्—येनात्र अन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति। एवमिहाप्येकशेषकृतमेतद्—येनात्रैकोऽयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता च भवति।

एकशेषप्रत्याख्यातुराक्षेपभाष्यम्– उच्येत तर्हि न तु गम्येत। यो हि गामश्व इति ब्रूयादश्वं वा गौरिति, न जातुचित्सम्प्रत्ययः स्यात्। तेनानेकार्थाभिधाने यत्नं कुर्वताऽवश्यं लोकः पृष्ठतोऽनुगन्तव्यः 'केष्वर्थेषु लौकिकाः कान् शब्दान्प्रयुञ्जते' इति। लोके चैकेकस्मिन् वृक्ष इति प्रयुञ्जते, द्वयोर्वृक्षौ, बहुषु वृक्षा इति। यदि तर्हि लोकोऽवश्यं शब्देषु प्रमाणं किमर्थमेकशेष आरभ्यते?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकशेषवादिनः प्रत्याक्षेपभाष्यम्– अथ किमर्थं लोप आरभ्यते?

एकशेषप्रत्याख्यातुः समाधानभाष्यम्– प्रत्ययलक्षणमाचार्यः प्रार्थयमानो लोपमारभते एकशेषारम्भे पुनरस्य न किञ्चित्प्रयोजनमस्ति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम् 'प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम्' इति। यदि चैकेनानेकस्याभिधानं स्यात् न प्रत्यर्थं शब्दनिवेशः कृतः स्यात्।

(752. आक्षेपसमाधानवार्त्तिकम्- 31)

*** प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव ***

भाष्यम्– प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानाद् अप्रत्यर्थमिति चेदेवमुच्यते यदप्येकेनानेकस्याभिधानं भवति तदपि प्रत्यर्थमेव। यदपि ह्यर्थावर्थौ प्रति तदपि प्रत्यर्थमेव। यदपि ह्यर्थानर्थान्प्रति तदपि प्रत्यर्थमेव।

(753. सूत्रारम्भवादिन आक्षेपवार्त्तिकम्- 32)

*** यावतामभिधानं तावतां प्रयोगो न्याय्यः ***

भाष्यम्– यावतामर्थानामभिधानं भवति तावतां शब्दानां प्रयोग इत्येव पक्षो न्याय्यः।

(754. प्रत्याख्यानवादिनः समाधानवार्त्तिकम्- 33)

*** यावतामभिधानं तावतां प्रयोगोन्याय्य इति चेदेकेनाप्यनेकस्याभिधानम् ***

भाष्यम्– यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेवमुच्यते। एषोऽपि पक्षो न्याय्य एव यदप्येकेनानेकस्याभिधानं भवति।

आक्षेपवार्त्तिकशेषभाष्यम्– यदि तर्ह्येकेनानेकस्याभिधानं भवति प्लक्षन्यग्रोधौ—

(755. आक्षेपवार्त्तिकम्- 34)

*** एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः ***

भाष्यम्– एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगेण न भवितव्यम्। किं कारणम्? उक्तार्थानामप्रयोग इति।

(756. समाधानवार्त्तिकम्- 35)

*** एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ***

भाष्यम्– एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते।

आक्षेपभाष्यम्– कथमनुक्तः। यदिदानीमेवोक्तमेकेनाप्यनेकस्याभिधानं भवतीति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– सरूपाणामेकेनाप्यनेकस्याभिधानं भवति न विरूपाणाम्।

आक्षेपभाष्यम्– किं पुनः कारणं सरूपाणामेकेनाप्यनेकस्याभिधानं भवति, न पुनर्विरूपाणाम्।

(757. **समाधानवार्त्तिकम्**-36)

*** अभिधानं पुनः स्वाभाविकम् ***

पुस्तकालय 147341 गुरुकुल कांगड़ी विश्वविद्यालय

भाष्यम्– स्वाभाविकमभिधानम्।

(758. **समाधानहेतुवार्त्तिकम्**-37)

*** उभयदर्शनाच्च ***

भाष्यम्– उभयं खल्वपिदृश्यते विरूपाणामप्येकेनानेकस्याभिधानं भवति। तद्यथा 'द्यावा ह क्षामा' 'द्यावा चिदस्मै पृथिवी नमेते' इति। विरूपाणां किल नामैकेनानेकस्याभिधानं स्यात् किं पुनः सरूपाणम्।

(759. **आकृतिपक्षवार्त्तिकम्**-38)

*** आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः ***

भाष्यम्– आकृत्यभिधानाद्वा एकं शब्दं विभक्तौ वाजप्यायन आचार्यो न्याय्यं मन्यते। एका आकृतिः, साचाभिधीयते इति।

आक्षेपभाष्यम्– कथं पुनर्ज्ञायते—एका आकृतिः सा चाभिधीयते इति।

(760. **समाधानवार्त्तिकम्**-39)

*** प्रख्याविशेषात् ***

भाष्यम्– नहि गौरित्युक्ते विशेषः प्रख्यायते—शुक्ला नीला कपिला कपोतिकेति।

(761. **समाधानवार्त्तिकम्**-40)

*** अव्यपवर्गगतेश्च ***

भाष्यम्– अव्यपवर्गगतेश्च मन्यामहे 'आकृतिरभिधीयते' इति। नहि गौरित्युक्ते व्यपवर्गो गम्यते—शुक्ला नीला कपिला कपोतिकेति।

(762. **आकृतिशक्तिवार्त्तिकम्**-41)

*** ज्ञायते चैकोपदिष्टम् ***

भाष्यम्– ज्ञायते खल्वप्येकोपदिष्टम्। गौरस्य कदाचिदुपदिष्टो भवति। स तमन्यस्मिन्देशेऽन्यस्मिन्कालेन्यस्यां च वयोवस्थायां दृष्ट्वा जानाति अयं गौरिति।

आक्षेपभाष्यम्– कः पुनरस्य विशेषः 'प्रख्याविशेषादित्यतः?

समाधानभाष्यम्– तस्यैवोपोद्बलकमेतत्—'प्रख्याविशेषाद् ज्ञायते चैकोपदिष्टम्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(763. आकृतिवार्त्तिकम्-42)

*** धर्मशास्त्रं च तथा ***

भाष्यम्– एवं च कृत्वा धर्मशास्त्रं प्रवृत्तम् 'ब्राह्मणो न हन्तव्यः' 'सुरा न पेये'ति, ब्राह्मणमात्रं च न हन्यते, सुरामात्रं च न पीयते। यदि द्रव्यं पदार्थः स्यात्, एकं ब्राह्मण-महत्वा एकां च सुरामपीत्वाऽन्यत्र कामचारः स्यात्।

आक्षेपभाष्यम्– कः पुनरत्र विशेषः 'अव्यपवर्गगतेश्च धर्मशास्त्रं च तथा' इति।

(764. आकृतिवार्त्तिकम्-43)

*** अस्ति चैकमनेकाधिकरणस्थं युगपत् ***

भाष्यम्– अस्ति खल्वप्येकमनेकाधिकरणस्थं युगपल्लभ्यते। किम्? आदित्यः। तद्यथा एक आदित्योनेकाधिकरणस्थो युगपदुपलभ्यते।

दृष्टान्तवैषम्यभाष्यम्– विषम उपन्यासः। नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युग-पदुपलभते।

दृष्टान्तान्तरवार्त्तिकशेषभाष्यम्– एवं तर्हि—

(765. दृष्टान्तवार्त्तिकम्-44)

*** इतीन्द्रवद्विषयः ***

भाष्यम्– तद्यथा एक इन्द्रोऽनेकस्मिन् क्रतुशते आहूतो युगपत्सर्वत्र भवति। एवमाकृतिर्युगपत्सर्वत्र भविष्यति।

उपोद्घलकभाष्यम्– अवश्यं चैतदेवं विज्ञेयम्—एकमनेकाधिकरणस्थं युगपदुपलभ्यत इति।

(766. अनुपपत्तिवार्त्तिकम्-45)

*** नैकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषे ***

भाष्यम्– यो हि मन्यते—'नैकमनेकाधिकरणस्थं युगपदुपलभ्यत' इति। एकशेषे तस्य दोषः स्यात्। एकशेषेऽपि नैको वृक्षशब्दोऽनेकमर्थं युगपदभिदधीत।

अथाकृतिवादोपपादनम्

उपोद्घलकभाष्यम्– अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति।

(767. अन्यथानुपपत्तिवार्त्तिकम्-46)

*** द्रव्याभिधाने ह्याकृत्यसम्प्रत्ययः**(स्तत्रासर्वद्रव्यगतिः) *****

भाष्यम्– द्रव्याभिधाने सत्याकृतेरसम्प्रत्ययः स्यात्। तत्र को दोषः? 'तत्रासर्वद्रव्यगतिः'। तत्रासर्वद्रव्यगतिः प्राप्नोति। असर्वद्रव्यगतौ को दोषः? 'गौरनुबन्ध्योऽजोऽग्नीषोमीयः' इति एकः शास्त्रोक्तं कुर्वीत, अपरोशास्त्रोक्तम्। अशास्त्रोक्ते च क्रियमाणे विगुणे कर्म भवति। विगुणे च कर्मणि फलानवाप्तिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– ननु च यस्याप्याकृतिः पदार्थः, तस्यापि यद्यनवयवेन चोद्यते न चानुबध्यते। विगुणं कर्म भवति। विगुणे च कर्मणि फलानवाप्तिः। एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनम्—एकशेषो न वक्तव्य इति, स चेदानीं वक्तव्यो भवति।

समाधानभाष्यम्– एवं तर्ह्यनवयवेन चोद्यते, प्रत्येकं च परिसमाप्यते। यथा आदित्यः।

आक्षेपभाष्यम्– ननु च यस्यापि द्रव्यं पदार्थः, तस्याप्यनवयवेन चोद्यते, प्रत्येकं च परिसमाप्यते।

आकृतिवादिभाष्यम्– एकशेषस्त्वया वक्तव्यः।

द्रव्यवादिभाष्यम्– त्वयापि तर्हि द्विवचनबहुवचनानि साध्यानि।

(768. **आकृतिवार्त्तिकम्**-47)

*** चोदनायां चैकस्योपाधिवृत्तेः ***

भाष्यम्– चोदनायां चैकस्योपाधिवृत्तेर्मन्यामहे आकृतिरभिधीयते इति। 'आग्नेयमष्टाकपालं निर्वपेत्' एकं निरुप्य द्वितीयस्तृतीयश्च निरुप्यते। यदि च द्रव्यं पदार्थः स्यादेकं निरुप्य द्वितीयस्य तृतीयस्य च निर्वपणं न प्रकल्पेत।

आक्षेपभाष्यम्– कः पुनरेतयोर्जातिचोदनयोर्विशेषः?

समाधानभाष्यम्– एका निर्वृत्तेन, अपरा निर्वर्त्येन।

व्यक्तिवादोपपत्तिः

(769. **व्यक्तिवादिवार्त्तिकम्**-48)

*** द्रव्याभिधानं व्याडिः ***

भाष्यम्– द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते द्रव्यमभिधीयते इति।

(770. **व्यक्तिशक्तिसाधकवार्त्तिकम्**-49)

*** तथा च लिङ्गवचनसिद्धिः ***

भाष्यम्– एवं च कृत्वा लिङ्गवचनानि सिद्धानि भवन्ति। ब्राह्मणी ब्राह्मणः ब्राह्मणौ ब्राह्मणा इति।

(771. **व्यक्तिशक्तिसाधकवार्त्तिकम्**-50)

*** चोदनासु च तस्यारम्भात् ***

भाष्यम्– चोदनासु च तस्यारम्भान्मन्यामहे द्रव्यमभिधीयत इति। 'गौरनुबन्ध्योऽ-जोग्नीषोमीय' इति। आकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते।

(772. **अनुपपत्तिवार्त्तिकम्**-51)

*** न चैकमनेकाधिकरणस्थं युगपत् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते। नह्येको देवदत्तो युगपत्स्रुघ्ने भवति मथुरायां च।

(773. अनिष्टापत्तिवार्त्तिकम्-52)

*** विनाशे प्रादुर्भावे च सर्वं तथा स्यात् ***

भाष्यम्– किम्? विनश्येच्च प्रादुष्याच्च। 'श्वा मृतः' इति श्वा नाम लोके न प्रचरेत्। 'गौर्जात' इति सर्वं गोभूतमनवकाशं स्यात्।

(774. व्यक्तिवादिवार्त्तिकम्-53)

*** अस्ति च वैरूप्यम् ***

भाष्यम्– अस्ति खल्वपि वैरुप्यम् 'गौश्च गौश्च' खण्डो मुण्ड इति।

(775. व्यक्तिवादिवार्त्तिकम्-54)

*** तथा च विग्रहः ***

भाष्यम्– एवं च कृत्वा विग्रह उपपन्नो भवति—गौश्च गौश्चेति।

(776. व्यक्तिवादिवार्त्तिकम्-55)

*** व्यर्थेषु च मुक्तसंशयम् ***

भाष्यम्– व्यर्थेषु च मुक्तसंशयं भवति। आकृतावपि पदार्थे एकशेषो वक्तव्यः। अक्षाः पादा माषा इति।

(777. आकृतिवादिवार्त्तिकम्-56)

*** लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात् ***

भाष्यम्– लिङ्गवचनानि सिद्धानि भवन्ति। कुतः? गुणस्यानित्यत्वात्। अनित्या गुणा अपायिन उपायिनश्च।

आक्षेपभाष्यम्– किं य एते शुक्लादयः?

समाधानभाष्यम्– नेत्याह। स्त्रीपुंनपुंसकानि सत्त्वगुणाः। एकत्वद्वित्वबहुत्वानि च। कदाचिदाकृतिरेकत्वेन युज्यते, कदाचिद्द्वित्वेन, कदाचित्स्त्रीत्वेन कदाचित्पुंस्त्वेन कदाचिन्नपुंसकत्वेन।

आक्षेपभाष्यम्– भवेल्लिङ्गपरिहार उपपन्नः, वचनपरिहारस्तु नोपपद्यते। यदि हि कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन, एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तम् 'एकशेषो न वक्तव्यः' इति, स च इदानीं वक्तव्यो भवति।

भाष्यम्– एवं तर्हि।

(778. न्यासान्तरवार्त्तिकम्-57)

*** लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– लिङ्गवचनानि सिद्धानि भवन्ति। कुत:? गुणविवक्षाया अनित्यत्वात्। अनित्या गुणविवक्षा। कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद् द्वित्वेन कदाचिद्बहुत्वेन, कदाचित्स्त्रीत्वेन कदाचित्पुंस्त्वेन कदाचिन्नपुंसकत्वेन।

आक्षेपभाष्यम्– भवेल्लिङ्गपरिहार उपपन्न:। वचनपरिहारस्तु नोपपद्यते। यदि कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन, एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति। स चेदानीं वक्तव्यो भवति।

समाधानभाष्यम्– लिङ्गपरिहारश्चापि नोपपद्यते। किं कारणम्? आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते। उत्पत्तिप्रभृत्या विनाशात्तल्लिङ्गं न जहाति।

समाधानोपसंहारभाष्यम्– तस्मान्न वैयाकरणै: शक्यं लौकिकं लिङ्गमास्थातुम्, अवश्यं कश्चित्स्वकृतान्त आस्थेय:।

आक्षेपभाष्यम्– कोऽसौ स्वकृतान्त:?

(779. **समाधानवार्त्तिकम्**-58)

*** संस्त्यानप्रसवौ लिङ्गम् ***

भाष्यम्– संस्त्यानप्रसवौ लिङ्गमास्थेयौ।

आक्षेपभाष्यम्– किमिदं संस्त्यानप्रसवाविति?

(780. **समाधानवार्त्तिकम्**-59)

*** संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूते: सप् प्रसवे पुमान् ***

आक्षेपभाष्यम्– ननु च लोकेऽपि स्त्यायतेरेव स्त्री, सूतेश्च पुमान्।

समाधानभाष्यम्– अधिकरणसाधना लोके स्त्री—स्त्यायत्यस्यां गर्भ इति, कर्तृसाधनश्च पुमान् सूते पुमानिति। इह पुनरुभयं भावसाधनं स्त्यानं प्रवृत्तिश्च।

आक्षेपभाष्यम्– कस्य पुन: स्त्यानं स्त्री, प्रवृत्तिर्वा पुमान्?

समाधानभाष्यम्– गुणानाम्। केषाम्? शब्दस्पर्शरूपरसगन्धानाम्। सर्वाश्च पुनर्मूर्तय एवमात्मिका: संस्त्यानप्रसवगुणा: शब्दस्पर्शरूपरसगन्धवत्य:। यत्राल्पीयांसो गुणा: तत्रावरतस्त्रय: शब्द: स्पर्शो रूपमिति। रसगन्धौ न सर्वत्र। प्रवृत्ति: खल्वपि नित्या। नहीदं कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते, वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते। तच्चोभयं सर्वत्र।

आक्षेपभाष्यम्– यद्युभयं सर्वत्र, कुतो व्यवस्था?

समाधानभाष्यम्– 'विवक्षात:।' संस्त्यानविवक्षायां स्त्री, प्रसवविवक्षायां पुमान्, उभयोरप्यविवक्षायां नपुंसकम्।

आक्षेपभाष्यम्– तत्र 'लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात्' इति लिङ्गपरिहार उपपन्न:, वचनपरिहारस्तु नोपपद्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- वचनपरिहारश्चाप्युपपन्नः। इदं तावदयं प्रष्टव्यः—अथ यस्य द्रव्यं पदार्थः कथं तस्य एकवचनद्विवचनबहुवचनानि भवन्तीति। एवं स वक्ष्यति एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति। यदि तस्यापि वाचनिकानि, न स्वाभाविकानि। अहमप्येवं वक्ष्यामि एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति। नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः। उभयोरुभयं पदार्थः। कस्यचित्किञ्चित्प्रधानभूतं किञ्चिद् गुणभूतम्। आकृतिपदार्थकस्य आकृतिः प्रधानभूता, द्रव्यं गुणभूतम्। द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता।

(781. आकृतिवादिवार्त्तिकम्-60)

*** गुणवचनवद्वा ***

भाष्यम्- गुणवचनवद्वा लिङ्गवचनानि भविष्यन्ति। तद्यथा—गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति—शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बला इति। यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रिता आकृतिस्तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति।

(782. आकृतिवादिवार्त्तिकम्-61)

*** अधिकरणगतिः साहचर्यात् ***

भाष्यम्- आकृतावारम्भणादीनां सम्भवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादीनि भविष्यन्ति।

(783. आकृतिवादिवार्त्तिकम्-62)

*** न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः ***

भाष्यम्- न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्यादित्यवद्विषयो भविष्यति। तद्यथा। एक आदित्योऽनेकाधिकरणस्थो युगपदुपलभ्यते।

आक्षेपभाष्यम्- विषम उपन्यासः। नैको द्रष्टाऽनेकाधिकरणस्थमादित्यं युगपदुपलभते।

समाधानभाष्यम्- एवं तर्हि—

(784. आकृतिवादिवार्त्तिकम्-63)

*** इतीन्द्रवद्विषयः ***

भाष्यम्- तद्यथैक इन्द्रोनेकस्मिन्क्रतुशत आहूतो युगपत्सर्वत्र भवत्येवमाकृतिर्युगपत्सर्वत्र भवेदिति।

*** अविनाशोनाश्रितत्त्वात् ***

भाष्यम्- द्रव्यविनाशे आकृतेरविनाशः। कुतः? अनाश्रितत्वात्। अनाश्रिता आकृतिर्द्रव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– किमुच्यते अनाश्रितत्वादिति, यदिदानीमेवोक्तम्— 'अधिकरणगतिः साहचर्यादिति?

समाधानभाष्यम्– एवं तर्हि—

(786. **न्यासान्तरवार्त्तिकम्**-62)

*** अविनाशोऽनैकात्म्यात् ***

भाष्यम्– द्रव्यविनाशे आकृतेरविनाशः। कुतः? अनैकात्म्यात्। अनेक आत्मा आकृतेर्द्रव्यस्य च। तद्यथा—वृक्षस्थोऽवतानो वृक्षे छिन्नेपि न विनश्यति।

(787. **आकृतिवादिवार्त्तिकम्**-63)

*** वैरूप्यविग्रहौ द्रव्यभेदात् ***

भाष्यम्– वैरूप्यविग्रहावपि द्रव्यभेदाद्भविष्यतः।

(788. **आकृतिवादिवार्त्तिकम्**-64)

*** व्यथेषु च सामान्यात्सिद्धम् ***

भाष्यम्– विभिन्नार्थेषु च सामान्यात्सिद्धम्। सर्वत्र अश्नोतेरक्षः, पद्यतेः पादः, मितीतेः माषः। तत्र क्रियासामान्यात्सिद्धम्।

व्याख्यान्तरभाष्यम्– अपरस्त्वाह—पुरा कल्प एतदासीत्षोडश माषाः कार्षापणम्, षोडशपलाश्च माषशंवट्यः। तत्र संख्यासामान्यात्सिद्धम्। सरूपाणाम्।।64।।

(113. **एकशेषसूत्रम्**-1.2.3 आ. 2)

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः 1.2.65

अनिष्टापत्तिवारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—अजश्च बर्करश्च, अश्वश्च किशोरश्च, उष्ट्रश्च करभश्चेति?

समाधानभाष्यम्– तल्लक्षणश्चेदेव विशेष इत्युच्यते। न चात्र तल्लक्षण एव विशेषः।

समाधानबाधकभाष्यम्– तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः। वृद्धो यूना।।65।।

(114. **एकशेषसूत्रम्** 1.2.3 आ. 3)

स्त्री पुंवच्च 1.2.66

स्त्रीशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– इदं सर्वेष्वेव स्त्रीग्रहणेषु विचार्यते—स्त्रीग्रहणेषु स्त्रीप्रत्ययग्रहणं वा स्यात्, स्त्र्यर्थग्रहणं वा, स्त्रीशब्दग्रहणं वेति। किं चातः? यदि प्रत्ययग्रहणं वा शब्द-ग्रहणं वा, 'गार्गी च गार्ग्यायणौ च गर्गाः' केन यशब्दो न श्रूयते 'अस्त्रियाम्' इति हि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लुगुच्यते। इह च गार्गी च गार्ग्यायणौ च गर्गान्पश्य 'तस्माच्छसो नः पुंसि, इति नत्वं न प्राप्नोति। अथार्थग्रहणम्, न दोषो भवति।

समाधानभाष्यम्– यथा न दोषस्तथास्तु।

अनिष्टवारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—अजा च बर्करश्च, वडवा च किशोरश्च, उष्ट्री च करभश्चेति?

समाधानभाष्यम्– तल्लक्षणश्चेदेव विशेष इत्युच्यते। न चात्र तल्लक्षण एव विशेषः।

समाधानबाधकभाष्यम्– तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः। स्त्री पुंवच्च।।66।।

(115. **एकशेषसूत्रम्** 1.2.3 आ. 4)

पुमान् स्त्रिया 1.2.67

अनिष्टवारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति हंसश्च वरटा च, कच्छपश्च दुलिश्च, ऋश्यश्च रोहिच्चेति?

समाधानभाष्यम्– तल्लक्षणश्चेदेव विशेष इत्युच्यते। न चात्र तल्लक्षण एव विशेषः।

समाधानबाधकभाष्यम्– तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः। पुमान् स्त्रिया।।67।।

(116. **एकशेषसूत्रम्** 1.2.3 आ. 5)

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् 1.2.68

आक्षेपभाष्यम्– किमर्थमिदमुच्यते, न 'पुमान् स्त्रिया' इत्येव सिद्धम्।

समाधानभाष्यम्– न सिध्यति। तल्लक्षणश्चेदेव विशेष इत्युच्यते, न चात्र तल्लक्षण एव विशेषः।

समाधानबाधकभाष्यम्– तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः।

समाधानसाधकभाष्यम्– एवं तर्हि सिद्धे सति यदिमं योगं शास्ति तज्ज्ञापयत्याचार्यः—'यत्रोर्ध्वं प्रकृतेः स्यात्तल्लक्षण एव विशेषः, तत्रैकशेषो भवति'। किमेतस्य ज्ञापने प्रयोजनम्? हंसश्च वरटा च, कच्छपश्च दुलिश्च, ऋश्यश्च रोहिच्चेति। अत्रैकशेषो न भवति। पूर्वयोर्योगयोर्भूयान्परिहारः—यावद् ब्रूयाद् गोत्रं यूनेति तावद् वृद्धो यूनेति। पूर्वसूत्रे गोत्रस्य वृद्धमिति सञ्ज्ञा क्रियते।

प्रत्याख्यानाधिकरणम्

(789. **प्रत्याख्यानवार्त्तिकम्**-1)

*** असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात् सामान्यस्य च विवक्षितत्वात्सिद्धम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषश्चाविवक्षितः सामान्यं च विवक्षितम्। विशेषश्चाविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सरूपाणामेकशेष एकविभक्तावित्येव सिद्धम्।

अनिष्टवारणाधिकरणम्

आक्षेपभाष्यम्– 'पुमान् स्त्रिया' इह कस्मान्न भवति—ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति?

(790. समाधानवार्त्तिकम्-2)

*** ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्याविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः ***

भाष्यम्– ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य अविभक्तिपरस्य विशेषवाचकत्वादेकशेषो न भविष्यति। यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति। नात्र लिङ्गं विभक्तिपरमेव विशेषवाचकम्।

आक्षेपभाष्यम्– यदि तर्हि यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति, इह न प्राप्नोति कारकश्च कारिका च कारकौ। नह्यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकम्। किं तर्हि इत्त्वमपि।

समाधानाय विचारभाष्यम्– कथं पुनरिदं विज्ञायते—शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति, आहोस्विदर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति? किं चातः? यदि विज्ञायते 'शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष' इति, सिद्धम्—कारकश्च कारिका च कारकौ। इदं तु न सिद्ध्यति—गोमांश्च गोमती च गोमन्तौ।

अथ विज्ञायते—'अर्थो या स्त्री तल्लक्षणश्चेदेव विशेषः' इति, सिद्धम्—गोमांश्च गोमती च गोमन्तौ। इदं तु न सिध्यति—'कारकश्च कारिका च कारकौ'। उभयथापि पटुश्च पट्वी च पटू इत्येतन्न सिध्यति।

समाधानभाष्यम्– एवं तर्हि नैवं विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति, नाप्यर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति। कथं तर्हि? शब्दार्थौ या स्त्री सद्भावेन च तल्लक्षणो विशेष आश्रीयते।

आक्षेपभाष्यम्– एवं च कृत्वा इहापि प्राप्तिः ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति।

समाधानभाष्यम्– एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्? तदित्यनुवर्तते। तदित्यनेन प्रकृतौ स्त्रीपुंसौ प्रतिनिर्दिश्येते। कौ च प्रकृतौ? प्रधाने। प्रधानं या शब्दस्त्री, प्रधानं या अर्थस्त्रीति। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्।।68।।

(117. **एकशेषसूत्रम्** 1.2.3 आ. 6)

143. नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् 1.2.69

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याख्यानभाष्यम्– अयं योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्—शुक्लश्च कम्बलः शुक्लं च वस्त्रं तदिदं शुक्लं, ते इमे शुक्ले। शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि?

(791. **समाधानवार्त्तिकम्**-1)

* प्रधाने कार्यसम्प्रत्ययाच्छेषः *

भाष्यम्– प्रधाने कार्यसम्प्रत्ययाच्छेषो भविष्यति। किं च प्रधानम्? नपुंसकम्। कथं पुनर्ज्ञायते नपुंसकं प्रधानमिति? एवं हि दृश्यते लोके अनिर्ज्ञातेऽर्थे गुणसंदेहे च नपुंसकलिङ्गं प्रयुज्यते—किं जातमित्युच्यते। द्वयं चैव हि जायते। स्त्री वा पुमान्वा। तथा—विदूरे अव्यक्तरूपं दृष्ट्वा वक्तारो भवन्ति—महिषीरूपमिव ब्राह्मणीरूपमेव। प्रधाने कार्यसम्प्रत्ययान्नपुंसकस्य शेषो भविष्यति।

आक्षेपभाष्यम्– इदं तर्हि प्रयोजनम्—एकवच्चास्यान्यतरस्यामिति वक्ष्यामीति।

समाधानभाष्यम्– एतदपि नास्ति प्रयोजनम्।

(792. **समाधानवार्त्तिकम्**-2)

* आकृतिवाचित्वादेकवचनम् *

भाष्यम्– आकृतिवाचित्वादेकवचनं भविष्यति यदा द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यतः। नपुंसकमनपुंसकेनैक0।।69।।

(118-119. **एकशेषसूत्रम्** 1.2.3 आ. 7-8)

भ्रातृपुत्रौ स्वसृदुहितृभ्याम्

144. पिता मात्रा 70

145. श्वशुरः श्वश्र्वा 71

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते। न 'पुमान् स्त्रिया' इत्येव सिद्धम्?

(793. **समाधानवार्त्तिकम्**-1)

* भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेशः *

भाष्यम्– भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेशो भवति।

प्रत्याख्यानाधिकरणम्

(794. **प्रत्याख्यानवार्त्तिकम्**-2)

* भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात् सिद्धम् *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– यदि तावद्बिभर्तीति भ्राता, स्वसर्यप्येतद्भवति। तथा यदि पुनातीति प्रीणातीति वा पुत्रः, दुहितर्यप्येतद्भवति। तथा यदि पाति पालयतीति वा पिता मातर्यप्येतद्भवति।

(795. **आक्षेपवार्त्तिकम्**- 3)

*** दर्शनं वै हेतुः ***

भाष्यम्– नहि स्वसरि भ्रातृशब्दो दृश्यते।

(796. **प्रत्याख्यानवार्त्तिकम्**- 4)

*** दर्शनं हेतुरिति चेत्तुल्यम् ***

भाष्यम्– दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति। स्वसर्यपि भ्रातृशब्दो दृश्यताम्। तुल्यं हि कारणम्।

(**आक्षेपभाष्यवार्त्तिकम्**-)

*** नवै एष लोके समप्रत्ययः ***

भाष्यम्– नहि लोके भ्राता आनीयतामित्युक्ते स्वसा आनीयते।

(797. **समाधानवार्त्तिकम्**- 5)

*** तद्विषयं च ***

भाष्यम्– तद्विषयं चैतद् द्रष्टव्यं भवति। स्वसरि भ्रातृत्वम्। किंविषयम्? एकशेषविषयम्।

आक्षेपभाष्यम्– युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः।

समाधानभाष्यम्– बाढं युक्तम्।

(798. **समाधानसाधकवार्त्तिकम्**- 6)

*** अन्यत्रापि तद्विषयदर्शनात् ***

भाष्यम्– अन्यत्रापि नियतविषयाः शब्दा दृश्यन्ते। तद्यथा—समाने रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोण इति। समाने च काले वर्णे गौः कृष्ण इति भवति, अश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति। पिता मात्रा।।70।। श्वशुरः श्वश्र्वा।।71।।

(120. **एकशेषसूत्रम्** 1.2.3 आ. 9)

146. त्यदादीनि सर्वैर्नित्यम् 1.2.72

शिष्टे लिङ्गवचननिर्णयाधिकरणम्

(799. **नियमवार्त्तिकम्**- 1)

*** त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानि ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– त्यदादित: शेषे पुन्नपुंसकतो लिङ्गवचनानि भवन्ति। सा च देवदत्तश्च तौ। सा च कुण्डे च तानि।

(800. **पर्युदासवार्त्तिकम्**- 2)

* अद्वन्द्वतत्पुरुषविशेषणानाम् *

भाष्यम्– अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम्। इह माभूत्—स च कुक्कुट: सा च मयूरी, कक्कुटमयूर्यौ ते। अर्द्धं पिपल्यास्तदर्धपिप्पली च साऽर्द्धपिप्पल्यौ ते।

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योग: शक्योऽवक्तुम्। कथम्?

(801. **प्रत्याख्यानहेतुवार्त्तिकम्**- 3)

* त्यदादीनां सामान्यार्थत्वात् *

भाष्यम्– त्यदादीनां सामान्यमर्थ:। आतश्च सामान्यं देवदत्तेऽपि हि स इत्येतद्भवति, यज्ञदत्तेऽपि। त्यदादीनां सामान्यार्थत्वात् शेषो भविष्यति।

प्रयोजनान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—परस्य शेषं वक्ष्यामीति।

(802. **प्रत्याख्यानहेत्वन्तरवार्त्तिकम्**- 4)

* परस्य चोभयवाचित्वात् *

भाष्यम्– उभयवाचि परम्।

(803. **प्रत्याख्यानहेतुवार्त्तिकम्**- 5)

* पूर्वशेषदर्शनाच्च *

भाष्यम्– पूर्वस्य खल्वपि शेषो दृश्यते—स च यश्च तावानय यावानय इति।

प्रयोजनान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—द्वन्द्वो मा भूदिति।

प्रयोजनान्तरनिराकरणभाष्यम्– एतदपि नास्ति प्रयोजनम्।

(804. **प्रयोजनप्रत्याख्यानवार्त्तिकम्**- 6)

* सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम् *

भाष्यम्– सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम्।

इष्टानुपपत्तिभाष्यम्– यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते, शूद्राभीरं गोबलीवर्दं तृणोलपमिति न सिध्यति।

अनुपपत्तिपरिहारभाष्यम्– नैष दोष:। इह तावच्छूद्राभीरमिति, आभीरा जात्यन्तराणि।

द्वितीयोदाहरणनिराकरणभाष्यम्– गोबलीवर्दमिति। गाव उत्कालितपुंस्का वाहाय च विक्रयाय च स्त्रिय एवावशिष्यन्ते।

तृतीयोदाहरणनिराकरणभाष्यम्– तृणोलपमिति अपामुलपमिति नामधेयम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटस्थाक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्- न वक्तव्यम्। सामान्येनोक्तत्वाद्विशेषस्य प्रयोगो न भविष्यति। सामान्येनोक्तत्वात् तस्यार्थस्य, विशेषस्य प्रयोगेण न भवितव्यम्। किं कारणम्? उक्तार्थानामप्रयोग इति।

आक्षेपभाष्यम्- न तर्हीदानीमिदं भवति—तं ब्राह्मणमानय गार्ग्यमिति।

आक्षेपशेषभाष्यम्- भवति। यदा नियोगतस्तस्यैवानयनं भवति।

समाधानभाष्यम्- एवं तर्हि येनैव खल्वपि हेतुना एतद्वाक्यं भवति—तं ब्राह्मणमानय गार्ग्यमिति, तेनैव हेतुना वृत्तिरपि प्राप्नोति। तस्मात्सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीति वक्तव्यम्। त्यदादीनि।।72।।

(121. **एकशेषसूत्रम्** 1.2.3 आ. 10)

147. ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री 1.2.73

प्रत्याख्यानभाष्यम्- अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्- कथम्- गाव इमाश्चरन्ति अजा इमाश्चरन्ति?

आक्षेपबाधकभाष्यम्- गाव उत्कालितपुंस्का वाहाय च विक्रयाय च। स्त्रिय एवावशिष्यन्ते।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—ग्राम्येष्विति वक्ष्यामीति। इह मा भूत्—न्यङ्कव इमे सूकरा इम इति।

प्रयोजननिराकरणभाष्यम्- कः पुनरर्हति अग्राम्याणां पुंस उत्कालयितुं, ये ग्रहीतुमशक्याः। कुत एव वाहाय च विक्रवाय च।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—पशुष्विति वक्ष्यामीति। इह मा भूत्—ब्राह्मणा इमे, वृषला इमे।

प्रयोजननिराकरणभाष्यम्- कः पुनरर्हत्यपशूनां पुंस उत्कालयितुं ये अशक्या वाहाय च विक्रयाय च।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—सङ्घेष्विति वक्ष्यामीति। इह मा भूत्—एतौ गावौ चरतः।

प्रयोजननिराकरणभाष्यम्- कः पुनरर्हति निर्ज्ञातेऽर्थे अन्यथा प्रयोक्तुम्।

प्रयोजनान्तरभाष्यम्- इदं तर्हि प्रयोजनम्—अतरुणेष्विति वक्ष्यामीति। इह मा भूत्—उरुणका इमे, बर्करा इम इति।

प्रयोजननिराकरणभाष्यम्- कः पुनरर्हति तरुणानां पुंस उतकालयितुं ये अशक्या वाहाय च विक्रयाय च।

(805. **शेषपूरणवार्त्तिकम्**-1)

*** अनेकशफेषु ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अनेकशफेष्विति वक्तव्यम्। इह मा भूत्। अश्वाश्चरन्ति, गर्दभाश्चरन्तीति। ग्राम्यपशु।।73।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम्; पादश्चायं समाप्तः

प्रथमेऽध्याये तृतीये पादे प्रथममाह्निकम्

(122. धातुसञ्ज्ञासूत्रम् 1.3.1 आ. 1 सू.)

148. भूवादयो धातवः 1.3.1

वकारस्य प्राप्तिप्रयोजननिरूपणम्

आक्षेपभाष्यम्– कुतोऽयं वकारः। यदि तावत्संहितया निर्देशः क्रियते, भ्वादय इति भवितव्यम्। अथासंहितया, भूआदय इति भवितव्यम्?

समाधानभाष्यम्– अत उत्तरं पठति—

(806. समाधानवार्त्तिकम्-1)

*** भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ***

भाष्यम्– माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च, अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति।

आदिग्रहणप्रयोजनवर्णनाधिकरणम्

आक्षेपभाष्यम्– अथादिग्रहणं किमर्थम्। यदि तावत्पठ्यन्ते नार्थ आदिग्रहणेन। अन्यत्रापि ह्ययं पठन्नादिग्रहणं न करोति। क्वान्यत्र? 'मृडमृदगुधकुषक्लिशवदवसः क्त्वा' इति।

अथ न पठ्यन्ते नतरामर्थ आदिग्रहणेन। नह्यपठिताः शक्या आदिग्रहणेन विशेषयितुम्।

समाधानभाष्यम्– एवं तर्हि सिद्धे सति यदादिग्रहणं करोति, तज्ज्ञापयत्याचार्यः— 'अस्ति च पाठो बाह्यश्च सूत्राद्' इति। किमेतस्य ज्ञापने प्रयोजनम्? पाठेन धातुसञ्ज्ञेत्येतदुपपन्नं भवति।

अनिष्टापत्तिवारणाधिकरणम्

(807. आक्षेपवार्त्तिकम्-2)

*** पाठेन धातुसञ्ज्ञायां समानशब्दप्रतिषेधः ***

भाष्यम्– पाठेन धातुसञ्ज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। या इति धातुः, या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याबन्तः। वा इति धातुः, वा इति निपातः। नु इति धातुः, नु इति प्रत्ययश्च निपातश्च। दिव् इति धातुः, दिविति प्रातिपदिकम्। किं च स्याद् यद्येतेषामपि धातुसञ्ज्ञा स्यात्? धातोरिति तव्यदादीनामुत्पत्तिः प्रसज्येत।

आक्षेपबाधकभाष्यम्– नैष दोषः। तव्यदादयो विधीयन्ते। साधनं च क्रियायाः। क्रियाभावात्साधनाभावः। साधनाभावात्सत्यामपि धातुसञ्ज्ञायां तव्यदादयो न भविष्यन्ति।

आक्षेपसाधकभाष्यम्– इदं तर्हि याः पश्य—'आतो धातोः' इति लोपः प्रसज्येत।

आक्षेपबाधकभाष्यम्– नैष दोषः। 'अनापः' इत्येवं सः।

आक्षेपसाधकभाष्यम्– अस्य तर्हि वाशब्दस्य निपातस्याधातुरिति प्रातिपदिकसञ्ज्ञायाः प्रतिषेधः प्रसज्यते। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्।

आक्षेपबाधकभाष्यम्– नैष दोषः। निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं तत्रानर्थकग्रहणं न करिष्यते। 'निपातः प्रातिपदिकम्' इत्येव।

आक्षेपसाधकभाष्यम्– इह तर्हि त्रस्नू इति 'अचिश्नुधातुभ्रुवां य्वोः' इत्युवङादेशः प्रसज्येत।

आक्षेपबाधकभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति 'न प्रत्ययस्योवङादेशो भवति' इति। यदयं तत्र श्नुग्रहणं करोति।

इष्टानुपपत्तिभाष्यम्– अस्य तर्हि दिव्शब्दस्याधातुरिति प्रातिपदिकसञ्ज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्।

अनुपपत्तिबाधकभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्ते दिव्शब्दात्स्वादय इति। यदयं दिवः सावौत्त्वं शास्ति।

अनुपपत्तिसाधकभाष्यम्– नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्? दिव्शब्दो यः प्रातिपदिकं तदर्थमेतत्स्यात्। अक्षद्यूरिति।

अनुपपत्तिबाधकभाष्यम्– न वै अत्रेष्यते।

अनुपपत्तिसाधकभाष्यम्– अनिष्टं च प्राप्नोति, इष्टं च न सिध्यति।

अनुपपत्तिबाधकभाष्यम्– एवं तर्हि 'अननुबन्धकग्रहणे न सानुबन्धकस्य' इत्येवमेतस्य न भविष्यति।

अनुपपत्तिसाधकभाष्यम्– एवमप्यननुबन्धको दिव्शब्दो नास्तीति कृत्वा सानुबन्धकस्य ग्रहणं विज्ञास्यते।

(808. आक्षेपान्तरवार्त्तिकम्-3)

*** परिमाणग्रहणं च ***

भाष्यम्– परिणामग्रहणं च कर्तव्यम्। इयानवधिर्धातुसञ्ज्ञो भवतीति वक्तव्यम्। कुतो ह्येतत्—भूशब्दो धातुसञ्ज्ञो भविष्यति, न पुनर्भ्वेधशब्दः—इति?

न्यासान्तरेण समाधानसम्भावनाभाष्यम्– यदि पुनः—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(809. न्यासान्तरवार्त्तिकम्-4)

*** क्रियावचनो धातुः ***

भाष्यम्– इत्येतल्लक्षणं क्रियेत।

प्रश्नोत्तरभाष्यम्– का पुनः क्रिया? ईहा। का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः।

उपहासाक्षेपभाष्यम्– सर्वथा भवाञ्छब्दैरेव शब्दानाचष्टे, न किं—चिदर्थजातं निदर्शयत्येवंजातीयका क्रियेति।

समाधानभाष्यम्– क्रिया नामेयमत्यन्तापरिदृष्टाऽशक्या पिण्डीभूता निदर्शयितुम्। यथा गर्भो निर्लुठितः। सासावनुमानगम्या।

आक्षेपभाष्यम्– कोसावनुमानः?

समाधानभाष्यम्– इह सर्वेषु साधनेषु सन्निहितेषु कदाचित्पचतीत्येतद्भवति कदाचिन्न भवति। यस्मिन्सन्निहिते पचतीत्येतद्भवति सा नूनं क्रिया। अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया।

आक्षेपभाष्यम्– कथं पुनर्ज्ञायते क्रियावचनाः पचादय इति?

समाधानभाष्यम्– यदेतेषां करोतिना सामानाधिकरण्यम्। 'किं करोति? पचति' 'किं करिष्यति? पक्ष्यति' 'किमकार्षीद्? अपाक्षीद्' इति।

भाष्यम्– तत्र—

(810. आक्षेपवार्त्तिकम्-5)

*** क्रियावचने उपसर्गप्रत्ययप्रतिषेधः ***

भाष्यम्– क्रियावचने धातावुपसर्गप्रत्यययोः प्रतिषेधो वक्तव्यः। पचति प्रपचति। किं पुनः कारणं प्राप्नोति।

(811. आक्षेपसाधकवार्त्तिकम्-6)

*** सङ्घातेनार्थगतेः ***

भाष्यम्– सङ्घातेन ह्यर्थो गम्यते सप्रकृतिकेन सप्रत्ययकेन सोपसर्गेण च।

(812. आक्षेपान्तरवार्त्तिकम्-7)

*** अस्तिभवतिविद्यतीनां च धातुत्वम् ***

भाष्यम्– अस्तिभवतिविद्यतीनां च धातुसञ्ज्ञा वक्तव्या। यथा हि भवता करोतिना पचादीनां सामानाधिकरण्यं दर्शितम्, न तथास्त्यादीनां निदर्श्यते। नहि भवति—किं करोति? अस्तीति।

(813. प्रथमाक्षेप (810) समाधानवार्त्तिकम्-8)

*** प्रत्ययार्थस्याऽव्यतिरेकात्प्रकृत्यन्तरेषु ***

भाष्यम्– प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषु मन्यामहे धातुरेव क्रियामाहेति। पचति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पठति। प्रकृत्यर्थोऽन्यश्चान्यश्च। प्रत्ययार्थः स एव।

(814. समाधानसाधकवार्त्तिकम्-9)

*** धातोश्चार्थाभेदात्प्रत्ययान्तरेषु ***

भाष्यम्– धातोश्चार्थभेदात्प्रत्ययान्तरेषु मन्यामहे धातुरेव क्रियामाहेति। पक्तिः पचनं पाक इति। प्रत्ययार्थोऽन्यश्चान्यश्च भवति। प्रकृत्यर्थः स एव।

कथं पुनर्ज्ञायते—अयं प्रकृत्यर्थः, अयं प्रत्ययार्थ इति।

(815. समाधानसाधकवार्त्तिकम्-10)

*** अन्वयव्यतिरेकाभ्याम् ***

भाष्यम्– अन्वयाच्च व्यतिरेकाच्च। कोसावन्वयो व्यतिरेको वा? इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्छब्दश्चकारान्तः, अतिशब्दश्च प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते क्लित्ति कर्तृत्वमेकत्वं च। पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते, कश्चिदन्वयी। पच्छब्दो हीयते, पठ्शब्द उपजायते अतिशब्दोऽन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। विक्लित्तिर्हीयते, पठिक्रियोपजायते, कर्तृत्वं चैकत्वं चान्वयी। ते मन्यामहे—यः शब्दो हीयते तस्यासावर्थः योऽर्थो हीयते, यः शब्द उपजायते तस्यासावर्थः योऽर्थ उपजायते, यः शब्दोऽन्वयी तस्यासावर्थः योर्थोऽन्वयी।

समाधानसाधकभाष्यम्– विषम उपन्यासः। बहवो हि शब्दा एकार्था भवन्ति। तद्यथा—इन्द्रः शक्रः पुरुहूतः पुरंदरः। कन्दुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा—अक्षाः पादा माषा इति।

अतः किम्। न साधीयोऽर्थवत्ता सिद्धा भवति। नापि ब्रूमोऽर्थवत्ता न सिध्यतीति। वर्णिता ह्यर्थवत्ताऽन्वयव्यतिरेकाभ्यामेव। तत्र कुत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव वा?

समाधानसाधकभाष्यम्– सामान्यशब्दा एत एवं स्युः। सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषणं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खलु नियोगतः पचतीत्युक्ते स्वभावतः कस्मिंश्चिद्विशेषे पच्शब्दो वर्ततेऽतो मन्यामहे—नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे।

(816. प्रथमाक्षेपसमाधानवार्त्तिकम्-11)

*** क्रियाविशेषक उपसर्गः ***

भाष्यम्– पचतीति क्रिया गम्यते, तां प्रो विशिनष्टि।

आक्षेपभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र धातुरूपसर्गं व्यभिचरति। यत्र न खलु तं व्यभिचरति तत्र कथम् अध्येति अधीते इति?

समाधानभाष्यम्– यद्यप्यत्र धातुरुपसर्गं न व्यभिचरति उपसर्गस्तु धातुं व्यभिचरति। ते मन्यामहे—य एवास्याधेरन्यत्रार्थः, स इहापीति। कः पुनरन्यत्राधेरर्थः। अधिरुपरिभावे वर्तते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– इह तर्हि व्यक्तमर्थान्तरं गम्यते—तिष्ठति प्रतिष्ठते इति। तिष्ठतीति व्रजिक्रियायाः निवृत्तिः। प्रतिष्ठत इति व्रजिक्रिया गम्यते। ते मन्यामहे उपसर्गकृतमेतद्, येनात्र व्रजिक्रिया गम्यत इति।

समाधानभाष्यम्– प्रोयं दृष्टापचारः आदिकर्मणि वर्तते। न चेदं नास्ति—बह्वर्था अपि धातवो भवन्तीति। तद्यथा—वपिः प्रकिरणे दृष्टः, छेदने चापि वर्तते—केशश्मश्रु वपतीति। ईडिः स्तुतिचोदनायाच्ञासु दृष्टः, प्रेरणे चापि वर्तते—'अग्निर्वा इतो वृष्टिमीट्टे मरुतो मुतश्च्यावयन्ति' इति। करोतिरभूतप्रादुर्भावे दृष्टः, निर्मलीकरणे चापि वर्तते—'पृष्ठं कुरु' 'पादौ कुरु' उन्मृदानेति गम्यते। निक्षेपणे चापि वर्तते 'कटे कुरु' 'घटे कुरु' 'अश्मानमितः कुरु' स्थापयेति गम्यते। एवमिहापि तिष्ठतिरेव व्रजिक्रियामाह तिष्ठतिरेव व्रजिक्रियायाः निवृत्तिम्।

आक्षेपभाष्यम्– अयं तर्हि दोषः—'अस्तिभवतिविद्यतीनां धातुत्वम्' इति।

न्यासान्तरेण समाधानसम्भावनाभाष्यम्– यदि पुनः—

(817. **न्यासान्तरवार्त्तिकम्**- 12)

*** भाववचनो धातुः ***

भाष्यम्– इत्येतल्लक्षणं क्रियेत।

सम्भावितसमाधान आक्षेपभाष्यम्– कथं पुनर्ज्ञायते—भाववचनाः पचादय इति?

समाधानभाष्यम्– यदेषां भवतिना सामानाधिकरण्यम्—भवति पचति, भवति पक्ष्यति, भवति अपाक्षीदिति।

आक्षेपभाष्यम्– कः पुनर्भावः?

समाधानभाष्यम्– भवतेः स्वपदार्थो भवनं भाव इति।

आक्षेपभाष्यम्– यदि भवतेः स्वपदार्थो भवनं भावः। विप्रतिषिद्धानां धातुसञ्ज्ञा न प्राप्नोति—भेदः छेदः। अन्यो हि भावः अन्योऽभावः। आतश्चान्यो भावः अन्योऽभाव इति। यो हि यस्य भावमिच्छति स न तस्याभावम्। यस्य चाभावं न तस्य भावम्। पचादीनां च धातुसञ्ज्ञा न प्राप्नोति यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितम्, न तथा भाववचने धातौ निदर्श्यते। करोतिः पचादीनां सर्वान्कालान्सर्वान्पुरुषान्सर्वाणि वचनान्यनुवर्तते। भवतिः पुनर्वर्तमानकालं चैकत्वं च।

प्रश्नभाष्यम्– का तर्हीयं वाचोयुक्तिः—भवति पचति, भवति पक्ष्यति, भवत्यपाक्षीदिति?

उत्तरभाष्यम्– एषैषा वाचोयुक्तिः—पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति।

उत्तरबाधकभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया। यत्र खलु सैव क्रिया तत्र कथम्– 'भवेदपि भवेत्', 'स्यादपि स्यात्' इति।

उत्तरसाधकभाष्यम्– अत्राप्यन्यत्वमस्ति। कुतः? कालभेदात्साधनभेदाच्च। एकस्यात्र भवतेर्भवतिः साधनं सर्वकालश्च प्रत्ययः। अपरस्य बाह्यं साधनं वर्तमानकालश्च प्रत्ययः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावतात्राप्यन्यत्वमस्ति, पचादयश्च क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति।

समाधानभाष्यम्– अस्त्वयं कर्तृसाधनः—भवतीति भाव इति। किं भवति? विप्रतिषिद्धानां धातुसञ्ज्ञा सिद्धा भवति।

आक्षेपभाष्यम्– भवेद्विप्रतिषिद्धानां धातुसञ्ज्ञा सिद्धा स्यात्, प्रातिपदिकानामपि तु प्राप्नोति वृक्षः प्लक्ष इति। किं कारणम्? एतान्यपि हि भवन्ति।

समाधानभाष्यम्– एवं तर्हि कर्मसाधनां भविष्यति—भाव्यते यः स भाव इति। क्रिया चैव हि भाव्यते। स्वभावसिद्धं तु द्रव्यम्।

आक्षेपभाष्यम्– एवमपि भवेत्केषांचिन्न स्यात्—यानि न भाव्यन्ते। ये त्वेते सम्बन्धिशब्दास्तेषां प्राप्नोति माता पिता भ्रातेति। सर्वथा वयं प्रातिपदिकपर्युदासान्न मुच्यामहे।

समाधानभाष्यम्– पठिष्यति ह्याचार्यः—'भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः—' इति। यावता पठिष्यति पचादयश्च क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति अस्त्वयं कर्तृसाधनो भवतीति भाव इति। किं वक्तव्यमेतत्? नहि कथमनुच्यमानं गंस्यते? एतेनैवाभिहितं सूत्रेण 'भूवादयो धातवः' इति। कथम्? नेदमादिग्रहणम्। वदेरयमौणादिक इञ्कर्तृसाधनः—भुवं वदन्तीति भूवादय इति।

(818. प्रथमाक्षेपवार्त्तिकम्-13)

* भाववचने धातौ तदर्थप्रत्ययप्रतिषेधः *

भाष्यम्– भाववचने धातौ तदर्थस्य प्रत्ययस्य प्रतिषेधो वक्तव्यः। शिश्ये इति। किं च स्यात्? अशितीत्यात्वं प्रसज्येत। तद्धि धातोर्विहितम्।

(819. द्वितीयाक्षेपवार्त्तिकम्-14)

* इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः *

भाष्यम्– इतरेतराश्रयं च भवति। का इतरेतराश्रयता? प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। उत्पन्ने हि प्रत्यये भाववचनत्वं गम्यते स च तावद्भाववचनादुत्पाद्यः। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

(820. द्वितीयाक्षेपसमाधानवार्त्तिकम्-15)

* सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः *

भाष्यम्– सिद्धमेतत्। कथम्? 'नित्यशब्दत्वात्।' नित्याः शब्दाः। नित्येषु च शब्देषु अनाश्रित्य भाववचनत्वं प्रत्यय उत्पद्यते।

(821. प्रथमाक्षेपसमाधानवार्त्तिकम्-16)

* प्रथमभावग्रहणं च *

भाष्यम्– प्रथमभावग्रहणं च कर्तव्यम्। प्रथमं यो भावमाहेति। कुतः पुनः प्राथम्यम्। किं शब्दत आहोस्विदर्थतः? किं चातः? यदि शब्दतः, सनादीनां धातुसञ्ज्ञा न प्राप्नोति—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रीयति वस्त्रीयतीति। अथार्थतः, सिद्धा सनादीनां धातुसञ्ज्ञा, स एव तु दोषः 'भाववचने तदर्थप्रत्ययप्रतिषेधः' इति। एवं तर्हि नापि शब्दतो नाप्यर्थतः। किं तर्हि? अभिधानतः। सुमध्यमेऽभिधाने यः प्रथमं भावमाह।

क्रियावचनवादिभाष्यम्– इह ये एव भाववचने धातौ दोषास्ते क्रियावचनेऽपि। तत्र त एव परिहाराः।

आक्षेपभाष्यम्– तत्रेदमपरिहृतम्—अस्तिभवतिविद्यतीनां धातुत्वम्—इति।

प्रत्याक्षेपभाष्यम्– तस्य परिहारः। कां पुनः क्रियां भवान्मत्वाह—अस्तिभवतिविद्यतीनां धातुसञ्ज्ञा न प्राप्नोतीति। किं यत्तद्देवदत्तः कंसपात्र्यां पाणिनौदनं भुङ्क्ते इति।

प्रत्याक्षेपसमाधानभाष्यम्– न ब्रूमः कारकाणि क्रियेति। किं तर्हि? कारकाणां प्रवृत्तिविशेषः क्रिया। अन्यथा च कारकाणि शुष्कौदने प्रवर्तन्ते, अन्यथा च मांसौदने।

समाधानभाष्यम्– यद्येवं सिद्धास्तिभवतिविद्यतीनां धातुसञ्ज्ञा। अन्यथा हि कारकाण्यस्तौ प्रवर्तन्तेऽन्यथा हि म्रियतौ।

समाधानसाधकप्रमाणभाष्यम्– षड्भावविकारा इति ह स्माह वार्ष्यायणिः। जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति।

दूषणभाष्यम्– सर्वथा स्थित इत्यत्र धातुसञ्ज्ञा न प्राप्नोति बाह्यो ह्येतेभ्यस्तिष्ठतिः।

समाधानभाष्यम्– एवं तर्हि क्रियायाः क्रिया निवर्तिका भवति, द्रव्यं द्रव्यस्य निवर्तकम्। एवं हि कश्चित्कञ्चित्पृच्छति—'किमवस्थो देवदत्तस्य व्याधिः' इति? स आह—'वर्द्धते' इति। अपर आह—'अपक्षीयते' इति। अपर आह—स्थित इति। स्थित इत्युक्ते वर्द्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति।

समाधानान्तरभाष्यम्– अथवा नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः कालाः व्यज्यन्ते। अस्त्यादिभिरपि भूतभविष्यद्वर्तमानकालाः व्यज्यन्ते।

समाधानान्तरभाष्यम्– अथवा नान्यत्पृष्टे नान्यदाख्येयम्। तेन न भविष्यति—किं करोत्यस्तीति।

आक्षेपभाष्यम्– अथ यद्येव 'क्रियावचनो धातुः' इत्येष पक्षः। अथापि 'भाववचनो धातुः' इति। किं गतमेतदियता सूत्रेण, आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्?

समाधानभाष्यम्– गतमित्याह। कथम्? अयमादिशब्दोस्त्येव व्यवस्थायां वर्तते, तद्यथा—देवदत्तादीन्समुपविष्टानाह देवदत्तादय आनीयन्तामिति। ते उत्थाप्यानीयन्ते। अस्ति प्रकारे वर्तते, तद्यथा—देवदत्तादय आढ्या अभिरूपा दर्शनीयाः पक्षवन्तः। देवदत्तप्रकारा इति गम्यते। प्रत्येकं चादिशब्दः परिसमाप्यते—भ्वादय इति च वादय इति च। तद्यदा तावत् 'क्रियावचनो धातुः' इत्येष पक्षः तदा भू इत्यत्र य आदिशब्दः स व्यवस्थायां वर्तते, वा इत्यत्र य आदिशब्दः स प्रकारे, भू इत्येवमादयो वा इत्येवं प्रकारा इति। यदा तु 'भाववचनो धातुः' इत्येष पक्षस्तदा वेत्यत्र य आदिशब्दः स व्यवस्थायाम्, भू इत्यत्र य आदिशब्दः स प्रकारे, वा इत्येवमादयो भू इत्येवंप्रकारा इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– यदि तर्हि लक्षणं क्रियते नेदानीं पाठः कर्तव्यः।

समाधानभाष्यम्– कर्तव्यश्च। किं प्रयोजनम्।

(822. **पाठप्रयोजनवार्त्तिकम्**-17)

*** भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः ***

भाष्यम्– भूवादिपाठः कर्तव्यः। किं प्रयोजनम्? प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः। प्रातिपदिकनिवृत्त्यर्थ आणवयत्यादिनिवृत्त्यर्थश्च। के पुनराणवयत्यादयः? आणवयति वट्टति वड्डयतीति।

(823. **पाठप्रयोजनान्तरवार्त्तिकम्**-18)

*** स्वरानुबन्धज्ञापनाय च ***

भाष्यम्– स्वरानुबन्धज्ञापनाय च पाठः कर्तव्यः। स्वराननुबन्धांश्च ज्ञास्यामीति। नह्यन्तरेण पाठं स्वरा अनुबन्धा वा शक्या विज्ञातुम्।

प्रत्याख्यानभाष्यम्– ये त्वेते न्याय्यविकरणा उदात्ता अननुबन्धकाः पठ्यन्ते तेषां पाठः शक्योऽकर्तुम्।

आक्षेपभाष्यम्– एतेषामप्यवश्यमाणवयत्यादिनिवृत्त्यर्थः पाठः कर्तव्यः।

प्रत्याख्यानसाधकभाष्यम्– न कर्तव्यः।

(824. **कारणवार्त्तिकम्**-19)

*** शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिः ***

भाष्यम्– शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिर्भविष्यति। स चावश्यं शिष्टप्रयोग उपास्यः। येऽपि पठ्यन्ते तेषामपि विपर्यासनिवृत्त्यर्थः। लोके कि कृष्यर्थे कसिं प्रयुञ्जते, दृश्यर्थे च दिसिम्। भूवादयो धातवः।।1।।

इत्सञ्ज्ञाप्रकरणम्

(123. **अचामित्सञ्ज्ञासूत्रम्** 1.3.1 **आ.** 2)

149. उपदेशेऽजनुनासिक इत् 1.3.2

उद्देशोपदेशपदार्थकथनाधिकरणम्

आक्षेपभाष्यम्– उपदेश इति किमर्थम्?

समाधानभाष्यम्– अभ्र आँ अपः। उद्देशे योऽनुनासिकस्तस्य मा भूदिति।

आक्षेपभाष्यम्– कः पुनरुद्देशोपदेशयोर्विशेषः?

समाधानभाष्यम्– प्रत्यक्षमाख्यानमुपदेशः। गुणैः प्रापणमुद्देशः। प्रत्यक्षं तावदाख्यानमुपदेशः। तद्यथा—अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वा उपदिशति—'अयं गौः' इति। स प्रत्यक्षमाख्यातमाह—'उपदिष्टो मे गौः' इति। गुणैः प्रापणमुद्देशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यथा—कश्चित्कञ्चिदाह—'देवदत्तं मे भवानुद्दिशतु' इति। स इहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति 'अङ्गदी कुण्डली किरीटी व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासो विचित्राभरण ईदृशो देवदत्तः' इति। स गुणैः प्राप्यमाणमाह—'उद्दिष्टो मे देवदत्तः' इति।

(825. आक्षेपवार्त्तिकम्-1)

* इत्सञ्ज्ञायां सर्वप्रसङ्गोऽविशेषात् *

भाष्यम्– इत्सञ्ज्ञायां सर्वप्रसङ्गः। सर्वस्यानुनासिकस्येत्सञ्ज्ञा प्राप्नोति। अस्यापि प्राप्नोति—अभ्र आँ अपः। किं कारणम्? अविशेषात्। नहि कश्चिद्विशेष उपादीयते—एवं जातीयकस्यानुनासिकस्येत्सञ्ज्ञा भवतीति। अनुपादीयमाने विशेषे सर्वप्रसङ्गः।

आक्षेपबाधकभाष्यम्– किमुच्यते—अनुपादीयमाने विशेष इति। कथं न नामोपादीयते यदोपदेश इत्युच्यते?

आक्षेपसाधकभाष्यम्– लक्षणेनापि ह्युपदेशः। सङ्कीर्णावुद्देशोपदेशौ। प्रत्यक्षमप्याख्यानमुद्देशः' गुणैश्च प्रापणमुपदेशः। प्रत्यक्षं तावदाख्यानमुद्देशः। तद्यथा—कश्चित्कञ्चिदाह—'अनुवाकं मे भवानुद्दिशतु' इति। स तस्मायाचष्टे—'इषेत्वकमधीष्व' 'शंनोदेवीयकमधीष्व' इति। स प्रत्यक्षमाख्यातमाह—'उद्दिष्टो मेऽनुवाकस्तमध्येष्ये' इति। गुणैश्च प्रापणमुपदेशः। तद्यथा—कश्चित्कञ्चिदाह—'ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशतु' इति। स तस्मायाचष्टे—'अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुष्मिन्हस्तवामः' इति। स गुणैः प्राप्यमाणमाह—'उपदिष्टो मे पन्थाः' इति। एवमेतौ सङ्कीर्णावुद्देशोपदेशौ।

आक्षेपबाधकभाष्यम्– एवं तर्हीत्कार्याभावादत्रेत्सञ्ज्ञा न भविष्यति।

आक्षेपसाधकभाष्यम्– ननु च लोप एवेत्कार्यं स्यात्।

आक्षेपबाधकभाष्यम्– अकार्यं लोपः। इह हि शब्दस्य द्व्यर्थ उपदेशः। कार्यार्थो भवत्युपदेशः श्रवणार्थो वा। कार्यं चेह नास्ति। कार्ये चासति यदि श्रवणमपि न स्यादुपदेशोऽनर्थकः स्यात्।

आक्षेपसाधकभाष्यम्– इदमस्तीत्कार्यम्—'इह अभ्र आँ अटितः' अनन्तरलक्षणायां सत्यामित्संज्ञायाम् 'आदितश्च' इतीट्प्रतिषेधः प्रसज्येत।

(826. एकदेशिसमाधानवार्त्तिकम्-2)

* सिद्धं तूपदेशनेऽनुनासिकवचनात् *

भाष्यम्– सिद्धमेतत्। कथम्? उपदेशने योऽनुनासिकः स इत्सञ्ज्ञो भवतीति वक्तव्यम्। किं पुनरुपदेशनम्? शास्त्रम्।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिसमाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'इत्सञ्ज्ञायां सर्वप्रसङ्गोऽविशेषात्' इति।

समाधानभाष्यम्– नैष दोषः। उपदेश इति घञयं करणसाधनः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्– न सिध्यति। परत्वाल्ल्युट् प्राप्नोति।

समाधानसाधकभाष्यम्– न ब्रूमः—'अकर्तरि च कारके सञ्ज्ञायाम्' इति। किं तर्हि? 'हलश्च' इति।

समाधानबाधकभाष्यम्– तत्रापि सञ्ज्ञायामिति वर्तते, न चैषा सञ्ज्ञा।

समाधानसाधकभाष्यम्– प्रायवचनादसञ्ज्ञायामपि भविष्यति।

समाधानबाधकभाष्यम्– प्रायवचनात्संज्ञायामेव स्याद्वा न वा। नह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्।

हेतुबाधकभाष्यम्– यदि नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्। 'कल्याण्यादीनामिनङ्, कुलटाया वा' इनङ्विभाषा न प्राप्नोति।

हेतुसाधकभाष्यम्– इनङेवात्र प्रधानम्। विहितः प्रत्ययः प्रकृतश्चानुवर्तते।

हेतुबाधकान्तरभाष्यम्– इह तर्हि 'वाकिनादीनां कुक् च, पुत्रान्तादन्यतरस्याम्' इति कुग् विभाषा न प्राप्नोति।

हेतुसाधकभाष्यम्– अत्रापि कुगेव प्रधानम्। विहितः प्रत्ययः प्रकृतश्चानुवर्तते।

आक्षेपोपसंहारभाष्यम्– एवं न चेदमकृतं भवति—'नोपाधेरुपाधिर्विशेषणस्य वा विशेषणम्' इति। न च कश्चिद्दोषो भवति। एवं च कृत्वा घञ् न प्राप्नोति।

सिद्धान्तिसमाधानभाष्यम्– एवं तर्हि 'कृत्यल्युटो बहुलम्' इत्येवमत्र घञ् भविष्यति।

उपदेशेऽजनुनासिक इत्।।2।।

(124. **इत्सञ्ज्ञासूत्रम्** 1.3.1 आ. 3)

150. हलन्त्यम् 1.3.3

अनिष्टवारणाधिकरणम्

(827. **आक्षेपवार्त्तिकम्**-1)

* हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात् *

भाष्यम्– हलन्त्ये सर्वप्रसङ्गः। सर्वस्य हल इत्संज्ञा प्राप्नोति। किं कारणम्? सर्वान्त्यत्वात्। सर्वो हि हल् तं तमवधिं प्रत्यन्तो भवति।

(828. **समाधानवार्त्तिकम्**-2)

* सिद्धं तु व्यवसितान्त्यत्वात् *

भाष्यम्– सिद्धमेतत्। कथम्? व्यवसितान्त्यत्वात्। व्यवसितान्त्यो हलित्सञ्ज्ञो भवतीति वक्तव्यम्। के पुनर्व्यवसिता? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिसमाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वाद्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामधानभाष्यम्– नैष दोषः। आहायम्—हलन्त्यमित्सञ्ज्ञं भवतीति। सर्वश्च हल् तं तमवधिं प्रत्यन्तो भवति। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो योऽन्त्य इति। कश्च साधीयः? व्यवसितानां योऽन्त्यः। अथवा सापेक्षोऽयं निर्देशः क्रियते। न चान्यत्किञ्चिद-पेक्ष्यमस्ति, तेन व्यवसितानेवापेक्षिष्यामहे।

अन्योन्याश्रयदोषपरिहाराधिकरणम्

(829. **आक्षेपवार्त्तिकम्**- 3)

*** लकारस्यानुबन्धाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः ***

भाष्यम्– लकारस्यानुबन्धत्वेन अज्ञापितत्वाद्धल्ग्रहणस्याप्रसिद्धिः। हलन्त्यमित्सञ्ज्ञं भवतीत्युच्यते। लकारस्यैव तावदित्सञ्ज्ञा न प्राप्नोति।

(830. **समाधानवार्त्तिकम्**- 4)

*** सिद्धं तु लकारनिर्देशात् ***

भाष्यम्– सिद्धमेतत्। कथम्? लकारनिर्देशः कर्तव्यः। हलन्त्यमित्सञ्ज्ञं भवति 'लकारश्च इति वक्तव्यम्।

(831. **समाधानान्तरवार्त्तिकम्**- 5)

*** एकशेषनिर्देशाद्वा ***

भाष्यम्– अथवा एकशेषनिर्देशोऽयम्। हल् च हल् च हल् हलन्त्यमित्सञ्ज्ञं भवतीति।

एकदेशिसमाधानान्तरभाष्यम्– अथवा लृकारस्यैवेदं गुणभूतस्य ग्रहणम्। तत्र 'उपदेशेऽजनुनासिक इत्' इतीत्सञ्ज्ञा भविष्यति।

एकदेशिसमाधानान्तरभाष्यम्– अथवा आचार्यप्रवृत्तिर्ज्ञापयति—भवति लकारस्य इत्सञ्ज्ञेति। यदयं णलं लितं करोति।

अनिष्टप्रातिपदिकेत्सञ्ज्ञावारणाधिकरणम्

(832. **आक्षेपवार्त्तिकम्**- 6)

*** प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते ***

भाष्यम्– अकृत्तद्धितान्तस्य प्रातिपदिकस्य प्रतिषेधो वक्तव्यः। उदश्वित् शकृदिति। अकृत्तद्धितान्तस्येति किमर्थम्? कुम्भकारो नगरकारः औपगवः कापटव इति।

(833. **समाधानवार्त्तिकम्**- 7)

*** इदर्थाभावात्सिद्धम् ***

भाष्यम्– इत्कार्याभावादत्रेत्सञ्ज्ञा न भविष्यति।

आक्षेपभाष्यम्– इदमस्तीत्कार्यम्—'तित्स्वरितम्' इति स्वरितत्वं यथा स्यात्।

समाधानभाष्यम्– नैतदस्ति। प्रत्ययग्रहणं तत्र चोदयिष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– इह तर्हि राजा तक्षा ञ्नितीत्याद्युदात्तत्वं यथा स्यात्।

समाधानभाष्यम्– ञ्नितीत्युच्यते तत्र व्यपवर्गाभावान्न भविष्यति।

आक्षेपभाष्यम्– इदं तर्हि स्वर्—'उपोत्तमं रिति' इत्येष स्वरो यथा स्यात्।

समाधानभाष्यम्– स्वरितकरणसामर्थ्यान्न भविष्यति 'न्यङ्स्वरौ स्वरितौ' इति।

आक्षेपभाष्यम्– इह तर्हि अन्तर्।

समाधानभाष्यम्– उत्तमशब्दस्त्रिप्रभृतिषु वर्तते। न चात्र त्रिप्रभृतयः सन्ति।

आक्षेपभाष्यम्– इह तर्हि सनुतर्—'उपोत्तमं रिति' इत्येष स्वरो यथा स्यात्।

समाधानभाष्यम्– अन्तोदात्तनिपातनं करिष्यते। स निपातनस्वरो रित्स्वरस्य बाधको भविष्यति। एतच्चात्र युक्तम्—यदित्कार्याभावादित्सञ्ज्ञा न स्यात्। यत्रेत्कार्यं भविष्यति तत्रेत्सञ्ज्ञा। तद्यथा—'आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' इति हलन्त्यम्।।3।।

(125. **इत्सञ्ज्ञानिषेधसूत्रम्** 1.3.1 आ. 4)

151. न विभक्तौ तुस्माः 1.3.4

तवर्गप्रतिषेधस्य तद्धितभिन्नपरत्वाधिकरणम्

(834. **आक्षेपवार्त्तिकम्**-1)

* विभक्तौ तवर्गप्रतिषेधोऽतद्धिते *

भाष्यम्– विभक्तौ तवर्गप्रतिषेधोऽतद्धित इति वक्तव्यम्। इह मा भूत् 'किमोत्' 'क्व प्रेप्सन् दीव्यसे' 'क्वार्द्धमासा' इति।

तटस्थभाष्यम्– स तर्हि वक्तव्यः।

समाधानभाष्यम्– न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति—न विभक्तौ तद्धिते प्रतिषेधो भवतीति। यदयम् 'इदपस्यमुः' इति मकारस्येत्सञ्ज्ञापरित्राणार्थमुकारमनुबन्धं करोति।

ज्ञापनबाधकभाष्यम्– यद्येतज् ज्ञाप्यते इदानीमित्यत्र प्राप्नोति।

ज्ञापनसाधकभाष्यम्– इत्कार्याभावादत्रेत्सञ्ज्ञा न भविष्यति।

ज्ञापनबाधकभाष्यम्– इदमस्तीत्कार्यं 'मिदचोऽन्त्यात्परः' इत्यचामन्त्यात्परो यथा स्यात्।

ज्ञापनसाधकभाष्यम्– इश्भावे कृते नास्ति विशेषः 'मिदचोऽन्त्यात्परः' इति वा परत्वे 'प्रत्ययः पर' इति वा।

ज्ञापनबाधकभाष्यम्– स एव तावदिश्भावो न प्राप्नोति। किं कारणम्? प्राग्दिशः प्रत्ययेष्वित्युच्यते।

ज्ञापनबाधकभाष्यम्– कः पुनरर्हतीश्भावं प्राग्दिशः प्रत्ययेषु वक्तुम्। किं तर्हि? प्राग्दिशोऽर्थेष्विश्भावः किंसर्वनामबहुभ्योऽद्व्यादिश्यः प्रत्ययोत्पत्तिः।

ज्ञापनबाधकभाष्यम्– एध तर्हि तदोप्ययं वक्तव्यः। तदश्च मिदचोन्त्यात्परत्वेन न सिध्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञापनबाधकभाष्यम्– ननु चात्राप्यत्वे कृते नास्ति विशेषः 'मिदचोन्त्यात्परः' इति वा परत्वे 'प्रत्ययः पर' इति वा।

ज्ञापनबाधकभाष्यम्– तद्धि अत्वं न प्राप्नोति। किं कारणम्? विभक्तावित्युच्यते।

समाधानभाष्यम्– एवं तर्हि यकारान्तो दानीं करिष्यते। किं यकारो न श्रूयते? लुप्तनिर्दिष्टो यकारः। न विभक्तौ।।4।।

(इत्सञ्ज्ञासूत्रम् 1.3.1 आ. 5)

154. चुटू 1.3.7

अनिष्टनिराकरणाधिकरणम्

(835. आक्षेपवार्त्तिकम्- 2)

*** चुञ्चुप्चणपोश्चकारप्रतिषेधः ***

व्याख्याभाष्यम्– चुञ्चुप्चणपोश्चकारस्य प्रतिषेधो वक्तव्यः। केशचुञ्चुः। केशचणः।

(836. समाधानवार्त्तिकम्- 2)

*** इदर्थाभावात्सिद्धम् ***

व्याख्याभाष्यम्– इत्कार्याभावादत्रेत्सञ्ज्ञा न भविष्यति।

समाधाननिराकरणभाष्यम्– इदमस्तीत्कार्यम्। 'चितः' अन्त उदात्तो भवतीति अन्तोदात्तत्वं यथा स्यात्।

समाधानसाधकभाष्यम्– पित्करणमिदानीं किमर्थं स्यात्?

(837. सगाधानबाधकवार्त्तिकम्- 3)

*** पित्करणं किमर्थमिति चेत्पर्यायार्थम् ***

व्याख्याभाष्यम्– पित्करणं किमर्थमिति चेत्पर्यायार्थमेतत्स्यात्।

सिद्धान्तिसमाधानभाष्यम्– एवं तर्हि यकारादी चुञ्चुप्चणपौ। किं यकारो न श्रूयते? लुप्तनिर्दिष्टो यकारः।

(838. आक्षेपवार्त्तिकम्- 4)

*** इर उपसंख्यानम् ***

व्याख्यानभाष्यम्– इर उपसंख्यानं कर्तव्यम्। रुधिर्। अरुधत्। अरौत्सीत्।

(839. समाधानवार्त्तिकम्- 5)

*** अवयवग्रहणात्सिद्धम् ***

व्याख्याभाष्यम्– रेफस्यात्र 'हलन्त्यम्' इति भविष्यति, इकारस्य 'उपदेशेऽजनुनासिक इत्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(840. **समाधानबाधकवार्त्तिकम्**-6)

*** अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः ***

व्याख्याभाष्यम्– अवयवग्रहणादिति चेदिदिद्विधिरपि प्राप्नोति। भेत्ता छेत्ता 'इदितो नुम् धातोः' इति नुम् प्राप्नोति।

समाधानसाधकभाष्यम्– यदि पुनरयमिदिद्विधिः कुम्भीधान्यन्यायेन विज्ञायेत। तद्यथा—कुम्भीधान्यः श्रोत्रिय इत्युच्यते। यस्य कुम्भ्यामेव धान्यं स कुम्भीधान्यः। यस्य पुनः कुम्भ्यां चान्यत्र च धान्यं नासौ कुम्भीधान्यः।

समाधानबाधकभाष्यम्– नायमिदिद्विधिः कुम्भीधान्यन्यायेन शक्यो विज्ञातुम्। इह हि दोषः स्यात्—टुनदि नन्दथुरिति।

समाधानसाधकभाष्यम्– एवं तर्हि नैवं विज्ञायते—इकार इदस्य सोऽयमिदित् तस्येदित इति। कथं तर्हि? इकार एवेत् इदित् इदिदन्तस्येति।

समाधानान्तरभाष्यम्– अथवा ऋकारस्यैवेदमित्त्वभूतस्य ग्रहणम्। तस्य च 'उपदेशेऽजनुनासिक' इतीत्सञ्ज्ञा भविष्यति।

समाधानान्तरभाष्यम्– अथवा आचार्यप्रवृत्तिर्ज्ञापयति—'नैवंजातीयकानामिदिद्विधिर्भवति' इति। यदयमिरितः कांश्चिन्नुमनुषक्तान्पठति—उबुन्दिर् निशामने। स्कन्दिर् गतिशोषणयोः।

समाधानान्तरभाष्यम्– अथवा आचार्यप्रवृत्तिर्ज्ञापयति—'इर्शब्दस्येत्सञ्ज्ञा भवति' इति। यदयम् 'इरितो वा' इत्याह।

समाधानान्तरभाष्यम्—अथवान्त इति वर्तते।

(127. **लोपविधिसूत्रम्** 1.3.1 आ. 6)

156. तस्य लोपः 1.3.9

तस्यपदोपादानप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– तस्यग्रहणं किमर्थम्?

आक्षेपबाधकभाष्यम्– इत्सञ्ज्ञकः प्रतिनिर्दिश्यते।

आक्षेपसाधकभाष्यम्– नैतदस्ति प्रयोजनम्। प्रकृतमिदिति वर्तते। क्व प्रकृतम्? 'उपदेशेऽजनुनासिक इद्' इति।

आक्षेपबाधकभाष्यम्– तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः।

आक्षेपसाधकभाष्यम्– अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा—'उच्चानि देवदत्तस्य गृहाणि, आमन्त्रयस्व' (एनम्) देवदत्तमिति गम्यते। 'देवदत्तस्य गावोऽश्वा हिरण्यं च, आढ्यो वैधेयः' देवदत्त इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात् द्वितीयानिर्दिष्टं प्रथमानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्- इदं तर्हि प्रयोजनम्—ये अनेकाल इत्सञ्ज्ञास्तेषां लोपः सर्वादेशो यथा स्यात्।

आक्षेपभाष्यम्- अथ क्रियमाणेऽपि वै तस्यग्रहणे कथमिव लोपः सर्वादेशो लभ्यः।

समाधानभाष्यम्- लभ्य इत्याह। कुतः? वचनप्रामाण्यात्। तस्यग्रहणसामर्थ्यात्।

णलादीनां लोपसाधनाधिकरणम्

(841. आक्षेपवार्त्तिकम्-1)

*** इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात् ***

भाष्यम्- इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानं कर्तव्यम्। णल्—अहं पपच। क्त्वा—देवित्वा सेवित्वा। निष्ठा—शयितः शयितवान्। किं पुनः कारणं न सिद्ध्यति? इत्प्रतिषेधात्। प्रतिषिध्यते तत्रेत्सञ्ज्ञा। णलुत्तमो णिद्वा भवति। क्त्वासेण् न किद्भवति। निष्ठा सेण् न किद्भवतीति।

(842. समाधानवार्त्तिकम्-2)

*** सिद्धं तु णलादीनां ग्रहणप्रतिषेधात् ***

भाष्यम्- सिद्धमेतत्। कथम्? णलादीनां ग्रहणानि प्रतिषिध्यन्ते। णलुत्तमो वा णिद्-ग्रहणेन गृह्यते। क्त्वा सेण्न किद्ग्रहणेन गृह्यते। निष्ठा सेण्न किद्ग्रहणेन गृह्यत इति।

(843. समाधानान्तरवार्त्तिकम्-3)

*** निर्दिष्टलोपाद्वा ***

भाष्यम्- निर्दिष्टलोपाद्वा सिद्धमेतत्। अथवा निर्दिष्टस्यातं लोपः क्रियते तस्मात्सिद्ध-मेतत्।

(844. आक्षेपवार्त्तिकम्-4)

*** तत्र तुस्मानां प्रतिषेधः ***

भाष्यम्- तत्र तुस्मानां प्रतिषेधो वक्तव्यः। तस्मात्। तस्मिन्। यस्मात्। यस्मिन्। वृक्षाः। प्लक्षाः। अचिनवम्। असुनवम्। अकरवम्।

(845. समाधानवार्त्तिकम्-5)

*** न वोच्चारणसामर्थ्यात् ***

भाष्यम्- न वा वक्तव्यः। किं कारणम्। उच्चारणसामर्थ्यादत्र लोपो न भविष्यति।

विप्रतिषेधनिराकरणाधिकरणम्

(846. आक्षेपवार्त्तिकम्-6)

*** अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अनुबन्धलोपे भावाभावयोर्विरोधादप्रसिद्धिः। न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति।

(847. **समाधानवार्त्तिकम्**-7)

*** सिद्धं त्वपवादन्यायेन ***

भाष्यम्– सिद्धमेतत्। कथम्? अपवादन्यायेन। किं पुनरिह तथा यथोत्सर्गापवादौ?

(848. **समाधानसाधकवार्त्तिकम्**-8)

*** भावो हि कार्यार्थोऽनन्यार्थो लोपः ***

भाष्यम्– कार्यं करिष्यामीत्यनुबन्ध आसज्यते कार्यादन्यन्मा भूदिति लोपः।

अनुबन्धानामेकान्तत्वाधिकरणम्

आक्षेपभाष्यम्– अथ यस्यानुबन्ध आसज्यते किं स तस्यैकान्तो भवत्याहोस्विदनेकान्तः?

(849. **एकान्तपक्षाभ्युपगमवार्त्तिकम्**-8)

*** एकान्तस्तत्रोपलब्धेः ***

भाष्यम्– एकान्त इत्याह। कुतः? तत्रोपलब्धेः। तत्रस्थो ह्यसावुपलभ्यते। तद्यथा—वृक्षस्था शाखा वृक्षैकान्तोपलभ्यते।

(850. **एकान्तपक्षदूषणवार्त्तिकम्**-9)

*** तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोनाकारान्तत्वात् ***

भाष्यम्– तत्रासरूपविधौ दोषो भवति—'कर्मण्यण्' 'आतोऽनुपसर्गे क' इति कविषयेऽणपि प्राप्नोति।

सर्वादेशे च दोषो भवति। 'दिव औत्' औत्सर्वादेशः प्राप्नोति। दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्यः—'अदाब्दैपौ' इति वक्तव्यम्। किं पुनः कारणं न सिद्ध्यति? अनाकारान्तत्वात्। ननु चात्त्वे कृते भविष्यति। तद्ध्यात्त्वं न प्राप्नोति। किं कारणम्? अनेजन्तत्वात्।

अनेकान्तपक्षाभ्युपगमभाष्यम्– अस्तु तर्ह्यनेकान्तः।

(851. **अनेकान्तपक्षदूषणवार्त्तिकम्**-10)

*** अनेकान्ते वृत्तिविशेषः ***

भाष्यम्– यदि अनेकान्तो, वृत्तिविशेषो न सिद्ध्यति। किति णितीति कार्याणि न सिद्ध्यन्ति। किं हि स तस्येद्भवति, येनेत्कृतं स्यात्?

अनन्तरपक्षाभ्युपगमभाष्यम्– एवं तर्ह्यनन्तरः।

(852. **अनन्तरपक्षदूषणवार्त्तिकम्**-11)

*** अनन्तर इति चेत्पूर्वोत्तरयोरित्कृतप्रसङ्गः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अनन्तर इति चेत्पूर्वोत्तरयोरित्कृतं प्राप्नोति।। वुञ्छण्।।

(853. **समाधानवार्त्तिकम्**-12)

*** सिद्धं तु व्यवसितपाठात् ***

भाष्यम्– सिद्धमेतत्। कथम्? व्यवसितपाठः कर्तव्यः। दुञ् छण्। स चावश्यं पाठः कर्तव्यः।

(854. **समाधानसाधकवार्त्तिकखण्डम्**-12)

*** इतरथा ह्येकान्तेऽपि सन्देहः ***

भाष्यम्– अक्रियमाणे व्यवसितपाठे एकान्तेऽपि सन्देहः स्यात्। तत्र न ज्ञायते किमयं पूर्वस्य भवत्याहोस्वित्परस्येति।

सन्देहापाकरणभाष्यम्– सन्देहमात्रमेतद्भवति। सर्वसन्देहेषु चेदमुपतिष्ठते 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। पूर्वस्येति व्याख्यास्यामः।

(855. **समाधानान्तरवार्त्तिकम्**-13)

*** वृत्ताद्वा ***

भाष्यम्– वृत्ताद्वा सिद्धमेतत्। वृद्धिमन्तमाद्युदात्तं दृष्ट्वा ञिदिति व्यवसेयम्। अन्तोदात्तं दृष्ट्वा किदिति।

आक्षेपभाष्यम्– युक्तं पुनर्यद् वृत्तनिमित्तको नामानुबन्धः स्यात्, नानुबन्धनिमित्तकेन नाम वृत्तेन भवितव्यम्।

समाधानभाष्यम्– वृत्तनिमित्तक एवानुबन्धः। वृत्तज्ञो ह्याचार्योऽनुबन्धानासजति।

आक्षेपभाष्यम्– उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति। किमत्र न्याय्यम्?

समाधानभाष्यम्– एकान्ता इत्येव न्याय्यम्। कुत एतत्? अत्र हि हेतुर्व्यपदिष्टः। यच्च नाम सहेतुकं तन्न्याय्यम्।

आक्षेपभाष्यम्– ननु चोक्तम् 'तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोनाकारान्तत्वाद्' इति।

समाधानभाष्यम्– असरूपविधौ तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—'नानुबन्धकृतमसारूप्यं भवति' इति, यदयं ददातिदधात्योर्विभाषां शास्ति।

यदप्युक्तम्—'सर्वादेश' इति। तत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—'नानुबन्धकृतमनेकाल्त्वं इति, यदयं 'शित्सर्वस्य' इत्याह।

यदप्युक्तम्—'दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्यः' इति। न कर्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति—'नानुबन्धकृतमनेजन्तत्वं भवति' इति, यदयम् 'उदीचां माङो व्यतीहारे' इति मेङः सानुबन्धकस्यात्त्वभूतस्य ग्रहणं करोति। तस्य लोपः।।9।।

(128. **यथासंख्यपरिभाषासूत्रम्** 1.3.1 आ. 7)

157. यथासंख्यमनुदेशः समानाम् 1.3.10

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणाधिकरणम्

आक्षेपभाष्यम्– किमिहोदाहरणम्?

उदाहरणभाष्यम्– 'इको यणचि' दध्यत्र मध्वत्र।

उदाहरणबाधकभाष्यम्– नैतदस्ति। स्थानेऽन्तरतमेनाप्येतत्सिद्धम्। कुत आन्तर्यम्? तालुस्थानस्य तालुस्थान ओष्ठस्थानस्यौष्ठस्थानो भविष्यतीति।

उदाहरणभाष्यम्– इदं तर्हि 'तस्थस्थमिपां तांतंताम:' इति।

उदाहरणबाधकभाष्यम्– ननु चैतदपि स्थानेऽन्तरतमेनैव सिद्धम्। कुत आन्तर्यम्? एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थो भविष्यतीति।

उदाहरणभाष्यम्– इदं तर्हि 'तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' इति।

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(856. समाधानवार्त्तिकम्-1)

*** सञ्ज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम् ***

सञ्ज्ञया समासैश्च निर्देशाः क्रियन्ते। सञ्ज्ञया तावत्—'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति। समासैः—'तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' इति। सञ्ज्ञासमासनिर्देशादेतस्मात्कारणात् सर्वप्रसङ्गः सर्वस्योद्देशस्य सर्वोऽनुदेशः प्राप्नोति। इष्यते च समसंख्यं यथा स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति तत्र यथासंख्यवचनं नियमार्थम्। एवमर्थमिदमुच्यते।

आक्षेपभाष्यम्– किं पुनः कारणं सञ्ज्ञया च समासैश्च निर्देशाः क्रियन्ते?

(857. समाधानवार्त्तिकम्-2)

*** सञ्ज्ञासमासनिर्देशः पृथग्विभक्तिसंज्ञ्यनुच्चारणार्थः ***

भाष्यम्– सञ्ज्ञया च समासैश्च निर्देशाः क्रियन्ते पृथग्विभक्तीः संज्ञिनश्च मोच्चीचरमिति।

(858. प्रयोजनान्तरवार्त्तिकम्-3)

*** प्रकरणे च सर्वसम्प्रत्ययार्थः ***

भाष्यम्– प्रकरणे च सर्वेषां सम्प्रत्ययो यथा स्याद् 'विदो लटो वा' इति।

संख्यातानुदेशविषयनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं पुनः शब्दतः साम्ये संख्यातानुदेशो भवत्याहोस्विदर्थतः?

भाष्यम्– कश्चात्र विशेषः?

(859. शब्दसाम्यपक्षेदूषणवार्त्तिकम्-4)

*** संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– संख्यासाम्यं शब्दतश्चेण्णलादयःपरस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः अगमको निर्देशोऽनिर्देशः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति णलादयो बहवः, परस्मैपदानामित्येकः शब्दः, वैषम्यात्संख्यातानुदेशो न प्राप्नोति। डारौरसः प्रथमस्य—डारौरसो बहवः, प्रथमस्येत्येकः शब्दः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति। 'एचोऽयवायावः' अयवायावो बहवः, एच इत्येकः शब्दः वैषम्यात् संख्यातानुदेशो न प्राप्नोति।

अर्थसाम्यपक्षाङ्गीकारभाष्यम्– अस्तु तर्ह्यर्थतः।

(860. **अर्थसाम्यपक्षदूषणवार्त्तिकम्**-5)

*** अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषः ***

भाष्यम्– अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषो भवति। 'स्यतासी लृलुटोः' स्यतासी द्वौ, लृलुटोरित्यस्य त्रयोऽर्थाः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' नन्द्यादयो बहवः, ल्युणिन्यचस्त्रयः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

अरीहणादयो बहवः, वुञादयः सप्तदश, वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

'सिन्धुतक्षशिलादिभ्योऽणञौ' सिन्धुतक्षशिलादयो बहवः, अणञौ द्वौ, वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

(861. **अर्थसाम्यपक्षदूषणान्तरवार्त्तिकम्**-6)

*** आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु ***

भाष्यम्– आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु च दोषो भवति। आत्मनेपदविधिश्च न सिध्यति—'अनुदात्तङित आत्मनेपदम्' अनुदात्तङितौ द्वौ, आत्मनेपदमित्यस्य द्वावर्थौ, तत्र संख्यातानुदेशः प्राप्नोति।

निष्ठा—'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति रेफदकारौ द्वौ, निष्ठेत्यस्य द्वावर्थौ, तत्र संख्यातानुदेशः प्राप्नोति।

सार्वधातुकद्विग्रहणेषु च दोषो भवति—'श्नसोरल्लोपः' श्नमस्ती द्वौ, सार्वधातुकमित्यस्य द्वावर्थौ, तत्र संख्यातानुदेशः प्राप्नोति।

(862. **आक्षेपवार्त्तिकम्**-7)

*** एङः पूर्वत्वे प्रतिषेधः ***

भाष्यम्– एङः पूर्वत्वे प्रतिषेधो वक्तव्यः। 'एङः पदान्तादति' 'ङसिङसोश्च' ङसिङसौ द्वौ, एङित्यस्य द्वावर्थौ, तत्र संख्यातानुदेशः प्राप्नोति।

शब्दसाम्यपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि शब्दतः।

आक्षेपभाष्यम्– ननु चोक्तं 'संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– नैष दोषः। स्थानेऽन्तरतम' इत्यनेन व्यवस्था भविष्यति। कुत आन्तर्यम्? एकार्थस्यैकार्थो द्व्यर्भस्य द्व्यर्थो, बह्वर्थस्य बह्वर्थः। संवृतावर्णस्य संवृतावर्णः, विवृतावर्णस्य विवृतावर्णः।

(863. आक्षेपवार्त्तिकम्-8)

*** अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति ***

भाष्यम्– अतिप्रसङ्गो भवति गुणवृद्धिप्रतिषेधे क्ङिति। गुणवृद्धी द्वे, क्ङितौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। गकारोप्यत्र निर्दिश्यते।

तटस्थभाष्यम्– तद्गकारग्रहणं कर्तव्यम्।

सिद्धान्तिभाष्यम्– न कर्तव्यम्। क्रियते न्यास एव। ककारे गकारश्चर्त्वभूतो निर्दिश्यते गिति किति ङितीति।

(864. आक्षेपवार्त्तिकम्-9)

*** उदिकूले रुजिवहोः ***

भाष्यम्– उदिकूले द्वे, रुजिवहौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

आक्षेपदूषकभाष्यम्– नैष दोषः। नोदिरुपपदम्। किं तर्हि? विशेषणं रुजिवहोः। उत्पूर्वाभ्यां रुजिवहिभ्यां कूल उपपद इति।

(865. आक्षेपवार्त्तिकम्-10)

*** तच्छीलादिषु धातुत्रिग्रहणेषु ***

भाष्यम्– तच्छीलादिषु धातुत्रिग्रहणेषु दोषो भवति। 'विदिभिदिच्छिदेः कुरच्' विदि-भिदिच्छिदयस्त्रयः, तच्छीलादयस्त्रयः, तत्र संख्यातानुदेशः प्राप्नोति।

(866. आक्षेपवार्त्तिकम्-11)

*** घञादिषु द्विग्रहणेषु ***

भाष्यम्– घञादिषु द्विग्रहणेषु दोषो भवति। 'निरभ्योः पूल्वोः' निरभी द्वौ, पूल्वौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

आक्षेपनिराकरणभाष्यम्– नैष दोषः। इष्यते चात्र संख्यातानुदेशः निष्पावः अभिलाव इति।

आक्षेपव्याख्यान्तरभाष्यम्– एवं तर्हि अकर्तरि च कारके भावे चेति द्वौ, पूल्वौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(867. आक्षेपवार्त्तिकम्-12)

*** अवे तॄस्त्रोः करणाधिकरणयोः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– तृन्त्रौ द्वौ, करणाधिकरणे द्वे, तत्र संख्यातानुदेशः प्राप्नोति।

(868. आक्षेपवार्त्तिकम्- 13)

*** कर्तृकर्मणोश्च भूकृञोः ***

भाष्यम्– कर्तृकर्मणी द्वे, भूकृञौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(869. आक्षेपवार्त्तिकम्- 14)

*** अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ***

भाष्यम्– अनुवक्लृप्त्यमर्षौ द्वौ, किवृत्ताकिंवृत्ते द्वे, तत्र संख्यातानुदेशः प्राप्नोति।

(870. आक्षेपवार्त्तिकम्- 15)

*** कृभ्वोः क्त्वाणमुलौ ***

भाष्यम्– कृभ्वौ द्वौ क्त्वाणमुलौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(871. आक्षेपवार्त्तिकम्- 16)

*** अधीयानविदुषोश्छन्दोब्राह्मणानि ***

भाष्यम्– छन्दोब्राह्मणानीति द्वे, अधीते वेदिति च द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(872. आक्षेपवार्त्तिकम्- 17)

*** रोपधेतोः पथिदूतयोः ***

भाष्यम्– 'रोपधेतोः प्राचाम्, तद्गच्छति पथिदूतयोः'। रोपधेतौ द्वौ, पथिदूतौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(873. आक्षेपवार्त्तिकम्- 18)

*** तत्र भवस्तस्य व्याख्यानः क्रतुयज्ञेभ्यश्च ***

भाष्यम्– तत्रभवस्तस्य व्याख्यानौ द्वौ, क्रतुयज्ञौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(874. आक्षेपवार्त्तिकम्- 19)

*** सङ्घादिष्वञ्प्रभृतयः ***

भाष्यम्– सङ्घादिष्वञ्प्रभृतयः संख्यातानुदेशेन न सिध्यन्ति।

आक्षेपवारकभाष्यम्– नैष दोषः। घोषग्रहणमपि तत्र कर्तव्यम्।

(875. आक्षेपवार्त्तिकम्-)

*** वेशोयशआदेर्भगाद्यत्खौ ***

भाष्यम्– वेशोयशआदी द्वौ, यत्खौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(876. आक्षेपवार्त्तिकम्- 21)

*** ङसिङसोः ख्यत्यात्परस्य ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– ङसिङसौ द्वौ, ख्यत्यौ द्वौ, तत्र संख्यातानुदेशः प्राप्नोति।

(877. उक्ताक्षेपबाधकसमाधानवार्त्तिकम्-22)

*** न वा समानयोगवचनात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? समानयोगवचनात् समानयोगे संख्यातानुदेशं वक्ष्यामि।

अथ यथासंख्यानुपपत्तिप्रकरणम्

(878. आक्षेपवार्त्तिकम्-23)

*** तस्य दोषो विदो लटो वा ***

भाष्यम्– तस्यैतस्य लक्षणस्य दोषः 'विदो लटो वा' इति संख्यातानुदेशो न प्राप्नोति।

(879. आक्षेपवार्त्तिकम्-24)

*** ध्माधेटोः नाडीमुष्ट्योश्च ***

भाष्यम्– ध्माधेटोः नाडीमुष्ट्योश्च संख्यातानुदेशो न प्राप्नोति।

(880. आक्षेपवार्त्तिकम्-25)

*** खलगोरथादिनित्रकट्यचश्च ***

भाष्यम्– संख्यातानुदेशो न प्राप्नोति।

(881. आक्षेपवार्त्तिकम्-26)

*** सिन्ध्वपकराभ्यां कन् अणञौ च ***

भाष्यम्– संख्यातानुदेशो न प्राप्नोति।

(882. आक्षेपवार्त्तिकम्-27)

*** युष्मदस्मदोश्चादेशाः ***

भाष्यम्– युष्मदस्मदोश्चादेशाः संख्यातानुदेशान्न सिद्ध्यन्ति।

उपसंहारभाष्यम्– तस्माद्यस्मिन्पक्षेऽल्पीयांसो दोषाः, तमास्थाय प्रतिविधेयं दोषेषु।

समाधानान्तरभाष्यम्– अथ वैवं वक्ष्यामि 'यथासंख्यमनुदेशः समानां स्वरितेन' ततः 'अधिकारः' अधिकारश्च भवति स्वरितेनेति।

आक्षेपभाष्यम्– एवमपि स्वरितं दृष्ट्वा सन्देहः स्यात्-न ज्ञायते—किमयं समसंख्यार्थः, आहोऽस्वदधिकारार्थ इति?

आक्षेपबाधकभाष्यम्– सन्देहमात्रमेतद्भवति। सर्वसन्देहेषु चेदमुपतिष्ठते 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। समसंख्यार्थ इति व्याख्यास्यामः। यथासंख्यमनुदेशः।।10।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(129. परिभाषासूत्रम् 1.3.1 आ. 8)

158. स्वरितेनाधिकारः 1.3.11

सूत्रप्रयोजनाक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(883. समाधानवार्त्तिकम्-1)

*** अधिकारः प्रतियोगं तस्यानिर्देशार्थः ***

भाष्यम्– अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति? योगं योगं प्रति प्रतियोगम्। योगे योगे तस्य ग्रहणं मा कार्षमिति।

आक्षेपभाष्यम्– किं गतमेतदियता सूत्रेण?

समाधानभाष्यम्– गतमित्याह। कुतः? लोकतः। तद्यथा लोके—'अधिकृतोऽसौ ग्रामे' 'अधिकृतोऽसौ नगरे' इत्युच्यते यो यत्र व्यापारं गच्छति। शब्देन चाप्यधिकृतेन कोन्यो व्यापारः शक्योवगन्तुमन्यदतो योगे योग उपस्थानात्।

(884. समाधानबाधकवार्त्तिकम्-2)

*** न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके ***

भाष्यम्– न वा एतत्प्रयोजनमस्ति। किं कारणम्? निर्दिश्यमानाधिकृतत्वात्। यथा लोके। निर्दिश्यमानमधिकृतं गम्यते। तद्यथा—'देवदत्ताय गौर्दीयताम्' 'यज्ञदत्ताय' 'विष्णुमित्राय' इति। गौरिति गम्यते। एवमिहापि 'पदरुजविशस्पृशो घञ्' 'सृ स्थिरे' 'भावे' घञिति गम्यते।

(885. समाधानसाधकवार्त्तिकम्-3)

*** अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा ***

भाष्यम्– अन्यनिर्देशस्तु लोके निवर्तको भवति। तद्यथा 'देवदत्ताय गौर्दीयताम्' 'विष्णुमित्राय कम्बलः' इति कम्बलो 'गोर्निवर्तको भवति। एवमिहापि 'अभिविधौ भाव इनुण्' घञो निवर्तकः स्यात्। तस्मात्परिभाषा कर्तव्या।

(886. आक्षेपवार्त्तिकम्-4)

*** अधिकारपरिमाणाज्ञानं तु ***

भाष्यम्– अधिकारपरिमाणाज्ञानं तु भवति। न ज्ञायते कियन्तमवधिमधिकारोऽनुवर्तत इति।

(887. समाधानवार्त्तिकम्-5)

*** अधिकारपरिमाणज्ञानार्थं तु ***

भाष्यम्– अधिकारपरिमाणज्ञानार्थ एव तर्हि अयं योगो वक्तव्यः। अधिकारपरिमाणं ज्ञास्यामीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कथं पुनः 'स्वरितेनाधिकार' इत्यनेनाधिकारपरिमाणं शक्यं विज्ञातुम्?

समाधानभाष्यम्– एवं वक्ष्यामि—'स्वरिते नाधिकारः' इति। स्वरितं दृष्ट्वाधिकारो न भवतीति।

आक्षेपभाष्यम्– केनेदानीमधिकारो भविष्यति?

समाधानभाष्यम्– लौकिकोऽधिकारः।

(888. व्याख्यान्तरनिरसनवार्त्तिकम्-6)

*** नाधिकार इति चेदुक्तम् ***

भाष्यम्– किमुक्तम्? 'अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा' इति।

उपसंहारभाष्यम्– अधिकारार्थमेव तर्ह्ययं योगो वक्तव्यः।

आक्षेपभाष्यम्– ननु चोक्तम्—'अधिकारपरिमाणाज्ञानं तु' इति।

(889. समाधानवार्त्तिकम्-7)

*** यावतिथोऽलनुबन्धस्तावतो योगानिति वचनात्सिद्धम् ***

भाष्यम्– यावतिथोऽलनुबध्यते तावतो योगानधिकारोऽनुवर्तत इति वक्तव्यम्।

आक्षेपभाष्यम्– यथेदानीं यत्राल्पीयांसोऽलः, भूयसश्च योगानधिकारोऽनुवर्तते, कथं तत्र कर्तव्यम्?

(890. समाधानवार्त्तिकम्-8)

*** भूयसि प्राग्वचनम् ***

भाष्यम्– भूयसि प्राग्वचनं कर्तव्यम् 'प्रागमुत' इति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

समाधानभाष्यम्– न वक्तव्यम्। सन्देहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति। प्रागमुत इति व्याख्यास्यामः।

प्रत्याख्यानभाष्यम्– यद्येवं नार्थोऽनेन।

आक्षेपभाष्यम्– केनेदानीमधिकारो भविष्यति?

समाधानभाष्यम्– लौकिकोऽधिकारः।

आक्षेपभाष्यम्– ननु चोक्तं—'नाधिकार इति चेदुक्तम्'। किमुक्तम्? 'अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा* इति।

समाधानभाष्यम्– सन्देहमात्रमेतद्भवति। सर्वसन्देहेषु चेदमुपत्तिष्ठते 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इत्युक्तम्। इनुण्घञिति सन्देहे घञिति व्याख्यास्यामः।

आक्षेपभाष्यम्– न तर्हीदानीमयं योगो वक्तव्यः।

समाधानभाष्यम्– वक्तव्यश्च। किं प्रयोजनम्। स्वरितेनाधिकारगतिर्यथा विज्ञायेत। अधिकं कार्यम्। अधिकः कारः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणभाष्यम्– अधिकारगतिः—'गोस्त्रियोरुपसर्जनस्य' इत्यत्र गोटाङ्ग्रहणं चोदितं तन्न कर्तव्यं भवति। स्त्रीग्रहणं स्वरयिष्यते। स्वरितेनाधिकारगतिर्भविष्यतीति स्त्रियामित्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते तत्र स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति। (अधिकारगतिः)।

द्वितीयफलोदाहरणभाष्यम्– अधिकं कार्यम्—अपादानमाचार्यः किं न्याय्यं मन्यते? यत्र प्राप्य निवृत्तिः। तेनेहैव स्यादम्—ग्रामादागच्दति नगरादागच्छति। साङ्काश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति। तथा—अधिकरणमाचार्यः किं न्याय्यं मन्यते? यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्—तिलेषु तैलम्, दध्नि सर्पिरिति। गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति। अधिकं कार्यम्।

तृतीयफलोदाहरणभाष्यम्– अधिकः कारः—पूर्वविप्रतिषेधाश्च न पठितव्या भवन्ति—'गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धम्' नुमचिरतृज्वद्भावेभ्यो नुट्' इति। नुम्नुटौ स्वरयिष्येते। तत्र स्वरितेनाधिकः कारो भवतीति नुम्नुटौ भविष्यतः।

आक्षेपभाष्यम्– कथं पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या न पठितुम्?

समाधानभाष्यम्– लोकतः। तद्यथा—लोकेऽधिकमयं कारं करोतीत्युच्यते योऽयं दुर्बलः सन्बलवद्भिः सह भारं वहति। एवमिहाप्यधिकमयं कारं करोतीत्युच्यते योऽयं पूर्वः सन्परं बाधते।

अधिकारगतिस्त्र्यर्था विशेषायाधिकं कार्यम्। अथयोन्योऽधिकः कारः पूर्वविप्रतिषेधार्थः सः। स्वरितेनाधिकारः।।11।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्

●

प्रथमेऽध्याये तृतीये पादे द्वितीयमाह्निकम्

आत्मनेपदनियमप्रकरणम्

(130. **नियमसूत्रम्** 1.3.2 आ. 1)

159. अनुदात्तङित आत्मनेपदम् 1.3.12

अनिष्टवारणाधिकरणम्

(891. **आक्षेपवार्त्तिकम्**-1)

*** विकरणेभ्यः प्रतिषेधः ***

भाष्यम्– विकरणेभ्यः प्रतिषेधो वक्तव्यः। चिनुतः सुनुतः लुनीतः। ङित इत्यात्मनेपदं प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्– नैष दोषः। नैवं विज्ञायते—'ङकार इद्यस्य सोऽयं ङिद् ङितः' इति। कथं तर्हि? ङकार इद् ङित् ङित इति।

आक्षेपबाधकान्तरभाष्यम्– अथवोपदेश इति वर्तते।

आक्षेपबाधकान्तरभाष्यम्– अथवोक्तमेतत् 'सिद्धं तु पूर्वस्य कार्यातिदेशाद्' इति।

आक्षेपसाधकभाष्यम्– सर्वथा चङङ्भ्यां प्राप्नोति।

समाधानभाष्यम्– एवं तर्हि 'धातोः' इति प्रकृतं वर्तते। क्व प्रकृतम्? 'भूवादयो धातवः' इति।

आक्षेपभाष्यम्– तद्वै प्रथमानिर्दिष्टम्, पञ्चमीनिर्दिष्टेन चेहार्थः।

समाधानभाष्यम्– अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा—'उच्चानि देवदत्तस्य गृहाणि, आमन्त्रयस्व' एनं देवदत्तम्' इति गम्यते। 'देवदत्तस्य गावोऽश्वा हिरण्यं च' 'आढ्यो वैधेयः' 'देवदत्त' इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीययानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्पञ्चमीनिर्दिष्टं भविष्यति।

प्रकरणप्रयोजनाक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

(892. **समाधानवार्त्तिकम्**-2)

*** आत्मनेपदवचनं नियमार्थम् ***

भाष्यम्– नियमार्थोऽयमारम्भः।

आक्षेपभाष्यम्– किमुच्यते नियमार्थोऽयमिति न पुनर्विध्यर्थोऽपि स्यात्?

(893. **समाधानसाधकवार्त्तिकम्**-3)

*** लविधानाद्विहितम् ***

भाष्यम्– लविधानाद्ध्यात्मनेपदं परस्मैपदं च विहितम्।

(894. **आक्षेपवार्त्तिकम्**-4)

*** विकरणव्यवहितत्वात्तु नियमाप्राप्तिः ***

भाष्यम्– विकरणैस्तु व्यवहितत्वान्नियमो न प्राप्नोति। इदमिह सम्प्रधार्यं विकरणाः क्रियन्तां नियम इति। किमत्र कर्तव्यम्? परत्वाद्विकरणाः। नित्याः खल्वपि विकरणाः, कृतेऽपि नियमे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति। नित्यत्वाच्च परत्वाच्च विकरणेषु कृतेषु विकरणैर्व्यवहितत्वान्नियमो न प्राप्नोति।

आक्षेपबाधकभाष्यम्– नैष दोषः। अनवकाशे नियमः।

आक्षेपसाधकभाष्यम्– सावकाशः। कोऽवकाशः? य एते लुग्विकरणाश्च श्लुविकरणाश्च, लिङ्लिटौ च।

परिभाषात्वाङ्गीकारभाष्यम्– यदि पुनरियं।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(895. पक्षान्तरवार्त्तिकम्-5)

* परिभाषा *

भाष्यम्– विज्ञायेत। किं कृतं भवति? 'कार्यकालं सञ्ज्ञापरिभाषम्' यत्र कार्यं तत्र द्रष्टव्यम्। लस्य तिबादयो भवन्तीत्युपस्थितमिदं भवति 'अनुदात्तङित आत्मनेपदम्' 'शेषात्कर्तरि परस्मैपदम्' इति।

अन्योन्याश्रयाक्षेपभाष्यम्– एवमपीतरेतराश्रयं भवति। का इतरेतराश्रयता? अभिनिर्वृत्तानां लस्य स्थाने तिबादीनामात्मनेपदपरस्मैपदसञ्ज्ञया भवितव्यम्। सञ्ज्ञया च तिबादयो भाव्यन्ते। तदितरेतराश्रयं भवति, इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

अन्योन्याश्रयपरिहारभाष्यम्– परस्मैपदेषु तावन्नेतरेतराश्रयं भवति। परस्मैपदानुक्रमणं न करिष्यते।

आक्षेपभाष्यम्– अवश्यं कर्तव्यम् 'अनुपराभ्यां कृञः' इत्येवमर्थम्।

आक्षेपबाधकभाष्यम्– ननु चैतदप्यात्मनेपदानुक्रमण एव करिष्यते 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' आत्मनेपदं भवति, 'कर्तर्यनुपराभ्यां कृञो न' इति।

अन्योन्याश्रयपरिहारभाष्यम्– आत्मनेपदेषु चापि नेतरेतराश्रयं भवति। कथम्? भाविनी सञ्ज्ञा विज्ञास्यते सूत्रशाटकवत्। तद्यथा—कश्चित्कञ्चित्तन्तुवायमाह—'अस्य सूत्रस्य शाटकं वय' इति। स पश्यति—यदि शाटको न वातव्यः, अथवातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी स्वल्वस्य सञ्ज्ञाभिप्रेता—स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवति—इति। एवमिहापि—स लस्य स्थाने कर्तव्यः, यस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा सञ्ज्ञा भविष्यति।

नियमपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु नियमः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं विकरणैर्व्यवहितत्वान्नियमो न प्राप्नोति।

आक्षेपनिरसनभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—'विकरणेभ्यो नियमो बलीयान्' इति। यदयं विकरणविधावात्मनेपदपरस्मैपदान्याश्रयति 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' 'आत्मनेपदेष्वन्यतरस्याम्' इति।

नियमपक्षसाधकज्ञापकनिरसनभाष्यम्– नैतदस्ति ज्ञापकम्। अभिनिर्वृत्तानि हि लस्य स्थाने आत्मनेपदानि परस्मैपदानि च।

ज्ञापकान्तरभाष्यम्– यत्तर्हि—'अनुपसर्गाद्वा' इति विभाषां शास्ति।

अथ प्रत्ययनियमप्रकृत्यर्थनियमनिर्णयप्रकरणम्

आक्षेपभाष्यम्– किं पुनरयं प्रत्ययनियमः—अनुदात्तङित एवात्मनेपदं भवति, भावकर्मणोरेवात्मनेपदं भवतीति। आहोस्वित्प्रकृत्यर्थनियमः—अनुदात्तङित आत्मनेपदमेव, भावकर्मणोरात्मनेपदमेवेति।

भाष्यम्– कश्चात्र विशेषः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(896. प्रत्ययनियमदूषणवार्त्तिकम्-6)

*** तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात् ***

भाष्यम्– तत्र प्रत्ययनियमे शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम्—'शेषात्कर्तरि परस्मैपदम्' इति। किं कारणम्? परस्मैपदस्यानिवृत्तत्वात्। प्रत्यया नियताः, प्रकृत्यर्थावनियतौ। तत्र परस्मैपदमपि प्राप्नोति। तत्र शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम् 'शेषादेव परस्मैपदं भवति, नान्यत' इति।

(897. दूषणान्तरवार्त्तिकम्-7)

*** क्यष आत्मनेपदवचनं तस्यान्यत्र नियमात् ***

भाष्यम्– क्यष आत्मनेपदं वक्तव्यम्। लोहितायति लोहितायते। किं पुनः कारणं न सिध्यति? तस्यान्यत्र नियमात्। तद्ध्यन्यत्र नियम्यते।

दूषणोद्धारकभाष्यम्– उच्यते च, न च प्राप्नोति। तद्वचनाद्भविष्यति।

प्रकृत्यर्थनियमाङ्गीकारभाष्यम्– अस्तु तर्हि प्रकृत्यर्थनियमः।

(898. प्रकृत्यर्थनियमदूषणवार्त्तिकम्-8)

*** प्रकृत्यर्थनियमेऽन्याभावः ***

भाष्यम्– प्रकृत्यर्थनियमे अन्येषां प्रत्ययानामभावः। अनुदात्तङितस्तृजादयो न प्राप्नुवन्ति।

दूषणबाधकभाष्यम्– नैष दोषः। अनवकाशास्तृजादयः। उच्यन्ते च, ते वचनाद्भविष्यन्ति।

दूषणसाधकभाष्यम्– सावकाशास्तृजादयः। कोऽवकाशः? परस्मैपदिनोऽवकाशः।

दूषणबाधकभाष्यम्– तत्रापि नियमान्न प्राप्नुवन्ति।

दूषणसाधकभाष्यम्– तव्यदादयस्तर्हि भावकर्मणोर्नियमान्न प्राप्नुवन्ति।

दूषणबाधकभाष्यम्– तव्यदादयोप्यनवकाशाः। ते वचनाद्भविष्यन्ति।

दूषणसाधकभाष्यम्– चिण्तर्हि भावकर्मणोर्नियमान्न प्राप्नोति।

दूषणबाधकभाष्यम्– चिण्वचनाद्भविष्यति।

दूषणसाधकभाष्यम्– छञ् तर्हि भावकर्मणोर्नियमान्न प्राप्नोति।

दूषणबाधकभाष्यम्– तत्रापि प्रकृतं कर्मग्रहणमनुवर्तते। क्व प्रकृतम्? 'अण्कर्मणि च' इति।

दूषणसाधकभाष्यम्– तद्वै तत्रोपपदविशेषणम्। अभिधेयविशेषणेन चेहार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति नहि गोधा सर्पन्ती सर्पणादहिर्भवति।

दूषणपरिहारभाष्यम्– यत्तावदुच्यते—नान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते शालयश्च भाव्यन्ते। यदप्युच्यते—न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति नहि गोधा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्पन्ती सर्पणादहिर्भवतीति। भवेद्द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येनयेनाभिसम्बध्यते तस्य तस्य विशेषको भवति।

(899. दूषणान्तरवार्त्तिकम्-9)
* शेषवचनं च *

भाष्यम्– शेषवचनं च कर्तव्यम् 'शेषात्कर्तरि परस्मैपदम्' इति। किं प्रयोजनम्? शेषनियमार्थम्। प्रकृत्यर्थौ नियतौ, प्रत्यया अनियताः, ते शेषेऽपि प्राप्नुवन्ति। तत्र शेषग्रहणं कर्तव्यम्—शेषात्कर्तरि परस्मैपदमेव नान्यदिति।

(900. दूषणवार्त्तिकम्-10)
* कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थम् *

भाष्यम्– कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थं द्वितीयं शेषग्रहणं कर्तव्यम्। 'शेषाच्छेषे' इति वक्तव्यम्। इह मा भूत्—भिद्यते कुसूलः स्वयमेवेति।

आक्षेपभाष्यम्– कतरस्मिन्पक्षेऽयं दोषः?

तृतीयोक्तसमाधानभाष्यम्– प्रकृत्यर्थनियमे।

तृतीयोक्तसमाधाननिराकरणभाष्यम्– प्रकृत्यर्थनियमे तावन्न दोषः। प्रकृत्यर्थौ नियतौ, प्रत्यया अनियताः, तत्र नार्थः कर्तृग्रहणेन। कर्तृग्रहणाच्चैष दोषः।

दोषाश्रयपक्षप्रदर्शकभाष्यम्– प्रत्ययनियमे तर्ह्ययं दोषः। प्रत्यया नियताः, प्रकृत्यर्थावनियतौ, तत्र कर्तृग्रहणं कर्तव्यं भावकर्मणोर्निवृत्त्यर्थम्। कर्तृग्रहणाच्चैष दोषः।

प्रकृत्यर्थनियमेलाघवभाष्यम्– प्रकृत्यर्थनियमे शेषग्रहणं शक्यमकर्तुम्। कथम्? प्रकृत्यर्थौ नियतौ, प्रत्यया अनियताः। ततो वक्ष्यामि—परस्मैपदं भवतीति। तन्नियमार्थं भविष्यति—यत्र परस्मैपदं चान्यच्च प्राप्नोति तत्र परस्मैपदमेव भवतीति।

आक्षेपभाष्यम्– तत्तर्हि प्रत्ययनियमे द्वितीयं शेषग्रहणं कर्तव्यम्।

समाधानभाष्यम्– न कर्तव्यम्। योगविभागः करिष्यते 'अनुदात्तङित आत्मनेपदम्'। ततः 'भावकर्मणोः'। ततः 'कर्तरि' कर्तरि चात्मनेपदं भवति भावकर्मणोः। ततः 'कर्मव्यतिहारे' कर्तरीत्येव। भावकर्मणोरिति निवृत्तम्।

आक्षेपभाष्यम्– यथैव तर्हि कर्मणि कर्तरि भवति, एवं भावेऽपि कर्तरि प्राप्नोति—'एति जीवन्तमानन्दः' 'नास्य किं चिद्रुजतीति।

समाधानभाष्यम्– द्वितीयो योगविभागः करिष्यते—'अनुदात्तङित आत्मनेपदम्'। ततः 'भावे'। ततः 'कर्मणि' कर्मणि चात्मनेपदं भवति। ततः 'कर्तरि' कर्तरि चात्मनेपदं भवति। कर्मणीत्यनुवर्तते, भाव इति निवृत्तम्। ततः 'कर्मव्यतिहारे' कर्तरीत्येव, कर्मणीति निवृत्तम्।

आक्षेपभाष्यम्– एवमपि शेषग्रहणं कर्तव्यम् 'अनुपराभ्यां कृञ' इत्येवमर्थम्। इह मा भूत्—अनुक्रियते स्वयमेव, पराक्रियते स्वयमेव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्– ननु चैतदपि योगविभागादेव सिद्धम्।

आक्षेपसाधकभाष्यम्– न सिध्यति। अनन्तरा या प्राप्तिः सा योगविभागेन शक्या बाधितुम्। कुत एतत्? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। परा प्राप्तिरप्रतिषिद्धा तया प्राप्नोति।

आक्षेपबाधकभाष्यम्– ननु चेयं प्राप्तिः परां प्राप्तिं बाधते।

आक्षेपसाधकभाष्यम्– नोत्सहते प्रतिषिद्धा सती बाधितुम्।

समाधानभाष्यम्– एवं तर्हि 'कर्तरि कर्मव्यतिहारे' इत्यत्र कर्तृग्रहणं प्रत्याख्यायते। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते—'शेषात्कर्तरि कर्तरि' इति। किमर्थमिदं कर्तरि कर्तरीति? कर्तैव यः कर्ता तत्र यथा स्यात्। कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति। ततः 'अनुपराभ्यां कृञः कर्तरि कर्तरि' इत्येव। अनुदात्तङित।।12।।

(131. **नियमसूत्रम्** 1.3.2 आ. 2)

161. कर्तरि कर्मव्यतिहारे 1.3.14

(901. **आक्षेपवार्त्तिकम्**-1)

*** क्रियाव्यतिहारे ***

भाष्यम्– क्रियाव्यतिहार इति वक्तव्यम्। कर्मव्यतिहार इत्युच्यमाने इहापि प्रसज्येत— देवदत्तस्य धान्यं व्यतिलुनन्तीति, इह च न स्यात्—व्यतिलुनते व्यतिपुनत इति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। क्रियां हि लोके कर्मेत्युपचरन्ति। 'कां क्रियां करिष्यसि' 'किं कर्म करिष्यसी'ति।

आक्षेपभाष्यम्– एवमपि कर्तव्यम्। 'कृत्रिमाकृत्रिमयोः कृत्रिमे सम्प्रत्ययो भवति'।

आक्षेपबाधकभाष्यम्– क्रियापि कृत्रिमं कर्म।

आक्षेपसाधकभाष्यम्– न सिद्ध्यति। 'कर्तुरीप्सिततमं कर्म' इत्युच्यते। कथं च क्रिया नाम क्रियया ईप्सिततमा स्यात्?

सिद्धान्तिसमाधानभाष्यम्– क्रियापि क्रिययेप्सिततमा भवति। कया क्रियया? सम्पश्यतिक्रियया प्रार्थयतिक्रियया अध्यवस्यतिक्रियया (च)। इह य एष मनुष्यः प्रेक्षा-पूर्वकारी भवति स बुद्ध्या तावत् कञ्चिदर्थं सम्पश्यति, संदृष्टे प्रार्थना, प्रार्थिते अध्यवसायः, अध्यवसाये आरम्भः, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्म।

आक्षेपसाधकभाष्यम्– एवमप्युभयोः कृत्रिमयोरुभयगतिः प्रसज्येत। तस्मात्क्रिया-व्यतिहार इति व्यक्तव्यम्।

आक्षेपबाधकसमाधानसाधकभाष्यम्– न वक्तव्यम्। इह 'कर्तरि व्यतिहारे' इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्कर्मग्रहणं करोति तस्यैतत्प्रयोजनम्—क्रियाव्यतिहारे यथा स्यात्कर्मव्यतिहारे माभूदिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तृग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ कर्तृग्रहणं किमर्थम्?

(902. **प्रयोजनवार्त्तिकम्**-2)

*** कर्मव्यतिहारादिषु कर्तृग्रहणं भावकर्मनिवृत्त्यर्थम् ***

भाष्यम्– कर्मव्यतिहारादिषु कर्तृग्रहणं क्रियते भावकर्मणोरनेनात्मनेपदं मा भूदिति।

(903. **अन्यथानुपपत्तिवार्त्तिकखण्डम्**-2)

*** इतरथा हि तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः ***

भाष्यम्– अक्रियमाणे कर्तृग्रहणे भावकर्मणोरप्यात्म्यनेपदमनेन प्रसज्येत। तत्र को दोषः? तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः। तत्र प्रतिषेधे भावकर्मणोरप्यनेनात्मनेपदस्य प्रतिषेधः प्रसज्येत—व्यतिगम्यन्ते ग्रामाः व्यतिहन्यन्ते दस्यव इति।

(904. **अन्यथानुपपत्तिबाधकवार्त्तिकम्**-3)

*** न वानन्तरस्य प्रतिषेधात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? अनन्तरस्य प्रतिषेधात्। अनन्तरं यदात्मनेपदविधानं तस्य प्रतिषेधात्। कुत एतत्? 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति।

प्रयोजनसाधकभाष्यम्– ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते।

प्रयोजनबाधकभाष्यम्– नोत्सहते प्रतिषिद्धा सती बाधितुम्।

प्रयोजनान्तरभाष्यम्– उत्तरार्थं तर्हि कर्तृग्रहणं कर्तव्यम्।

प्रयोजनान्तरबाधकभाष्यम्– न कर्तव्यम्। क्रियते तत्रैव 'शेषात्कर्तरि परस्मैपदम्' इति।

प्रयोजनान्तरसाधकभाष्यम्– द्वितीयं कर्तृग्रहणं कर्तव्यम्। किं प्रयोजनम्? कर्तैव यः कर्ता तत्र यथा स्यात्, कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति। कर्तरि कर्म।।14।।

(132. **निषेधसूत्रम्** 1.3.2 आ. 3)

162. न गतिहिंसार्थेभ्यः 1.3.15

न्यूनतापूर्त्यधिकरणम्

(905. **आक्षेपवार्त्तिकम्**-1)

*** प्रतिषेधे हसादीनामुपसंख्यानम् ***

भाष्यम्– प्रतिषेधे हसादीनामुपसंख्यानं कर्तव्यम्। व्यतिहसन्ति। व्यतिजल्पन्ति। व्यतिपठन्ति।

(906. **आक्षेपवार्त्तिकम्**-2)

*** हरिवह्योरप्रतिषेधः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– हरिवह्योरप्रतिषेधो भवतीतिवक्तव्यम्। सम्प्रहरन्ते राजानः। संविवहन्ते गर्गैरिति।

वहिग्रहणप्रत्याख्यानभाष्यम्– न वहिर्गत्यर्थः। देशान्तरप्रापणक्रियोऽत्र वहिः। न गति।।15।।

(133. **निषेधसूत्रम्** 1.3.2 आ. 4)

163. इतरेतरान्योन्योपपदाच्च 1.3.16

न्यूनतापूरणाधिकरणम्

(907. **आक्षेपवार्त्तिकम्**-1)

*** परस्परोपपदाच्च ***

भाष्यम्– परस्परोपपदाच्चेति वक्तव्यम्। परस्परस्य व्यतिलुनन्ति। परस्परस्य व्यतिपुनन्ति। इतरेतरा.।।16।।

(134. **आत्मनेपदनियमसूत्रम्** 1.3.2 आ. 5)

166. विपराभ्यां जेः 1.3.19

अनिष्टवारणाधिकरणम्

(908. **आक्षेपवार्त्तिकम्**-1)

*** विपराभ्यामित्युपसर्गग्रहणम् ***

भाष्यम्– (विपराभ्यामिति) उपसर्गग्रहणं कर्तव्यम्। इह मा भूत्—पराजयति सेनेति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। यद्यपि तावदयं पराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्च, अयं खलु विशब्दोऽदृष्टापचार उपसर्ग एव। तस्यास्य कोऽन्यो द्वितीयः सहायो भवितुमर्हत्यन्यदत उपसर्गात्। तद्यथा—'अस्य गोर्द्वितीयेनार्थः' इति गौरेवोपादीयते नाश्वो न गर्दभ इति। विपराभ्याम्।।19।।

(135. **आत्मनेपदनियमसूत्रम्** 1.3.2 आ. 6)

167. आङो दोनास्यविहरणे 1.3.20

अनिष्टनिवारणाधिकरणम्

(908. **आक्षेपवार्त्तिकम्**-1)

*** आङो दोऽव्यसनक्रियस्य ***

भाष्यम्– आङो दोऽव्यसनक्रियस्येति वक्तव्यम्। इहापि यथा स्यात्—विपादिकां व्याददाति कूलं व्याददातीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटस्थाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। इह 'आङो दोनास्य' इतीयता सिद्धम्। सोयमेवं सिद्धे सति यद्विहरणग्रहणं करोति तस्यैतत्प्रयोजनम्—आस्यविहरणसमानक्रियादपि यथा स्यात्। यथाजातीयका चास्यविहरणक्रिया तथाजातीयकात्रापि।

(909. आक्षेपवार्त्तिकम्- 2)

*** स्वाङ्गकर्मकाच्च ***

भाष्यम्– स्वाङ्गकर्मकाच्चेति वक्तव्यम्। इह मा भूत्—व्याददते पिपीलिकाः पतङ्गस्य मुखम्' इति। आङो दो।।20।।

(136. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 7)

168. क्रीडोऽनुसम्परिभ्यश्च 1.3.21

अनिष्टवारणाधिकरणम्

(910. आक्षेपवार्त्तिकम्- 1)

*** उपसर्गग्रहणम् ***

भाष्यम्– उपसर्गग्रहणं कर्तव्यम्। इह मा भूत्—'अनु क्रीडति माणवकम्' इति।

(911. आक्षेपवार्त्तिकम्- 2)

*** समोऽकूजने ***

भाष्यम्– समोऽकूजन इति वक्तव्यम्। इह मा भूत्—संक्रीडन्ति शकटानि।

न्यूनतापूरणाधिकरणम्

(912. आक्षेपवार्त्तिकम्- 3)

*** आगमेः क्षमायाम् ***

भाष्यम्– आगमेः क्षमायामुपसंख्यानं कर्तव्यम्। माणवक आगमयस्व तावत्।

(913. आक्षेपवार्त्तिकम्- 4)

*** शिक्षेर्जिज्ञासायाम् ***

भाष्यम्– शिक्षेर्जिज्ञासायामुपसंख्यानं कर्तव्यम्। विद्यासु शिक्षते धनुषि शिक्षते धनुषि शिक्षते।

(914. आक्षेपवार्त्तिकम्- 5)

*** किरतेर्हर्षजीविकाकुलायकरणेषु ***

भाष्यम्– किरतेर्हर्षजीविकाकुलायकरणेषुपसंख्यानं कर्तव्यम्। अपस्किरते वृषो हृष्टः। अपस्किरते कुक्कुटो भक्षार्थी। अपस्किरते श्वा आश्रयार्थी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(915. आक्षेपवार्त्तिकम्-6)

*** हरतेर्गतताच्छील्ये ***

भाष्यम्– हरतेर्गतताच्छील्ये उपसंख्यानं कर्तव्यम्। पैतृकमश्वा अनुहरन्ते। मातृकं गावोऽनुहरन्ते।

(916. आक्षेपवार्त्तिकम्-7)

*** आशिषि नाथः ***

भाष्यम्– आशिषि नाथ उपसंख्यानं कर्तव्यम्। सर्पिषो नाथते मधुनो नाथते।

(917. आक्षेपवार्त्तिकम्-8)

*** आङि नुप्रच्छ्योः ***

भाष्यम्– आङि नुप्रच्छ्योरुपसंख्यानं कर्तव्यम्। आनुते शृगालः। आपृच्छते गुरुमिति।

(918. आक्षेपवार्त्तिकम्-9)

*** शप उपलम्भने ***

भाष्यम्– शप उपलम्भन उपसंख्यानं कर्तव्यम्। देवदत्ताय शपते। यज्ञदत्ताय शपते। क्रीडोनु।।21।।

(137. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 8)

169. समवप्रविभ्यः स्थः 1.3.22

(919. आक्षेपवार्त्तिकम्-1)

*** आङः स्थः प्रतिज्ञाने ***

भाष्यम्– आङः स्थः प्रतिज्ञान इति वक्तव्यम्। अस्तिं सकारमातिष्ठते। आगमौ गुणवृद्धी आतिष्ठते। विकारौ गुणवृद्धी आतिष्ठते। समव।।22।।

(138. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 9)

171 उदोनूर्ध्वकर्मणि 1.3.24

(920. आक्षेपवार्त्तिकम्-1)

*** उद ईहायाम् ***

भाष्यम्– उद ईहायामिति वक्तव्यम्। इह मा भूत्—उत्तिष्ठति सेनेति।। उदः।।24।।

(139. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 10)

172. उपान्मन्त्रकरणे 1.3.25

(921. आक्षेपवार्त्तिकम्-1)

*** उपाद्देवपूजासंगतकरणयोः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– उपाद्देवपूजासङ्गतकरणयोरिति वक्तव्यम्। आदित्यमुपतिष्ठते। चन्द्रमसमुपतिष्ठते। सङ्गतकरणे—रथिकानुपतिष्ठते। अश्वारोहानुपतिष्ठन्ते।

बहूनामप्यचित्तानामेको भवति चित्तवान्।
पश्य वानरसैन्येऽस्मिन्यदर्कमुपतिष्ठते।।1।।
मैवं मंस्थाः सचित्तोयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति।।2।।

न्यासान्तरप्रदर्शकभाष्यम्– उपर आह—

(वार्त्तिकन्यासान्तरम्)

*** उपाद्देवपूजासङ्गतकरणमित्रकरणपथिषु ***

भाष्यम्– उपाद्देवपूजासङ्गतकरणमित्रकरणपथिष्विति वक्तव्यम्। देवपूजासङ्गतकरणयोरुदाहृतम्। मित्रकरणे—रथिकानुपतिष्ठते, अश्वारोहानुपतिष्ठते। पथिषु—अयं पन्थाः स्रुघ्नमुपतिष्ठते, अयं पन्थाः साकेतमुपतिष्ठते।

(922. **आक्षेपवार्त्तिकम्**-2)

*** वा लिप्सायाम् ***

भाष्यम्– वा लिप्सायामिति वक्तव्यम्। भिक्षुको ब्राह्मणकुलमुपतिष्ठते। भिक्षुको ब्राह्मणकुलमुपतिष्ठति। उपान्मन्त्रक।।25।।

(140. **आत्मनेपदनियमसूत्रम्** 1.3.2 आ. 11)

174. उद्विभ्यां तपः 1.3.27

भाष्यम्– अकर्मकादित्येव। (इह मा भूत्—) उत्तपति सुवर्णं सुवर्णकारः।

(923. **आक्षेपवार्त्तिकम्**-1)

*** स्वाङ्गकर्मकाच्च ***

भाष्यम्– स्वाङ्गकर्मकाच्चेति वक्तव्यम्। उत्तपते पाणी, वितपते पाणी। उत्तपते पृष्ठम्, वितपते पृष्ठम्।

आक्षेपभाष्यम्– अथोद्विभ्यामित्यत्र किं प्रत्युदाह्रियते?

नियमपक्षवादिसमाधानभाष्यम्– निष्टप्यते इति।

विधिपक्षवाद्याक्षेपभाष्यम्– किं पुनः कारणमात्मनेपदमेवोदाह्रियते, न पुनः परस्मैपदं प्रत्युदाहार्यं स्यात्?

नियमपक्षवादिसमाधानभाष्यम्– तपिरयमकर्मकः। अकर्मकाश्चापि सोपसर्गाः सकर्मका भवन्ति। न चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्ति।

समाधानबाधकविधिपक्षवादिभाष्यम्– यदुच्यते—चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्तीति। अन्तरेणापि कर्मकर्तारं सकर्मका अकर्मका भवन्ति। तद्यथा—नदी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहतीत्यकर्मकः, भारं वहतीति सकर्मकः। तस्मान्निष्टपतीति प्रत्युदाहार्यम्।।27।। उद्विभ्याम्।

(141. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 12)

175. आङो यमहनः 1.3.28

भाष्यम्– अकर्मकादित्येव। इह मा भूत्—आयच्छति रज्जुं कूपात्। आहन्ति वृषलं पादेन।

(924. आक्षेपवार्त्तिकम्-1)

* स्वाङ्गकर्मकाच्च *

भाष्यम्– स्वाङ्गकर्मकाच्चेति वक्तव्यम्। आयच्छते पाणी। आहते उदरमिति। आङो यमहनः।।28।।

(142. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 13)

176. समो गम्यृच्छिभ्याम् 1.3.29

(925. आक्षेपवार्त्तिकम्-1)

* समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम् *

भाष्यम्– समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं कर्तव्यम्। संवित्ते। संपृच्छते। संस्वरते।

(926. आक्षेपवार्त्तिकम्-2)

* अर्तिश्रुदृशिभ्यश्च *

भाष्यम्– अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम। अर्ति—मा समृत। मा समृषाताम्। मा समृषत। अर्ति। श्रु—संशृणुते। दृशि—सम्पश्यते।

(927. आक्षेपवार्त्तिकम्-3)

* उपसर्गादस्यत्यूह्योर्वावचनम् *

भाष्यम्– उपसर्गादस्यत्यूह्योर्वेति वक्तव्यम्। निरस्यति निरस्यते। समूहति। समूहते। समो.।।29।।

(143. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 14)

177. आङ उद्गमने 1.3.40

(928. आक्षेपवार्त्तिकम्-1)

* ज्योतिषामुद्गमने *

भाष्यम्– ज्योतिरुद्गमने इति वक्तव्यम्। इह मा भूत्—आक्रामति धूमो हर्म्यतलादिति। आङ.।।40।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(144. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 15)

195. व्यक्तवाचां समुच्चारणे 1.3.48

व्यक्तवाक्पदार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– व्यक्तवाचामिति किमर्थम्?

समाधानभाष्यम्– 'वरतनु सम्प्रवदन्ति कुक्कुटाः।'

समाधानबाधकभाष्यम्– व्यक्तवाचामित्युच्यमानेप्यत्र प्राप्नोति। एतेऽपि हि व्यक्तवाचः। आतश्च व्यक्तवाचः। कुक्कुटेनोदिते उच्यते—कुक्कुटो वदतीति।

समाधानसाधकभाष्यम्– एवं तर्हि 'व्यक्तवाचाम्' इत्युच्यते। सर्व एव हि व्यक्तवाचः। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो ये व्यक्तवाच इति। के च साधीयः? येषां वाच्यकारादयो वर्णाः व्यज्यन्ते। न चैतेषां वाच्यकारादयो वर्णा व्यज्यन्ते।

समाधानबाधकभाष्यम्– एतेषामपि वाच्यकारादयो वर्णा व्यज्यन्ते। आतश्च व्यज्यन्ते। एवं ह्याहुः कुक्कुटाः कुकूडिति।

समाधानसाधकभाष्यम्– नैवं ते आहुः। अनुकरणमेतत्तेषाम्। अथवा नैवं विज्ञायते—व्यक्ता वाग्येषां त इमे व्यक्तवाच इति। कथं तर्हि? व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाच इति। व्यक्तवाचां।।48।।

(145. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 16)

198. अवाद् ग्रः 1.3.51

(929. आक्षेपवार्त्तिकम्-1)

*** अवाद् ग्रो गिरतेः ***

भाष्यम्– अवाद् ग्र इत्यत्र गिरतेरिति वक्तव्यम्। गृणातेर्मा भूत्।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

(930. आक्षेपबाधकवार्त्तिकम्-2)

*** न वा प्रयोगाभावात् ***

भाष्यम्– न (वा) वक्तव्यम्। प्रयोगाभावात्। 'अवाद् ग्र' इत्युच्यते। न चावपूर्वस्य गृणातेः प्रयोगोऽस्ति। अवाद् ग्रः।।51।।

(146. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 17)

201 समस्तृतीयायुक्तात् 1.3.54

आक्षेपभाष्यम्– तृतीयायुक्तादिति किमर्थम्?

समाधानभाष्यम्– 'उभौ लोकौ सञ्चरसीमं चामुं च देवल'।

समाधानबाधकभाष्यम्– तृतयायुक्तादित्युच्यमानेप्यत्र प्राप्नोति। अत्रापि हि तृतीयया योग इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानसाधकभाष्यम्– एवं तर्हि तृतीयायुक्तादित्युच्यते। सर्वत्र च तृतीयया योगः। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो यत्र तृतीया योग इति। क्व च साधीयः? यत्र तृतीया श्रूयते।। समस्तृ.।।54।।

(147. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 18)

202. दाणश्च सा चेच्चतुर्थ्यर्थे 1.3.55

तृतीयोपपादनाधिकरणम्

आक्षेपभाष्यम्– 'सा चेत्तृतीया चतुर्थ्यर्थे' इत्युच्यते। कथं नाम तृतीया चतुर्थ्यर्थे स्यात्?

समाधानभाष्यम्– एवं तर्हि—

(931. सिद्धान्तवार्त्तिकम्-1)

*** अशिष्टव्यवहारे तु तृतीया च विधीयते ***

भाष्यम्– किं च? आत्मनेपदं च। अशिष्टव्यवहारेनेन तृतीया च विधीयत आत्मनेपदं च। दास्या सम्प्रयच्छते वृषल्या सम्प्रयच्छते। यः शिष्टव्यवहारः ब्राह्मणीभ्यः सम्प्रयच्छतीत्येव तत्र भवितव्यम्।

पूर्वपक्षिप्रत्याख्यानभाष्यम्– यद्येवं नार्थोऽनेन।

आक्षेपभाष्यम्– केनेदानीं तृतीया भविष्यति, आत्मनेपदं च?

(932. पूर्वपक्षिसमाधानवार्त्तिकम्-2)

*** सहयुक्ते तृतीया स्याद् व्यतिहारे तङो विधिः ***

भाष्यम्– 'सहयुक्तेऽप्रधाने' इत्येव तृतीया भविष्यति, 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्। दाणश्च।।55।।

(127. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 19)

203. उपाद्यमः स्वकरणे 1.3.56

स्वकरणशब्दार्थनिरूपणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति। स्वं शाटकान्तमुपयच्छति—इति?

समाधानभाष्यम्– अस्वं यदा स्वं करोति तदा भवितव्यम्।

आक्षेपभाष्यम्– यद्येवं स्वीकरणमिति प्राप्नोति।

समाधानभाष्यम्– विचित्रास्तद्धितवृत्तयः। नातस्तद्धित उत्पद्यते। उपाद्यमः स्वकरणे।।56।।

(149. आत्मनेपदनियमबाधकसूत्रम् 1.3.2 आ. 20)

205. नानोर्ज्ञः 1.3.58

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिषेधविषयनिर्णयाधिकरणम्

(933. आक्षेपवार्त्तिकम्-1)

*** अनोर्ज्ञ: प्रतिषेधे सकर्मकवचनम् ***

भाष्यम्– अनोर्ज्ञ: प्रतिषेधे सकर्मकग्रहणं कर्तव्यम्। इह मा भूत्—'औषधस्यानुजिज्ञासते' इति।

(934. समाधानवार्त्तिकम्-2)

*** न वाऽकर्मकस्योत्तरेण विधानात् ***

व्याख्याभाष्यम्– न वा कर्तव्यम्। किं कारणम्? अकर्मकस्योत्तरेण विधानात्। अकर्मकाज्जानातेरुत्तरेण योगे नात्मनेपदं विधीयते 'पूर्ववत्सन:' इति।

(935. समाधानान्तरवार्त्तिकम्-3)

*** प्रतिषेध: पूर्वस्य च ***

व्याख्याभाष्यम्– पूर्वस्य चायं प्रतिषेध:। स च सकर्मकार्थ आरम्भ:।

आक्षेपभाष्यम्– कथं पुनर्ज्ञायते—पूर्वस्यायं प्रतिषेध इति?

समाधानभाष्यम्– अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति।

आक्षेपभाष्यम्– कथं पुनर्ज्ञायते—सकर्मकार्थ आरम्भ इति?

समाधानभाष्यम्– अकर्मकाज्जानाते: सन आत्मनेपदवचने प्रयोजनं नास्तीति कृत्वा सकर्मकार्थो विज्ञायते। नानोर्ज्ञ:।।58।।

(150. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 21)

207. शदे: शित: 1.3.60

अनुपपत्तिपरिहाराधिकरणम्

(936. आक्षेपवार्त्तिकम्-1)

*** शदे: शित: परस्मैपदाश्रयत्वादात्मनेपदाभाव: ***

व्याख्याभाष्यम्– शदे: शित: परस्मैपदाश्रयत्वादात्मनेपदस्याभाव:। शीयते शीयेते शीयन्ते।

प्रत्याक्षेपभाष्यम्– किं च भो: शदे: शित्परस्मैपदेष्वित्युच्यते?

प्रत्याक्षेपबाधकभाष्यम्– न खलु 'परस्मैपदेषु' इत्युच्यते, परस्मैपदेषु तु विज्ञायते। कथम्? 'अनुदात्तङित आत्मनेपदम्' 'भावकर्मणोरात्मनेपदम्' इत्येतौ द्वौ योगावुक्त्वा 'शेषात्कर्तरि परस्मैपदम्' इत्युच्यते। एवं च न परस्मैपदेषूच्यते, परस्मैपदेषु विज्ञायते।

आक्षेपबाधकभाष्यम्– क: पुनरर्हत्येतौ योगावुक्त्वा शेषात्कर्तरि परस्मैपदं वक्तुम्। किं तर्हि? अविशेषेण सर्वमात्मनेपदप्रकरणमनुक्रम्य 'शेषात्कर्तरि परस्मैपदम्' इत्युच्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपसाधकभाष्यम्– एवमपि परस्मैपदाश्रयो भवति। कथम्? इदं तावदयं प्रष्टव्यः—यदीदं नोच्येत किमिह स्यादिति। परस्मैपदमित्याह। परस्मैपदमिति चेत्परस्मैपदाश्रयो भवति।

(937. **समाधानवार्त्तिकम्-2**)

* सिद्धं तु लडादीनामात्मनेपदवचनात् *

भाष्यम्– सिद्धमेतत्। कथम्? 'शदेर्लडादीनामात्मनेपदं भवति' इति वक्तव्यम्।

आक्षेपभाष्यम्– सिद्ध्यति। सूत्रं तर्हि भिद्यते।

समाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः' इति।

समाधानभाष्यम्– नैष दोषः। शित इति नैषा पञ्चमी। का तर्हि? सम्बन्धे षष्ठी—शितो यः शदिः। कश्च शितः शदिः? प्रकृतिः। शदेः शित्प्रकृतेरिति।

समाधानान्तरभाष्यम्– अथवाऽऽहायं 'शदेः शितः' इति। न च शदिः शिदस्ति। त एवं विज्ञास्यामः—शदेः शिद्विषयादिति।

समाधानान्तरभाष्यम्—अथवा यद्यपि तावदेतदन्यत्र भवति 'विकरणेभ्यो नियमो बलीयान्' इति। इहतन्नास्ति। विकरणो हीहाश्रीयते 'शितः' इति।

अड्व्यवायेऽपि नियमप्रवृत्तिसाधनाधिकरणम्

(938. **आक्षेपवार्त्तिकम्-3**)

* उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानम् *

भाष्यम्– उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानं कर्तव्यम्। न्यविशत व्यक्रीणीत। किं पुनः कारणं न सिद्ध्यति? अटा व्यवहितत्वात्।

आक्षेपबाधकभाष्यम्– ननु चायमड् धातुभक्तो धातुग्रहणेन ग्रहीष्यते।

आक्षेपसाधकभाष्यम्– न सिध्यति। अङ्गस्य ह्यडुच्यते, विकरणान्तं चाङ्गम्, सोसौ सङ्घातभक्तो न शक्यो धातुग्रहणेन ग्रहीतुम्।

आक्षेपबाधकभाष्यम्– एवं तर्हीदमिह सम्प्रधार्यम्—अट् क्रियतां विकरण इति। किमत्र कर्तव्यम्? परत्वादडागमः।

आक्षेपसाधकभाष्यम्– नित्या विकरणाः। कृतेप्यटि प्राप्नुवन्त्यकृतेऽपि।

आक्षेपबाधकभाष्यम्– अडपि नित्यः। कृतेष्वपि विकरणेषु प्राप्नोत्यकृतेष्वपि प्राप्नोति।

आक्षेपसाधकभाष्यम्– अनित्योट्। अन्यस्य कृतेषु विकरणेषु प्राप्नोत्यन्यस्याकृतेषु। 'शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति'।

आक्षेपबाधकभाष्यम्– एवं तर्हीदमिह सम्प्रधार्यम्—अट् क्रियताम्, लादेश इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमत्र कर्तव्यम्। परत्वादडागमः। नित्यो लादेशः। कृतेप्यटि प्राप्नोत्यकृतेऽपि प्राप्नोति। नित्यत्वाल्लादेशस्यात्मनेपद एवाडागमो भविष्यति।

(939. आक्षेपसाधकवार्त्तिकम्- 4)

*** नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदटो नित्यनिमित्तत्वादात्मनेपदाभावः** (तस्मादुपसंख्यानम्) *

भाष्यम्– नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदेवमुच्यते—अडपि नित्यनिमित्तः कृतेऽपि लादेशे प्राप्नोत्यकृतेऽपि प्राप्नोति। अटो नित्यनिमित्तत्वादात्मनेपदस्याभावः। तस्मादुपसंख्यानम्। तस्मादुपसंख्यानं कर्तव्यम्।

आक्षेपबाधकभाष्यम्– अन्तरङ्गस्तर्हि लादेशः।

आक्षेपसाधकभाष्यम्– नैतद्विवदामहे—अन्तरङ्गो नान्तरङ्ग इति। अस्त्वयं नित्यश्चान्तरङ्गश्च। अत्र खलु लादेशे कृते त्रीणि कार्याणि युगपत् प्राप्नुवन्ति—विकरणाः, अडागमः, नियम इति। तद्यदि सर्वतो नियमो लभ्येत कृतं स्यात्, तत्तु न लभ्यम्। अथापि विकरणात्पूर्वमडिति अड् लभ्येत, एवमपि कृतं स्यात्। तत्तु न लभ्यम्। किं कारणम्? आङ्गात्पूर्वं विकरणा एषितव्यास्तरतस्तरन्तीत्येवमर्थम्। अडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपार्च्छदित्येवमर्थम्। तत्र ह्याटि कृते साट्कस्य ऋच्छिभावः प्राप्नोति।

आक्षेपबाधकभाष्यम्– ननु च ऋच्छिभावे कृते शब्दान्तरस्याकृत आडिति कृत्वा पुनराड् भविष्यति।

आक्षेपसाधकभाष्यम्– पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। यत्तावदुच्यते—आङ्गात्पूर्वं विकरणा एषितव्याः तरतः तरन्तीत्येवमर्थमिति। भवेत्सिद्धं यत्र विकरणा नित्या आङ्गमनित्यं तत्राङ्गात्पूर्वं विकरणाः स्युः। यत्र तु खलूभयं नित्यं परत्वात्तत्राङ्गं तावद्भवति।

यदप्युच्यते—अडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपार्च्छदित्येवमर्थमिति। अस्त्वत्राट्, आटि कृते साट्कस्य ऋच्छिभावः। ऋच्छिभावे कृते शब्दान्तरस्याकृत आडिति कृत्वा पुनराड् भविष्यति।

आक्षेपान्तरस्मारकभाष्यम्– ननु चोक्तम्—पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोतीति।

समाधानभाष्यम्– नैष दोषः। चक्रकेष्विष्टतो व्यवस्था।

सिद्धान्तिसमाधानान्तरभाष्यम्– अथवा नेरिति नैषा पञ्चमी। का तर्हि? विशेषणषष्ठी नेर्यो विशिः। कश्च नेर्विशिः? विशेष्यः। व्यवहितश्चापि शक्यते विशेषयितुम्।

सिद्धान्तिसमाधानान्तरभाष्यम्—अथवा निरपि पदं विशिरपि पदम्। पदविधिश्च समर्थानाम्। व्यवहितेऽपि सामर्थ्यं भवति। शदेः शितः।।60।।

(151. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 22)

209. पूर्ववत्सनः 1.3.62

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वत्वावधिनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमिदं पूर्वग्रहणं सनपेक्षम्—प्राक् सनो येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योऽपि भवतीति। आहोस्विद् योगापेक्षम्—प्रागेतस्माद्योगाद्येभ्यो योगेभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योऽपि भवतीति। किं चातः? यदि सनपेक्षम्, निमित्तमविशेषितं भवति 'पूर्ववत्सनः' न ज्ञायये—किमन्ताद्भवितव्यमिति। अथ योगापेक्षम्, उत्तरत्र विधिर्न प्रकल्पेत—बुभुक्षते उपयुयुक्षत इति।

समाधानभाष्यम्– यथेच्छसि तथास्तु।

सन्नपेक्षाभ्युपगमभाष्यम्– अस्तु तावत्सनपेक्षम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—निमित्तमविशेषितं भवतीति।

समाधानभाष्यम्– निमित्तं च विशेषितम्। कथम्। सनमेवात्र निमित्तत्वेनापेक्षिष्यामहे। पूर्ववत्सन आत्मनेपदं भवति। कुतः? सन इति।

योगापेक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु योगापेक्षम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—उत्तरत्र विधिर्न प्रकल्पेतेति।

समाधानभाष्यम्– विधिश्च प्रक्लृप्तः। कथम्? उत्तरत्रापि 'पूर्ववत्सन' इत्येवानुवर्तिष्यते।

विधिपक्षस्थापनाधिकरण आक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

(940. **समाधानवार्त्तिकपूर्वखण्डम्**-1)

* पूर्ववत्सन इति शदिम्रियत्यर्थम् *

भाष्यम्– शदिम्रियत्यर्थोऽयमारम्भः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं मा भूदिति।

(941. **समाधानसाधकवार्त्तिकपरखण्डम्**-2)

* इतरथा हि ताभ्यां सन्नन्ताभ्यामात्मनेपदप्रतिषेधः *

भाष्यम्– इतरथा हि अनुच्यमानेऽस्मिन् शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधो वक्तव्यः स्यात्। शिशत्सति। मुमूर्षति।

आक्षेपभाष्यम्– कथं पुनः 'पूर्ववत्सनः' इत्यनेन शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधः शक्यो विज्ञातुम्?

समाधानभाष्यम्– वतिनिर्देशोऽयम्। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम्। तद्यथा—'उशीनरवन्मद्रेषु यवाः' सन्ति, न सन्तीति। 'मातृवदस्याः कलाः' सन्ति, न सन्तीति। एवमिहापि पूर्ववद्भवति, न भवतीति। न भवतीत्येवं वाक्यशेषं समर्थयिष्यामहे—यथा पूर्वयोर्योगयोः सन्नन्ताभ्यामात्मनेपदं न भवति, एवमिहापि शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं न भवतीति।

आक्षेपभाष्यम्– यदि तर्हि शदिम्रियत्यर्थोऽयमारम्भः, विधिर्न प्रकल्पते—आसिसिषते। शिशयिषते। अथ विध्यर्थः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति।

समाधानभाष्यम्– यथेच्छसि तथास्तु।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिषेधार्थताभ्युपगमभाष्यम्– अस्तु तावत्प्रतिषेधार्थः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—विधिर्न प्रकल्पते—इति।

समाधानभाष्यम्– विधिश्च प्रक्लृप्तः। कथम्? एतदेव ज्ञापयति—सन्नन्तादात्मनेपदं भवतीति। यदयं शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधं शास्ति।

विध्यर्थताभ्युपगमभाष्यम्– अथवा पुनरस्तु विध्यर्थः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्– शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति—इति।

समाधानभाष्यम्– नैष दोषः। प्रकृतं 'सनो न' इत्यनुवर्तिष्यते। क्व प्रकृतम्? 'ज्ञाश्रुस्मृदृशां सनः'। 'नानोर्ज्ञः' सकर्मकात्सनो न भवति। 'प्रत्याङ्भ्यां श्रुवः' सनो न। 'शदेः शितः' सनो न। 'म्रियतेर्लुङ्लिङोश्च' सनो नेति। इहेदानीं 'पूर्ववत्सन इति सन इत्यनुवर्तते, नेति निवृत्तम्। एवं च कृत्वा सोप्यदोषो भवति, यदुक्तम्—निमित्तमविशेषितं भवतीति। नैव वा पुनरत्र शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति। किं कारणम्? 'शदेः शितः' इत्युच्यते। न च शदिरेवात्मनेपदस्य निमित्तम्। किं तर्हि? शिदपि निमित्तम्। अथापि शदिरेव शित्परस्तु निमित्तम्। न चायं सन्परः शित्परो भवति।

आक्षेपभाष्यम्– यत्र तर्हि शिन्नाश्रीयते 'म्रियतेर्लुङ्लिङोश्च' इति।

समाधानभाष्यम्– अत्रापि न म्रियतिरेवात्मनेपदस्य निमित्तम्। किं तर्हि? लुङ्लिङावपि निमित्तम्। अथापि म्रियतिरेव लुङ्लिङ्परस्तु निमित्तम्। न चायं सन्परः लुङ्लिङ्परो भवति।

कार्यातिदेशस्थापनाधिकरणम्

आक्षेपभाष्यम्– किं पुनः पूर्वस्य यदात्मनेपददर्शनं तत्सन्नन्तस्यातिदिश्यते?

इष्टापत्तिभाष्यम्– एवं भवितुमर्हति।

(942. **आक्षेपवार्त्तिकम्**- 3)

*** पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेद्गुपादिष्वप्रसिद्धिः ***

भाष्यम्– पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदं भवतीति चेद् गुपादिष्वप्रसिद्धिः। गुपादीनां न प्राप्नोति। जुगुप्सते मीमांसत इति। न ह्येतेभ्यः प्राक्सन आत्मनेपदं नापि परस्मैपदं पश्यामः।

(943. **समाधानवार्त्तिकम्**- 4)

*** सिद्धं तु पूर्वस्य लिङ्गातिदेशात् ***

भाष्यम्– सिद्धमेतत्। कथम्? पूर्वस्य यदात्मनेपदलिङ्गं तत्सन्नन्तस्याप्यतिदिश्यते।

(944. **दूषणाक्षेपवार्त्तिकम्**- 5)

*** कृञादिषु तु लिङ्गप्रतिषेधः ***

भाष्यम्– कृञादिषु तु लिङ्गस्य प्रतिषेधो वक्तव्यः। अनुचिकीर्षति पराचिकीर्षतीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यातिदेशपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि—प्राक्सनो येभ्य आत्मनेपदं दृष्टं तेभ्यः सन्नन्तेभ्योऽपि भवतीति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं 'पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेद्गुपादिष्वप्रसिद्धिः' इति।

समाधानभाष्यम्– नैष दोषः। अनुबन्धकरणसामर्थ्याद्भविर्ष्यति।

समाधानान्तरभाष्यम्– अथवा—अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। तद्यथा—गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति।

आक्षेपभाष्यम्– यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति जुगुप्सयति मीमांसयतीत्यत्रापि प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति? यं समुदायं योवयवो न व्यभिचरति। सनं च न व्यभिचरति। णिचं च पुनर्व्यभिचरति तद्यथा—गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य।

इष्टानुपपत्तिपरिहाराधिकरणम्

(945. न्यासान्तरवार्त्तिकम्-6)

*** प्रत्ययग्रहणं णियगर्थम् ***

भाष्यम्– प्रत्ययग्रहणं कर्तव्यम्। पूर्ववत्प्रत्ययादिति वक्तव्यम्। किं प्रयोजनम्? णियगर्थम्। णियगन्तादपि यथा स्यादिति। आकुस्मयते विकुस्मयते हृणीयते महीयते इति।

न्यासान्तरं द्रढयितुमाक्षेपभाष्यम्– तत्र को दोषः?

(946. समाधानवार्त्तिकम्-7)

*** तत्र हेतुमण्णिचः प्रतिषेधः ***

भाष्यम्– तत्र हेतुमण्णिचः प्रतिषेधो वक्तव्यः। आसयति शाययतीति।

ब्रह्मयज्ञविकृतिदोषप्रदर्शकभाष्यम्– सूत्रं च भिद्यते।

सिद्धान्तिभाष्यम्– यथान्यासमेवास्तु।

आक्षेपभाष्यम्– कथम्—आकुस्मयते विकुस्मयते हृणीयते महीयते इति?

समाधानभाष्यम्– अनुबन्धकरणसामर्थ्याद्भविष्यति।

समाधानान्तरभाष्यम्– अथवा—अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। तद्यथा—गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति।

समाधानबाधकभाष्यम्– अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति, हृणीयति महीययतीत्यत्रापि प्राप्नोति।

समाधानसाधकभाष्यम्– अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति? यं समुदायं योऽवयवो न व्यभिचरति। यकं च न व्यभिचरति, णिचं तु व्यभिचरति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यथा—गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य। पूर्ववत्सनः।।62।।

(152. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 23)

210. आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य 1.2.63

कृञितिप्रत्याहाराश्रयणाधिकरणम्

आक्षेपभाष्यम्– कृञ्ग्रहणं किमर्थम्?

समाधानभाष्यम्– इह मा भूत्—ईहामास ईहामासतुः ईहामासुः।

आक्षेपभाष्यम्– कथं चात्रास्तेरनुप्रयोगो भवति?

समाधानभाष्यम्– प्रत्याहारग्रहणं हि तत्र विज्ञायते।

आक्षेपभाष्यम्– कथं पुनर्विज्ञायते तत्र प्रत्याहारग्रहणमिति?

समाधानभाष्यम्– इह कृञ्ग्रहणात्।

आक्षेपभाष्यम्– इह कस्मात्प्रत्याहारग्रहणं न भवति?

समाधानभाष्यम्– इहैव कृञ्ग्रणात्।

आक्षेपभाष्यम्– अथेह कस्मान्न भवति—उदुम्भाञ्चकार। उदुब्जाञ्चकार?

आक्षेपबाधकभाष्यम्– ननु च 'आम्प्रत्ययवद्' इत्युच्यते, न चात्राम्प्रत्ययादात्मनेपदं पश्यामः।

आक्षेपसाधकभाष्यम्– न ब्रूमोऽनेनेति। किं तर्हि? स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति।

समाधानभाष्यम्– नैष दोषः। इदं नियमार्थं भविष्यति आम्प्रत्ययवदेवेति।

आक्षेपभाष्यम्– यदि नियमार्थम्, विधिर्न प्रकल्पते—ईहांचक्रे ऊहांचक्रे इति।

समाधानभाष्यम्– विविधश्च प्रक्लृप्तः। कथम्? पूर्ववदिति वर्तते। आम्प्रत्ययवत्पूर्ववच्चेति। आम्प्रत्यय०।।63।।

(153. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 24)

211. प्रोपाभ्यां युजेरयज्ञपात्रेषु 1.3.64

(947. आक्षेपवार्त्तिकम्-1)

*** स्वराद्युपसृष्टात् ***

भाष्यम्– स्वराद्युपसृष्टादिति वक्तव्यम्। उद्युङ्क्ते। अनुयुङ्क्ते।

भाष्यम्– अपर आह—

(न्यासान्तरम्)

*** स्वराद्यन्तोपसृष्टात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– स्वराद्यन्तोपसृष्टादिति वक्तव्यम् प्रयुङ्क्ते। नियुङ्क्ते। विनियुङ्क्ते। प्रोपाभ्याम्।।64।।

(154. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 25)

212. समः क्ष्णुवः 1.3.65

आक्षेपभाष्यम्– किमर्थं विदेशस्थस्य ग्रहणं क्रियते, न 'समो गमादिष्वित्येवोच्येत?

(948. समाधानवार्त्तिकम्-1)

*** समः क्ष्णुवः सकर्मकार्थम् ***

भाष्यम्– सकर्मकार्थोऽयमारम्भः। अकर्मकादिति तत्रानुवर्तते।। समः।।65।।

(155. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 26)

213. भुजोनवने 1.3.66

(949. आक्षेपवार्त्तिकम्-1)

*** अनवनकौटिल्ययोः ***

भाष्यम्– अनवनकौटिल्ययोरिति वक्तव्यम्। इहापि यथा स्यात्—प्रभुजति वाससी निभुजति जानुशिरसी इति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। यस्य भुजेरवनमनवनं चार्थस्तस्य ग्रहणम्। न चास्य भुजेरवनमनवनं चार्थः। भुजोनवने।।66।।

(156. आत्मनेपदनियमसूत्रम् 1.3.2 आ. 27)

214. णेरणौ यत्कर्म णौ चेत्स कर्ता नाध्याने 1.3.67

अणिकर्मण एव णौ कर्मत्वविवक्षाधिकरणम्

(950. आक्षेपवार्त्तिकम्-1)

*** णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धिः ***

भाष्यम्– णेरात्मनेपदविधानेऽण्यन्तस्य यत्कर्म यदा ण्यन्ते तदेव कर्म भवति तदा आत्मनेपदं भवतीति वक्तव्यम्।

(951. आक्षेपसाधकवार्त्तिकम्-2)

*** इतरथा हि सर्वप्रसङ्गः ***

भाष्यम्– इतरथा हि सर्वत्र प्रसङ्गः स्यात्। इहापि प्रसज्येत—आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान्।

तटस्थाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्।

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। एवं वक्ष्यामि—'णेः' आत्मनेपदं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः 'अणौ यत्कर्म णौ चेत्' अण्यन्ते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति। ततः 'स कर्ता' कर्ता चेत्स भवति णाविति।

सूत्रप्रत्याख्यानाधिकरणम्

सूत्रप्रत्याख्यानभाष्यम्– यद्येवं कर्मकर्ताऽयं भवति। तत्र कर्मकर्तृत्वात्सिद्धम्।

(952. **सूत्रारम्भसाधकवार्त्तिकम्**- 3)

*** कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम् ***

भाष्यम्– कर्मकर्तृत्वात्सिद्धमिति चेद् यक्चिणोर्निवृत्त्यर्थमिदं वक्तव्यम्। कर्मापदिष्टौ यक्चिणौ मा भूतामिति।

(953. **सूत्रारम्भबाधकवार्त्तिकम्**- 4)

*** न वा यक्चिणोः प्रतिषेधात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? यक्चिणोः प्रतिषेधात्। प्रतिषिद्ध्येते अत्र यक्चिणौ 'यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्' इति।

सूत्रारम्भसाधकभाष्यम्– यस्तर्हि न हेतुमण्णिच्, तदर्थमिदं वक्तव्यम्। तस्य कर्मापदिष्टौ यक्चिणौ मा भूतामिति। उदपुपुच्छत पुच्छं स्वयमेव।

सूत्रारम्भबाधकभाष्यम्– अत्रापि यथा भारद्वाजीयाः पठन्ति तथा भवितव्यं प्रतिषेधेन 'यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्' इति।

प्रतिषेधावश्यकताभाष्यम्– स चावश्यं प्रतिषेध आश्रयितव्यः।

(954. **अन्यथानुपपत्तिवार्त्तिकम्**- 5)

*** इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः ***

भाष्यम्– अनुच्यमाने ह्येतस्मिन्यत्र नियमस्ततोऽन्यत्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्। गणयति गणं गोपालकः। गणयति गणः स्वयमेव।

(955. **अन्यथानुपपत्तिशेषवार्त्तिकम्**- 6)

*** आत्मनेपदस्य च ***

भाष्यम्– आत्मनेपदस्य च प्रतिषेधो वक्तव्यः। गणयति गणः स्वयमेव।

(956. **सूत्रारम्भसाधकवार्त्तिकम्**- 7)

*** आत्मनेपदप्रतिषेधार्थं तु ***

भाष्यम्– आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यम्। गणयति गणः स्वयमेव।

प्रत्याख्यानसाधकभाष्यम्– इष्यत एवात्रात्मनेपदम्।

आक्षेपभाष्यम्– किमिष्यत एव, आहोस्वित्प्राप्नोत्यपि?

समाधानभाष्यम्– इष्यते च, प्राप्नोति च। कथम्? अणाविति कस्येदं णेर्ग्रहणं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्माण्णेः प्राक्कर्म वा कर्ता वा विद्यते। न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते।

सूत्रसाधकभाष्यम्– इदं तर्हि प्रयोजनम्—अनाध्यान इति वक्ष्यामीति। इह मा भूत्—स्मरति वनगुल्मस्य कोकिलः। स्मरयत्येनं वनगुल्मः स्वयमेवेति।

प्रयोजननिराकरणभाष्यम्– एतदपि नास्ति प्रयोजनम्। कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति। कर्तृस्थभावकश्चायम्।

सूत्रसाधकभाष्यम्– एवं तर्हि सिद्धे सति यदनाध्यान इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः—'भवत्येवञ्जातीयकानामात्मनेपदमिति। किमेतस्य ज्ञापने प्रयोजनम्? पश्यन्ति भृत्या राजानम्। दर्शयते भृत्यान् राजा' अत्रात्मनेपदं सिद्धं भवति।

(957. **आक्षेपवार्त्तिकम्**-8)

* आत्मनः कर्मत्वे प्रतिषेधः *

भाष्यम्– आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः। 'हन्त्यात्मानम् घातयत्यात्मा' इति।

तटस्थाक्षेपभाष्यम्– स तर्हि वक्तव्यः।

(958. **समाधानवार्त्तिकम्**-9)

* न वा ण्यन्तेऽन्यस्य कर्तृत्वात् *

भाष्यम्– न वा वक्तव्यः। किं कारणम्? ण्यन्तेऽन्यस्य कर्तृत्वात्। अन्यदत्राण्यन्ते कर्म अन्योण्यन्तस्य कर्ता। कथम्? द्वावात्मानौ। अन्तरात्मा शरीरात्मा च।

अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवतीति।। णेरणौ।।67।।

(157. **आत्मनेपदनियमसूत्रम** 1.3.2 आ. 28)

219. स्वरितञितः कर्त्रभिप्राये क्रियाफले 1.3.72

स्वरितञिद्ग्रहणप्रत्याख्यानाधिकरणम्

आक्षेपभाष्यम्– स्वरितञित इति किमर्थम्?

समाधानभाष्यम्– याति वाति द्राति प्साति।

प्रत्याख्यानभाष्यम्– स्वरितञित इति शक्यमकर्तुम्।

आक्षेपभाष्यम्– इह कस्मान्न भवति याति वाति द्राति प्सातीति।

समाधानभाष्यम्– 'कर्त्रभिप्राये क्रियाफले' इत्युच्यते। सर्वेषां च कर्त्रभिप्रायं क्रियाफलमस्ति। त एवं विज्ञास्यामः येषां कर्त्रभिप्रायमकर्त्रभिप्रायं च क्रियाफलमस्ति तेभ्य आत्मनेपदं भवतीति।

न चैषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति। तथाजातीयकाः खल्वाचार्येण स्वरितञितः पठिता ये उभयवन्तः=येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिप्रग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथाभिप्रग्रहणं किमर्थम्?

समाधानभाष्यम्– स्वरितञित: कर्त्रायेे क्रियाफल इतीयत्युच्यमाने यमेव सम्प्रत्येति क्रियाफलं तत्रैव स्यात्—लूञ् लुनीते, पूञ् पूनीते। इह न स्याद्—यज् यजते, वप् वपते। अभिप्रग्रहणे पुन: क्रियमाणे न दोषो भवति। अभिरामुख्ये वर्तते। प्र आदिकर्मणि। तेन यं चाभिप्रैति यं चाभिप्रैष्यति यं चाभिप्रागात्तत्र सर्वत्राभिमुख्यमात्रे सिद्धं भवति।

कर्त्रभिप्रायेक्रियाफल इत्यस्यप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– कर्त्रभिप्राये क्रियाफले इति किमर्थम्?

समाधानभाष्यम्– पचन्ति भक्तकरा:। कुर्वन्ति कर्मकरा:। यजन्ति याजका:।

समाधानबाधकभाष्यम्– कर्त्रभिप्राये क्रियाफल इत्युच्यमानेऽपि प्राप्नोति। अत्रापि हि क्रियाफलं कर्तारमभिप्रैति। याजका यजन्ति गा लप्स्यामह इति। कर्मकरा: कुर्वन्ति पादिकमहर्लप्स्यामह इति।

समाधानसाधकभाष्यम्– एवं तर्हि 'कर्त्रभिप्राये क्रियाफले' इत्युच्यते। सर्वत्र च कर्तारं क्रियाफलमभिप्रैति। तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो यत्र कर्तारं क्रियाफलमभिप्रैति। न चान्तरेण यजिं यजिफलं वपिं वा वपिफलं लभन्ते। याजका: पुनरन्तरेणापि यजिं गा लभन्ते भृतकाश्च पादिकमिति।। स्वरित।।72।।

अथ परस्मैपदनियमप्रकरणम्

(158. **परस्मैपदनियमसूत्रम्** 1.3.2 आ. 29)

225. शेषात्कर्तरि परस्मैपदम् 1.3.78

कर्मकर्तरिप्रतिषेधाधिकरणम्

(959. **आक्षेपवार्त्तिकम्**-1)

*** शेषवचनं पञ्चम्या चेदर्थे प्रतिषेध: ***

भाष्यम्– शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधो वक्तव्य:। भिद्यते कुसूल: स्वयमेव, छिद्यते रज्जु: स्वयमेवेति।

न्यासान्तरसमाधानभाष्यम्– एवं तर्हि शेषे इति वक्ष्यामि।

(960. **न्यासान्तरदूषणवार्त्तिकम्**-2)

*** सप्तम्या चेत्प्रकृते: प्रतिषेध: ***

भाष्यम्– सप्तम्या चेत्प्रकृते: प्रतिषेधो वक्तव्य:। आसते शेते च्यवन्ते प्लवन्ते।

(961. **समाधानतात्पर्यवार्त्तिकम्**-3)

*** सिद्धं तूभयनिर्देशात् ***

भाष्यम्– सिद्धमेतत्। कथम्? उभयनिर्देश: कर्तव्य:। शेषाच्छेष इति वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कर्तृग्रहणमिदानीं किमर्थं स्यात्?

(962. **समाधानवार्त्तिकम्**-4)

*** कर्तृग्रहणमनुपराद्यर्थम् ***

भाष्यम्– अनुपराद्यर्थमेतत्स्यात्। इह भा भूत्—अनुक्रियते स्वयमेव, पराक्रियते स्वयमेवेति।

आक्षेपभाष्यम्– सिद्ध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधः' इति।

समाधानभाष्यम्– नैष दोषः। 'कर्तरि कर्मव्यतिहारे' इत्यत्र कर्तृग्रहणं प्रत्याख्यायते तत्प्रकृतमिहानुवर्तिष्यते शेषात्कर्तरि कर्तरीति। कर्तैव यः कर्ता तत्र यथा स्यात्, कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति। शेषात्कर्त्तरि।।78।।

(159. **परस्मैपदनियमसूत्रम्** 1.3.2 आ. 30)

226. अनुपराभ्यां कृञः 1.3.79

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(963. **समाधानवार्त्तिकम्**-1)

*** परस्मैपदप्रतिषेधात्कृञादिषु विधानम् ***

भाष्यम्– परस्मैपदप्रतिषेधात्कृञादिषु परस्मैपदं विधीयते। प्रतिषिद्ध्यते तत्र परस्मैपदम् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' आत्मनेपदं भवतीति।

अस्ति प्रयोजनमेतत्। किं तर्हीति।

आत्मनेपदवारणाधिकरणम्

(964. **आक्षेपवार्त्तिकम्**-2)

*** तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वात् ***

भाष्यम्– तत्रात्मनेपदस्य प्रतिषेधो वक्तव्यः। किं कारणम्? अप्रतिसिद्धत्वात्। नह्यात्मनेपदं प्रतिषिद्ध्यते। किं तर्हि? परस्मैपदमनेन विधीयते।

(965. **समाधानवार्त्तिकम्**-3)

*** न वा द्युतादिभ्यो वावचनात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? द्युतादिभ्यो वावचनात्। यदयं द्युतादिभ्यो वावचनं करोति तज्ज्ञापयत्याचार्यः—न परस्मैपदविषये आत्मनेपदं भवतीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(966. न्यासान्तरेणसमाधानवार्त्तिकम्-4)

*** आत्मनेपदनियमे वा प्रातिषेध: ***

भाष्यम्– आत्मनेपदनियमे वा प्रतिषेधो वक्तव्य:। 'स्वरितञित: कर्त्रभिप्राये क्रियाफले' आत्मनेपदं भवति, कर्तरि अनुपराभ्यां कृञो नेति।

तटस्थाक्षेपभाष्यम्– सिद्ध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं 'तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वाद्' इति।

समाधानभाष्यम्– परिहृतमेतत् 'न वा द्युतादिभ्यो वावचनात्' इति। अथवा इदं तावदयं प्रष्टव्य:—स्वरितञित: कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति परस्मैपदं कस्मान्न भवति। आत्मनेपदेन बाध्यते। यथैव तर्ह्यात्मनेपदेन परस्मैपदं बाध्यते, एवं परस्मैपदेनाप्यात्मनेपदं बाधिष्यते। अनुपराभ्याम्।।79।।

(160. परस्मैपदनियमसूत्रम् 1.3.2 आ. 31)

233 बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णे: 1.3.86

आक्षेपभाष्यम्– बुधादिषु येऽकर्मकास्तेषां ग्रहणं किमर्थम्?

समाधानभाष्यम्– बुधादिषु येऽकर्मकास्तेषां ग्रहणं सकर्मकार्थमचित्तवत्कर्तृकार्थं वा।। बुधयुधनश।।86।।

(161. परस्मैपदनियमसूत्रम् 1.3.2 आ. 32)

235. अणावकर्मकाच्चित्तवत्कर्तृकात् 1.3.88

चुरादिभ्योऽपि परस्मैपदसाधनाधिकरणम्

(967. आक्षेपवार्त्तिकम्-1)

*** अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनम् ***

भाष्यम्– अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदं वक्तव्यम्। इहापि यथा स्यात् चेतयमानं प्रयोजयति चेतयति।

प्रत्याक्षेपभाष्यम्– यदि तर्ह्यत्रापीष्यते अणिग्रहणमिदानीं किमर्थं स्यात्?

प्रत्याक्षेपसमाधानभाष्यम्– अकर्मकग्रहणमण्यन्तविशेषणं यथा विज्ञायेत।

प्रत्याक्षेपभाष्यम्– अथाक्रियमाणे अणिग्रहणे अकर्मकग्रहणं कस्य विशेषणं स्यात्?

प्रत्याक्षेपसमाधानभाष्यम्– णेरिति वर्तते। ण्यन्तविशेषणं स्यात्। तत्र को दोष:? इहैव यथा स्यात्—चेतयमानं प्रयोजयति चेतयति। इह न स्यात्—आसयति, शाययतीति।

(968. समाधानवार्त्तिकम्-2)

*** सिद्धं त्वतस्मिन् णाविति वचनात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– सिद्धमेतत्। कथम्? अतस्मिन् णौ यः अकर्मकस्तत्रेति वक्तव्यम्।

आक्षेपभाष्यम्– सिद्ध्यति। सूत्रं तर्हि भिद्यते।

समाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम् 'अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनम्' इति।

समाधानभाष्यम्– नैष दोषः। अणाविति कस्येदं णेर्ग्रहणम्? यस्माण्णेः प्राक्कर्म कर्ता वा विद्यते। न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते। अणावकर्मकात्।।88।।

(162. **परस्मैपदनियमबाधकसूत्रम्** 1.3.2 आ. 33)

236. न पादम्याङ्यमाङ्यसपरिमु हरुचिनृतिवदवसः 1.3.89

(939. **आक्षेपवार्त्तिकम्**-1)

*** पादिषु धेट उपसंख्यानम् ***

भाष्यम्– पादिषु धेट उपसंख्यानं कर्तव्यम्। धापयेते शिशुमेकं समीची।। न पादम्या.।

(163. **परस्मैपदनियमसूत्रम्** 1.3.2 आ. 34)

240. लुटि च क्लृपः 1.3.93

आक्षेपभाष्यम्– किमर्थश्चकारः?

समाधानभाष्यम्– स्यसनोरित्येतदनुकृष्यते।

प्रत्याख्यानभाष्यम्– यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति, 'द्युद्भ्यो लुङीत्यत्रापि चकारः कर्तव्यः विभाषेत्यनुकर्षणार्थः। अथेदानीमन्तरेणापि चकारमनुवृत्तिर्भवति, इहापि नार्थश्चकारेण। एवं सर्वे चकाराः प्रत्याख्यायन्ते। लुटि च क्लृपः।।93।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्; पादश्चायं समाप्तः

●

प्रथमेऽध्याये चतुर्थे पादे प्रथममाह्निकम्

(164. **नियमसूत्रम्** 1.4.1 आ. 1)

241. आकडारादेका सञ्ज्ञा 1.4.1

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(970. **समाधानवार्त्तिकम्**-1)

*** अन्यत्र सञ्ज्ञासमावेशान्नियमार्थं वचनम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अन्यत्र सञ्ज्ञासमावेशो भवति।। क्वान्यत्र? लोके व्याकरणे च। लोके तावत्—'इन्द्रः शक्रः पुरुहूतः पुरन्दरः' 'कन्दुः कोष्ठः कुसूल' इति एकस्य द्रव्यस्य बह्व्यः सञ्ज्ञा भवन्ति। व्याकरणेऽपि कर्तव्यं हर्तव्यमित्यत्र प्रत्ययकृत्कृत्यसञ्ज्ञानां समावेशो भवति। पाञ्चालः वैदेहः वैदर्भ इति प्रत्ययतद्धिततद्राजसञ्ज्ञानां समावेशो भवति। अन्यत्र सञ्ज्ञासमावेशादेतस्मात्कारणात् आकडारादपि सञ्ज्ञानां समावेशः प्राप्नोति। इष्यते चैकैव सञ्ज्ञा स्यादिति। तच्चान्तरेण यत्नं न सिद्ध्यतीति नियमार्थं वचनम्। एवमर्थमिदमुच्यते।

काकुभाष्यम्– अस्ति प्रयोजनमेतत्। किं तर्हीति।

सूत्रपाठनिर्णयाधिकरणम्

आक्षेपभाष्यम्– कथं त्वेतत्सूत्रं पठितव्यम् किम् 'आकडारादेका सञ्ज्ञा' इति, आहोस्वित् 'प्राक्कडारात्परं कार्यम्' इति?

प्रत्याक्षेपभाष्यम्– कुतः पुनरयं सन्देहः?

प्रत्याक्षेपसमाधानभाष्यम्– उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिद् 'आकडारादेका सञ्ज्ञा' इति। केचित् 'प्राक्कडारात्परं कार्यम्' इति।

आक्षेपभाष्यम्– कश्चात्र विशेषः?

(971. 'एका सञ्ज्ञा' इति पाठे गौरवाक्षेपवार्त्तिकम्- 2)

* तत्रैकसञ्ज्ञाधिकारे तद्वचनम् *

भाष्यम्– तत्रैकसञ्ज्ञाधिकारे तद्वक्तव्यम् किम्? एका सञ्ज्ञा भवतीति।

परंकार्यमितिन्यासेऽपि गौरवभाष्यम्– ननु च यस्यापि परंकार्यत्वं तेनापि परग्रहणं कर्तव्यम्।

गौरवाभावभाष्यम्– परार्थं मम भविष्यति 'विप्रतिषेधे च' इति।

एकासञ्ज्ञेतिन्यासेऽपि गौरवपरिहारभाष्यम्– ममापि तर्ह्येकग्रहणं परार्थं भविष्यति—'सरुपाणामेकशेष एकविभक्तौ' इति। सञ्ज्ञाधिकारश्चायम्। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः सञ्ज्ञायाः। तत्रैतावद्वाच्यम्– 'आकडारादेका'। किम्? एका सञ्ज्ञा भवतीति।

(972. एकसञ्ज्ञाधिकारे दूषणान्तरवार्त्तिकम्- 3)

* अङ्गसञ्ज्ञया भपदसञ्ज्ञयोरसमावेशः *

भाष्यम्– अङ्गसञ्ज्ञया भपदसञ्ज्ञयोः समावेशो न प्राप्नोति। सार्पिष्कः। बार्हिष्कः। याजुष्कः। धानुष्कः। बाभ्रव्यः। माण्डव्य इति। अनवकाशे भपदसञ्ज्ञे अङ्गसञ्ज्ञां बाधेयाताम्।

परंकार्यत्वेसमावेशसाधकपूर्वशेषमूलभाष्यम्– परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः।

व्याख्याभाष्यम्– यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वे तस्य भपदसंज्ञे परा अङ्गसंज्ञा। कथम्? एवं स वक्ष्यति—'यस्मा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रत्ययविधिस्तदादि सुप्तिङन्तं पदम्' नः क्ये' 'सिति च' 'स्वादिष्वसर्वनामस्थाने' 'यचि भम्' तस्यान्ते 'प्रत्ययेऽङ्गम्' इति। तत्रारम्भसामर्थ्याच्च भपदसञ्ज्ञे। परंकार्यत्वाच्चाङ्गसञ्ज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्याप्यङ्गसञ्ज्ञा-पूर्विके भपदसञ्ज्ञे। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौग-पद्येन सम्भवः।

(973. एकसञ्ज्ञाधिकारेदूषणान्तरवार्त्तिकम्- 4)
* कर्मधारयत्वे तत्पुरुषग्रहणम् *

भाष्यम्– कर्मधारयत्वे तत्पुरुषग्रहणं कर्तव्यम्—'तत्पुरुषः समानाधिकरणः कर्मधारय' इति। एकसञ्ज्ञाधिकार इति चोदितम्। अक्रियमाणे हि तत्पुरुषग्रहणे ह्यनवकाशा कर्म-धारयसञ्ज्ञा तत्पुरुषसञ्ज्ञां बाधेत।

परंकार्यत्वे समावेशसिद्धिमूलभाष्यम्– परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः।

व्याख्याभाष्यम्– यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य कर्मधारयसञ्ज्ञा परा तत्पुरुषसञ्ज्ञा। कथम्? एवं स वक्ष्यति—'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन कर्मधारय' इत्येवं सर्वं कर्म-धारयप्रकरणमनुक्रम्य तस्यान्ते 'श्रितादिभिस्तत्पुरुषः' इति तत्रारम्भसामर्थ्याच्च कर्मधारयसञ्ज्ञा, परंकार्यत्वाच्च तत्पुरुषसञ्ज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि तत्पुरुष-सञ्ज्ञापूर्विका कर्मधारयसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

(974. एकसञ्ज्ञाधिकारेदूषणान्तरवार्त्तिकम्- 5)
* तत्पुरुषत्वे द्विगुचग्रहणम् *

भाष्यम्– तत्पुरुषत्वे द्विगुचग्रहणं कर्तव्यम्। 'तत्पुरुषः द्विगुश्च' इति चकारः कर्तव्यः। अक्रियमाणे हि चकारग्रहणेऽनवकाशा द्विगुसञ्ज्ञा तत्पुरुषसञ्ज्ञां बाधेत।

परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः। यस्य पुनः परंकार्यत्वं नियमानुपपत्ते-स्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य द्विगुसञ्ज्ञा परा तत्पुरुषसञ्ज्ञा। कथम्? एवं स वक्ष्यति—'तद्धितार्थोत्तरपदसमाहारे च संख्यापूर्वो द्विगुः' इत्येवं सर्वं द्विगुप्रकरणमनुक्रम्य तस्यान्ते 'श्रितादिभिस्तत्पुरुषः' इति। तत्रारम्भसामर्थ्याच्च द्विगुसञ्ज्ञा—परंकार्यत्वाच्च तत्पुरुषसञ्ज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि तत्पुरुष-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्ज्ञापूर्विका द्विगुसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

(975. दूषणान्तरवार्त्तिकम्- 6)

* गतिदिवः कर्महेतुमत्सु चग्रहणम् *

भाष्यम्– गतिदिवःकर्महेतुमत्सु चग्रहणं कर्तव्यम्। 'उपसर्गाः क्रियायोगे' 'गतिश्च' इति चकारः कर्तव्यः। अक्रियमाणे हि चकारे अनवकाशा उपसर्गसंज्ञा गतिसञ्ज्ञा बाधेत।

परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः। यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्योपसर्गसञ्ज्ञा, परा गतिसञ्ज्ञा। तत्रारम्भसामर्थ्याच्चोपसर्गसञ्ज्ञा, परंकार्यत्वाच्च गतिसंज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्याप्युपसर्गसञ्ज्ञापूर्विका गतिसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

दूषणबाधकभाष्यम्– गतिसञ्ज्ञाप्यनवकाशा वचनाद्भविष्यति।

दूषणसाधकभाष्यम्– सावकाशा गतिसञ्ज्ञा। कोऽवकाशः? ऊर्यादीन्यवकाशः।

दूषणबाधकभाष्यम्– प्रादीनां या गतिसञ्ज्ञा सानवकाशा। गति।

द्वितीयोदाहरणसमन्वयभाष्यम्– दिवःकर्म—'साधकतमं करणम्' 'दिवः कर्म च' चकारः कर्तव्यः। अक्रियमाणे हि चकारेऽनवकाशा कर्मसञ्ज्ञा करणसञ्ज्ञां बाधेत।

परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः। यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य कर्मसञ्ज्ञा, परा करणसञ्ज्ञा। कथम्? एवं स वक्ष्यति—'दिवः साधकतमं कर्म'। ततः 'करणम्' करणसञ्ज्ञं च भवति साधकतमम्। दिव इति निवृत्तम्। तत्रारम्भसामर्थ्याच्च कर्मसञ्ज्ञा परंकार्यत्वाच्च करणसञ्ज्ञा भविष्यति।

दूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि करणसञ्ज्ञापूर्विका कर्मसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

दूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः। दिवः कर्म।

उदाहरणान्तरसमन्वयभाष्यम्– हेतुमत्। 'स्वतन्त्रः कर्ता' 'तत्प्रयोजको हेतुश्च' चकारः कर्तव्यः। अक्रियमाणे हि चकारेऽनवकाशा हेतुसञ्ज्ञा कर्तृसञ्ज्ञा बाधेत।परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः। यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य हेतुसञ्ज्ञा, परा कर्तृसञ्ज्ञा। कथम्? एवं स वक्ष्यति—'स्वतन्त्रः प्रयोजको हेतुः' इति। ततः 'कर्ता'। कर्तृसञ्ज्ञश्च भवति स्वतन्त्रः। प्रयोजक

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति निवृत्तम्। तत्रारम्भसामर्थ्याच्च हेतुसञ्ज्ञा परंकार्यत्वाच्च कर्तृसञ्ज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि कर्तृसञ्ज्ञापूर्विका हेतुसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

(976. **दूषणान्तरवार्त्तिकम्**-7)

* गुरुलघुसञ्ज्ञे नदीघिसञ्ज्ञे *

भाष्यम्– गुरुलघुसञ्ज्ञे नदीघिसञ्ज्ञे बाधेयाताम्। गार्गीबन्धुः वात्सीबन्धुः। वैन्नं विविनय्य। परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः।

यस्य पुनः परंकार्यत्वं नियमानु-पपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वे तस्य नदीघिसञ्ज्ञे परे गुरुलघुसञ्ज्ञे। तत्रारम्भसामर्थ्याच्च नदीघिसञ्ज्ञे, परंकार्यत्वाच्च गुरुलघुसञ्ज्ञे भविष्यतः।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि नदीघिसञ्ज्ञापूर्विके गुरुलघुसञ्ज्ञे। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

(977. **दूषणान्तरवार्त्तिकम्**-8)

* परस्मैपदसञ्ज्ञा पुरुषसञ्ज्ञा *

भाष्यम्– परस्मैपदसञ्ज्ञां पुरुषसञ्ज्ञा बाधेत।

परवचने हि नियमानुपपत्तेरुभयसञ्ज्ञाभावः। यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः सञ्ज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य पुरुषसञ्ज्ञा परा परस्मैपदसञ्ज्ञा। कथम्? एवं स वक्ष्यति—'तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमा' इत्येवं सर्वं पुरुषनियममनुक्रम्य तस्यान्ते 'लः परस्मैपदम्' इति। तत्रारम्भसामर्थ्याच्च पुरुषसञ्ज्ञा परंकार्यत्वाच्च परस्मैपदसञ्ज्ञा भविष्यति।

असमावेशदूषणबाधकभाष्यम्– ननु च यस्याप्येकसञ्ज्ञाधिकारस्तस्यापि परस्मैपदसञ्ज्ञापूर्विका पुरुषसञ्ज्ञा। कथम्? अनुवृत्तिः क्रियते।

असमावेशदूषणसाधकभाष्यम्– पर्यायः प्रसज्येत। एका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः।

असमावेशदूषणबाधकभाष्यम्– परस्मैपदसञ्ज्ञाप्यनवकाशा वचनाद्भविष्यति।

असमावेशदूषणसाधकभाष्यम्– सावकाशा परस्मैपदसञ्ज्ञा। कोऽवकाशः? शतृक्वसू अवकाशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ परकार्यवचने दूषणानि

(978. दूषणवार्त्तिकम्-9)

*** परवचने सिति पदं भम् ***

भाष्यम्– परवचने सिति पदं भसञ्ज्ञमपि प्राप्नोति। 'अयं ते योनिर्ऋत्वियः'। 'प्रजां विन्दाम ऋत्वियः'। आरम्भसामर्थ्याच्च पदसञ्ज्ञा, परंकार्यत्वाच्च भसञ्ज्ञा प्राप्नोति।

(979. दूषणान्तरवार्त्तिकम्-10)

*** गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसञ्ज्ञम् ***

भाष्यम्– गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसञ्ज्ञमपि प्राप्नोति। आरम्भसामर्थ्याच्च कर्मसञ्ज्ञा, परंकार्यत्वाच्च कर्तृसञ्ज्ञा प्राप्नोति।

दूषणनिराकणभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—न कर्मसञ्ज्ञायां कर्तृसञ्ज्ञा भवतीति। यदयं 'हृक्रोरन्यतरस्याम्' इत्यन्यतरस्यांग्रहणं करोति।

(980. दूषणान्तरवार्त्तिकम्-11)

*** शेषवचनं च घिसञ्ज्ञानिवृत्त्यर्थम् ***

भाष्यम्– शेषवचनं च कर्तव्यम्—'शेषो घ्यसखि'। किं प्रयोजनम्? घिसञ्ज्ञानिवृत्त्यर्थम्। नदीसञ्ज्ञायां घिसञ्ज्ञा मा भूदिति शकट्यै पद्धत्यै बुद्ध्यै धेन्वै। इतरथा हि परंकार्यत्वाच्च घिसञ्ज्ञा आरम्भसामर्थ्याच्च 'ङिति ह्रस्वश्च' इति नदीसञ्ज्ञा।

(981. दूषणपरिहारवार्त्तिकम्-12)

*** न वाऽसम्भवात् ***

भाष्यम्– न वा कर्तव्यम्। नदीसञ्ज्ञायां घिसञ्ज्ञा कस्मान्न भवति? असम्भवात्। कोसावसम्भवः? ह्रस्वलक्षणा हि नदीसञ्ज्ञा घिसञ्ज्ञायां च गुणः। ह्रस्वलक्षणा हि नदीसञ्ज्ञा, घिसञ्ज्ञायां च गुणेन भवितव्यम्। तत्र वचनप्रामाण्यान्नदीसञ्ज्ञायां घिसञ्ज्ञाभावः। तत्र वचनप्रामाण्यान्नदीसञ्ज्ञायां घिसञ्ज्ञा न भविष्यति। किं कारणम्? आश्रयाभावात्।

(982. दूषणसाधकवार्त्तिकम्-13)

*** आश्रयाभावान्नदीसञ्ज्ञायां घिसञ्ज्ञानिवृत्तिरिति चेद्यणादेशाभावः ***

भाष्यम्– आश्रयाभावान्नदीसञ्ज्ञायां घिसञ्ज्ञानिवृत्तिरिति चेदेवमुच्यते यणादेशोऽपि न प्राप्नोति।

दूषणपरिहारभाष्यम्– नैष दोषः।

(983. दूषणपरिहारसाधकवार्त्तिकम्-14)

*** नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसञ्ज्ञाभावः ***

भाष्यम्– नद्याश्रयो यणादेशः। यदा नदीसंज्ञया घिसञ्ज्ञा बाधिता तत उत्तरकालं यणादेशेन भवितव्यम्। नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसञ्ज्ञा भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(984. दूषणान्तरवार्त्तिकम्-15)

*** बहुव्रीह्यर्थं तु ***

भाष्यम्– बहुव्रीहिप्रतिषेधार्थं तु शेषग्रहणं कर्तव्यम्—'शेषो बहुव्रीहिः' इति।

प्रयोजनसाधकभाष्यम्– किं प्रयोजनम्?

(985. प्रयोजनवार्त्तिकम्-16)

*** प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु ***

भाष्यम्– अव्ययीभाव—उन्मत्तगङ्गम् लोहितगङ्गम्। उपमान—शस्त्रीश्यामा कुमुदश्येनी। द्विगु—पञ्चगवं दशगवम्। कृल्लोपे—निष्कौशाम्बिः निर्वाराणसिः।

(986. दूषणान्तरवार्त्तिकम्-17)

*** तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः ***

भाष्यम्– तत्र शेषवचनाद्दोषो भवति। संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहेः प्रतिषेधः प्राप्नोति। संख्या—द्वीरावतीको देशः, त्रीरावतीको देशः। समानाधिकरण—वीरपुरुषको ग्रामः। नञ्समासे—अब्राह्मणको देशः, अवृषलको देशः।

(987. दूषणवार्त्तिकम्-18)

*** कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः ***

भाष्यम्– कृल्लोपे च शेषवचनात्प्रादिभिर्बहुव्रीहिर्न प्राप्नोति। प्रपतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति।

एका सञ्ज्ञा इति पाठस्य निर्दोषत्वकथनाधिकरणम्

परंकार्यवादिन आक्षेपभाष्यम्– अथैकसञ्ज्ञाधिकारे कथं सिद्ध्यति?

(988. एकसञ्ज्ञावादिनः समाधानवार्त्तिकम्-19)

*** एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः ***

भाष्यम्– एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिर्भविष्यति।

(989. परंकार्यवादिनो बाधकवार्त्तिकम्-20)

*** एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्तार्थे प्रतिषेधः ***

भाष्यम्– एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्तार्थे प्रतिषेधो वक्तव्यः। निष्कौशाम्बिः। निर्वाराणसिः।

एकसञ्ज्ञावादिनः समाधानसाधकभाष्यम्– तत्पुरुषोऽत्र बाधको भविष्यति।

(990. परंकार्यवादिनोबाधकवार्त्तिकम्-21)

*** तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधः ***

भाष्यम्– तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधो वक्तव्यः। प्रपतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(991. एकसञ्ज्ञावादिनः समाधानवार्त्तिकम्- 22)

*** सिद्धं तु प्रादीनां क्तार्थे तत्पुरुषवचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? प्रादीनां क्तार्थे तत्पुरुषो भवतीति वक्तव्यम्।

एकसञ्ज्ञाधिकारप्रयोजनाधिकरणम्

प्रयोजनानुयोगभाष्यम्– कानि पुनरस्य योगस्य प्रयोजनानि?

(992. प्रयोजनवार्त्तिकम्- 23)

*** प्रयोजनं ह्रस्वसञ्ज्ञां दीर्घप्लुतौ ***

भाष्यम्– ह्रस्वसञ्ज्ञां दीर्घप्लुतसञ्ज्ञे बाधेते।

(993. प्रयोजनवार्त्तिकम्- 24)

*** तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम् ***

भाष्यम्– तिङ्सार्वधातुकसञ्ज्ञां लिङ्लिटोरार्धकधातुसञ्ज्ञा बाधते।

(994. प्रयोजनवार्त्तिकम्- 25)

*** अपत्यं वृद्धं युवा ***

भाष्यम्– अपत्यं वृद्धं युवसञ्ज्ञा बाधते।

(995. प्रयोजनवार्त्तिकम्- 26)

*** घिन्नदी ***

भाष्यम्– घिसञ्ज्ञां नदीसञ्ज्ञा बाधते।

(996. प्रयोजनवार्त्तिकम्- 27)

*** लघु गुरु ***

भाष्यम्– लघुसञ्ज्ञां गुरुसञ्ज्ञा बाधते।

(997. प्रयोजनवार्त्तिकम्- 28)

*** पदं भम् ***

भाष्यम्– पदसञ्ज्ञां भसञ्ज्ञा बाधते।

(998. प्रयोजनवार्त्तिकम्- 29)

*** अपादानमुत्तराणि ***

भाष्यम्– अपादानसञ्ज्ञामुत्तराणि कारकाणि बाधन्ते। क्व? धनुषा विध्यति, कंसपात्र्यां भुङ्क्ते, गां दोग्धि, धनुर्विध्यति।

धनुषा विध्यतीत्यपाययुक्तत्वाच्च 'ध्रुवमपायेऽपादानम्' इत्यपादानसञ्ज्ञा प्राप्नोति साधकतमं करणम्' इति च करणसञ्ज्ञा। सा परा भवति। कंसपात्र्यां भुङ्क्ते इत्यत्रापाय-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्तत्वाच्च 'ध्रुवमपायेऽपादानम्' इत्यपादानसञ्ज्ञा प्राप्नोति। 'आधारोऽधिकरणम्' इति चाधिकरणसञ्ज्ञा। सा परा भवति।

गां दोग्धीत्यत्रापाययुक्तत्वाच्चापादानसञ्ज्ञा प्राप्नोति 'कर्तुरीप्सिततमं कर्म' इति कर्मसञ्ज्ञा। परा सा भवति।

धनुर्विध्यतीत्यत्रापाययुक्तत्वाच्चापादानसञ्ज्ञा प्राप्नोति। 'स्वतन्त्रः कर्ता' इति कर्तृसञ्ज्ञा। सा परा भवति।

(999. प्रयोजनवार्त्तिकम्-30)

*** क्रुधद्रुहोरुपसृष्टयोः कर्म सम्प्रदानम् ***

भाष्यम्– क्रुधद्रुहोरुपसृष्टयोः कर्मसञ्ज्ञा सम्प्रदानसञ्ज्ञां बाधते।

(1000. प्रयोजनवार्त्तिकम्-31)

*** करणं पराणि ***

भाष्यम्– करणसञ्ज्ञां पराणि कारकाणि बाधन्ते। क्व? धनुर्विध्यति। असिश्छिनत्तीति।

(1001. प्रयोजनवार्त्तिकम्-32)

*** अधिकरणं कर्म ***

भाष्यम्– अधिकरणसञ्ज्ञां कर्मसञ्ज्ञा बाधते। क्व? गेहं प्रविशतीति।

(1002. प्रयोजनवार्त्तिकम्-33)

*** अधिकरणं कर्ता ***

भाष्यम्– अधिकरणसञ्ज्ञां कर्तृसञ्ज्ञा बाधते। क्व? स्थाली पचतीति।

(1003. प्रयोजनवार्त्तिकम्-34)

*** अध्युपसृष्टं कर्म ***

भाष्यम्– अध्युपसृष्टं कर्म अधिकरणसञ्ज्ञां बाधते।

(1004. प्रयोजनवार्त्तिकम्-35)

*** गत्युपसर्गसञ्ज्ञे कर्मप्रवचनीयसञ्ज्ञा ***

भाष्यम्– गत्युपसर्गसञ्ज्ञे कर्मप्रवचनीयसञ्ज्ञा बाधते।

(1005. प्रयोजनवार्त्तिकम्-36)

*** परस्मैपदमात्मनेपदम् ***

भाष्यम्– परस्मैपदसञ्ज्ञामात्मनेपदसञ्ज्ञा बाधते।

(1006. प्रयोजनवार्त्तिकम्-37)

*** समाससञ्ज्ञाश्च ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– समाससञ्ज्ञाश्च या याःपरा अनवकाशाश्च, तास्ताः पूर्वाः सावकाशाश्च बाधन्ते।

सञ्ज्ञानिवेशक्रमाधिकरणम्

(1007. सञ्ज्ञावार्त्तिकम्-38)

*** अर्थवत्प्रातिपदिकम् ***

भाष्यम्– अर्थवत्प्रातिपदिकसञ्ज्ञं भवति।

(1008. गुणसञ्ज्ञावार्त्तिकम्-39)

*** गुणवचनं च ***

भाष्यम्– गुणवचनसञ्ज्ञं च भवत्यर्थवत्।

(1009. समासादिसञ्ज्ञावार्त्तिकम्-40)

*** समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः ***

भाष्यम्– समास—समाससञ्ज्ञा वक्तव्या। कृत्—कृत्सञ्ज्ञा च वक्तव्या। तद्धित—तद्धितसञ्ज्ञा च वक्तव्या। अव्यय—अव्ययसञ्ज्ञा च वक्तव्या। सर्वनाम—सर्वनामसञ्ज्ञा च वक्तव्या। असर्वलिङ्गा जातिरिति। एतच्च वक्तव्यम्।

(1010. संख्यासञ्ज्ञावार्त्तिकम्-41)

*** संख्या ***

भाष्यम्– संख्यासञ्ज्ञा च वक्तव्या।

(1011. षट्सञ्ज्ञावार्त्तिकम्-42)

*** डु च ***

भाष्यम्– डुसञ्ज्ञा च वक्तव्या। का पुनर्डुसञ्ज्ञा? षट् सञ्ज्ञा।

(1012. सञ्ज्ञासञ्ज्ञावार्त्तिकम्-43)

*** एकद्रव्योपनिवेशिनी सञ्ज्ञा ***

भाष्यम्– एकद्रव्योपनिवेशिनी सञ्ज्ञा इत्येतच्च वक्तव्यम्।

आक्षेपभाष्यम्– किमर्थमिदमुच्यते। यथान्यास एव भूयिष्ठाः सञ्ज्ञाः क्रियन्ते?

समाधानभाष्यम्– सन्ति चैवात्र काश्चिदपूर्वाः सञ्ज्ञाः। अपि चैतेनानुपूर्व्येण सन्निविष्टानां बाधनं यथा स्यात्। गुणवचनसञ्ज्ञायाश्चैताभिः सञ्ज्ञाभिर्बाधनं यथा स्यादिति। आकडारात्।।1।।

(165. विप्रतिषेध(नियम)सूत्रम् 1.4.1 आ. 2)

242. विप्रतिषेधे परं कार्यम् 1.4.2

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विप्रतिषेधशब्दार्थावगमाधिकरणम्

आक्षेपभाष्यम्– विप्रतिषेध इति कोऽयं शब्दः?

समाधानभाष्यम्– विप्रतिपूर्वात्सिधेः कर्मव्यतिहारे घञ्। इतरेतरप्रतिषेधो विप्रतिषेधः। अन्योन्यप्रतिषेधो विप्रतिषेधः।

आक्षेपभाष्यम्– कः पुनर्विप्रतिषेधः?

(1013. **समाधानवार्त्तिकम्-1**)

*** द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः ***

भाष्यम्– द्वौ प्रसङ्गौ यदान्यार्थौ भवत एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः। क्व पुनरन्यार्थौ क्व चैकस्मिन्युगपत्प्राप्नुतः? वृक्षाभ्यां वृक्षेष्वित्यन्यार्थौ, वृक्षेभ्य इत्यत्र युगपत्प्राप्नुतः।

आक्षेपभाष्यम्– किं च स्यात्?

(1014. **समाधानवार्त्तिकम्-2**)

*** एकस्मिन्युगपदसम्भवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः ***

भाष्यम्– एकस्मिन्युगपदसम्भवात् पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसङ्गः।

आक्षेपभाष्यम्– इदं विप्रतिषिद्धं यदुच्यते 'एकस्मिन्युगपदसम्भवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः' इति, कथं ह्येकस्मिंश्च युगपदसम्भवः स्यात् पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसङ्गश्च स्यात्?

समाधानभाष्यम्– नैतद्विप्रतिषिद्धम्। यदुच्यते 'एकस्मिन्युगपदसम्भवात्' इति। कार्ययोर्युगपदसम्भवः, शास्त्रयोरुभयप्रसङ्गः।

(1015. **समाधानसाधकवार्त्तिकम्-3**)

*** तृजादिभिस्तुल्यम् ***

भाष्यम्– तृजादिभिस्तुल्यं पर्यायः प्राप्नोति। तद्यथा तृजादयः पर्यायेण भवन्ति।

आक्षेपभाष्यम्– किं पुनः कारणं तृजादयः पर्यायेण भवन्ति?

(1016. **समाधानवार्त्तिकम्-4**)

*** अनवयवप्रसङ्गात्प्रतिपदं विधेश्च ***

भाष्यम्– अनवयवेन प्रसज्यन्ते प्रतिपदं च विधीयन्ते।

(1017. **पक्षान्तरवार्त्तिकम्-5**)

*** अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात् ***

भाष्यम्– अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात्। किं कारणम्? तुल्यबलत्वात्। तुल्यबले ह्युभे शास्त्रे। तद्यथा—द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यं करोति। यदा तु तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थी भवति उभयोर्न करोति। किं पुनः कारणमुभयोर्न करोति? यौगपद्यासम्भवात्। नास्ति यौगपद्येन सम्भवः। तत्र प्रतिपत्त्यर्थं वचनम्। तत्र प्रतिपत्त्यर्थमिदं वक्तव्यम्।

(1018. **आक्षेपवार्त्तिकम्**-6)

* तव्यदादीनां त्वप्रसिद्धिः *

भाष्यम्– तव्यदादीनां तु कार्यस्याप्रसिद्धिः। नहि किञ्चित्तव्यदादिषु नियमकारि शास्त्रमारभ्यते येन तव्यदादयः स्युः। यश्च भवता हेतुर्व्यपदिष्टः 'अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्' इति, तुल्यः स तव्यदादिषु।

आक्षेपनिराकरणभाष्यम्– नैष दोषः। अनवकाशास्तव्यदादयः। उच्यन्ते च। ते वचनाद्भविष्यन्ति। यश्च भवता हेतुर्व्यपदिष्टः—तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति, तुल्यः स तव्यदादिषु। एतावदिह सूत्रम् 'विप्रतिषेधे परम्' इति। पठिष्यति ह्याचार्यः 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति। पुनश्च पठिष्यति—'पुनः प्रसङ्गविज्ञानात्सिद्धम्' इति।

आक्षेपभाष्यम्– किं पुनरियता सूत्रेणोभयं लभ्यम्?

समाधानभाष्यम्– लभ्यमित्याह। कथम्? इह भवता द्वौ हेतू व्यपदिष्टौ—तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति च, 'अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति च। तद्यदा तावदेष हेतुस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तदा 'विप्रतिषेधे परम्' इत्यनेन किं क्रियते? नियमः—विप्रतिषेधे परमेव भवतीति। तदैतदुपपन्नं भवति—'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति। यदा त्वेष हेतुरप्रतिपत्तिरुभयोस्तुल्यबलत्वात्' इति, तदा 'विप्रतिषेधे परम्' इत्यनेन किं क्रियते? द्वारम्—विप्रतिषेधे परं तावद्भवति तस्मिन्कृते यदि पूर्वमपि प्राप्नोति तदपि भवति। तदैतदुपपन्नं भवति—'पुनःप्रसङ्गविज्ञानात्सिद्धमिति'।

पूर्वविप्रतिषेधाङ्गीकाराधिकरणम्

(1019. **न्यासान्तरवार्त्तिकम्**-7)

* विप्रतिषेधे परमङ्गाधिकारे पूर्वम् *

भाष्यम्– विप्रतिषेधे परमित्युक्त्वाऽङ्गाधिकारे पूर्वमिति वक्तव्यम्। किं कृतं भवति? पूर्वविप्रतिषेधा न पठितव्या भवन्ति—'गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धम्' 'नुमचिरतृज्वद्भावेभ्यो नुट्' इति।

आक्षेपभाष्यम्– कथं ये परविप्रतिषेधाः—'इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधने' इति। सूत्रं च भिद्यते।

सिद्धान्तिसमाधानभाष्यम्– यथान्यासमेवास्तु। कथं ये पूर्वविप्रतिषेधाः? 'विप्रतिषेधे परम्' इत्येव सिद्धम्। कथम्? परशब्दोऽयं बह्वर्थः। अस्त्येव व्यवस्थायां वर्तते तद्यथा—'पूर्वः परः' इति। अस्त्यन्यार्थे वर्तते—'परपुत्रः परभार्या' अन्यपुत्रोऽन्यभार्येति गम्यते। अस्ति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राधान्ये वर्तते तद्यथा—'परमियं ब्राह्मण्यस्मिन्कुटुम्बे' प्रधानमिति गम्यते। अस्तीष्टवाची परशब्दः तद्यथा—'परं धाम गतः' इष्टं धाम गत इति गम्यते। तद्य इष्टवाची परशब्दस्तस्येदं ग्रहणं 'विप्रतिषेधे परं यदिष्टं तद्भवति' इति।

अन्तरङ्गपरिभाषाधिकरणम्

(1020. **आक्षेपवार्त्तिकम्**-)

*** अन्तरङ्गं च ***

भाष्यम्– अन्तरङ्गं च बलीयो भवतीति वक्तव्यम्।

अनुयोगभाष्यम्– किं प्रयोजनम्।

(1021. **समाधानवार्त्तिकम्**-9)

*** प्रयोजनं यणेकादेशेत्त्वोत्त्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः ***

उदाहरणसमन्वयभाष्यम्– गुणाद्यणादेशः—स्योनः स्योना। गुणश्च प्राप्नोति यणादेशश्च। परत्वाद्गुणः स्यात्। यणादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– वृद्धेर्यणादेशः—द्यौकामिः स्यौकामिः। वृद्धिश्च प्राप्नोति यणादेशश्च। परत्वाद् वृद्धिः स्यात्। यणादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– द्विर्वचनाद्यणादेशः—दुद्यूषति सुस्यूषति। द्विर्वचनं च प्राप्नोति यणादेशश्च। नित्यत्वाद् द्विर्वचनं स्यात्। यणादेशो भवत्यन्तरङ्गतः।

उदाहरणविचारभाष्यम्– अल्लोपस्य च यणादेशस्य च नास्ति सम्प्रधारणा।

उदाहरणसमन्वयभाष्यम्– स्वराद्यणादेशः—द्यौकामिः स्यौकामिः। स्वरश्च प्राप्नोति यणादेशश्च। परत्वात्स्वरः स्याद्। यणादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– गुणादेकादेशः—काद्रवेयो मन्त्रमपश्यत्। गुणश्च प्राप्नोत्येकादेशश्च। परत्वाद्गुणः स्यात्। एकादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– वृद्धेरेकादेशः—वैक्षमाणिः सौत्थितिः। वृद्धिश्च प्राप्नोत्येकादेशश्च। परत्वाद् वृद्धिः स्यात्। एकादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– द्विर्वचनादेकादेशः—ज्ञाया ओदनः ज्ञौदनः। ज्ञौदनमिच्छति ज्ञौदनीयति। ज्ञौदनीयतेः सन्। जुज्ञौदनीयिषति। द्विर्वचनं च प्राप्नोत्येकादेशश्च। नित्यत्वाद् द्विर्वचनं स्यात्। एकादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्—अल्लोपादेकादेशः—शुना शुने। अल्लोपश्च प्राप्नोत्येकादेशश्च। परत्वादल्लोपः स्यात्। एकादेशो भवत्यन्तरङ्गतः।

प्रयोजननिराकरणभाष्यम्– नैतदस्ति प्रयोजनम्। नास्त्यत्र विशेषः अल्लोपेन वा निवृत्तौ सत्यां, पूर्वत्वेन वा।

प्रयोजनाङ्गीकरणभाष्यम्– अयमस्ति विशेषः अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः प्रसज्येत।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजननिराकरणभाष्यम्– नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम्? 'न गोश्वन्साववर्ण' इति प्रतिषेधात्।

प्रयोजनाङ्गीकरणभाष्यम्– नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि? तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति शुनः पश्येति।

प्रयोजननिराकरणभाष्यम्– एवं तर्हि न लाक्षणिकस्य प्रतिषेधं शिष्मः। किं तर्हि? येन केन चित्प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधः।

प्रयोजनाङ्गीकारभाष्यम्– यत्र तर्हि विभक्तिर्नास्ति बहुशुनीति।

प्रयोजननिराकरणभाष्यम्– यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत।

प्रयोजनाङ्गीकारभाष्यम्– नैवं शक्यम्। इहापि प्रसज्येत कुमारीति।

प्रयोजननिराकरणभाष्यम्– एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति—नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति। यदयं श्वन्शब्दं गौरादिषु पठति अन्तोदात्तार्थं यत्नं करोति। सिद्धं हि स्यान्ङीपैव।

उदाहरणसमन्वयभाष्यम्– स्वरादेकादेशः। सौत्थितिः वैक्षमाणिः। स्वरश्च प्राप्नोत्येकादेशश्च। परत्वात्स्वरः स्याद्। एकादेशो भवत्यन्तरङ्गतः।

उदाहरणविचारणाभाष्यम्– गुणस्य चेत्त्वौत्त्वयोश्च नास्ति सम्प्रधारणा।

उदाहरणसमन्वयभाष्यम्– वृद्धेरित्त्वोत्त्वे। स्तैर्णिः पौर्तिः। वृद्धिश्च प्राप्नोतीत्त्वोत्त्वे च। परत्वाद्। वृद्धिः स्याद् इत्त्वोत्त्वे भवतोन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– द्विर्वचनादित्त्वोत्त्वे। आतेस्तीर्यते आपोपूर्यते। द्विर्वचनं च प्राप्नोतीत्त्वोत्त्वे च। नित्यत्वाद् द्विर्वचनं स्यात्। इत्त्वोत्त्वे भवतोऽन्तरङ्गतः।

उदाहरणविचारभाष्यम्– अल्लोपस्य चेत्त्वोत्त्वयोश्च नास्ति सम्प्रधारणा। स्वरे नास्ति विशेषः।

(1022. **प्रयोजनवार्त्तिकम्**-10)

* इण्ङिशीनामाद्गुणः सवर्णदीर्घत्वात् *

भाष्यम्– इण्ङिशीनामाद्गुणः सवर्णदीर्घत्वात् प्रयोजनम्। अयज इन्द्रम् अवप इन्द्रम्। वृक्ष इन्द्रं प्लक्ष इन्द्रं त इन्द्रं। यइन्द्रम्। आद्गुणश्च प्राप्नोति सवर्णदीर्घत्वं च। परत्वात्सवर्णदीर्घत्वं स्यात्। आद्गुणो भवत्यन्तरङ्गतः।

(1023. **प्रयोजननिराकरणवार्त्तिकम्**-11)

* न वा सवर्णदीर्घत्वस्यानवकाशत्वात् *

भाष्यम्– न वा एतदन्तरङ्गेणापि सिद्ध्यति। किं कारणम्? सवर्णदीर्घत्वस्यानवकाशत्वात्। अनवकाशं सवर्णदीर्घत्वमाद्गुणं बाधेत।

प्रयोजनाङ्गीकरणभाष्यम्– नैतदन्तरङ्गेऽस्ति—अनवकाशं परमिति। इहापि स्योनः स्योनेति शक्यं वक्तुम्। न वा परत्वाद् गुणस्येति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1024. **प्रयोजनवार्त्तिकम्**-12)

*** ऊङापोरेकादेश ईत्त्वलोपाभ्याम् ***

उदाहरणसमन्वयभाष्यम्– ऊङापोरेकादेश ईत्त्वलोपाभ्यां भवत्यन्तरङ्गतः। प्रयोजनम्। ईत्त्वादेकादेशः। खट्वीयति मालीयति। ईत्त्वं च प्राप्नोत्येकादेशश्च। परत्वादीत्त्वं स्याद्। एकादेशो भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– लोपादेकादेशः—कामण्डलेयः। भाद्रवाहेयः। लोपश्च प्राप्नोत्येकादेशश्च। परत्वाल्लोपः स्याद्। एकादेशो भवत्यन्तरङ्गतः।

आक्षेपभाष्यम्– अथ किमर्थम् 'ईत्त्वलोपाभ्याम्' इत्युच्यते, न 'लोपेत्त्वाभ्याम्' इत्येवोच्येत?

समाधानभाष्यम्– संख्यातानुदेशो मा भूदिति।

समाधानसाधकभाष्यम्– आपोप्येकादेशो लोपे प्रयोजयति—चौडिः बालाकिः।

(1025. **प्रयोजनवार्त्तिकम्**-13)

*** आत्त्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यः ***

भाष्यम्– आत्त्वनपुंसकोपसर्जनह्रस्वत्वानि अयवायावेकादेशतुग्विधिभ्यो भवत्यन्तरङ्गतः। वेञ् वानीयम्। शो शानीयम्। ग्लानीयम्। म्लै म्लानीयम्। ग्लाछत्रम्। म्लाछत्रम्। आत्त्वं च प्राप्नोत्येते च विधयः। परत्वादेते विधयः स्युः। आत्त्वं भवत्यन्तरङ्गतः।

उदाहरणसमन्वयभाष्यम्– नपुंसकोपसर्जनह्रस्वत्वं च प्रयोजनम्। अतिर्यत्र। अतिन्वत्र। अतिरिच्छत्रम्। अतिनुच्छत्रम्। आराशस्त्रीदम्। धानाशष्कुलीदम्। निष्कौशाम्बीदम्। निर्वाराणसीदम्। निष्कौशाम्बिच्छत्रम्। निर्वाराणसिच्छत्रम्। नपुंसकोपसर्जनह्रस्वत्वं च प्राप्नोत्येते विधयश्च। परत्वादेते विधयः स्युः। नपुंसकोपसर्जनह्रस्वत्वं भवत्यन्तरङ्गतः।

(1026. **प्रयोजनवार्त्तिकम्**-14)

*** तुग्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घेत्त्वमुमेत्त्वरीविधिभ्यः ***

भाष्यम्– यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्वमुमेत्त्वरीविधिभ्यस्तुग् भवत्यन्तरङ्गतः। यणादेशात्—अग्निचिदत्र। सोमसुदत्र। एकादेशात्—अग्निचिदिदम्। सोमसुदुदकम्। गुणात्—अग्निचिते सोमसुते। वृद्धेः—प्र ऋच्छकः प्रार्च्छकः। औत्त्वात्—अग्निचिति सोमसुति। दीर्घत्वात्—जगद्भ्याम्। जनगद्भ्याम्। ईत्त्वात्—जगत्यति जनगत्यति। मुमः—अग्निचिन्मन्यः सोमसुन्मन्यः। एत्त्वात्—जगद्भ्यः जनगद्भ्यः। रीविधेः—सुकृत्यति पापकृत्यति। (तुक् च प्राप्नोत्येते विधयश्च। परत्वादेते विधयः स्युः। तुग्भवत्यन्तरङ्गतः)।

(1027. **प्रयोजनवार्त्तिकम्**-15)

*** अनङानङ्भ्यां च ***

भाष्यम्– अनङानङ्भ्यां चेति वक्तव्यम्। अनङ्—सुकृत्। आनङ्—सुकृद्दुष्कृतौ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तुक् प्राप्नोति अनङानङौ च। परत्वादनङानङौ स्याताम्। तुग्भवत्यन्तरङ्गतः।)

(1028. प्रयोजनवार्त्तिकम्-16)

*** इयङादेशो गुणात् ***

भाष्यम्– इयङादेशो गुणाद्भवत्यन्तरङ्गतः। प्रयोजनम्। धियति रियति। इयङादेशः प्राप्नोति गुणश्च। परत्वाद्गुणः स्यात्। इयङादेशो भवत्यन्तरङ्गतः।

(1029. प्रयोजनवार्त्तिकम्-17)

*** उवङादेशश्च ***

भाष्यम्– उवङादेशश्चेति वक्तव्यम्। प्रादुद्रुवत्। प्रासुस्रुवत्।

(1030. प्रयोजनवार्त्तिकम्-18)

*** श्वेः सम्प्रसारणपूर्वत्वं यणादेशात् ***

भाष्यम्– श्वेः सम्प्रसारणपूर्वत्वं यणादेशाद् भवत्यन्तरङ्गतः। प्रयोजनम्—शुशुवतुः। शुशुवुः। पूर्वत्वं च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात्। पूर्वत्वं भवत्यन्तरङ्गतः।

(1061. प्रयोजनवार्त्तिकम्-19)

*** ह्व आकारलोपात् ***

भाष्यम्– ह्व आकारलोपात् पूर्वत्वं भवत्यन्तरङ्गतः। प्रयोजनम्—जुहुवतुः जुहुवुः। पूर्वत्वं च प्राप्नोत्याकारलोपश्च। परत्वादाकारलोपः स्यात्। पूर्वत्वं भवत्यन्तरङ्गतः।

(1032. प्रयोजनवार्त्तिकम्-20)

*** स्वरो लोपात् ***

भाष्यम्– स्वरो लोपाद्भवत्यन्तङ्गतः। प्रयोजनम्। औपगवी। सौदामनी। स्वरश्च प्राप्नोति लोपश्च। परत्वाल्लोपः स्यात्। स्वरो भवत्यन्तरङ्गतः।

(1033. प्रयोजनवार्त्तिकम्-21)

*** प्रत्ययविधिरेकादेशात् ***

भाष्यम्– प्रत्ययविधिरेकादेशाद्भवत्यन्तरङ्गतः। प्रयोजनम्—अग्निरिन्द्रः वायुरुदकम्। प्रत्ययविधिश्च प्राप्नोत्येकादेशश्च। परत्वादेकादेशः स्यात्। प्रत्ययविधिर्भवत्यन्तरङ्गतः।

(1034. प्रयोजनवार्त्तिकम्-22)

*** यणादेशाच्च ***

भाष्यम्– यणादेशाच्चेति वक्तव्यम्। अग्निरत्र वायुरत्र।

(1035. प्रयोजनवार्त्तिकम्-23)

*** लादेशो वर्णविधेः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– लादेशो वर्णविधेर्भवत्यन्तरङ्गतः। प्रयोजनम्। पचत्वत्र पठत्वत्र। लादेशश्च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात्। लादेशो भवत्यन्तरङ्गतः।

(1036. **प्रयोजनवार्त्तिकम्**-24)

* तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात् *

भाष्यम्– तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वराद्भवत्यन्तरङ्गतः। प्रयोजनं पूर्वशालाप्रियः अपरशालाप्रियः। तत्पुरुषान्तोदात्तत्वं च प्राप्नोति पूर्वपदप्रकृतिस्वरत्वं च। परत्वात्पूर्वपदप्रकृतिस्वरत्वं स्यात्। तत्पुरुषान्तोदात्तत्वं भवत्यन्तरङ्गतः।

उपसंहारभाष्यम्– एतान्येतस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या।

सिद्धान्तिभाष्यम्– यदि सन्ति प्रयोजनानीत्येषा क्रियते। ननु चेयं च कर्तव्या 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति। किं प्रयोजनम्? पचावेदम्। पचामेदम्। बहिरङ्गलक्षण-गुणस्यान्तरङ्गलक्षणमैत्वं मा भूदिति।

तृतीयाक्षेपभाष्यम्– उभे तर्हि कर्तव्ये।

सिद्धान्तिभाष्यम्– नेत्याह। अनयैव सिद्धम्। इहापि स्योनः स्योनेति असिद्धत्वा-द्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणो यणादेशो भविष्यति।

आक्षेपभाष्यम्– यदि 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्युच्यते अक्षद्यूः हिरण्यद्यूः असिद्धत्वाद्बहिरङ्गलक्षणस्योठोन्तरङ्गलक्षणो यणादेशो न प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्युक्त्वा ततो वक्ष्यामि 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति।

आक्षेपभाष्यम्– सा तर्ह्येषा परिभाषा कर्तव्या।

सिद्धान्तिभाष्यम्– न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं 'षत्वतुकोरसिद्धः' इत्याह।

आक्षेपभाष्यम्– इयं तर्हि परिभाषा कर्तव्या—'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति।

सिद्धान्तिभाष्यम्– एषा च न कर्तव्या, आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति, यदयं 'वाह ऊट्' इति ऊठं शास्ति।

अन्तरङ्गपरिभाषादूषणकरणम्

(1037. **दूषणवार्त्तिकम्**-25)

* तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात् *

भाष्यम्– तस्यैतस्य लक्षणस्य दोषः पूर्वोत्तरपदयोर्वृद्धिस्वरावेकादेशादन्तरङ्गतोभि-निर्वृत्तान्न प्राप्नुतः। पूर्वैषुकामशमः अपरैषुकामशमः गुडोदकं तिलोदकम्। 'उदके केवले' इति पूर्वोत्तरपदयोर्व्यपवर्गाभावान्न स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूषणपरिहारभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—'पूर्वोत्तरपदयोस्तावत्कार्यं भवति, नैकादेशः' इति, यदयं 'नेन्द्रस्य परस्य' इति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? इन्द्रे द्वावचौ। तत्रैको 'यस्येति च' इति लोपेनापह्रियते, अपर एकादेशेन, ततोऽनच्क इन्द्रः सम्पन्नः, तत्र कः प्रसङ्गो वृद्धेः। पश्यति त्वाचार्यः—'पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेशः' इति। ततो 'नेन्द्रस्य परस्य' इति प्रतिषेधं शास्ति।

(1038. दूषणवार्त्तिकम्-26)

*** यणादेशादियुवौ ***

भाष्यम्– यणादेशादियुवौ अन्तरङ्गतोभिनिर्वृत्तान्न प्राप्नुतः। वैयाकरणः सौवश्व इति। लक्षणं हि भवति—'य्वोरचि वृद्धिप्रसङ्गे इयुवौ भवतः' इति।

दूषणनिरासभाष्यम्– नैष दोषः। अनवकाशावियुवौ। अचीत्युच्यते।

आक्षेपभाष्यम्– किं पुनः कारणमचीत्युच्यते?

आक्षेपभञ्जनभाष्यम्– इह मा भूताम्—ऐतिकायनः औपगव इति।

आक्षेपरञ्जनभाष्यम्– स्तामत्रेयुवौ, 'लोपो व्योर्वलि' इति लोपो भविष्यति।

आक्षेपभञ्जनभाष्यम्– यत्र तर्हि लोपो नास्ति—प्रैयमेधः प्रैयङ्गव इति।

(1039. दूषणवार्त्तिकम्-27)

*** उसि पररूपाच्च ***

भाष्यम्– उसि पररूपाच्चान्तरङ्गतोभिनिर्वृत्तादियादेशो न प्राप्नोति। पचेयुः यजेयुः।

दूषणभञ्जनभाष्यम्– नैष दोषः। नैवं विज्ञायते—या इत्येतस्य इय् भवतीति। कथं तर्हि? यासित्येतस्य इय् भवतीति।

(1040. दूषणवार्त्तिकम्-28)

*** लुक्लोपयणयवायावेकादेशेभ्यः ***

भाष्यम्– लोपयणयवायावेकादेशेभ्यो लुक् बलीयानिति वक्तव्यम्। लोपात्—गोमान् प्रियो यस्य गोमत्प्रियः। गोमानिवाचरति गोमत्यते यवमत्यते। यणादेशात्—ग्रामण्यः कुलं ग्रामणिकुलम्। सेनान्यः कुलं सेनानिकुलम्। अयवायावेकादेशेभ्यः—गवे हितं गोहितम्। रायः कुलं रैकुलम्। नावः कुलं नौकुलम्। वृकाद्भयं वृकभयम्। लुक् च प्राप्नोत्येते विधयश्च परत्वादेते विधयः स्युः। लुग्बलीयानिति वक्तव्यम्। लुक् यथा स्यात्। विप्रतिषेधे परं कार्यम्।।2।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये

प्रथमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमेऽध्याये चतुर्थे पादे द्वितीयमाह्निकम्

विधिशेषप्रकरणे नदीसञ्ज्ञाप्रकरणम्

(166. **नदीसञ्ज्ञासूत्रम्** 1.4.2 आ. 1)

243. यू स्त्र्याख्यौ नदी 1.4.3

यूपदनिर्णयाधिकरणम्

अनुयोगभाष्यम्– यू इति किमर्थम्?

समाधानभाष्यम्– खट्वा। माला। किञ्च स्यात्? खट्वाबन्धुः मालाबन्धुः 'नदी बन्धुनि' इत्येष स्वरः प्रसज्येत। इह च बहुखट्वक इति 'नद्यृतश्च' इति नित्यः कप्प्रसज्येत।

समाधानबाधकभाष्यम्– नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—नापो नदीसञ्ज्ञा भवतीति यदयं 'ङेराम्नद्याम्नीभ्यः' इति पृथगाब्ग्रहणं करोति।

समाधानान्तरभाष्यम्– इह तर्हि—मात्रे मातुरिति 'आण्नद्याः' इत्याट् प्रसज्येत।

इवर्णोवर्णयोर्दीर्घत्वनिर्णयाधिकरणम्

अनुयोगभाष्यम्– किं पुनरिदं दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोः?

प्रत्यनुयोगभाष्यम्– किं चातः?

दीर्घग्रहणे दूषणभाष्यम्– यदि दीर्घयोर्ग्रहणं यू इति निर्देशो नोपपद्यते। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्यते। उत्तरत्र च संज्ञिविशेषणं न प्रकल्पेत—यू ह्रस्वाविति। यदि यू, न ह्रस्वौ। अथ ह्रस्वौ, न यू। यू ह्रस्वौ चेति विप्रतिषिद्धम्।

ह्रस्वग्रहणे दूषणभाष्यम्– अथ ह्रस्वयोः 'हे शकटे' अत्रापि प्रसज्येत।

दूषणबाधकभाष्यम्– नैष दोषः। अवश्यमत्र विभाषा नदीसञ्ज्ञैषितव्या। उभयं हीष्यते—हे शकटि, हे शकटे इति च।

दूषणान्तरभाष्यम्– इह तर्हि शकटिबन्धुरिति 'नदी बन्धुनि' इत्येष स्वरः प्रसज्येत। इह च बहुशकटिरिति 'नद्यृतश्च' इति कप्प्रसज्येत।

नियमेनदूषणपरिहारभाष्यम्– नैष दोषः। 'ङिति ह्रस्वश्च' इत्ययं नियमार्थो भविष्यति—ङित्येव यू ह्रस्वौ नदीसञ्ज्ञौ भवतः, नान्यत्रेति।

नियमत्वबाधकाक्षेपभाष्यम्– कैमर्थक्यान्नियमो भवति?

नियमत्वसाधकसमाधानभाष्यम्– विधेयं नास्तीति कृत्वा।

नियमत्वबाधनबाधकभाष्यम्– इह चास्ति विधेयम्। किम्? नित्या नदी सञ्ज्ञा प्राप्ता, सा विभाषा विधेया। तत्रापूर्वो विधिरस्तु नियमो वास्त्विति। अपूर्व एव विधिर्भविष्यति न नियमः।

नियमत्ववादिनः प्रश्नभाष्यम्– अथायं नित्यो योगः स्यात् प्रकल्पेत नियमः?

विधित्ववादिनः समाधानभाष्यम्– बाढं प्रकल्पेत।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियमत्वसम्पादकनित्यत्वसाधकभाष्यम्– नित्यस्तर्हि भविष्यति। तत्कथम्? योगविभागः करिष्यते—इदमस्ति 'यू स्त्र्याख्यौ नदी' 'नेयङुवङ्स्थानावस्त्री' 'वामी'। ततो 'ङिति' ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसञ्ज्ञौ न भवतः। ततो 'ह्रस्वौ' ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसञ्ज्ञौ भवतः। इयङुवङ्स्थानौ वा नेति निवृत्तम्।

अनुपपत्तिभाष्यम्– यद्येवं शकटये। अत्र गुणो न प्राप्नोति।

अनुपपत्तिपरिहारभाष्यम्– द्वितीयो योगविभागः करिष्यते। शेषग्रहणं न करिष्यते। कथम्? इदमस्ति—'यू स्त्र्याख्यौ नदी' 'नेयङुवङ्स्थानावस्त्री' 'वामी'। ततो 'ङिति' ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसञ्ज्ञौ न भवतः। ततः 'ह्रस्वौ' ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसञ्ज्ञौ भवतः। इयङुवङ्स्थानौ वा नेति निवृत्तम्। ततो 'घि' घिसञ्ज्ञौ भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति। ततः—'असखि'। सखिवर्जितौ च यू ह्रस्वौ घिसञ्ज्ञौ भवतः। स्त्र्याख्यौ ङितीति च निवृत्तम्।

योगविभागवैयर्थ्यभाष्यम्– यदि तर्हि शेषग्रहणं न क्रियते नार्थ एकेनापि योगविभागेन। अविशेषेण नदीसञ्ज्ञोत्सर्गः। तस्याः ह्रस्वयोर्घिसञ्ज्ञा बाधिका। तस्यां नित्यं प्राप्तायामियं ङिति विभाषाऽऽरभ्यते।

दीर्घग्रहणपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु दीर्घयोः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—निर्देशो नोपपद्यते। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्यत इति।

समाधानभाष्यम्– 'वा छन्दसि' इत्येवं भविष्यति।

समाधानबाधकभाष्यम्– छन्दसीत्युच्यते। न चेदं छन्दः।

समाधानसाधकभाष्यम्– छन्दोवत्सूत्राणि भवन्तीति।

दूषणान्तरनिराकरणभाष्यम्– यदप्युच्यते—'उत्तरत्र विशेषणं न प्रकल्पेत—यू ह्रस्वाविति। यदि यू न ह्रस्वौ। अथ ह्रस्वौ, न यू। यू ह्रस्वाविति च विप्रतिषिद्धम्' इति। नैतद्विप्रतिषिद्धम्। आहायं यू ह्रस्वाविति। यदि यू न ह्रस्वौ, अथ ह्रस्वौ न यू। त एवं विज्ञास्यामः—य्वोर्यौ ह्रस्वाविति। कौ च य्वोर्ह्रस्वौ? सवर्णौ।

स्त्र्याख्यशब्दसाधनाधिकरणम्

अनुयोगभाष्यम्– अथ स्त्र्याख्याविति कोऽयं शब्दः?

समाधानभाष्यम्– स्त्रियमाचक्षाते स्त्र्याख्यौ।

समाधानबाधकभाष्यम्– यद्येवं स्त्र्याख्यायाविति प्राप्नोति। अनुपसर्गे हि को विधीयते।

एकदेशिसमाधानसाधकभाष्यम्– न तर्हीदानीमिदं भवति—'यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः सोयमुञ्छेन जीवति।' छन्दोवत्कवयः कुर्वन्ति।

समाधानबाधकभाष्यम्– नह्येषा इष्टिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्– एवं तर्हि कर्मसाधनो भविष्यति। स्त्रियामाख्यायेते स्त्र्याख्यौ।

समाधानबाधकभाष्यम्– यदि कर्मसाधनः कृत्स्त्रिया धातुस्त्रियाश्च न सिद्ध्यति तन्त्र्यै लक्ष्म्यै श्रियै भ्रुवै।

समाधानान्तरभाष्यम्– एवं तर्हि बहुव्रीहिर्भविष्यति—स्त्रियामाख्या अनयोः स्त्र्याख्यौ।

समाधानबाधकभाष्यम्– एवमपि कृत्स्त्रिया धातुस्त्रियाश्च न सिध्यति तन्त्र्यै लक्ष्म्यै श्रियै भ्रुवै।

समाधानान्तरभाष्यम्– एवं तर्हि विच् भविष्यति।

कप्रत्ययाभ्युपगमभाष्यम्– अथवा पुनरस्तु क एव—स्त्रियमाचक्षाते स्त्र्याख्याविति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम् 'स्त्र्याख्यायाविति प्राप्नोति अनुपसर्गे हि को विधीयते' इति।

समाधानभाष्यम्– मूलविभुजादिपाठात्को भविष्यति। एवं च कृत्वा सोप्यदोषो भवति यदुक्तम्—

यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ।
ब्राह्मणेभ्यः प्रियाख्येभ्यः सोयमुञ्छेन जीवति।। इति।

आख्याग्रहणप्रयोजनाधिकरणम्

अनुयोगभाष्यम्– अथाख्याग्रहणं किमर्थम्?

(1041. **समाधानवार्त्तिकम्-1**)

*** नदीसञ्ज्ञायामाख्याग्रहणं स्त्रीविषयार्थम् ***

भाष्यम्– नदीसञ्ज्ञायामाख्याग्रहणं क्रियते स्त्रीविषयार्थम्। स्त्रीविषयावेव यौ नित्यं तयोरेव नदीसञ्ज्ञा यथा स्यात्। इह मा भूत्—ग्रामण्ये सेनान्ये स्त्रियै इति।

उपसर्जने न दीसञ्ज्ञासाधनाधिकरणम्

(1024. **आक्षेपवार्त्तिकम्-2**)

*** प्रथमलिङ्गग्रहणं च ***

भाष्यम्– प्रथमलिङ्गग्रहणं च कर्तव्यम्। प्रथमलिङ्गे यौ स्त्र्याख्यौ इति वक्तव्यम्।

अनुयोगभाष्यम्– किं प्रयोजनम्?

(1043. **समाधानवार्त्तिकम्-3**)

*** प्रयोजनं क्विब्लुप्समासाः ***

भाष्यम्– क्विप्—कुमार्यै ब्राह्मणाय। लुप्—खरकुट्यै ब्राह्मणाय। समास—अतितन्त्र्यै ब्राह्मणाय। अतिलक्ष्म्यै ब्राह्मणाय।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1044. **समाधानसाधकवार्त्तिकम्**- 4)

*** अवयवस्त्रीविषयत्वात्सिद्धम् ***

भाष्यम्– अवयवोऽत्र स्त्रीविषयः। तदाश्रया नदीसञ्ज्ञा भविष्यति।

(1045. **आक्षेपवार्त्तिकम्**- 5)

*** अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधप्रसङ्गे यणस्थानप्रतिषेधप्रसङ्गोवयवस्येयङुवङ्स्थानत्वात् ***

भाष्यम्– अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधप्रसङ्गे यणस्थानयोरपि य्वोः प्रतिषेधः प्रसज्येत। आध्यै ब्राह्मण्यै। किं कारणम्? अवयवस्य इयङ्स्थानत्वात्। अवयवोऽत्र इयङ्स्थानः।

(1046. **समाधानवार्त्तिकम्**- 6)

*** सिद्धं त्वङ्गरूपग्रहणाद् यस्याङ्गस्येयुवौ तत्प्रतिषेधात् ***

भाष्यम्– सिद्धमेतत्। कथम्। अङ्गरूपं गृह्यते यस्याङ्गस्य इयुवौ भवतस्तस्येदं ग्रहणम्। न चैतस्याङ्गस्य इयुवौ भवतः।

(1047. **नियमवार्त्तिकम्**- 7)

*** ह्रस्वेयुव्स्थानप्रवृत्तौ च स्त्रीवचने ***

भाष्यम्– ह्रस्वौ च इयुव्स्थानौ च प्रवृत्तौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेव नदीसञ्ज्ञौ भवत इति वक्तव्यम्। शकट्यै अतिशकट्यै ब्राह्मण्यै। क्व मा भूत्? शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्व मा भूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्व मा भूत्? श्रिये अतिश्रिये ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। क्व मा भूत्? भ्रुवे अतिभ्रुवे ब्राह्मणाय।

व्याख्यान्तरभाष्यम्– अपर आह—

*** ह्रस्वेयुव्स्थानप्रवृत्तौ स्त्रीवचने ***

भाष्यम्– ह्रस्वौ च इयुव्स्थानौ च प्रवृत्तावपि स्त्रीवचनावेव नदीसञ्ज्ञौ भवत इति वक्तव्यम्। किं प्रयोजनम्? शकट्यै अतिशकट्यै ब्राह्मण्यै। क्व मा भूत्? शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्व मा भूत्? धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्व मा भूत्? श्रिये अतिश्रिये ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। क्व मा भूत्? भ्रुवे अतिभ्रुवे ब्राह्मणाय।

अनुयोगभाष्यम्– किमर्थं पुनरिदमुच्यते?

समाधानभाष्यम्– प्रथमलिङ्गग्रहणं चोदितं तद्द्वेष्यं विजानीयात्सर्वमेतद्विकल्पते इति तदाचार्यः सुहृद्भूत्वान्वाचष्टे ह्रस्वौ चेयुव्स्थानौ च प्रवृतौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेवेति। यू स्त्र्याख्यौ नदी।।3।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ घिसंज्ञाप्रकरणम्

(167. घिसञ्ज्ञाविकल्पसूत्रम् 1.4.2 आ. 2)

249. षष्ठीयुक्तश्छन्दसि वा 1.4.9

(1048. आक्षेपवार्त्तिकम्-1)

*** योगविभागः ***

भाष्यम्– योगविभागः कर्तव्यः। 'षष्ठीयुक्तश्छन्दसि' षष्ठीयुक्तः पतिशब्दश्छन्दसि घिसञ्ज्ञो भवति। ततो 'वा' वा छन्दसि सर्वे विधयो भवन्ति। सुपां व्यत्ययः। तिङां व्यत्ययः। वर्णव्यत्ययः। लिङ्गव्यत्ययः। कालव्यत्ययः। पुरुषव्यत्ययः। आत्मनेपदव्यत्ययः। परस्मैपदव्यत्ययः। सुपां व्यत्ययः—'युक्ता मातासीद्धुरि दक्षिणायाः' दक्षिणायामिति प्राप्ते। तिङां व्यत्ययः—'चषालं ये अश्वयूपाय तक्षति' तक्षन्तीति प्राप्ते। वर्णव्यत्ययः—'त्रिष्टुभौजः शुभितमुग्रवीरम्' सुहितमिति प्राप्ते। लिङ्गव्यत्ययः—'मधोर्गृह्णाति' मधोस्तृप्ता इवासते' मधुन इति प्राप्ते। कालव्यत्ययः—'श्वोऽग्नीनाधास्यमानेन' 'श्वः सोमेन यक्ष्यमाणेन'। श्व आधाता श्वो यष्टेति प्राप्ते। पुरुषव्यत्ययः—'अधा स वीरैर्दशभिर्वियूयाः' वियूयादिति प्राप्ते। आत्मनेपदव्यत्ययः—'ब्रह्मचारिणमिच्छते' इच्छतीति प्राप्ते। परस्मैपदव्यत्ययः—'प्रतीपमन्य ऊर्मिर्युध्यति' 'अन्वीपमन्य ऊर्मिर्युध्यति' युध्यत इति प्राप्ते। षष्ठीयुक्तः।।9।।

(168. अङ्गसञ्ज्ञासूत्रम् 1.4.2 आ. 3)

253. यस्मात्प्रत्यविधिस्तदादि प्रत्ययेऽङ्गम् 1.4.13

पदकृत्यकथनाधिकरणम्

आक्षेपभाष्यम्– अथ यस्माद्ग्रहणं किमर्थम्?

समाधानभाष्यम्– यस्मादिति व्यपदेशाय।

अनुयोगभाष्यम्– अथ प्रत्ययग्रहणं किमर्थम्।

समाधानभाष्यम्– 'यस्माद्विधिस्तदादि प्रत्ययेऽङ्गम्' इतीयत्युच्यमाने स्त्री इयती स्त्रीयतीत्यत्रापि प्रसज्येत। प्रत्ययग्रहणे पुनः क्रियमाणे न दोषो भवति।

अनुयोगभाष्यम्– अथ विधिग्रहणं किमर्थम्?

समाधानभाष्यम्– 'यस्मात्प्रत्ययस्तदादि प्रत्ययेऽङ्गम्' इतीयत्युच्यमाने दधि अधुना, मधु अधुना, अत्रापि प्रसज्येत। विधिग्रहणे पुनः क्रियमाणे न दोषो भवति। तदेतत्प्रत्ययग्रहणेन विधिग्रहणेन च समुदितेन क्रियते सन्नियोगः—यस्माद्यः प्रत्यो विधीयते तदादि तस्मिन्नङ्गसञ्ज्ञं भवतीति।

अनुयोगभाष्यम्– अथ तदादिग्रहणं किमर्थम्?

(1049. समाधानवार्त्तिकम्-1)

*** अङ्गसञ्ज्ञायां तदादिग्रहणं स्यादिनुमर्थम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अङ्गसञ्ज्ञायां तदादिग्रहणं क्रियते स्याद्यर्थं नुमर्थं च। स्याद्यर्थं तावत्— करिष्याव: करिष्याम:। नुमर्थम्—कुण्डानि वनानि।

(1050. आक्षेपवार्त्तिकम्-2)

* मित्सुटोरुपसंख्यानम् *

भाष्यम्– मित्वत: सुड्वतश्चोपसंख्यानं कर्तव्यम्। मित्वत:—भिनत्ति। छिनत्ति। अभिनत्। अच्छिनत्। सुड्वत:—सञ्चस्करतु: सञ्चस्करु:।

आक्षेपबाधकभाष्यम्– किं पुन: कारणं न सिध्यति सुटो बहिरङ्गत्वात्। बहिरङ्ग: सुट् अन्तरङ्गो गुण:। असिद्धं बहिरङ्गमन्तरङ्गे।

वक्ष्यत्येतत् 'संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम्'।

संयोगादिग्रहणवैयर्थ्यभाष्यम्– यदि संयोगोपधग्रहणं क्रियते नार्थ: संयोगादिग्रहणेन। इहापि सस्वरतु: सस्वरुरिति संयोगोपधस्येत्येव सिद्धम्।

वैयर्थ्यनिरासभाष्यम्– भवेदेवमर्थेन नार्थ:। इदं तु न सिध्यति सञ्चस्करतु: सञ्चस्करुरिति।

अनुयोगभाष्यम्– किं पुन: कारणं न सिध्यति?

अनुयोगसमाधानभाष्यम्– इह तस्य वा ग्रहणं तदादेर्वा। न चेदं तद्, नापि तदादि।

(1051. समाधानवार्त्तिकम्-3)

* सिद्धं तु तदाद्यादिवचनात् *

भाष्यम्– सिद्धमेतत्। कथम्? तदाद्याद्यङ्गसञ्ज्ञं भवतीति वक्तव्यम्। किमिदं तदाद्यादीति? तस्यादिस्तदादिस्तदादिरादिर्यस्य तदिदं तदाद्यादीति।

आक्षेपभाष्यम्– स तर्हि तथा निर्देश: कर्तव्य:?

समाधानभाष्यम्– न कर्तव्य:। उत्तरपदलोपोऽत्र द्रष्टव्य:। तद्यथा—ऊष्ट्रमुखमिव मुखमस्य उष्ट्रमुख:, खरमुख:। एवं तदाद्यादि तदादीति।

(1052. समाधानान्तरवार्त्तिकम्-4)

* तदेकदेशविज्ञानाद्वा सिद्धम् *

भाष्यम्– तदेकदेशविज्ञानाद्वा सिद्धमेतत्। तदेकदेशभूतं तद्ग्रहणेन गृह्यते। तद्यथा गङ्गा यमुना देवदत्तेति। अनेका नदी गङ्गां यमुनां प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते। तथा—देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते।

समाधानबाधकभाष्यम्– विषम उपन्यास:। इह केचिच्छब्दा अव्क्तपरिमाणानामर्थानां वाचका भवन्ति—य एते संख्याशब्दा:, परिमाणशब्दाश्च। पञ्च सप्तेति। त एकेनाप्यपाये न भवन्ति। द्रोण: खारी आढकमिति नैवाधिके भवन्ति न च न्यूने। केचिद्यावदेव तद्भवति तावदेवाहु:—यथैते जातिशब्दा गुणशब्दाश्च। तैलं घृतमिति खार्यामपि भवति द्रोणेऽपि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रेऽपि द्रव्ये। अङ्गसंज्ञा चाप्यक्तपरिमाणानां क्रियते, सा केनाधिकस्य स्यात्।

समाधानसाधकभाष्यम्– एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति यदयं 'नेदमदसोरकोः' इति सककारयोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्? इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात्। पश्यति त्वाचार्यः—'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति, ततः सककारयोः प्रतिषेधं शास्ति।

अनुयोगभाष्यम्– अथ द्वितीयं प्रत्ययग्रणं किमर्थम्?

(1053. **समाधानवार्त्तिकम्**-5)

*** प्रत्ययग्रहणं पदादावप्रसङ्गार्थम् ***

भाष्यम्– प्रत्ययग्रहणं क्रियते। पदादावङ्गसञ्ज्ञा मा भूदिति। किं च स्यात्? 'स्त्र्यर्थं श्र्यर्थं भ्वर्थम्' अङ्गस्येयङुवङौ स्याताम्।

(1054. **समाधानवार्त्तिकम्**-6)

*** परिमाणार्थं च ***

भाष्यम्– परिमाणार्थं च द्वितीयं प्रत्ययग्रहणं क्रियते। 'यस्मात्प्रत्ययविधिस्तदाद्यङ्गम्' इतीयत्युच्यमाने दाशतयस्याप्यङ्गसञ्ज्ञा प्रसज्येत।

प्रत्ययग्रहणपरिभाषाधिकरणम्

आक्षेपभाष्यम्– तत्तर्हि कर्तव्यम्?

समाधानभाष्यम्– न कर्तव्यम्। केनेदानीमङ्गकार्यं भविष्यति? प्रत्यय इति प्रकृत्याङ्गकार्यमध्येष्ये।

आक्षेपभाष्यम्– यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे। प्राकरोत् उपैहिष्ट। उपसर्गात्पूर्वावडाटौ प्राप्नुतः।

(1055. **समाधानवार्त्तिकम्**-7)

*** सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ***

भाष्यम्– सिद्धमेतत्। कथम्? 'प्रत्ययग्रहणे यस्मात्स प्रत्ययो विहितस्तदादेस्तदन्तस्य च ग्रहणं भवति' इत्येषा परिभाषा कर्तव्या।

अनुयोगभाष्यम्– कः पुनरत्र विशेषः, एषा परिभाषा क्रियेत, प्रत्ययग्रहणं वा?

समाधानभाष्यम्– अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि।

(1056. **प्रयोजनवार्त्तिकम्**-8)

*** प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः ***

भाष्यम्– धातु—देवदत्तश्चिकीर्षति। सङ्घातस्य धातुसञ्ज्ञा प्राप्नोति। प्रातिपदिक—देवदत्तो गार्ग्यः। सङ्घातस्य प्रातिपदिकसञ्ज्ञा प्राप्नोति। प्रत्यय—महान्तं पुत्रमिच्छति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्घातात्प्रत्ययोत्पत्तिः प्राप्नोति। समास—ऋद्धस्य राज्ञः पुरुषः। सङ्घातस्य समाससञ्ज्ञा प्राप्नोति। तद्धितविधि—देवदत्तो गार्ग्यायणः। सङ्घातात्तद्धितोत्पत्तिः प्राप्नोति। स्वर—देवदत्तो गार्ग्यः। सङ्घातस्य 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं प्राप्नोति। 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवति' इति न दोषो भवति।

आक्षेपभाष्यम्– सा तर्ह्येषा परिभाषा कर्तव्या?

समाधानभाष्यम्– न कर्तव्या। एवं वक्ष्यामि— 'यस्मात्प्रत्ययविधिस्तदादि प्रत्यये' गृह्यमाणे गृह्यते। ततः 'अङ्गम्' अङ्गसञ्ज्ञं च भवति यस्मात्प्रत्ययविधिस्तदादि प्रत्यये।

कृद्ग्रहणपरिभाषाधिकरणम्

आक्षेपभाष्यम्– यदि 'प्रत्ययग्रहणे यस्मात्स विहितः तदादेर्ग्रहणं भवति' इत्युच्यते, 'अवतप्तेनकुलस्थितं त एतत्' 'उदकेविशीर्णं त एतत्' सगतिकेन सनकुलेन च समासो न प्राप्नोति।

समाधानभाष्यम्– एवं तर्हि 'प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति' इत्युक्त्वा ततो वक्ष्यामि—'कृद्ग्रहणे गतिकारकपूर्वस्यापि' 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति' इत्येषा परिभाषा कर्तव्या।

आक्षेपभाष्यम्– कान्येतस्याः परिभाषायाः प्रयोजनानि?

(1057. **प्रयोजनवार्त्तिकम्**-9)

*** प्रयोजनं समासतद्धितविधिस्वराः ***

भाष्यम्– समास—अवतप्तेनकुलस्थितं त एतत्। उदकेविशीर्णं त एतत्। सगतिकेन सनकुलेन च समासः सिद्धो भवति। समास। तद्धितविधि—साङ्कूटिनम्। व्यावक्रोशी। सङ्घातात्तद्धितोत्पत्तिः सिद्धा भवति। तद्धितविधि। स्वर—दूराद् आगतः दूरादागत इति। 'अन्तः' 'थाथघञ्क्ताजबित्रकाणाम्' इत्येष स्वरः सिद्धो भवति 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति' इति।

आक्षेपभाष्यम्– सा तर्ह्येषा परिभाषा कर्तव्या?

समाधानभाष्यम्– न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति—भत्येषा परिभाषेति, यदयं 'गतिरनन्तरः' इत्यनन्तरग्रहणं करोति।। यस्मात्प्रत्यय।।13।।

अथ पदसञ्ज्ञाप्रकरणम्

(160. पदसञ्ज्ञासूत्रम् 1.4.2 आ. 4)

254. सुप्तिङन्तं पदम् 1.4.14

सञ्ज्ञाविधिपरिभाषाधिकरणम्

आक्षेपभाष्यम्– अन्तग्रहणं किमर्थम्। 'न सुप्तिङ् पदम्' इत्येवोच्येत? केनेदानीं तदन्तानां भविष्यति? तदन्तविधिना।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– अत उत्तरं पठति—

(1058. **समाधानवार्त्तिकम्**-1)

*** पदसञ्ज्ञायामन्तग्रहणमन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् ***

भाष्यम्– पदसञ्ज्ञायामन्तग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्? एतज्ज्ञापयत्याचार्यः 'अन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणं तदन्तविधिर्न भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? 'तरप्तमपौ घः' तरप्तमबन्तस्य घसञ्ज्ञा न भवति। किं च स्यात्? कुमारी गौरितरा घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत।

आक्षेपभाष्यम्– यद्येतज्ज्ञाप्यते 'सनाद्यन्ता धातवः' इत्यन्तग्रहणं कर्तव्यम्। 'कृत्तद्धितसमासाश्च' अन्तग्रहणं कर्तव्यम्। इदं तृतीयं ज्ञापकार्थम्।

समाधानभाष्यम्– द्वे तावत्क्रियेते न्यास एव। यदप्युच्यते—'कृत्तद्धितसमासाश्च' इत्यन्तग्रहणं कर्तव्यमिति। न कर्तव्यम्। अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवत्, न केवलाः कृतस्तद्धिता वा। सुप्तिङन्तम्।।14।।

(162. **पदसञ्ज्ञानियमसूत्रम्** 1.4.2 आ. 5)

255. नः क्ये 1.4.15

नियमत्वस्थानाधिकरणम्

अनुयोगभाष्यम्– किमर्थमिदमुच्यते। न 'सुबन्तं पदम्' इत्येव सिद्धम्?

समाधानभाष्यम्– नियमार्थोऽयमारम्भः। नान्तमेव क्ये पदसञ्ज्ञं भवति नान्यत्। क्व मा भूत्? वाच्यति स्रुच्यति। नः क्ये।।15।।

(170. **पदसञ्ज्ञासूत्रम्** 1.4.2 आ. 6)

257. स्वादिष्वसर्वनामस्थाने 1.4.17

इष्टानुपपत्तिवारणाधिकरणम्

आक्षेपभाष्यम्– असर्वनामस्थान इत्युच्यते तत्र ते राजा तक्षा 'असर्वनामस्थान' इति प्रतिषेधः प्रसज्येत।

(1059. **समाधानवार्त्तिकम्**-1)

*** नाप्रतिषेधात् ***

भाष्यम्– नायं प्रसज्यप्रतिषेधः—'सर्वनामस्थाने-न' इति। किं तर्हि? पर्युदासोऽयम्—यदन्यत्सर्वनामस्थानादिति। सर्वनामस्थानेऽव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1060. समाधानान्तरवार्त्तिकम्- 2)

*** अप्राप्तेर्वा ***

भाष्यम्- अथवा—अनन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति।

आक्षेपभाष्यम्- ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते।

परिहारभाष्यम्- नोत्सहते प्रतिषिद्धा सती बाधितुम्।

(1061. समाधानान्तरवार्त्तिकम्- 3)

*** योगविभागाद्वा ***

भाष्यम्- अथवा योगविभागः करिष्यते—'स्वादिषु' पूर्वं पदसञ्ज्ञं भवति। ततः 'सर्वनामस्थानेऽयचि' पूर्वं पदसञ्ज्ञं भवति। ततः 'भम्' भसञ्ज्ञं च यजादावसर्वनामस्थान इति।

आक्षेपभाष्यम्- यदि तर्हि सावपि पदं भवति, एचः प्लुतविकारे पदान्तग्रहणं चोदितम्। इह मा भूत्—भद्रं करोषि गौरिति। तस्मिन्क्रियमाणेऽपि प्राप्नोति।

समाधानभाष्यम्- वाक्यपदयोरन्त्यस्येत्येवं तत्।

शेषपूरणाधिकरणम्

(1062. आक्षेपवार्त्तिकम्- 4)

*** भुवद्वद्भ्यो धारयद्वद्भ्यः पदसञ्ज्ञा ***

भाष्यम्- एतयोः पदसञ्ज्ञा वक्तव्या। भुवद्वद्भ्यः धारयद्वद्भ्यः। स्वादिष्व सर्वनाम-स्थाने।।17।।

अथ भसञ्ज्ञाप्रकरणम्

172. भसञ्ज्ञासूत्रम् 1.4.2 आ. 7)

258. यचि भम् 1.4.18

अनिष्टापत्तिवारणाधिकरणम्

(1063 आक्षेपवार्त्तिकम्- 1)

*** भसञ्ज्ञायामुत्तरपदलोपे षषः प्रतिषेधः ***

भाष्यम्- भसञ्ज्ञायामुत्तरपदलोपे षषः प्रतिषेधो वक्तव्यः। अनुकम्पितः षडङ्गुलिः षडिकः।

(1064. समाधानवार्त्तिकम्- 2)

*** सिद्धमचः स्थानिवत्त्वात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– सिद्धमेतत्। कथम्? अचः स्थानिवद्भावाद्भसञ्ज्ञा न भविष्यति।

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नोति—वागाशीर्दत्तः वाचिक इति।

समाधानभाष्यम्– वक्ष्यत्येतत्—'सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनात्।'

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नोति—षडङ्गुलिः षडिक इति।

परिहारभाष्यम्– वक्ष्यत्येतत्—'षषष्ठाजादिवचनात्सिद्धम् इति।'

शेषपूरणाधिकरणम्

(1065. आक्षेपवार्त्तिकम्-3)

*** नभोङ्गिरोमनुषां वत्युपसंख्यानम् ***

भाष्यम्– नभोङ्गिरोमनुषां वत्युपसंख्यानं कर्तव्यम्। नभस्वत्। अङ्गिरस्वत्। मनुष्वत्।

(1066. आक्षेपवार्त्तिकम्-4)

*** वृषण्वस्वश्वयोश्च ***

भाष्यम्– वृषण इत्येतस्य वस्वश्वयोर्भसञ्ज्ञा वक्तव्या। वृषण्वसुः। 'वृषणश्वस्य यच्छिरः' 'वृषणश्वस्य मेने'। यचि भम्।।18।।

(173. भसञ्ज्ञासूत्रम् 1.4.2 आ. 8)

259. तसौ मत्वर्थे 1.4.19

अर्थग्रहणप्रयोजनाधिकरणम्

अनुयोगभाष्यम्– अर्थग्रहणं किमर्थम्। न 'तसौ मतौ' इत्येवोच्येत?

समाधानभाष्यम्– 'तसौ मतौ' इतीयत्युच्यमाने इहैव स्यात्—पयस्वान् यशस्वान्। इह न स्यात्—पयस्वी यशस्वी। अर्थग्रहणे पुनः क्रियमाणे मतुपि च सिद्धं भवति, यश्चान्यस्तेन समानार्थस्तस्मिंश्च।

आक्षेपभाष्यम्– यद्यर्थग्रहणं क्रियते पयस्वान् अत्र न प्राप्नोति। किं कारणम्? नहि मतुब् मतुबर्थे वर्तते।

परिहारभाष्यम्– मतुबपि मतुबर्थे वर्तते। तद्यथा—देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते यदि देवदत्तोऽपि ब्राह्मणो भवति, सोप्यानीयते। तसौ मत्वर्थे।।19।।

(174. भसञ्ज्ञासूत्रम् 1.4.2 आ. 9)

260. अयस्मयादीनि च्छन्दसि 1.4.20

(1067. आक्षेपवार्त्तिकम्-1)

*** उभयसञ्ज्ञान्यपि ***

भाष्यम्– उभयसञ्ज्ञान्यपीति वक्तव्यम्। स सुष्टुभा स ऋक्वता गणेन। अयस्मयादीनि।।20।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचननियमप्रकरणम्

(175. **बहुवचननियमसूत्रम्** 1.4.2 आ. 10)

261. बहुषु बहुवचनम् 1.4.21

बहुष्वित्यस्य गुणप्रधानताधिकरणम्

अनुयोगभाष्यम्– 'बहुषु बहुवचनम्' इत्युच्यते। केषु बहुषु?

समाधानभाष्यम्– अर्थेषु।

आक्षेपभाष्यम्– यद्येवं 'वृक्षः प्लक्षः' अत्रापि प्रप्नोति। बहवस्तेऽर्थाः—मूलं स्कन्धः फलं पलाशमिति।

समाधानभाष्यम्– एवं तर्हि एकवचनं द्विवचनं बहुवचनमिति शब्दसञ्ज्ञा एताः। येष्वर्थेषु स्वादयो विधीयन्ते तेषु बहुषु। केषु च स्वादयो विधीयन्ते? कर्मादिषु।

समाधानबाधकभाष्यम्– न वै कर्मादयो विभक्त्यर्थाः। के तर्हि? एकत्वादयः।

समाधानसाधकभाष्यम्– एकत्वादिष्वपि वै विभक्त्यर्थेष्ववश्यं कर्मादयो निमित्तत्वेनोपादेयाः—कर्मण एकत्वे, कर्मणो द्वित्वे, कर्मणो बहुत्वे इति।

आक्षेपभाष्यम्– स तर्हि तथा निर्देशः कर्तव्यः। नह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। इह च 'इत्येके मन्यन्ते' 'तदेके मन्यन्ते' इति परत्वादेकवचनं प्राप्नोति।

आक्षेपबाधकभाष्यम्– 'बहुषु बहुवचनम्' इत्येष योगः परः करिष्यते।

आक्षेपसाधकभाष्यम्– सूत्रविपर्यासः कृतो भवति। इह च 'बहुरोदनो' 'बहुः सूप' इति परत्वाद्बहुवचनं प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। यत्तावदुच्यते—नह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देश इति। (तन्न) अन्तरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देशः। कथम्? इह कदाचिद्गुणो गुणिविशेषको भवति। तद्यथा—'पटः शुक्लः' इति। कदाचिच्च गुणिना गुणो व्यपदिश्यते 'पटः शुक्लः' इति। तद्यदा तावद्गुणो गुणिविशेषको भवति 'पटः शुक्लः' इति तदा सामानाधिकरण्यं गुणगुणिनोः, तदा नान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। यदा तु गुणिना गुणो व्यपदिश्यते 'पटस्य शुक्लः' इति स्त्र-प्रधानस्तदा गुणो भवति—तदा द्रव्ये षष्ठी, तदान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। न चेह वयमेकत्वादिभिः कर्मादीन्विशेषयिष्यामः। किं तर्हि? कर्मादिभिरेकत्वादीन् विशेषयिष्यामः। कथम्? एकस्मिन्नेकवचनम्। कस्यैकस्मिन्? कर्मणः। द्वयोर्द्विवचनम्। कयोर्द्वयोः? कर्मणोः। बहुषु बहुवचनम्। केषां बहुषु? कर्मणामिति।

आक्षेपभाष्यम्– कथं बहुषु बहुवचनमिति?

समाधानभाष्यम्– एतदेव ज्ञापयत्याचार्यः—'नानाधिकरणवाची यो बहुशब्दस्तस्येदं ग्रहणम्। न वैपुल्यवाचिनः' इति। किमेतस्य ज्ञापने प्रयोजनम्? यदुक्तम् 'बहुरोदनो बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोति' इति, न स दोषो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यशेषभाष्यम्– यदप्युच्यते—'इत्येके मन्यन्ते, तदेके मन्यन्ते' इति परत्वादेकवचनं प्राप्नोतीति। नैष दोषः। एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यावाची। तद्यथा—एको द्वौ बहव इति। अस्त्यसहायवाची। तद्यथा—एकाग्नयः। एकहलानि। एकाकिभिः क्षुद्रकैर्जितमिति। अस्त्यन्यार्थे वर्तते। तद्यथा—सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तद्योऽन्यार्थे वर्तते तस्यैव प्रयोगः।

नियमार्थतानिर्णयाधिकरणम्

अनुयोगभाष्यम्– किमर्थं पुनरिदमुच्यते?

(1068. **समाधानवार्त्तिकम्**-1)

*** सुप्तिङामविशेषेण विधानाद् दृष्टविप्रयोगाच्च नियमार्थं वचनम् ***

भाष्यम्– सुपोऽविशेषेण प्रातिपदिकमात्राद्विधीयन्ते। तिङो ऽविशेषेण धातुमात्राद्विधीयन्ते। तत्रैतत्स्याद्यद्यप्यविशेषेण विधीयन्ते नैव विप्रयोगो लक्ष्यते इति। 'दृष्टविप्रयोगाच्च'। दृश्यते खल्वपि विप्रयोगः। तद्यथा—'अक्षीणि मे दर्शनीयानि' 'पादा मे सुकुमाराः' इति। सुप्तिङोरविशेषविधानाद् दृष्टविप्रयोगत्वाच्च व्यतिकरः प्राप्नोति। इष्यते चाव्यतिकरः स्यादिति। तच्चान्तरेण यत्नं न सिद्ध्यतीति नियमार्थे वचनम्। एवमर्थमिदमुच्यते।

अनुयोगभाष्यम्– अथैतस्मिन्नियमार्थे सति किं पुनरयं प्रत्ययनियम एकस्मिन्नेवैकवचनं, द्वयोरेव द्विवचनं, बहुष्वेव बहुवचनमिति। आहोस्विदर्थनियमः—एकस्मिन्नेकवचनमेव, द्वयोर्द्विवचनमेव, बहुषु बहुवचनमेवेति? कश्चात्र विशेषः?

(1069. **प्रत्ययनियमपक्षदूषणवार्त्तिकम्**-2)

*** तत्र प्रत्ययनियमेऽव्ययानां पदसञ्ज्ञाऽभावोऽसुबन्तत्वात् ***

भाष्यम्– तत्र प्रत्ययनियमेऽव्ययानां पदसञ्ज्ञा न प्राप्नोति—उच्चैः नीचैरिति। किं कारणम्? असुबन्तत्वात्।

(1070. **अर्थनियमस्य निर्दोषतावार्त्तिकम्**-3)

*** अर्थनियमे सिद्धम् ***

भाष्यम्– अर्थनियमे सिद्धं भवति।

अर्थनियमपक्षाभ्युपगमभाष्यम्– अस्त्वर्थनियमः।

प्रत्ययनियमपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु प्रत्ययनियमः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'तत्र प्रत्ययनियमेऽव्ययानां पदसञ्ज्ञाभावोऽसुबन्तत्वाद्' इति।

आक्षेपपरिहारभाष्यम्– नैष दोषः।

(1071. **आक्षेपपरिहारसाधकवार्त्तिकम्**-4)

*** सुपां कर्मादयोप्यर्थाः संख्या चैव, तथा तिङाम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– सुपां संख्या चैवार्थः कर्मादयश्च। तथा तिङाम्।

(1072. **अर्थनियमवार्त्तिकम्**- 5)

*** प्रसिद्धो नियमस्तत्र ***

भाष्यम्– प्रसिद्धस्तत्र नियमः।

(1073. **प्रत्ययनियमपक्षवार्त्तिकम्**- 6)

*** नियमः प्रकृतेषु वा ***

भाष्यम्– अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः? एकत्वादयः। एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्निति।

प्रत्ययनियमपक्षेऽपि दूषणोद्धारभाष्यम्– अथवा आचार्यप्रवृत्तिर्ज्ञापयति—'उत्पद्यन्तेऽव्ययेभ्यः स्वादयः' इति। यदयम् 'अव्ययादाप्सुपः' इत्यव्ययाल्लुकं शास्ति। बहुषु बहुवचनम्॥21॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्

●

प्रथमेऽध्याये चतुर्थे पादे तृतीयमाह्निकम्

कारकप्रकरणम्

(176. **अधिकारसूत्रम्** 1.4.3 आ. 1.)

263. कारके 1.4.23

कारकशब्दार्थनिर्णयाधिकरणम्

अनुयोगभाष्यम्– किमिदं 'कारके' इति?

समाधानभाष्यम्– (कारक इति) सञ्ज्ञानिर्देशः।

अनुयोगभाष्यम्– किं वक्तव्यमेतत्?

समाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? इह हि व्याकरणे ये वा एते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते, या वा एता कृत्रिमाष्टिघुभादिसञ्ज्ञाः। न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः, न खल्वपि कृत्रिमा सञ्ज्ञा अन्यत्राविधानात्। सञ्ज्ञाधिकारश्चायम्। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः सञ्ज्ञायाः।

(1074. **आक्षेपवार्त्तिकम्**- 1)

*** कारक इति सञ्ज्ञानिर्देशश्चेत्संज्ञिनो निर्देशः ***

भाष्यम्– कारक इति सञ्ज्ञानिर्देशश्चेत्संज्ञिनोऽपि निर्देशः कर्तव्यः। साधकं निर्वर्तकं कारकसञ्ज्ञं भवतीति वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1075. अन्यथानुपपत्तिवार्त्तिकम्-2)

*** इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य ***

भाष्यम्– इतरथा ह्यनिष्टं प्रसज्येत। अकारकस्याप्यपादानसञ्ज्ञा प्रसज्येत। क्व? ग्रामस्य समीपादागच्छतीति।

आक्षेपबाधकभाष्यम्– नैष दोषः। नात्र ग्रामो ऽपाययुक्तः। किं तर्हि? समीपम्। यदा च ग्रामोपाययुक्तो भवति, भवति तदाऽपादानसञ्ज्ञा। तद्यथा—ग्रामादागच्छतीति।

(1076. आक्षेपवार्त्तिकम्-3)

*** कर्मसञ्ज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति ***

भाष्यम्– कर्मसञ्ज्ञा च प्राप्नोत्यकथितस्य। क्व? ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति।

आक्षेपबाधकभाष्यम्– नैष दोषः। अयमकथितशब्दोऽस्त्येवासङ्कीर्तिते वर्तते। तद्यथा—कश्चित्कञ्चित्सञ्चक्ष्याह—'असावत्राकथितः' असंकीर्तित इति गम्यते।

आक्षेपसाधकभाष्यम्– अस्त्यप्राधान्ये वर्तते। तद्यथा—'अकथितोऽसौ ग्रामे' 'अकथितो-ऽसौ नगरे' इत्युच्यते यो यत्राप्रधानो भवति। तद्यदा—अप्राधान्येऽकथितशब्दो वर्तते तदैष दोषः— 'कर्मसञ्ज्ञाप्रसङ्गोकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति।

(1077. आक्षेपान्तरवार्त्तिकम्-6)

*** अपादानं च वृक्षस्य पर्णं पततीति ***

भाष्यम्– अपादानसञ्ज्ञा च प्राप्नोति। क्व? वृक्षस्य पर्णं पतति, 'कुड्यस्य पिण्डः पततीति।

(1078. समाधानवार्त्तिकम्-5)

*** न वाऽपायस्याविवक्षितत्वात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? अपायस्याविवक्षितत्वात्। नात्रापायो विवक्षितः। किं तर्हि? सम्बन्धः। यदा चापायो विवक्षितो भवति भवति तदाऽपादानसञ्ज्ञा। तद्यथा—वृक्षात्पर्णं पततीति। सम्बन्धस्तु तदा न विवक्षितो भवति न ज्ञायते कङ्कस्य वा कुररस्य वेति।

आक्षेपभाष्यम्– अयं तर्हि दोषः—'कर्मसञ्ज्ञाप्रसङ्गश्चाकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इति।

आक्षेपबाधकभाष्यम्– नैष दोषः। कारक इति महती सञ्ज्ञा क्रियते। सञ्ज्ञा च नाम यतो न लघीयः। कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्याः सञ्ज्ञायाः करणे एतत्प्रयोजनम्– अन्वर्थसञ्ज्ञा यथा विज्ञायेत—करोतीति कारकमिति।

(1079. आक्षेपसाधकवार्त्तिकम्-6)

*** अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अन्वर्थमिति चेदकर्तरि कर्तृशब्दो नोपपद्यते करणं कारकमधिकरणं कारकमिति।

(1080. **समाधानवार्त्तिकम्**- 7)

*** सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः ***

भाष्यम्– सिद्धं करणाधिकरणयोः कर्तृभावः। कुतः? प्रतिकारकं क्रियाभेदात्। पचादीनां हि प्रतिकारकं क्रिया भिद्यते। किमिदं प्रतिकारकमिति? कारकं कारकं प्रति प्रतिकारकम्।

अनुयोगभाष्यम्– कोऽसौ प्रतिकारकं क्रियाभेदः पचादीनाम्?

(1081. **समाधानसाधकवार्त्तिकम्**- 8)

*** अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः ***

भाष्यम्– अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। एष प्रधान(स्य) कर्तुः पाकः। एतत्प्रधानकर्तुः कर्तृत्वम्।

(1082. **समाधानसाधकवार्त्तिकम्**- 9)

*** द्रोणं पचत्याढकं पचतीति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाकः ***

भाष्यम्– द्रोणं पचत्याढकं पचतीति सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। एषोऽधिकरणस्य पाकः। एतदधिकरणस्य कर्तृत्वम्।

(1083. **समाधानसाधकवार्त्तिकम्**- 10)

*** एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः ***

भाष्यम्– एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते। तत्र तदा पचिर्वर्तते। एष करणस्य पाकः। एतत्करणस्य कर्तृत्वम्।

(1084. **समाधानसाधकवार्त्तिकम्**- 11)

*** उद्यमननिपातनानि कर्त्तुश्छिदिक्रिया ***

भाष्यम्– उद्यमननिपातनानि कुर्वन्नेव देवदत्तश्छिनत्तीत्युच्यते। तत्र तदा छिदिर्वर्तते। एष प्रधानकर्तुश्छेदः। एतत्प्रधानकर्तुः कर्तृत्वम्।

(1085. **समाधानसाधकवार्त्तिकम्**- 12)

*** यत्तन्न तृणेन तत्परशोश्छेदनम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– यत्तत्समाने उद्यमने निपतने च परशुना छिद्यते, न तृणेन तत्परशोश्छेदनम्। अवश्यं चैतदेवं विज्ञेयम्।

(1086. **अन्यथानुपपत्तिवार्त्तिकम्**-13)

*** इतरथा ह्यसितृणयोश्छेदनेऽविशेषः स्यात् ***

भाष्यम्– यो हि मन्यते उद्यमननिपातनादेवैतद्भवति च्छिनत्तीति, असितृणयोश्छेदने न तस्य विशेषः स्याद् यदसिना छिद्यते तृणेनापि तच्छिद्येत।

(1087. **आक्षेपवार्त्तिकम्**-14)

*** अपादानादीनां त्वप्रसिद्धिः ***

भाष्यम्– अपादानादीनां तु कर्तृत्वस्याऽप्रसिद्धिः। यथा हि भवता करणादीनां कर्तृत्वं निदर्शितं न तथाऽपादानादीनां निदर्श्यते।

(1088. **समाधानवार्त्तिकम्**-15)

*** न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च सञ्ज्ञा ***

भाष्यम्– न वा एष दोषः। किं कारणम्। स्वतन्त्रपरतन्त्रत्वात्। सर्वत्रैवात्र स्वातन्त्र्यं पारन्त्र्यं च विवक्षितम्। तयोः पर्यायेण वचनम्। तयो स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेण वचनं भविष्यति। वचनाश्रया च सञ्ज्ञा भविष्यति। तद्यथा—बलाहकाद्विद्योतते विद्युत्। बलाहके विद्योतते। बलाहको विद्योतत इति।

अनुयोगभाष्यम्– किं तर्ह्युच्यते—'अपादानादीनां त्वप्रसिद्धिः' इति?

समाधानभाष्यम्– एवं तर्हि न ब्रूमः—'अपादानादीनां कर्तृत्वस्याप्रसिद्धिः' इति। पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शितमपादानादीनां कर्तृत्वनिदर्शनाय, पर्याप्तो ह्येकः पुलाकः स्थाल्या निदर्शनाय। किं तर्हि? सञ्ज्ञाया अप्रसिद्धिः।

आक्षेपभाष्यम्– यावता सर्वत्रैवात्र स्वातन्त्र्यं विद्यते पारतन्त्र्यं च। तत्र परत्वात्कर्तृसञ्ज्ञैव प्राप्नोति।

समाधानभाष्यम्– अत्रापि 'न वा स्वतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च सञ्ज्ञा' इत्येव।

आक्षेपभाष्यम्– यथा पुनरिदं भवता स्थाल्याः कर्तृत्वं निदर्शितं सम्भवनक्रियां च धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेति। क्वेदानीं परतन्त्रा स्यात्?

समाधानभाष्यम्– यत्तत्प्रक्षालनं परिवर्तनं वा।

निराकरणभाष्यम्– न वा एवमर्थं स्थाल्युपादीयते प्रक्षालनं परिवर्तनं च करिष्यामीति। किं तर्हि सम्भवनक्रियां धारणक्रियां च करिष्यतीति तत्र चासौ स्वतन्त्रा। क्वेदानीं परतन्त्रा?

समाधानभाष्यम्– एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा। कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा।

आक्षेपभाष्यम्– ननु च भोः कर्तृस्थेऽपि यत्ने कथ्यमाने स्थाली सम्भवनक्रियां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारणक्रियां च करोति तत्रासौ स्वतन्त्रा। क्वेदानीं परतन्त्रा स्यात्?

समाधानभाष्यम्- एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा। तद्यथा—अमात्यानां राज्ञा सह समवाये पारतन्त्र्यं, व्यवाये स्वातन्त्र्यम्।

अनुयोगभाष्यम्- किं पुन: प्रधानम्?

समाधानभाष्यम्- कर्ता। कथं पुनर्ज्ञायते—कर्ता प्रधानमिति? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति।

आक्षेपभाष्यम्- ननु च भो: प्रधानेनापि वै समवाये स्थाल्या अनेनार्थ: अधिकरणं कारकमिति।

नहि कारकमित्यनेनाधिकरणत्वमुक्तम्, अधिकरणमिति वा कारकत्वम्। उभौ चान्योन्य-विशेषकौ भवत:। कथम्? एकद्रव्यसमवायित्वात्। तद्यथा गार्ग्यो देवदत्त इति। नहि गार्ग्य इत्यनेन देवदत्तत्वमुक्तं देवदत्त इत्यनेन वा गार्ग्यत्वम्। उभौ चान्योन्यविशेषकौ भवत एकद्रव्यसमवायित्वात्।

समाधानभाष्यम्- एवं तर्हि सामान्यभूता क्रिया वर्तते। तस्या निर्वर्तकं कारकम्।

पक्षान्तरभाष्यम्- अथवा यावद् ब्रूयात्—'क्रियायाम्' इति, तावत्—'कारके' इति। एवं च कृत्वा निर्देश उपपन्नो भवति 'कारके' इति। इतरथा हि 'कारकेषु' इति ब्रूयात्। कारके।।23।।

अपादानसञ्ज्ञाप्रकरणम्

(177. **अपादानसञ्ज्ञासूत्रम्** 1.4.3 आ. 2)

264. ध्रुवमपायेऽपादानम् 1.4.24

ध्रुवग्रहणप्रयोजनाधिकरणम्

अनुयोगभाष्यम्- ध्रुवग्रहणं किमर्थम्?

समाधानभाष्यम्- ग्रामादागच्छति शकटेन।

समाधानबाधकभाष्यम्- नैतदस्ति। करणसञ्ज्ञात्र बाधिका भविष्यति।

समाधानान्तरभाष्यम्- इदं तर्हि ग्रामादागच्छन्कंसपात्र्यां पाणिनौदनं भुङ्क्ते इति।

समाधानबाधकभाष्यम्- अत्राप्यधिकरणसञ्ज्ञा बाधिका भविष्यति।

समाधानान्तरभाष्यम्- इदं तर्हि वृक्षस्य पर्णं पतति, कुड्यस्य पिण्ड: पततीति।

शेषपूर्त्यधिकरणम्

(1089. **आक्षेपवार्त्तिकम्**-1)

* जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् *

भाष्यम्- जुगुप्साविरामप्रमादार्थानामुपसंख्यानं कर्तव्यम्। जुगुप्सा—अधर्माज्जुगुप्सते। अधर्माद्बीभत्सते। विराम—धर्माद्विरमति। धर्मान्निवर्तते। प्रमाद—धर्मात्प्रमाद्यति। धर्मान्मुह्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं चोपसंख्यानं कर्तव्यम्। साङ्काश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति।

तटस्थाक्षेपभाष्यम्– तत्तर्हीदं बहु वक्तव्यम्?

वार्त्तिकप्रत्याख्यानभाष्यम्– न वक्तव्यम्। इह तावद्—अधर्माज्जुगुप्सते अधर्माद्बीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या सम्प्राप्य निवर्तते। तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्।

इह धर्माद्विरमति धर्मान्निवर्तते इति। धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। इह य एष मनुष्यः सम्भिन्नबुद्धिर्भवति स पश्यति—नेदं किञ्चिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते। तत्र 'ध्रुवमपाये ऽपादानम्' इत्येव सिद्धम्।

इह च साङ्काश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति यस्तैः साम्यं गतवान् भवति स एतत्प्रयुङ्क्ते।

अनुपपत्तिपरिहाराधिकरणम्

(1090. **आक्षेपवार्त्तिकम्**-2)

* गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात् *

भाष्यम्– गतियुक्तेष्वपादानसञ्ज्ञा नोपपद्यते। रथात्प्रवीतात्पतितः। अश्वात्त्रस्तात्पतितः। सार्थाद्गच्छतो हीन इति। किं कारणम्। अध्रुवत्वात्।

(1091. **समाधानवार्त्तिकम्**-3)

* न वाऽध्रौव्यस्याविवक्षितत्वात् *

भाष्यम्– न वा एष दोषः। किं कारणम्? अध्रौव्यस्याविवक्षितत्वात्। नात्राध्रौव्यं विवक्षितम्। किं तर्हि? ध्रौव्यम्। इह तावद्—अश्वात्त्रस्तात्पतित इति यत्तदश्वेऽश्वत्वमाशुगामित्वं, तद्ध्रुवं तच्च विवक्षितम्।

रथात्प्रवीतात्पतित इति यद्रथे रथत्वं रमन्तेऽस्मिन् रथ इति तद्ध्रुवं तच्च विवक्षितम्। सार्थाद्गच्छतो हीन इति यत्तत्सार्थे सार्थत्वं सहार्थीभावः तद्ध्रुवं तच्च विवक्षितम्।

आक्षेपभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुम्। ये त्वेतेत्यन्तं गतियुक्तास्तत्र कथम्। धावतः पतितस्त्वरमाणात्पतित इति।

समाधानभाष्यम्– अत्रापि—'न वाऽध्रौव्यस्याविवक्षितत्वाद्' इत्येव? कथं पुनः सतो नामाविवक्षा स्यात्?

सतोप्यविवक्षा भवति। तद्यथा—'अलोमिका एडका'। अनुदरा कन्येति। असतश्च विवक्षा भवति—समुद्रः कुण्डिका' 'विन्ध्यो वर्धितकमिति। ध्रुवमपायेऽपादानम्।।24।।

(178. **अपादानसञ्ज्ञासूत्रम्** 1.4.3 आ. 3)

265. भीत्रार्थानां भयहेतुः 1.4.25

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयं योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथं वृकेभ्यो बिभेति दस्युभ्यो बिभेति चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति?

आक्षेपबाधकभाष्यम्– इह तावद्वृकेभ्यो बिभेति दस्युभ्यो विभेतीति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति। स पश्यति—यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति। स बुद्ध्या सम्प्राप्य निवर्तते, तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्।

इह चौरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति, य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति। स पश्यति—यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशा इति। स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्। भीत्रार्थानाम्।।25।।

(179. **अपादानसञ्ज्ञासूत्रम्** 1.4.3 आ. 4)

266. पराजेरसोढः 1.4.26

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्—अध्ययनात्पराजयते इति?

आक्षेपबाधकभाष्यम्– य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति दुःखमध्ययनं दुर्धरं च, गुरवश्च दुरुपचारा इति, स बुद्ध्या सम्प्राप्य निवर्तते। तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्। पराजेरसोढः।।26।।

(180. **अपादानसञ्ज्ञासूत्रम्** 1.4.3 आ. 5)

267. वारणार्थानामीप्सितः 1.4.27

उदाहरणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– माषेभ्यो गा वारयति।

समाधानबाधकभाष्यम्– भवेद्यस्य भाषा, न गावस्तस्य माषा ईप्सिताः स्युः। यस्य तु खलु गावो, न माषाः, कथं तस्य माषा ईप्सिताः स्युः।

समाधानसाधकभाष्यम्– तस्यापि माषा एवेप्सिताः। आतश्चेप्सिताः, यदेभ्यो गा वारयति।

अनुपपत्तिपरिहाराधिकरणम्

आक्षेपभाष्यम्– इह कूपादन्धं वारयतीति कूपेऽपादानसञ्ज्ञा न प्राप्नोति। नहि तस्य कूप ईप्सितः। कस्तर्हि? अन्धः।

समाधानभाष्यम्– तस्यापि कूप एवेप्सितः। पश्यत्ययम्—अन्धः कूपं मा प्रापदिति। अथवा यर्थवास्यान्यत्रापश्यत ईप्सा एवं कूपेऽपि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपतिपरिहाराधिकरणम्

आक्षेपभाष्यम्– इहाग्नेर्माणवकं वारयतीति माणवकेऽपादानसञ्ज्ञा प्राप्नोति।

समाधानभाष्यम्– कर्मसञ्ज्ञात्र बाधिका भविष्यति।

आक्षेपभाष्यम्– अग्नावपि तर्हि बाधिका स्यात्। तस्माद्वक्तव्यम् 'कर्मणो यदीप्सितम्' इति। 'ईप्सितेप्सितम्' इति वा।

(1092. समाधानवार्त्तिकम्-1)

*** वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनात् ***

भाष्यम्– वारणार्थेषु कर्मग्रहणमनर्थकम्। किं कारणम्? कर्तुरीप्सिततमं कर्मेति वचनात्। 'कर्तुरीप्सिततमं कर्म' इत्येव सिद्धम्।

सूत्रप्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथं माषेभ्यो गा वारयतीति?

समाधानभाष्यम्– पश्यत्ययं यदीमा गावस्तत्र गच्छन्ति ध्रुवः सस्यविनाशः, सस्यविनाशेऽधर्मश्चैव राजभयं च। स बुद्ध्या सम्प्राप्य निवर्तयति तत्र 'ध्रुवमपायेऽपादानमित्येव सिद्धम्। वारणार्थानामीप्सितः।।27।।

(181. अपादनसञ्ज्ञासूत्रम् 1.4.3 आ. 6)

268. अन्तर्द्धौ येनादर्शनमिच्छति 1.4.28

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथम्—उपाध्यायादन्तर्धत्त इति?

समाधानभाष्यम्– पश्यत्ययं 'यदि मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणमुपालम्भो वेति, स बुद्ध्या सम्प्राप्य निवर्तते तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्। अन्तर्धौ येनादर्शनमिच्छति।।28।।

(182. अपादानसञ्ज्ञासूत्रम् 1.4.3 आ. 7)

269. आख्यातोपयोगे 1.4.29

पदकृत्यकथनाधिकरणम्

अनुयोगभाष्यम्– उपयोग इति किमर्थम्?

समाधानभाष्यम्– नटस्य शृणोति, 'ग्रन्थिकस्य, 'शृणोति'।

समाधानबाधकभाष्यम्– उपयोग इत्यप्युच्यमानेऽत्र प्राप्नोति। एषोऽपि ह्युपयोगः। आतश्चोपयोगः। यदारम्भका रङ्गं गच्छन्ति नटस्य श्रोष्यामः ग्रन्थिकस्य श्रोष्याम इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानसाधकभाष्यम्– एवं तर्ह्युपयोग इत्युच्यते। सर्वश्चोपयोगः। तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो य उपयोग इति। कश्च साधीयः? यो गन्थार्थयोः।

समाधानान्तरभाष्यम्– अथवा उपयोगः को भवितुमर्हति? यो नियमपूर्वकः। तद्यथा—उपयुक्ता माणवका इत्युच्यन्ते य एते नियमपूर्वकमधीतवन्तो भवन्ति।

अनुपयोगे आख्यातुःकारकत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं पुनराख्यातानुपयोगे कारकमाहोस्विदकारकम्?

प्रत्याक्षेपभाष्यम्– कश्चात्र विशेषः?

(1093. **कारकत्वदूषणवार्त्तिकम्**- 1)

*** आख्यातानुपयोगे कारकमिति चेदकथिततत्वात्कर्मसञ्ज्ञाप्रसङ्गः ***

भाष्यम्– आख्यातानुपयोगे कारकमिति चेदकथिततत्वात्कर्मसञ्ज्ञा प्राप्नोति।

अकारकत्वाभ्युपगमभाष्यम्– अस्तु तर्ह्यकारकम्।

(1094. **अकारकत्वदूषणवार्त्तिकम्**- 2)

*** अकारकमिति चेदुपयोगवचनानर्थक्यम् ***

भाष्यम्– यद्यकारकमुपयोगवचनमनर्थकम्।

कारकत्वाभ्युपगमभाष्यम्– अस्तु तर्हि कारकम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'आख्यातानुपयोगे कारकमिति चेदकथिततत्वात्कर्मसञ्ज्ञाप्रसङ्गः' इति।

समाधानभाष्यम्– नैष दोषः। परिगणनं तत्र क्रियते—'दुहियाचिरुधिप्रच्छिभिक्षिचिञाम्' इति।

सूत्रप्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथमुपाध्यायादधीत इति?

समाधानभाष्यम्– अपक्रामति तस्मात्तदध्ययनम्।

आक्षेपभाष्यम्– यद्यपक्रामति किं नात्यन्तायापक्रामति?

समाधानभाष्यम्– सन्ततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति। आख्यातोपयोगे।।29।।

(183. **अपादानसञ्ज्ञासूत्रम्** 1.4.3 आ.8)

270. जनिकर्तुः प्रकृतिः 1.4.30

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कथं गोमयाद् वृश्चिको जायते। गोलोमाविलोमभ्यो दूर्वा जायन्त इति?

समाधानभाष्यम्– अपक्रामन्ति तास्तेभ्यः।

आक्षेपभाष्यम्– यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति?

समाधानभाष्यम्– सन्ततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवन्ति। जनिकर्तुः।।30।।

(184. **अपादानसंज्ञासूत्रम्** 1.4.3 आ. 9)

271. भुवः प्रभवः 1.4.31

प्रत्याख्यानाधिकरणम्

प्रत्याख्यानभाष्यम्– अयमपि योगः शक्योऽवक्तुम्।

आक्षेपभाष्यम्– कथं हिमवतो गङ्गा प्रभवतीति?

समाधानभाष्यम्– अपक्रामन्ति तास्तस्मादापः।

आक्षेपभाष्यम्– यद्यपक्रामन्ति किं नान्त्यन्तायापक्रामन्ति।

समाधानभाष्यम्– सन्ततत्वात्। अथ वान्याश्चान्याश्च प्रादुर्भवन्ति। भुवः प्रभवः।।31।।

कारकप्रकरणे सम्प्रदानसञ्ज्ञाप्रकरणम्

(185. **सम्प्रदानसञ्ज्ञासूत्रम्** 1.4.3 आ. 10)

272. कर्मणा यमभिप्रैति स सम्प्रदानम् 1.4.32

पदकृत्याधिकरणम्

अनुयोगभाष्यम्– कर्मग्रहणं किमर्थम्?

समाधानभाष्यम्– 'यमभिप्रैति स सम्प्रदानम्' इतीयत्युच्यमाने कर्मण एव सम्प्रदानसञ्ज्ञा प्रसज्येत। कर्मग्रहणे पुनः क्रियमाणे न दोषो भवति। कर्म निमित्तत्वेनाश्रीयते।

अनुयोगभाष्यम्– अथ यंसग्रहणं किमर्थम्?

समाधानभाष्यम्– 'कर्मणाभिप्रैति सम्प्रदानम्' इतीयत्युच्यमाने अभिप्रयत एव सम्प्रदानसंज्ञा प्रसज्येत। यंसग्रहणे पुनः क्रियमाणे न दोषो भवति। यंसग्रहणादभिप्रयतः सम्प्रदानसञ्ज्ञा निर्भज्यते।

अनुयोगभाष्यम्– अथाभिप्रग्रहणं किमर्थम्?

समाधानभाष्यम्– 'कर्मणा यमेति स सम्प्रदानम्' इतीयत्युच्यमाने यमेव सम्प्रत्येति तत्रैव स्यात्—उपाध्यायाय गां ददातीति। इह न स्याद्—उपाध्यायाय गामदादुपाध्यायाय गां दास्यतीति। अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति।

अभिराभिमुख्ये वर्तते, प्रशब्द आदिकर्मणि। तेन यं चाभिप्रैति यं चाभिप्रैष्यति यं चाभिप्रागादाभिमुख्यमात्रे सर्वत्र सिद्धं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यूनतापूर्त्यधिकरणम्

(1095. आक्षेपवार्त्तिकम्-1)

*** क्रियाग्रहणम् ***

भाष्यम्– क्रियाग्रहणमपि कर्तव्यम्। इहापि यथा स्यात्—श्राद्धाय निगर्हते युद्धाय सन्नह्यते पत्ये शेते इति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। कथम्? क्रियां हि नाम लोके कर्मेत्युपचरन्ति—कां क्रियां करिष्यति—किं कर्म करिष्यसीति।

समाधानबाधकभाष्यम्– एवमपि कर्तव्यम्। कृत्रिमाकृत्रिमयोः कृत्रिमे सम्प्रत्ययो भवति।

समाधानसाधकभाष्यम्– क्रियापि कृत्रिमं कर्म।

समाधानबाधकभाष्यम्– न सिद्ध्यति। 'कर्तुरीप्सिततमं कर्म' इत्युच्यते। कथं च नाम क्रियया क्रियेप्सितमा स्यात्?

समाधानसाधकभाष्यम्– क्रियापि क्रिययेप्सिततमा भवति। कया क्रियया? सन्दर्शनक्रियया प्रार्थयतिक्रिययाऽध्यवस्यतिक्रियया च। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति। स बुद्ध्या तावत्कञ्चिदर्थं पश्यति, संदृष्टे प्रार्थना, प्रार्थनायामध्यवसायः, अध्यवसायआरम्भः, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्म।

भाष्यम्– एवमपि—

(1096. आक्षेपवार्त्तिकम्-2)

*** कर्मणः करणसञ्ज्ञा सम्प्रदानस्य च कर्मसञ्ज्ञा ***

भाष्यम्– कर्मणः करणसञ्ज्ञा वक्तव्या सम्प्रदानस्य च कर्मसञ्ज्ञा। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः। अग्नौ किल पशुः प्रक्षिप्यते तद्रुद्रायोपह्रियत इति। कर्मणा यमभिप्रैति।।32।।

(186. सम्प्रदानसञ्ज्ञासूत्रम् 1.4.3 आ. 11)

277. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः 1.4.37

क्रोधादीनां कोपजन्यत्वसाधनाधिकरणम्

आक्षेपभाष्यम्– किमेत एकार्थाः, आहोस्विन्नानार्थाः?

प्रत्याक्षेपभाष्यम्– किं चातः?

प्रत्याक्षेपसमाधानभाष्यम्– यद्येकार्थाः किमर्थं पृथङ्निर्दिश्यन्ते? अथ नानार्थाः कथं कुपिना शक्यन्ते विशेषयितुम्?

समाधानभाष्यम्– एवं तर्हि नानार्थाः। कुपौ त्वेषां सामान्यमस्ति नह्यकुपितः क्रुध्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वाऽकुपितो द्रुह्यति। न वाऽकुपित ईर्ष्यति। न वाऽकुपितो ऽसूयति। क्रुधद्रुहेर्ष्या।।37।।

कारकप्रकरणे करणसञ्ज्ञाप्रकरणम्

(187. **करणसञ्ज्ञासूत्रम्** 1.4.3 आ. 12)

282. साधकतमं करणम् 1.4.42

तमग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– तमग्रहणं किमर्थम्। न 'साधकं करणम्' इत्येवोच्येत।

आक्षेपबाधकभाष्यम्– 'साधकं करणम्' इतीयत्युच्यमाने सर्वेषामेव कारकाणां करणसञ्ज्ञा प्रसज्येत। सर्वाणि हि कारकाणि साधकानि। तमग्रहणे पुनः क्रियमाणे न दोषो भवति।

आक्षेपसाधकभाष्यम्– नैतदस्ति प्रयोजनम्। पूर्वास्तावत्सञ्ज्ञा अपवादत्वाद्बाधिका भविष्यन्ति। पराः परत्वादनवकाशत्वाच्च।

आक्षेपबाधकभाष्यम्– इह तर्हि 'धनुषा विध्यति' अपाययुक्तत्वाच्चापादानसञ्ज्ञा साधकत्वाच्च करणसञ्ज्ञा प्राप्नोति। तमग्रहणे पुनः क्रियमाणे न दोषो भवति।

आक्षेपसाधकभाष्यम्– एवं तर्हि लोकत एतत्सिद्धम्। तद्यथा लोके 'अभिरूपायोदकमानेयमभिरूपाय कन्या देया' इति। न चानभिरूपे प्रवृत्तिरस्ति। तत्र 'अभिरूपतमाय' इति गम्यते। एवमिहापि साधकं करणमित्युच्यते। सर्वाणि च कारकाणि साधकानि, न चासाधके प्रवृत्तिरिति तत्र 'साधकतमम्' इति विज्ञास्यते।

समाधानभाष्यम्– एवं तर्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः— कारकसञ्ज्ञायां तरतमयोगो न भवतीति।

प्रयोजनप्रश्नभाष्यम्– किमेतस्य ज्ञापने प्रयोजनम्?

प्रयोजनभाष्यम्– अपायमाचार्यः किं न्याय्यं मन्यते? यत्र सम्प्राप्य निवृत्तिः। तेनेहैव स्यात्—ग्रामादागच्छति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। 'कारकसञ्ज्ञायां तरतमयोगो न भवति' इत्यत्रापि सिद्धं भवति।

प्रयोजनभाष्यम्– तथाधारमाचार्यः किं न्याय्यं मन्यते? यत्र कृत्स्न आधारात्मा व्याप्तो भवति।

तेनेहैव स्यात्—तिलेषु तैलं दध्नि सर्पिरिति। गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। कारकसञ्ज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति। साधकतमं करणम्।।42।।

कारकप्रकरणे कर्मसञ्ज्ञाप्रकरणम्

(188. **कर्मसञ्ज्ञासूत्रम्** 1.4.3 आ. 13)

288. उपान्वध्याङ्वसः 1.4.48

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टवारणाधिकरणम्

(1097. आक्षेपवार्त्तिकम्-1)

*** वसेरश्यर्थस्य प्रतिषेधः ***

भाष्यम्– वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः। ग्रामे उपवसतीति।

तृतीयाक्षेपभाष्यम्– स तर्हि वक्तव्यः?

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यः। नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम्। कस्य तर्हि? अनुपसर्गस्य। ग्रामेऽसौ वसंस्त्रिरात्रमुपवसतीति।। उपान्वध्या।।48।।

(189. कर्मसञ्ज्ञासूत्रम् 1.4.3 आ. 14)

289 कर्तुरीप्सिततमं कर्म 1.4.49

तमग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– तमग्रहणं किमर्थम्?

आक्षेपबाधकभाष्यम्– 'कर्तुरीप्सितं कर्म' इतीयत्युच्यमाने इहाग्नेर्माणवकं वारयतीति माणवकेऽपादानसञ्ज्ञा प्रसज्येत।

आक्षेपसाधकभाष्यम्– नैष दोषः। कर्मसञ्ज्ञात्र बाधिका भविष्यति।

समाधानभाष्यम्– अग्नावपि तर्हि बाधिका स्यात्। इह पुनस्तमग्रहणे क्रियमाणे तदुपपन्नं भवति यदुक्तं 'वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनाद्' इति।

ओदनादीनां निर्वर्त्यत्वसाधनाधिकरणम्

आक्षेपभाष्यम्– इहोच्यते—ओदनं पचतीति यद्योदनः पच्येत द्रव्यान्तरमभिनिर्वर्तेत।

समाधानभाष्यम्– नैष दोषः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। ओदनार्थास्तण्डुला ओदन इति।

आक्षेपभाष्यम्– अथेह कथं भवितव्यम्—तण्डुलानोदनं पचतीति, आहोस्वित्—तण्डुलानामोदनं पचतीति?

समाधानभाष्यम्– उभयथापि भवितव्यम्। कथम्? इह हि तण्डुलानोदनं पचतीति द्व्यर्थः पचिस्तण्डुलान्पचन्नोदनं निर्वर्तयतीति। इहेदानीं तण्डुलानामोदनं पचतीति द्व्यर्थश्चैव पचिर्विकारयोगे षष्ठी तण्डुलविकारमोदनं निर्वर्तयतीति।

आपत्तिवारणाधिकरणम्

आक्षेपभाष्यम्– इह कश्चित्कञ्चिदामन्त्रयते—सिद्धं भुज्यतामिति। स आमन्त्र्यमाण आह—प्रभूतं भुक्तमस्माभिरिति। आमन्त्र्यमाण आह—दधि खलु भविष्यति पयः खलु भविष्यति। आमन्त्र्यमाण आह—दध्ना खलु भुञ्जीय पयसा खलु भुञ्जीयेति। अत्र कर्मसञ्ज्ञा प्राप्नोति। तद्धि तस्येप्सिततमं भवति।

समाधानभाष्यम्– तस्याप्योदन एवेप्सिततमः। न तु गुणेष्वस्यानुरोधः। तद्यथा—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुञ्जीयाहमोदनं यदि मृदुविशदः स्यादिति। एवमिहापि दधिगुणमोदनं भुञ्जीय पयोगुणमोदनं भुञ्जीयेति।

अनुपपत्तिवारणाधिकरणम्

(1098. **आक्षेपवार्त्तिकम्**- 1)

*** ईप्सितस्य कर्मसञ्ज्ञायां निर्वृत्तस्य कारकत्वे कर्मसञ्ज्ञाप्रसङ्गः क्रियेप्सितत्वात् ***

भाष्यम्– ईप्सितस्य कर्मसञ्ज्ञायां निर्वृत्तस्य कारकत्वे कर्मसञ्ज्ञा न प्राप्नोति। गुडं भक्षयतीति। किं कारणम्? क्रियेप्सितत्वात्। क्रिया तस्येप्सिता।

(1099. **समाधानवार्त्तिकम्**- 2)

*** न वोभयेप्सितत्वात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? उभयेप्सितत्वात्। उभयं हि तस्येप्सितम्। आतश्चोभयम्। यस्य हि गुडभक्षणे बुद्धिः प्रसक्ता भवति नासौ लोष्टं भक्षयित्वा कृती भवति।

समाधानबाधकभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुम्। ये त्वेते राजकर्मिणो मनुष्यास्तेषां कश्चित्कञ्चिदाह—कटं कुर्विति। स आह—नाहं कटं करिष्यामि घटो मया आहृत इति। तस्य क्रियामात्रमीप्सितम्।

समाधानसाधकभाष्यम्– यद्यपि तस्य क्रियामात्रमीप्सितं, यस्त्वसौ प्रेषयति तस्योभयमीप्सितमिति। कर्तुरीप्सिततमम्।।49।।

(190. **कर्मसञ्ज्ञासूत्रम्** 1.4.3 आ. 15)

290 तथा युक्तं चानीप्सितम् 1.4.50

उदाहरणनिर्णयाधिकरणेऽनुयोगभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– विषं भक्षयतीति।

समाधानबाधकभाष्यम्– नैतदस्ति। पूर्वेणाप्येतत्सिध्यति।

समाधानसाधकभाष्यम्– न सिद्ध्यति। 'कर्तुरीप्सिततमं कर्म' इत्युच्यते कस्य च नाम विषभक्षणमीप्सितं स्यात्।

समाधानबाधकभाष्यम्– विषभक्षणमपि कस्यचिदीप्सितं भवति। इह य एष मनुष्यः दुःखार्तो भवति सोन्यानि दुःखान्यनुनिशम्य विषभक्षणमेव ज्यायो मन्यते। आतश्चेप्सितं यत्तद्भक्षयति।

समाधानभाष्यम्– यत्तर्ह्यन्यत्करिष्यामीत्यन्यत्करोति तदुदाहरणम्। किं पुनस्तत्? ग्रामान्तरमयं गच्छन् चोरान्पश्यति अहिं लङ्घयति कण्टकान्मृद्नातीति।

आक्षेपभाष्यम्– इहेप्सितस्यापि कर्मसञ्ज्ञा आरभ्यतेऽनीप्सितस्यापि। यदिदानीं नैवेप्सितं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाप्यनीप्सितं तत्र कथम्? ग्रामान्तरमयं गच्छन्वृक्षमूलान्युपसर्पति कुड्यमूलान्युपसर्पतीति।

समाधानभाष्यम्– अत्रापि सिद्धम्। कथम्? अनीप्सितमिति नायं प्रसज्यप्रतिषेधः ईप्सितं नेति। किं तर्हि? पर्युदासोऽयम्। यदन्यदीप्सितात्तदनीप्सितमिति। अन्यच्चैवेदमीप्सिताद्यन्नैवेप्सितं नाप्यनीप्सितमिति। तथायुक्तम्।।50।।

(191. **कर्मसञ्ज्ञासूत्रम्** 1.4.3 आ. 16)

291. अकथितं च 1.4.51

अनुयोगभाष्यम्– केनाकथितम्?

समाधानभाष्यम्– अपादानादिभिर्विशेषकथाभिः।

उदाहरणनिर्णयाधिकरणम्

अनुयोगभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।।1।।

उदाहरणभाष्यम्– दुहि—गां दोग्धि पयः।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथिताऽत्र पूर्वापादानसञ्ज्ञा।।दुहि।।

उदाहरणभाष्यम्– याचि—इदं तर्हि—पौरवं गां याचत इति।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वाऽपादानसञ्ज्ञा।

उदाहरणत्वसाधकभाष्यम्– न याचनादेवापायो भवति। याचितोऽसौ यदि ददाति ततोऽपायेन युज्यते।।याचि।

उदाहरणभाष्यम्– रुधि—अन्ववरुणद्धि गां व्रजम्।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वाधिकरणसञ्ज्ञा।।रुधि।।

उदाहरणभाष्यम्– प्रच्छि—माणवकं पन्थानं पृच्छति।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वापादानसञ्ज्ञा।

उदाहरणत्वसाधकभाष्यम्– न प्रश्नादेवापायो भवति। पृष्टोऽसौ यद्याचष्ट ततोऽपायेन युज्यते।।प्रच्छि।।

उदाहरणभाष्यम्– भिक्षि—पौरवं गां भिक्षते।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वापादानसञ्ज्ञा।

उदाहरणत्वबाधकभाष्यम्– न भिक्षणादेवापायो भवति भिक्षितोसौ यदि ददाति ततोऽपायेन युज्यते। भिक्षि।

उदाहरणभाष्यम्– चिञ्—वृक्षमवचिनोति फलानि।

उदाहरणत्वबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वापादानसञ्ज्ञा।

उदाहरणभाष्यम्– ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना। ब्रुविशासिगुणेन यत्सचते तच्चोदाहरणम्। किं पुनस्तत्? पुत्रं ब्रूते धर्मं, पुत्रमनुशास्ति धर्ममिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणबाधकभाष्यम्– नैतदस्ति। कथितात्र पूर्वा सम्प्रदानसञ्ज्ञा।

उदाहरणोपसंहारभाष्यम्– तस्मात्रीण्येवोदाहरणानि। पौरवं गां याचते, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते इति।

प्रधानाप्रधानयोःप्रत्ययनिर्णयाधिकरणम्

आक्षेपभाष्यम्– अथ ये धातूनां द्विकर्मकास्तेषां किं कथिते लादयो भवन्ति, आहोस्विदकथिते?

समाधानभाष्यम्– कथिते लादयः।

आक्षेपभाष्यम्– कथिते लादिभिरभिहिते गुणकर्मणि का कर्तव्या?

(1100. **समाधानवार्त्तिकम्**- 1)

*** कथिते लादयश्चेत्स्युः षष्ठीं कुर्यात्तदा गुणे ***

भाष्यम्– कथिते लादयश्चेत्स्युः षष्ठीं गुणकर्मणि तदा कर्तव्या। दुह्यते गोः पयः, याच्यते पौरवस्य कम्बल इति।

आक्षेपभाष्यम्– कथम्?

(1101. **समाधानवार्त्तिकम्**- 2)

*** अकारकं ह्यकथितात् ***

भाष्यम्– अकारकं ह्येतद्भवति। किं कारणम्? अकथितत्वात्।

(1102. **व्यतिरेकवार्त्तिकम्**- 3)

*** कारकं चेत्तु नाकथा ***

भाष्यम्– अथ कारकं नाकथितम्।

आक्षेपभाष्यम्– अथ कारके सति का कर्तव्या?

(1103. **समाधानवार्त्तिकम्**- 4)

*** कारकं चेद्विजानीयाद्यांयां मन्येत सा भवेत् ***

भाष्यम्– कारकं चेद्विजानीयाद्यांया प्राप्नोति सा सा कर्तव्या। दुह्यते गोः पयः, याच्यते पौरवात्कम्बल इति।

(1104. **समाधानबाधपूर्वकनियमवार्त्तिकम्**- 5)

*** कथितेऽभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः सपरे ***

भाष्यम्– कथिते लादिभिरभिहिते त्वविधिरेष भवति। किमिदं त्वविधिरिति? तव विधिस्त्वविधिः। त्वमतिः। किमिदं त्वमतिरिति? तव मतिस्त्वमतिरिति। नैवमन्ये मन्यन्ते। कथं तर्ह्यन्ये मन्यन्ते? गुणकर्मणि लादिविधिः सपरे। गुणकर्मणि लादयो भवन्ति सह परेण योगेन 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1105. **नियमवार्त्तिकम्**-6)

*** ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत ***

भाष्यम्– ध्रुवयुक्तिषु चेष्टितयुक्तिषु चाप्यगुणे कर्मणि लादयो भवन्तीत्येतदनल्पमतेराचार्यस्य वचनं स्मर्यताम्।

आचार्यान्तरोक्तिभाष्यम्– अपर आह—

(1106. **नियमवार्त्तिकम्**-7)

*** प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ***

भाष्यम्– प्रधानकर्मण्यभिधेये द्विकर्मणां धातूनां कर्मणि लादयो भवन्तीति वक्तव्यम्। अजां नयति ग्रामम्। अजा नीयते ग्रामम्। अजा नीता ग्राममिति।

(1107. **नियमवार्त्तिकम्**-8)

*** अप्रधाने दुहादीनाम् ***

भाष्यम्– अप्रधाने दुहादीनां 'कर्मणि लादयो भवन्तीति वक्तव्यम्'। दुह्यते गौ: पय:।

(1108. **नियमवार्त्तिकम्**-9)

*** ण्यन्ते कर्तुश्च कर्मण: ***

भाष्यम्– ण्यन्ते कर्तुश्च कर्मण: 'लादयो भवन्तीति (वक्तव्यम्)'। गम्यते यज्ञदत्तो ग्रामं देवदत्तेन।

द्विकर्मकधातुनिर्णयाधिकरणम्

अनुयोगभाष्यम्– के पुनर्धातूनां द्विकर्मका:?

समाधानभाष्यम्– नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेशु ग्रहणं द्रष्टव्यमिति निश्चय:।।1।।

अजां नयति ग्रामम्, भारं वहति ग्रामम्, भारं हरति ग्रामम्। गत्यर्थानाम्—गमयति देवदत्तं ग्रामम्, यापयति देवदत्तं ग्रामम्।

(1109. **द्विकर्मकत्वबाधकवार्त्तिकम्**-10)

*** सिद्धं वाप्यन्यकर्मण: ***

भाष्यम्– सिद्धं वा पुनरेतद्भवति। कुत:? अन्यकर्मण:। अन्यस्यात्राजा कर्म, अन्यस्य ग्राम:। अजामसौ गृहीत्वा ग्रामं नयति।

(1110. **द्विकर्मकत्वसाधकवार्त्तिकम्**-11)

*** अन्यकर्मेति चेद् ब्रूयाल्लादीनामविधिर्भवेत् ***

भाष्यम्– अन्यकर्मेति चेद् ब्रूयाल्लादीनामविधिरयं भवेत्। अजा नीयते ग्राममिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परसाधन उत्पद्यमानेन लेनाजाया अभिधानं न प्राप्नोति।

न्यूनतापूरकाधिकरणम्

(1111. **न्यूनतापूरकवार्त्तिकम्**-12)

*** कालभावाध्वगन्तव्याः कर्मसञ्ज्ञा ह्यकर्मणाम् ***

भाष्यम्– कालभावाध्वगन्तव्या अकर्मकाणां धातूनां कर्मसञ्ज्ञा भवन्तीति वक्तव्यम्। काल—मासमास्ते। मांस स्वपिति। भाव—गोदोहमास्ते। गोदोहं स्वपिति। अध्वगन्तव्य—क्रोशमास्ते। क्रोशं स्वपिति।

(1112. **न्यूनतापूरकवार्त्तिकम्**-13)

*** देशश्च ***

भाष्यम्– देशश्चाकर्मकाणां कर्मसञ्ज्ञो भवतीति वक्तव्यम्। कुरून्स्वपिति। पञ्चालान्स्वपिति।

पूर्वाचार्यकृतसञ्ज्ञानिराकरणाधिकरणम्

कल्मसञ्ज्ञाभाष्यम्– विपरीतं तु यत्कर्म तत्कल्म कवयो विदुः। किमिदं कल्मेति? अपिरिसमाप्तं कर्म कल्म। न वा अस्मिन्सर्वाणि कर्मकार्याणि क्रियन्ते। किं तर्हि? द्वितीयैव।

विपरीतकर्मलक्षणभाष्यम्– यस्मिंस्तु कर्मण्युपजायतेऽन्यद्धात्वर्थयोगापि च यत्र षष्ठी। तत्कर्म कल्मेति च।

कल्मलक्षणानावश्यकताभाष्यम्– कल्म नोक्तं धातोर्हि वृर्तिर्न रलत्वतोऽस्ति।

आक्षेपभाष्यम्– एतेन कर्मसञ्ज्ञा सर्वा सिद्धा भवत्यकथितेन।
तत्रेप्सितस्य किं स्यात् प्रयोजनं कर्मसञ्ज्ञायाः।।

समाधानभाष्यम्– यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम्। ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन।

आक्षेपभाष्यम्– अथेह कथं भवितव्यम्– नेताश्वस्य स्रुघ्नम् इति। आहोस्वित्—नेताश्वस्य स्रुघ्नस्येति।

समाधानभाष्यम्– उभयथा गोणिकापुत्रः। अकथितं च।।51।।

(192. **कर्मसञ्ज्ञासूत्रम्** 1.4.3 आ. 17)

292. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ 1.4.52

शब्दकर्मशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– शब्दकर्मेति कथमिदं विज्ञायते—शब्दो येषां क्रियेति, आहोस्विच्छब्दो येषां कर्मेति?

प्रत्याक्षेपभाष्यम्– कश्चात्र विशेषः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1113. प्रथमपक्षे आक्षेपवार्त्तिकम्- 1)

*** शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधः ***

भाष्यम्– शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधो वक्तव्यः। केपुनर्ह्वयत्यादयः? ह्वयति क्रन्दति शब्दायते। ह्वयति देवदत्तः 'ह्वाययति देवदत्तेन'। क्रन्दति देवदत्तः 'क्रन्दयति देवदत्तेन'। शब्दायते देवदत्तः 'शब्दाययति देवदत्तेन'।

(1114. आक्षेपान्तरवार्त्तिकम्- 2)

*** शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात् ***

भाष्यम्– शृणोत्यादीनां चोपसंख्यानं कर्तव्यम्। के पुनः शृणोत्यादयः? शृणोति विजानात्युपलभते। शृणोति देवदत्तः 'श्रावयति देवदत्तम्'। विजानाति देवदत्तः 'विज्ञापयति देवदत्तम्'। उपलभते देवदत्तः 'उपलम्भयति देवदत्तम्'। किं पुनः कारणं न सिद्ध्यति? अशब्दक्रियत्वात्।

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि—शब्दो येषां कर्मेति।

(1115. द्वितीयपक्ष आक्षेपवार्त्तिकम्- 3)

*** शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम् ***

भाष्यम्– शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसख्यानं कर्तव्यम्। के पुनर्जल्पति-प्रभृतयः? जल्पति विलपति आभाषते। जल्पति देवदत्तः 'जल्पयति देवदत्तम्'। विलपति देवदत्तः 'विलापयति देवदत्तम्'। आभाषते देवदत्तः 'आभाषयति देवदत्तम्'।

न्यूनतापूरणाधिकरणम्

(1116. आक्षेपवार्त्तिकम्- 4)

*** दृशेः सर्वत्र ***

भाष्यम्– दृशेः सर्वत्रोपसंख्यानं कर्तव्यम्। पश्यति रूपतर्कः कार्षापणम् 'दर्शयति रूपतर्कं कार्षापणम्'।

प्रतिषेधाधिकरणम्

(1117. आक्षेपवार्त्तिकम्- 5)

*** अदिखादिनीवहीनां प्रतिषेधः ***

भाष्यम्– अदिखादिनीवहीनां प्रतिषेधो वक्तव्यः।

उदाहरणभाष्यम्– अत्ति देवदत्तः 'आदयते देवदत्तेन'।

मतान्तरभाष्यम्– अपर आह—सर्वमेव प्रत्यवसानकार्यमदेर्न भवतीति वक्तव्यं परस्मैपदमपि।

बाधकभाष्यम्– इदमेकमिष्यते—'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' 'इदमेषां जग्धम्'।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदाहरणभाष्यम्– खादि—खादति देवदत्तः, 'खादयति देवदत्तेन'। नी—नयति देवदत्तः 'नाययति देवदत्तेन'।

(1118. **विशेषवार्त्तिकम्**- 6)

*** वहेरनियन्तृकर्तृकस्य ***

भाष्यम्– वहेरनियन्तृकर्तृकस्येति वक्तव्यम्। वहति भारं देवदत्तः 'वाहयति भारं देवदत्तेन'। अनियन्तृकर्तृकस्येति किमर्थम्? वहन्ति बलीवर्दा यवान् 'वाहयति बलीवर्दान्यवान्'।

(1119. **आक्षेपवार्त्तिकम्**- 7)

*** भक्षेरहिंसार्थस्य ***

भाष्यम्– भक्षेरहिंसार्थस्येति वक्तव्यम्। भक्षयति पिण्डीं देवदत्तः 'भक्षयति पिण्डीं देवदत्तेन'। अहिंसार्थस्येति किमर्थम्? भक्षयन्ति यवान्वलीवर्दाः 'भक्षयति बलीवर्दान् यवान्'।

कालादिकर्मकाणामकर्मकत्वाधिकरणम्

(1120. **आक्षेपवार्त्तिकम्**- 8)

*** अकर्मकग्रहणे कालकर्मणामुपसंख्यानम् ***

भाष्यम्– अकर्मकग्रहणे कालकर्मणामुपसंख्यानं कर्तव्यम्। मासमास्ते देवदत्तः 'मासमासयति देवदत्तम्'। मासं शेते देवदत्तः 'मासं शाययति देवदत्तम्'।

(1121. **समाधानवार्त्तिकम्**- 9)

*** सिद्धं तु कालकर्मणामकर्मकवद्वचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? कालकर्मका अकर्मकवद्भवन्तीति वक्तव्यम्।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। अकर्मकाणामित्युच्यते। न च केचित्कालभावाध्वभिरकर्मकाः, त एवं विज्ञास्यामः—क्वचिद्ये अकर्मका इति।

समाधानान्तरभाष्यम्– अथवा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणाम्। न चैतेन कर्मणा कश्चिदप्यकर्मकः।

समाधानान्तरभाष्यम्– अथवा यत्कर्म भवति न च भवति, तेनाकर्मकाणाम्। न चैतत् कर्म क्वचिदपि न भवति। गतिबुद्धि॥12॥

(193. **कर्मसञ्ज्ञासूत्रम्** 1.4.3 आ. 18)

293. हृक्रोरन्यतरस्याम् 1.4.53

न्यूनतापूर्त्यधिकरणम्

(1122. **आक्षेपवार्त्तिकम्**- 1)

*** हृक्रोर्वावचनेऽभिवाददिदृशोरात्मनेपद उपसंख्यानम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– हृक्रोर्वावचने अभिवादिदृशोरात्मनेपद उपसंख्यानं कर्तव्यम्। अभिवदति गुरुं देवदत्त: 'अभिवादयते गुरुं देवदत्तेन। अभिवादयते गुरुं देवदत्तम्'। पश्यन्ति भृत्या राजानम् 'दर्शयते भृत्यै राजा, दर्शयते भृत्यान् राजा'।

अनुयोगभाष्यम्– कथं चात्रात्मनेपदम्?

समाधानभाष्यम्– एकस्य 'णेरणौ' इति, अपरस्य 'णिचश्च' इति।

(194. **कर्तृसञ्ज्ञासूत्रम्** 1.4.3 आ. 19)

294. स्वतन्त्र: कर्ता 1.4.54

स्वतन्त्रशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं यस्य स्वं तन्त्रं स स्वतन्त्र:?

दूषणप्रत्याक्षेपभाष्यम्– किं चात:?

प्रत्याक्षेपसमाधानदूषणभाष्यम्– तन्तुवाये प्राप्नोति।

समाधानभाष्यम्– नैष दोष:। अयं तन्त्रशब्दोऽस्त्येव विताने वर्तते। तद्यथा— आस्तीर्णं तन्त्रम्, प्रोतं तन्त्रमिति। वितानमिति गम्यते। अस्ति प्राधान्ये वर्तते। तद्यथा— स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वप्रधान इति गम्यते। तद्य: प्राधान्ये वर्तते तन्त्रशब्दस्तस्येदं ग्रहणम्।

प्रयोज्यस्य कर्तृसञ्ज्ञासाधनाधिकरणम्

(1123. **आक्षेपवार्त्तिकम्**-1)

*** स्वतन्त्रस्य कर्तृसञ्ज्ञायां हेतुमत्युपसंख्यानमस्वतन्त्रत्वात् ***

भाष्यम्– स्वतन्त्रस्य कर्तृसञ्ज्ञायां हेतुमत्युपसंख्यानं कर्तव्यम्। पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति। किं पुन: कारणं न सिद्ध्यति? अस्वतन्त्रत्वात्।

(1124. **समाधानवार्त्तिकम्**-2)

*** न वा स्वातन्त्र्याद् इतरथा ह्यकुर्वत्यपि कारयतीति स्यात् ***

भाष्यम्– न वा कर्तव्यम्। किं कारणम्? स्वातन्त्र्यात्। स्वतन्त्रोऽसौ भवति। इतरथा ह्यकुर्वत्यपि कारयतीति स्यात्। यो हि मन्यते-नासौ स्वतन्त्र:, अकुर्वत्यपि तस्य कारयतीत्येतत्स्यात्।

(1125. **समाधानसाधकवार्त्तिकम्**-3)

*** नाकुर्वतीति चेत्स्वतन्त्र: ***

भाष्यम्– न चेदमकुर्वति तस्मिन्कारयतीत्येतद्भवति। स्वतन्त्रोऽसौ भवति।

आक्षेपभाष्यम्– शक्यं तावदनेनोपसंख्यानं कुर्वता वक्तुम् कुर्वन्स्वतन्त्रोऽकुर्वन्नेति।

समाधानभाष्यम्– साधीयो ज्ञापकम्। प्रेषिते च किलायं क्रियां चाक्रियां च दृष्ट्वाऽध्य-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्यति—कुर्वन्स्वतन्त्रोऽकुर्वन्नेति। यदि च प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भवतीति। स्वतन्त्रः कर्ता।।54।।

(195. **हेतुसञ्ज्ञासूत्रम्** 1.4.3 आ. 20)

295. तत्प्रयोजको हेतुश्च 1.4.55

प्रयोज्यस्य स्वतन्त्रत्वसाधनाधिकरणम्

(1126. **आक्षेपवार्त्तिकम्**-1)

*** प्रैषेऽस्वतन्त्रप्रयोजकत्वाद्धेतुसञ्ज्ञाऽप्रसिद्धिः ***

भाष्यम्– प्रैषेऽस्वतन्त्रप्रयोजकत्वाद्धेतुसञ्ज्ञाया अप्रसिद्धिः प्राप्नोतिः। स्वतन्त्रप्रयोजको हेतुसञ्ज्ञो भवतीत्युच्यते। न चासौ स्वतन्त्रं प्रयोजयति।

(1127. **समाधानवार्त्तिकम्**-2)

*** स्वतन्त्रत्वात्सिद्धम् ***

भाष्यम्– स्वतन्त्रत्वात्सिद्धमेतत्। स्वतन्त्रमसौ प्रयोजयति।

(1128. **समाधानसाधकवार्त्तिकम्**-3)

*** स्वतन्त्रत्वात्सिद्धमिति चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धम् ***

भाष्यम्– यदि च स्वतन्त्रो न प्रयोज्यः, अथ प्रयोज्यो न स्वतन्त्रः, प्रयोज्यः स्वतन्त्रश्चेति विप्रतिषिद्धम्।

(1129. **समाधानसाधकवार्त्तिकम्**-4)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्? एकं तावदुक्तम्—'न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीत्येतत्स्यात्' इति। अपरमुक्तम्—'न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्'। 'स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यम्' इति। तत्प्रयोजको।।55।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्

●

प्रथमेऽध्याये चतुर्थे पादे चतुर्थमाह्निकम्

विधिशेषप्रकरणे निपातसञ्ज्ञाप्रकरणम्

(196. **अधिकारसूत्रम्** 1.4.4 आ. 1)

296. प्राग्रीश्वरान्निपाताः 1.4.56

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेफोच्चारणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थं रेफाधिक ईश्वरशब्दो गृह्यते?

(1130. समाधानवार्त्तिकम्-1)

*** रीश्वराद्वीश्वरान्मा भूत् ***

भाष्यम्– रीश्वरादित्युच्यते, वीश्वरान्मा भूदिति—'शकिणमुल्कमुलावीश्वरेतोसुन्कसुनौ' इति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—अनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति। यदयं 'कृन्मेजन्तः' इति कृतो मान्तस्यैजन्तस्याव्ययसञ्ज्ञां शास्ति।

(1131. समाधानसाधकवार्त्तिकम्-2)

*** कृन्मेजन्तः परोऽपि सः ***

भाष्यम्– परोप्येतस्मात्कृन्मेजन्तश्चास्ति तदर्थमेतत्स्यात्।

समाधानबाधकभाष्यम्– यत्तर्ह्यव्ययीभावस्याव्ययसञ्ज्ञां शास्ति तज्ज्ञापयत्याचार्यः—अनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति।

(1132. समाधानसाधकवार्त्तिकम्-3)

*** समासेष्वव्ययीभावः ***

भाष्यम्– समासस्यैतज्ज्ञापकं स्याद्—अव्ययीभाव एव समासोऽव्ययसञ्ज्ञो भवति नान्य इति।

समाधानबाधकभाष्यम्– एवं तर्हि लोकत एतत्सिद्धम्। तद्यथा—लोके आ वनान्तादा उदकान्तात् प्रियं पान्थमनुव्रजेत्' इति। य एव प्रथमो वनान्त उदकान्तश्च ततोऽनुव्रजन्ति।

(1133. समाधानसाधकवार्त्तिकम्-4)

*** लौकिकं चातिवर्तते ***

भाष्यम्– द्वितीयं तृतीयं च वनान्तमुदकान्तं चानुव्रजन्ति तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः।

प्राग्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ प्राग्वचनं किमर्थम्?

(1134. समाधानवार्त्तिकम्-5)

*** प्राग्वचनं सञ्ज्ञाऽनिवृत्त्यर्थम् ***

भाष्यम्– प्राग्वचनं क्रियते निपातसञ्ज्ञाया अनिवृत्तिर्यथा स्यात्। अक्रियमाणे हि प्राग्वचने ऽनवकाशाः गत्युपसर्गकर्मप्रवचनीयसञ्ज्ञाः निपातसञ्ज्ञां बाधेरन्। ताः मा बाधिषतेति प्राग्वचनं क्रियते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– अथ क्रियमाणेऽपि प्राग्वचने यावताऽनवकाशा एताः सञ्ज्ञाः कस्मादेव न बाधन्त इति।

समाधानभाष्यम्– क्रियमाणे हि प्राग्वचने सत्यां निपातसञ्ज्ञायामेता अवयवसञ्ज्ञा आरभ्यन्ते तत्र वचनात्समावेशो भविष्यति।। प्राग्रीश्वरात्।।56।।

(197. **निपातसञ्ज्ञासूत्रम्** 1.4.4 आ. 2)

297. चादयोऽसत्त्वे 1.4.57

सत्त्वशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– अयं सत्त्वशब्दः—अस्त्येव द्रव्यपदार्थकः। तद्यथा—सत्त्वमयं ब्राह्मणः सत्त्वमियं ब्राह्मणीति। अस्ति क्रियापदार्थकः सद्भावः सत्त्वमिति। कस्येदं ग्रहणम्?

समाधानभाष्यम्– द्रव्यपदार्थकस्य। कुत एतत्? एवं च कृत्वा विधिः सिद्धो भवति, प्रतिषेधश्च।

असत्त्वेइत्यत्रप्रसज्यप्रतिषेधाधिकरणम्

एकदेशिभाष्ये आक्षेपभाष्यम्– किं पुनरयं पर्युदासः—यदन्यत्सत्त्ववचनादिति, आहोस्वित्प्रसज्यायं प्रतिषेधः—सत्त्ववचने नेति?

विशेषप्रश्नभाष्यम्– किं चातः?

पर्युदासदूषकभाष्यम्– यदि पर्युदासः विप्र इत्यत्रापि प्राप्नोति। क्रियाद्रव्यवचनोऽयं सङ्घातः। द्रव्यादन्यश्च विधिनाश्रीयते। अस्ति च प्रादिभिः सामान्यमिति कृत्वा तदन्तविधिना निपातसञ्ज्ञा प्राप्नोति।

प्रसज्यप्रतिषेधभाष्यम्– अथ प्रसज्यप्रतिषेधः। न दोषो भवति।

सिद्धान्तिभाष्यम्– यथा न दोषस्तथास्तु। चादयोसत्त्वे।।57।।

(198. **उपसर्गसञ्ज्ञासूत्रम्** 1.4.4 आ. 3)

298. प्रादय उपसर्गाः क्रियायोगे 1.4.58

योगविभागावश्यकताधिकरणम्

(1135. **आक्षेपवार्त्तिकम्**-1)

* **प्रादय इति योगविभागः** (निपातसञ्ज्ञार्थः, एकयोगे हि निपातसञ्ज्ञाभावः) *

भाष्यम्– 'प्रादयः' इति योगविभागः कर्तव्यः। प्रादयोऽसत्त्ववचना निपातसञ्ज्ञा भवन्ति। तत 'उपसर्गाः क्रियायोगे' इति। किमर्थो योगविभागः? निपातसञ्ज्ञार्थः। निपातसञ्ज्ञा यथा स्यात्। एकयोगे हि निपातसञ्ज्ञाभावः। एकयोगे हि सति निपातसञ्ज्ञाया अभावः स्यात्। यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवचनीयसञ्ज्ञास्तस्मिन्नेव विशेषे निपातसञ्ज्ञा स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यूनतापूरणाधिकरणम्

(1136. आक्षेपवार्त्तिकम्-2)

*** मरुच्छब्दस्योपसंख्यानम् ***

भाष्यम्– मरुच्छब्दस्योपसंख्यानं कर्तव्यम्। मरुद्दत्तो मरुत्तः 'अच उपसर्गाद्' इति तत्वं यथा स्यात्।

(1137. आक्षेपवार्त्तिकम्-3)

*** श्रच्छब्दस्योपसंख्यानम् ***

भाष्यम्– श्रच्छब्दस्योपसंख्यानम् कर्तव्यम्। श्रद्धा। प्रादय उपसर्गाः।।58।।

(199. गतिसञ्ज्ञासूत्रम् 1.4.4 आ. 4)

299. गतिश्च 1.4.59

न्यूनतापूर्त्यधिकरणम्

(1138. आक्षेपवार्त्तिकम्-1)

*** कारिकाशब्दस्य ***

भाष्यम्– कारिकाशब्दस्योपसंख्यानं कर्तव्यम्। कारिकाकृत्य।

(1139. आक्षेपवार्त्तिकम्-2)

*** पुनश्चनसौ छन्दसि ***

भाष्यम्– पुनश्चनसौ छन्दसि गतिसञ्ज्ञौ भवत इति वक्तव्यम्। पुनरुत्स्यूतं वासो देयम्। पुनर्निष्कृतो रथः। उशिग्दूतश्चनोहित इति।

क्रियाविशेषावधारणाधिकरणम्

(1140. आक्षेपवार्त्तिकम्-3)

*** गत्युपसर्गसञ्ज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम् ***

भाष्यम्– गत्युपसर्गसञ्ज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसञ्ज्ञा भवन्तीति वक्तव्यम्।

प्रयोजनप्रश्नभाष्यम्– किं प्रयोजनम्?

(1141. प्रयोजनवार्त्तिकम्-4)

*** प्रयोजनं घञ् षत्वणत्वे ***

भाष्यम्– घञ् (प्रयोजयति) प्रवृद्धो—भावः प्रभावः 'अनुपसर्गे' इति प्रतिषेधो मा भूत्। (षत्वणत्वे च प्रयोजयतः) षत्वम्—विगताः सेचका अस्माद्ग्रामाद्विसेचको ग्रामः 'उपसर्गाद्–' इति षत्वं मा भूत्। णत्वम्—प्रगता नायका अस्माद्ग्रामात्प्रनायको ग्रामः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'उपसर्गाद्–' इति णत्वं मा भूत्।

(1142. लाघववार्त्तिकम्-5)

*** वृद्धिविधौ च धातुग्रहणानर्थक्यम् ***

भाष्यम्– वृद्धिविधौ च धातुग्रहणमनर्थकम् 'उपसर्गादृति धातौ' इति। तत्र धातुग्रहणस्यैतत्प्रयोजनमिह मा भूत्—प्रर्षभं वनमिति। क्रियमाणे चापि धातुग्रहणे प्रर्छक इत्यत्र प्राप्नोति। यत्क्रियायुक्तास्तं प्रतीति वचनान्न भवति।

(1143. दूषणवार्त्तिकम्-6)

*** वद्विधिनस्भावाबीत्त्वस्वाङ्गादिस्वरणत्वेषु दोषः ***

भाष्यम्– वद्विधिनस्भावाबीत्त्वस्वाङ्गादिस्वरणत्वेषु दोषो भवति। वद्विधि—यदुद्वतो निवतो यासि वप्सन्। वद्विधिः। नस्भाव—प्रणसं मुखम्। उन्नसं मुखम्। नस्भाव। अबीत्त्व—प्रेपं परेपम्। अबीत्व। स्वाङ्गादिस्वर—प्रस्फिक् प्रोदरः। स्वाङ्गादिस्वर। णत्व—'प्र णः शूद्रः' 'प्र ण आचार्यः' 'प्र णो राजा' 'प्र णो वृत्रहा'। उपसर्गादित्येते विधयो न प्राप्नुवन्ति।

(1144. दूषणपरिहारवार्त्तिकम्-7)

*** वद्विधिनस्भावाबीत्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम् ***

भाष्यम्– अनवकाशा एते विधयस्ते वचनप्रमाण्याद्भविष्यन्ति।

(1145. आक्षेपवार्त्तिकम्-8)

*** सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु ***

भाष्यम्– सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु वक्तव्यः। नुम्विधि—सुलभं दुर्लभम्। 'उपसर्गाद्–' इति नुम्मा भूदिति। 'न सुदुर्भ्यां केवलाभ्याम्' इत्येतन्न वक्तव्यं भवति।

प्रयोजनपरिहारभाष्यम्– नैतदस्ति प्रयोजनम्। क्रियत एतन्न्यास एव।

उदाहरणसमन्वयभाष्यम्– तत्व—सुदत्तम् 'अच उपसर्गात्तः' इति तत्वं मा भूदिति। षत्व—सुसिक्तं घटशतेन। सुस्तुतं श्लोकशतेन। 'उपसर्गाद्, इति षत्वं मा भूदिति। 'सुः पूजायाम्' इत्येतन्न वक्तव्यं भवति।

प्रयोजनपरिहारभाष्यम्– नैतदस्ति प्रयोजनम्। क्रियत एतन्न्यास एव।

उदाहरणसमन्वयभाष्यम्– णत्व—दुर्नयं दुर्नीतमिति। 'उपसर्गाद्' इति णत्वं मा भूदिति। गतिश्च।।59।।

(200. गतिसञ्ज्ञासूत्रम् 1.4.4 आ. 5)

300. ऊर्यादिच्विडाचश्च 1.4.60

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टपरिहाराधिकरणम्

(1146. **आक्षेपवार्त्तिकम्-1**)

* कृभ्वस्तियोगे *

भाष्यम्- कृभ्वस्तियोग इति वक्तव्यम्। इहैव यथा स्यात्—ऊरीकृत्य ऊरीभूय। इह मा भूत्—ऊरी पक्त्वा।

तृतीयाक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्?

सिद्धान्तिसमाधानभाष्यम्- न वक्तव्यम्। क्रियायोग इत्यनुवर्तते। न चान्यया क्रिययोर्यादिच्विडाचां योगोऽस्ति। ऊर्यादिच्वि.।।60।।

(201. **गतिसञ्ज्ञासूत्रम्** 1.4.4 आ. 6)

301 अनुकरणं चानितिपरम् 1.4.61

समासनिर्णयाधिकरणम्

आक्षेपभाष्यम्- कथमिदं विज्ञायते—इतेः परमितिपरं न इतिपरमनितिपरमिति। आहो स्विदितिः परो यस्मात्तदिदमितिपरं न इतिपरमनितिपरमिति।

विशेषप्रश्नभाष्यम्- किं चातः?

प्रथमपक्षदूषकभाष्यम्- यदि विज्ञायते—इतेः परमितिपरं न इतिपरमनितिपरमिति, खाडितिकृत्वा निरष्ठीवदित्यत्र प्राप्नोति।

द्वितीयपक्षदूषकभाष्यम्- अथ विज्ञायते—इतिः परो यस्मात्तदितिपरं न इतिपरमनितिपरमिति, श्रौषड्वौषडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोति।

समाधानभाष्यम्- अस्तु तावद्—इतिः परो यस्मात्तदितिपरं न इति परमनितिपरमिति।

आक्षेपस्मारणभाष्यम्- ननु चोक्तम्—श्रौषड्वौषडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोतीति।

आक्षेपपरिहारभाष्यम्- नैष दोषः। इदं तावदयं प्रष्टव्यः—अथेह 'ते प्राग्धातोः' इति कथं गतिमात्रस्य पूर्वप्रयोगो भवति—उपोद्धरतीति?

तद्देयोत्तरभाष्यम्- गत्याकृतिः प्रतिनिर्दिश्यते?

तद्दत्तोत्तरस्यैव समाश्रयणभाष्यम्- इहापि तर्ह्यनुकरणाकृतिः प्रतिनिर्दिश्यते।

अनितिपरपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थमिदमुच्यते?

(1147. **समाधानवार्त्तिकम्-1**)

* अनुकरणस्येतिकरणपरत्वप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः *

भाष्यम्- अनुकरणस्येतिकरणपरत्वप्रतिषेध उच्यते। किं प्रयोजनम्? अनिष्ठशब्दनिवृत्त्यर्थः। अनिष्ठशब्दता मा भूदिति। इदं विचारयिष्यते—प्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात्सञ्ज्ञानियमार्थं वेति। तद्यदा प्रयोगनियमार्थं तदानिष्टशब्दनिवृत्त्यर्थमिदं वक्तव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा हि सञ्ज्ञानियमार्थं तदा न दोषो भवति। अनुकरणम्।।61।।

(202. **गतिसञ्ज्ञासूत्रम्** 1.4.4 आ. 7)

302. आदरानादरयोः सदसती 1.4.62

अनादरासद्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– इदमतिबहु क्रियते—आदरे अनादरे सद् असदिति। 'आदरे सद्' इत्येव सिद्धम्।

प्रत्याक्षेपभाष्यम्– कथमसत्कृत्येति?

प्रत्याक्षेपपरिहारभाष्यम्– तदन्तविधिना भविष्यति।

प्रत्याक्षेपान्तरभाष्यम्– केनेदानीमनादरे भविष्यति?

प्रत्याक्षेपान्तरपरिहारभाष्यम्– नञाऽऽदरप्रतिषेधं विज्ञास्यामः—न आदरेऽनादर इति।

समाधानभाष्यम्– नैवं शक्यम्। आदरप्रसङ्गे एव स्यादनादरप्रसङ्गे न स्यात्। अनादरग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञायते—अविद्यमानादरे अनादरे इति। तस्मादनादरग्रहणं कर्तव्यम्। असतस्तु तदन्तविधिना सिद्धम्। आदरानादरयोः।।62।।

(203. **गतिसञ्ज्ञासूत्रम्** 1.4.4 आ. 8)

304. अन्तरपरिग्रहे 1.4.64

(1148. **आक्षेपवार्त्तिकम्**-1)

* अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम् *

भाष्यम्– अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं कर्तव्यम्। अङ्—अन्तर्द्धा। किविधिः—अन्तर्द्धिः। समास—अन्तर्हत्य। णत्वम्—अन्तर्हण्याद् गोभ्यो गाः। अन्तरपरिग्रहे।।64।।

(204. **गतिसञ्ज्ञासूत्रम्** 1.4.4 आ. 9)

313. साक्षात्प्रभृतीनि च 1.4.73

न्यूनतापूर्त्यधिकरणम्

(1149. **आक्षेपवार्त्तिकम्**-1)

* साक्षात्प्रभृतिषु च्व्यर्थवचनम् *

भाष्यम्– साक्षात्प्रभृतिषु च्व्यर्थवचनं कर्तव्यम्। असाक्षात्साक्षात्कृत्वा साक्षात्कृत्य। यदा हि साक्षादेव सत् किञ्चित्क्रियते तदा मा भूदिति।

(1150. **आक्षेपवार्त्तिकम्**-2)

* मकारान्तत्वं च गतिसञ्ज्ञासन्नियुक्तम् *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– मकारान्तत्वं च गतिसञ्ज्ञासन्नियोगेन वक्तव्यम्। लवणंकृत्य।

(1151. **आक्षेपवार्त्तिकम्**- 3)

*** तत्र च च्विप्रतिषेधः ***

भाष्यम्– तत्र च च्व्यन्तस्य प्रतिषेधो वक्तव्यः। लवणीकृत्य।

(1152. **आक्षेपपरिहारवार्त्तिकम्**- 4)

*** नवा पूर्वेण कृतत्वात् ***

भाष्यम्– नवा वक्तव्यम्। किं कारणम्? पूर्वेण कृतत्वात्। अस्त्वनेन विभाषा, पूर्वेण नित्या भविष्यति।

प्रयोजनान्तरस्मारणभाष्यम्– इदं तर्हि प्रयोजनम्—'मकारान्तत्वं च गतिसञ्ज्ञासन्नियुक्तम्' इत्युक्तं तच्च च्व्यन्तस्य मा भूदिति।

प्रयोजनान्तरपरिहारभाष्यम्– एतदपि नास्ति प्रयोजनम्। लवणशब्दस्यायं विभाषा लवणंशब्द आदेशः क्रियते। यदि च लवणीशब्दस्यापि विभाषा लवणंशब्द आदेशो भवति न किञ्चिद् दुष्यति। त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवतीति। साक्षात्प्रभृतीनि च।।73।।

(205. **सञ्ज्ञानियमसूत्रम्** 1.4.4 आ. 10)

319. ते प्राग्धातोः 1.4.79

नियमाकारनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमिदं प्राग्धातुवचनं प्रयोगनियमार्थम्—एते प्रागेव धातोः प्रयोक्तव्याः। आहोस्वित्सञ्ज्ञानियमार्थम्—एते प्राक् च प्रयोक्तव्याः प्राक्प्रयुज्यमानानां गतिसञ्ज्ञा भवतीति।

विशेषप्रश्नभाष्यम्– कश्चात्र विशेषः?

(1153. **प्रथमपक्षदूषणवार्त्तिकम्**- 1)

*** प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येति-करणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः ***

भाष्यम्– प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधो वक्तव्यः। किं प्रयोजनम्? अनिष्टशब्दनिवृत्त्यर्थः। अनिष्टशब्दता मा भूदिति।

(1154. **दूषणान्तरवार्त्तिकम्**- 2)

*** छन्दसिपरव्यवहितवचनं च ***

भाष्यम्– 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति वक्तव्यम्।

(1155. **द्वितीयपक्ष इष्टापत्तिवार्त्तिकम्**- 3)

*** सञ्ज्ञानियमे सिद्धम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– सञ्ज्ञानियमे सति सिद्धमेतद्भवति।

द्वितीयपक्षाङ्गीकारभाष्यम्– अस्तु तर्हि सञ्ज्ञानियमः।

सूत्रप्रत्याख्यानाधिकरणम्

(1156. **प्रत्याख्यानवार्त्तिकम्**-4)

* उभयोरनर्थकं वचनमनिष्टादर्शनात् *

भाष्यम्– उभयोरपि पक्षयोर्वचनमनर्थकम्। किं कारणम्? अनिष्टादर्शनात्। नहि कश्चित्प्रपचतीति प्रयोक्तव्ये पचति प्रेति प्रयुङ्क्ते। यदि चानिष्टं दृश्येत, ततो यत्नार्हं स्यात्।

(1157. **प्रत्याख्यानपरिहारवार्त्तिकम्**-5)

* उपसर्जनसन्निपाते तु पूर्वपरव्यवस्थार्थम् *

भाष्यम्– उपसर्जनसन्निपाते तु पूर्वपरव्यवस्थार्थमेतद्वक्तव्यम्—'ऋषभं कूलमुद्रुजम्' 'ऋषभं कूलमुद्वहम्। अत्र गतेः प्राग्धातोः प्रयोगो यथा स्यात्।

आक्षेपभाष्यम्– यद्युपसर्जनसन्निपाते पूर्वपरव्यवस्थार्थमिदमुच्यते, सुकटंकराणि वीरणानीत्यत्र गतेः प्राग्धातोः प्रयोगः प्राप्नोति।

आक्षेपपरिहारभाष्यम्– आचार्यप्रवृत्तिर्ज्ञापयति—'नात्र गतेः प्राक्प्रयोगो भवति' यदयम् 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति खकारमनुबन्धं करोति। कथं कृत्वा ज्ञापकम्? खित्करणे एतत्प्रयोजनं 'खिति' इति मुम् यथा स्यात्। यदि चात्र गतेः प्राक्प्रयोगः स्यात्, खित्करणमनर्थकं स्यात्। अस्त्वत्र मुम्। 'अनव्ययस्य' इति प्रतिषेधो भविष्यति। पश्यति त्वाचार्यः— 'नात्र गतेः प्राग् धातोः प्रयोगो भवति' इति, ततः खकारमनुबन्धं करोति।

प्रत्याख्यानसाधकभाष्यम्– नैतदस्ति ज्ञापकम्। यद्यत्र गतेः प्राक्प्रयोगः स्यात्, स्यादेवात्र मुमागमः। कथम्? 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवति' इति।

उपसंहारभाष्यम्– तस्मान्नार्थ एवमर्थेन प्राग्धातुवचनेन।

आक्षेपभाष्यम्– कथम्– ऋषभं कूलमुद्रुजम्' 'ऋषभं कूलमुद्वहम्?

आक्षेपपरिहारभाष्यम्– नैष दोषः। नैष उदिरुपपदम्। किं तर्हि? विशेषणम्। 'उदि कूले रुजिवहोः' उत्पूर्वाभ्यां रुजिवहिभ्यां कूले उपपदे इति।। ते प्राग्धातोः।।79।।

निपातसञ्ज्ञाप्रकरणे कर्मप्रवचनीयसञ्ज्ञाप्रकरणम्

(206. **कर्मप्रवचनीयसञ्ज्ञाधिकारसूत्रम्** 1.4.4 आ. 11)

322. कर्मप्रवचनीयाः 1.4.82

महासञ्ज्ञाकरणस्यान्वर्थतासाधनाधिकरणम्

आक्षेपभाष्यम्– किमर्थं महती सञ्ज्ञा क्रियते?

समाधानभाष्यम्– अन्वर्थसञ्ज्ञा यथा विज्ञायेत—कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति।

अनुयोगभाष्यम्– के पुनः कर्म प्रोक्तवन्त?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– ये सम्प्रति क्रियां नाहुः।

अनुयोगभाष्यम्– के च सम्प्रति क्रियां नाहुः?

समाधानभाष्यम्– ये अप्रयुज्यमानस्य क्रियामाहुः ते कर्मप्रवचनीयाः। कर्मप्रवचनीयाः।।82।।

(207 **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 **आ.** 12)

323 अनुर्लक्षणे 1.4.83

सूत्रारम्भप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

समाधानभाष्यम्– कर्मप्रवचनीयसंज्ञा यथा स्यात्? शाकल्यस्य संहितामनु प्रावर्षत् 'गतिर्गतौ' इति निघातः प्रसज्येत।

समाधानबाधकभाष्यम्– यद्येवं वेरपि कर्मप्रवचनीयसंज्ञा वक्तव्या। वेरपि निघातो नेष्यते—प्रादेशं विपरिलिखति।

समाधानसाधकभाष्यम्– अस्त्यत्र विशेषः। नात्र वेर्लिखि प्रति क्रियायोगः। किं तर्हि? अप्रयुज्यमानम्—प्रादेशं विमाय परिलिखतीति।

समाधानबाधकभाष्यम्– यद्येवम्, अनोरपि कर्मप्रवचनीयसंज्ञया नार्थः। अनोरपि हि न वृषि प्रति क्रियायोगः। किं तर्हि? अप्रयुज्यमानम्—शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत्।

समाधानसाधकभाष्यम्– इदं तर्हि प्रयोजनम्—द्वितीया यथा स्यात् 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

समाधानपरिहारभाष्यम्– उत उत्तरं पठति।

(1157. **वैयर्थ्यवार्त्तिकम्**-1)

* अनुर्लक्षणेवचनानर्थक्यं सामान्यकृतत्वात् *

भाष्यम्– अनुर्लक्षणेवचनमनर्थकम्। किं कारणम्? सामान्यकृतत्वात्। सामान्येनैवात्र कर्मप्रवचनीयसञ्ज्ञा भविष्यति 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' इति।

(1158. **वैयर्थ्यबाधकवार्त्तिकम्**-2)

* हेत्वर्थं तु वचनम् *

भाष्यम्– हेत्वर्थमिदं वक्तव्यम्। हेतुः शाकल्यस्य संहिता वर्षस्य, न लक्षणम्।

तृतीयाक्षेपभाष्यम्– किं वक्तव्यमेतत्?

सिद्धान्तिसमाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? लक्षणं हि नाम स भवति येन पुनःपुनर्लक्ष्यते, न यः सकृदपि निमित्तत्वाय कल्पते। सकृच्चासौ शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयाक्षेपभाष्यम्- स तर्हि तथा निर्देशः कर्तव्यः 'अनुर्हेतौ' इति। अथेदानीं लक्षणेन हेतुरपि व्याप्तः। नार्थोऽनेन?

समाधानभाष्यम्- लक्षणेन हेतुरपि व्याप्तः। नह्यवश्यं तदेव लक्षणं भवति— येन पुनःपुनर्लक्ष्यते। किं तर्हि? यत्सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणं भवति। तद्यथा—भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं भवति।

प्रयोजनभाष्यम्- एतदेव तर्हि प्रयोजनम्—द्वितीया यथा स्यात् 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

परिहारभाष्यम्- एतदपि नास्ति प्रयोजनम्। सिद्धात्र द्वितीया 'कर्मप्रवचनीययुक्ते' इत्येव।

परिहारबाधकभाष्यम्- न सिद्ध्यति। परत्वाद्धेत्वाश्रया तृतीया प्राप्नोति। (एवमर्थमिदमुच्यते)। अनुर्लक्षणे।।83।।

(208. **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 आ. 13)

328. आङ्मर्यादावचने 1.4.88

अभिविधौ कर्मप्रवचनीयसञ्ज्ञासाधनाधिकरणम्

(1159. **आक्षेपवार्त्तिकम्**-1)

*** आङ् मर्यादाभिविध्योः ***

भाष्यम्- आङ्मर्यादाभिविध्योरिति वक्तव्यम्। इहापि यथा स्यात्—आकुमारं यशः पाणिनेरिति।

तृतीयाक्षेपभाष्यम्- तत्तर्हि वक्तव्यम्?

सिद्धान्तिभाष्यम्- न वक्तव्यम्। 'मर्यादावचने' इत्येव सिद्धम्। एषास्य यशसो मर्यादा। आङ्मर्यादावचने।।88।।

209. **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 आ. 14)

329. लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः 1.4.89

लक्षणादीनां प्रत्यादिद्योत्यत्वाधिकरणम्

अनुयोगभाष्यम्- कस्य लक्षणादयोऽर्था निर्दिश्यन्ते?

समाधानभाष्यम्- वृक्षादीनाम्।

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्- किमर्थं पुनरिदमुच्यते?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– कर्मप्रवचनीयसञ्ज्ञा यथा स्यात् गत्युपसर्गसञ्ज्ञे मा भूतामिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। यत्क्रियायुक्तास्तं प्रतिगत्युपसर्गसञ्ज्ञे भवत:। न च वृक्षादीन्प्रति क्रियायोग:।

समाधानसाधकभाष्यम्– इदं तर्हि प्रयोजनम् द्वितीया यथा स्यात् 'कर्मप्रवचनीययुक्ते द्वितीया' इति। वृक्षं प्रति विद्योतते वृक्षमनु विद्योतते इति। एवमर्थमिदमुच्यते। लक्षणे.।।८९।।

(210. **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 आ. 15)

332. अधिपरी अनर्थकौ 1.4.92

उक्तार्थस्यापि प्रयोगाधिकरणम्

आक्षेपभाष्यम्– किमर्थमधिपर्योरनर्थकयो: कर्मप्रवचनीयसञ्ज्ञोच्यते?

समाधानभाष्यम्– कर्मप्रवचनीयसञ्ज्ञा यथा स्यात्, गत्युपसर्गसञ्ज्ञे मा भूतामिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। यत्क्रियायुक्तौ तं प्रतिगत्युपसर्गसञ्ज्ञौ भवत:। अनर्थकौ चेमौ।

समाधानसाधकभाष्यम्– इदं तर्हि प्रयोजनम्—पञ्चमी यथा स्यात् 'पञ्चम्यपाङ्परिभि:' इति कुत: पर्यागम्यत इति।

समाधानबाधकभाष्यम्– सिद्धं तु 'पञ्चम्यपादाने' इत्येव। आतश्चापादानपञ्चम्येव, यत्राधिशब्देन योगे पञ्चमी न विधीयते तत्रापि च श्रूयते—कुतोऽध्यागम्यते इति।

समाधानसाधकभाष्यम्– एवं तर्हि सिद्धे सति यदनर्थकयोरुपसर्गसञ्ज्ञाबाधिकां कर्मप्रवचनीयसञ्ज्ञां शास्ति तज्ज्ञापयत्याचार्य:—'अनर्थकानामप्येषां भवत्यर्थवत्कृतम्' इति। किमेतस्य ज्ञापने प्रयोजनम्? निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं तन्न वक्तव्यं भवति।

समाधानान्तरभाष्यम्– अथवा नेमावनर्थकौ। किं तर्ह्यनर्थकावित्युच्यते? अनर्थान्तर-वाचिनावनर्थकौ, धातुनोक्तां क्रियामाहतु:। तदविशिष्टं भवति। यथा शङ्खे पय:।

आक्षेपभाष्यम्– यद्येवं धातुनोक्तत्वात्तस्यार्थस्योपसर्गप्रयोगो न प्राप्नोति 'उक्तार्थानाम-प्रयोग:' इति।

समाधानभाष्यम्– उक्तार्थानामपि प्रयोगो दृश्यते। तद्यथा—अपूपौ द्वावानय ब्राह्मणौ। द्वावानयेति। अधिपरी।।92।।

(211. **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 आ. 16)

335. अपि: पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु 1.4.95

द्वितीयावारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—सर्पिषोऽपि स्यात् गोमूत्रस्यापि स्यात्? किं च स्यात्? द्वितीया प्रसज्येत 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकभाष्यम्– नैष दोषः। नेमे अप्यर्था निर्दिश्यन्ते। किं तर्हि? परपदार्था इमे निर्दिश्यन्ते—एतेष्वर्थेषु यत्पदं वर्तते तत्प्रति अपिः कर्मप्रवचनीयसञ्ज्ञो भवतीति।

समाधानान्तरभाष्यम्– अथवा यदत्र कर्मप्रवचनीययुक्तं नादः प्रयुज्यते। किं पुनस्तत्? बिन्दुः। बिन्दोस्तर्हि कस्मान्न भवति? 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति प्रथमा भविष्यति। अपिः पदार्थ.।।95।।

(212. **कर्मप्रवचनीयसञ्ज्ञासूत्रम्** 1.4.4 आ. 17)

336. अधिरीश्वरे 1.4.96

स्वं प्रति कर्मप्रवचनीयतासाधनाधिकरणम्

(1160. **वार्त्तिकम्**-1)

* अधिरीश्वरवचने उक्तम् *

भाष्यम्– किमुक्तम्? 'यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम्'। 'प्रथमानुपपत्तिस्तु'। 'स्ववचनात्तु सिद्धम्' इति। अधिः स्वं प्रति कर्मवचनीयसञ्ज्ञो भवतीति वक्तव्यम्। अधिरीश्वरे।।96।।

अथ परस्मैपदात्मनेपदसञ्ज्ञासूत्रे

(213. **परस्मैपदसञ्ज्ञासूत्रम्** 1.4.4 आ. 18)

338. लः परस्मैपदम् 1.4.98

परस्मैपदात्मनेपदसञ्ज्ञयोःपुरुषसञ्ज्ञाभिःसमावेशाधिकरणम्

(1161. **आक्षेपवार्त्तिकम्**-1)

* लादेशे परस्मैपदग्रहणं पुरुषबाधितत्वात्(दिह वचने हि सञ्ज्ञाबाधनम्) *

भाष्यम्– लादेशे परस्मैपदग्रहणं कर्तव्यम्। कि कारणम्? पुरुषबाधितत्वात्, इह वचने हि सञ्ज्ञाबाधनम्। इह हि क्रियमाणे अनवकाशा पुरुषसञ्ज्ञा परस्मैपदसञ्ज्ञां बाधेत।

आक्षेपबाधकभाष्यम्– परस्मैपदसञ्ज्ञाप्यनवकाशा सा वचनाद्भविष्यति।

आक्षेपसाधकभाष्यम्– सावकाशा परस्मैपदसञ्ज्ञा। कोऽवकाशः? शतृक्वसू अवकाशः।

(1162. **समाधानवार्त्तिकम्**-2)

* सिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य *

भाष्यम्– यदयं 'सिचिवृद्धिः परस्मैपदेषु' इति परस्मैपदग्रहणं करोति तज्ज्ञापयत्याचार्यः 'न पुरुषसञ्ज्ञा परस्मैपदसञ्ज्ञां बाधते' इति। लः परस्मै.।।98।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथममध्यमोत्तमपुरुषसञ्ज्ञासूत्रम्

(214. **प्रथममध्यमोत्तमसञ्ज्ञासूत्रम्** 1.4.4 आ. 19)

340. तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः 1.4.100

यथासंख्योपपादनाधिकरणम्

(1163. **आक्षेपवार्त्तिकम्**-1)

*** प्रथममध्यमोत्तमसञ्ज्ञायामात्मनेपदग्रहणं समसंख्यार्थम् ***

भाष्यम्– प्रथममध्यमोत्तमसञ्ज्ञायामात्मनेपदग्रहणं कर्तव्यम्। आत्मनेपदानां च प्रथममध्यमोत्तमसञ्ज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्? समसंख्यार्थम्। संख्यातानुदेशो यथा स्यात्। अक्रियमाणे ह्यात्मनेपदग्रहणे तिस्रः सञ्ज्ञाः, षट् संज्ञिनः, वैषम्यात्संख्यातानुदेशो न स्यात्।

(1164. **आक्षेपान्तरवार्त्तिकम्**-2)

*** आनुपूर्व्यवचनं च ***

भाष्यम्– आनुपूर्व्यवचनं च कर्तव्यम्। अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसञ्ज्ञा स्यात् कस्यचिदेव मध्यमसञ्ज्ञा कस्यचिदेवोत्तमसञ्ज्ञा।

(1165. **परिहारवार्त्तिकम्**-3)

*** नवैकशेषनिर्देशात् ***

भाष्यम्– यत्तावदुच्यते—'आत्मनेपदग्रहणं कर्तव्यं समसंख्यार्थम्' इति, तन्न कर्तव्यम्। सञ्ज्ञा अपि षडेव निर्दिश्यन्ते। कथम्? एकशेषनिर्देशात्। एकशेषनिर्देशोऽयम्।

कृतद्वन्द्वानामेकशेषसाधनाधिकरणम्

आक्षेपभाष्यम्– अथैतस्मिन्नेकशेषनिर्देशे सति किमयं कृतैकशेषाणां द्वन्द्वः—प्रथमश्च प्रथमश्च प्रथमौ। मध्यमश्च मध्यमश्च मध्यमौ। उत्तमश्चोत्तमश्चोत्तमौ। प्रथमौ च मध्यमौ च उत्तमौ च प्रथममध्यमोत्तमा इति। आहोस्वित्कृतद्वन्द्वानामेकशेषः—प्रथमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाः प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति।

विशेषजिज्ञासाभाष्यम्– किं चातः?

विशेषदर्शकभाष्यम्– यदि कृतैकशेषाणां द्वन्द्वः, प्रथममध्यमयोः प्रथमसञ्ज्ञा प्राप्नोति। उत्तमप्रथमयोर्मध्यमसञ्ज्ञा प्राप्नोति। मध्यमोत्तमयोरुत्तमसञ्ज्ञा प्राप्नोति। अथ कृतद्वन्द्वानामेकशेषः, न दोषो भवति।

सिद्धान्तिभाष्यम्– यथा न दोषस्तथास्तु।

आक्षेपभाष्यम्– किं पुनरत्र न्याय्यम्?

समाधानभाष्यम्– उभयमित्याह। उभयं हि दृश्यते। तद्यथा—बहु शक्तिकिटकम्,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहूनि शक्तिकिटकानि। बहुस्थालीपिठरम्, बहूनि स्थालीपिठराणि।

द्वितीयाक्षेपपरिहारभाष्यम्– यदप्युच्यते—क्रियमाणेऽप्यात्मनेपदग्रहणे आनुपूर्व्यवचनं कर्तव्यमिति। न कर्तव्यम्। लोकत एतत्सिद्धम्। तद्यथा लोके 'विहव्यस्य द्वाभ्यां द्वाभ्यामग्निरुपस्थेय' इति। न चोच्यते—आनुपूर्व्येणेति। आनुपूर्व्येण चोपस्थीयत इति। तिङस्त्रीणि।।100।।

तिङ्सुपोर्विभक्तिसञ्ज्ञासूत्रम्

(215. **विभक्तिसूत्रम्** 1.4..4 आ. 20)

343. विभक्तिश्च 1.4.103

आक्षेपभाष्यम्– त्रीणित्रीणीत्यनुवर्तते, उताहो न?

आक्षेपबीजप्रश्नभाष्यम्– किं चातः?

प्रथमपक्षदूषणभाष्यम्– यद्यनुवर्तते—'अष्टन आ विभक्तौ' इत्यात्वं न प्राप्नोति।

द्वितीयपक्षदूषणभाष्यम्– अथ निवृत्तम्, 'प्रथमयोः पूर्वसवर्णः' इत्यत्र प्रत्यययोरेव ग्रहणं प्राप्नोति।

सिद्धान्तिभाष्यम्– यथेच्छसि तथास्तु।

प्रथमपक्षाभ्युपगमभाष्यम्– अस्तु तावद्—अनुवर्तत इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'अष्टन आ विभक्तौ' इत्यात्वं न प्राप्नोतीति।

आक्षेपपरिहारभाष्यम्– वचनाद्भविष्यति।

द्वितीयपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु—निवृत्तम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं 'प्रथमयोः पूर्वसवर्णः' इति प्रत्यययोरेव ग्रहणं प्राप्नोतीति।

आक्षेपपरिहारभाष्यम्– नैष दोषः। अचीत्यनुवर्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः।

आक्षेपभाष्यम्– ननु चैव विज्ञायते—अजादी यौ प्रथमौ, अजादीनां वा यौ प्रथमाविति।

समाधानभाष्यम्– यत्तर्हि 'तस्माच्छसो नः पुंसि' इत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति। तज्ज्ञापयत्याचार्यः—विभक्त्योर्ग्रहणम्—इति।

ज्ञापकान्तरभाष्यम्– अथवा वचनग्रहणमेव कुर्याद् 'औजसोः पूर्वसवर्णः इति। विभक्तिश्च।।103।।

(216-218. **नियमसूत्राणि** 1.4.4 आ. 21-23)

344, 346-347. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः-104 अस्मद्युत्तमः-106 शेषे प्रथमः-107

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(1166. समाधानवार्त्तिकम्-1)

*** युष्मदस्मच्छेषवचनं नियमार्थम् ***

भाष्यम्– नियमार्थोऽयमारम्भः।

आक्षेपभाष्यम्– अथैतस्मिन्नियमार्थं विज्ञायमाने किमयमुपपदनियमः—युष्मदि मध्यम एव, अस्मद्युत्तम एव। आहोस्वित्पुरुषनियमः—युष्मद्येव मध्यमः, अस्मद्येवोत्तम इति?

विशेषप्रश्नभाष्यम्– किं चातः?

द्वितीयपक्षे गौरवदर्शनभाष्यम्– यदि पुरुषनियमः शेषग्रहणं कर्तव्यं 'शेषे प्रथमः' इति। किं कारणम्? मध्यमोत्तमौ नियतौ, युष्मदस्मदी अनियते, तत्र प्रथमोऽपि प्राप्नोति। तत्र शेषग्रहणं कर्तव्यं प्रथमनियमार्थम्– शेष एव प्रथमो भवति नान्यत्रेति।

प्रथमपक्षेऽपि गौरवदर्शनभाष्यम्– अथाप्युपपदनियमः, एवमपि शेषग्रहणं कर्तव्यम् 'शेषे प्रथमः' इति। युष्मदस्मदी नियते, मध्यमोत्तमावनियतौ, तौ शेषेऽपि प्राप्नुतः। तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थम्– शेषे प्रथम एव भवति नान्य इति।

प्रथमपक्षे गौरवपरिहारभाष्यम्– उपपदनियमे शेषग्रहणं शक्यमकर्तुम्। कथम्? युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषेऽपि प्राप्नुतः। ततो वक्ष्यामि 'प्रथमो भवति' इति। तन्नियमार्थं भविष्यति। यत्र प्रथमश्चान्यश्च प्राप्नोति तत्र प्रथम एव भवतीति।

अनिष्टवारणाधिकरणम्

(1167. आक्षेपवार्त्तिकम्-2)

*** तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधः शेषत्वात् ***

भाष्यम्– तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो वक्तव्यः। त्वं च देवदत्तश्च पचथः। अहं च देवदत्तश्च पचावः। किं कारणम्? शेषत्वात्। 'शेषे प्रथमः' इति प्रथमः प्राप्नोति।

(1168. आक्षेपपरिहारवार्त्तिकम्-3)

*** सिद्धं तु युष्मदस्मदोः प्रतिषेधात् ***

भाष्यम्– सिद्धमेतत्। कथम्? युष्मदस्मदोः प्रतिषेधात्। 'शेषे प्रथमः' 'युष्मदस्मदोर्न' इति। वक्तव्यम्।

(1169. आक्षेपवार्त्तिकम्-4)

*** युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन ***

भाष्यम्– युष्मदि मध्यमादस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन 'युष्मदि मध्यम' इत्यस्यावकाशः त्वं पचसि। 'अस्मद्युत्तम' इत्यस्यावकाशः—अहं पचामि। इहोभयं प्राप्नोति—त्वं चाहं च पचावः। 'अस्मद्युत्तमः' इत्येतद्भवति विप्रतिषेधेन।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयाक्षेपभाष्यम्– स तर्हि विप्रतिषेधो वक्तव्यः?

सिद्धान्त्येकदेशिसमाधानभाष्यम्– न वक्तव्यः। 'त्यदादीनां यद्यत्परं तत्तच्छिष्यते' इत्येवमस्मदः शेषो भविष्यति। तत्र 'अस्मद्युत्तमः' इत्येव सिद्धम्।

(1170. **आक्षेपसाधकवार्त्तिकम्**-5)

* अनेकशेषभावार्थं तु *

भाष्यम्– अनेकशेषभावार्थं तु स विप्रतिषेधो वक्तव्यः। यदाचैकशेषो न। कदा चैकशेषो न? सहविवक्षायामेकशेषः। यदा न सहविवक्षा तदैकशेषो नास्ति।

(1171. **आक्षेपपरिहारवार्त्तिकम्**-6)

* नवा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः *

भाष्यम्– नवार्थो विप्रतिषेधेन। किं कारणम्? युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामपि युष्मदस्मदधिकरणानामपि एकशेषेण न भवितव्यम्। त्वं चाहं च पचसि पचामि चेति।

(1172. **परिहारसाधकवार्त्तिकम्**-7)

* क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य *

भाष्यम्– कियापृथक्त्वे च द्रव्यपृथक्त्वं दृश्यते। तद्यथा—पचसि च पचामि च त्वं चाहं चेति। तदनुमानमुत्तरयोरपि क्रिययोरेकशेषो न भवतीति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तम्—'तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वाद्' इति। तत्रापि ह्येवं भवितव्यम्—त्वं च देवदत्तश्च पचसि च पचति चेति। अहं च देवदत्तश्च पचामि च पचति चेति।

सिद्धान्तिसमाधानभाष्यम्– यत्तावदुच्यते—'नवा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः' इति। दृश्यते हि युष्मदस्मदोश्चानेकशेषस्तदधिकरणानां चैकशेषः। तद्यथा—'त्वं चाहं च वृत्रहन्नुभौ सम्प्रयुज्यावहे' इति। यदप्युच्यते—'क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य' इति। क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो भवतीति दृश्यते। तद्यथा—अक्षाः भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति।

आक्षेपभाष्यम्– एवं च कृत्वा सोऽपि दोषो भवति—यदुक्तम्—'तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वाद्' इति।

आक्षेपपरिहारस्मारणभाष्यम्– नैष दोषः। परिहृतमेतत्—'सिद्धं तु युष्मदस्मदोः प्रतिषेधाद्' इति।

तटस्थाक्षेपभाष्यम्– स तर्हि प्रतिषेधो वक्तव्यः?

समाधानभाष्यम्– न वक्तव्यः। शेषे प्रथमो विधीयते। नहि शेष ग्रान्यश्च शेषग्रहणेन गृह्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– भवेत्—प्रथमो न स्यात्। मध्यमोत्तमावपि न प्राप्नुतः। किं कारणम्? युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते। न च युष्मदस्मदी अन्यश्च युष्मदस्मद्ग्रहणेन गृह्यते।

आक्षेपबाधकभाष्यम्– यदत्र युष्मद् यच्चास्मच्च तदाश्रयौ मध्यमोत्तमौ भविष्यतः।

आक्षेपभाष्यम्– यथैव तर्हि यदत्र युष्मद्यच्चास्मच्च तदाश्रयौ मध्यमोत्तमौ भवतः, एवं योऽत्र शेषस्तदाश्रयः प्रथमो भविष्यति।

समाधानभाष्यम्– एवं तर्हि शेष उपपदे प्रथमो विधीयते। उपोच्चारि पदमुपपदम्। यच्चात्रोपोच्चारि, न स शेषः। यश्च शेषः, न तदुपोच्चारि।

आक्षेपभाष्यम्– भवेत्—प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः। किं कारणम्? युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते। उपोच्चारि पदमुपपदं यच्चात्रोपोच्चारि, न ते युष्मदस्मदी। ये च युष्मदस्मदी, न तदुपोच्चारि।

समाधानभाष्यम्– एवं तर्हि—शेषेण सामानाधिकरण्ये प्रथमो विधीयते। न चात्र शेषेणैव सामानाधिकरण्यम्।

आक्षेपभाष्यम्– भवेत्—प्रथमो न स्यात्, मध्यमोत्तमावपि तु न प्राप्नुतः। किं कारणम्? युष्मदस्मद्भ्यां सामानाधिकरण्ये मध्यमोत्तमावुच्येते। न चात्र युष्मदस्मद्भ्यामेव सामानाधिकरण्यम्।

समाधानभाष्यम्– एवं तर्हि 'त्यदादीनि सर्वैर्नित्यम्' इत्येवमत्र युष्मदस्मदोः शेषो भविष्यति। तत्र युष्मदि मध्यमः अस्मद्युत्तम इत्येव सिद्धम्।

समाधानबाधकभाष्यम्– न सिद्ध्यति। स्थानिन्यपीति प्रथमः प्राप्नोति।

आक्षेपान्तरभाष्यम्– 'त्यदादीनां खल्वपि यद्यत्परं तत्तच्छिष्यते' इति यदा भवतः शेषस्तदाश्रयः प्रथमः प्राप्नोति।

आक्षेपान्तरभाष्यम्– युष्मदि मध्यमः 'अस्मद्युतमः' इत्येवोच्यते ताविह न प्राप्नुतः—परमत्वं पचसि परमाहं पचामीति।

आक्षेपबाधकैकदेशिभाष्यम्– तदन्तविधिना भविष्यति।

आक्षेपभाष्यम्– इहापि तर्हि तदन्तविधिना प्राप्नुतः—अतित्वं पचति, अत्यहं पचतीति।

आक्षेपान्तरभाष्यम्– ये चाप्येते समानाधिकरणवृत्तस्तद्धितास्तत्र मध्यमोत्तमौ न प्राप्नुतः—त्वत्तरः पचसि मत्तरः पचामीति। त्वद्रूपः पचसि, मद्रूपः पचामि। त्वत्कल्पः पचसि, मत्कल्पः पचामीति।

एकदेशिसमाधानभाष्यम्– एवं तर्हि 'युष्मदस्मद्वति' इत्येवं भविष्यति।

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नुतः—अतित्वं पचति अत्यहं पचतीति।

सिद्धान्तिसमाधानभाष्यम्– एवं तर्हि युष्मदि साधने 'अस्मदि साधने' इत्येवं भविष्यति। एवं च कृत्वा सोप्यदोषो भवति, यदुक्तम्—'तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वाद्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्– अथवा 'प्रथमः' उत्सर्गः करिष्यते। तस्य युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावपवादौ भविष्यतः। तत्र युष्मद्गन्धश्चास्मद्गन्धश्चास्तीति कृत्वा मध्यमोत्तमौ भविष्यतः।

आक्षेपभाष्यम्– अथेह कथं भवितव्यम्—अत्वं त्वं सम्पद्यते इति त्वद्भवति मद्भवतीति। आहोस्वित्त्वद्भवसि मद्भवामीति?

समाधानभाष्यम्– त्वद्भवति मद्भवतीत्येवं भवितव्यम्।

आक्षेपभाष्यम्– मध्यमोत्तमौ कस्मान्न भवतः?

समाधानभाष्यम्– 'गौणमुख्ययोर्मुख्ये सम्प्रत्ययो भवति'। तद्यथा—'गौरनुबन्ध्योऽजोऽग्नीषोमीयः' इति न वाहीकोऽनुबध्यते।

आक्षेपभाष्यम्– कथं तर्हि वाहीके वृद्ध्यात्वे भवतः—गौर्वाहीकस्तिष्ठति गामानयेति?

समाधानभाष्यम्– अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्वे। युष्मद्युप.।।104।।106।।107।।

(219. संहितासञ्ज्ञासूत्रम् 1.4.4 आ. 24)

348. परः संनिकर्षः संहिता 1.4.108

मध्यमाविलम्बितयोरपि संहितासञ्ज्ञासाधनाधिकरणम्

(1173. आक्षेपवार्त्तिकम्-1)

*** परः सन्निकर्षः संहिता चेदद्रुतायामसंहितम् ***

भाष्यम्– परः सन्निकर्षः संहिता चेदद्रुतायां वृत्तौ संहितासञ्ज्ञा न प्राप्नोति। द्रुतायामेव हि परः सन्निकर्षो वर्णानां नाद्रुतायाम्।

(1174. सिद्धान्तवार्त्तिकम्-2)

*** तुल्यः सन्निकर्षः ***

भाष्यम्– तुल्यः सन्निकर्षो वर्णानां द्रुतमध्यमविलम्बितासु वृत्तिषु।

आक्षेपभाष्यम्– किंकृतस्तर्हि विशेषः?

(1175. समाधानवार्त्तिकम्-3)

*** वर्णकालभूयस्त्वं तु ***

भाष्यम्– वर्णानां तु कालभूयस्त्वम्। तद्यथा—हस्तिमशकयोस्तुल्यः सन्निकर्षः प्राणिभूयस्त्वं तु।

आक्षेपशेषभाष्यम्– यद्येवम्।

द्रुतमध्यमविलम्बितासु तपरफलाधिकरणम्

(1176. आक्षेपवार्त्तिकम्-4)

*** द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्। किं कारणम्? कालभेदात्। ये द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। ये मध्यमायां वृत्तौ वर्णास्त्रिभागाधिकास्ते विलम्बितायाम्।

(1177. **समाधानवार्त्तिकम्**- 5)

*** उक्तं वा ***

भाष्यम्– किमुक्तम्? 'सिद्धं त्ववस्थिता वर्णावक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते' इति।

न्यासान्तरभाष्यम्– अथवा 'शब्दाविराम: संहिता' इत्येतल्लक्षणं करिष्यते।

(1178. **आक्षेपवार्त्तिकम्**- 6)

*** शब्दाविरामे प्रतिवर्णमवसानम् ***

भाष्यम्– शब्दाविरामे प्रतिवर्णमवसानसञ्ज्ञा प्राप्नोति। किमिदं प्रतिवर्णमिति? वर्णं वर्णं प्रति प्रतिवर्णम्। येनैव प्रयत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्णे उपसंहृत्य तमन्यमुपादाय द्वितीय: प्रयुज्यते तथा तृतीयस्तथा चतुर्थ:।

समाधानभाष्यम्– एवं तर्ह्यनवकाशा संहितासञ्ज्ञाऽवसानसञ्ज्ञा बाधिष्यते।

समाधानान्तरभाष्यम्– अथवा अवसानसञ्ज्ञायां प्रकर्षगतिर्विज्ञास्यते—साधीयो यो विराम इति। कश्च साधीय:? य: शब्दार्थयोर्विराम:।

न्यासान्तरभाष्यम्– अथवा 'ह्लादाविराम: संहिता' इत्येतल्लक्षणं करिष्यते।

(1179. **आक्षेपवार्त्तिकम्**- 7)

*** ह्लादाविरामे स्पर्शाघोषसंयोगेऽसन्निधानादसंहितम् ***

भाष्यम्– ह्लादाविरामे स्पर्शानामघोषाणां च संयोगेऽसन्निधानात्संहितासञ्ज्ञा न प्राप्नोति— कुक्कुट: पिप्पक: पित्तमिति।

प्रत्याक्षेपभाष्यम्– किमुच्यते संयोग इति। अथ यत्रैक: पचतीति।

प्रत्याक्षेपपरिहारभाष्यम्– एक: पूर्वपरयोर्ह्लादेन प्रच्छाद्यते। तद्यथा। द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते।

समाधानभाष्यम्– एकेन तुल्य: सन्निधि:। यथैवैको वर्णो ह्लादेन प्रच्छाद्यते एवमनेकोऽपि।

न्यासान्तरभाष्यम्– अथवा 'पौर्वापर्यमकालव्यवेतं संहिता' इत्येतल्लक्षणं करिष्यते।

(1180. **आक्षेपवार्त्तिकम्**- 8)

*** पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावादसंहितम्**
(एकवर्णवर्तित्वाद्वाच:, उच्चरितप्रध्वंसित्वाच्च वर्णानाम्) *

भाष्यम्– पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावात्संहितासञ्ज्ञा न प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहि वर्णानां पौर्वापर्यमस्ति। किं कारणम्? एकवर्णवर्तित्वाद्वाचः, उच्चरितप्रध्वंसित्वाच्च वर्णानाम्। एकैकवर्णवर्तिनी वाक् न द्वौ युगपदुच्चारयति। गौरिति गकारे यावद्वाग्वर्तते, नौकारे, न विसर्जनीये। यावद् औकारे, न गकारे, न विसर्जनीये। यावद्विसर्जनीये, न गकारे, नौकारे। उच्चरितप्रध्वंसित्वात्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः। उच्चरितः प्रध्वंस्तः। अथापरः प्रयुज्यते न वर्णो वर्णस्य सहायः।

समाधानभाष्यम्– एवं तर्हि—

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।
शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम्।।

बुद्धिविषयमेव शब्दानां पौर्वापर्यम्। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः, अस्मिंस्तावच्छब्देऽयं तावद्वर्णः, ततोऽयं ततोऽयमिति। परः संनिकर्षः।।१०८।।

(220. अवसानसञ्ज्ञासूत्रम् 1.4.4 आ. 25)

349. विरामोऽवसानम् 1.4.109

पाठनिर्णयाधिकरणम्

भाष्यम्– इदं विचार्यते—अभावो वावसानलक्षणं स्याद् विरामो वेति।

विशेषप्रश्नभाष्यम्– कश्चात्र विशेषः?

(1181. प्रथमपक्षे दूषणवार्त्तिकम्- 1)

* अभावेऽवसानलक्षणे उपर्यभावचनम् *

भाष्यम्– अभावेऽवसानलक्षणे उपर्यभावग्रहणं कर्तव्यम्। उपरि यः अभाव इति वक्तव्यम्। पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति। किं च स्यात्? रसः, रथः 'खरवसानयोर्विसर्जनीयः' इति विसर्जनीयः प्रसज्येत।

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि—विरामः।

(1182. द्वितीयपक्षे दूषणवार्त्तिकम्- 2)

* विरामे विरामवचनम् *

भाष्यम्– यस्य विरामः, विरामग्रहणं तेन कर्तव्यम्।

विरामवादिभाष्यम्– ननु च यस्याप्यभावः, तस्याप्यभावग्रहणं कर्तव्यम्।

अभाववादिभाष्यम्– परार्थं मम भविष्यति—'अभावो लोपः' ततः 'अवसानं च' इति।

विरामवादिभाष्यम्– ममापि तर्हि विरामग्रहणं परार्थं भविष्यति 'विरामो लोपः' 'अससानं च' इति।

(1183. आक्षेपवार्त्तिकम्- 3)

* उपरिविरामवचनम् *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– उपरि यो विराम इति वक्तव्यम्। पुरस्तादपि हि शब्दस्य विरामः, तत्र मा भूत्। किं च स्यात्? रसः रथः 'खरवसानयोर्विसर्जनीयः' इति विसर्जनीयः प्रसज्येत।

आक्षेपपरिहारभाष्यम्– नैष दोषः। आरम्भपूर्वको मम विरामः।

पक्षान्तरव्याख्याभाष्यम्– अथवा नेदमवसानलक्षणं विचार्यते। किं तर्हि? सञ्ज्ञी। अभावोऽवसानसञ्ज्ञी स्याद्विरामो वेति।

विशेषप्रश्नभाष्यम्– कश्चात्र विशेषः?

(1184. **प्रथमपक्षदूषणवार्त्तिकम्**- 1)

* अभावेऽवसानसंज्ञिन्युपर्यभाववचनम् *

भाष्यम्– अभावेऽवसानसंज्ञिन्युपर्यभावग्रहणं कर्तव्यम्। उपरि योऽभाव इति वक्तव्यम्। पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति। किं च स्यात्? रसः रथः 'खरवसानयोर्विसर्जनीय' इति विसर्जनीयः प्रसज्येत।

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि—विरामोऽवसानम्।

(1185. **द्वितीयपक्षदूषणवार्त्तिकम्**- 2)

* विरामे विरामवचनम् *

भाष्यम्– यस्य विरामस्तेन विरामग्रहणं कर्तव्यम्।

विरामवादिभाष्यम्– ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्तव्यम्।

अभाववादिभाष्यम्– परार्थं मम भविष्यति—अभावो लोपस्ततोऽवसानं चेति।

विरामवादिभाष्यम्– ममापि तर्हि विरामग्रहणं परार्थं भविष्यति—विरामो लोपोऽवसानं चेति।

आक्षेपभाष्यम्– उपरि यो विराम इति वक्तव्यम्।

परिहारस्मारणभाष्यम्– ननु चोक्तम्—'आरम्भपूर्वके–' इति।

परिहारबाधकभाष्यम्– नावश्यमयं रमिः प्रवृत्तावेव वर्तते। किं तर्हि? अप्रवृत्तावपि। तद्यथा—'उपरतान्यस्मिन्कुले व्रतानि' 'उपरतः स्वाध्याय' इति। न च तत्र स्वाध्यायो भूतपूर्वो भवति, नापि व्रतानि।

(1186. **आक्षेपवार्त्तिकम्**- 4)

* भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न *

भाष्यम्– भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं नोपपद्यते। किमिदं भावाविरामभावित्वादिति? भावस्याविरामः भावाविरामः, भावाविरामेण भवतीति भावाविरामभावी, भावाविरामभाविनो भावो भावाविरामभावित्वम्।

व्याख्यान्तरभाष्यम्– अपर आह—भावभावित्वादविरामभावित्वाच्च शब्दस्यावसानलक्षणं नोपपद्यते—इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1187. न्यासान्तरवार्त्तिकम्- 5)

*** तत्पर इति वा वर्णस्यावसानम् ***

भाष्यम्– विरामपरो वर्णः अवसानसञ्ज्ञो भवतीति वक्तव्यम्।

(1188. न्यासान्तरवार्त्तिकम्- 6)

*** वर्णोऽन्त्यो वाऽवसानम् ***

भाष्यम्– अथवा व्यक्तमेव पठितव्यम्—अन्त्यो वर्णोऽवसानसञ्ज्ञो भवतीति।

तटस्थाक्षेपभाष्यम्– तर्त्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्

(1189. प्रत्याख्यानवार्त्तिकम्- 7)

*** संहितावसानयोर्लोकविदितत्वात् सिद्धम् ***

भाष्यम्– संहिता अवसानमिति लोकविदितावेतावर्थौ। एवं हि कश्चित्कञ्चिदधीयानमाह— 'शन्नोदेवीयं संहितयाधीष्व' इति। स तत्र परमसन्निकर्षमधीते। अपर आह— 'केनावस्यसि' इति। स आह—अकारेणेकारेणोकारेणेति। एवमेतौ लोकविदितावर्थौ तयोर्लोकविदितत्वात्सिद्धमिति। विरामोऽवसानम्।।109।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम्;

समाप्तश्चायं पादोऽध्यायश्च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽध्यायः

प्रथमे पादे प्रथममाह्निकम्

(221. **समर्थपरिभाषासूत्रम्** 2.1.1 आ.)

350. समर्थः पदविधिः 2.1.1

अथ विधिशब्दार्थनिरूपणाधिकरणम्

आक्षेपभाष्यम्– विधिरिति कोऽयं शब्दः?

समाधानभाष्यम्– विपूर्वाद्धाञः कर्मसाधन इकारः—विधीयते विधिरिति। किं पुनर्विधीयते? समासे विभक्तिविधानं पराङ्गवद्भावश्च।

परिभाषात्वनिरूपणाधिकरणम्

आक्षेपभाष्यम्– किं पुनरयमधिकारः, आहोस्वित् परिभाषा?

प्रत्याक्षेपभाष्यम्– कः पुनरधिकारपरिभाषयोर्विशेषः?

प्रत्याक्षेपसमाधानभाष्यम्– अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे-योगे उपतिष्ठते। परिभाषा पुनरेकदेशस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत्। तद्यथा—प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्माभिज्वलयति।

प्रत्याक्षेपान्तरभाष्यम्– कः पुनरत्र प्रयत्नविशेषः?

प्रत्याक्षेपान्तरसमाधानभाष्यम्– अधिकारे सति स्वरयितव्यम्। परिभाषायां तु सर्वमपेक्ष्यम्।

सन्देहान्तरभाष्यम्– तथेदमपरं द्वैतं भवति—एकार्थीभावो वा सामर्थ्यं स्यात्, व्यपेक्षा वेति?

एकार्थीभावव्यपेक्षयोर्विशेषप्रदर्शकभाष्यम्– तत्रैकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति। विभक्तिविधानं पराङ्गवद्भावश्चासंगृहीतः।

व्यपेक्षायां पुनः सामर्थ्येऽधिकारे च सति विभक्तिविधानं पराङ्गवद्भावश्च संगृहीतो भवति। समासस्त्वेकोऽसंगृहीतः। अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणानि च कर्तव्यानि भवन्ति। क्वान्यत्र? 'इसुसोः सामर्थ्ये' 'न चवाहाहैवयुक्ते' इति।

व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धो नाम स सर्वः संगृहीतो भवति। समासस्त्वेकोऽसंगृहीतः।

सिद्धान्तभाष्यम्– तत्रैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– एवमपि क्वचिदकर्तव्यं समर्थग्रहणं क्रियते। क्वचिच्च कर्तव्यं न क्रियते। अकर्तव्यं तावत्क्रियते—'समर्थानां प्रथमाद्वा' इति। कर्तव्यं न क्रियते—'कर्मण्यण्' समर्थादिति।

आक्षेपसाधकभाष्यम्– ननु च गम्यते तत्र सामर्थ्यं कुम्भकारो नगरकार इति।

आक्षेपसमाधानभाष्यम्– सत्यम्। गम्यते उत्पन्ने हि प्रत्यये। स एव तावत्समर्थादुत्पाद्यः।

समर्थपरिभाषाप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ समर्थग्रहणं किमर्थम्?

समाधानभाष्यम्– वक्ष्यति—'द्वितीया श्रितादिभिः समस्यते' कष्टश्रितो नरकश्रित इति। समर्थग्रहणं किमर्थम्? पश्य देवदत्त कष्टं, श्रितो विष्णुमित्रो गुरुकुलम्।

'तृतीया तत्कृतार्थेन गुणवचनेन' उपादानविकलः, शङ्कुलाखण्डः, किरिकाणः। समर्थग्रहणं किमर्थम्? त्वं तिष्ठ शङ्कुलया, खण्डो धावति मुसलेन। किं त्वं करिष्यसि शङ्कुलया, खण्डो विष्णुमित्र उपलेन।

'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः'। गोहितम्। वृषभहितम्। अश्वहितम्। समर्थग्रहणं किमर्थम्? सुखं गोभ्यो, हितं देवदत्ताय।

'पञ्चमी भयेन' वृकभयं दस्युभयं चोरभयम्। समर्थग्रहणं किमर्थम्? गच्छ त्वं मा वृकेभ्यो, भयं देवदत्ताद्यज्ञदत्तस्य।

'षष्ठी सुबन्तेन समस्यते'। राजपुरुषः। ब्राह्मणकम्बलः। समर्थग्रहणं किमर्थम्? भार्या राज्ञः, पुरुषो देवदत्तस्येति।

'सप्तमी शौण्डैः' अक्षशौण्डः स्त्रीशौण्डः। समर्थग्रहणं किमर्थम्? कुशलो देवदत्तोऽक्षेषु, शौण्डः पिबति पानागारे।

आक्षेपभाष्यम्– अथ क्रियमाणेऽपि समर्थग्रहणे इह कस्मान्न भवति-महत्कष्टं श्रित इति?

प्रत्याक्षेपभाष्यम्– न वा भवति महाकष्टश्रित इति?

प्रत्याक्षेपसमाधानभाष्यम्– भवति, यदैतद्वाक्यं भवति—महत्कष्टं महाकष्टं महाकष्टं श्रितो महाकष्टश्रित इति। यदा त्वेतद्वाक्यं भवति—महत्कष्टं श्रित इति, तदा न भवितव्यम्। तदा च प्राप्नोति।

आक्षेपभाष्यम्– तदा कस्मान्न भवति?

प्रत्याक्षेपभाष्यम्– कस्य कस्मान्न भवति। किं द्वयोः, आहोस्विद्बहूनाम्?

आक्षेपाशयाविष्कारभाष्यम्– बहूनां कस्मान्न भवति?

समाधानभाष्यम्– सुप्सुपेति वर्तते।

आक्षेपभाष्यम्– ननु च भो आकृतौ शास्त्राणि प्रवर्तन्ते। तद्यथा—'प्रातिपदिकाद्' इति वर्तमानेऽन्यस्माच्चान्यस्माच्च प्रातिपदिकादुत्पत्तिर्भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– सत्यमेवमेतत्। आकृतिस्तु प्रत्येकं परिसमाप्यते, न समुदाये। यावत्येतत् परिसमाप्यते प्रातिपदिकादिति, तावत उत्पत्त्या भवितव्यम्, प्रत्येकं चैतत्परिसमाप्यते, न समुदाये। एवमिहापि यावत्येतत्परिसमाप्यते सुप्सुपेति, तावतः समासेन भवितव्यम्। द्वयोश्चैतत्परिसमाप्यते, न बहुषु।

आक्षेपभाष्यम्– द्वयोस्तर्हि कस्मान्न भवति?

समाधानभाष्यम्– असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति।

आक्षेपभाष्यम्– यदि सापेक्षमसमर्थं भवतीत्युच्यते, राजपुरुषोऽभिरूपः 'राजपुरुषो दर्शनीयः' अत्र वृत्तिर्न प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। प्रधानमत्र सापेक्षम्। भवति च प्रधानस्य सापेक्षस्यापि समासः।

आक्षेपभाष्यम्– यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र वृत्तिर्न प्राप्नोति—'देवदत्तस्य गुरुकुलम्' 'देवदत्तस्य गुरुपुत्रः' 'देवदत्तस्य दासभार्येति। अत्र वृत्तिर्न प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। समुदायापेक्षात्र षष्ठी सर्वं गुरुकुलमपेक्षते।

समाधानबाधकभाष्यम्– यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र ते वृत्तिर्न प्राप्नोति—'किमोदनः शालीनाम्' 'सक्त्वाढकमापणीयानाम्' 'कुतो भवान्पाटलिपुत्रक' इति। इह चापि 'देवदत्तस्य गुरुकुलं' 'देवदत्तस्य गुरुपुत्रो' 'देवदत्तस्य दासभार्ये'ति। यद्येषां समुदायापेक्षा षष्ठी स्यान्नैतन्नियोगतो गम्येत—देवदत्तस्य यो गुरुस्तस्य पुत्र इति। किं तर्हि? अन्यस्यापि गुरुपुत्रः, देवदत्तस्य किञ्चिदित्येषोऽर्थो गम्येत। यतस्तु खलु नियोगतो देवदत्तस्य यो गुरुस्तस्य यः पुत्र इत्येषोऽर्थो गम्यते, अतो मन्यामहे—नैषा समुदायापेक्षा षष्ठीति। अन्यत्र खल्वपि समर्थग्रहणे सापेक्षस्यापि कार्यं भवति। क्वान्यत्र? 'इसुसोः सामर्थ्ये' ब्राह्मणस्य सर्पिष्करोतीति। तस्मान्नैतच्छक्यं वक्तुं—सापेक्षमसमर्थं भवतीति।

आक्षेपभाष्यम्– वृत्तिस्तर्हि कस्मान्न भवति महत्कष्टं श्रित इति?

(1190. समाधानवार्त्तिकप्रथमखण्डम्)

* सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न *

भाष्यम्– सविशेषाणं वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते इति वक्तव्यम्।

आक्षेपभाष्यम्– यदि सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इत्युच्यते, 'देवदत्तस्य गुरुकुलम्' 'देवदत्तस्य गुरुपुत्रो' 'देवदत्तस्य दासभार्ये'त्यत्र वृत्तिर्न प्राप्नोति।

(समाधानवार्त्तिकद्वितीयखण्डम्-1)

* अगुरुपुत्रादीनाम् *

भाष्यम्– अगुरुपुत्रादीनामिति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगुरुपुत्रादीनामिति।

समाधानभाष्यम्– न वक्तव्यम्। वृत्तिस्तर्हि कस्मान्न भवति? अगमकत्वात्। इह समानार्थेन वाक्येन भवितव्यं समासेन च। यश्चेहार्थो वाक्येन गम्यते 'महत्कष्टं श्रितः' इति, नासौ जातु चित्समासेन गम्यते 'महत्कष्टश्रितः' इति। एतस्माद्धेतोर्ब्रूमः—अगमकत्वादिति, न ब्रूमः—अपशब्दः स्यादिति। यत्र च गमको भवति, भवति तत्र वृत्तिः। तद्यथा—'देवदत्तस्य गुरुकुलं' 'देवदत्तस्य गुरुपुत्रो' 'देवदत्तस्य दासभार्ये'ति।

प्रत्याख्यानभाष्यम्– यद्यगमकत्वं हेतुः, नार्थः समर्थग्रहणेन। इहपि 'भार्या राज्ञः पुरुषो देवदत्तस्य' इति योऽर्थो वाक्येन गम्यते, नासौ जातु चित्समासेन गम्यते 'भार्या राजपुरुषो देवदत्तस्य' इति। तस्मन्नार्थः समार्थग्रहणेन।

प्रत्याख्यानबाधकभाष्यम्– इदं तर्हि प्रयोजनम्। अयमस्त्यसमर्थसमासो नञ्समासो गमकः, तस्य साधुत्वं माभूत्—'अकिञ्चित्कुर्वाणम्' 'अमाषं हरमाणम्' 'अगाधादुत्सृष्टम्' इति।

प्रत्याख्यानसाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। अवश्यं कस्यचिन्नञ्समासस्यासमर्थस्य गमकस्य साधुत्वं वक्तव्यम्। असूर्यपश्यानि मुखानि 'अपुनर्गेयाः श्लोकाः' अश्राद्धभोजी ब्राह्मण इति। 'सुडनपुंसकस्य' इत्येतन्नियमार्थं भविष्यति—एतस्यैवासमर्थसमासस्य नञ्समासस्य गमकस्य साधुत्वं भवति नान्यस्येति। तस्मान्नार्थः समर्थग्रहणेन।

अथ सामर्थ्यलक्षणभेदनिरूपणाधिकरणम्

आक्षेपभाष्यम्– अथ क्रियमाणेऽपि समर्थग्रहणे समर्थमित्युच्यते। किं समर्थं नाम?

(1191. समाधानवार्त्तिकम्-2)

*** पृथगर्थानामेकार्थीभावः समर्थवचनम् ***

व्याख्याभाष्यम्– पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते।

आक्षेपभाष्यम्– क्व पुनः पृथगर्थानि, क्वैकार्थानि?

समाधानभाष्यम्– वाक्ये पृथगर्थानि 'राज्ञः पुरुषः' इति। समासे पुनरेकार्थानि 'राजपुरुषः' इति।

आक्षेपभाष्यम्– किमुच्यते—पृथगर्थानीति। यावता 'राज्ञः पुरुष आनीयताम्' इत्युक्ते राजपुरुष आनीयते। 'राजपुरुषः' इति च स एव?

समाधानभाष्यम्– नापि ब्रूमः—अन्यस्यानयनं भवतीति।

एकार्थीभावफलनिरूपणाधिकरणम्

व्यपेक्षावादिन आक्षेपभाष्यम्– कस्तर्ह्येकार्थीभावकृतो विशेषः?

एकार्थीभाववादिनः समाधानभाष्यम्– सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वर इति।

सुबलोपोदाहरणसमन्वयभाष्यम्– सुबलोपो भवति वाक्ये—राज्ञः पुरुष इति। समासे तु न भवति—राजपुरुष इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवधानोदाहरणसमन्वयभाष्यम्– व्यवधानं भवति वाक्ये—राज्ञः ऋद्धस्य पुरुष इति। समासे तु न भवति—राजपुरुष इति।

यथेष्टाभिसम्बन्धोदाहरणसमन्वयभाष्यम्– यथेष्टमन्यतरेणाभिसम्बन्धो भवति वाक्ये—'राज्ञः पुरुषः' पुरुषो राज्ञ इति। समासे न भवति—राजपुरुष इति।

स्वरोदाहरणसमन्वयभाष्यम्– द्वौ स्वरौ भवतो वाक्ये—राज्ञः पुरुष इति। समासे पुनरेक एव—राजपुरुष इति।

समाधानबाधकव्यपेक्षावादिभाष्यम्– नैत एकार्थीभावकृता विशेषाः। किं तर्हि? वाचनिकान्येतानि। आह हि भगवान्—'सुपो धातुप्रातिपदिकयोः' 'उपसर्जनं पूर्वम्' समासस्यान्त उदात्तो भवतीति।

एकार्थीभाववादिसमाधानान्तरभाष्यम्– इमे तर्ह्येकार्थीभावकृता विशेषाः—संख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषणं चयोग इति।

संख्याविशेषोदाहरणसमन्वयभाष्यम्– संख्याविशेषो भवति वाक्ये—राज्ञः पुरुषः 'राज्ञोः पुरुषः' राज्ञां पुरुष इति। समासे न भवति—'राजपुरुषः' इति।

संख्याविशेषानवगतौ कारणान्तरभाष्यम्– अस्ति कारणं येनैतदेवं भवति। किं कारणम्? योऽसौ विशेषवाची शब्दस्तदसान्निध्यात्। अङ्ग हि भवांस्तमुच्चारयतु गंस्यते स विशेषः।

कारणान्तरनिराकरणभाष्यम्– ननु च नैतेनैवं भवितव्यम्। नहि शब्दकृतेन नामार्थेन भवितव्यम्। अर्थकृतेन नाम शब्देन भवितव्यम्।

भाष्यम्– तदेतदेवं दृश्यताम्– अर्थरूपमेवं जातीयं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते—'योऽसौ विशेषवाची शब्दस्तदसान्निध्यादत्र विशेषो न गम्यते' इति इह तस्य विशेषो गम्येत—अप्सुचरो गोषुचरो वर्षासुज इति।

व्यक्ताभिधानोदाहरणसमन्वयभाष्यम्– व्यक्ताभिधानं भवति वाक्ये—'ब्राह्मणस्य कम्बलस्तिष्ठति' इति। समासे पुनरव्यक्ताभिधानं 'ब्राह्मणकम्बलस्तिष्ठति' इति, संदेहो भवति—सम्बुद्धिर्वा स्यात्, षष्ठीसमासो वेति।

विशेषबाधकभाष्यम्– एषोऽप्यविशेषः। भवति हि किञ्चिद्वाक्येऽव्यक्तम्, तच्च समासे व्यक्तम्। वाक्ये तावदव्यक्तम्—'अर्द्धं पशोर्देवदत्तस्य' इति, संदेहो भवति—पशुगुणस्य वा देवदत्तस्यार्द्धम्, अथवा योऽसौ सञ्ज्ञीभूतः पशुर्नाम तस्य यदर्द्धमिति। तच्च समासे व्यक्तं भवति—अर्धपशुर्देवदत्तस्येति।

उपसर्जनविशेषणरूपविशेषोदाहरणभाष्यम्– उपसर्जनविशेषणं भवति वाक्ये—ऋद्धस्य राज्ञः पुरुष इति। समासे न भवति—राजपुरुष इति।

बाधकभाष्यम्– एषोऽप्यविशेषः। समासेऽप्युपसर्जनविशेषणं भवति। तद्यथा—देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति।

चयोगरूपविशेषोदाहरणसमन्वयभाष्यम्– चयोगो भवति वाक्ये स्वचयोगः स्वामिच-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगश्चेति। स्वचयोगः—राज्ञो गौश्चाश्वश्च पुरुषश्चेति। समासे न भवति—राज्ञो गवाश्वपुरुषा इति। स्वामिचयोगः देवदत्तस्य च यज्ञदत्तस्य च विष्णुमित्रस्य च गौरिति। समासे न भवति—देवदत्तयज्ञदत्तविष्णुमित्राणां गौरिति।

आक्षेपभाष्यम्– अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थानामभिधानम्, आहोस्विद्वाचनिकम्?

समाधानभाष्यम्– स्वाभाविकमित्याह। कुत एतत्? अर्थानादेशनात्। न ह्यर्था आदिश्यन्ते।

आक्षेपभाष्यम्– कथं पुनरर्थानादिशन्नेवं ब्रूयात्—'नार्था आदिश्यन्ते' इति। यदाह भगवान्—'अनेकमन्यपदार्थे' 'चार्थे द्वन्द्वः' अपत्ये, रक्ते, निर्वृत्ते, इति।

समाधानभाष्यम्– नैतान्यर्थादेशनानि। स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते। तद्यथा—'कूपे हस्तदक्षिणः पन्थाः, अभ्रे चन्द्रमसं पश्य'इति स्वभावतस्तस्य तत्रस्थस्य पथश्चन्द्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते। एवमिहापि चार्थे यः स द्वन्द्वः, अन्यपदार्थे यः स बहुव्रीहिरिति।

आक्षेपभाष्यम्– किं पुनः कारणमर्था नादिश्यन्ते?

समाधानभाष्यम्– तच्च लघ्वर्थम्। लघ्वर्थं ह्यर्था नादिश्यन्ते। अवश्यं ह्यनेनार्थानादिशता केन चिच्छब्देन अर्थनिर्देशः कर्तव्यः स्यात्। तस्य च तावत्केन कृतः येनासौ क्रियते। अथ तस्य केनचित्कृतः, तस्य (केन कृतः, तस्य) केन कृत इत्यनवस्था च स्यात्। असम्भवः खल्वप्यर्थादेशनस्य। को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्।

आक्षेपभाष्यम्– न चैतन्मन्तव्यं प्रत्ययार्थे निर्दिष्टो प्रकृत्यर्थोऽनिर्दिष्ट इति। भवति हि गुणाभिधाने गुणिनः सम्प्रत्ययः। तद्यथा—शुक्लः कृष्ण इति।

समाधानभाष्यम्– विषम उपन्यासः। सामान्यशब्दा एत एवं स्युः। सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदेव विशेषे वृक्षशब्दो वर्तते, अतो मन्यामहे—नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः, प्रकृतिः प्रकृत्यर्थे वर्तते। प्रत्ययः प्रत्यथार्थे वर्तते।

समाधानान्तरभाष्यम्– अप्रवृत्तिः खल्वप्यर्थादेशनस्य। बहवो हि शब्दा येषामर्था न विज्ञायन्ते—'जर्भरी तुर्फरीतू। अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्ते—अक्षिनिकोचैः पाणिविहारैश्च। न खल्वपि निर्ज्ञातस्यार्थस्यान्वाख्याने किञ्चिदपि प्रयोजनमस्ति। यो ब्रूयात्पुरस्तादादित्य उदेति पश्चादस्तं गच्छति, मधुरो गुडः, कटुकं शृङ्गवेरमिति। किं तेन कृतं स्यात्।

(1192. **लाघवदर्शकवार्त्तिकम्-** 3)

* वावचनानर्थक्यं च स्वभावसिद्धत्वात् *

भाष्यम्– वावचनमनर्थकम्। किं कारणम्? स्वभावसिद्धत्वात्। इह द्वौ पक्षौ वृत्तिपक्षश्चा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तिपक्षश्चेति। स्वभावतश्चैतद्भवति—वाक्यं च समासश्च। तत्र स्वाभाविके वृत्तिविषये नित्ये समासे प्राप्ते वावचनेन किमन्यच्छक्यमभिसम्बन्धुमन्यदतः सञ्ज्ञायाः। न च सञ्ज्ञाया भावाभावाविष्येते। तस्मान्नार्थो वावचनेन।

वृत्तिलक्षणभेदवर्णनाधिकरणम्

कार्यशब्दिकपक्षाक्षेपभाष्यम्– अथ ये वृत्तिं वर्तयन्ति, किं त आहुः?

समाधानभाष्यम्– परार्थाभिधानं वृत्तिरित्याहुः।

आक्षेपभाष्यम्– अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवति, आहोस्विदजहत्स्वार्था भवति? किं चातः? यदि जहत्स्वार्था वृत्तिः, राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, औपगवमानयेत्युक्ते अपत्यमात्रस्येति। अथाजहत्स्वार्था वृत्तिः, उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या?

समाधानभाष्यम्– जहत्स्वार्था।

आक्षेपभाष्यम्– युक्तं पुनर्जहत्स्वार्था नाम वृत्तिः स्यात्?

समाधानभाष्यम्– बाढं युक्तम्। एवं हि दृश्यते लोके—पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति। तद्यथा—तथा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे वर्तमानः स्वमर्थं जह्याद्। उपगुश्चापत्यार्थे वर्तमानः स्वमर्थं जह्यात्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानयेत्युक्तेऽपत्यमात्रस्येति।

समाधानभाष्यम्– नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति, यः परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा—तथा राजकर्मणि प्रवर्तमानः स्व तक्षकर्म जहाति, न तु हिक्कितश्वसितकण्डूयितानि। न चायमर्थः परार्थविरोधी विशेषणं नाम। तस्मात्तन्न हास्यति।

समाधानान्तरभाष्यम्– अथवाऽन्वयाद्विशेषणं भविष्यति। तद्यथा—'घृतघटस्तैलघट' इति। निषिक्ते घृते तैले चान्वयाद्विशेषणं भवति—अयं घृतघटोऽयं तैलघट इति।

समाधानान्तरबाधकभाष्यम्– विषम उपन्यासः। भवति हि तत्र या च यावती चार्थमात्रा। अङ्ग हि भवानग्नौ निष्टप्य घृतघटं तृणकूर्चेन प्रक्षालयतु न गंस्यते स विशेषः।

समाधानसाधकभाष्यम्– यथा तर्हि मल्लिकापुटश्चम्पकपुट इति। निष्कीर्णास्वपि सुमनःसु अन्वयाद्विशेषणं भवति—अयं मल्लिकापुटः, अयं चम्पकपुट इति।

समाधानान्तरभाष्यम्– अथवा समर्थाधिकारोऽयं वृत्तौ क्रियते। सामर्थ्यं नाम भेदः, संसर्गो वा। अपर आह—भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः संसर्गो वा? इह राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तम्, पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं निवर्तयत्यन्येभ्यः स्वामिभ्यः, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु न जातुचित्पुरुषमात्रस्यानयनं भविष्यति।

अथाजहत्स्वार्थाङ्गीकारभाष्यम्– अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः स्यात्?

समाधानभाष्यम्– बाढं युक्तम्। एवं हि दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति। सञ्चयायैव प्रवर्तते।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति—' इति।

प्रत्याक्षेपभाष्यम्– कस्याः पुनर्द्विवचनं प्राप्नोति?

आक्षेपाशयभाष्यम्– प्रथमायाः

समाधानभाष्यम्– न प्रथमासमर्थो राजा।

आक्षेपाशयान्तरभाष्यम्– षष्ठ्यास्तर्हि प्राप्नोति।

समाधानभाष्यम्– न षष्ठीसमर्थः पुरुषः।

पूर्वोक्ताशयाभ्युपगमभाष्यम्– प्रथमाया एव तर्हि प्राप्नोति।

बाधकस्मारणभाष्यम्– ननु चोक्तम्—न प्रथमासमर्थो राजा—इति।

आक्षेपाशयसाधकभाष्यम्– अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्नः। तत्र प्रातिपदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति।

(1193. **समाधानवार्त्तिकम्**-4)

* सङ्घातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः *

भाष्यम्– सङ्घातस्यैकत्वमर्थः। तेनावयवसंख्यातः सुबुत्पत्तिर्न भविष्यति।

(1194. **पक्षान्तरवार्त्तिकम्**-5)

* परस्परव्यपेक्षां सामर्थ्यमेके *

व्याख्याभाष्यम्– परस्परव्यपेक्षां सामर्थ्यमेक इच्छन्ति। का पुनः शब्दयोर्व्यपेक्षा? न ब्रूमः—शब्दयोरिति। किं तर्हि? अर्थयोः। इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति, पुरुषोऽपि राजानमपेक्षते अहमस्येति। तयोरभिसम्बन्धस्य षष्ठी वाचिका भवति। तद्यथा—कष्टं श्रित इति क्रियाकारकयोरभिसम्बन्धस्य द्वितीया वाचिका भवति।

आक्षेपभाष्यम्– अथ यद्येवैकार्थीभावः सामर्थ्यम् अथापि व्यपेक्षा सामर्थ्यम्। किं गतमेतदियता सूत्रेण, आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्?

समाधानभाष्यम्– गतमित्याह। कथम्? समोयमर्थशब्देन सह समासः। सम् चोपसर्गः। उपसर्गाश्च पुनरेवमात्मकाः—'यत्र कश्चित् क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः'। न चेह कश्चित् क्रियावाची शब्दः प्रयुज्यते, येन समः सामर्थ्यं स्यात्। तत्र प्रयोगादेतद्गन्तव्यम्—'नूनमत्र कश्चित् प्रयोगार्हः शब्दो न प्रयुज्यते येन समः सामर्थ्यम्' इति। तद्यथा—धूमं दृष्ट्वा—'अग्निरत्र' इति गम्यते, त्रिविष्टब्धकं दृष्ट्वा 'परिव्राजक' इति। कः पुनरसौ पयोगार्हः शब्दो न प्रयुज्यते? (उच्यते) सङ्गतार्थं समर्थं संसृष्टार्थं समर्थं सम्प्रेक्षितार्थं समर्थं सम्बद्धार्थं समर्थमिति। तद्यदा तावदेकार्थीभावः सामर्थ्यम्,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदैवं विग्रह: करिष्यते—सङ्गतार्थ: समर्थ:, संसृष्ठार्थ: समर्थ इति। तद्यथा—'सङ्गतं घृतं सङ्गतं तैलम्' इत्युच्यते, एकीभूतमिति गम्यते। संसृष्टार्थ: समर्थ इति। तद्यथा—'संसृष्टोऽग्न:' इत्युच्यते, एकीभूत इति गम्यते।

यदा व्यपेक्षा सामर्थ्यम्, तदैवं विग्रह: करिष्यते—सम्प्रेक्षितार्थ: समर्थ: सम्बद्धार्थ: समर्थ इति। क: पुनरिह सम्बन्धात्यर्थ:? व्यतिषङ्ग:। सम्बद्ध इत्युच्यते यो रज्ज्वा अयसा वा कीलेन वा व्यतिषक्तो भवति। नावश्यं बन्ध्नातिर्व्यतिषङ्ग एव वर्तते। किं तर्हि? अहानावपि वर्तते। तद्यथा—'सम्बद्धाविमौ दम्यौ' इत्युच्यते यावन्योऽन्यं न जहीत:। अथवा भवति चैवञ्जातीयकेषु बन्ध्नातिर्वर्तते। तद्यथा—'अस्ति नो गर्गै: सम्बन्ध:' 'अस्ति नो वत्सै: सम्बन्ध:' इति।

सामर्थ्यदूषणाधिकरणम्

व्यपेक्षादूषणभाष्यम्– अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेष: स वक्तव्य:।

(1195. **दूषणदर्शकवार्त्तिकम्**- 6)

*** तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेध: ***

भाष्यम्– तत्रैतस्मिन् व्यपेक्षायां सामर्थ्ये सति नानाकारकान्निघातयुष्मदस्मदादेशा: प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्य:।

निघात—अयं दण्डो हरानेन। अस्ति दण्डस्य हरतेश्च व्यपेक्षेति कृत्वा निघात: प्राप्नोति।

युष्मदस्मदादेशा:—ओदनं पच तव भविष्यति। ओदनं पच मम भविष्यति। अस्त्योदनस्य युष्मदस्मदोश्च व्यपेक्षेति कृत्वा वान्नावादय: प्राप्नुवन्ति। तेषां प्रतिषेधो वक्तव्य:।

आक्षेपभाष्यम्– किमुच्यते—नानाकारकादिति, यदा तेनैवासज्य ह्रियते।

समाधानभाष्यम्– नापि ब्रूम:—अन्येनासज्य ह्रियत इति। किं तर्हि? शब्दप्रमाणका वयम्। यच्छब्द आह, तदस्माकं प्रमाणम्। शब्दश्चेह सत्तामाह—'अयं दण्ड:' अस्तीति गम्यते। स दण्ड: कर्ता भूत्वान्येन शब्देनाभिसम्बध्यमान: करणं सम्पद्यते। तद्यथा—कश्चित्कञ्चित्पृच्छति—'क्व देवदत्त:' इति। स तस्मायाचष्टे—'असौ वृक्षे' (इति 'कतरस्मिन्') 'यस्तिष्ठति' इति स वृक्षोऽधिकरणं भूत्वाऽन्येन शब्देनाभिसम्बध्यमान: कर्ता सम्पद्यते।

(1196. **दूषणान्तरवार्त्तिकम्**- 7)

*** प्रचये समासप्रतिषेध: ***

भाष्यम्– प्रचये समासप्रतिषेधो वक्तव्य:। राज्ञो गौश्चाऽश्वश्च पुरुषश्च राजगवाश्वपुरुषा इति।

(1197. **द्वितीयदूषणबाधकवार्त्तिकम्**- 8)

*** समर्थतराणां वा ***

व्याख्याभाष्यम्– समर्थतराणां वा पदानां समासो भविष्यति। कानि पुन: समर्थतराणि?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यानि द्वन्द्वभावीनि। कुत एतत्? एषां ह्यशुतरा वृत्तिः प्राप्नोति। तद्यथा—'समर्थतरोऽयं माणवकोऽध्ययनाय' इत्युच्यते 'आशुतरग्रन्थः' इति गम्यते।

व्याख्यान्तरभाष्यम्– अपर आह—समर्थतराणां वा पदानां समासो भविष्यति। कानि पुनः समर्थतराणि? यानि द्वन्द्वभावीनि। कुत एतत्? समानविभक्तीन्येतानि, अन्यविभक्ती राजा। भवति विशेषः स्वस्मिन् भ्रातरि पितृव्यपुत्रे च।

(1198. **द्वितीयदूषणबाधकवार्त्तिकान्तरम्**-9)

* समुदायसामर्थ्याद्वा सिद्धम् *

व्याख्याभाष्यम्– समुदायसामर्थ्याद्वा पुनः सिद्धमेतत्। समुदायेन राज्ञः सामर्थ्यं भवति, नावयवेन।

व्याख्यान्तरभाष्यम्– अपर आह—

व्याख्यान्तराय न्यासान्तरम्– 'समर्थतराणां वा समुदायसामर्थ्यात्'।

व्याख्याभाष्यम्– समर्थतराणां वा पदानां समासो भविष्यति। कुत एतत्? समुदायसामर्थ्यादेव।

आक्षेपभाष्यम्– अस्मिन्पक्षे 'वा' इत्येतदसमर्थितं भवति।

समाधानभाष्यम्– एतच्च समर्थितम्। कथम्? नैव वा पुनरत्र राज्ञोऽश्वपुरुषावपेक्षमाणस्य गवा सह समासो भवति। कथं तर्हि गोः राजानमपेक्षमाणस्याश्वपुरुषाभ्यां सह समासो भवति? प्रधानमत्र तदा गौर्भवति। भवति च प्रधानस्य सापेक्षस्यापि समासः।

वाक्यलक्षणाधिकरणम्

(1199. **वाक्यलक्षणवार्त्तिकम्**-10)

* आख्यातं साव्ययकारकविशेषणं वाक्यम् *

व्याख्याभाष्यम्– आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसञ्ज्ञं भवतीति वक्तव्यम्। साव्ययम्—उच्चैः पठति नीचैः पठतीति।

सकारकम्—ओदनं पचति।

सकारकविशेषणम्—ओदनं मृदु विशदं पचति।

(1200. **वाक्यलक्षणवार्त्तिकम्**-11)

* सक्रियाविशेषणं च *

व्याख्याभाष्यम्– सक्रियाविशेषणं चेति वक्तव्यम्। सुष्ठु पचति दुष्ठु पचतीति।

वाक्यलक्षणन्यासान्तरभाष्यम्– अपर आह—'आख्यातं सविशेषणम्' इत्येव। सर्वाणि ह्येतानि विशेषणानि।

(1201. **वाक्यलक्षणान्तरवार्त्तिकम्**-12)

* एकतिङ् *

व्याख्याभाष्यम्– एकतिङ् वाक्यसञ्ज्ञं भवतीति वक्तव्यम्। ब्रूहि ब्रूहि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1202. वाक्यलक्षणप्रयोजनवार्त्तिकम्-13)

* समानवाक्ये निघातयुष्मदस्मदादेशाः *

व्याख्याभाष्यम्– समानवाक्य इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः। किं प्रयोजनम्? नानावाक्येषु मा भूवन्निघातादय इति। अयं दण्डो हरानेन। ओदनं पच तव भविष्यति। ओदनं पच मम भविष्यति।

(1203. दूषणवार्त्तिकम्-14)

* योगे प्रतिषेधश्चादिभिः *

व्याख्याभाष्यम्– चादिभिर्योगे प्रतिषेधो वक्तव्यः। ग्रामस्तव च स्वं मम च स्वम्।

आक्षेपभाष्यम्– किमर्थमिदमुच्यते। यथान्यास एव चादिभिर्योगे प्रतिषेध उच्यते?

समाधानभाष्यम्– इदमद्यापूर्वं क्रियते वाक्यसंज्ञा समानवाक्याधिकारश्च। तद् द्वेष्यं विजानीयात् सर्वमेतद्विकल्पत इति। तदाचार्यः सुहृद् भूत्वान्वाचष्टे चादिभिर्योगे यथान्यासमेव भवतीति। सा चावश्यं वाक्यसञ्ज्ञा वक्तव्या समानवाक्याधिकारश्च वक्तव्यः।

(1204. नियमफलवार्त्तिकम्-15)

* समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानमसमर्थत्वात् *

व्याख्याभाष्यम्– समर्थनिघाते हि सति समानाधिकरणयुक्तयुक्तेषूपसंख्यानं कर्तव्यं स्यात्। समानाधिकरण—पटवे ते दास्यामि, मृदवे ते दास्यामि। समानाधिकरण। युक्तयुक्ते—नद्यास्तिष्ठति कूले, वृक्षस्य लम्बते शाखायाम्, शालीनां ते ओदनं ददामि, शालीनां मे आदनं ददासि। किं पुनः कारणं न सिद्ध्यति? असमर्थत्वात्।

अथ राजगवीक्षीरे समासनिर्णयाधिकरणम्

(1205. आक्षेपवार्त्तिकम्-16)

* राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात् *

व्याख्याभाष्यम्– राजगवीक्षीरे द्विसमासप्रसङ्गः। किं कारणम्? द्विषष्ठीभावात्। द्वे ह्यत्र षष्ठ्यौ राज्ञः गोः क्षीरमिति।

आक्षेपबाधकभाष्यम्– किमुच्यते—'द्विसमासप्रसङ्ग' इति। यदा सुप्सुपेति वर्तते न तदा द्विसमासप्रसङ्ग इति।

आक्षेपाशयभाष्यम्– नैवं विज्ञायते—द्वयोः सुबन्तयोः समासप्रसङ्गो द्विसमासप्रसङ्ग इति। कथं तर्हि? द्विप्रकारस्य समासस्य प्रसङ्गो द्विसमासप्रसङ्ग इति। राजगोक्षीरमित्यपि प्राप्नोति।

तृतीयाक्षेपभाष्यम्– न चैवं भवितव्यम्?

तृतीयाक्षेपसमाधानभाष्यम्– भवितव्यं च यदैतद्वाक्यं भवति—गोः क्षीरं गोक्षीरम्, राज्ञो गोक्षीरं राजगोक्षीरमिति। यदा त्वेतद्वाक्यं भवति—राज्ञो गोः क्षीरमिति, तदा न

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवितव्यम्, तदा च प्राप्नोति। तदा कस्मान्न भवति?

(1206. **समाधानवार्त्तिकम्**- 17)

*** सिद्धं तु राजविशिष्टाया गोः क्षीरेण सामर्थ्यात् ***

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? राजविशिष्टाया गोः क्षीरेण समासो भवति, न केवलायाः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? यथैवायं गवि यतते, न च क्षीरमात्रेण, सन्तोषं करोति। एवं राजन्यपि यतते राज्ञो या गौस्तस्या यत् क्षीरमिति।

समाधानान्तरभाष्यम्– नैव वा पुनरत्र गो राजानमपेक्षमाणायाः क्षीरेण सह समासः प्राप्नोति। किं कारणम्? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति।

आक्षेपभाष्यम्– कथं तर्हि गोः क्षीरमपेक्षमाणाया राज्ञा सह समासो भवति?

समाधानभाष्यम्– प्रधानमत्र तदा गौर्भवति। भवति च प्रधानस्य सापेक्षस्यापि समासः।

पदविधिग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ किमर्थं पदविधौ समर्थाधिकारः क्रियते?

(1207. **समाधानवार्त्तिकम्**- 18)

*** पदविधौ समर्थवचनं वर्णाश्रये शास्त्र आनन्तर्यविज्ञानात् ***

व्याख्याभाष्यम्– पदविधौ समर्थाधिकारः क्रियते। वर्णाश्रये शास्त्रे आनन्तर्यमात्रे कार्यं यथा विज्ञायेतेति। 'तिष्ठतु दध्यशान त्वं शाकेन' 'तिष्ठतु कुमारी च्छत्रं हर देवदत्तेति।

निर्देशानर्थक्यपरिहाराधिकरणम्

(1208. **आक्षेपवार्त्तिकम्**- 19)

*** समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशानर्थक्यम् ***

व्याख्याभाष्यम्– समर्थाधिकारोऽयं विधेयेन समानाधिकरणः। किं च विधेयम्? समासः। यावद् ब्रूयात्—'समर्थः समासः' इति, तावत्—'समर्थः पदविधिः' इति। न च राजपुरुष इत्येतस्यामवस्थायां समर्थाधिकारेण किञ्चिदपि शक्यं प्रवर्तयितुं निवर्तयितुं वा। समर्थाधिकारस्य विधेयसामानाधिकरण्याद् निर्देशोऽनर्थकः।

(1209. **समाधानवार्त्तिकम्**- 20)

*** सिद्धं तु समर्थानामिति वचनात् ***

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? समर्थानां पदानां विधिर्भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– एवमपि द्व्यकेयोर्न प्राप्नोति।

(1210. **समाधानवार्त्तिकम्**- 21)

*** एकशेषनिर्देशाद्वा ***

व्याख्याभाष्यम्– अथवा एकशेषनिर्देशोऽयम्। समर्थस्य च समर्थयोश्च समर्थानां च समर्थानामिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते।

समाधानभाष्यम्– नैष दोषः। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। द्व्येकयोरपि भविष्यति।

आक्षेपभाष्यम्– एवमपि विभक्तीनां न प्राप्नोति—समर्थात्समर्थे पदात्पद इति।

समाधानभाष्यम्– एवं तर्हि समर्थपदयोरयं विधिशब्देन सर्वविभक्त्यन्तः समासः— समर्थस्य विधिः समर्थविधिः, समर्थयोर्विधिः समर्थविधिः, समर्थानां विधिः समर्थविधिः, समर्थाद्विधिः समर्थविधिः, समर्थे विधिः समर्थविधिः। पदस्य विधिः पदविधिः, पदयोर्विधिः पदविधिः, पदानां विधिः पदविधिः, पदाद्विधिः पदविधिः, पदे विधि पदविधिः। समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधयः। पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधयः। समर्थविधयश्च पदविधयश्च समर्थः पदिविधिः। पूर्वः समास उत्तरपदलोपी। यादृच्छिकी विभक्तिश्च।

सामानाधिकरण्योपपादनाधिकरणम्

(1211. आक्षेपवार्त्तिकम्-22)

* **समानाधिकरणेषूपसंख्यानमसमर्थत्वात्** (द्रव्यं पदार्थ इति चेत्) *

भाष्यम्– समानाधिकरणेषूपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरपुरुषः। किं पुनः कारणं न सिद्ध्यति? असमर्थत्वात्। कथमसामर्थ्यम्? द्रव्यं पदार्थ इति चेत्। यदि द्रव्यं पदार्थः, न भवति तदा सामर्थ्यम्। भेदाभावात्। अथ हि गुणः पदार्थः, भवति तदा सामर्थ्यम्। अन्यो हि वीरत्वं गुणः, अन्यो हि पुरुषत्वम्।

अन्यत्वस्य सामर्थ्यहेतुत्वबाधकभाष्यम्– न 'अन्यत्वमस्ति' इतीयता सामर्थ्यं भवति। अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च। न च तस्यैतावता सामर्थ्यं भवति।

प्रत्याक्षेपभाष्यम्– को वा विशेषः यद् गुणे पदार्थे सामर्थ्यं स्यात्। द्रव्ये च न स्याद्?

प्रत्याक्षेपसमाधानभाष्यम्– एष विशेषः। एकं तयोरधिकरणम्। अन्यश्च वीरत्वं गुणः, अन्यः पुरुषत्वम्।

समाधानबाधकभाष्यम्– द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात्सामर्थ्यं भविष्यति।

समाधानसाधकभाष्यम्– अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणकृत उपकारः प्रतिज्ञातुम्।

समाधानबाधकभाष्यम्– ननु चाभ्यन्तरोऽसौ भवति।

समाधानसाधकभाष्यम्– यद्यप्यभ्यन्तरः, न तु गम्यते। नहि गुड इत्युक्ते मधुरत्वं गम्यते, शृङ्गवेरमिति वा कटुकत्वम्।

समाधानबाधकभाष्यम्– गुणपदार्थिकेनापि तर्हि अशक्यो गुणस्य द्रव्यकृत उपकारः प्रतिज्ञातुम्।

समाधानसाधकभाष्यम्– अथ गुणपदार्थिकः प्रतिजानीते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिबन्दीभाष्यम्– द्रव्यपदार्थिकोऽपि कस्मान्न प्रतिजानीते?

प्रतिबन्दीबाधकभाष्यम्– एवमनयोः सामर्थ्यं स्याद्वा न वा।

प्रत्याक्षेपभाष्यम्– क्व च तावदिदं स्यात्—समानाधिकरणेनेति?

प्रत्याक्षेपबाधकभाष्यम्– यत्र सर्वं समानम्—'इन्द्रः शक्रः पुरुहूतः पुरंदरः' 'कन्दुः कोष्ठः कुसूलः' इति।

प्रत्याक्षेपसाधकभाष्यम्– नैवंजातीयकानां समासेन भवितव्यं प्रत्ययेन वोत्पत्तव्यम्। किं कारणम्? अर्थगत्यर्थः शब्दप्रयोगः। अर्थं सम्प्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्। किं कारणम्? उक्तार्थानामप्रयोग इति।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—भृत्यभरणीय इति?

समाधानभाष्यम्– नैतौ समानार्थौ। एकोऽत्र शक्यार्थे कृत्यः, अपरोर्हे। शक्यो भर्तुं भृत्यः। अर्हति भृतिं (भरणीयः। भृत्यो भरणीयो भृत्य) भरणीय इति।

आक्षेपभाष्यम्– यदि तर्हि यत्र किञ्चित्समानं कश्चिच्च विशेषः तत्र भवितव्यम्। इहापि तर्हि प्राप्नोति—दर्शनीयाया माता दर्शनीया मातेति। अत्रापि किञ्चित्समानं कश्चिच्च विशेषः। किं पुनस्तत्? सद्भावान्यभावौ।

समाधानभाष्यम्– न क्वचित्सद्भावान्यभावौ न स्तः, उच्यते चेदं समानाधिकरणेनेति, तत्र प्रकर्षगतिर्विज्ञास्यते—यत्र साधीयः सामानाधिकरण्यम्। क्व च साधीयः सामानाधिकरण्यम्? यत्र सर्वं समानं सद्भावान्यभावौ द्रव्यं च।

समाधानान्तरभाष्यम्– अथवा समानाधिकरणेनेति तत्समानमाश्रीयते यत्समानं भवति, न भवति च। न चैतत्समानं क्वचिदपि न भवति।

समाधानान्तरभाष्यम्– अथवा यावद् ब्रूयात्—समानद्रव्येणेति, तावत्—समानाधिकरणेनेति। द्रव्यं हि लोके 'अधिकरणम्'। इत्युपचर्यते। तद्यथा—'एकस्मिन्द्रव्ये व्युदितम्'। एकस्मिन्नधिकरणे व्युदितम्। तथा व्याकरणे 'विप्रतिषिद्धं चानधिकरणवाचि' अद्रव्यवाचीति गम्यते।

आक्षेपभाष्यम्– एवमपीदमवश्यं वक्तव्यम्—'समानाधिकरणमसमर्थवद्भवति' इति। किं प्रयोजनम्? सर्पिः-कालकं यजुःपीतकमित्येवमर्थम्।

प्रत्याक्षेपभाष्यम्– यदि 'समानाधिकरणमसमर्थवद्भवति' इत्युच्यते सर्पिष्पीयते यजुष्क्रियत इत्यत्र षत्वं न प्राप्नोति।

प्रत्याक्षेपबाधकभाष्यम्– अधात्वभिहितमित्येवं तत्।

उपसंहारभाष्यम्– एवं च कृत्वा समानाधिकरणेषूपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरपुरुष इति। किं कारणम्? असमर्थत्वात्?

(1212. समाधानवार्त्तिकम्-23)

* न वा वचनप्रामाण्यात् *

व्याख्याभाष्यम्– न वा कर्तव्यम्। किं कारणम्? वचनप्रामाण्यात्। वचनप्रामाण्यादत्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समासो भविष्यति। किं वचनप्रामाण्यम्? 'समानमध्यमध्यमवीराश्च' इति।

(1213. आक्षेपसमाधानातिदेशवार्त्तिकम्-24)

* लुप्ताख्यातेषु च *

व्याख्याभाष्यम्– लुप्ताख्यातेषु चोपसंख्यानं कर्तव्यम्। निष्कौशाम्बिः निर्वाराणसिः। लुप्ताख्यातेषु च। किम्? वचनप्रामाण्यादित्येव। किं वचनप्रामाण्यम्? 'कुगतिप्रादयः' इति।

समाधानबाधकभाष्यम्– अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्? सुराजा अतिराजेति।

समाधानाशयभाष्यम्– न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति। किं तर्हि? वार्त्तिकवचनप्रामाण्यादिति। 'सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात्' 'प्रादयः क्तार्थे' इति।

(1214. समाधनान्तरवार्त्तिकम्-25)

* तदर्थगतेर्वा *

भाष्यम्– तदर्थगतेर्वा पुनः सिद्धमेतत्। किमिदं तदर्थगतेरिति? तस्यार्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति। यस्यार्थस्य कौशाम्ब्या सामर्थ्यं स निसोच्यते। अथवा सोऽर्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति। योऽर्थः कौशाम्ब्या समर्थः स निसोच्यते।

अथ समासयोग्यपदसंख्यानिर्णयाधिकरणम्

आक्षेपभाष्यम्– अथ यत्र बहूनां समासप्रसङ्गः किं तत्र द्वयोर्द्वयो समासो भवति, आहोस्विदविशेषेण?

विशेषजिज्ञासाभाष्यम्– कश्चात्र विशेषः?

(1215. प्रथमपक्षे दूषणवार्त्तिकम्-26)

* समासो द्वयोर्द्वयोश्चेद् द्वन्द्वेनेकग्रहणम् *

व्याख्याभाष्यम्– समासो द्वयोर्द्वयोश्चेद् द्वन्द्वेनेकग्रहणं कर्तव्यम्। चार्थे द्वन्द्वोनेकमिति वक्तव्यम्। इहापि यथा स्यात्—प्लक्षन्यग्रोधखदिरपलाशा इति।

दूषणबाधकभाष्यम्– नैष दोषः। अत्रापि द्वयोर्द्वयोः समासो भविष्यति।

(1216. दूषणसाधकवार्त्तिकम्-27)

* द्वयोर्द्वयोः समास इति चेन्न बहुषु द्वित्वाभावात् *

व्याख्याभाष्यम्– द्वयोर्द्वयोः समास इति चेत्। तन्न। किं कारणम्? बहुषु द्वित्वाभावात्। न बहुषु द्वित्वमस्ति।

आक्षेपबाधकभाष्यम्– नावश्यमेवं विग्रहः कर्तव्यः—प्लक्षश्च न्यग्रोधश्च खदिरश्च पलाशश्चेति। किं तर्हि? एवं विग्रहः करिष्यते—प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ, खदिरश्च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलाशश्च खदिरपलाशौ, प्लक्षन्यग्रोधौ च खदिरपलाशौ च प्लक्षन्यग्रोधखदिरपलाशा इति।

आक्षेपसाधकभाष्यम्– होतृपोतृनेष्टोद्गातारस्तर्हि न सिद्ध्यन्ति। होतापोतानेष्टोद्गातार इति प्राप्नोति।

प्रत्याक्षेपभाष्यम्– न चैतदेवं भवितव्यम्?

प्रत्याक्षेपबाधकभाष्यम्– भवितव्यं च, यदैवं विग्रहः क्रियते—होता च पोता च होतापोतारौ, नेष्टा चोद्गाता च नेष्टोद्गातारौ, होतापोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातार इति। होतृपोतृनेष्टोद्गातारस्तु न सिद्ध्यन्ति।

(1217. **दूषणान्तरवार्त्तिकम्**-28)

*** समासान्तप्रतिषेधश्च ***

व्याख्याभाष्यम्– समासान्तस्य च प्रतिषेधो वक्तव्यः। वाक्त्वक्स्रुग्दृषदमिति। वाक्त्वचस्रुग्दृषदमिति प्राप्नोति।

आक्षेपबाधकभाष्यम्– नैष दोषः। अत्रापि परेण सह समासो भविष्यति। स्रुक्च दृषच्च स्रुग्दृषदं त्वक् च स्रुग्दृषदं च त्वक्स्रुग्दृषदम्। वाक् च त्वक्स्रुग्दृषदं च वाक्त्वक्-स्रुग्दृषदमिति।

प्रथमाक्षेपदार्ढ्यभाष्यम्– होतृपोतृनेष्टोद्गातार एव तर्हि न सिद्ध्यति।

आक्षेपान्तरभाष्यम्– इह च—

सुसूक्ष्मजटकेशेन सुनताजिनवाससा।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिद्ध्यति।।

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्ह्यविशेषण।

(1218. **आक्षेपवार्त्तिकम्**-29)

*** अविशेषेण बहुव्रीहावनेकपदप्रसङ्गः** (तत्र स्वरसमासान्तपुंवद्भावेषु दोषः) *****

भाष्यम्– यद्यविशेषेण बहुव्रीहावनेकपदप्रसङ्गः। तत्र को दोषः? तत्र स्वरसमासान्त-पुंवद्भावेषु दोषः। तत्र स्वरसमासान्तपुंवद्भावेषु दोषो भवति। स्वर—पूर्वशालाप्रियः अपर-शालाप्रियः। स्वर। समासान्त—पञ्चगवप्रियः पञ्चनावप्रियः। समासान्त। पुंवद्भाव—खादिरेतरशम्यम्।

(1219**वार्त्तिकम्**-30)

*** न वावयवतत्पुरुषत्वात् ***

व्याख्याभाष्यम्– न वा एष दोषः। किं कारणम्। अवयवतत्पुरुषत्वात्। अवयवोऽत्र तत्पुरुषसञ्ज्ञः, तदाश्रयौ समासान्तपुंवद्भावौ भविष्यतः।

आक्षेपभाष्यम्– स्वरः कथम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1220. समाधानवार्त्तिकम्-31)

*** तस्यान्तोदात्तत्वं विप्रतिषेधात् ***

व्याख्याभाष्यम्– अन्तोदात्तत्वं क्रियतां पूर्वपदप्रकृतिस्वर इति। अन्तोदात्तत्वं भवति विप्रतिषेधेन।

समाधानभाष्यम्– नैष युक्तो विप्रतिषेधः। 'विप्रतिषेधे परम्' इत्युच्यते। पूर्वं चान्तोदात्तत्वम्, परं पूर्वपदप्रकृतिस्वरत्वम्।

समाधानाभिप्रायभाष्यम्– न परविप्रतिषेधं ब्रूमः। किं तर्हि? अन्तरङ्गविप्रतिषेधम्।

(1221. समाधानहेत्वन्तरवार्त्तिकम्-32)

*** निमित्तिस्वरबलीयस्त्वाद्वा ***

व्याख्याभाष्यम्– अथवा निमित्तस्वरान्निमित्तिस्वरो बलीयानिति वक्तव्यम्। किं पुनर्निमित्तम्, को वा निमित्ती? बहुव्रीहिर्निमित्तम्, तत्पुरुषो निमित्ती।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्—निमित्तस्वरान्निमित्तिस्वरो बलीयानिति?

समाधानभाष्यम्– न वक्तव्यम्।

(1222. समाधानसाधकवार्त्तिकम्-33)

*** एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य ***

व्याख्याभाष्यम्– यदयं युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठति तज्ज्ञापयत्याचार्यो निमित्तस्वरान्निमित्तिस्वरो बलीयानिति।

ज्ञापकत्वनिरासभाष्यम्– कः पुनरर्हति युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठितुम्। एवं किल नाम पठ्यते—एकः शितिः एकशितिः, एकशितिः पादो यस्येति। तच्च न। एवं विग्रहः करिष्यते—एकः शितिरेषु त इमे एकशितयः, एकशितयः पादा यस्येति एकशितिपादिति। अथाप्येवं विग्रहः क्रियते—एकः शितिरेकशितिः, एकशितिः पादो यस्येति, एवमपि नार्थः पाठेन। 'इगन्ते द्विगौ' इत्येष स्वरोऽत्र बाधको भविष्यति।

आक्षेपान्तरभाष्यम्– अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसञ्ज्ञा प्राप्नोति—

सुसूक्ष्मजटकेशेन सुनताजिनवाससा।
समन्तशितिरन्ध्रेणेति।

तत्र को दोषः? 'तस्यान्तोदात्तत्वं विप्रतिषेधात्' इत्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन।

समाधानभाष्यम्– नैष दोषः। नेदं बहुव्रीह्यवयवस्य तत्पुरुषस्य लक्षणमारभ्यते। किं तर्हि? यस्य बहुव्रीह्यवयवस्य तत्पुरुषस्य तल्लक्षणमस्ति तस्यान्तोदात्तत्वं भविष्यति विप्रतिषेधेन।

आक्षेपभाष्यम्– ननु चास्याप्यस्ति। किम्? 'विशेषणं विशेष्येण बहुलम्' इति।

समाधानभाष्यम्– बहुलवचनान्न भविष्यति।

आक्षेपान्तरभाष्यम्– अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसञ्ज्ञा प्राप्नोति—अधिक-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्टिवर्ष इति। तत्र को दोषः? 'तस्यान्तोदात्तत्वं विप्रतिषेधात्' इत्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन।

आक्षेपबाधकभाष्यम्– नैष दोषः। 'इगन्ते द्विगौ' इत्येष स्वरो बाधको भविष्यति।

आक्षेपान्तरभाष्यम्– यस्तर्हि नेगन्तः—अधिकशतवर्ष इति।

प्रागुक्ताक्षेपस्यापि समञ्जसत्वभाष्यम्– इह चाप्यधिकषष्टिवर्ष इति समासान्तः प्राप्नोति 'डचः प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिन्शाद्यर्थम्' इति।

आक्षेपबाधकभाष्यम्– नैष दोषः। अव्ययादेरित्येवं तत्।

आक्षेपभाष्यम्– किं पुनः कारणम्—अव्ययादेरित्येवं तत्?

समाधानभाष्यम्– इह मा भूद्—गोत्रिंशद्, गोचत्वारिंशदिति।

आक्षेपभाष्यम्– बहुव्रीहिसञ्ज्ञा तर्हि प्राप्नोति 'संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये' इति।

समाधानभाष्यम्– न संख्यां संख्येये वर्तयिष्यामः। कथम्? एवं विग्रहः करिष्यते—अधिका षष्टिर्वर्षाणामस्येति।

आक्षेपसाधकभाष्यम्– यथा तर्हि स योगः प्रत्याख्यायते तथा पूर्वेण प्राप्नोति। कथं च स योगः प्रत्याख्यायते? 'अशिष्यः संख्योत्तरपदः संख्येयार्थाभिधायित्वात्' इति। प्रत्याख्याते तस्मिन्योगे संख्यां संख्येये वर्तयिष्यामः। तत्रैवं विग्रहः करिष्यते—अधिका षष्टिर्वर्षाण्यस्येति। सर्वथा वयमधिकषष्टवर्षान्न मुच्यामहे। कथम्? यावता स योगः प्रत्याख्यायते। अयं च विग्रहोऽस्ति—अधिका षष्टिर्वर्षाणामस्येति।

आक्षेपबाधकभाष्यम्– यत्तु तदुक्तम्—अधिकषष्टिवर्षो न सिद्ध्यतीति, स सिद्धो भवति। कथम्? यावता स योगः प्रत्याख्यायते। अयं च विग्रहोऽस्ति—अधिका षष्टिर्वर्षाण्यस्येति।

आक्षेपभाष्यम्– अधिकशतवर्षस्तु न सिद्ध्यति।

समाधानभाष्यम्– कर्तव्योऽत्र यत्नः। समर्थः पदविधिः।।1।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य प्रथमे पादे प्रथममाह्निकम्

●

द्वितीयेऽध्याये प्रथमे पादे द्वितीयमाह्निकम्

(222. अतिदेशसूत्रम् 2.1.2 आ. 1.)

351. सुबामन्त्रिते पराङ्गवत्स्वरे 2.1.2

सुब्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– सुबिति किमर्थम्?

समाधानभाष्यम्– करोष्यटन्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्– नैतदस्ति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? समानाधिकरणमसमर्थवद्भवतीति।

समाधानभाष्यम्– इदं तर्हि—पीड्ये पीड्यमानेति।

पूर्वोक्तसमाधानसाधकभाष्यम्– इदं चाप्युदाहरणम्—करोष्यटन्।

आक्षेपबाधकस्मारणभाष्यम्– ननु चोक्तम्—असामर्थ्यादत्र न भविष्यतीति। कथमसामर्थ्यम्? समानाधिकरणमसमर्थवद्भवतीति।

समाधानभाष्यम्– नैष दोषः। अधात्वभिहितमित्येवं तत्।

पराङ्गवद्भावविषयनिर्णयाधिकरणम्

(1223. **आक्षेपवार्त्तिकम्**-1)

*** आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यामन्त्रितकारकवचनम् ***

व्याख्याभाष्यम्– आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यन्तमामन्त्रितकारकं पराङ्गवद्भवतीति वक्तव्यम्। षष्ठ्यन्तं तावत्—मद्राणां राजन्, मगधानां राजन्। आमन्त्रितकारक**म्**– कुण्डेनाटन्।

आमन्त्रितकारकोदाहरणबाधकभाष्यम्– नास्त्यत्र विशेषः सति च पराङ्गवद्भावेऽसति वा।

उदाहरणान्तरभाष्यम्– इदं तर्हि—परशुना वृश्चन्।

(1224. **आक्षेपस्य प्रकारान्तरवार्त्तिकम्**-2)

*** तन्निमित्तग्रहणं वा ***

व्याख्याभाष्यम्– अथवा तन्निमित्तग्रहणं कर्तव्यम्। आमन्त्रितनिमित्तं परस्याङ्गवद्भवतीति वक्तव्यम्। मद्राणां राजन्।

अनन्यथासाधकत्वभाष्यम्– तच्चावश्यमन्यतरद्वक्तव्यम्।

(1225. **अन्यथासिद्धिवारकवार्त्तिकम्**-3)

*** अवचने हि सुबन्तमात्रप्रसङ्गः ***

व्याख्याभाष्यम्– अनुच्यमाने त्वेतस्मिन्सुबन्तमात्रस्य पराङ्गवद्भावः प्रसज्येत। अस्यापि प्रसज्येत। 'क्षत्रेणाग्ने स्वायुः संरभस्व' मित्रेणाग्ने मित्रधेये यतस्व'।

आक्षेपभाष्यम्– किं पुनरत्र ज्यायः?

समाधानभाष्यम्– तन्निमित्तग्रहणमेव ज्यायः। इदमपि सिद्धं भवति—गोषु स्वामिन् पशुषु स्वामिन्। एतद्धि नैव षष्ठ्यन्तम्, नाप्यामन्त्रितकारकम्।

(1226. **आक्षेपवार्त्तिकम्**-4)

*** सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमननन्तरत्वात्स्वरेऽवधारणाच्च ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानं कर्तव्यम्। तीक्ष्णया सूच्या सीव्यन् तीक्ष्णेन परशुना वृश्चन्। किं पुनः कारणं न सिद्ध्यति? अनन्तरत्वात्। ननु च परस्य पराङ्गवद्भावे कृते पूर्वस्यापि भविष्यति। 'स्वरेवधारणाच्च'। स्वरेऽवधारणाच्च न सिद्ध्यति। स्वरेऽवधारणं क्रियते, नानन्तर्ये।

(१२२७. आक्षेपवातिकम्-५)

*** परमपि च्छन्दसि ***

व्याख्याभाष्यम्– परमपि च्छन्दसि पूर्वस्याङ्गवद्भवतीति वक्तव्यम्। आ ते पितर्मरुतां सुम्नमेतु। प्रति त्वा दुहितर्दिव। वृणीष्व दुहितर्दिव।

(1228. आक्षेपवार्त्तिकम्-6)

*** अव्ययप्रतिषेधश्च ***

व्याख्याभाष्यम्– अव्ययानां च प्रतिषेधो वक्तव्यः। उच्चैरधीयान।

(1229. पर्युदासवार्त्तिकम्-7)

*** अनव्ययीभावस्य ***

व्याख्याभाष्यम्– अव्ययीभावस्य नेति वक्तव्यम्। इह मा भूत्—उपाग्न्यधीयान।

(स्वरेऽवधारणप्रयोजनाधिकरणम्)

आक्षेपभाष्यम्– अथ किमर्थं स्वरेवधारणं क्रियते?

(1230. समाधानवार्त्तिकम्-8)

*** स्वरेवधारणं सुबलोपार्थम् ***

व्याख्याभाष्यम्– स्वरेवधारणं क्रियते सुपो लोपो मा भूदिति। परशुना वृश्चन्।

(1231. समाधानानर्थक्यवार्त्तिकम्-9)

*** न वा सुबन्तैकान्तत्वात् ***

व्याख्याभाष्यम्– न वा कर्तव्यम्। किं कारणम्? सुबन्तैकान्तत्वात्। सुबन्तैकान्तः पराङ्गवद्भावो भवति।

(1232. आनर्थक्यबाधकवार्त्तिकम्-10)

*** प्रातिपदिकैकान्तस्तु सुब्लोपे ***

व्याख्याभाष्यम्– प्रातिपदिकैकान्तस्तु भवति सुब्लोपे कृते।

आनर्थक्यसाधकभाष्यम्– प्रत्ययलक्षणेन सुबन्तैकान्तता स्यात्। तस्मात्स्वरेवधारणं न कर्तव्यं सुबलोपार्थं प्रातिपदिकस्थायाः सुपो लुगुच्यते। तस्मात्स्वरग्रहणेन नार्थः।

प्रयोजनान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—षत्वणत्वे मा भूतामिति। कूपे सिञ्चन्। चर्म नमन्निति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजननिरासभाष्यम्– एतदपि नास्ति प्रयोजनम्। इह तावत्कूपे सिञ्चन्निति स्वाश्रयं पदादित्वं भविष्यति।

प्रयोजननिराकरणैकदेशिभाष्यम्– चर्म नमन्निति 'पूर्वपदात्सञ्ज्ञायामग' इत्येतस्मान्नियान्न भविष्यति।

निराकरणबाधकभाष्यम्– ननु च समास एवैतद्भवति पूर्वपदमुत्तरपदमिति।

निराकरणसाधकैकदेशिभाष्यम्– नेत्याह। अविशेषेणैव तद्भवति—पूर्वं पदं पूर्वपदम्। उत्तरं पदमुत्तरपदम्। सुबामन्त्रिते।।2।।

समाससञ्ज्ञाप्रकरणम्

(223. अधिकरसूत्रम् 2.1.2 आ. 2)

352. प्राक्कडारात्समासः 2.1.3

प्राग्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– प्राग्वचनं किमर्थम्?

(1233. समाधानवार्त्तिकम्-1)

*** प्राग्वचनं समाससञ्ज्ञाऽनिवृत्त्यर्थम् ***

व्याख्याभाष्यम्– प्राग्वचनं क्रियते समाससञ्ज्ञाया अनिवृत्तिर्यथा स्यात्। अक्रियमाणे प्राग्वचने अनवकाशा अव्ययीभावादयः सञ्ज्ञाः समाससञ्ज्ञां बाधेरन्, ता मा बाधिषतेति प्राग्वचनं क्रियते।

एकदेशिन आक्षेपभाष्यम्– अथ क्रियमाणेऽपि प्राग्वचने यावता अनवकाशा अव्ययीभावादिसञ्ज्ञाः कस्मादेव न बाधन्ते?

एकदेशिनःसमाधानभाष्यम्– क्रियमाणे हि प्राग्वचने सत्यां समाससञ्ज्ञायामेता। अवयवसञ्ज्ञा आरभ्यन्ते। तत्र वचनात्समावेशो भविष्यति।

समाधानबाधकभाष्यम्– समासञ्ज्ञाप्यनवकाशा। सा वचनाद्भविष्यति।

समाधानसाधकभाष्यम्– सावकाशा समाससञ्ज्ञा। कोवकाशः? विस्पष्टादीन्यवकाशः। विस्पष्टं पटुः विस्पष्टपटुः। व्यक्तं पटुः व्यक्तपटुः।

समाधानबाधकभाष्यम्– नैषोवकाशः। एषा ह्याचार्यस्य शैली लक्ष्यते—येनैवावयववकार्यं भवति तेनैव समुदायकार्यमपि भवतीति। येनैव चात्रावयववकार्यं स्वरः क्रियते, तेनैव समुदायवकार्ये समासोऽपि भविष्यति—'विस्पष्टादीनि गुणवचनेषु' इति।

प्रयोजनसमाधानान्तरभाष्यम्– इदं तर्हि—काकतालीयमजाकृपाणीयम्।

प्रयोजननिरासभाष्यम्– एतदपि नास्ति प्रयोजनम्। अत्रापि येनैवावयववकार्यं प्रत्ययोत्पत्तिः क्रियते, तेनैव समुदायकार्यं समाससञ्ज्ञा भविष्यति 'समासाच्च तद्विषयाद्' इति।

प्रयोजनान्तरभाष्यम्– इदं तर्हि—पुनाराजः पुनर्गवः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजननिरासभाष्यम्– अत्राप्यवश्यं तत्पुरुषसञ्ज्ञा वक्तव्या। तत्पुरुषाश्रयः समासान्तो यथा स्यात्।

प्रयोजनभाष्यम्– इदं तर्हि—पुनराधेयम्।

प्रयोजननिराकरणभाष्यम्– अत्राप्यवश्यं गतिसञ्ज्ञा वक्तव्या 'गतिकारकोपपदात्कृद्' इत्येष स्वरो यथा स्यात्।

प्रयोजनभाष्यम्– इदं तर्हि—पुनरुत्स्यूतं वासो देयम्।

प्रयोजननिरासभाष्यम्– अत्राप्यवश्यं गतिसञ्ज्ञा वक्तव्या 'गतिर्गतौ' इति निघातो यथा स्यात्। यदि तन्नास्ति 'पुनश्चनसौ छन्दसि' इति। सति तस्मिन्स्तेनैव सिद्धम्।

प्रयोजनभाष्यम्– एवमप्येका सञ्ज्ञेति वचनान्नास्ति यौगपद्येन सम्भवः। पर्यायः प्रसज्येत। तस्मात्प्राग्वचनं कर्तव्यम्। प्राक्कडारात्।।3।।

(224. **केवलसमाससञ्ज्ञासूत्रम्** 2.1.2 आ. 3)

353. सह सुपा 2.1.4

सहवचनप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– सहवचनं किमर्थम्?

(1234. **समाधानवार्त्तिकम्**-1)

∗ सहवचनं पृथगसमासार्थम् ∗

व्याख्याभाष्यम्– सहग्रहणं क्रियते सहभूतयोरेव समाससञ्ज्ञा यथा स्याद् एकैकस्य समाससञ्ज्ञा मा भूदिति।

आक्षेपभाष्यम्– किं च स्यात्, यद्येकैकस्य समाससञ्ज्ञा स्यात्?

समाधानभाष्यम्– इह ऋक्पाद इति समासान्तः प्रसज्येत। इह राजाश्व इति द्वौ स्वरौ स्याताम्।

आक्षेपभाष्यम्– कथं च कृत्वैकैकस्य समाससञ्ज्ञा प्राप्नोति?

आक्षेपबाधकभाष्यम्– 'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा' इति। तद्यथा—वृद्धिगुणसञ्ज्ञे प्रत्येकं भवतः।

आक्षेपसाधकभाष्यम्– ननु चायमप्यस्ति दृष्टान्तः—'समुदाये वाक्यपरिसमाप्तिः' इति। तद्यथा—'गर्गाः शतं दण्ड्यन्ताम्' इति अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन् दृष्टान्ते यदि तत्र प्रत्येकमित्युच्यते, इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसञ्ज्ञे भवतः, इहापि नार्थः सहग्रहणेन।

समाधानभाष्यम्– एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति—तस्यैतत्प्रयोजनम्—योगाङ्गं यथा विज्ञायेत सति च योगाङ्गे योगविभागः करिष्यते—'सह'। सुप् समस्यते। केन सह? समर्थेन। अनुव्यचलद् अनुप्राविशत्। ततः 'सुपा' सुपा च सह सुप्समस्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकारश्च लक्षणं च। यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति। 'पुनरुत्स्यूतं वासो देयम्' 'पुनर्निष्कृतो रथः'।

न्यूनतापूर्त्यधिकरणम्

(1235. आक्षेपवार्त्तिकम्- 2)

* इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च *

व्याख्याभाष्यम्– इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्। वाससी इव। कन्ये इव। सह सुपा।।4।।

अव्ययीभावसमासप्रकरणम्

(225. अधिकारसूत्रम् 2.1.2 आ. 4)

354. अव्ययीभावः 2.1.5

महासञ्ज्ञाप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थं महती सञ्ज्ञा क्रियते?

समाधानभाष्यम्– अन्वर्थसञ्ज्ञा यथा विज्ञायेत—अनव्ययमव्ययं भवतीत्यव्ययीभावः। अव्ययीभावोव्ययसञ्ज्ञो भवतीत्येतन्न वक्तव्यं भवति। अव्ययीभावः।।5।।

(226. अव्ययीभावसमाससञ्ज्ञासूत्रम् 2.1.2 आ. 5)

355. अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्ति-साकल्यान्तवचनेषु 2.1.6

अनिष्टवारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति सुमद्राः सुमगधाः सपुत्रः सच्छात्र इति। समृद्धौ साकल्य इति च प्राप्नोति?

आक्षेपबाधकभाष्यम्– नैष दोषः। इह कश्चित्समासः पूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। न चात्र पूर्वपदार्थप्राधान्यं गम्यते।

आक्षेपबाधकयुक्त्यन्तरभाष्यम्– अथवा नेमे समासार्था निर्दिश्यन्ते। किं तर्हि? अव्ययार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन सह समस्यत इति। अव्ययं विभक्ति.।।6।।

(227. अव्ययीभावसञ्ज्ञासूत्रम् 2.1.2 आ. 6)

356. यथाऽसादृश्ये 2.1.7

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रे यथाशब्दस्याव्युत्पन्नस्यैव ग्रहणाधिकरणम्

आक्षेपभाष्यम्– असादृश्य इति किमर्थम्?

समाधानभाष्यम्– यथा देवदत्तस्तथा यज्ञदत्तः।

आक्षेपभाष्यम्– असादृश्य इत्युच्यते, तत्रेदं न सिद्ध्यति—यथाशक्ति यथाबलमिति। किं कारणम्? यथेत्ययं प्रकारवचने थाल्, स च सादृश्ये वर्तते।

आक्षेपबाधकभाष्यम्– नैष दोषः। अयं यथाशब्दोस्त्येवाव्युत्पन्नः प्रातिपदिकं वीप्सावाचि। अस्ति प्रकारवचने थाल्। तत्र यदव्युत्पन्नं प्रातिपदिकं वीप्सावाचि तस्येदं ग्रहणम्।

आक्षेपभाष्यम्– अथ यः प्रकारवचने थाल्, तस्य ग्रहणं कस्मान्न भवति। पूर्वेण प्राप्नोति—'सादृश्यसंपत्ति' इति।

आक्षेपबाधकभाष्यम्– प्रतिषेधवचनसामर्थ्यान्न भविष्यति। यथाऽसादृश्ये।।7।।

(228 **अव्ययीभावसञ्ज्ञासूत्रम्** 2.1.2 आ. 7)

358. सुप्प्रतिना मात्रार्थे 2.1.9

सुब्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– सुबिति वर्तमाने पुनः सुब्ग्रहणं किमर्थम्?

आक्षेपबाधकभाष्यम्– 'अव्ययम्' इत्येवं तदभूत्। सुब्मात्रे यथा स्यात्माषप्रति सूपप्रति ओदनप्रति।।सुप्प्रतिना।।9।।

(229. **अव्ययीभावसञ्ज्ञासूत्रम्** 2.1.2 आ. 8)

359. अक्षशलाकासंख्याः परिणा 2.1.10

विभक्तिवचनव्यवहारनियमाधिकरणम्

(1236. **विभक्तिनियमवार्त्तिकम्**-1)

* अक्षादयस्तृतीयान्ताः परिणापूर्वोक्तस्य यथा न तदयथाद्योतने *

व्याख्याभाष्यम्– अक्षादयस्तृतीयान्ताः परिणा सह समस्यन्त इति वक्तव्यम्। पूर्वोक्तस्य यथा न तत्। अयथाजातीयके द्योत्ये। अक्षेणेदं न तथा वृत्तं यथा पूर्वमिति। अक्षपरि शलाकापरि।

(1237. **वचननियमवार्त्तिकम्**-2)

* अक्षशलाकयोश्चैकवचनान्तयोः *

व्याख्याभाष्यम्– अक्षशलाकयोश्चैकवचनान्तयोरिति वक्तव्यम्। इह मा भूत्—अक्षाभ्यां वृत्तम्, अक्षैर्वृत्तम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1238. व्यवहारनियमवार्त्तिकम्- 3)

*** कितवव्यवहारे च ***

व्याख्याभाष्यम्– कितवव्यवहार इति वक्तव्यम्। इह मा भूत्—अक्षेणेदं न तथा वृत्तं शकटेन यथा पूर्वमिति। अक्षशलाका।।10।।

(230. अव्ययीभावसञ्ज्ञासूत्रम् 2.1.2 आ. 9)

360. विभाषापपरिबहिरञ्चवः पञ्चम्या 2.1.11

योगविभागाधिकरणम्

(1239. वार्त्तिकम्- 1)

*** विभाषेति योगविभागः ***

भाष्यम्– (विभाषेति) योगविभागः कर्तव्यः। 'विभाषा' इत्ययमधिकारः। ततः—'अपपरिबहिरञ्चवः पञ्चम्या' इति।

पञ्चमीग्रहणप्रयोजनाधिकरणम्

प्रत्याख्यानभाष्यम्– अपपरिबहिरञ्चवः पञ्चम्या। पञ्चमीग्रहणं शक्यमकर्तुम्। कथम्? सुबन्ते नेति वर्तते। एतैश्च कर्मप्रवचनीयैर्योगे पञ्चमी विधीयते। तत्रान्तरेणापि पञ्चमीग्रहणं पञ्चम्यन्तेन समासो भविष्यति।

प्रत्याख्यानबाधकभाष्यम्– इदं तर्हि प्रयोजनम्। बहिःशब्देन योगे पञ्चमी न विधीयते तत्रापि यथा स्यात्—बहिर्ग्रामं बहिर्ग्रामात्।

समाधानभाष्यम्– पञ्चमीग्रहणसामर्थ्यात्। विभाषापपरि।।11।।

(231. अव्ययीभावसञ्ज्ञासूत्रम् 2.1.2 आ. 10)

361. आङ् मर्यादाभिविध्योः 2.1.12

प्रत्याख्यानभाष्यम्– मर्यादाभिविधिग्रहणं शक्यमकर्तुम्। कथम्? पञ्चम्येति वर्तते। आङा च कर्मप्रवचनीयेन युक्ते पञ्चमी विधीयते। तयोश्चैवार्थयोराङ् कर्मप्रवचनीयसञ्ज्ञो भवति नान्यत्र। आङ् मर्यादाभिविध्योः।।12।।

(232. अव्ययीभावसञ्ज्ञासूत्रम् 2.1.2 आ. 11)

364. यस्य चायामः 2.1.15

उदाहरणनिरूपणाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– अनुगङ्गं हास्तिनपुरम्। अनुगङ्गं वाराणसी। अनुशोणं पाटलिपुत्रम्।

आक्षेपभाष्यम्– 'यस्य चायाम' इत्युच्यते। गङ्गा चाप्यायता, वाराणस्यप्यायता, तत्र कुत एतत्—गङ्गया सह समासो भविष्यति, नपुनर्वाराणस्येति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– एवं तर्हि 'लक्षणेन' इति वर्तते। गङ्गा चैव लक्षणम् न वाराणसी।

समाधानान्तरभाष्यम्– अथवा 'यस्य चायामः' इत्युच्यते। गङ्गा चाप्यायता वाराणस्यप्यायता। तत्र प्रकर्षगतिर्विज्ञास्यते—'साधीयो यस्यायामः' इति साधीयश्च गङ्गायाः, न वाराणस्याः। यस्य चायामः।।15।।

(233. **अव्ययीभावसञ्ज्ञासूत्रम्** 2.1.2 आ. 12)

265. तिष्ठद्गुप्रभृतीनि च 2.1.16

चकारप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थश्चकारः?

समाधानभाष्यम्– एवकारार्थः—तिष्ठद्गुप्रभृतीन्येव। क्व मा भूत्? परम तिष्ठद्गु।

अर्थविशेषनियमाधिकरणम्

(1240. **वार्त्तिकम्**-1)

*** तिष्ठद्गु कालविशेषे ***

व्याख्याभाष्यम्– तिष्ठद्गु कालविशेष इति वक्तव्यम्। तिष्ठति गावोऽस्मिन्काले स तिष्ठद्गु। वहद्गु।

(1241. **वार्त्तिकम्**-2)

*** खलेयवादीनि प्रथमान्तान्यन्यपदार्थे ***

व्याख्याभाष्यम्– खलेयवादीनि प्रथमान्तान्यन्यपदार्थे समस्यन्त इति वक्तव्यम्। खलेयवम्। खलेबुसम्। लूनयवम्। पूनयवम्। पूयमानयवम्। तिष्ठद्गुप्रभृतीनि च।।16।।

(234. **अव्ययीभावसञ्ज्ञासूत्रम्** 2.1.2 आ. 13)

366 पारेमध्ये षष्ठ्या वा 2.1.17

वावचनप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– वावचनं किमर्थम्?

आक्षेपबाधकभाष्यम्– विभाषा समासो यथा स्यात्। समासेन मुक्ते वाक्यमपि यथा स्यात्—पारं गङ्गाया इति।

आक्षेपसाधकभाष्यम्– नैतदस्ति प्रयोजनम्—प्रकृता महाविभाषा। तया वाक्यमपि भविष्यति।

आक्षेपबाधकभाष्यम्– इदं तर्हि प्रयोजनम्। अव्ययीभावेन मुक्ते षष्ठीसमासो यथा स्यात्—गङ्गापारमिति।

आक्षेपसाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। अयमपि विभाषा, षष्ठीसमासोऽपि, तावुभौ वचनाद्भविष्यतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– अत उत्तरं पठति—

(1242. **वार्त्तिकम्**-1)

* **पारेमध्ये षष्ठ्या वावचनम्** (अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने) *

व्याख्याभाष्यम्– पारेमध्ये षष्ठ्या वेति वक्तव्यम्। अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने। अक्रियमाणे हि वावचने षष्ठीसमासस्याभावः स्याद्। यथैकदेशिप्रधाने। तद्यथा—एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति। किं पुनः कारणमेकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति? समासतद्धितानां वृत्तिर्विभाषा, वृत्तिविषये नित्योऽपवादः। इह पुनर्वावचने क्रियमाणे एकया वृत्तिर्विभाषा, अपरया वृत्तिविषये नित्योऽपवादः।

एकारान्तनिपातनाधिकरणम्

(1243. **वार्त्तिकम्**-2)

* **एकारान्तनिपातनं च** *

व्याख्याभाष्यम्– एकारान्तनिपातनं च कर्तव्यम्। पारेगङ्गमिति।

निपातननिराकरणभाष्यम्– न कर्तव्यम्। सप्तम्या अलुका सिद्धम्।

निपातनावश्यकताभाष्यम्– भवेत् सिद्धं यदा सप्तमी। यदा त्वन्या विभक्तयस्तदा न सिद्ध्यति। पारेमध्ये।।17।।

(235. **अव्ययीभावसञ्ज्ञासूत्रम्** 2.1.2 आ. 14)

368. नदीभिश्च 2.1.19

समाहारमात्रविषयकत्वाधिकरणम्

(1244. **वार्त्तिकम्**-1)

* **नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधः** *

व्याख्याभाष्यम्– नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधो वक्तव्यः। द्वीरावतीको देशः। त्रीरावतीको देशः। 'नदीभिः संख्या' इति प्राप्नोति।

वार्त्तिकप्रत्याख्यानभाष्यम्– न वक्तव्यः। इह कश्चित्समासः पूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। न चात्र पूर्वपदार्थप्राधान्यं गम्यते।

आक्षेपभाष्यम्– ननु च यद्येनोच्यते स तस्यार्थो भवति। अत्र च वयमेताभ्यां पदाभ्यामेतमर्थमुच्यमानं पश्यामः।

आक्षेपबाधकभाष्यम्– एतदेव न जानीमः—यद्येनोच्यते स तस्यार्थ इति। अपि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चान्यपदार्थप्रधानता न कल्पेत—चित्रगुः शबलगुरिति। किं कारणम्? अत्रापि हि वयमेताभ्यां शब्दाभ्यामेतमर्थमुच्यमानं पश्यामः।

आक्षेपसाधकभाष्यम्– यद्यप्येताभ्यां पदाभ्यामेषोऽर्थ उच्यते, अन्यपदार्थोऽपि तु गम्यते। तत्रान्यपदार्थाश्रयो बहुव्रीहिर्भविष्यति।

इहापि तर्हि यद्यप्यन्यपदार्थो गम्यते, स्वपदार्थोऽपि गम्यते। तत्र स्वपदाश्रयोऽव्ययीभावः प्राप्नोति।

समाधानभाष्यम्– एवं तर्हीदमिह सम्प्रधार्यम्—अव्ययीभावः क्रियतां बहुव्रीहिरिति। बहुव्रीहिर्भविष्यति विप्रतिषेधेन।

पूर्वपक्षिभाष्यम्– भवेदेकसञ्ज्ञाधिकारे सिद्धम्, परंकार्यत्वे तु न सिद्ध्यति। आरम्भसामर्थ्यादव्ययीभावः प्राप्नोति, परेकार्यत्वाच्च बहुव्रीहिः।

सिद्धान्तिभाष्यम्– परंकार्यत्वे च न दोषः। नदीभिः संख्यायाः समाहारेऽव्ययीभावो वक्तव्यः। स चावश्यं वक्तव्यः। सर्वमेकनदीतरे।।नदीभिश्च।।19।।

अथ तत्पुरुषप्रकरणम्

(236. द्विगोस्तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 15)

371. द्विगुश्च 2.1.22

आक्षेपभाष्यम्– द्विगोस्तत्पुरुषत्वे कानि प्रयोजनानि?

(1245. समाधानवार्त्तिकम्-1)

*** द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम् ***

व्याख्याभाष्यम्– द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजयन्ति—पञ्चगवं दशगवं पञ्चराजं दशराजम्। द्विगुश्च।।22।।

(237. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 16)

372. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः 2.1.23

न्यूनतापूर्त्यधिकरणम्

(1246. वार्त्तिकम्-1)

*** श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् ***

व्याख्याभाष्यम्– श्रितादिषु गमिगाम्यादीनामुपसंख्यानं कर्तव्यम्। ग्रामं गमी ग्रामगमी ग्रामं गामी ग्रामग्रामी।

तत्पुरुषविधानानर्थक्यपरिहाराधिकरणम्

(1247. वार्त्तिकम्-2)

*** श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– श्रितादिभिरहीनवाचिन्या द्वितीयायाः समासवचनमनर्थकम्। किं कारणम्? बहुव्रीहिकृतत्वात्। इह—यः कष्टं श्रितः, कष्टमनेन श्रितं भवतीति तत्र बहुव्रीहिणा सिद्धम्।

(1248. **बहुव्रीहिवादिवार्त्तिकम्**- 3)

* अहीने द्वितीयास्वरवचनानर्थक्यं च *

व्याख्याभाष्यम्– अहीने द्वितीयापूर्वपदं प्रकृतिस्वरं भवतीत्येतत् स्वरवचनमनर्थकम्। किं कारणम्? बहुव्रीहिकृतत्वादेव।

(1249. **तत्पुरुषवादिवार्त्तिकम्**- 4)

* जातिस्वरप्रसङ्गस्तु *

व्याख्याभाष्यम्– जातिस्वरस्तु प्राप्नोति—ग्रामगतः अरण्यगत इति 'जातिकालसुखादिभ्योनाच्छादनात् क्तोऽकृतमितप्रतिपन्ना' इति।

(1250. **बहुव्रीहिवादिवार्त्तिकम्**- 5)

* तत्र जातादिषु वावचनात्सिद्धम् *

व्याख्याभाष्यम्– यदेतद् 'वा जाते' इति, एतद् 'वा जातादिषु' इति वक्ष्यामि। इमे जातादयो भविष्यन्ति।

आक्षेपभाष्यम्– ननु च भेदो भवति—बहुव्रीहौ सति समासान्तोदात्तत्वेनापि भवितव्यं पूर्वपदप्रकृतिस्वरत्वेनापि। तत्पुरुषत्वे सति पूर्वपदप्रकृतिस्वरत्वेनैव।

आक्षेपबाधकभाष्यम्– नास्ति भेदः। योऽपि हि तत्पुरुषमारभते न तस्य दण्डवारितो बहुव्रीहिः। तत्र तत्पुरुषे सति द्वौ समासौ द्वौ स्वरौ, बहुव्रीहौ सति एकः समासो द्विस्वरत्वम्।

तत्पुरुषसाधकज्ञापकवादिभाष्यम्– एवं तर्हि सिद्धे सति यत्तत्पुरुषं शास्ति, तज्ज्ञापयत्याचार्यः 'समानार्थे केवलं विग्रहभेदाद्यत्र तत्पुरुषः प्राप्नोति बहुव्रीहिश्च, तत्र तत्पुरुष एव भवति'। किमेतस्य ज्ञापने प्रयोजनम्? राज्ञः सखा राजसखः, राजा सखा अस्येति बहुव्रीहिर्न भवति।

बहुव्रीहिसाधकाऽपवादवादिभाष्यम्– नैतज्ज्ञापकसाध्यम्। 'अपवादैरुत्सर्गा बाध्यन्ते' इति बाधकेनानेन भवितव्यं सामान्यविहितस्य विशेषविहितेन। अथ न सामान्यविहितः।

तत्पुरुषसाधकसिद्धान्तिभाष्यम्– यदुच्यते—बहुव्रीहिकृतत्वादिति। एतदयुक्तम्। अस्ति खल्वपि विशेषो बहुव्रीहेस्तत्पुरुषस्य च।

आक्षेपभाष्यम्– किं शब्दकृतः, अथार्थकृतः?

समाधानभाष्यम्– शब्दकृतश्चार्थकृतश्च। शब्दकृतस्तावद्—बहुव्रीहौ सति कपा भवितव्यम्। तत्पुरुषे सति न भवितव्यम्। अर्थकृतः—तत्पुरुषे सति रुहादीनां क्तः कर्तरि भवति धात्वर्थस्यानपवर्गे—आरुढो वृक्षं देवदत्तः। बहुव्रीहौ व्यपवृक्ते कर्मणि भवति—आरूढो वृक्षो देवदत्तेनेति। अन्यथाजातीयकः खल्वपि प्रत्यक्षेणार्थसम्प्रत्ययः अन्यथाजातीयकः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धाद्। राज्ञः सखा राजसखः। सम्बन्धादेतद्गन्तव्यम्—नूनं राजाप्यस्य सखेति। उभयं खल्वपीष्यते—स्वस्ति सोमसखा', 'पुनरेहि गवांसख' इति। द्वितीया श्रिताः।।23।।

(238. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 17)

374. खट्वा क्षेपे 2.1.25

उदाहरणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– खट्वारूढः।

आक्षेपभाष्यम्– क्षेप इत्युच्यते। कः क्षेपो नाम?

समाधानभाष्यम्– अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढव्या। य इदानीमतोऽन्यथा करोति स उच्यते खट्वारूढोऽयं जाल्मो नातिव्रतवान्। खट्वा क्षेपे।।25।।

(239. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 18)

377. अत्यन्तसंयोगे च 2.1.28

(1251. वार्त्तिकम्-1)

* अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तेन समासवचनानर्थक्यम् *

व्याख्याभाष्यम्– अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तान्तेन चाक्तान्तेन च, 'कालाः क्तेन' इत्येतत्समासवचनमनर्थकम्। 'अत्यन्तसंयोग' इत्येव सिद्धम्।

(1252. समाधानवार्त्तिकम्-2)

* अनत्यन्तसंयोगार्थं तु *

व्याख्याभाष्यम्– अनत्यन्तसंयोगार्थं तर्हीदं वक्तव्यम्। षण्मुहूर्ताश्चराचराः। ते कदाचिदहर्गच्छन्ति कदाचिद्रात्रिम्। अहर्गताः रात्रिगताः।

समाधानबाधकभाष्यम्– नैतदस्ति। गतग्रहणादप्येतत्सिद्धम्।

समाधानभाष्यम्– इदं तर्हि—अहरतिसृताः। रात्र्यतिसृताः। मासप्रमितश्चन्द्रमाः। अत्यन्तसंयोगे।।28।।

(240. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 19)

378. तृतीया तत्कृतार्थेन गुणवचनेन 2.1.29

तत्कृतार्थग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– तत्कृतार्थेनेति किमर्थम्?

समाधानभाष्यम्– दध्ना पटुः। घृतेन पटुः।

समाधानबाधकभाष्यम्– नैतदस्ति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। नहि दध्नः पटुना सामर्थ्यम्। केन तर्हि? भुजिना दध्ना भुङ्क्ते पटुरिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानसाधकभाष्यम्– इहापि तर्हि न प्राप्नोति—शङ्कुलाखण्ड: किरिकाण इति। अत्रापि न शङ्कुलाया: खण्डेन सामर्थ्यम्। केन तर्हि? करोतिना। शङ्कुलया कृत: खण्ड इति।

समाधानबाधकभाष्यम्– वचनाद्भविष्यति।

समाधानसाधकभाष्यम्– इहापि तर्हि वचनात्प्राप्नोति—दध्ना पटु: घृतेन पटुरिति। तस्मात्तत्कृतार्थग्रहणं कर्तव्यम्।

गुणवचनग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– गुणवचनेनेति किमर्थम्?

समाधानभाष्यम्– गोभिर्वपावान्। धान्येन धनवान्।

आक्षेपभाष्यम्– किं पुनरिहोदाहरणम्?

समाधानभाष्यम्– शङ्कुलाखण्डो देवदत्त इति।

आक्षेपभाष्यम्– कथं पुनर्गुणवचनेन समास उच्यमानो द्रव्यवचनेन स्यात्?

समाधानभाष्यम्– इह 'तृतीया तत्कृतार्थेन गुणेन' इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यद्वचनग्रहणं करोति तस्यैतत्प्रयोजनम्—एवं यथा विज्ञायेत—'गुणमुक्तवता गुणवचनेन' इति।

आक्षेपभाष्यम्– कथं पुनरयं गुणवचन: सन् द्रव्यवचन: सम्पद्यते?

समाधानभाष्यम्– आरभ्यते तत्र मतुब्लोप:—'गुणवचनेभ्यो मतुपो लुग्' इति। तद्यथा—शुक्लगुण: शुक्ल:, कृष्णगुण: कृष्ण:। एवं खण्डगुण: खण्ड:।

लाघवभाष्यम्– यद्येवं, नार्थस्तत्कृतार्थग्रहणेन। भवति हि शङ्कुलाया: खण्डेन सामर्थ्यम्। असामर्थ्याच्चात्र न भविष्यति दध्ना पटुर्घृतेन पटुरिति। तस्मान्नार्थस्तत्कृतार्थग्रहणेन।

अर्थपदस्य शब्दपरत्वाधिकरणम्

(1253. आक्षेपवार्त्तिकम्-1)

*** तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् ***

व्याख्याभाष्यम्– तृतीयासमासेऽर्थग्रहणमनर्थकम्। किं कारणम्? अर्थगतिर्ह्यवचनात्। अन्तरेणापि वचनमर्थगतिर्भविष्यति।

(1254. आक्षेपसाधकवार्त्तिकम्-2)

*** निर्देश्यमिति चेत् तृतीयार्थनिर्देशोऽपि ***

व्याख्याभाष्यम्– अथैवमपि निर्देश: कर्तव्य इति चेत् तृतीयार्थनिर्देशोऽपि कर्तव्य: स्यात्—'तृतीया तदर्थकृतार्थेन' इति वक्तव्यम्।

तटस्थाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

सिद्धान्तिसमाधानभाष्यम्– न वक्तव्यम्। नायमर्थनिर्देश:। किं तर्हि? योगाङ्गमिदं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दिश्यते। सति च योगाङ्गे योगविभागः करिष्यते—'तृतीया तत्कृतेन गुणवचनेन' समस्यते। ततः—'अर्थेन' अर्थशब्देन च तृतीया समस्यते। धान्यार्थः वसनार्थः हिरण्यार्थः। 'पूर्वसदृशसमोनार्थ' इत्यर्थग्रहणं न कर्तव्यं भवतीति। तृतीया।।29।।

(241. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 20)

379. पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः 2.1.30

न्यूनतापूर्त्यधिकरणम्

(1255. **वार्त्तिकम्**-1)

* पूर्वादिष्ववरस्योपसंख्यानम् *

व्याख्याभाष्यम्– पूर्वादिष्ववरस्योपसंख्यानं कर्तव्यम्। मासावरोऽयं संवत्सरावरोयम्।

सदृशग्रहणप्रत्याख्यानाधिकरणम्

सदृशग्रहणप्रत्याख्यानभाष्यम्– सदृशग्रहण उक्तम्। किमुक्तम्। 'सदृशग्रहणमनर्थकं तृतीयासमासवचनात्' 'षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम्' इति। पूर्वसदृश।।30।।

(242. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 21)

380. कर्तृकरणे कृता बहुलम् 2.1.31

अनिष्टवारणाधिकरणम्

(1256. **आक्षेपवार्त्तिकम्**-1)

* कर्तृकरणे कृता क्तेन *

व्याख्याभाष्यम्– कर्तृकरणे कृता क्तेनेति वक्तव्यम्—अहिहतः। नखनिर्भिन्नः। दात्रलूनम्। परशुच्छिन्नम्। कृता क्तेनेति किमर्थम्? इह मा भूत्। दात्रेण लूनवान् परशुना छिन्नवान्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। बहुलवचनात्सिद्धम्। कर्तृकरणे।। 31।।

(243. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 22)

381. कृत्यैरधिकार्थवचने 2.1.32

इष्टानुपपत्तिपरिहाराधिकरणम्

(1257. **वार्त्तिकम्**-1)

* कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यते *

व्याख्याभाष्यम्– कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यत इति वक्तव्यम्। बुसोपेन्ध्यं तृणोपेन्ध्यं घनघात्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1258. वार्त्तिकम्-2)

*** साधनं कृतेति वा पादहारकाद्यर्थम् ***

व्याख्याभाष्यम्– अथवा साधनं कृता समस्यत इति वक्तव्यम्। किं प्रयोजनम्? पादहारकाद्यर्थम्। पादाभ्यां ह्रियते पादहारक:। गले चोप्यते गलेचोपक:। कृत्यैरधि।।32।।

(244. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 23)

382. अन्नेन व्यञ्जनम् 2.1.33

(245. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 24)

383. भक्ष्येण मिश्रीकरणम् 2.1.34

इष्टानुपपत्तिपरिहाराधिकरणम्

(1259. आक्षेपवार्त्तिकम्-1)

*** अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमास:** (कारकाणां क्रियासमर्थत्वात्) *

व्याख्याभाष्यम्– 'अन्नेन व्यञ्जनम्' 'भक्ष्येण मिश्रीकरणम्' इत्यसमर्थसमासोऽयं द्रष्टव्य:। किं कारणम्? कारकाणां क्रियासमर्थत्वात्। कारकाणां क्रियया सामर्थ्यमस्ति, न तेषामन्योऽन्येन। तद्यथा—निश्रयण्या द्वाभ्यां काष्ठाभ्यां सामर्थ्यं न तेषामन्योऽन्येन।

एकदेशिसमाधानभाष्यम्– एवं तर्ह्याहायम्—'अन्नेन व्यञ्जनम्' 'भक्ष्येण मिश्रीकरणम्' इति। न चास्ति सामर्थ्यम्। तत्र वचनात्समासो भविष्यति।

(1260. समाधाननिराकरणवार्त्तिकम्-2)

*** वचनप्रामाण्यादिति चेद् नानाकारकाणां प्रतिषेध: ***

व्याख्याभाष्यम्– वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधो वक्तव्य:। तिष्ठु दध्ना ओदनो देवदत्तेन भुज्यत इति।

(1261. न्यासान्तरेणसमाधानवार्त्तिकम्-3)

*** सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च ***

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? समानाधिकरणाधिकारे वक्तव्यम्— 'क्तान्तस्तृतीयापूर्वपद: समस्यते सुपा, उत्तरपदस्य च लोपो भवति' इति। दध्ना उपसिक्त: दध्युपसिक्त:। दध्युपसिक्त: ओदनो दध्योदन:। गुडेन संसृष्टा:=गुडसंसृष्टा:। गुडसंसृष्टा धाना:=गुडधाना:।

(1262. वार्त्तिकम्-4)

*** षष्ठीसमासश्च युक्तपूर्णान्त: ***

व्याख्याभाष्यम्– षष्ठीसमासश्च युक्तपूर्णान्त: समस्यते, उत्तरपदस्य च लोपो वक्तव्य:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वानां युक्तोऽश्वयुक्तः अश्वयुक्तो रथोऽश्वरथः। दध्नः पूर्णो दधिपूर्णः दधिपूर्णो घटो दधिघटः।

प्रत्याक्षेपभाष्यम्– तत्तर्हीदं बहु वक्तव्यम्?

(1263. **समाधानवार्त्तिकम्**-5)

*** नवाऽसमासेऽदर्शनात् ***

व्याख्याभाष्यम्– न वा वक्तव्यम्। किं कारणम्? असमासेऽदर्शनात्। यद्ध्यसमासे दृश्यते समासे च न दृश्यते तद्धि लोपारम्भं प्रयोजयति। न चासमासे उपसिक्तशब्दः संसृष्टशब्दो युक्तशब्दः पूर्णशब्दो वा दृश्यते।

वार्त्तिकावतरणभाष्यम्– कथं तर्हि सामर्थ्यं गम्यते?

(1264. **समाधानसाधकवार्त्तिकम्**-6)

*** युक्तार्थसम्प्रत्ययाच्च सामर्थ्यम् ***

व्याख्याभाष्यम्– दध्ना युक्तार्थता सम्प्रतीयते।

वार्त्तिकावतरणभाष्यम्– कथं पुनर्ज्ञायते—दध्ना युक्तार्थता सम्प्रतीयत इति?

(1265. **समाधानसाधकवार्त्तिकम्**-7)

* **सम्प्रत्ययाच्च तदर्थाध्यवसानम्** (सम्प्रतीयमानार्थलोपे ह्यनवस्था) *

व्याख्याभाष्यम्– सम्प्रत्ययाच्च तदर्थोऽध्यवसीयते। अवश्यं चैतदेवं विज्ञेयम्। सम्प्रतीयमानार्थलोपे ह्यनवस्था। यो हि मन्यते सम्प्रतीयमानार्थानां शब्दानां लोपो भवतीति। अनवस्था तस्य लोपस्य स्यात्। दधीत्युक्ते बहवोऽर्था गम्यन्ते मन्दकमुत्तरकं निलीनकमिति। तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात्। तथा गुड इत्युक्ते, मधुरशब्दस्य, शृङ्गवेरमिति च कटुकशब्दस्य। अन्तरेणापि खलु शब्दप्रयोगं बहवोऽर्था गम्यन्तेक्षिनिकोचैः पाणिविहारैश्च। तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात्। अन्नेन।।33।। भक्ष्येण।।34।।

(246. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 25)

384. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः 2.1.35

पाणिनीयन्यासेदूषणाधिकरणम्

आक्षेपभाष्यम्– किं चतुर्थ्यन्तस्य तदर्थमात्रेण समासो भवति?

इष्टापत्तिभाष्यम्– एवं भवितुमर्हति।

(1266. **दूषणवार्त्तिकम्**-1)

*** चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोविशेषात् ***

व्याख्याभाष्यम्– चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गः सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह समासः प्राप्नोति। अनेनापि प्राप्नोति—रन्धनाय स्थाली अवहननायोलूखलमिति। किं कारणम्? अविशेषात्। नहि कश्चिद्विशेष उपादीयते—एवंजातीयकस्य चतुर्थ्यन्तस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदर्थेन सह समासो भवतीति। अनुपादीयमानविशेषे सर्वप्रसङ्गः।

(1267. **दूषणवार्त्तिकम्**-2)

* बलिरक्षिताभ्यां चानर्थकं वचनम् *

व्याख्याभाष्यम्– बलिरक्षिताभ्यां च समासवचनमनर्थकम्। यो हि महाराजाय बलिः स महाराजार्थो भवति। तत्र तदर्थ इत्येव सिद्धम्।

पूर्वाचार्यन्यासेदूषणाधिकरणम्

पूर्वाचार्यन्यासभाष्यम्– यदि पुनर् 'विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यते' इत्येतल्लक्षणं क्रियेत।

(1268. **दूषणवार्त्तिकम्**-3)

* विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम् *

व्याख्याभाष्यम्– 'विकृतिः प्रकृत्या' इति चेदश्वघासादीनामुपसंख्यानं कर्तव्यम्। अश्वघासः श्वश्रूसुरं हस्तिविधेति।

(1269. **वार्त्तिकम्**-4)

* अर्थेन नित्यसमासवचनम् *

व्याख्याभाष्यम्– अर्थशब्देन नित्यं समासो वक्तव्यः। ब्राह्मणार्थं क्षत्रियार्थम्।

आक्षेपभाष्यम्– किं विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यत इत्यतोऽर्थेन नित्यसमासो वक्तव्यः?

समाधानभाष्यम्– नेत्याह। सर्वथाऽर्थेन नित्यसमासो वक्तव्यः विग्रहो मा भूदिति।

(1270. **द्वितीयखण्डवार्त्तिकम्**-5)

* सर्वलिङ्गता च *

व्याख्याभाष्यम्– सर्वलिङ्गता च वक्तव्या। ब्राह्मणार्थं पयः ब्राह्मणार्थः सूपः ब्राह्मणार्था यवागूरिति।

आक्षेपभाष्यम्– किमर्थेन नित्यसमास उच्यते इत्यतः सर्वलिङ्गता वक्तव्याः?

समाधानभाष्यम्– नेत्याह। सर्वथा सर्वलिङ्गता वक्तव्या। किं कारणम्? अर्थशब्दोऽयं पुल्लिङ्गः, उत्तरपदार्थप्रधानश्च तत्पुरुषः, तेन पुल्लिङ्गस्यैव समासस्याभिधानं स्यात् स्त्रीनपुंसकलिङ्गस्य न स्यात्।

आक्षेपभाष्यम्– तत्तर्हीदं बहु वक्तव्यम्। 'विकृतिः प्रकृत्येति वक्तव्यम्'। 'अश्वघासादीनामुपसंख्यानं कर्तव्यम्'। 'अर्थेन नित्यसमासो वक्तव्यः सर्वलिङ्गता च वक्तव्या।'

समाधानभाष्यम्– न वक्तव्यम्। यत्तावदुच्यते—'विकृतिः प्रकृत्येति वक्तव्यम्' इति। न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति—'विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यते' इति। यदयं बलिरक्षितग्रहणं करोति। कथं कृत्वा ज्ञापकम्? यथाजातीयकानां समासे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलिरक्षितग्रहणेनार्थः तथाजातीयकानां समासः। यदि च विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यते न तदर्थमात्रेण। ततो बलिरक्षितग्रहणमर्थवद्भवति।

द्वितीयवार्त्तिकप्रत्याख्यानभाष्यम्– यदप्युच्यते—'अश्वघासादीनामुपसंख्यानं कर्तव्यम्' इति। न कर्तव्यम्। अश्वघासादयः षष्ठीसमासा भविष्यन्ति। यद्धि यदर्थं भवति अयमपि तत्राभिसम्बन्धो भवति—'अस्येदम्' इति। तद्यथा—गुरोरिदं—गुर्वर्थमिति।

आक्षेपभाष्यम्– ननु च स्वरे भेदो भवति—चतुर्थीसमासे सति पूर्वपदप्रकृतिस्वरत्वेन भवितव्यम्। षष्ठीसमासे सति पुनरन्तोदात्तत्वेन।

समाधानभाष्यम्– नास्ति भेदः। चतुर्थीसमासेऽपि सत्यन्तोदात्तत्वेनैव भवितव्यम्। कथम्? आचार्यप्रवृत्तिर्ज्ञापयति—'विकृतिश्चतुर्थ्यन्ता प्रकृतिस्वरा भवति, न चतुर्थीमात्रम्' इति। यदयं 'चतुर्थी तदर्थे' 'अर्थे' 'क्ते च' इत्यर्थग्रहणं क्तग्रहणं च करोति। कथं कृत्वा ज्ञापकम्? यथाजातीयकानां प्रकृतिस्वरत्वेऽर्थग्रहणेन क्तग्रहणेन चार्थः, तथाजातीयकानां प्रकृतिस्वरत्वम्। यदि च विकृतिश्चतुर्थ्यन्ता प्रकृत्या भवति न चतुर्थीमात्रम्, ततोऽर्थग्रहणं क्तग्रहणं चार्थवद्भवति।

तृतीयवार्त्तिकप्रत्याख्यानभाष्यम्– यदप्युच्यते—'अर्थेन नित्यसमासो वक्तव्यः' इति। न वक्तव्यः। सर्थप् प्रत्ययः करिष्यते। किं कृतं भवति? न चैव हि कदाचित्प्रत्ययेन विग्रहो भवति। अपि च सर्वलिङ्गता सिद्धा भवति।।

आक्षेपभाष्यम्– यदि सर्थप् प्रत्ययः क्रियते, इत्सञ्ज्ञा न प्राप्नोति। अथापि कथञ्चि-दित्सञ्ज्ञा स्यात्, एवमपि श्र्यर्थं भ्र्वर्थम् 'अङ्गस्य' इतीयङुवङौ स्याताम्।

समाधानभाष्यम्– एवं तर्हि बहुव्रीहिर्भविष्यति। किं कृतं भवति? भवति वै कश्चि-दस्वपदविग्रहो बहुव्रीहिः। तद्यथा—शोभनं मुखमस्याः सुमुखीति।

आक्षेपभाष्यम्– नैवं शक्यम्। इह हि महदर्थमित्यात्त्वकपौ प्रसज्येयाताम्।

समाधानभाष्यम्– एवं तर्हि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः करिष्यते। किं कृतं भवति? न चैव हि कदाचिदादेशेन विग्रहो भवति। अपि च सर्वलिङ्गता सिद्धा भवति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। योगविभागः करिष्यते—'चतुर्थी' सुबन्तेन सह समस्यते। ततः—'तदर्थार्थ' तदर्थस्य चोत्तरपदस्यार्थशब्द आदेशो भवति।

आक्षेपभाष्यम्– इहापि तर्हि समासः प्राप्नोति—छात्राय रुचितं छात्राय स्वदितमिति।

समाधानभाष्यम्– आचार्यप्रवृत्तिर्ज्ञापयति—'तादर्थ्ये या चतुर्थी सा समस्यते, न चतुर्थीमात्रम्' इति। यदयं हितसुखग्रहणं करोति। कथं कृत्वा ज्ञापकम्? यथाजातीयकानां समासे हितसुखग्रहणेनार्थस्तथाजातीयकानां समासः। यदि च तादर्थ्ये या चतुर्थी सा समस्यते, न चतुर्थीमात्रम्, ततो हितसुखग्रहणमर्थवद्भवति।

आक्षेपभाष्यम्– इहापि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः प्राप्नोति—यूपाय दारु यूपदारु।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– वा च विधास्यते।

आक्षेपभाष्यम्– इहापि तर्हि विभाषा प्राप्नोति—ब्राह्मणार्थं क्षत्रियार्थमिति।

समाधानभाष्यम्– एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'प्रकृतिविकृत्योर्य: समास: तत्र तदर्थस्योत्तरपदस्य वाऽर्थशब्द आदेशो भवति अन्यत्र नित्य:, इति। यदयं बलिरक्षितग्रहणं करोति।

आक्षेपभाष्यम्– एवं तर्हि—'उदकार्थो वीवध:' स्थानिवद्भावादुदभाव: प्राप्नोति। तस्मान्नैवं शक्यम्। न चेदेवम्, 'अर्थेन नित्यसमासो वक्तव्य:' 'सर्वलिङ्गता च'।

समाधानभाष्यम्– नैष दोष:। इदं तावदयं प्रष्टव्य:—अथेह 'ब्राह्मणेभ्य:' इति कैषा चतुर्थी? तादर्थ्य इत्याह। यदि तादर्थ्ये चतुर्थी, अर्थशब्दस्य प्रयोगेण न भवितव्यम्—उक्तार्थानामप्रयोग इति।

आक्षेपभाष्यम्– समासोऽपि न प्राप्नोति।

समाधानभाष्यम्– वचनात्समासो भविष्यति।

चतुर्थवार्त्तिकप्रत्याख्यानभाष्यम्– यदप्युच्यते—'सर्वलिङ्गता वक्तव्या' इति। न वक्तव्या। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य। चतुर्थी।।35।।

(247. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 26)

385. पञ्चमी भयेन 2.1.36

न्यूनतापरिहाराधिकरणम्

वार्त्तिकावतरणभाष्यम्– अत्यल्पमिदमुच्यते—'भयेन' इति।

(1271. वार्त्तिकम्-1)

*** भयभीतभीतिभीभि: ***

भाष्यम्– भयभीतभीतिभीभिरिति वक्तव्यम्। वृकाद्भयं वृकभयम्। वृकाद्भीत: वृकभीत:। वृकाद्भीति: वृकभीति:। वृकाद्भी: वृकभीरिति।

भाष्यम-अपर आह—

(1272. वार्त्तिकन्यासान्तरम्-2)

*** भयनिर्गतजुगुप्सुभि: ***

भाष्यम्– भयनिर्गतजुगुप्सुभिरिति वक्तव्यम्। वृकभयं ग्रामनिर्गत: अधर्मजुगुप्सु:। पञ्चमी भयेन।।36।।

(248. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 27)

388. सप्तमी शौण्डै: 2.1.39

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यूनताशङ्कापरिहाराधिकरणम्

(1272. **वार्त्तिकम्**-1)

*** शौण्डादिभिः ***

व्याख्याभाष्यम्– शौण्डादिभिरिति वक्तव्यम्। इहापि यथा स्याद् अक्षधूर्तः स्त्रीधूर्तः अक्षकितवः स्त्रीकितव इति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। बहुवचननिर्देशाच्छौण्डादिभिरिति विज्ञास्यते। सप्तमी शौण्डैः।।39।।

(249. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 28)

390. ध्वाङ्क्षेण क्षेपे 2.1.41

इष्टानुपपत्तिपरिहाराधिकरणम्

(1273. **वार्त्तिकम्**-1)

*** ध्वाङ्क्षेणेत्यर्थग्रहणम् ***

व्याख्याभाष्यम्– ध्वाङ्क्षेण क्षेपेऽर्थग्रहणं कर्तव्यम्। इहापि यथा स्यात्—तीर्थकाक इति।

आक्षेपभाष्यम्– क्षेप इत्युच्यते। क इह क्षेपो नाम?

समाधानभाष्यम्– यथा तीर्थकाका न चिरं स्थातारो भवन्ति। एवं यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति।। ध्वाङ्क्षेण।।41।।

(250. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.2 आ. 29)

391. कृत्यैर्ऋणे 2.1.42

इष्टानुपपत्तिपरिहाराधिकरणम्

(1274. **वार्त्तिकम्**-1)

*** कृत्यैर्नियोगे यद्ग्रहणम् ***

व्याख्याभाष्यम्– कृत्यैर्नियोगे यत्प्रत्ययेनेति वक्तव्यम्। इहापि यथा स्यात्—पूर्वाह्णेगेयं साम, प्रातरध्येयोऽनुवाक इति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। ऋण इत्येव सिद्धम्। इह यद्यस्य नियोगतः कार्यम्, ऋणं तस्य तद्भवति। तत्र ऋण इत्येव सिद्धम्।

अभ्युपगमभाष्यम्– यद्ग्रहणं च कर्तव्यम्। इह मा भूत्पूर्वाह्णे दातव्या भिक्षेति।। कृत्यैः।।42।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(251. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 30)

395. क्षेपे 2.1.46

उदाहरणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– अवतप्तेनकुलस्थितं त एतत्।

आक्षेपभाष्यम्– क्षेप इत्युच्यते क इह क्षेपो नाम?

समाधानभाष्यम्– यथा अवतप्ते नकुलाः न चिरं स्थातारो भवन्ति, एवं कार्याण्यारभ्य यो न चिरं तिष्ठति स उच्यते 'अवतप्तेनकुलस्थितं त एतद्' इति।

आक्षेपभाष्यम्– क्षेप सप्तम्यन्तं क्तान्तेन सह समस्यत इत्युच्यते तत्र ते सगतिकेन सनकुलेन च समासो न प्राप्नोति।

समाधानभाष्यम्–

*** क्षेपे सगतिकसकारकसमासे उक्तम् ***

किमुक्तम्? 'कृद्ग्रहणे गतिकारकपूर्वस्यापि-' इति।। क्षेपे।।46।।

(251. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 31)

396. पात्रेसमितादयश्च 2.1.47

चकारप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थश्चकारः?

समाधानभाष्यम्– एवकारार्थः पात्रेसमितादय एव। क्व मा भूत्? परमं पात्रे समिता इति। पात्रेसमि।।47।।

(252. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.2 आ. 32)

397. पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन 2.1.48

एकनदीशब्देऽव्ययीभाववारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मादव्ययीभावो न भवति—एका नदी एकनदी 'नदीभिः संख्या' इति प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। इह कश्चित्समासः पूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। न चात्र पूर्वपदार्थप्राधान्यं गम्यते।

अथ वाऽव्ययीभावः क्रियताम्, तत्पुरुष इति, तत्पुरुषो भविष्यति विप्रतिषेधेन।

आक्षेपभाष्यम्– भवेदेकसञ्ज्ञाधिकारे सिद्धम्। परंकार्यत्वे तु न सिद्ध्यति। आरम्भ-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामर्थ्याच्चाव्ययीभावः प्राप्नोति, परंकार्यत्वाच्च तत्पुरुषः प्राप्नोति।

समाधानभाष्यम्– परं कार्यत्वे च न दोषः। कथम्? नदीभिः समाहारेऽव्ययीभावो वक्तव्यः। स चावश्यं वक्तव्यः। सर्वमेकनदीतरे। पूर्वका।।48।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्

●

द्वितीयेऽध्याये प्रथमे पादे तृतीयमाह्निकम्

(254. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 1)

399. तद्धितार्थोत्तरपदसमाहारे च 2.1.50

समाहारशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– समाहार इति कोऽयं शब्दः?

समाधानभाष्यम्– समाङ्पूर्वाद्धरतेः कर्मसाधनो घञ्—समाह्रियते समाहार इति।

आक्षेपभाष्यम्– यदि कर्मसाधनः, पञ्च कुमार्यः समाहृताः पञ्चकुमारि दशकुमारि 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वं न प्राप्नोति। 'द्विगुरेकवचनम्' इत्येतच्च वक्तव्यम्।

समाधानभाष्यम्– एवं तर्हि भावसाधनो भविष्यति—समाहरणं समाहारः।

आक्षेपभाष्यम्– अथ भावसाधने सति किमभिधीयते?

समाधानभाष्यम्– यत्तदौत्तराधर्यम्?

आक्षेपभाष्यम्– कः पुनर्गवां समाहारः।

समाधानभाष्यम्– यत्तदर्जनं क्रयणं भिक्षणमपहरणं वा।

आक्षेपभाष्यम्– यद्येवं विक्षिप्तेषु पूलेषु, गोषु चरन्तीषु न सिद्ध्यति।

समाधानभाष्यम्– एवं तर्हि समभ्याशीकरणं समाहारः।

आक्षेपभाष्यम्– एवमपि पञ्चग्रामी षण्णगरी त्रिपुरीति न सिद्ध्यति। किं कारणम्? समेकत्ववाची, आङाभिमुख्ये वर्तते, हरतिर्देशान्तरप्रापणे।

समाधानभाष्यम्– नावश्यं हरतिर्देशान्तरप्रापण एव वर्तते। किं तर्हि? सादृश्येऽपि वर्तते। यद्यथा—मातुरनुहरति पितुरनुहरतीति।

समाधानान्तरभाष्यम्– अथवा पञ्चग्रामी षण्णगरी त्रिपुरीति। नैवेदमियत्येवावतिष्ठते। अवश्यमसौ ततः किञ्चिदाकाङ्क्षति क्रियां गुणं वा। यदाकाङ्क्षति तदेकं, स च समाहारः।

आक्षेपभाष्यम्– अयं तर्हि भावसाधने सति दोषः—'पञ्चफली आनीयताम्' इति भावानयने चोदिते द्रव्यानयनं न प्राप्नोति।

समाधातुं प्रश्नभाष्यम्– नैष दोषः। इदं तावदयं प्रष्टव्यः—'अथेह 'गौरनुबन्ध्योऽजोऽग्नीषोमीयः' इति कथमाकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनानि क्रियन्ते' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्देयप्रश्नोत्तरभाष्यम्– 'असम्भवाद्' आकृतौ आरम्भणादीनां सम्भवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादीनि क्रियन्ते।

प्रश्नोत्तरस्यैव स्वार्थसाधकताभाष्यम्– इदमप्येवंजातीयकमेव। असम्भवाद्भावानयनस्य द्रव्यानयनं भविष्यति। अथवा—अव्यतिरेकाद् द्रव्याकृत्योः।

सूत्रन्यासविचाराधिकरणम्

आक्षेपभाष्यम्– किं पुनर्द्विगुसञ्ज्ञा प्रत्ययोत्तरपदयोर्भवति?

अभ्युपगमभाष्यम्– एवं भवितुमर्हति।

(1275. अभ्युपगमे दोषवार्त्तिकम्- 1)

* द्विगुसञ्ज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः *

व्याख्याभाष्यम्– द्विगुसञ्ज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता? द्विगुसञ्ज्ञानिमित्ते प्रत्ययोत्तरपदे। प्रत्ययोत्तरपदनिमित्ता च द्विगुसञ्ज्ञा। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

समाधानभाष्यम्– एवं तर्हि 'अर्थे' इति वक्ष्यामि।

(1276. वार्त्तिकम्- 2)

* अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत् *

व्याख्याभाष्यम्– अर्थे चेत्तद्धितोत्पत्तिर्न प्राप्नोति। द्वैमातुरः। त्रैमातुरः। पाञ्चनापितिः। किं कारणम्? द्विगुनोक्तत्वात्। बहुव्रीहिवत्। तद्यथा—चित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति।

न्यासान्तरभाष्यम्– एवं तर्हि 'समासतद्धितविधौ' इति वक्ष्यामि।

(1277. वार्त्तिकम्- 3)

* समासतद्धितविधाविति चेदन्यत्र समाससञ्ज्ञाभावः *

व्याख्याभाष्यम्– समासतद्धितविधाविति चेदन्यत्र समाससञ्ज्ञा न प्राप्नोति। क्वान्यत्र? स्वरे। पञ्चारत्निः दशारत्निः 'इगन्ते द्विगौ' इत्येष स्वरो न प्राप्नोति।

(1278. समाधानवार्त्तिकम्- 4)

* सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् *

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? प्रत्ययोत्तरपदयोश्चेति वचनात्। प्रत्ययोत्तरपदयोर्द्विगुसञ्ज्ञा भवतीति वक्तव्यम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'द्विगुसञ्ज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः' इति।

समाधानभाष्यम्– नैष दोषः। इतरेतराश्रयमात्रमेतच्चोदितम्। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि—'सिद्धं तु नित्यशब्दत्वाद्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्– नेदं तुल्यमन्यैरितरेतराश्रयैः। नहि सञ्ज्ञा नित्या।

समाधानसाधकभाष्यम्– एवं तर्हि भाविनी सञ्ज्ञा विज्ञास्यते। तद्यथा। कश्चित्कञ्चित्तन्तुवायमाह—'अस्य सूत्रस्य शाटकं वय' इति। स पश्यति—'यदि शाटकः न वातव्यः। अथवातव्यो न शाटकः। वातव्यः शाटकश्चेति विप्रतिषिद्धं भवति। भाविनी खल्वस्य सञ्ज्ञाभिप्रेता। स मन्ये वातव्यः यस्मिन्नुते 'शाटक' इत्येतद्भवति' इति। एवमिहापि तस्मिन् द्विगुर्भवति यस्याभिनिर्वृत्तस्य प्रत्यय उत्तरपदमिति चैते सञ्ज्ञे भवष्यितः।

अभ्युपगमभाष्यम्– अथवा पुनरस्तु—'अर्थे' इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवद्' इति।

समाधानभाष्यम्– नैष दोषः। नावश्यमर्थशब्दोऽभिधेय एव वर्तते। किं तर्हि? स्यादर्थेऽपि वर्तते। तद्यथा—दारार्थं घटामहे। धनार्थं भिक्षामहे। दारा नः स्युः। धनानि नः स्युरिति। एवमिहापि तद्धितार्थे द्विगुर्भवतीति तद्धितः स्यादिति।

(1279. **वार्त्तिकम्**- 5)

⁕ द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः ⁕

व्याख्याभाष्यम्– अथवा यदयं 'द्विगोर्लुगनपत्ये' इति द्विगोरुत्तरस्य तद्धितस्य लुकं शास्ति तज्ज्ञापयत्याचार्यः—'उत्पद्यते द्विगोस्तद्धितः' इति।

समाहारग्रहणसार्थक्याधिकरणम्

(1280. **वार्त्तिकम्**- 6)

⁕ समाहारसमूहयोरविशेषात्समाहारग्रहणानर्थक्यं तद्धितार्थेन कृतत्वात् ⁕

व्याख्याभाष्यम्– समाहारः समूह इत्यविशिष्टावेतावर्थौ। समाहारसमूहयोरविशेषात्समाहारग्रहणमनर्थकम्। किं कारणम्। तद्धितार्थेन कृतत्वात्। 'तद्धितार्थे द्विगुः' इत्येवमत्र द्विगुर्भविष्यति।

आक्षेपभाष्यम्– यदि 'तद्धितार्थे द्विगुः' इत्येवमत्र द्विगुर्भविष्यति, तद्धितोत्पत्तिः प्राप्नोति।

आक्षेपबाधकभाष्यम्– उत्पद्यताम्। लुक् भविष्यति।

आक्षेपसाधकभाष्यम्– लुक्कृतानि प्राप्नुवन्ति। कानि? पञ्चपूली दशपूली 'अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति प्रतिषेधः प्राप्नोति।

पञ्चगवं दशगवम् 'गोरतद्धितलुकि' इति टच् न प्राप्नोति।

समाधानभाष्यम्– नैष दोषः अविशेषेण 'द्विगोर्ङीब् भवति' इत्युक्त्वा 'अपरिमाणविस्ताचितकम्बल्येभ्यः समाहारे' इति वक्ष्यामि तन्नियमार्थं भविष्यति 'समाहार एव नान्यत्र' इति। गोरकारो द्विगोः समाहारे।

अविशेषेण 'गोष्ठज् भवति' इत्युक्त्वा 'द्विगोः समाहारे' इति वक्ष्यामि तन्नियमार्थं भविष्यति—'समाहार एव नान्यत्र' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1281. वार्त्तिकम्-7)

*** अभिधानार्थं तु ***

व्याख्याभाष्यम्– अभिधानार्थं तु समाहारग्रहणं कर्तव्यम्। समाहारेणाभिधानं यथा स्यात्, तद्धितार्थेन मा भूदिति। किं च स्यात्? तद्धितोत्पत्तिः प्रसज्येत।

अतिप्रसङ्गबाधकभाष्यम्– उत्पद्यताम्। लुग् भविष्यति।

लुकिदूषणभाष्यम्– लुक्कृतानि प्राप्नुवन्ति।

लुकिदूषणपरिहारभाष्यम्– सर्वाणि परिहृतानि।

दूषणपरिहारबाधकभाष्यम्– न सर्वाणि परिहृतानि। पञ्चकुमारि दशकुमारि 'लुक् तद्धितलुकि' इति ङीपो लुक् प्रसज्येत।

अवान्तरसमासविधानाधिकरणम्

(1282. विधानान्तरवार्त्तिकम्-8)

*** द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ***

भाष्यम्– द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासो वक्तव्यः। वागदृषदप्रियः। छत्रोपानहप्रियः। पञ्चगवप्रियः। दशगवप्रियः। किं प्रयोजनम्? समुदायवृत्ताववयवानां मा कदाचिदवृत्तिर्भूदिति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च। यदा वृत्तिपक्षः तदा सर्वेषामेव वृत्तिः। यदाऽवृत्तिः पक्षः तदा सर्वेषामवृत्तिः।

(1283. बहुनांन्ततपुरुषविधायकवार्त्तिकम्-9)

*** उत्तरपदेन परिमाणिना द्विगोः समासवचनम् ***

भाष्यम्– उत्तरपदेन परिमाणिना द्विगोः समासो वक्तव्यः। द्वौ मासौ जातस्य यस्य सः द्विमासजातः त्रिमासजातः। किं पुनः कारणं न सिद्ध्यति। सुप्सुपेति वर्तते।

विग्रहान्तरेण विधानवैयर्थ्यभाष्यम्– एवं तर्हि इदं स्यात्—द्वौ मासौ द्विमासं द्विमासं जातस्येति।

विग्रहान्तरदूषणभाष्यम्– नैवं शक्यम्। स्वरे हि दोषः स्यात्। द्विमासजात इति प्राप्नोति। द्विमासजात इति चेष्यते।

दूषणान्तरभाष्यम्– द्व्यह्नजातश्च न सिद्ध्यति। द्व्यहजात इति प्राप्नोति।

आक्षेपभाष्यम्– न चैवं भवितव्यम्?

समाधानभाष्यम्– भवितव्यं च यदा समाहारे द्विगुः। द्व्यह्नजातस्तु न सिद्ध्यति।

आक्षेपभाष्यम्– किमुच्यते परिमाणिनेति, नपुनरन्यत्रापि पञ्च गवप्रियः दश गवप्रियः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1284. विधानसाधकवार्त्तिकम्-10)

*** अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः ***

व्याख्याभाष्यम्– अन्यत्र समुदायो बहुव्रीहिसञ्ज्ञः। अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदं प्रसिद्धम्। उत्तरपदप्रसिद्धेः 'उत्तरपदे' इति द्विगुर्भविष्यति।

(1285. वार्त्तिकम्-11)

*** सर्वत्र मत्वर्थे प्रतिषेधः ***

भाष्यम्– सर्वेषु पक्षेषु द्विगुसञ्ज्ञायाः मत्वर्थे प्रतिषेधो वक्तव्यः। किं प्रयोजनम्? पञ्चखट्वा दशखट्वा। 'द्विगोः' इतीकारो मा भूत्। पञ्चगुर्दशगुः 'गोरतद्धितलुकि' इति टज् मा भूदिति। तद्धितार्थोत्तरपद।।50।।

(255. तत्पुरुषे द्विगुसञ्ज्ञासूत्रम् 2.1.3 आ. 2)

400. संख्यापूर्वो द्विगुः 2.1.51

अनन्तरयोगस्यैव सम्बन्धाधिकरणम्

आक्षेपभाष्यम्– किमनन्तरे योगे यः संख्यापूर्वः स द्विगुसञ्ज्ञः, आहोस्वित्पूर्वमात्रे?

विशेषजिज्ञासाभाष्यम्– किं चातः?

विशेषप्रदर्शकभाष्यम्– यदानन्तरयोगे। एकशाटीति 'द्विगोः' इतीकारो न प्राप्नोति।

विशेषप्रदर्शकशेषभाष्यम्– अथ पूर्वमात्रे। एकभिक्षा। अत्रापि प्राप्नोति।

प्रथमपक्षाभ्युपगमभाष्यम्– अस्त्वनन्तरे।

आक्षेपभाष्यम्– कथमेकशाटी?

समाधानभाष्यम्– ईकारान्तेन समासो भविष्यति—एका शाटी एकशाटी।

समाधानबाधकभाष्यम्– इह तर्ह्येकापूपी 'द्विगोः' इतीकारो न प्राप्नोति।

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि पूर्वमात्रे।

आक्षेपभाष्यम्– कथमेकभिक्षा?

समाधानभाष्यम्– टाबन्तेन सह समासो भविष्यति—एका भिक्षा एकभिक्षा।

आक्षेपान्तरभाष्यम्– इदं तर्हि—सप्तर्षयः 'इगन्ते द्विगौ' इत्येष स्वरः प्राप्नोति।

प्रथमपक्षाभ्युपगमभाष्यम्– अस्तु तर्ह्यनन्तरे।

आक्षेपभाष्यम्– कथमेकापूपी?

समाधानभाष्यम्– समाहार इत्येव सिद्धम्।

आक्षेपभाष्यम्– कः पुनरत्र समाहारः।

समाधानभाष्यम्– यत्तद्दानं सम्भ्रमो वा।

आक्षेपभाष्यम्– इह तर्हि पञ्चहोतारो दशहोतारः। 'इगन्ते द्विगौ' इत्येष स्वरो न प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयपक्षाभ्युपगमभाष्यम्– अस्तु तर्हि—पूर्वमात्रे।

आक्षेपभाष्यम्– कथं सप्तर्षयः?

समाधानभाष्यम्– 'अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दसि' इत्येवमेतत्सिद्धम्।

प्रथमपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्तु—अनन्तरे।

आक्षेपभाष्यम्– कथं पञ्चहोतारः दशहोतारः?

समाधानभाष्यम्– 'आद्युदात्तप्रकरणे दिवोदासादीनां छन्दसि' इत्येव सिद्धम्। संख्यापूर्वो।।51।।

(256. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 3)

401. कुत्सितानि कुत्सनैः 5 2.1.52

उदाहरणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– वैयाकरणखसूचिः।

आक्षेपभाष्यम्– किं व्याकरणं कुत्सितम्, आहोस्विद्वैयाकरणः?

समाधानभाष्यम्– वैयाकरणः कुत्सितः। तस्मिन्कुत्सिते तत्स्थमपि कुत्सितं भवति। कुत्सितानि।।52।।

(257. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 4)

403. उपमानानि सामान्यवचनैः 2.1.54

उपमानोपमेयभावनिर्णयाधिकरणम्

आक्षेपभाष्यम्– उपमानानीत्युच्यते कानि पुनरुपमानानि। किं यदेवोपमानं तदेवोपमेयम्, आहोस्विदन्यदेवोपमानमन्यदुपमेयम्?

प्रत्याक्षेपभाष्यम्– किं चातः?

प्रथमपक्षे आक्षेपभाष्यम्– यदि यदेवोपमानं तदेवोपमेयम्, क इहोपमार्थः—गौरिव गौरिति।

द्वितीयपक्षे आक्षेपभाष्यम्– अथान्यदेवोपमानमन्यदुपमेयम्, क इहोपमार्थः—गौरिवाश्व इति।

समाधानभाष्यम्– एवं तर्हि यत्र किञ्चित्सामान्यं कश्चिच्च विशेषः, तत्रोपमानोपमेये भवतः।

आक्षेपभाष्यम्– किं वक्तव्यमेतत्?

समाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते—अनिर्ज्ञातमर्थं ज्ञास्यामीति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातः गवयोऽनिर्ज्ञातः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कामं तर्ह्यनेनैव हेतुना यस्य गवयो निर्ज्ञातः स्याद् गौरनिर्ज्ञातः, तेन कर्तव्यं स्याद्—गवय इव गौरिति।

इष्टापत्तिभाष्यम्– बाढं कर्तव्यम्।

उदाहरणनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं पुनरिहोदाहरणम्?

समाधानभाष्यम्– शस्त्रीश्यामा।

आक्षेपभाष्यम्– क्व पुनरयं श्यामाशब्दो वर्तते?

एकदेशिसमाधानभाष्यम्– शस्त्र्यामित्याह।

आक्षेपभाष्यम्– केन तर्हीदानीं देवदत्ताऽभिधीयते।

समाधानभाष्यम्– समासेन।

आक्षेपभाष्यम्– यद्येवं शस्त्रीश्यामो देवदत्त इति न सिद्ध्यति।

समाधानभाष्यम्– 'उपसर्जनस्य' इति ह्रस्वत्वं भविष्यति।

आक्षेपभाष्यम्– यदि तर्ह्युपसर्जनान्यप्येवञ्जातीयकानि भवन्ति, तित्तिरिकल्माषी कुम्भकपाललोहिनी—अनुपसर्जनलक्षण ईकारो न प्राप्नोति।

समाधानभाष्यम्– एवं तर्हि शस्त्र्यामेवं शस्त्रीशब्दो वर्तते, देवदत्तायां श्यामाशब्दः।

आक्षेपभाष्यम्– एवमपि गुणो न निर्दिष्टो भवति। बहवः शस्त्र्यां गुणाः—तीक्ष्णा सूक्ष्मा पृथुरिति।

समाधानभाष्यम्– अनिर्दिश्यमानस्यापि गुणस्य भवति लोके सम्प्रत्ययः। तद्यथा—'चन्द्रमुखी देवदत्ता' इति बहवश्चन्द्रे गुणाः, या चासौ प्रियदर्शनता सा गम्यते।

आक्षेपभाष्यम्– एवमपि 'समानाधिकरणेन' इति वर्तते। व्यधिकरणत्वात्समासो न प्राप्नोति।

प्रत्याक्षेपेण समाधानभाष्यम्– किं हि वचनान्न भवति?

समाधानबाधकभाष्यम्– यद्यपि तावद्वचनात्समासः स्यात्। इह खलु मृगीव चपला मृगचपला समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति।

सिद्धान्तिसमाधानभाष्यम्– एवं तर्हि तस्यामेवोभयं वर्तते। एतच्चात्र युक्तं यत्तस्यामेवोभयं वर्तत इति। इतरथा हि बह्वपेक्ष्यं स्यात्।

समाधानभाष्यशेषभाष्यम्– यदि तावदेवं विग्रहः करिष्यते—शस्त्रीव श्यामा देवदत्तेति। शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात्।

समाधानभाष्यशेषभाष्यम्– अथाप्येवं विग्रहः करिष्यते—यथा शस्त्री श्यामा तद्वदियं देवदत्तेति। एवमपि देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्।

आक्षेपभाष्यम्– एवमपि गुणो न निर्दिष्टो भवति। बहवश्च शस्त्र्यां गुणाः तीक्ष्णा सूक्ष्मा पृथुरिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– अनिर्दिश्यमानस्यापि गुणस्य भवति लोके सम्प्रत्ययः। तद्यथा— चन्द्रमुखी देवदत्तेति बहवश्चन्द्रे गुणाः। या चासौ प्रियदर्शनता सा गम्यते।

(1320. **वार्त्तिकम्**- 1)

*** उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः ***

व्याख्याभाष्यम्– उपमानसमासे गुणवचनस्य विशेषभाक्त्वात् सामान्यवचनस्याप्रसिद्धिः स्यात्—शस्त्रीश्यामेति। श्यामाशब्दोऽयं शस्त्रीशब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते। तत्र सामान्यवचनैरिति समासो न प्राप्नोति।

(1321. **वार्त्तिकम्**- 2)

*** न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वस्य प्रसिद्धिः ***

व्याख्याभाष्यम्– न वा एष दोषः। किं कारणम्? श्यामत्वस्योभयत्र भावात्। उभयत्रैवात्र श्यामत्वमस्ति शस्त्र्यां देवदत्तायां च। तद्वाचकत्वाच्च शब्दस्य। तद्वाचकश्चात्र श्यामाशब्दः प्रयुज्यते। किंवाचकः? उभयवाचकः। श्यामत्वस्योभयत्र भावात् तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वं प्रसिद्धम्। सामान्यवचने प्रसिद्धे सामान्यवचनैरिति समासो भविष्यति। नावश्यं स एव सामान्यवचनः यो बहूनां सामान्यमाह, द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचन एव। अथवा सामान्यवचनैरित्युच्यते। सर्वश्च शब्दोऽन्येन शब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते। त एवं विज्ञास्यामः—प्रागभिसम्बन्धाद्यः सामान्यवचन इति। उपमानानि।।54।।

(258. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.1.3 आ. 5)

404. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे 2.1.55

सामान्याप्रयोगप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– सामान्याप्रयोग इति किमर्थम्?

समाधानभाष्यम्– इह मा भूत्—पुरुषोऽयं व्याघ्र इव शूरः, पुरुषोऽयं व्याघ्र इव बलवान्।

प्रत्याख्यानभाष्यम्– सामान्याप्रयोग इति शक्यमवक्तुम्।

आक्षेपभाष्यम्– इह कस्मान्न भवति—पुरुषोऽयं व्याघ्र इव शूरः, पुरुषोऽयं व्याघ्र इव बलवान्?

समाधानभाष्यम्– असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। एवं तर्हि सिद्धे सति यत् 'सामान्याप्रयोगे' इति प्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो 'भवति प्रधानस्य सापेक्षस्यापि समासः' इति। किमेतस्य ज्ञापने प्रयोजनम्? राजपुरुषोऽभिरूपः राजपुरुषो दर्शनीयः। अत्र वृत्तिः सिद्धा भवति। उपमितम्।।55।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(259. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 6)

405. विशेषणं विशेष्येण बहुलम् 2.1.56

विशेषणस्योपसर्जनत्वाधिकरणम्

(1322. आक्षेपवार्त्तिकम्-1)

*** विशेषणविशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुपसर्जनाप्रसिद्धिः ***

व्याख्याभाष्यम्– विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनत्वस्याप्रसिद्धिः। कृष्णतिला इति कृष्णशब्दोऽयं तिलशब्देनाभिसम्बध्यमानो विशेषणवचनः सम्पद्यते, तथा तिलशब्दः कृष्णशब्देनाभिसम्बध्यमानो विशेषणवचनः सम्पद्यते, तदुभयं विशेषणं भवत्युभयं च विशेष्यम्। विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनत्वस्याप्रसिद्धिः।

(1323. समाधानवार्त्तिकम्-2)

*** नवान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्यापसर्जनप्रसिद्धिः ***

व्याख्याभाष्यम्– नवा एष दोषः। किं कारणम्? अन्यतरस्य प्रधानभावात्। अन्यतरदत्र प्रधानम्। तद्विशेषकत्वाच्चापरस्य तद्विशेषकं चापरम्। अन्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनसञ्ज्ञा भविष्यति यदाऽस्य तिलाः प्राधान्येन विवक्षिता भवन्ति कृष्णो विशेषकत्वेन, तदा तिलाः प्रधानं कृष्णो विशेषणम्।

आक्षेपभाष्यम्– कामं तर्ह्यनेनैव हेतुना यस्य कृष्णाः प्राधान्येन विवक्षिता भवन्ति तिला विशेषणत्वेन, तेन कर्तव्यं तिलकृष्णा इति।

समाधानभाष्यम्– न कर्तव्यम्। नह्ययं द्वन्द्वः—तिलाश्च कृष्णाश्चेति। न खल्वपि षष्ठीसमासः—तिलानां कृष्णा इति। किं तर्हि? द्वाविमौ प्रधानशब्दौ एकस्मिन्नर्थे युगपदवरुध्येते। न च द्वयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगपदवरुध्यमानयोः किञ्चिदपि प्रयोजनमस्ति, तत्र प्रयोगादेतद्गन्तव्यम्—नूनमत्रान्यतरत्प्रधानं तद्विशेषकं चापरमिति। तत्र त्वेतावान् सन्देहः—किं प्रधानं किं विशेषणमिति। स चापि क्व सन्देहः यत्रोभौ गुणशब्दौ। तद्यथा—खञ्जकुब्जः कुब्जखञ्ज इति। यत्र ह्यन्यतरद् द्रव्यमन्यतरो गुणः, तत्र यद् द्रव्यं तत्प्रधानम्। तद्यथा—'शुक्लमालभेत' 'कृष्णमालभेत' न पिष्टपिण्डीमालभ्य कृती भवति। अवश्यं तद्गुणं द्रव्यमाकाङ्क्षति।

आक्षेपभाष्यम्– कथं तर्हीमौ द्वौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते—वृक्षः शिंशपेति?

समाधानभाष्यम्– नैतयोरावश्यकः समावेशः। नह्यवृक्षः शिंशपास्ति। विशेषणम्।।56।।

(260. तत्पुरुषसमाससञ्ज्ञासूत्रम् 2.1.3 आ. 7)

406. पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च 2.1.57

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतदादिसूत्रमप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ किमर्थमुत्तरत्रैवमाद्यनुक्रमणं क्रियते, न 'विशेषणं विशेष्येण बहुलम्' इत्येव सिद्धम्।

(1324. **समाधानवार्त्तिकम्**- 1)

*** बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम् ***

व्याख्याभाष्यम्– अकृत्स्नं बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते।

आक्षेपभाष्यम्– यद्यकृत्स्नं यदनेन कृतमकृतं तत्।

समाधानभाष्यम्– एवं तर्हि न ब्रूमोऽकृत्स्नमिति, कृत्स्नं च कारकं च साधकं च निर्वर्तकं च यच्चानेन कृतं सुकृतं तत्।

आक्षेपभाष्यम्– किमर्थं तर्ह्येवमाद्यनुक्रमणं क्रियते?

समाधानभाष्यम्– उदाहरणभूयस्त्वात्। एते खल्वपि विधयः सुपरिगृहीता भवन्ति येषु लक्षणं प्रपञ्चश्च। केवलं लक्षणं केवलः प्रपञ्चो वा, न तथा कारकं भवति। अवश्यं खल्वप्यस्माभिरिदं वक्तव्यम्—बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषामिति। सर्ववेद-पारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्।। पूर्वापर।।57।।

(261. **तत्पुरुषसमाससञ्ज्ञासूत्रम्** 2.1.3 आ. 8)

407. श्रेण्यादयः कृतादिभिः 2.1.58

इष्टानुपपत्तिनिराकरणाधिकरणम्

गणपाठशोधकभाष्यम्– श्रेण्यादयः पठ्यन्ते, कृदादिराकृतिगणः।

अनिष्टापत्तिनिराकरणाधिकरणम्

(1325. **आक्षेपवार्त्तिकम्**- 1)

*** श्रेण्यादिषु च्व्यर्थवचनम् ***

भाष्यम्– श्रेण्यादिषु च्वयर्थग्रहणं कर्तव्यम्। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। यदा हि श्रेणय एव किञ्चित् क्रियन्ते तदा मा भूदिति।

अनुयोगभाष्यम्– अन्यत्रायं च्व्यर्थग्रहणेषु च्व्यन्तस्य प्रतिषेधं शास्ति। तदिह न तथा। किं कारणम्?

समाधानभाष्यम्– अन्यत्र पूर्वं च्व्यन्तकार्यं परं च्व्यर्थकार्यम्। इह पुनः पूर्वं च्व्यर्थ-कार्यं परं च्व्यन्तकार्यम्। श्रेण्यादयः।।58।।

(262. **तत्पुरुषसमाससञ्ज्ञासूत्रम्** 2.1.3 आ. 9)

408. क्तेन नञ्विशिष्टेनानञ् 2.1.59

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टापत्तिनिराकरणाधिकरणम्

(1326. आक्षेपवार्त्तिकम्-1)

*** नञ्विशिष्टे समानप्रकृतिग्रहणम् ***

व्याख्याभाष्यम्– नञ्विशिष्टे समानप्रकृतिग्रहणं कर्तव्यम्। इह मा भूत्—सिद्धं चाभुक्तं चेति।

(1327. आक्षेपवार्त्तिकम्-2)

*** अनञिति च ***

व्याख्याभाष्यम्– अनञिति च प्रतिषेधो वक्तव्यः। इह मा भूत्—कर्तव्यमकृतमिति।

(1328. आक्षेपवार्त्तिकम्-3)

*** नुडिडधिकेन च ***

व्याख्याभाष्यम्– नुडिडधिकेन च समासो वक्तव्यः। इहापि यथा स्यात्—अशितानशितेन जीवति। क्लिष्टाक्लिशितेनेति।

अवधारणार्थत्वे प्रथमवार्त्तिकद्वयप्रत्याख्यानतृतीयवार्त्तिकावश्यकताभाष्यम्– किमुच्यते समानप्रकृतिग्रहणं कर्तव्यमिति, यदा नञ्विशिष्टेनेत्युच्यते। न चात्र नञ्कृत एव विशेषः। किं तर्हि? प्रकृतिकृतोऽपि। अयं विशिष्टशब्दोस्त्येवावधारणे वर्तते। तद्यथा—'देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्षवन्तौ, देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः'। स्वाध्यायेनैवेति गम्यते। अन्ये गुणाः समा भवन्ति। अस्त्याधिक्ये वर्तते। तद्यथा—'देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्षवन्तौ देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः' स्वाध्यायेनाधिकः। अन्ये गुणा अविवक्षिता भवन्ति। तद्यदा ता वदवधारणे विशिष्टशब्दस्तदा नैवार्थः समानप्रकृतिग्रहणेन, नेह भविष्यति—सिद्धं चाभुक्तं चेति। नाप्यनञिति प्रतिषेधेन, नेह भविष्यति—कर्तव्यमकृतमिति। नुडिडधिकेनापि तु तदा समासो न प्राप्नोति।

आधिक्यार्थत्वेन प्रथमवार्त्तिकद्वयावश्यकता तृतीयवार्त्तिकानावश्यकता-भाष्यम्– यदाधिक्ये विशिष्टशब्दस्तदा समानप्रकृतिग्रहणं कर्तव्यमिह मा भूत्—सिद्धं चाभुक्तं चेति। अनञिति च प्रतिषेधो वक्तव्यः। इह मा भूत्—कर्तव्यमकृतमिति। नुडिडधिकेनापि समासः सिद्धो भवति। तत्राधिक्ये विशिष्टशब्दं मत्वा समानप्रकृतिग्रहणं चोद्यते।

'अवधारणं नञा चेद् नुडिड्विशिष्टेन न प्रकल्पेत।

न्यूनतापूर्त्यधिकरणम्

(1329. आक्षेपवार्त्तिकम्-4)

*** कृतापकृतादीनां चोपसंख्यानम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– कृतापकृतादीनां चोपसंख्यानं कर्तव्यम्। कृतापकृतम्। भुक्तविभुक्तम्। पीतविपीतम्।

(1330. न्यासान्तरेणाक्षेपबाधकवार्त्तिकम्-5)

*** सिद्धं तु क्तेन विसमाप्तावनञ् ***

व्याख्याभाष्यम्– सिद्धमेतत्? कथम्। क्तान्तेन क्रियाविसमाप्तावनञ् क्तान्तं समस्यत इति वक्तव्यम्।

(1331. आक्षेपवार्त्तिकम्-6)

*** गतप्रत्यागतादीनां चोपसंख्यानम् ***

भाष्यम्– गतप्रत्यागतादीनां चोपसंख्यानं कर्तव्यम्। गतप्रत्यागतम्। पातानुपातम्। पुटापुटिका। क्रयाक्रयिका। फलाफलिका। मानोन्मानिका। क्तेन नञ्।।59।।

(263. तत्पुरुषसमाससञ्ज्ञासूत्रम् 2.1.3 आ. 10)

415. युवा खलतिपलितवलिनजरतीभि: 2.1.66

लिङ्गविशिष्टपरिभाषासाधनाधिकरणम्

आक्षेपभाष्यम्– अयुक्तोऽयं निर्देश:। 'समानाधिकरणेन' इति वर्तते। क: प्रसङ्गो यद्व्यधिकरणानां समास: स्यात्?

समाधानभाष्यम्– एवं तर्हि ज्ञापयत्याचार्य:—यथाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवति—इति। किमेतस्य ज्ञापने प्रयोजनम्? 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' इत्येषा परिभाषा न कर्तव्या भवति।। युवा ख.।।66।।

(264. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 11)

417. वर्णो वर्णेन 2.1.68

वर्णोवर्णेन इत्यस्य समानाधिकरणाधिकारीयत्वाधिकरणम्

आक्षेपभाष्यम्– इदं विचार्यते—वर्णेन तृतीयासमासो वा स्यात्—कृष्णेन सारङ्ग: कृष्णसारङ्ग इति। समानाधिकरणो वा कृष्ण: सारङ्ग: कृष्णसारङ्ग इति।

विशेषप्रश्नभाष्यम्– कश्चात्र विशेष:?

(1332. तृतीयासमासे दूषणवार्त्तिकम्-1)

*** वर्णेन तृतीयासमास एतप्रतिषेधे वर्णग्रहणम् ***

भाष्यम्– वर्णेन तृतीयासमासे एतप्रतिषेधे वर्णग्रहणं कर्तव्यम्। तृतीयापूर्वपदं प्रकृतिस्वरं भवति। 'अनेते वर्ण:' इति वक्तव्यम्। (इह मा भूत्—हिमेन एत: हिमैत:।)

आक्षेपभाष्यम्– अथ द्वितीयेन वर्णग्रहणेनैतविशेषणेनार्थ:?

समाधानभाष्यम्– बाढमर्थ:। यद्यवर्ण एतशब्दोऽस्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्– ननु चायमस्ति—आ इतः एतः, कृष्णेतो लोहितेत इति।

प्रत्याख्यानभाष्यम्– नार्थ एवमर्थेन वर्णग्रहणेन। यदि तावदयं कर्मणि क्तः, 'तृतीया कर्मणि' इत्यनेन स्वरेण भवितव्यम्। अथापि कर्तरि, परत्वात्कृत्स्वरेण भवितव्यम्।

समानाधिकरणपक्षाभ्युपगमभाष्यम्– अथ समानाधिकरणः।

(1333. **समानाधिकरणपक्षे दूषणवार्त्तिकम्-2**)

* समानाधिकरणे द्विर्वर्णग्रहणम् *

व्याख्याभाष्यम्– समानाधिकरणे द्विर्वर्णग्रहणं कर्तव्यम्। वर्णो वर्णेष्वनेत इति वक्तव्यम्। एकं वर्णग्रहणं कर्तव्यम्। इह मा भूत्—परमशुक्लः परमकृष्णः। द्वितीयं वर्णग्रहणं कर्तव्यम्। इह मा भूत्—कृष्णातिला इति।

दूषणबाधकभाष्यम्– एकं वर्णग्रहणमनर्थकम्।

आक्षेपभाष्यम्– अवर्णस्य वर्णे वर्णस्य चावर्णे अन्यतरत्र कस्मान्न भवति?

समाधानभाष्यम्– 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इति।

तृतीयासमासवादिभाष्यम्– एवं सति तान्येतानि त्रीणि वर्णग्रहणानि भवन्ति—समासविधौ द्वे, स्वरविधौ चैकम्।

समानाधिकरणसमासवादिभाष्यम्– यस्यापि तृतीयासमासस्तस्यापि तान्येव त्रीणि वर्णग्रहणानि भवन्ति। समासविधौ द्वे, स्वरविधौ चैकम्।

तृतीयासमासवादिभाष्यम्– सामान्येन मम तृतीयासमासो भविष्यति 'तृतीया तत्कृतार्थेन गुणवचनेन' इति।

समानाधिकरणसमासवादिभाष्यम्– अवश्यं वर्णेन प्रतिपदं समासो वक्तव्यः। यत्र तेन न सिध्यति तदर्थम्। क्व च तेन न सिध्यति? शुकबभ्रुर्हरितबभ्रुरिति। तथा सति तान्येतानि त्रीणि वर्णग्रहणानि भवन्ति—समासविधौ द्वे, स्वरविधौ चैकम्।

तृतीयासमासवादिभाष्यम्– अथेदानीं समानाधिकरणः सामान्येन सिद्धः स्यात्?

समानाधिकरणसमासवादिभाष्यम्– बाढं सिद्धः। कथम्? 'विशेषणं विशेष्येण बहुलम्' इति। एवमपि द्वे वर्णग्रहणे कर्तव्ये स्वरविधावेव, प्रतिपदोक्तस्याभावात्। तस्मात्समानाधिकरण इत्येष पक्षो ज्यायान्।

प्रधानोपसर्जनानां विप्रतिषेधाधिकरणम्

(1334. **वार्त्तिकम्-3**)

* समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन *

भाष्यम्– समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं भवति विप्रतिषेधेन। प्रधानानां प्रधानम्, उपसर्जनानामुपसर्जनम्। प्रधानानां तावत्प्रधानम्—'वृन्दारकनागकुञ्जरैः पूज्यमानम्' इत्यस्यावकाशः—गोवृन्दारकः अश्ववृन्दारकः। 'पोटायुवतीनामवकाशः—इभ्ययुवतिः, आढ्ययुवतिः। इहोभयं प्राप्नोति—नागयुवतिः वृन्दारकयुवतिः। प्रधानानां

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं प्रधानं भवति विप्रतिषेधेन। उपसर्जनानां परमुपसर्जनम्। 'सन्महत्परमोत्तमोत्कृष्टा' इत्यस्यावकाशः—सद्गवः सदश्वः। 'कृत्यतुल्याख्या अजात्या' इत्यस्यावकाशः—तुल्यश्वेतः तुल्यमहान्। इहोभयं प्राप्नोति—तुल्यसन् तुल्यमहान्। उपसर्जनानां परमुपसर्जनं भवति विप्रतिषेधेन।

न कर्मधारयान्मत्वर्थीय इति व्युत्पत्तिसाधकाधिकरणम्

(1335. **बहुव्रीहेः कर्मधारयप्रकृतिकमत्वर्थीयापवादत्वसाधकप्रथमखण्डवार्त्तिकम्**- 4)

* समानाधिकरणसमासाद् बहुव्रीहिः *

भाष्यम्– समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेन। समानाधिकरणसमासस्यावकाशः—वीरः पुरुषो वीरपुरुषः। बहुव्रीहेरवकाशः—कण्ठेकालः। इहोभयं प्राप्नोति—वीरपुरुषको ग्रामः। बहुव्रीहिर्भवति विप्रतिषेधेन।

(1336. **कर्मधारयप्रकृतिकमत्वर्थीयसाधकवार्त्तिकद्वितीयखण्डम्**- 5)

* कदाचित्कर्मधारयः सर्वधनाद्यर्थः *

भाष्यम्– कदाचित्कर्मधारयो भवति बहुव्रीहेः। किं प्रयोजनम्? सर्वधनाद्यर्थः। सर्वधनी। सर्वबीजी। सर्वकेशी नटः। गौरखरवदरण्यम्। कृष्णसर्पवान्वल्मीकः। लोहितशालिमान् ग्रामः। किं प्रयोजनम्? कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं यथा स्यात्। किं च कारणं न स्यात्? बहुव्रीहिणोक्तत्वान्मत्वर्थस्य।

मत्वर्थीयोत्पत्तिबाधकाक्षेपभाष्यम्– यद्युक्तत्वं हेतुः, कर्मधारयेणाप्युक्तत्वान्न प्राप्नोति। न खल्वपि सञ्ज्ञाश्रयो मत्वर्थीयः। किं तर्हि? अर्थाश्रयः। स यथैव बहुव्रीहिणोक्तत्वान्न भवति, एवं कर्मधारयेणोक्तत्वान्न भविष्यति।

मत्वर्थीयोत्पत्तिसाधकसमाधानभाष्यम्– एवं तर्हि इदं स्यात्—सर्वाणि धनानि=सर्वधनानि, सर्वधनान्यस्य सन्ति=सर्वधनीति।

वार्त्तिकीयकदाचित्पदासंगत्याक्षेपभाष्यम्– नैवं शक्यम्। नित्यमेवं सति कर्मधारयः स्यात्। तत्र यदुक्तम्—'कदाचित्कर्मधारयः' इति, एतदयुक्तम्।

वार्त्तिकाशयान्तरभाष्यम्– एवं तर्हि भवति वै किञ्चिदाचार्याः कार्यवद्बुद्धिं कृत्वा पठन्ति—'कार्याः शब्दाः' इति, तद्वदिदं पठितम्—'समानाधिकरणसमासाद्बहुव्रीहिः कर्तव्यः कदाचित्कर्मधारयः सर्वधनाद्यर्थः' इति।

विप्रतिषेधासम्भवेन बहुव्रीहिनिराकरणाक्षेपभाष्यम्– यदुच्यते—समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेन—इति। नैष युक्तो विप्रतिषेधः। अन्तरङ्गः कर्मधारयः। काऽन्तरङ्गता? स्वपदार्थे कर्मधारयः। अन्यपदार्थे बहुव्रीहिः।

बहुव्रीहिसाधकसमाधानभाष्यम्– अस्तु। विभाषा कर्मधारयः, यदा न कर्मधारयस्तदा बहुव्रीहिर्भविष्यति।

आक्षेपभाष्यम्– एवमपि यद्यत्र कदाचित्कर्मधारयो भवति। कर्मधारयप्रकृतिभिर्मत्व-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थीयैरभिधानं प्राप्नोति। सर्वश्चायमेवमर्थो यत्नः—कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं मा भूद्—इति।

समाधानभाष्यम्– एवं तर्हि नेदं तस्य योगस्योदाहरणं 'विप्रतिषेधे परम्' इति। किं तर्हि? इष्टिरियं पठिता—'समानाधिकरणसमासाद्बहुव्रीहिरिष्टः। कदाचित्कर्मधारयः सर्वधनाद्यर्थः' इति।

उक्तवार्त्तिकानावश्यकतासाधकैकदेशिभाष्यम्– यदीष्टिः पठिता, नार्थोऽनेन। इह हि सर्वे मनुष्या अल्पेनाल्पेन महतो महतोऽर्थानाकाङ्क्षन्ति। एकेन माषेण शतसहस्रम्। एकेन कुद्दालपदेन खारीसहस्रम्। तत्र कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिणेति। बहुव्रीहिणा भविष्यति। लघुत्वात्।

आक्षेपैकदेशिभाष्यम्– कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति?

समाधानैकदेशिभाष्यम्– 'इनिप्रकरणे सर्वादेः' इति वक्ष्यामि। तच्चावश्यं वक्तव्यं ठनो बाधनार्थम्।

आक्षेपैकदेशिभाष्यम्– कथम्—गौरखरवदरण्यम् गौरमृगवदरण्यम् कृष्णसर्पवान् वल्मीकः लोहितशालिमान् ग्रामः?

समाधानैकदेशिभाष्यम्– अस्त्यत्र विशेषः। जात्यात्राभिसम्बन्धः क्रियते, कृष्णसर्पो नाम सर्पजातिः, साऽस्मिन् वल्मीकेऽस्ति। यदा ह्यन्तरेण जातिं तद्वत्ताभिसम्बन्धः क्रियते, कृष्णसर्पो वल्मीक इत्येव तदा भवति।

पूर्वपदार्थातिशयविवक्षायामप्यातिशायिकप्रत्ययाद्बहुव्रीहेर्बलवत्त्वाधिकरणम्

(1337. पूर्वपदातिशयआतिशायिकव्यवस्थावार्त्तिकम्-4)

* पूर्वपदातिशये आतिशायिकाद् बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः *

भाष्यम्– पूर्वपदातिशयविवक्षायामातिशायिकाद् बहुव्रीहिर्भवति विप्रतिषेधेन। किं प्रयोजनम्? सूक्ष्मवस्त्रतराद्यर्थः। आतिशायिकस्यावकाशः—पटुतरः पटुतमः। बहुव्रीहेरवकाशः—चित्रगुः शबलगुः। इहोभयं प्राप्नोति—सूक्ष्मवस्त्रतरः। तीक्ष्णशृङ्गतरः। बहुव्रीहिर्भवति विप्रतिषेधेन।

विप्रतिषेधबाधकभाष्यम्– नैष युक्तो विप्रतिषेधः। 'विप्रतिषेधे परम्' इत्युच्यते। पूर्वश्च बहुव्रीहिः, पर आतिशायिकः।

वार्त्तिकाशयान्तरभाष्यम्– इष्टवाची परशब्दः—विप्रतिषेधे परं यदिष्टं तद्भवतीति।

अनुपपत्तिभाष्यम्– एवमप्ययुक्तः। अन्तरङ्ग आतिशायिकः। कान्तरङ्गता? ङ्याप्प्रातिपदिकादातिशायिकः। सुबन्तानां बहुव्रीहिः।

अनुपपत्तिबाधकभाष्यम्– आतिशायिकोऽपि नान्तरङ्गः। कथम्? समर्थात्तद्धित उत्पद्यते। सामर्थ्यं च सुबन्तेन।

अनुपपत्तिसाधकभाष्यम्– एवमप्यन्तरङ्गः। कथम्? स्वपदार्थे आतिशायिकः। अन्यपदार्थे बहुव्रीहिः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपपत्तिबाधकभाष्यम्– एवमपि नान्तरङ्गः। कथम्? स्पर्द्धायामातिशायिको भवति। न चान्तरेण प्रतियोगिनं स्पर्द्धा भवति।

अनुपपत्तिप्राह्यभावभाष्यम्– नैव वात्रातिशायिक: प्राप्नोति। किं कारणम्? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। यावता वस्त्राणि तद्वन्तमपेक्षन्ते। तद्वन्तं चापेक्ष्य वस्त्राणां वस्त्रैर्युगपत्स्पर्द्धा भवति।

आक्षेपभाष्यम्– ननु चायमातिशायिक एवमात्मक: सत्यां व्यपेक्षायां विधीयते।

समाधानभाष्यम्– सत्यमेवमात्मक:। यां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिस्तस्यां सत्यां भवितव्यम्। कां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्ति:? या हि प्रतियोगिनं प्रति व्यपेक्षा। या हि तद्वन्तं प्रति, न तस्यां भवितव्यम्।

आक्षेपभाष्यम्– बहुव्रीहिरपि तर्हि न प्राप्नोति। किं कारणम्? असामर्थ्यादेव। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। यावता वस्त्राणि वस्त्रान्तराण्यपेक्षन्ते तद्वता चाभिसम्बन्ध:।

समाधानभाष्यम्– एवं तर्हि नेदं तस्य योगस्योदाहरणं 'विप्रतिषेधे परम्' इति। किं तर्हि? इष्टिरियं पठिता 'पूर्वपदातिशये आतिशायिकाद् बहुव्रीहिरिष्ट: सूक्ष्मवस्त्रतराद्यर्थ:' इति।

वार्त्तिकानावश्यकताभाष्यम्– यदीष्टिरियं पठिता, नार्थोऽनेन।

आक्षेपभाष्यम्– कथं येषा युक्तिरुक्ता—वस्त्रान्तराणां च वस्त्रान्तरैर्युगपत्स्पर्द्धा चाभिसम्बन्ध:—इति।

समाधानभाष्यम्– यदा ह्यन्तरेण वस्त्राणां वस्त्रान्तरैर्युगपत्स्पर्द्धा तद्वताभिसम्बन्ध: क्रियते। निष्प्रतिद्वन्द्वस्तदा बहुव्रीहि:। बहुव्रीहेरातिशायिका:।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—सूक्ष्मतरवस्त्र इति?

समाधानभाष्यम्– भवति, यदान्तरेण तद्वन्तं वस्त्राणां वस्त्रान्तरैर्युगपत्स्पर्द्धा भवति। निष्प्रतिद्वन्द्वस्तदातिशायिक:।

समाधानबाधकाक्षेपभाष्यम्– कथं पुनरन्यस्य प्रकर्षेणान्यस्य प्रकर्ष: स्यात्?

समाधानसाधकभाष्यम्– नैवान्यस्य प्रकर्षेणान्यप्रकर्षेण भवितव्यम्। यथैवायं द्रव्येषु यतते—वस्त्राणि मे स्युरिति। एवं गुणेष्वपि यतते—सूक्ष्मतराणि मे स्युरिति।

समाधानबाधकभाष्यम्– नात्रातिशायिक: प्राप्नोति। किं कारणम्? गुणवचनादित्युच्यते। न च समासो गुणवचन:।

समाधानसाधकभाष्यम्– समासोऽपि गुणवचन:। कथम्? अजहत्स्वार्था वृत्तिरिति।

आक्षेपभाष्यम्– अथ जहत्स्वार्थायां तु दोष एव?

समाधानभाष्यम्– जहत्स्वार्थायां च न दोष:। भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा—'शुक्लवाससमानय' 'लोहितोष्णीषा: प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति।

उत्तरपदातिशय आतिशायिकव्यवस्थाधिकरणम्

(१३३८. आक्षेपवार्त्तिकम्-5)

*** उत्तरपदातिशये आतिशायिको बहुव्रीहे: बह्वाढ्यतराद्यर्थ: ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– उत्तरपदातिशये आतिशायिको बहुव्रीहेर्भवति विप्रतिषेधेन। किं प्रयोजनम्? बह्वाढ्यतराद्यर्थः। बह्वाढ्यतरः। बहुसुकुमारतरः। कः पुनरत्र विशेषः—बहुव्रीहेर्वातिशायिकः स्याद्, आतिशायिकान्तेन वा बहुव्रीहिः? स्वरकपोर्विशेषः। यद्यत्रातिशायिकाद्बहुव्रीहिः स्यात्—बह्वाढ्यतर एवं स्वरः प्रसज्येत, बह्वाढ्यतर इति चेष्यते। बह्वाढ्यकतर इति च प्राप्नोति, बह्वाढ्यतरक इति चेष्यते।

(1339. उत्तरपदलोपविधायकवार्त्तिकम्-6)

*** समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ***

भाष्यम्– समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानं कर्तव्यम्। उत्तरपदलोपश्च वक्तव्यः। शाकभोजी पार्थिवः शाकपार्थिवः। कुतपवासाः सौश्रुतः कुतपसौश्रुतः। अजापण्यस्तौल्वलिरजातौल्वलिः। यष्टिप्रधानो मौद्गल्यः यष्टि मौद्गल्यः।।वर्णो वर्णेन।।68।।

(265. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 12)

419. चतुष्पादो गर्भिण्या 2.1.70

(1340.वार्त्तिकम्-1)

*** चतुष्पाज्जातिः ***

व्याख्याभाष्यम्– चतुष्पाज्जातिरिति वक्तव्यम्। इह मा भूत्—कालाक्षी गर्भिणी। स्वस्तिमती गर्भिणी। चतुष्पादो गर्भिण्या।।70।।

(266. तत्पुरुषसञ्ज्ञासूत्रम् 2.1.3 आ. 13 सू.)

420. मयूरव्यंसकादयश्च 2.1.71

आक्षेपभाष्यम्– किमर्थश्चकारः?

समाधानभाष्यम्– एवकारार्थः। मयूरव्यंसकादय एव। क्व मा भूत्? परमो मयूरव्यंसक इति। मयूरव्यंसकादयश्च।।71।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्; पादश्च समाप्तः

●

द्वितीयेऽध्याये द्वितीये पादे प्रथममाह्निकम्

तत्पुरुषप्रकरण एकदेशिसमासप्रकरणम्

(267. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 1)

422. अर्द्धं नपुंसकम् 2.2.2

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टापत्तिनिराकरणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—ग्रामार्द्धो नगरार्द्ध इति?

समाधानभाष्यम्– अर्द्धशब्दस्येदं नपुंसकलिङ्गस्य ग्रहणम्। पुल्लिङ्गश्चात्रार्धशब्दः।

आक्षेपभाष्यम्– क्व पुनरयं नपुंसकलिङ्गः, क्व पुल्लिङ्गः?

समाधानभाष्यम्– समप्रविभागे नपुंसकलिङ्गः, अवयववाची पुल्लिङ्गः।

आक्षेपभाष्यम्– इह कस्मान्न भवति—अर्द्धं पिप्पलीनामिति?

प्रत्याक्षेपभाष्यम्– न वा भवति—अर्द्धपिप्पल्य इति?

प्रत्याक्षेपसमाधानभाष्यम्– भवति, यदा खण्डसमुच्चयः—अर्द्धपिप्पली चार्द्धपिप्पली चार्धपिप्पली चार्द्धपिप्पल्य इति। यदा त्वेतद्वाक्यं भवति—अर्द्धं पिप्पलीनामिति, तदा न भवितव्यम्।

आक्षेपस्मारणभाष्यम्– तदा कस्मान्न भवति?

समाधानभाष्यम्– एकाधिकरण इति वर्तते।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—अर्द्धराशिरिति?

समाधानभाष्यम्– भवति। एकमेवेदमधिकरणं योऽसौ राशिर्नाम। अर्धं नपुंसकम्।।2।।

(268. **एकदेशित्तत्पुरुषसञ्ज्ञासूत्रम्** 2.2.1 आ. 2)

423. द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् 2.2.3

अन्यतरस्यांग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अन्यतरस्यांग्रहणं किमर्थम्?

आक्षेपबाधकभाष्यम्– अन्यतरस्यां समासो यथा स्यात्—समासेन मुक्ते वाक्यमपि यथा स्यात्—द्वितीयं भिक्षाया इति।

आक्षेपसाधकभाष्यम्– नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति।

आक्षेपबाधकप्रयोजनभाष्यम्– इदं तर्हि प्रयोजनम्। एकदेशिसमासेन मुक्ते षष्ठी-समासो यथा स्याद्—भिक्षाद्वितीयमिति।

आक्षेपबाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। अयमपि विभाषा, षष्ठीसमासोऽपि। तावुभौ वचनाद्भविष्यतः।

समाधानभाष्यम्– अत उत्तरं पठति—

(1341. **समाधानवार्त्तिकम्**-1)

*** द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य ***

व्याख्याभाष्यम्– द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं क्रियते। ज्ञापनार्थम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं ज्ञाप्यते? एतज्ज्ञापयत्याचार्यः—अवयवविधौ सामान्यविधिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्? भिनत्ति छिनत्तीति श्नमि कृते शस्न भवतीति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। शबादेशाः श्यन्नादयः करिष्यन्ते।

आक्षेपभाष्यम्– तत्तर्हि शपो ग्रहणं कर्तव्यम्।

आक्षेपबाधकभाष्यम्– न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'कर्तरि शब्' इति।

आक्षेपसाधकभाष्यम्– तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः।

आक्षेपबाधकभाष्यम्– रुधादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति।

आक्षेपसाधकभाष्यम्– प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति।

आक्षेपबाधकभाष्यम्– नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृत एवानुवर्तते।

समाधानसाधकभाष्यम्– एवं तर्हि ज्ञापयत्याचार्यः 'यत्रोत्सर्गापवादं विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवति' इति।

आक्षेपभाष्यम्– किमेतस्य ज्ञापने प्रयोजनम्?

प्रयोजनभाष्यम्– 'दिक्पूर्वपदान् ङीप्' प्राङ्मुखी। प्राङ्मुखा। प्रत्यङ्मुखी। प्रत्यङ्मुखा। ङीपा मुक्ते ङीष् न भवति।

प्रयोजनबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। वक्ष्यत्येतद्—'दिक्पूर्वपदान्ङीषोऽनुदात्तत्वम्। ङीब्विधाने ह्यन्यत्रापि ङीष्विषयाद् ङीप्रसगः' इति।

प्रयोजनान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—'अर्द्धपिप्पली, अर्द्धकोशातकी' एकदेशिसमासेन मुक्ते षष्ठीसमासे न भवति। उन्मत्तगङ्गं लोहितगङ्गम्, अव्ययीभावेन मुक्ते बहुव्रीहिर्न भवति। दाक्षिः प्लाक्षिः, इञा मुक्तेऽण् न भवति।

आक्षेपभाष्यम्– यद्येतज्ज्ञाप्यते, उपगोरपत्यमौपगवः तद्धितेन मुक्ते उपग्वपत्यमिति न सिध्यति।

समाधानभाष्यम्– अस्त्यत्र विशेषः—द्वे ह्यत्र विभाषे 'दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्' 'समर्थानां प्रथमाद्वा' इति च। तत्रैकया वृत्तिर्विभाषा। अपरया वृत्तिविषये विभाषापवादः।

आक्षेपभाष्यम्– क्रियमाणेऽपि वै अन्यतरस्यांग्रहणे षष्ठीसमासो न प्राप्नोति। किं कारणम्? पूरणेनेति प्रतिषेधात्।

समाधानभाष्यम्– नैतत्पूरणान्तम्। अना एतत्पर्यवसन्नम्।

समाधानबाधकभाष्यम्– एतदपि पूरणान्तमेव। कथम्? पूरणं नामार्थः, तमाह तीयशब्दः, अतः पूरणम्। योऽसौ पूरणान्तात्स्वार्थे भागे अन् सोऽपि पूरणमेव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्– एवं तर्ह्यन्यतरस्यांग्रहणसामर्थ्यात्षष्ठीसमासो भविष्यति। द्वितीयतृतीय।।3।।

इत्येकदेशिसमासप्रकरणम्

(269. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 3)

424. प्राप्तापन्ने च द्वितीयया 2.2.4

चकारस्याकारविधानार्थत्वाधिकरणम्

आक्षेपभाष्यम्– किमर्थश्चकार:?

समाधानभाष्यम्– अनुकर्षणार्थ:। किमनुकृष्यते? अन्यतरस्यामित्येतदनुकृष्यते। किं प्रयोजनम्? अन्यतरस्यां समासो यथा स्यात्। समासेन मुक्ते वाक्यमपि यथा स्यात्—जीविकां प्राप्त इति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति।

समाधानान्तरभाष्यम्– इदं तर्हि प्रयोजनम्। द्वितीयासमासोऽपि यथा स्याद्—जीविकाप्राप्त इति।

समाधानान्तरबाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। अयमप्युच्यते, द्वितीया-समासोऽपि। तदुभयं वचनाद्भविष्यति।

समाधानान्तरभाष्यम्– एवं तर्हि नायमनुकर्षणार्थश्चकार:। किं तर्हि? अत्वमनेन विधीयते—प्राप्तापन्ने द्वितीयान्तेन समस्येते, अत्वं च भवति प्राप्तापन्नयोरिति। प्राप्ता जीविकां प्राप्तजीविका। आपन्ना जीविकामापन्नजीविका। प्राप्तापन्ने।।4।।

(270. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 4)

425. काला: परिमाणिना 2.2.5

उत्तरपदार्थप्रधानताधिकरणम्

आक्षेपभाष्यम्– किं प्रधानोऽयं समास:?

समाधानभाष्यम्– उत्तरपदार्थप्रधान:।

आक्षेपभाष्यम्– यद्युत्तरपदार्थप्रधान: सधर्मणानेनान्यैरुत्तरपदार्थप्रधानैर्भवितव्यम्। अन्येषु चोत्तरपदार्थप्रधानेषु यैवासावन्तर्वर्तिनी विभक्तिस्तस्या: समासेऽपि श्रवणं भवति। तद्यथा—राज्ञ: पुरुषो राजपुरुष इति। इह पुनर्वाक्ये षष्ठी, समासे प्रथमा। केनैतदेवं भवति?

समाधानभाष्यम्– योऽसौ मासजातयोरभिसम्बन्ध: समासे स निवर्तते। अभिहित: सोऽर्थोन्तर्भूत: प्रातिपदिकार्थ: सम्पन्न:। तत्र प्रातिपदिकार्थे प्रथमेति प्रथमा भविष्यति।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—मासजातस्येति?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– भवति बाह्यमर्थमभिसमीक्ष्य षष्ठी।

अनुपपत्तिपरिहाराधिकरणम्

(1342. आक्षेपवार्त्तिकम्-1)

*** कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः ***

व्याख्याभाष्यम्– कालस्य येन समासः सोपरिमाणी। तस्यापरिमाणित्वाद् अनिर्देशः— अगमको निर्देशः अनिर्देशः। नहि जातस्य मासः परिमाणम्। कस्य तर्हि? त्रिंशद्रात्रस्य। तद्यथा 'द्रोणो बदराणां देवदत्तस्य' इति न देवदत्तस्य द्रोणः परिमाणम्। कस्य तर्हि? बदराणाम्।

(1343. समाधानवार्त्तिकम्-2)

*** सिद्धं तु कालपरिमाणं यस्य स कालस्तेन ***

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? कालपरिमाणं यस्य स कालस्तेन समस्यत इति वक्तव्यम्।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते?

समाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः' इति।

प्रत्याक्षेपभाष्यम्– कं पुनर्भवान्कालं मत्त्वाह—'कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः' इति?

प्रत्याक्षेपसमाधानभाष्यम्– येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित्क्रियया युक्तस्याहरिति च भवति रात्रिरिति च। कया क्रियया? आदित्यगत्या। तयैवासकृदावृत्तया मास इति भवति। संवत्सर इति च भवति।

प्रत्याक्षेपसमाधानेन समाधानभाष्यम्– यद्येवम्, भवति—जातस्य मासः परिमाणम्।

(1344. आक्षेपवार्त्तिकम्-3)

*** एकवचनद्विगोश्चोपसंख्यानम् ***

व्याख्याभाष्यम्– एकवचनान्तानामिति वक्तव्यम्। इह मा भूत् मासो जातस्य मासा जातस्येति। द्विगोश्चेति वक्तव्यम्। इहापि यथा स्यात्—द्विमासजातस्त्रिमासजातः।

समाधानभाष्यम्– उक्तं वा। किमुक्तम्? एकवचने तावदुक्तम्– अनभिधानादिति। द्विगोः किमुक्तम्? 'उत्तरपदेन परिमाणिना द्विगोः समासवचनम्' इति। कालाः परि।।5।।

(271. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 5)

426. नञ् 2.2.6

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नञ्समासस्याप्युत्तरपदार्थप्रधानतासाधनाधिकरणम्

आक्षेपभाष्यम्– किं प्रधानोऽयं समासः?

समाधानभाष्यम्– उत्तरपदार्थप्रधानः।

आक्षेपभाष्यम्– यद्युत्तरपदार्थप्रधानः, अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति।

समाधानभाष्यम्– अन्यपदार्थप्रधानस्तर्हि भविष्यति।

आक्षेपभाष्यम्– यदि अन्यपदार्थप्रधानः 'अवर्षा हेमन्तः' इति हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि प्राप्नोति।

समाधानभाष्यम्– पूर्वपदार्थप्रधानस्तर्हि भविष्यति।

आक्षेपभाष्यम्– यदि पूर्वपदार्थप्रधानः, अव्ययसञ्ज्ञा प्राप्नोति। अव्ययं ह्यस्य पूर्वपदमिति।

आक्षेपबाधकभाष्यम्– नैष दोषः। पाठेनाव्ययसञ्ज्ञा क्रियते। न च नञ्समासस्तत्र पठ्यते।

आक्षेपसाधकभाष्यम्– यद्यपि नञ्समासो न तत्र पठ्यते, नञ् तु पठ्यते। पाठेनाप्यव्ययसञ्ज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति। यश्चेहार्थोऽभधीयते न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति।

समाधानभाष्यम्– नेदं वाचनिकमलिङ्गता असंख्यता वा। किं तर्हि? स्वाभाविकमेतत्। तद्यथा—समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते। अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वानर्थक इति सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम्—यन्नञः प्राक् समासाल्लिङ्गसंख्याभ्यां योगो नास्ति, समासे च भवति। स्वाभाविकमेतत्।

समाधानान्तरभाष्यम्– अथवा आश्रयतो लिङ्गवचनानि भविष्यन्ति। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा—शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति।

प्रागुक्तपक्षाश्रयणभाष्यम्– अथवा पुनरस्तु—उत्तरपदार्थप्रधानः।

आक्षेपस्मारणम्– ननु चोक्तम्—अब्राह्मणमानयेत्युक्तेब्राह्मणमात्रस्यानयनं प्राप्नोति—इति।

समाधानभाष्यम्– नैष दोषः। इदं तावदयं प्रष्टव्यः—अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति? अस्त्यत्र विशेषः—रजा विशेषकः प्रयुज्यते, तेन एवं विशिष्टस्यानयनं भवति। इहापि तर्हि नञ्विशेषकः प्रयुज्यते, तेन नञ्विशिष्टस्यानयनं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– कः पुनरसौः ?

समाधानभाष्यम्– निवृत्तपदार्थकः।

नञो वाचकत्वद्योतकत्वान्यतरनिर्णयाधिकरणम्

आक्षेपस्मारणम्– यदा पुनरस्यार्थो निवर्तते। किं स्वाभाविकी निवृत्तिः, आहोस्विद्वाचनिकी ?

प्रत्याक्षेपभाष्यम्– किं चातः ?

स्वाभाविकपक्षे दूषणभाष्यम्– यदि स्वाभाविकी, किं नञ् प्रयुज्यमानः करोति ?

वाचनिकपक्षे दूषणभाष्यम्– अथवाचनिकी। तद्वक्तव्यम्—नञ् प्रयुज्यमानः पदार्थं निवर्तयति—इति।

प्रथमपक्षाभ्युपगमभाष्यम्– एवं तर्हि—स्वाभाविकी निवृत्तिः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—किं नञ् प्रयुज्यमानः करोतीति।

समाधानभाष्यम्– नञ् प्रयुज्यमानः पदार्थं निवर्तयति। कथम् ? कीलप्रतिकीलवत्। तद्यथा—कील आहन्यमानः प्रतिकीलं निर्हन्ति।

आक्षेपभाष्यम्– यद्येतन्नञो माहात्म्यम्, स्याद्—न जातु चिद्राजानो हस्त्यश्वं बिभृयुः, नेत्येव राजानो ब्रूयुः।

सिद्धान्तपक्षाभ्युपगमभाष्यम्– एवं तर्हि स्वाभाविकी निवृत्तिः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—किं नञ् प्रयुज्यमानः करोतीति।

समाधानभाष्यम्– नञ् निमित्ता तूपलब्धिः। तद्यथा—समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनम्। नच तेषां प्रदीपो निर्वर्तको भवति।

आक्षेपभाष्यम्– यदि पुनरयं निवृत्तपदार्थकः, ब्राह्मणशब्दः किमर्थं प्रयुज्यते ?

समाधानभाष्यम्– एवं यथा विज्ञायेत—अस्य पदार्थो निवर्तते इति। नेत्युक्ते सन्देहः स्यात्—कस्य पदार्थो निवर्तत इति। तत्रासन्देहार्थो ब्राह्मणशब्दः प्रयुज्यते। एवं चैतत्।

समाधानान्तरभाष्यम्– अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति।

तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः।।1।।

तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानप्यभ्यन्तरान् ब्राह्मण्ये गुणान् कुर्वन्ति। समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते। तद्यथा—पूर्वे पञ्चालाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कपिलः कृष्ण इति। एवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने च। गुणहीने तावत्—'अब्राह्मणोऽयम् यस्तिष्ठन् मूत्रयति' 'अब्राह्मणोऽयं, यस्तिष्ठन्भक्षयति'। जातिहीने सन्देहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। सन्देहात्तावद्गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति। तत उपलभते नायं ब्राह्मण=अब्राह्मणोऽयमिति। तत्र संन्देहाद् ब्राह्मणशब्दो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते। जातिकृता चार्थस्य निवृत्ति:। दुरुपदेशाच्च। दुरुपदिष्टमस्य भवति अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति। स तत्र गत्वा यं पश्यति तमध्यवस्यति ब्राह्मणोऽयमिति। ततश्च पश्चादुपलभते नायं ब्राह्मण:= अब्राह्मणोऽयमिति (निर्ज्ञातं तस्य भवति)। तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। जातिकृता चार्थस्य निवृत्ति:। आतश्च सन्देहाद् दुरुपदेशाद्वा। न ह्ययं कालं माषराशिवर्णमापणे आसीनं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति।

फलान्तरसंग्रहभाष्यम्– इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सति संगृहीतं भवति। किम्? अनेकमिति। किमत्र संगृहीतम्? एकवचनम्।

आक्षेपभाष्यम्– कथं पुनरेकस्य प्रतिषेधे (द्वि) बहूनां सम्प्रत्यय: स्यात्?

समाधानभाष्यम्– प्रसज्यायं क्रियागुणौ तत: पश्चान्निवृत्तिं करोति। तद्यथा— आसय शायय भोजय अनेकमिति।

आक्षेपभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र क्रियागुणौ प्रसज्येते। यत्र तु खलु पुनर्न प्रसज्येते तत्र कथम्—अनेकं तिष्ठतीति?

समाधानभाष्यम्– भवति चैवञ्जातीयकानामप्येकस्य प्रतिषेधेन बहूनां सम्प्रत्यय:। तद्यथा—'न न एकं प्रियम्' 'न न एकं सुखमि'ति।

भावप्रत्ययें स्वरदोषपरिहाराधिकरणम्

आक्षेपभाष्यम्– इहाब्राह्मणत्वमब्राह्मणता परत्वात् त्वतलौ प्राप्नुत:। तत्र को दोष:? स्वरे हि दोष: स्यात्। अब्राह्मणत्वमित्येवं स्वर: प्रसज्येत। अब्राह्मणत्वमिति चेष्यते।

समाधानभाष्यम्– नञ्समासे भाववचने उक्तम्। किमुक्तम्? 'त्वतल्भ्यां नञ्समास: पूर्वविप्रतिषिद्धं त्वतलो: स्वरसिद्ध्यर्थम्' इति। नञ्।।6।।

(272. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.2.1 आ. 6)

427. ईषदकृता 2.2.7

इष्टानुपपत्तिनिराकरणाधिकरणम्

(1345. **समासविधानवार्त्तिकम्**-1)

* ईषद् गुणवचनेन *

भाष्यम्– ईषद् गुणवचनेनेति वक्तव्यम्। अकृतेति ह्युच्यमाने इह च प्रसज्येत— ईषद्गार्ग्य:, इह च न स्यात्—ईषत्कडार इति। ईषद्।।7।।

(273. **तत्पुरुषसञ्ज्ञासूत्रम्** 2.2.1 आ. 7)

428. षष्ठी 2.2.8

इष्टानुपपत्तिनिराकरणाधिकरणम्

(1346. **समासप्रतिप्रसववार्त्तिकम्**-1)

* कृद्योगा च *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्। इध्म प्रव्रश्चनः। पलाशशातनः।

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

समाधानभाष्यम्– 'प्रतिपदविधाना च षष्ठी न समस्यते' इति वक्ष्यति। तस्यायं पुरस्तादपकर्षः।

आक्षेपभाष्यम्– का पुनः षष्ठी प्रतिपदविधाना, का च कृद्योगा?

समाधानभाष्यम्– सर्वा षष्ठी प्रतिपदविधाना शेषलक्षणां वर्जयित्वा। 'कर्तृकर्मणोः कृति' इति तु या षष्ठी सा कृद्योगा।

(1347. **समासप्रतिप्रसववार्त्तिकम्**-2)

*** तत्स्थैश्च गुणैः ***

भाष्यम्– तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम्। ब्राह्मणवर्णः। चन्दनगन्धः। पटहशब्दः। नदीघोषः।

(1348. **समासनिषेधवार्त्तिकम्**-3)

*** न तु तद्विशेषणैः ***

भाष्यम्– न तु तद्विशेषणैरिति वक्तव्यम्। इह मा भूत्—घृतस्य तीव्रो गन्धः। चन्दनस्य मृदुरिति।

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

समाधानभाष्यम्– गुणेन नेति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः।

आक्षेपभाष्यम्– किं पुनः कारणं गुणेन नेत्युच्यते, न पुनर्गुणवचनेन नेत्युच्येत?

समाधानभाष्यम्– नैवं शक्यम्। इह हि न स्यात्—काकस्य कार्ष्ण्यं बलाकायाः शौक्ल्यमिति। एतदेव खल्वपि तस्मिन्योगे उदाहरणम्। यद्धीदं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णा इति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते दन्ताः। तस्माद् 'गुणेन न' इति वक्तव्यम्। गुणेन नेत्युच्यमाने 'तत्स्थैश्च गुणैः' इति वक्तव्यम्। तत्स्थैश्च गुणैरित्युच्यमाने 'न तु तद्विशेषणैः' इति वक्तव्यम्। षष्ठी।।8।।

(274. **तत्पुरुषसमासनिषेधसूत्रम्** 2.2.1 आ. 8)

430. न निर्धारणे 2.2.10

अनिष्टपरिहाराधिकरणम्

(1349. **समासनिषेधवार्त्तिकम्**-1)

*** प्रतिपदविधाना च ***

भाष्यम्– प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यम्। इह मा भूत्—सर्पिषो ज्ञानम्, मधुनो ज्ञानम्। न निर्धारणे।।10।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(275. तत्पुरुषसमासनिषेधसूत्रम् 2.2.1 आ. 9)

431. पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन 2.2.11

गुणशब्दार्थनिरूपणाधिकरणम्

गुणोदाहरणाधिकरणम्

आक्षेपभाष्यम्– गुणे किमुदाहरणम्?

समाधानभाष्यम्– ब्राह्मणस्य शुक्ला:, वृषलस्य कृष्णा इति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ता:।

प्रयोजनान्तरभाष्यम्– इदं तर्हि—काकस्य कार्ष्ण्यम्, कण्टकस्य तैक्ष्ण्यम्, बलाकाया: शौक्ल्यमिति।

पूर्वोक्ताभ्युपगमभाष्यम्– इदं चाप्युदाहरणम्—ब्राह्मणस्य शुक्ला:, वृषलस्य कृष्णा इति।

बाधकस्मारणभाष्यम्– ननु चोक्तम्—असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ता—इति।

बाधकपरिहारभाष्यम्– नैष दोष:। भवति वै कस्यचिदर्थात्प्रकरणाद्वाऽपेक्ष्यं निर्ज्ञातं तदा वृत्ति: प्राप्नोति।

सदुदाहरणनिरूपणाधिकरणम्

आक्षेपभाष्यम्– सति किमुदाहरणम्?

उदाहरणभाष्यम्– ब्राह्मणस्य पक्ष्यन्, ब्राह्मणस्य पक्ष्यमाण:।

उदाहरणनिराकरणभाष्यम्– नैतदस्ति। प्रतिषिध्यतेऽत्र षष्ठी'लप्रयोगे ने'ति। या च श्रूयते। एषा बाह्यमर्थमपेक्ष्य भवति तत्रासामर्थ्यान्न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते ओदन:।

उदाहरणान्तरभाष्यम्– इदं तर्हि—चोरस्य द्विषन्, वृषलस्य द्विषन्।

आक्षेपभाष्यम्– ननु चात्रापि प्रतिषिध्यते।

समाधानभाष्यम्– वक्ष्यत्येतद् 'द्विष: शतुर्वावचनम्' इति।

अव्ययोदाहरणनिरूपणाधिकरणम्

आक्षेपभाष्यम्– अव्यये किमुदाहरणम्?

प्रयोजनभाष्यम्– ब्राह्मणस्योच्चै:, वृषलस्य नीचैरिति।

प्रयोजननिराकरणभाष्यम्– नैतदस्ति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते आसनम्।

प्रयोजनभाष्यम्– इदं तर्हि—ब्राह्मणस्य कृत्वा, वृषालस्य कृत्वेति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजननिराकरणभाष्यम्– एतदपि नास्ति। प्रतिषिध्यते तत्र षष्ठी 'अव्ययप्रयोगे न' इति। या च श्रूयते एषा बाह्यार्थमपेक्ष्य भवति, तत्रासामर्थ्यान्न भवति। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते कटः।

प्रयोजनान्तरभाष्यम्– इदं तर्हि—पुरा सूर्यस्योदेतोराधेयः। पुरा बत्सानामपाकर्तोः।

आक्षेपभाष्यम्– ननु चात्रापि प्रतिषिध्यते—'अव्ययम्' इति कृत्वा।

समाधानभाष्यम्– वक्ष्यत्येतत्—'अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः' इति।

समानाधिकरणोदाहरणाधिकरणम्

आक्षेपभाष्यम्– समानाधिकरणे किमुदाहरणम्?

समाधानभाष्यम्– राज्ञः पाटलिपुत्रकस्य। शुकस्य माराविकस्य। पाणिनेः सूत्रकारस्य।

समाधानबाधकभाष्यम्– नैतदस्ति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्? समानाधिकरणमसमर्थवद्भवतीति।

उदाहरणान्तरभाष्यम्– इदं तर्हि—सर्पिषः पीयमानस्य, यजुषः क्रियमाणस्य।

उदाहरणबाधकभाष्यम्– ननु चात्राप्यसामर्थ्यादेव भविष्यति। कथमसामर्थ्यम्? समानाधिकरणमसमर्थवद्भवतीति।

उदाहरणसाधकभाष्यम्– अधात्वभिहितमित्येवं तत्। पूरणगुण।।11।।

(276. **तत्पुरुषनिषेधसूत्रम्** 2.2.1 आ. 10)

434. कर्मणि च 2.2.14

चकारस्येत्यर्थकतानिरूपणाधिकरणम्

आक्षेपभाष्यम्– कथमिदं विज्ञायते—कर्मणि या षष्ठी सा न समस्यत इति। आहोस्वित्—कर्मणि यः क्तः—इति। कुतः सन्देहः? उभयं प्रकृतम्। तत्रान्यतरच्छक्यं विशेषयितुम्।

विशेषजिज्ञासाभाष्यम्– कश्चात्र विशेषः?

(1350. **प्रथमपक्षे दूषणवार्त्तिकम्**-1)

* कर्मणीति षष्ठीनिर्देशश्चेदकर्तरि कृता समासवचनम् *

व्याख्याभाष्यम्– कर्मणीतिषष्ठीनिर्देशश्चेदकर्तरि कृता समासो वक्तव्यः। इध्मप्रव्रश्चनः पलाशशातनः।

(1351. **सूत्रवैयर्थ्यापत्तिवार्त्तिकम्**-2)

* तृजकाभ्यां चानर्थकः प्रतिषेधः *

भाष्यम्– तृजकाभ्यां चानर्थकः कर्तरि प्रतिषेधो भवति। अपां स्रष्टा। पुरां भेत्ता। यवानां लावकः। कर्मणीत्येव सिद्धम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयपक्षाभ्युपगमभाष्यम्- अस्तु तर्हि—कर्मणि यः क्त इति। किमुदाहरणम्? ब्राह्मणस्य भुक्तं वृषलस्य पीतमिति।

(1352. दूषणवार्त्तिकम्-3)

*** क्तनिर्देशेऽसमर्थत्वादप्रतिषेधः ***

व्याख्याभाष्यम्- क्तनिर्देशेऽसमर्थत्वाद् अप्रतिषेधः अनर्थकः प्रतिषेधः अप्रतिषेधः। समासः कस्मान्न भवति? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते ओदनः।

(1353. वार्त्तिकम्-4)

*** प्रतिषेध्यमिति चेत्कर्तर्यपि प्रतिषेधः ***

व्याख्याभाष्यम्- अथैवं सति प्रतिषेधः कर्तव्य इति मन्यसे, कर्तर्यपि प्रतिषेधो वक्तव्यः स्यात्—ब्राह्मणस्य गतः ब्राह्मणस्य ज्ञात इति।

(1354. वार्त्तिकम्-5)

*** पूजायां च प्रतिषेधानर्थक्यम् ***

भाष्यम्- पूजायां च प्रतिषेधोऽनर्थकः—राज्ञां पूजितः राज्ञामर्चित इति। कर्मणीत्येव सिद्धम्।

(1355. सिद्धांन्तवार्त्तिकम्-6)

*** तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः ***

भाष्यम्- तस्माद् 'उभयप्राप्तौ कर्मणि' इत्येवं या षष्ठी तस्याः प्रतिषेधो वक्तव्यः।

आक्षेपभाष्यम्—स तर्हि वक्तव्यः?

समाधानभाष्यम्- न वक्तव्यः। इत्यर्थेऽयं चः पठितः—'कर्मणि च' कर्मणीत्येवं या षष्ठी। कर्मणि च।।14।।

(277. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 11)

437. नित्यं क्रीडाजीविकयोः 2.2.17

नित्यग्रहणसम्बन्धविचाराधिकरणम्

आक्षेपभाष्यम्- किमिह नित्यग्रहणेनाभिसम्बध्यते विधिः, आहोस्वित्—प्रतिषेधः?

समाधानभाष्यम्- विधिरित्याह। कुत एतत्? विधिर्हि विभाषा, नित्यः प्रतिषेधः। नित्यम्।।17।।

(278. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 12)

438. कुगतिप्रादयः 2.2.18

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टपरिहाराधिकरणम्

(1356. **समासप्रतिषेधवार्त्तिकम्**-1)

*** प्रादिप्रसङ्गे कर्मप्रवचनीयप्रतिषेधः ***

भाष्यम्– प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। वृक्षं प्रति विद्योतते विद्युत्। साधुर्देवदत्तो मातरं प्रति।

(1357. **समासप्रतिषेधवार्त्तिकम्**-2)

*** व्यवेतप्रतिषेधश्च ***

भाष्यम्– व्यवेतानां प्रतिषेधो वक्तव्यः। आमन्द्रैरिन्द्र हरिभिर्याहि।

(1358. **उक्तवार्त्तिकप्रत्याख्यानवार्त्तिकम्**-3)

*** सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? 'क्वाङ्स्वतिदुर्गतयः समस्यन्ते' इति वक्तव्यम्। कु—कुब्राह्मणः कुवृषलः। कु। आङ्—आकडारः, आपिङ्गलः। आङ्। सु—सुब्राह्मणः, सुवृषलः। सु। अति—अतिब्राह्मणः, अतिवृषलः। अति। दुर्—दुर्ब्राह्मणः, दुर्वृषलः। दुर्। गति—प्रकारकः, प्रणायकः, प्रसेवकः, ऊरीकृत्य, उररीकृत्य। गति।

(1359. **समासवार्त्तिकम्**-4)

*** प्रादयः क्तार्थे ***

व्याख्याभाष्यम्– प्रादयः क्तार्थे समस्यन्त इति वक्तव्यम्। प्रगत आचार्यः प्राचार्यः, प्रान्तेवासी, प्रपितामहः।

संवादभाष्यम्– एतदेव च सौनागैर्विस्तरतरकेण पठितम्—

(1360. **सौनागवार्त्तिकम्**-1)

*** स्वती पूजायाम् ***

व्याख्याभाष्यम्– स्वती पूजायामिति वक्तव्यम्। सुराजा, अतिराजा।

(1361. **सौनागवार्त्तिकम्**-2)

*** दुर्निन्दायाम् ***

व्याख्याभाष्यम्– दुर्निन्दायामिति वक्तव्यम्। दुष्कुलम्, दुर्गवः।

(1362. **सौनागवार्त्तिकम्**-3)

*** आङीषदर्थे ***

व्याख्याभाष्यम्– आङीषदर्थं इति वक्तव्यम्। आकडारः, आपिङ्गलः।

(1363. **सौनागवार्त्तिकम्**-4)

*** कुः पापार्थे ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– कुः पापार्थ इति वक्तव्यम्। कुब्राह्मणः, कुवृषलः।

(1364. सौनागवार्त्तिकम्-5)

*** प्रादयो गताद्यर्थे प्रथमया ***

व्याख्याभाष्यम्– प्रादयो गताद्यर्थे प्रथमया समस्यन्त इति वक्तव्यम्। प्रगत आचार्यः= प्राचार्यः प्रान्तेवासी प्रपितामहः।

(1365. सौनागवार्त्तिकम्-6)

*** अत्यादयः क्रान्ताद्यर्थे द्वितीयया ***

व्याख्याभाष्यम्– अत्यादयः क्रान्ताद्यर्थे द्वितीयया समस्यन्त इति वक्तव्यम्। अतिक्रान्तः खट्वाम्=अतिखट्वः अतिमालः।

(1366. सौनागवार्त्तिकम्-7)

*** अवादयः क्रुष्टाद्यर्थे तृतीयया ***

व्याख्याभाष्यम्– अवादयः क्रुष्टाद्यर्थे तृतीयया समस्यन्त इति वक्तव्यम्। अवक्रुष्टः कोकिलया=अवकोकिलः।

(1367. सौनागवार्त्तिकम्-8)

*** पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ***

व्याख्याभाष्यम्– पर्यादयो ग्लानाद्यर्थे चतुर्थ्या समस्यन्त इति वक्तव्यम्। परिग्लानोऽध्ययनाय पर्यध्ययनः।

(1368. सौनागवार्त्तिकम्-9)

*** निरादयः क्रान्ताद्यर्थे पञ्चम्या ***

व्याख्याभाष्यम्– निरादयः क्रान्ताद्यर्थे पञ्चम्या समस्यन्त इति वक्तव्यम्। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः निर्वाराणसिः।

(1369. वार्त्तिकम्-5)

*** अव्ययं प्रवृद्धादिभिः ***

व्याख्याभाष्यम्– अव्ययं प्रवृद्धादिभिः समस्यत इति वक्तव्यम्। पुनःप्रवृद्धं बहिर्भवति, पुनर्गवः, पुनः सुखम्।

(1370. वार्त्तिकम्-6)

*** इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ***

व्याख्याभाष्यम्– इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्। वाससी इव कन्ये इव।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1371. वार्त्तिकम्-7)

*** अव्ययमव्ययेन ***

व्याख्याभाष्यम्- अव्ययमव्ययेन समस्यत इति वक्तव्यम्। प्रप्रयज्ञपतिम्।

(1372. वार्त्तिकम्-8)

*** उदात्तगतिमता च तिङा ***

भाष्यम्- उदात्तवता तिङा गतिमता च तिङाऽव्ययं समस्यत इति वक्तव्यम्। अनुव्यचलत्, अनुव्याकरोति, यत्परियन्ति।। कुगति।।18।।

(279. तत्पुरुषसञ्ज्ञासूत्रम् 2.2.1 आ. 13)

439. उपपदमतिङ् 2.2.19

गतिकारकोपपदानामितिपरिभाषाधिकरणम्

आक्षेपभाष्यम्- अतिङिति किमर्थम्?

समाधानभाष्यम्- कारको व्रजति, हारको व्रजति।

प्रत्याख्यानभाष्यम्- अतिङिति शक्यमवक्तुम्।

आक्षेपभाष्यम्- कस्मान्न भवति—कारको व्रजति, हारको व्रजति?

समाधानभाष्यम्- सुप्सुपेति वर्तते।

समाधानवार्त्तिकावतरणभाष्यम्- अत उत्तरं पठति—

(1373. समाधानवार्त्तिकम्-1)

*** उपपदमतिङिति तदर्थप्रतिषेधः ***

व्याख्याभाष्यम्- उपपदमतिङिति तदर्थस्यायं प्रतिषेधः। कस्य? तिङर्थस्य। कः पुनस्तिङर्थः? क्रिया।

(1374. न्यासान्तरवार्त्तिकम्-2)

*** क्रियाप्रतिषेधो वा ***

व्याख्याभाष्यम्- अथवा व्यक्तमेवेदं पठितव्यम्—उपपदमक्रियेति।

आक्षेपभाष्यम्- अथ—अक्रियेति किं प्रत्युदाह्रियते?

प्रत्युदाहरणभाष्यम्- कारको गतः, कारको यातः।

बाधकभाष्यम्- नैतत्क्रियावाचि। किं तर्हि। द्रव्यवाचि।

प्रत्युदाहरणान्तरभाष्यम्- इदं तर्हि—कारकस्य गतिः कारकस्य व्रज्येति।

बाधकभाष्यम्- एतदपि द्रव्यवाचि। कथम्? कृदभिहितो भावो द्रव्यवद्भवतीति।

सिद्धान्तसमाधानभाष्यम्- एवं तर्हि सिद्धे सति यद् 'अतिङ्' इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः—अनयोर्योगयोर्निवृत्तं सुप्सुपेति। किमेतस्य ज्ञापने प्रयोजनम्? 'गतिकारकोपपदानां कृद्भिः सह समासो भवति' इत्येषा परिभाषा न कर्तव्या भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– यद्येतज्ज्ञाप्यते केनेदानीं समासो भविष्यति?

समाधानभाष्यम्– समर्थेन।

आक्षेपभाष्यम्– यद्येवं धातूपसर्गयोरपि समासः प्राप्नोति पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति।

समाधानभाष्यम्– नैतदस्ति। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति। तामुपसर्गो विशिनष्टि। अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्।

उपपदसमासबलीयस्त्वाधिकरणम्

(1375. **विप्रतिषेधवार्त्तिकम्**-3)

* षष्ठीसमासादुपपदसमासो विप्रतिषेधेन *

भाष्यम्– षष्ठीसमासादुपपदसमासो भवति विप्रतिषेधेन। षष्ठीसमासस्यावकाशः—राज्ञः पुरुषो राजपुरुषः। उपपदसमासस्यावकाशः—स्तम्बेरमः कर्णेजपः। इहोभयं प्राप्नोति—कुम्भकारो नगरकारः। उपपदसमासो भवति विप्रतिषेधेन।

(1376. **विप्रतिषेधप्रत्याख्यानवार्त्तिकम्**-4)

* न वा षष्ठीसमासाभावादुपपदसमासः *

भाष्यम्– न वाऽर्थो विप्रतिषेधेन। किं कारणम्? षष्ठीसमासस्याभावादुपपदसमासो भविष्यति 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' इति समासवचनात्।

उक्तवार्त्तिकद्वयवैयर्थ्यभाष्यम्– अथवा विभाषा षष्ठीसमासः। यदा न षष्ठीसमासस्तदोपपदसमासो भविष्यति।

वैयर्थ्यबाधकभाष्यम्– अनेनैव यथा स्यात्। तेन मा भूदिति। कश्चात्र विशेषः—तेन वा स्यादनेन वा? अयमस्ति विशेषः—उपपदसमासो नित्यसमासः, षष्ठीसमासः पुनर्विभाषा।

नित्यसमासलक्षणाधिकरणम्

वैयर्थ्यसाधकाक्षेपभाष्यम्– ननु च नित्यं यः समासः स नित्यसमासः स नित्यसमासः यस्य विग्रहो नास्ति।

वैयर्थ्यबाधकभाष्यम्– नेत्याह। नित्याधिकारे यः समासः स नित्यसमासः।

वैयर्थ्यसाधकभाष्यम्– नैवं शक्यम्। अव्ययीभावस्य ह्यनित्यसमासता प्रसज्येत। तस्मान्नित्यः समासो नित्यसमासः यस्य विग्रहो नास्ति। उपपद।।19।।

(280. **तत्पुरुषसञ्ज्ञानियमसूत्रम्** 2.2.1 आ. 14)

440. अमैवाव्ययेन 2.2.20

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिष्टपरिहाराधिकरणम्

आक्षेपभाष्यम्– एवकारः किमर्थः ?

समाधानभाष्यम्– नियमार्थः।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। सिद्धे विधिरारभ्यमाणोन्तरेणैवकारं नियमार्थो भविष्यति।

समाधानसाधकभाष्यम्– इष्टतोऽवधारणार्थस्तर्हि भविष्यति। यथैवं विज्ञायेत—अमैवाव्ययेनेति। मैवं विज्ञायि—अमाव्ययेनैवेति।

आक्षेपभाष्यम्– अस्ति चेदानीं कश्चिदनव्ययम् शब्दो यदर्थो विधिः स्यात्।

समाधानभाष्यम्– अस्तीत्याह—खशयं ब्राह्मणकुलमिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वादत्र समासो भविष्यति।

समाधानसाधकभाष्यम्– इदं तर्हि प्रयोजनम्। अमैव यत्तुल्यविधानमुपपदं तत्र यथा स्याद् अमा चान्येन च यत्तुल्यविधानं तत्र माभूदिति। अग्रे भोजम्। अग्रे भुक्त्वा।

नियमफलभाष्यम्– अग्रादिष्वप्राप्तविधेः समासप्रतिषेधं चोदयिष्यति। स न वक्तव्यो भवति। अमैवा.।।20।।

अथ बहुव्रीहिप्रकरणम्

(281. **बहुव्रीहिसञ्ज्ञासूत्रम्** 2.2.1 आ. 15)

443. शेषो बहुव्रीहिः 2.2.23

शेषपदार्थनिर्वचनाधिकरणम्

आक्षेपभाष्यम्– शेष इत्युच्यते कः शेषो नाम?

एकदेशिसमाधानभाष्यम्– येषां पदानामनुक्तः समासः स शेषः।

(1377. **समाधानबाधकवार्त्तिकम्**-1)

* शेषवचनं पदतश्चेन्नाभावात् *

भाष्यम्– शेषवचनं पदतश्चेत्। तन्न। किं कारणम्? अभावात्। नहि सन्ति तानि पदानि येषां पदानामनुक्तः समासः।

एकदेशिसमाधानान्तरभाष्यम्– अर्थतस्तर्हि शेषग्रहणम्—येष्वर्थेषु अनुक्तः समासः स शेषः।

(1378. **समाधानान्तरबाधकवार्त्तिकम्**-2)

* अर्थतश्चेदविशिष्टम् *

भाष्यम्– अर्थतश्चेदविशिष्टमेतद्भवति। कुतः? पदतः। नहि सन्त्यर्था: येष्वर्थेष्वनुक्तः समासः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तिसमाधानभाष्यम्– त्रिकतस्तर्हि शेषग्रहणम्। यस्य त्रिकस्यानुक्त: समास: स शेष:। कस्य चानुक्त:? प्रथमाया:। शेषो ब.।।23।।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्

●

द्वितीयेऽध्याये द्वितीये पादे द्वितीयमाह्निकम्

(282. बहुव्रीहिसञ्ज्ञासूत्रम् 2.2.2 आ. 1)

444. अनेकमन्यपदार्थे 2.2.24

पदकृत्याधिकरणम्

आक्षेपभाष्यम्– पदग्रहणं किमर्थम्?

समाधानभाष्यम्– इह 'अनेकमन्यार्थे' इतीयत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहि: स्यात्— यथा मे माता तथा पिता सुस्नातं भो इति। पदग्रहणे पुन: क्रियमाणे न दोषो भवति।

आक्षेपभाष्यम्– अथान्यग्रहणं किमर्थम्?

समाधानभाष्यम्– 'अनेकं पदार्थे' इतीयत्युच्यमाने स्वपदार्थेऽपि बहुव्रीहि: स्यात्— राजपुरुष: तक्षपुरुष इति।

एकदेशिसमाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। तत्पुरुष: स्वपदार्थे बाधको भविष्यति।

एकदेशिन आक्षेपभाष्यम्– भवेदेकसञ्ज्ञाधिकारे सिद्धम्। परंकार्यत्वे तु न सिध्यति। आरम्भसामर्थ्यात्तत्पुरुष:, परंकार्यत्वाच्च बहुव्रीहि: प्राप्नोति।

समाधानभाष्यम्– परंकार्यत्वे च न दोष:। शेष इति वर्तते। अशेषत्वान्न भविष्यति।

शेषग्रहणप्रत्याख्यानभाष्यम्– शेषवचन उक्तम्। किमुक्तम्? 'तत्र शेषवचनाद्दोष: संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेध' इति।

आक्षेपभाष्यम्– अथैकसञ्ज्ञाधिकारे नार्थोऽन्यग्रहणेन?

समाधानभाष्यम्– एकसञ्ज्ञाधिकारे च कर्तव्यम्। अक्रियमाणे ह्यन्यग्रहणे यथैव तत्पुरुष: स्वपदार्थे बहुव्रीहिं बाधते एवमन्यपदार्थेऽपि बाधेत।

आक्षेपभाष्यम्– अथानेकग्रहणं किमर्थम्?

आक्षेपबाधकभाष्यम्– 'अन्यपदार्थ' इतीयत्युच्यमाने एकस्यापि पदस्य बहुव्रीहि: स्यात्—सर्पिषोऽपि स्यात्, गोमूत्रस्यापि स्यात्।

आक्षेपसाधकभाष्यम्– नैतदस्ति प्रयोजनम्। सुप्सुपेति वर्तते।

आक्षेपबाधकभाष्यम्– इदं तर्हि प्रयोजनम्। बहूनामपि यथा स्यात्—सुसूक्ष्मजटकेशेन सुनताजिनवाससा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपबाधकशेषभाष्यम्– उत्तरार्थं चानेकग्रहणं कर्तव्यम्—'चार्थे द्वन्द्वः' अनेकमिति। इहापि यथा स्यात्—प्लक्षन्यग्रोधधवखदिरपलाशा इति।

आक्षेपसाधकनिराकरणभाष्यम्– एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति 'बहूनामपि समासो भवति'। यदयम्—उत्तरपदे द्विगुं शास्ति।

प्रत्याक्षेपभाष्यम्– तत्पुरुषोऽपि तर्हि बहूनां प्राप्नोति।

प्रत्याक्षेपबाधकभाष्यम्– नैष दोषः। ग्रहणेन तत्पुरुष उच्यते तेन बहूनां न भविष्यति।

समाधानभाष्यम्– अत उत्तरं पठति—

(1379. **समाधानवार्त्तिकम्-1**)

* अनेकवचनमुपसर्जनार्थम् *

व्याख्याभाष्यम्– अनेकग्रहणं क्रियते उपसर्जनार्थम्। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसञ्ज्ञा यथा स्यात्—चित्रगुः शबलगुरिति।

(1380. **समाधानबाधकवार्त्तिकम्-2**)

* न वैकविभक्तित्वात् *

व्याख्याभाष्यम्– न वा एतदपि प्रयोजनमस्ति। किं कारणम्? एकविभक्तित्वात् 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसञ्ज्ञा भविष्यति चित्रगुः शबलगुरिति। चित्रा यस्य गावश्चित्रगुस्तिष्ठति। चित्रा यस्य गावश्चित्रगुं पश्येति। चित्रा यस्य गावश्चित्रगुणा कृतम्। चित्रा यस्य गावश्चित्रगवे देहि। चित्रायस्य गावश्चित्रगोरानय। चित्रा यस्य गावश्चित्र गोः स्वम्। चित्रा यस्य गावश्चित्रगौ निधेहि। चित्रा यस्य गावो हे चित्रगो इति।

आक्षेपभाष्यम्– यदि तर्हि कुतश्चिदेव किञ्चित्पदमध्याहृत्य एकविभक्तियोगः क्रियते, एतदप्येकविभक्तियुक्तम्, इहापि प्राप्नोति—राजकुमारी तक्षकुमारी। राज्ञो या कुमारी राजकुमारी तिष्ठति। राज्ञो या कुमारी राजकुमारी पश्य। राज्ञो या कुमारी राजकुमार्या कृतम्। राज्ञो या कुमारी राजकुमार्यै देहि। राज्ञो या कुमारी राजकुमार्या आनय। राज्ञो या कुमारी राजकुमार्याः स्वम्। राज्ञो या कुमारी राजकुमार्यां निधेहि। राज्ञो या कुमारी राजकुमारि इति।

समाधानभाष्यम्– एकविभक्तियुक्तमेव यन्नित्यम्। न चैतन्नित्यमेकविभक्तियुक्तमेव राज्ञः कुमारीं पश्य राजकुमारीं पश्येत्यपि भवति। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? एकग्रहणसामर्थ्यात्। यदि हि यदेकविभक्तियुक्तं चानेकविभक्तियुक्तं च तत्र स्याद्, एकग्रहणमनर्थकं स्यात्। 'विभक्तियुक्तमपूर्वनिपाते' इत्येव ब्रूयात्।

अनुप्रयोगानुपपत्तिपरिहाराधिकरणम्

(1381. **आक्षेपवार्त्तिकम्-3**)

* पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात् *

भाष्यम्– पदार्थाभिधाने ऽनुप्रयोगस्यानुपपत्तिः—चित्रगुर्देवदत्त इति। किं कारणम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिहितत्वात्। चित्रगुशब्देनाभिहितः सोऽर्थ इति कृत्वानुप्रयोगो न प्राप्नोति।

(1382. आक्षेपबाधकवार्त्तिकम्-)

* न वानभिहितत्वात् सामान्याभिधाने हि विशेषानभिधानम् *

व्याख्याभाष्यम्– न वा एष दोषः। किं कारणम्? अनभिहितत्वात्। चित्रगुशब्देनानभिहितः सोऽर्थ इति कृत्वाऽनुप्रयोगो भविष्यति। कथमनभिहितः, यदिदानीमेवोक्तम् 'पदार्थाभिधाने ऽनुप्रयोगानुपपत्तिरभिहितत्वाद्' इति? सामान्याभिधाने हि विशेषानभिधानम्। सामान्ये ह्यभिधीयमाने विशेषोऽनभिहितो भवति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। चित्रगुः कः? देवदत्त इति।

आक्षेपभाष्यम्– भवेत्सिद्धं यदा सामान्ये वृत्तिः। यदा तु खलु विशेषे वृत्तिः, तदा न सिध्यति—चित्रा गावो देवदत्तस्येति चित्रगुर्देवदत्त इति।

समाधानभाष्यम्– तदापि सिद्धम्। कथम्? नेदमुभयं युगपत्संभवति। वाक्यं समासश्च। यदा वाक्यम्, न तदा समासः। यदा समासः, न तदा वाक्यम्। यदा समासः, सामान्येन तदा वृत्तिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः—चित्रगुः कः? देवदत्त इति।

आक्षेपभाष्यम्– सामान्यस्यैव तर्ह्यनुप्रयोगो न प्राप्नोति—चित्रगुः कः? चित्रगु तत्, चित्रगु किञ्चित्, चित्रगु सर्वमिति।

समाधानभाष्यम्– सामान्यमपि यथा विशेषस्तद्वत्। तत्र चित्र गिवत्युक्ते सन्देहः स्यात्—सर्वं वाऽविश्वं वेति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः—चित्रगु तदिति।

समाधानान्तरभाष्यम्– अथवा विभक्त्यर्थोऽभिधीयते। एतच्चात्र युक्तं यद्विभक्त्यर्थोऽभिधीयते तत्र हि सर्वपश्चात्पदं वर्तते अस्येति।

(1383. आक्षेपावार्त्तिकम्-5)

* विभक्त्यर्थाभिधानेद्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः *

व्याख्याभाष्यम्– विभक्त्यर्थाभिधानेऽद्रव्यस्य लिङ्गसंख्याभ्यामुपचारोऽनुपपन्नः। बहुयवं बहुयवा। बहुयवः बहुयवौ बहुयवा इति।

अपर आह—विभक्त्यर्थाभिधाने द्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः। विभक्त्यर्थाभिधाने द्रव्यस्य ये लिङ्गसंख्ये ताभ्यां विभक्त्यर्थस्योपचारोऽनुपपन्नः। बहुयवं बहुयवा। बहुयवः बहुयवौ बहुयवा इति।

आक्षेपभाष्यम्– कथं ह्यन्यस्य लिङ्गसंख्याभ्यामन्यस्योपचारः स्यात्?

(1384. समाधानवार्त्तिकम्-6)

* सिद्धं तु यथा गुणचनेषु *

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? यथा गुणवचनेषु। कथं गुणवचनेषु? गुणवचनेषूक्तम्—गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति। तद्यथा—शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः। शुक्लौ कम्बलौ। शुक्लाः कम्बला इति। यदसौ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति विभक्त्यर्थः तस्य यल्लिङ्गं वचनं तत्समासस्यापि भविष्यति।

आक्षेपभाष्यम्– यदि तर्हि विभक्त्यर्थोऽभिधीयते कृत्स्नः पदार्थः कथमभिहितो भवति सद्रव्यः सलिङ्गः ससंख्यश्च।

समाधानभाष्यम्– अर्थग्रहणसामर्थ्यात्। इह 'अनेकमन्यपदे' इतीयता सिद्धम्। कथं पुनः पदे नाम वृत्तिः स्यात्। पदं नाम शब्दः शब्दो ह्येषः? शब्दे ह्यसंभवादर्थे कार्यं विज्ञास्यते। सोयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनं कृत्स्नः पदार्थो यथाभिधीयते सद्रव्यः सलिङ्गः ससंख्यश्चेति।

आक्षेपभाष्यम्– यदि तर्हि कृत्स्नः पदार्थोऽभिधीयते—लैङ्गाः सांख्याश्च विधयो न सिध्यन्ति।

समाधानभाष्यम्– उक्तं वा। किमुक्तम्? लैङ्गेषु तावदुक्तम् 'सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणात्स्वार्थे टाबादय' इति।

सांख्येष्वप्युक्तम्। किमुक्तम्? कर्मादीनामनुक्ता एकत्वादय इति कृत्वा सांख्या भविष्यन्ति।

आक्षेपभाष्यम्– प्रथमा तर्हि न प्राप्नोति?

समाधानभाष्यम्– समयाद्भविष्यति।

आक्षेपभाष्यम्– यदि सामयिकी न नियोगतः, अन्याः कस्मन्न भवन्ति?

समाधानभाष्यम्– कर्मादीनामभावात्।

आक्षेपभाष्यम्– षष्ठी तर्हि प्राप्नोति?

समाधानभाष्यम्– शेषलक्षणा षष्ठी, अशेषत्वान्न भविष्यति।

आक्षेपभाष्यम्– एवमपि व्यतिकरः प्राप्नोति—एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः, द्वयोरप्येकवचनबहुवचने, बहुष्वप्येकवचनद्विवचने?

समाधानभाष्यम्– अर्थतो व्यवस्था भविष्यति।

समाधानान्तरभाष्यम्– अथवा संख्या नामेयं परप्रधाना। संख्येयमनया विशेष्यम्। यदि चात्र प्रथमा न स्यात्, संख्येयमविशेषितं स्यात्।

समाधानान्तरभाष्यम्– अथवा वक्ष्यत्येतद् वचनग्रहणस्य प्रयोजनम्—उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात्।

आक्षेपभाष्यम्– एवमपि षष्ठी प्राप्नोति। किं कारणम्? व्यभिचरत्येव ह्ययं समासो लिङ्संख्ये, षष्ठ्यर्थं पुनर्नव्यभिचरति?

समाधानभाष्यम्– अभिहितः सोऽर्थोन्तर्भूतः प्रातिपदिकार्थः सम्पन्नः। तत्र प्रातिपदिकार्थे प्रथमेति प्रथमा भविष्यति।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—चित्रगोर्देवदत्तस्येति।

समाधानभाष्यम्– भवति बाह्यमर्थमपेक्ष्य षष्ठी।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिगणनाधिकरणम्

भाष्यम्– परिगणनं कर्तव्यम्।

(1385. **परिगणनवार्त्तिकम्**-7)

*** बहुव्रीहिः समानाधिकरणानाम् ***

व्याख्याभाष्यम्– समानाधिकरणानां बहुव्रीहिर्वक्तव्यः। किं प्रयोजनम्? व्यधिकरणानां मा भूदिति। पञ्चभिर्भुक्तमस्येति।

(1386. **परिगणनवार्त्तिकम्**-8)

*** अव्ययानां च ***

व्याख्याभाष्यम्– अव्ययानां च बहुव्रीहिर्वक्तव्यः। उच्चैर्मुखमस्येति उच्चैर्मुखः नीचैर्मुखः।

(1387. **परिगणनवार्त्तिकम्**-9)

*** सप्तम्युपमानपूर्व** (पद) **स्योत्तरपदलोपश्च ***

व्याख्याभाष्यम्– सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः, उत्तरपदस्य च लोपो वक्तव्यः। कण्ठेस्थः कालोऽस्य कण्ठेकालः। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः।

(1388. **परिगणनवार्त्तिकम्**-10)

*** समुदायविकारषष्ठ्याश्च ***

व्याख्याभाष्यम्– समुदायविकारषष्ठ्याश्च बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वक्तव्यः। केशसमाहारश्चूडा अस्य केशचूडः। सुवर्णविकारोऽलङ्कारो यस्य सुवर्णालङ्कारः।

(1389. **परिगणनवार्त्तिकम्**-11)

*** प्रादिभ्यो धातुजस्य वा ***

व्याख्याभाष्यम्– प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च वा लोपो वक्तव्यः। प्रपतितपर्णः प्रपर्णः। प्रपतितपलाशः प्रपलाशः।

(1390. **परिगणवार्त्तिकम्**-12)

*** नञोऽस्त्यर्थानां च ***

व्याख्याभाष्यम्– नञोऽस्त्यर्थानां बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च वा लोपो वक्तव्यः। अविद्यमानः पुत्रोऽस्य अविद्यमानपुत्रः अपुत्रः। अविद्यमानभार्यः अभार्यः।

आक्षेपभाष्यम्– तत्तर्हीदं बहु वक्तव्यम्?

(1391. **परिगणननिराकरणवार्त्तिकम्**-13)

*** न वाऽनभिधानादसमानाधिकरणेषु समाससञ्ज्ञाभावः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– नवा वक्तव्यम्। असमानाधिकरणानां बहुव्रीहिः कस्मान्न भवति—पञ्चभिर्भुक्तमस्येति? अनभिधानात्। तच्चावश्यमनभिधानमाश्रयितव्यम्। क्रियमाणेऽपि परिगणने यत्राभिधानं न भवति तत्र न बहुव्रीहिः। यथा पञ्च भुक्तवन्तोऽस्येति।

आक्षेपभाष्यम्– अथैतस्मिन्सत्यनभिधाने यदि वृत्तिपरिगणनं क्रियेत तर्हि वर्तिपरिगणनमपि कर्तव्यम्।

प्रत्याक्षेपभाष्यम्– तत्कथं कर्तव्यम्?

(1392. **समाधानवार्त्तिकम्**-14)

*** अर्थनियमे मत्वर्थग्रहणम् ***

व्याख्याभाष्यम्– अर्थनियमे मत्वर्थग्रहणं कर्तव्यम्। मत्वर्थे यः, स बहुव्रीहिरिति वक्तव्यम्। इह मा भूत्—कष्टं श्रितमनेनेति।

(1393. **वार्त्तिकम्**-15)

*** तथा चोत्तरस्य वचनार्थः ***

भाष्यम्– एवं च कृत्वोत्तरस्य योगस्य वचनार्थं उपपन्नो भवति।

वार्त्तिकस्थोत्तरपदव्याख्याभाष्यम्– केचित्तावदाहुः—'यद्वृत्तिसूत्रे' इति 'संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये' इति।

सिद्धान्तिमतान्तरभाष्यम्– अपर आहुः—'यद्वार्तिके' इति।

(1394. **व्याख्येयवार्त्तिकम्**-16)

*** कर्मवचनेनाप्रथमायाः ***

व्याख्याभाष्यम्– कर्मवचनेनाप्रथमाया बहुव्रीहिर्वक्तव्यः। ऊढो रथो येन ऊढरथोऽनड्वान्। उपहृतः पशू रुद्राय उपहृतपशू रुद्रः। उद्धृत ओदनः स्थाल्याः उद्धृतौदना स्थाली।

आक्षेपभाष्यम्– यदि कर्मवचनेनेत्युच्यते, अथ कर्तृवचनेन कथम्—प्राप्तमुदकं ग्रामं प्राप्तोदको ग्रामः। आगता अतिथयो ग्राममागतातिथिर्ग्रामः?

(1395. **वार्त्तिकम्**-17)

*** कर्तृवचनेनापि ***

व्याख्याभाष्यम्– कर्तृवचनेनापीति वक्तव्यम्।

आक्षेपभाष्यम्– अप्रथमाया इति किमर्थम्?

समाधानभाष्यम्– वृष्टे देवे गतः।

आक्षेपभाष्यम्– अथ 'अप्रथमायाः' इत्युच्यमाने इह कस्मान्न भवति—वृष्टो देवे गतं पश्येति।

समाधानभाष्यम्– बहिरङ्गा अत्राप्रथमा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1396. **समासाक्षेपवार्त्तिकम्**-18)

इष्टानुपपत्तिपरिहाराधिकरणम्

*** सुबधिकारेऽस्तिक्षीरादिवचनम् ***

व्याख्याभाष्यम्– सुबधिकारेऽस्तिक्षीरेत्युपसंख्यानं कर्तव्यम्। अस्तिक्षीरा ब्राह्मणी।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

(1397. **समाधानवार्त्तिकम्**-19)

*** नवाऽव्ययत्वात् ***

भाष्यम्– नवा कर्तव्यम्। किं कारणम्? अव्ययत्वात्। अव्ययमेषोऽस्तिशब्द:। नैषोऽस्तेर्लट्। कथमव्ययत्वम्? उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसञ्ज्ञा। निपातोऽव्ययमित्यव्ययसञ्ज्ञा।

किंसब्रह्मचारिशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– अथ किंसब्रह्मचारीति कोऽयं समास:?

समाधानभाष्यम्– बहुव्रीहिरित्याह।

आक्षेपभाष्यम्– कोऽस्य विग्रह:?

समाधानभाष्यम्– के सब्रह्मचारिणोऽस्येति।

आक्षेपभाष्यम्– यद्येवं कठ इति प्रतिवचनं नोपपद्यते। न ह्यन्यत्पृष्टेनान्यदाख्येयम्।

समाधानभाष्यम्– एवं तर्ह्येवं विग्रह: करिष्यते—केषां सब्रह्मचारी किंसब्रह्मचारीति।

समाधानबाधकभाष्यम्– प्रतिवचनं चैवं नोपपद्यते। स्वरे च दोषो भवति—किंसब्रह्मचारीत्येवं स्वर: प्रसज्येत, किंसब्रह्मचारीति चेष्यते।

समाधानान्तरभाष्यम्– एवं तर्ह्येवं विग्रह: करिष्यते—क: सब्रह्मचारी किंसब्रह्मचारीति।

समाधानान्तरबाधकभाष्यम्– भवेत्प्रतिवचनमुपपन्नम्। स्वरे तु दोषो भवति।

समाधानभाष्यम्– एवं तर्ह्येवं विग्रह: करिष्यते—क: सब्रह्मचारी तव किंसब्रह्मचारी त्वमिति।

प्रागुक्तपक्षाङ्गीकारभाष्यम्—अथवा पुनरस्त्वयमेव विग्रह:—के सब्रह्मचारिणोस्येति

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—कठ इति प्रतिवचनं नोपपद्यत इति।

समाधानभाष्यम्– नैष दोष:। अग्नौकरवाणिन्यायेन भविष्यति। तद्यथा—कश्चित्कश्चिदाह—अग्नौकरवाणीति। स आह—कुर्विति। कर्तर्यनुज्ञाते कर्माप्यनुज्ञातं भवति। अपर आह—अग्नौ करिष्य इति। क्रियतामिति कर्मण्यनुज्ञाते कर्ताप्यनुज्ञातो भवति। यथैव खल्वपि—के सब्रह्मचारिणोऽस्येति? 'कठा:' इत्युक्ते सम्बन्धादेतद्गम्यते—'नूनमयमपि कठ:' इति। एवं 'कठ इत्युक्ते सम्बन्धादेतद्गन्तव्यं 'नूनं तेऽपि कठा:' इति। न खल्वपि ते समासेन शक्या: प्रतिनिर्देष्टुम्। उपसर्जनं हि ते भवन्ति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्धतृतीयादिशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– अथार्धतृतीया इति कोऽयं समासः?

समाधानभाष्यम्– बहुव्रीहिरित्याह।

आक्षेपभाष्यम्– कोऽस्य विग्रहः?

समाधानभाष्यम्– अर्धं तृतीयमेषामिति।

आक्षेपभाष्यम्– कः समासार्थः। समासार्थो नोपपद्यते। अन्यपदार्थो हि नाम स भवति, येषां पदानां समासस्ततोऽन्यस्य पदस्यार्थोऽन्यपदार्थः?

समाधानभाष्यम्– एवं तर्ह्येवं विग्रहः करिष्यते—अर्धं तृतीयमनयोरिति।

आक्षेपभाष्यम्– एवमपि कः षष्ठ्यर्थः। षष्ठ्यर्थो नोपपद्यते। किं हि तयोरर्धं भवति?

प्रथमोक्तविग्रहाभ्युपगमभाष्यम्– अस्तु तर्ह्ययमेव विग्रहः—अर्धं तृतीयमेषामिति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'समासाऽर्थो नोपपद्यते' इति।

समाधानभाष्यम्– नैष दोषः। अवयवेन विग्रहः। समुदायः समासार्थः।

आक्षेपभाष्यम्– यद्यवयवेन विग्रहः समुदायः समासार्थः,

'असिद्वितीयोऽनुससार पाण्डवम्'

'सङ्कर्षणद्वितीयस्य बलं कृष्णस्य वर्धताम्'

इति द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति।।

पश्चात्प्रोक्तविग्रहाभ्युपगमभाष्यम्– अस्तु तर्ह्ययमेव विग्रहः—अर्धं तृतीयमनयोरिति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्– षष्ठ्यर्थो नोपपद्यत इति।

समाधानभाष्यम्– नैष दोषः। इदं तावदयं प्रष्टव्यः—अथेह 'देवदत्तस्य भ्राता' इति कः षष्ठ्यर्थ इति? तत्रैतत्स्यात्—एकस्मात्प्रादुर्भाव इति। एतच्च वार्तम्। तद्यथा—सार्थिकानामेकप्रतिश्रये उषितानां प्रातरुत्थाय प्रतिष्ठमानानां न कश्चित्परस्परमभिसम्बन्धो भवति। एवंजातीयकं भ्रातृत्वं नाम। अत्र चेद्युक्तः षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम्।

आक्षेपभाष्यम्– इह तर्हि अर्धतृतीया आनीयन्तामित्युक्ते अर्धस्थानयनं न प्राप्नोति।

प्रथमप्रोक्तविग्रहाभ्युपगमभाष्यम्– अस्तु तर्ह्ययमेव विग्रहः—अर्धं तृतीयमेषामिति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'असिद्वितीयोऽनुससार पाण्डवम्'

'सङ्कर्षणद्वितीयस्य बलं कृष्णस्य वर्द्धताम्'

इति द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोतीति।

समाधानभाष्यम्– नैष दोषः। अयं तीयान्तः शब्दोस्त्येव पूरणे वर्तते। अस्ति सहायवाची। तद्यः सहायवाची तस्येदं ग्रहणम्—'असिद्वितीयः' असिसहाय इति गम्यते।

आक्षेपभाष्यम्– एवमपि—अर्धतृतीया इत्येकस्मिन्नेकवचनं प्राप्नोति। एकार्था हि समुदाया भवन्ति। यथा—शतं यूथं वनमिति।

पश्चात्प्रोक्तविग्रहाभ्युपगमभाष्यम्– अस्तु तर्ह्ययमेव विग्रहः—अर्धं तृतीयमनयोरिति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—अर्धतृतीया आनीयन्तामित्युक्ते अर्धस्यानयनं न प्राप्नोतीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– नैष दोषः। भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा—शुक्लवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति।

प्रथमप्रोक्तविग्रहाभ्युपगमभाष्यम्– अथवा पुनरस्त्वयमेव विग्रहः—अर्धं तृतीयमेषामिति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—एकवचनं प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। संख्या नामेयं परप्रधाना। संख्येयमनया विशेष्यम्। यदि चात्रैकवचनं स्यात् संख्येयमविशेषितं स्यात्।

आक्षेपभाष्यम्– इह तर्ह्यर्धतृतीया द्रोणा इत्ययं द्रोणशब्दः समुदाये प्रवृत्तः अवयवे नोपपद्यते।

समाधानभाष्यम्– नैष दोषः। समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते। तद्यथा—पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तं, घृतं भुक्तं, शुक्लो नीलः कपिल इति। एवमयं समुदाये द्रोणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते।

आक्षेपभाष्यम्– कामं तर्ह्यनेनैव हेतुना यदा द्वौ द्रोणौ अर्धाढकं च तदा कर्तव्यमर्धतृतीया द्रोणा इति।

समाधानभाष्यम्– न कर्तव्यम्। समुदायेषु वृत्ताः शब्दाः केष्ववयवेषु वर्तन्ते? योऽवयवस्तं समुदायं न व्यभिचरति। कं च समुदायं न व्यभिचरति? अर्धद्रोणो द्रोणम्। अर्धाढकं पुनर्व्यभिचरति। अनेक।।24।।

(283. बहुव्रीहिसञ्ज्ञासूत्रम् 2.2.2. आ. 2)

283. संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये 2.2.25

द्वित्रादिशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– द्वित्राः चित्रतुरा इति कोऽयं समासः?

समाधानभाष्यम्– बहुव्रीहिरित्याह।

आक्षेपभाष्यम्– कोऽस्य विग्रहः?

समाधानभाष्यम्– द्वौ वा त्रयो वेति।

आक्षेपभाष्यम्– भवेद्यदा बहूनामानयनं तदा बहुवचनमुपपन्नम्। यदा तु खलु द्वावानीयेते तदा न सिध्यति।

समाधानभाष्यम्– तदापि सिद्धम्। कथम्? केचित्तावदाहुः—अनिर्ज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यमिति। तद्यथा— कति भवतः पुत्राः, कति भवतो भार्या इति।

अपर आह—द्वौ वेत्युक्ते त्रयो वेति गम्यते। त्रयो वेत्युक्ते द्वौ वेति गम्यते। सैषा पञ्चाधिष्ठाना वाक् तत्र युक्तं बहुवचनम्।

द्विदशादिशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– अथ द्विदशाः त्रिदशा इति कोऽयं समासः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– बहुव्रीहिरित्याह।

आक्षेपभाष्यम्– कोऽस्य विग्रहः?

समाधानभाष्यम्– द्विर्दश द्विदशा इति।

(1398. **आक्षेपवार्त्तिकम्-1**)

*** संख्यासमासे सुजन्तत्वात्संख्याप्रसिद्धिः ***

भाष्यम्– संख्यासमासे सुजन्तत्वात्संख्येत्यप्रसिद्धिः। नहि सुजन्ता संख्याऽति।

समाधानभाष्यम्– एवं तर्ह्येवं विग्रहः करिष्यते—द्वौ दशतौ द्विदशा इति।

आक्षेपभाष्यम्– एवमपि अत्कारान्तत्वात्संख्ययेत्यप्रसिद्धिः। न ह्यत्कारान्ता संख्याऽस्ति।

प्रथमप्रोक्तविग्रहाभ्युपगमभाष्यम्– अस्तु तर्ह्ययमेव विग्रहः—द्विर्दश द्विदशा इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'संख्यासमासे सुजन्तत्वात्संख्येत्यप्रसिद्धिरिति।

(1399. **आक्षेपबाधकवार्त्तिकम्-2**)

*** नवाऽसुजन्तत्वात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? असुजन्तत्वात्। सुजन्तत्वादित्युच्यते। न चात्र सुजन्तं पश्यामः।

आक्षेपभाष्यम्– किं पुनः कारणं वाक्ये सुज् दृश्यते, समासे न दृश्यते?

(1400. **समाधानवार्त्तिकम्-3**)

*** सृजभावोऽभिहितार्थत्वात् समासे ***

भाष्यम्– समासे सुजभावः। किं कारणम्? अभिहितार्थत्वात्। अभिहितः सुजर्थः समासेनेति कृत्वा समासे सुज् न भविष्यति।

प्रत्याक्षेपभाष्यम्– किं च भोः 'सुजर्थे' इति समास उच्यते?

समाधानभाष्यम्– न खलु सुजर्थ इत्युच्यते गम्यते तु सुजर्थः। कथम्? यावता संख्येयो यः संख्यया संख्यायते। स च क्रियाभ्यावृत्त्यर्थः। स चोक्तः समासेनेति कृत्वा समासे सुज् न भविष्यति।

प्रत्याख्यानाधिकरणम्

(1401. **प्रत्याख्यानवार्त्तिकम्-4**)

*** अशिष्यः संख्योत्तरपदः संख्येयवाभिधायित्वात् ***

भाष्यम्– अशिष्यः संख्योत्तरपदो बहुव्रीहिः। किं कारणम्? संख्येयवाभिधायित्वात्। संख्येयं वार्थश्चाभिधीयते तत्रान्यपदार्थ इत्येव सिद्धम्।

प्रत्याख्याननिराकरणभाष्यम्– भवेत्सिद्धमधिकविंशाः अधिकत्रिंशा इति, यत्रैतद्वि-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चार्यते विंशत्यादयो दशदर्थे वा स्युः परिमाणिनि वेति। इदं तु न सिध्यति—अधिकदशा इति, यत्र नियोगतः संख्या संख्येये एव वर्तते।

उपदशादिशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– अथोपदशा इति कोऽयं समासः?

समाधानभाष्यम्– बहुव्रीहिरित्याह।

आक्षेपभाष्यम्– कोऽस्य विग्रहः?

समाधानभाष्यम्– दशानां समीपे उपदशा इति।

आक्षेपभाष्यम्– कस्य पुनः सामीप्यमर्थः?

समाधानभाष्यम्– उपस्य।

आक्षेपभाष्यम्– यद्येवं, नान्यपदार्थो भवति।

प्रत्याख्यानभाष्यम्– तत्र च प्रथमानिर्दिष्टं संख्याग्रहणं शक्यमकर्तुम्।

(1402. **संख्याग्रहणस्थापनवार्त्तिकम्**- 5)

*** मत्वर्थे वा पूर्वस्य विधानात् ***

भाष्यम्– अथवा मत्वर्थे पूर्वो योगः। अमत्वर्थाऽर्थोयमारम्भः।

(1403. **प्रत्याख्याननिराकरणवार्त्तिकम्**- 6)

*** कबभावार्थं वा ***

भाष्यम्– अथवा कब् मा भूदिति। संख्ययाऽव्य।।25।।

(284. **बहुव्रीहिसञ्ज्ञासूत्रम्** 2.2.2 आ. 3)

446. दिङ्नामान्यन्तराले 2.2.26

(285. **बहुव्रीहिसञ्ज्ञासूत्रम्** 2.2.2 आ. 4)

447. तेन सहेति तुल्ययोगे 2.2.27

प्रत्याख्यानाधिकरणम्

(1404. **प्रत्याख्यानवार्त्तिकम्**- 1)

*** दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानात् ***

भाष्यम्– दिक्समाससहयोगयोश्चाशिष्यो बहुव्रीहिः। किं कारणम्? अन्तरालप्रधानाभिधानात्। दिक्समासे सहयोगे चान्तरालं प्रधानं चाभिधीयते तत्रान्यपदार्थ इत्येव सिद्धम्।

आक्षेपभाष्यम्– यद्येव दक्षिणपूर्वा दिक् समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति।

समाधानभाष्यम्– अद्य पुनरियं सैव दक्षिणा सैव पूर्वेति कृत्वा समानाधिकरणलक्षणः पुंवद्भावः सिद्धो भवति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानबाधकभाष्यम्– न सिध्यति। भाषितपुंस्कस्य पुंवद्भावः। न चैतौ भाषितपुंस्कौ।

समाधानसाधकभाष्यम्– ननु च भोः दक्षिणशब्दः पूर्वशब्दश्च पुंसि भाष्येति।

समाधानबाधकभाष्यम्– समानायामाकृतौ यद्भाषितपुंस्कम्। आकृत्यन्तरे चैतौ भाषितपुंस्कौ। दक्षिणा पूर्वेति दिक्शब्दौ। दक्षिणः पूर्व इति व्यवस्थाशब्दौ।

आक्षेपभाष्यम्– यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः। कथं यानि दिगुपदिष्टानि कार्याणि?

समाधानभाष्यम्– यदा दिशो व्यवस्था वक्ष्यन्ति।

आक्षेपभाष्यम्– यदि हि यो यो दिशि वर्तते स दिक्शब्दः, रमणीयादिष्वतिप्रसङ्गो भवति—रमणीया दिक् शोभना दिगिति। अथ मतमेतत्—दिशि दृष्टो दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्दः यो दिशं न व्यभिचरतीति, न रमणीयादिष्वतिप्रसङ्गो भवति, पुंवद्भावस्तु न प्राप्नोति।

समाधानभाष्यम्– एवं तर्हि 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः दक्षिणोत्तरपूर्वाणामित्येवमर्थम्'।

प्रत्याख्यानाभ्युपगमभाष्यम्– एवं च कृत्वास्तु—'दिक्समाससहयोगयोन्तरालप्रधानाभिधानात्' इत्येव।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—दक्षिणपूर्वा दिक् समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोतीति।

समाधानभाष्यम्– नैष दोषः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेन परिहृतः।

(1405. प्रत्याख्यानबाधकवार्त्तिकम्-1)

*** मत्वर्थे वा पूर्वस्य विधानात् ***

भाष्यम्– अथवा मत्वर्थे पूर्वो योगः। अमत्वर्थाऽर्थोयमारम्भः।

(1406. प्रत्याख्यानबाधकवार्त्तिकम्-2)

*** कबभावार्थो वा ***

भाष्यम्– अथवा कब् मा भूदिति। दिङ्नामानि।।26।। तेन सहेति।।27।।

(286. बहुव्रीहिसञ्ज्ञासूत्रम् 2.2.2 आ. 5)

448. तत्र तेनेदमिति सरूपे 2.2.28

प्रत्याख्याननिराकरणाधिकरणम्

(1407. प्रत्याख्यानवार्त्तिकम्-1)

*** तृतीयासप्तम्यन्तेषु च क्रियाभिधानादशिष्यो बहुव्रीहिः ***

भाष्यम्– तृतीयासप्तम्यन्तेषु चाशिष्यो बहुव्रीहिः। किं कारणम्? क्रियाभिधानात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियाभिधीयते। तत्र 'अन्यपदार्थ' इत्येव सिद्धम्।

(1408. **प्रत्याख्याननिराकरणवार्त्तिकम्**-2)

* न वैकशेषप्रतिषेधार्थम् (पूर्वदीर्घार्थं च) *

भाष्यम्– नवाऽशिष्यः। किं कारणम्? एकशेषप्रतिषेधार्थमिदं वक्तव्यम्। पूर्वदीर्घार्थं च। पूर्वदीर्घार्थं चेदं वक्तव्यम्। केशाकेशि।

प्रत्याख्यानसाधकभाष्यम्– स्यादेतत्प्रयेजनं यदि नियोगतोऽनेनैव दीर्घत्वं स्यात्। अथेदानीम् 'अन्येषामपि दृश्यते' इति दीर्घत्वं न प्रयोजनं भवति।

(1409. **वार्त्तिकम्**-3)

* मत्वर्थे वा पूर्वस्य विधानात् *

व्याख्याभाष्यम्– अथवा मत्वर्थे पूर्वो योगः। अमत्वर्थार्थोऽयमारम्भः।

(1410. **वार्त्तिकम्**-4)

* कबभावार्थं वा *

व्याख्याभाष्यम्– अथवा कब् मा भूदिति। तत्र तेनेदम्।।28।।

अथ द्वन्द्वसमासः

(287. **अथ द्वन्द्वसञ्ज्ञासूत्रम्** 2.2.2 आ. 6)

449. चार्थे द्वन्द्वः 2.2.29

आक्षेपभाष्यम्– चार्थ इत्युच्यते। चश्चाव्ययम्। तेन समासस्याप्यव्ययसञ्ज्ञा प्राप्नोति।

समाधानभाष्यम्– नैष दोषः। पाठेनाव्ययसञ्ज्ञा क्रियते। न च (द्वन्द्वः) समासस्तत्र पठ्यते।

आक्षेपभाष्यम्– पाठेनाप्यव्ययसञ्ज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भविष्यन्ति। यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति।

समाधानभाष्यम्– नेदं वाचनिकम्—अलिङ्गता असंख्यता च। किं तर्हि? स्वाभाविकमेतत्। तद्यथा—समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वानर्थक इति सर्वैरनर्थकैः। तत्र किमस्याभिः शक्यं कर्तुम्—यत्प्राक् समासाच्चार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति, समासे च भवति। स्वाभाविकमेतत्।

समाधानान्तरभाष्यम्– अथवा आश्रयतो लिङ्गवचनानि भविष्यन्ति यथा गुणवचनेषु। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा—शुक्लं वस्त्रं शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद् गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– अथेह कस्मान्न भवति—याज्ञिकश्चायं वैयाकरणश्च, कठश्चायं बह्वृचश्च, औक्थिकश्चायं मीमांसकश्चेति।

समाधानभाष्यम्– शेष इति वर्तते। अशेषत्वान्न भविष्यति।

आक्षेपभाष्यम्– यदि शेष इति वर्तते, 'उपास्नातं स्थूलसिक्तं तूष्णीगङ्गं महाह्रदम्। द्रोणं चेदशको गन्तुं मा त्वा ताप्तां कृताकृते।।' इत्येतन्न सिध्यति।

समाधानभाष्यम्– नैष दोषः। अन्यद्धि कृतम्, अन्यदकृतम्।

युगपदधिकरणवचनताधिकरणम्

(1411. **आक्षेपवार्त्तिकम्**- 1)

*** चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसम्प्रत्ययादनिष्टप्रसङ्गः ***

व्याख्याभाष्यम्– चार्थे द्वन्द्ववचने समासेऽपि चार्थसम्प्रत्ययादनिष्टं प्राप्नोति—

'अहरहर्नयमानो गामश्वं पुरुषं पशुम्।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी।।' इति।।
'इन्द्रस्त्वष्टा वरुणो वायुरादित्य' इति।।

(1412 **युगपदधिकरणवचनतयासमाधानवार्त्तिकम्**- 2)

*** सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात् ***

व्याख्याभाष्यम्– सिद्धमेतत्। कथम्? युगपदधिकरणवचने द्वन्द्वो भवतीति वक्तव्यम्।

(1413. **युगपदधिकरणतायां दूषणवार्त्तिकम्**- 3)

*** तत्र पुंवद्भावप्रतिषेधः ***

भाष्यम्– तत्रैतस्मिन् लक्षणे पुंवद्भावस्य प्रतिषेधो वक्तव्यः। पट्वीमृद्व्यौ। समानाधिकरणलक्षणः पुंवद्भावः प्राप्नोति।

(1414. **दूषणान्तरवार्त्तिकम्**- 4)

*** विप्रतिषिद्धेषु चानुपपत्तिः ***

भाष्यम्– विप्रतिषिद्धेषु युगपदधिकरणवचनताया अनुपपत्तिः। शीतोष्णे सुखदुःखे जननमरणे। किं कारणम्? सुखप्रतिघातेन हि दुःखम्, दुःखप्रतिघातेन च सुखम्।

प्रथमदूषणबाधकभाष्यम्– यत्तावदुच्यते 'तत्र पुंवद्भावप्रतिषेधः' इति। इदं तावदयं प्रष्टव्यः—अथेह पुंवद्भावः कस्मान्न भवति—दर्शनीयाया माता दर्शनीयामातेति? अथ मतमेतत्—प्राक् समासाद्यत्र सामानाधिकरण्यं तत्र पुंवद्भावो भवतीति। इहापि न दोषो भवति।

द्वितीयदूषणबाधकभाष्यम्– यदप्युच्यते 'विप्रतिषिद्धेषु चानुपपत्तिः' इति। सर्व एव शब्दाः विप्रतिषिद्धाः। इहापि प्लक्षन्यग्रोधाविति प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं सम्प्रत्याययति, न्यग्रोधार्थं निवर्तयति। न्यग्रोधशब्दः प्रत्युज्यमानो न्यग्रोधार्थं सम्प्रत्याययति,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्लक्षार्थं निवर्तयति। अथात्र चेद्युक्ता युगपदधिकरणवचनता दृश्यते, इहापि युक्ता दृश्यताम्।

युगपदधिकरणवचनतानुपपत्तिभाष्यम्– एवमपि—

(1415. **युगपदधिकरणवचनताया असम्भववार्त्तिकम्**- 5)

*** शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानम् ***

भाष्यम्– शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति। अत: किम्? युगपदधिकरण-वचनताया अनुपपत्ति:। प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति। यथैव हि शब्दानां पौर्वापर्यं तद्वदर्थानामपि भवितव्यम्।

(1416. **पौर्वापर्याभिधाने दूषणवार्त्तिकम्**- 6)

*** शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमिति चेद्द्विवचनबहुवचनानुपपत्ति: ***

भाष्यम्– शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभि धानमिति चेद् द्विवचनबहुवचनयोर-नुपपत्ति:— प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति। प्लक्षशब्द: सार्थको निवृत्तो न्यग्रोधशब्द उपस्थित:। एक एकार्थ: तस्यैकार्थत्वादेकवचनं प्राप्नोति।

(1417. **दूषणोद्धारवार्त्तिकम्**- 7)

*** विग्रहे च युगपद्वचनं ज्ञापकं युगपद्वचनस्य ***

भाष्यम्– विग्रहे खल्वपि युगपद्वचनता दृश्यते—'द्यावा ह क्षामा' 'द्यावा चिदस्मै पृथिवी संनमेते' इति। किमेतत् ? युगपदधिकरणवचनताया उपोद्वलकम्। विग्रहे किल नाम युगपदधिकरणवचनता स्यात्, किं पुन: समासे।

(1418. **द्वितीयदूषणोद्धारवार्त्तिकम्**- 8)

*** समुदायात्सिद्धम् ***

भाष्यम्– समुदायात्सिद्धमेतत्। किमेतत्समुदायात्सिद्धमिति? द्विवचनबहुवचनता-प्रसिद्धिरिति चोदितम्, तस्यायं परिहार:।

(1419. **दूषणसाधकवार्त्तिकम्**- 9)

*** समुदायात्सिद्धमिति चेन्नैकार्थत्वात्समुदायस्य ***

भाष्यम्– समुदायात्सिद्धमिति चेत्। तन्न। किं कारणम्? एकार्थत्वात्समुदायस्य। एकार्था हि समुदाया भवन्ति। तद्यथा—शतं यूथं वनमिति।

(1420. **दूषणबाधकवार्त्तिकम्**- 10)

*** नैकार्थ्यम् ***

भाष्यम्– नायमेकार्थ:। किं तर्हि? द्व्यर्थो बह्वर्थश्च। प्लक्षोऽपि द्व्यर्थ: न्यग्रोधोऽपि द्व्यर्थ:।

आक्षेपभाष्यम्– यदि तर्हि प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थ:—

(1421. **दूषणवार्त्तिकम्**- 11)

*** तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग: ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– तयोरनेकार्थत्वाद् 'बहुषु बहुवचनम्' इति बहुवचनं प्राप्नोति।

(1422. दूषणोद्धारसमाधानवार्त्तिकम्-12)

*** तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेन्न बहुत्वाभावात् ***

भाष्यम्– तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेत्। तन्न। किं कारणम्? बहुत्वाभावात्। नात्र बहुत्वमस्ति। किमुच्यते—बहुत्वाभावादिति, यदा इदानीमेवोक्तम्—प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थ इति। याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोऽपि।

द्विवचनबहुवचनानुपपत्तिभाष्यम्– यद्येवम्—

(1423. अनुपपत्तिवार्त्तिकम्-13)

*** अन्यवाचकेनान्यस्य वचनानुपपत्तिः ***

भाष्यम्– अन्यवाचकेन शब्देनान्यस्य वचनं नोपपद्यते।

(1424. अनुपपत्तिबाधकवार्त्तिकम्-14)

*** अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत् प्लक्षस्य न्यग्रोधत्वाद् न्यग्रोधस्य प्लक्षत्वात् स्वशब्देनाभिधानम् ***

भाष्यम्– अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेद्। एवमुच्यते—तन्न। किं कारणम्? प्लक्षस्य न्यग्रोधत्वाद् न्यग्रोधस्य च प्लक्षत्वाच्च स्वशब्देनाभिधानं भविष्यति। प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः।

आक्षेपभाष्यम्– कथं पुनः प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः स्यात्, यावता 'कारणाद् द्रव्ये शब्दनिवेशः?'

(1425. वार्त्तिकम्-15)

*** कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम् ***

भाष्यम्– कारणाद् द्रव्ये शब्दनिवेश इति चेद्। एवमुच्यते—तन्न। तुल्यकारणत्वात् सिद्धम्। तुल्यं हि कारणम्। यदि तावत्प्रक्षरतीति व्युत्पत्त्या प्लक्षः स्याद्, न्यग्रोधेप्येतद्भवति। तथा यदि न्यग्रोहतीति न्यग्रोधः, प्लक्षेप्येतद्भवति।

(1426. वार्त्तिकम्-16)

*** दर्शनं वै हेतुः ***

भाष्यम्– न च न्यग्रोधे प्लक्षशब्दो दृश्यते।

(1427. वार्त्तिकम्-17)

*** दर्शनं हेतुरिति चेत्तुल्यम् ***

भाष्यम्– दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति प्लक्षेऽपि न्यग्रोधशब्दो दृश्यते न्यग्रोधेऽपि प्लक्षशब्दः। तुल्यं हि कारणम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– न वै लोके सम्प्रत्ययो भवति। न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते।

(1428. **समाधानवार्त्तिकम्**-18)

*** तद्विषयं च ***

भाष्यम्– तद्विषयं चैतद् द्रष्टव्यं प्लक्षस्य न्यग्रोधत्वम्। किं विषयम्? द्वन्द्वविषयम्।

आक्षेपभाष्यम्– युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः?

समाधानभाष्यम्– बाढं युक्तम्।

(1429. **समाधानसाधकवार्त्तिकम्**-19)

*** अन्यत्रापि तद्विषयदर्शनात् ***

भाष्यम्– अन्यत्रापि हि नियतविषयाः शब्दा दृश्यन्ते। तद्यथा—समाने रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोण इति। समाने च कालेवर्णे गोः कृष्ण इति भवति, अश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति।

आक्षेपभाष्यम्– यदि तर्हि प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः—

(1430. **आक्षेपवार्त्तिकम्**-20)

*** एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः ***

भाष्यम्– एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगो नोपपद्यते—प्लक्षेण न्यग्रोधस्य न्यग्रोध-प्रयोगः।

(1431. **वार्त्तिकम्**-21)

*** एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ***

भाष्यम्– एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेत्। तन्न। किं कारणम्? अनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः। अनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोध-शब्दः प्रयुज्यते। कथमनुक्तः, यावता इदानीमेवोक्तं प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्ष इति? सहभूतावेतावन्योन्यस्यार्थमाहतुः। न पृथग्भूतौ।

आक्षेपभाष्यम्– किं पुनः कारणं सहभूतावेतावन्योऽन्यस्यार्थमाहतुर्न पृथग्भूतौ?

(1432. **समाधानवार्त्तिकम्**-22)

*** अभिधानं पुनः स्वाभाविकम् ***

भाष्यम्– स्वाभाविकमभिधानम्।

समाधानभाष्यम्– अथ वेह कौ चित्प्राथमकल्पिकौ प्लक्षन्यग्रोधौ, कौ चित्क्रियया वा गुणेन वा, प्लक्ष इवायं प्लक्षः—न्यग्रोध इवायं न्यग्रोध इति। तत्र प्लक्षावित्युक्ते संदेहः स्यात्—किमिमौ प्लक्षावेव आहोस्वित्प्लक्षन्यग्रोधाविति। तत्रासंदेहार्थं न्यग्रोधशब्दः प्रयुज्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वपक्षिण आक्षेपोपसंहारभाष्यम्– सेयं युगपदधिकरणवचनता नाम दुःखा च दुरुपपादा च। यच्चाप्यस्या निबन्धनमुक्तम्—द्यावा ह क्षामेति, तदपि च्छान्दसम्। तत्र सुपां सुपो भवन्तीत्येव सिद्धम्। सूत्रं च भिद्यते।

सिद्धान्तिसमाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसम्प्रत्यया-दनिष्टाप्रसङ्गः, इति।

समाधानभाष्यम्– नैष दोषः। इह 'चे द्वन्द्वः' इतीयता सिद्धम्। कथं पुनश्चे नाम वृत्तिः स्यात्। शब्दो ह्येषः? शब्दे कार्यासम्भवादर्थे कार्यं विज्ञास्यते। सोयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनम्—एवं यथा विज्ञायेत—चेन कृतोऽर्थश्चार्थ इति।

कः पुनश्चेन कृतोऽर्थः? समुच्चयः अन्वाचय इतरेतरयोगः समाहार इति। समुच्चये—प्लक्षश्चेत्युक्ते गम्यते एतद्—न्यग्रोधश्चेति, तथा न्यग्रोधश्चेत्युक्ते गम्यते एतत्—प्लक्षश्चेति। अन्वाचये—प्लक्षश्चेत्युक्ते गम्यते एतत्—'सापेक्षोऽयं प्रयुज्यते' इति। इतरेतरयोगे—प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यते एतत्—'प्लक्षोऽपि न्यग्रोधसहायो न्यग्रोधोऽपि प्लक्षसहायः' इति। (प्लक्षश्च न्यग्रोधश्चेत्युक्ते) समाहारेऽपि क्रियते—प्लक्षन्यग्रोधमिति। तत्रायमप्यर्थः—द्वन्द्वैकवद्भावो न पठितव्यो भवति। समाहारैकत्वादेव सिद्धम्।

एकादशादिशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– एकादश द्वादशेति कोऽयं समासः?

(1433. **समाधानवार्त्तिकम्**-23)

*** एकादीनां दशादिभिर्द्वन्द्वः ***

भाष्यम्– एकादीनां सह दशादिभिर्द्वन्द्वः समासः।

(1434. **आक्षेपवार्त्तिकम्**-24)

*** एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रसङ्गः ***

भाष्यम्– एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनं प्राप्नोति। एकविंशतिः। द्वाविंशतिः।

(1435. **समाधानवार्त्तिकम्**-25)

*** सिद्धं त्वधिकान्ता संख्या संख्यया समानाधिकरणाधिकारेऽधिकलोपश्च ***

भाष्यम्– सिद्धमेतत्। कथम्? समानाधिकरणाधिकारे वक्तव्यम्—'अधिकान्ता संख्या संख्यया सह समस्यतेऽधिकशब्दस्य च लोपो भवति' इति। एकाधिका विंशतिः एक-विंशतिः, द्व्यधिका विंशतिः द्वाविंशति।

दूषणभाष्यम्– यदि समानाधिकरणः, स्वरो न सिध्यति। यद्धि तत्—'संख्या पूर्वपदं प्रकृतिस्वरं भवति' इति, 'द्वन्द्वे' इत्येवं तत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याक्षेपभाष्यम्– किं पुनः कारणं द्वन्द्व इत्येवं तत्?

समाधानभाष्यम्– इह मा भूत्—शतसहस्रमिति।

द्वन्द्वाभ्युपगमभाष्यम्– अस्तु तर्हि द्वन्द्वः।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रसङ्गः' इति।

समाधानभाष्यम्– नैष दोषः। सर्वो हि द्वन्द्वो विभाषैकवद्भवति।

आक्षेपभाष्यम्– यदा तर्ह्येकवचनं तदा नपुंसकलिङ्गं प्राप्नोति।

समाधानभाष्यम्– लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य। चार्थे।।29।।

अथ पूर्वनिपातप्रकरणम्

(288. **पूर्वनिपातनियमसूत्रम्** 2.2.2 आ. 7)

450. उपसर्जनं पूर्वम् 2.2.30

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(1436. **समाधानवार्त्तिकम्**- 1)

* उपसर्जनस्य पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् *

भाष्यम्– उपसर्जनस्य पूर्ववचनं क्रियते। परप्रयोगो मा भूदिति।

(1437. **समाधानबाधकवार्त्तिकम्**- 2)

* न वानिष्टादर्शनात् *

भाष्यम्– न वा एतत्प्रयोजनमस्ति। किं कारणम्? अनिष्टादर्शनात्। न हि किञ्चिदनिष्टं दृश्यते। न हि कश्चिद्राजपुरुष इति प्रयोक्तव्ये पुरुषराज इति प्रयुङ्क्ते। यदि चानिष्टं प्रसज्येत ततो यत्नार्हं स्यात्।

आक्षेपभाष्यम्– अथ यत्र द्वे षष्ठ्यन्ते भवतः कस्मात्तत्र प्रधानस्य पूर्वनिपातो न भवति। राज्ञः पुरुषस्य राजपुरुषस्येति?

(1438. **समाधानवार्त्तिकम्**- 3)

* षष्ठ्यन्तयोः समासेऽर्थाभेदात् प्रधानस्यापूर्वनिपातः *

भाष्यम्– षष्ठ्यन्तयोः समासे अर्थाभेदात्प्रधानस्य पूर्वनिपातो न भविष्यति। एवं न चेदमकृतं भवति 'उपसर्जनं पूर्वम्' इति। अर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति। उपसर्जनम्।।30।।

(289. **पूर्वनिपातनियमसूत्रम्** 2.2.2 आ. 8)

454. अल्पाच्तरम् 2.2.34

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरबर्थविचाराधिकरणम्

आक्षेपभाष्यम्– किमयं तन्त्रं तरनिर्देशः, आहोस्विदतन्त्रम्?

प्रत्याक्षेपभाष्यम्– किं चातः?

प्रथमपक्षे दूषणभाष्यम्– यदि तन्त्रम्, द्वयोर्नियमः बहुष्वनियमः। तत्र को दोषः? शङ्खदुन्दुभिवीणानामिति न सिध्यति। दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति।

द्वितीयपक्षे दूषणभाष्यम्– अथातन्त्रम्, 'मृदङ्गशङ्खतूणवाः पृथङ् नदन्ति संसदि' 'प्रासादे धनपतिरामकेशवानाम्' इत्येतन्न सिध्यति।

प्रथमपक्षाङ्गीकारभाष्यम्– यथेच्छसि तथाऽस्तु। अस्तु तावत्तन्त्रम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'द्वयोर्नियमो बहुष्वनियमः' इति तत्र शङ्खदुन्दुभिवीणानामिति न सिध्यति। दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति इति।

समाधानभाष्यम्– नैष दोषः। यदेतद् 'अल्पाच्तरम्' इति, तद् 'अल्पाज्' इति वक्ष्यामीति।

द्वितीयपक्षाभ्युपगमभाष्यम्– अथवा पुनरस्त्वतन्त्रम्।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'मृदङ्गशङ्खतूणवाः पृथङ् नदन्ति संसदि' 'प्रासादे धनपतिरामकेशवानाम्' इत्येतन्न सिध्यति—इति।

(1439. **समाधानवार्त्तिकम्**- 1)

*** अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन समासः ***

भाष्यम्– अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन सह समासः करिष्यते। शङ्खश्च तूणवश्च शङ्खतूणवौ। शङ्खतूणवौ च मृदङ्गश्च मृदङ्गशङ्खतूणवाः। रामश्च केशवश्च रामकेशवौ। रामकेशवौ च धनपतिश्च धनपतिरामकेशवाः धनपतिरामकेशवानामिति।

बहूनां प्राप्तौ नियमाधिकरणम्

आक्षेपभाष्यम्– अथ यत्र बहूनां पूर्वनिपातप्रसङ्गः किं तत्रैकस्य नियमो भवति। आहोस्विदविशेषेण।

(1440. **समाधानवार्त्तिकम्**- 2)

*** अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु ***

भाष्यम्– अनेकस्य प्राप्तावेकस्य नियमो भवति, शेषेष्वनियमः। पटुमृदुशुक्लाः। पटुशुक्लमृदव इति।

न्यूनतापूर्त्यधिकरणम्

(1441. **पूर्वनिपातवार्त्तिकम्**- 3)

*** ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम् ***

भाष्यम्– ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः। शिशिरवसन्तावुदगयनस्थौ। कृत्तिकारोहिण्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1442. पूर्वनिपातवार्त्तिकम्- 4)

*** अभ्यर्हितम् ***

भाष्यम्– अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम्। मातापितरौ। श्रद्धामेधे।

(1443. पूर्वनिपातवार्त्तिकम्- 5)

*** लघ्वक्षरम् ***

भाष्यम्– लघ्वक्षरं पूर्वं निपततीति वक्तव्यम्। कुशकाशम् शरचापम्।

आचार्यान्तरमतप्रदर्शकभाष्यम्– अपर आह—सर्वत एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। लघ्वक्षरादपीति। दीक्षातपसी श्रद्धातपसी।

(1444. पूर्वनिपातवार्त्तिकम्- 6)

*** वर्णानामानुपूर्व्येण ***

भाष्यम्– वर्णानामानुपूर्व्येण पूर्वनिपातो भवतीति वक्तव्यम्। ब्राह्मणक्षत्रियविट्शूद्राः।

(1445. पूर्वनिपातवार्त्तिकम्- 7)

*** भ्रातुश्च ज्यायसः ***

भाष्यम्– भ्रातुश्च ज्यायसः पूर्वनिपातो भवतीति वक्तव्यम्। युधिष्ठिरार्जुनौ।

(1446. पूर्वनिपातवार्त्तिकम्- 8)

*** संख्याया अल्पीयसः ***

भाष्यम्– संख्याया अल्पीयसः पूर्वनिपातो भवतीति वक्तव्यम्। एकादश द्वादश।

(1447. पूर्वनिपातवार्त्तिकम्- 1)

*** धर्मादिषूभयम् ***

भाष्यम्– धर्मादिषूभयं पूर्वं निपततीति वक्तव्यम्। धर्मार्थौ अर्थधर्मौ। कामार्थौ अर्थकामौ। गुणवृद्धी वृद्धिगुणौ। आद्यन्तौ अन्तादी। अल्पाच्तरम्।।34।।

(290. पूर्वनिपातनियमसूत्रम् 2.2.2. आ. 9)

455 सप्तमीविशेषणे बहुव्रीहौ 2.2.35

न्यूनतापूरणाधिकरणम्

(1448. पूर्वनिपातवार्त्तिकम्- 2)

*** बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम् ***

भाष्यम्– बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानं कर्तव्यम्। विश्वदेवः। विश्वयशाः। द्विपुत्रः। द्विभार्यः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– अथ यत्र संख्यासर्वनाम्नोरेव बहुव्रीहिः कस्य तत्र पूर्वनिपातेन भवितव्यम्?

समाधानभाष्यम्– परत्वात्संख्यायाः—द्व्यन्याय त्र्यन्याय।

(1449. **पूर्वनिपातवार्त्तिकम्**-3)

*** वा प्रियस्य ***

भाष्यम्– वा प्रियस्य पूर्वनिपातो भवतीति वक्तव्यम्। प्रियगुडः गुडप्रियः।

(1450. **पूर्वनिपातबाधकवार्त्तिकम्**-4)

*** सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम् ***

भाष्यम्– सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परा सप्तमी भवतीति वक्तव्यम्। गडुकण्ठः गडुशिराः। सप्तमी वि.।।35।।

(291. **पूर्वनिपातनियमसूत्रम्** 2.2.2 आ. 10)

456. निष्ठा 2.2.36

पूर्वनिपातबाधकाधिकरणम्

(1451. **परनिपातवार्त्तिकम्**-1)

*** निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् ***

भाष्यम्– निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परा निष्ठा भवतीति वक्तव्यम्। शार्ङ्गजग्धी। पलाण्डुभक्षिती। मासजाता। संवत्सरजाता। सुखजाता। दुःखजाता।

(1452. **प्रत्याख्यानवार्त्तिकम्**-2)

*** न वोत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य ***

भाष्यम्– न वा वक्तव्यम्। कि कारणम्? उत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य। यदयं जातिकालसुखादिभ्यः परस्या निष्ठाया उत्तरपदस्यान्तोदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः—परात्र निष्ठा भवतीति।

(1453. **आक्षेपवार्त्तिकम्**-3)

*** प्रतिषेधे तु पूर्वनिपातप्रसङ्गस्तस्माद्राजदन्तादिषु पाठः ***

भाष्यम्– प्रतिषेधे तु पूर्वनिपातः प्राप्नोति 'अकृतमितप्रतिपन्नाः इति, तस्माद्राजदन्तादिषु पाठः कर्तव्यः।

(1454. **पाठकर्तव्यता प्रत्याख्यानवार्त्तिकम्**-4)

*** नवा प्रतिषेधवचनं ज्ञापकं परभावस्य ***

भाष्यम्– न वा कर्तव्यः। अत्रापि प्रतिषेधवचनं ज्ञापकम्—परा निष्ठा भवतीति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1455. परनिपातवार्त्तिकम्-5)

*** प्रहरणार्थेभ्यश्च ***

भाष्यम्– प्रहरणार्थेभ्यश्च परे निष्ठा सप्तम्यौ भवत इति वक्तव्यम्। अस्युद्यतः मुसलोद्यतः अनसिपाणिः दण्डपाणिः।

विप्रतिषेधाधिकरणम्

(1456. द्वन्द्वेघिसूत्रादजाद्यदन्तसूत्रबलवत्त्ववार्त्तिकम्-6)

*** द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन ***

भाष्यम्– 'द्वन्द्वे घि' इत्यस्मात् 'अजाद्यदन्तम्' इत्येतद्भवति विप्रतिषेधेन। 'द्वन्द्वे घि' इत्यस्यावकाशः—पटुगुप्तौ। 'अजाद्यदन्तम्' इत्यस्यावकाशः—उष्ट्रस्वरौ। इहोभयं प्राप्नोति—इन्द्राग्नी। 'अजाद्यदन्तम्' इत्येतद् भवति विप्रतिषेधेन।

(1457. द्वन्द्वेघिसूत्राजाद्यदन्तसूत्राभ्यामल्पाच्तरसूत्रबलीय-स्त्ववार्त्तिकम्-7)

*** उभाभ्यामल्पाच्तरम् ***

भाष्यम्– उभाभ्याम् 'अल्पाच्तरम्' इत्येतद्भवति विप्रतिषेधेन। 'द्वन्द्वे घि' इत्यस्यावकाशः—पटुगुप्तौ। 'अल्पाच्तरम्' इत्यस्यावकाशः—वाग्दृषदौ। इहोभयं प्राप्नोति—वागग्नी। 'अल्पाच्तरम्' इत्येतद्भवति विप्रतिषेधेन।

'अजाद्यदन्तम्' इत्यस्यावकाशः—उष्ट्रखरौ। 'अल्पाच्तरम्' इत्यस्यावकाशः—वाग्दृषदौ। इहोभयं प्राप्नोति—वागिन्द्रौ। 'अल्पाच्तरम्' इत्येतद्भवति विप्रतिषेधेन। निष्ठा।।36।।

(292. पूर्वनिपातसूत्रम् 2.2.2 आ. 11)

458. कडाराः कर्मधारये 2.2.38

बहुवचनस्याद्यर्थकत्वबोधनाधिकरणम्

(1458. वार्त्तिकम्-8)

*** कडारादयः ***

भाष्यम्– कडारादय इति वक्तव्यम्। इहापि यथा स्यात्—गडुलशाण्डिल्यः शाण्डिल्यगडुलः। खण्डवात्स्यः। वात्स्यखण्डः।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। बहुवचननिर्देशात् कडारादय इति विज्ञास्यते। कडाराः।।38।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्; पादश्चायं समाप्तः

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयेऽध्याये तृतीये पादे प्रथममाह्निकम्

विभक्त्यर्थप्रकरणम्

(293. अधिकारसूत्रम् 2.3.1 आ. 1)

459. अनभिहिते 2.3.1

अनभिहितशब्दार्थनिरूपणाधिकरणम्

आक्षेपभाष्यम्– अनभिहित इत्युच्यते। किमिदमनभिहितं नाम?

समाधानभाष्यम्– 'उक्तम्, निर्दिष्टम्, अभिहितम्' इत्यनर्थान्तरम्। यावद् ब्रूयाद्— 'अनुक्ते, अनिर्दिष्टे' इति, तावद् 'अनभिहिते' इति।

सूत्रप्रयोजनाधिकरणम्

(1459. प्रत्याख्यानवार्त्तिकम्-1)

*** अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते ***

भाष्यम्– अनभिहितवचनमनर्थकम्। किं कारणम्? अन्यत्रापि विहितस्याभावादभिहिते। अन्यत्राप्यभिहिते विहितं न भवति। क्वान्यत्र? चित्रगुः, शबलगुः, बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति। गर्गाः, वत्साः, बिदाः, उर्वाः, यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवति। सप्तपर्णोऽष्टापद इति समासेनोक्तत्वाद्वीप्साया द्विर्वचनं न भवतीति।

प्रथमदृष्टान्तनिरसनभाष्यम्– यत्तावदुच्यते—चित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवतीति। अस्तिसामानाधिकरण्ये मतुब्विधीयते। न चात्रास्तिना सामानाधिकरण्यम्।

द्वितीयदृष्टान्तनिरसनभाष्यम्– यदप्युच्यते—गर्गा वत्सा बिदा उर्वा इति यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवतीति। 'समर्थानां प्रथमाद्वा' इति वर्तते। न चैतत्समर्थानां प्रथमम्। किं तर्हि? द्वितीयमर्थमुपसंक्रान्तम्।

तृतीयदृष्टान्तनिरसनभाष्यम्– यदप्युच्यते—सप्तपर्णोऽष्टापद इति समासेनोक्तत्वाद् वीप्साया द्विर्वचनं न भवतीति। यदत्र वीप्सायुक्तं नादः प्रयुज्यते। किं पुनस्तत्? पर्वणि पर्वणि सप्त पर्णान्यस्य। पङ्क्तौ पङ्क्तावष्टौ पदानीति।

दृष्टान्तान्तरभाष्यम्– श्नम्बहुजकक्षु तर्हि। श्नम्—भिनत्ति छिनत्ति। श्नमोक्तत्वात्कर्तृत्वस्य कर्तरि शब् न भवति। बहुच्—बहुकृतं बहुभिन्नमिति बहुचोक्तत्वादीषदसमाप्तेः कल्पबादयो न भवन्ति। अकच्—उच्चकैः नीचकैरिति अकचोक्तत्वात्कुत्सादीनां कादयो न भवन्ति।

दृष्टान्तवाधकभाष्यम्– ननु च श्नम्बहुजकचोपवादास्ते अपवादत्वाद्बाधका भविष्यन्ति।

(1460.दृष्टान्तसाधकवार्त्तिकम्-2)

*** श्नम्बहुजकक्षु नानादेशत्वाद् उत्सर्गाप्रतिषेधः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– समानदेशैरपवादैरुत्सर्गाणां बाधनं भवति। नानादेशत्वान्न प्राप्नोति।

सूत्रप्रयोजनकथनाधिकरणम्

आरम्भवादिभाष्यम्– किं पुनरिहाकर्तव्योनभिहिताधिकार: क्रियते। आहोस्विदन्यत्र कर्तव्यो न क्रियते?

प्रत्याख्यानवादिभाष्यम्– इहाकर्तव्य: क्रियते। एष एव हि न्याय्य:—यदभिहिते विहितं न स्यात्।

(1461. **आरम्भवादिसमाधानवार्त्तिकम्**- 3)

*** अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम्**

(अभिहिते हि प्रथमाभाव:) *

भाष्यम्– अनभिहितस्तु विभक्त्यर्थ:। क: पुनर्विभक्त्यर्थ:? एकत्वादयो विभक्त्यर्था:। तेष्वनभिहितेषु (सत्सु) कर्मादयोभिहिता विभक्तीनामुत्पत्तौ निमित्तत्वाय मा भूवन्निति। तस्मादनभिहितवचनम्। तस्मादनभिहिताधिकार: क्रियते। अवश्यं चैतदेवं विज्ञेयम्—एकत्वादयो विभक्त्यर्था इति। अभिहिते हि प्रथमाभाव:। यो हि मन्यते—कर्मादयो विभक्त्यर्था:, तेष्वभिहितेषु सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्न भविष्यतीति। प्रथमा तस्य न प्राप्नोति। क्व? वृक्ष: प्लक्ष:। किं कारणम्? प्रातिपदिकेनोक्त: प्रातिपदिकार्थ इति।

प्रत्याख्यानवादिभाष्यम्– न क्वचित्प्रातिपदिकेनानुक्त: प्रातिपदिकार्थ:। उच्यते च प्रथमा। सा वचनाद्भविष्यति। तवैव तु खल्वेष दोष:—यस्य ते एकत्वादयो विभक्त्यर्था:। 'अभिहिते प्रथमाऽभाव' इति प्रथमा ते न प्राप्नोति। क्व? पचत्योदनं देवदत्त इति। किं कारणम्? तिङोक्ता एकत्वादय इति। अनभिहिताधिकारं च त्वं करोषि, परिगणनं च।

आरम्भवादिभाष्यम्– न क्वचित्तिङा एकत्वादीनामनभिधानम्। उच्यते च प्रथमा। सा वचनाद्भविष्यति।

प्रत्याख्यानबाद्याक्षेपभाष्यम्– ननु चेहानभिधानम्—वृक्ष: प्लक्ष: इति।

आरम्भवादिसमाधानभाष्यम्– अत्राप्यभिधानमस्ति। कथम्? वक्ष्यत्येतद्—'अस्तिर्भवन्तीपर: प्रथमपुरुषोऽप्रयुज्यमानोप्यस्ति' इति। वृक्ष: प्लक्ष: 'अस्ति' इति गम्यते। तवैव तु खल्वेष दोष:—(यस्य ते कर्मादयो विभक्त्यर्था:) अभिहिते प्रथमाभाव इति प्रथमा ते प्राप्नोति। क्व? कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति। कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति। का तर्हि प्राप्नोति? प्रथमा। तद्यथा—'कृत: कटो भीष्म उदार: शोभनो दर्शनीय:' इति करोतेरुत्पद्यमानेन क्तेनाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न भवति। का तर्हि? प्रथमा भवति।

प्रत्याख्यानवादिभाष्यम्– नैष दोष:। न हि ममानभिहिताधिकारोऽस्ति। नापि परिगणनम्। सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्भविष्यति। अस्ति च सामर्थ्यम्। किम्? कर्मविशेषो वक्तव्य:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा कटोऽपि कर्म, भीष्मादयोऽपि। तत्र 'कर्मणि' इत्येव सिद्धम्। अथवा कट एव कर्म, तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया भविष्यति।

अस्ति खल्वपि विशेषः—कटं करोति भीष्ममुदारं दर्शनीयं शोभनमिति च 'कृतः कटः भीष्म उदारः शोभनो दर्शनीय' इति च करोतेरुत्पद्यमानः क्तः अनवयवेन सर्वं कर्माभिधत्ते, कटशब्दात्पुनरुत्पद्यमानया द्वितीयया यत् कटस्थं कर्म तत् शक्यमभिधातुं न कर्मविशेषः।

तवैव तु खल्वेष दोषः (यस्य ते एकत्वादयो विभक्त्यर्थाः) 'अभिहिते प्रथमाऽभावः' इति प्रथमा ते न प्राप्नोति। क्व? एको द्वौ बहव इति। किं कारणम्? प्रातिपदिकेनोक्ता एकत्वादय इति।

आरम्भवादिभाष्यम्– कर्मादिष्वपि वै विभक्त्यर्थेषु अवश्यमेकत्वादयो निमित्तत्वेनोपादेयाः—कर्मण एकत्वे, कर्मणो द्वित्वे, कर्मणो बहुत्वे, इति। न चैकत्वादीनामेकत्वादयः सन्ति। अथ सन्ति, समापि सन्ति। तेष्वनभिहितेषु प्रथमा भविष्यति।

अथवा उभयवचना ह्येते द्रव्यं चाहुर्गुणं च। यत्स्थोऽसौ गुणः तस्यानुक्ता एकत्वादय इति कृत्वा प्रथमा भविष्यति।

अथवा संख्या नामेयं परप्रधाना संख्येयमनया विशेष्यम्। यदि चात्र प्रथमा न स्यात्। संख्येयमविशेषितं स्यात्।

अथवा वक्ष्यति तत्र वचनग्रहणस्य प्रयोजनम्—उक्तेष्वष्वप्येकत्वादिषु प्रथमा यथा स्यादिति। अथवा समयाद्भविष्यति।

आक्षेपभाष्यम्– यदि सामयिकी, न नियोगतः। अन्याः कस्मान्न भवन्ति?

समाधानभाष्यम्– कर्मादीनामभावात्।

आक्षेपभाष्यम्– षष्ठी तर्हि प्राप्नोति?

समाधानभाष्यम्– शेषलक्षणा षष्ठी। अशेषत्वान्न भविष्यति।

आक्षेपभाष्यम्– एवमपि व्यतिकरः प्राप्नोति—एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः द्वयोरप्येकवचनबहुवचने प्राप्नुतः बहुष्वप्येकवचनद्विवचने प्राप्नुतः।

समाधानभाष्यम्– अर्थतो व्यवस्था भविष्यति।

परिगणनाधिकरणम्

भाष्यम्– परिगणनं कर्तव्यम्।

(1462. **परिगणनवार्त्तिकम्**-4)

* **तिङ्कृत्तद्धितसमासैः परिसंख्यानम्** (उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिवचनम्) *

भाष्यम्– तिङ्कृत्तद्धितसमासैः परिसंख्यानं कर्तव्यम्। तिङ्—क्रियते कटः। तिङ्। कृत्—कृतः कटः। कृत्। तद्धितः—औपगवः कापटवः। तद्धितः। समास—चित्रगुः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शबलगु:। समास। उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिवचनम्। उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिर्वक्तव्या। क्व? कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति। कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति।

आक्षेपभाष्यम्– का तर्हि स्यात्?

समाधानभाष्यम्– षष्ठी।

प्रत्याख्यानवादिभाष्यम्– शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। अन्या अपि न प्राप्नुवन्ति। किं कारणम्? कर्मादीनामभावात्। समयश्च कृत:—'न केवला प्रकृति: प्रयोक्तव्या न च केवल: प्रत्यय:' इति। न चान्या उत्पद्यमाना एतमभिसम्बन्धमुत्सहते वक्तुमिति कृत्वा द्वितीया भविष्यति।

अथवा कटोऽपि कर्म भीष्मादयोऽपि, तत्र 'कर्मणि' इत्येव सिद्धम्।

अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया भविष्यति। तस्मान्नार्थ: परिगणनेन।

गुणप्रधानक्रिययो: प्रधानानभिहितग्रहणाधिकरणम्

(1463. **आक्षेपवार्त्तिकम्**- 5)

*** द्वयो: क्रिययो: कारकेन्यतरेणाभिहिते विभक्त्यभावप्रसङ्ग: ***

भाष्यम्– द्वयो: क्रिययो: कारकेऽन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति। क्व? प्रासादे आस्ते शयने आस्त इति। किं कारणम्? सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा सप्तमी न प्राप्नोति।

(1464. **बाधकवार्त्तिकम्**- 6)

* **न वाऽन्यतरेणानभिधानात्** (अनभिहिते हि विधानम्) *

भाष्यम्– न वा एष दोष:। किं कारणम्? अन्यतरेणानभिधानात्। अन्यतरेणात्रानभिधानम्। सदिप्रत्ययेनाभिधानम् आसिप्रत्ययेनानभिधानम्। यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति।

कुतो नु खल्वेतत्सत्यभिधाने चानभिधाने चानभिहिताश्रया सप्तमी भविष्यति, न पुनरभिहिताश्रय: प्रतिषेध इति?

अनभिहिते हि विधानम्। अनभिहिते हि सप्तमी विधीयते। नाभिहिते प्रतिषेध:।

आक्षेपसाधकभाष्यम्– यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया। यत्र तु खलु सैव क्रिया तत्र कथम्—आसने आस्ते शयने शेत इति।

आक्षेपबाधकभाष्यम्– अत्राप्यन्यत्वमस्ति। कुत:? साधनभेदात्कालभेदाच्च। एकस्यात्रासेरासि: साधनम्, सर्वकालश्च प्रत्यय:। अपरस्य वाह्यं साधनम्, वर्तमानकालश्च प्रत्यय:।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधननिर्णयाधिकरणम्

आक्षेपभाष्यम्– किं पुनर्द्रव्यं साधनम्। आहोस्विद् गुणः? किं चातः?

यदि द्रव्यं साधनम्, नैतदन्यद्भवत्यभिहितात्। अथ हि गुणः साधनम्, भवत्येतदन्यदभिहितात्। अन्यो हि सदिगुणः। अन्यश्चासिगुणः। किं पुनः साधनं न्याय्यम्?

समाधानभाष्यम्– गुण इत्याह। कथं ज्ञायते? एवं हि कश्चित्कं चित्पृच्छति— क्व देवदत्त इति। स तस्मायाचष्टे—'असौ वृक्षे' इति। कतरस्मिन्? यस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसम्बन्ध्यमानः कर्ता सम्पद्यते। द्रव्ये पुनः साधने सति यत्कर्म कर्मैव स्यात्, यत् करणं करणमेव, यदधिकरणमधिकरणमेव।

प्रत्याख्यानाधिकरणम्

(1465. प्रत्याख्यानप्रतिज्ञाहेतुवार्त्तिकम्-7)

*** अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात् ***

भाष्यम्– अनभिहितवचनमनर्थकम्। किं कारणम्? प्रथमाविधानस्यानवकाशत्वात्। अनवकाशा प्रथमा सा वचनाद्भविष्यति।

प्रत्याख्यानहेतुबाधकभाष्यम्– सावकाशा प्रथमा। कोऽवकाशः? अकारकम्— वृक्षः प्लक्ष इति।

(1466. प्रत्याख्यानहेतुसाधकवार्त्तिकम्-8)

*** अवकाशोऽकारकमिति चेन्नास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति ***

भाष्यम्– अवकाशोऽकारकमिति चेत्। तन्न। किं कारणम्? अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते। 'वृक्षः' 'प्लक्षः' अस्तीति गम्यते।

(1467. प्रत्याख्यानहेत्वन्तरवार्त्तिकम्-9)

*** विप्रतिषेधाद्वा प्रथमाभावः ***

भाष्यम्– अथवा द्वितीयादयः क्रियन्ताम्, प्रथमा वेति। प्रथमा भविष्यति विप्रतिषेधेन। द्वितीयादीनामवकाशः—कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति। प्रथमाया अवकाशः— अकारकं वृक्षः प्लक्ष इति। इहोभयं प्राप्नोति—कृतः कटो भीष्मः उदारः शोभनो दर्शनीय इति। प्रथमा भविष्यति विप्रतिषेधेन।

हेत्वन्तरबाधकभाष्यम्– न सिध्यति। परत्वात् षष्ठी प्राप्नोति।

हेत्वन्तरभाष्यम्– शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति।

(1468. प्रत्याख्याननिराकरणवार्त्तिकम्-10)

*** कृत्प्रयोगे तु परं विधानं षष्ठ्यास्तत्प्रतिषेधार्थम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– कृत्प्रयोगे तु परत्वात्षष्ठी प्राप्नोति। तत्प्रतिषेधार्थमनभिहिताधिकार: कर्तव्य:। कर्तव्य: कट इति। स कथं कर्तव्य:? यद्येकत्वादयो विभक्त्यर्था:। अथ हि कर्मादयो विभक्त्यर्था: नार्थोऽनभिहिताधिकारेण। अनभिहि।।1।।

(294. **द्वितीयानियमसूत्रम्** 2.3.1 आ. 2)

460. कर्मणि द्वितीया 2.3.2

शेषपूरणाधिकरणम्

(1469. **द्वितीयाविधायकवार्त्तिकम्**- 1)

*** समायानिकषाहायोगेषूपसंख्यानम् ***

भाष्यम्– समयानिकषाहायोगेषूपसंख्यानं कर्तव्यम्। समया—समया ग्रामम्। निकषा—निकषा ग्रामम्। निकषा। हायोगे—हा देवदत्तम्, हा यज्ञदत्तम्।

भाष्यम्– अपर आह—

(1470. **द्वितीयाविधायकवार्त्तिकान्तरम्**- 2)

*** द्वितीयाविधानेऽभित:परित:समयानिकषाऽध्यधिधिग्योगेषूप-संख्यानम् ***

भाष्यम्– द्वितीयाविधानेऽभित:परित:समयानिकषाऽध्यधिधिग्योगेषूपसंख्यानं कर्तव्यम्। अभितो ग्रामम्। अभित:। परितो ग्रामम्। परित:। समया ग्रामम्। समया। निकषा ग्रामम्। निकषा। अध्यधि ग्रामम्। अध्यधि। धिंग्जाल्मम्। धिग् वृषलम्। धिग्।

अपर आह—

(1471. **द्वितीयाविधायकवार्त्तिकान्तरम्**- 3)

उभसर्वतसो: कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।

उभसर्व इत्येताभ्यां योगे द्वितीया वक्तव्या। उभयतो ग्रामम्। सर्वतो ग्रामम्। धिग्योगे—धिग् जाल्मम् धिग् वृषलम्। उपर्यादिषु त्रिष्वाम्रेडितान्तेषु द्वितीया वक्तव्या। उपर्युपरि ग्रामम्। अध्यधि ग्रामम्। अधोऽधो ग्रामम्। ततोऽन्यत्रापि दृश्यते। न देवदत्तं प्रति भाति किं चित्। बुभुक्षितं न प्रति भाति किञ्चित्। कर्मणि द्वि।।2।।

(295. **द्वितीयातृतीयासूत्रम्** 2.3.1 आ. 3)

461. तृतीया च होश्छन्दसि 2.3.3

प्रयोजनाधिकरणम्

प्रत्याख्यानायपूर्वपक्षिणआक्षेपभाष्यम्– किमर्थमिदमुच्यते?

सिद्धान्तिन:सूत्रप्रयोजनभाष्यम्– तृतीया यथा स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वपक्षिणआक्षेपभाष्यम्– अथ द्वितीया सिद्धा?

सिद्धान्तिनः समाधानभाष्यम्– सिद्धा। कथम्? 'कर्मणि' इत्येव।

पूर्वपक्षिणः सूत्रवैयर्थ्यभाष्यम्– तृतीयामपि सिद्धा। कथम्? 'सुपां सुपो भवन्ति' इत्येव।

सिद्धान्तिनः सूत्रसार्थक्यभाष्यम्– असत्वेतस्मिन्—'सुपां सुपो भवन्ति' इति तृतीयार्थोऽयमारम्भः। यवाग्वाग्निहोत्रं जुहोति।

एकदेशिनः पूर्वपक्षिणो वा प्रत्याख्यानभाष्यम्– एवं तर्हि तृतीयापि सिद्धा। कथम्? 'कर्तृकर यणयोः' इत्येव। अयमग्निहोत्रशब्दोस्त्येव ज्योतिषि वर्तते। तद्यथा—अग्निहोत्रं प्रज्वलितमिति। अस्ति हविषि वर्तते। तद्यथा—अग्निहोत्रं जुहोतीति। जुहोतिश्चास्त्येव प्रक्षेपणे वर्तते। अस्ति प्रीणात्यर्थे वर्तते। तद्यदा तावद्यवागूशब्दात्तृतीया, तदाग्निहोत्रशब्दो ज्योतिषि वर्तते, जुहोतिश्च प्रीणात्यर्थे। तद्यथा—'यवाग्वाग्निहोत्रं जुहोति' अग्निं प्रीणाति। यदा यवागूशब्दाद् द्वितीया तदाग्निहोत्रशब्दो हविषि वर्तते जुहोतिश्च प्रक्षेपणे। तद्यथा—'यवागूमग्निहोत्रं जुहोति' यवागूंहविरग्नौ प्रक्षिपति। तृतीया च।।3।।

(296. **द्वितीयासूत्रम्** 2.3.1 **आ.** 4)

462. अन्तरान्तरेण युक्ते 2.3.4

अन्तरेणेतिशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—किं ते बाभ्रवशालङ्कायननामन्तरेण गतेनेति?

समाधानभाष्यम्– 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति। अथवा यद्यपि तावदयमन्तरेणशब्दो दृष्टापचारो निपातश्चानिपातश्च।

अयं तु खल्वन्तराशब्दोऽ-दृष्टापचारः निपात एव। तस्यास्य कोऽन्यः सहायो द्वितीयो भवितुमर्हति—अन्यदतो निपातात्। तद्यथा—अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते, नाश्वो न गर्दभः।

(1472. **वार्त्तिकम्**-1)

❋ अन्तरान्तरेणयुक्तानामप्रधानवचनम् ❋

भाष्यम्– अन्तरान्तरेणयुक्तानामप्रधानग्रहणं कर्त्तव्यम्। अप्रधाने द्वितीया भवतीति वक्तव्यम्। अन्तरा त्वां मां च कमण्डलुरिति कमण्डलोर्द्वितीया मा भूदिति।

आक्षेपभाष्यम्– कः पुनरेताभ्यां कमण्डलोर्योगः?

समाधानभाष्यम्– यत्तत्वां च मां चान्तरां तत्कमण्डलोः स्थानम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। कमण्डलोर्द्वितीया कस्मान्न भवति? 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति प्रथमा भविष्यति। अन्तरान्तरे।।4।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालवाचकाध्ववाचकाभ्यां विभक्तिनियमप्रकरणम्

(297. **द्वितीयासूत्रम्** 2.3.1 आ. 5)

463. कालाध्वनोरत्यन्तसंयोगे 2.3.5

कालाध्वनोरुक्ततया प्रथमासाधनाधिकरणम्

(1473. **वार्त्तिकम्**-1)

* अत्यन्तसंयोगे कर्मवल्लाद्यर्थम् *

भाष्यम्– अत्यन्तसंयोगे कालाध्वानौ कर्मवद्भवत इति वक्तव्यम्। किं प्रयोजनम्? लाद्यर्थम्। लादिभिरभिधानं यथा स्यात्—(लादिभिरभिहिते द्वितीया मा भूत्) आस्यते मासः, शय्यते क्रोशः।

अथ वत्करणं किमर्थम्? स्वाश्रयमपि यथा स्यात्—आस्यते मासम्, शय्यते क्रोशम्, अकर्मकाणां भावे लो भवतीति भावे लो यथा स्यात्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। प्राकृतमेवैतत् कर्म। यथा कटं करोति शकटं करोतीति।

एकदेशिभाष्यम्– एवं मन्यते—यत्र कश्चित्क्रियाकृतो विशेष उपजायते, तन्न्याय्यं कर्मेति। न चेह कश्चित्क्रियाकृतो विशेष उपजायते।

सिद्धान्तिभाष्यम्– नैवं शक्यम्। इह हि दोषः स्यात्—आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीति। तस्मात्प्राकृतमेवैतत्कर्म। यथा—कटं करोति, शकटं करोतीति।

आक्षेपभाष्यम्– यदि तर्हि प्राकृतमेवैतत्कर्म, 'अकर्मकाणां भावे लो भवतीति भावे लो न प्राप्नोति—आस्यते मासं देवदत्तेनेति?

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। अकर्मकाणामित्युच्यते। न च केचित्कालभावादिभिरकर्मकाः। त एवं विज्ञास्यामः—'क्वचिद्ये अकर्मका' इति।

अथवा 'येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणाम्' न चैतेन कर्मणा कश्चिदप्यकर्मकः।

अथवा 'यत्कर्म भवति, न च भवति, तेनाकर्मकाणाम्' न चैतत्कर्म क्वचिदपि न भवति।

सूत्रस्थापनाधिकरणम्

आक्षेपभाष्यम्– न तर्हीदानीमिदं सूत्रं वक्तव्यम्?

समाधानभाष्यम्– वक्तव्यं च। किं प्रयोजनम्? यत्राक्रिययात्यन्तसंयोगः तदर्थम्–क्रोशं कुटिला नदी, क्रोशं रमणीया वनराजिः। कालाध्वनोः।।5।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(298. द्वितीयाबाधकतृतीयासूत्रम् 2.3.1 आ. 6)

464. अपवर्गे तृतीया 2.3.6

अनिष्टापत्तिवारणाधिकरणम्

(1474. नियमवार्त्तिकम्-1)

*** क्रियापवर्गे ***

भाष्यम्– क्रियाऽपवर्ग इति वक्तव्यम्। साधनापवर्गे मा भूद्— पासमधीतोऽनुवाको न चानेन गृहीत इति। अपवर्गे।।6।।

(299. सप्तमीपञ्चमीसूत्रम् 2.3.1 आ. 7)

465. सप्तमीपञ्चम्यौ कारकमध्ये 2.3.7

न्यूनतापूर्त्यधिकरणम्

(1475. विवक्षितपूर्तिवार्त्तिकम्-1)

*** क्रियामध्ये ***

भाष्यम्– क्रियामध्य इति वक्तव्यम्। इहापि यथा स्यात्—अद्य देवदत्तो भुक्त्वा द्व्यहाद्भोक्ता, द्व्यहे भोक्ता। कारकमध्य इतीयत्युच्यमाने इहैव स्यात्—इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यं विध्यति, क्रोशे लक्ष्यं विध्यति। यं च विध्यति यतश्च विध्यति तयोस्तन्मध्यं भवति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं चेत्कारकमध्यमपि भवति। तत्र 'कारकमध्ये' इत्येव सिद्धम्। सप्तमीपञ्चम्यौ।।7।।

कर्मप्रवचनीययोगे विभक्तिनियमप्रकरणम्

(300. द्वितीयासूत्रम् 2.3.1 आ. 8)

466. कर्मप्रवचनीययुक्ते द्वितीया 2.3.8

अर्थनियमाधिकरणम्

(1476. अर्थनियमवार्त्तिकम्-1)

*** कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं सप्तमीपञ्चम्योः प्रतिषेधार्थम् ***

भाष्यम्– कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं कर्तव्यम्। वृक्षं प्रति विद्योतते विद्युत्, वृक्षं परि विद्योतते विद्युत्, वृक्षमनु विद्योतते विद्युत्। साधुर्देवदत्तो मातरं प्रति। साधुर्देवदत्तो मातरं परि। साधुर्देवदत्तो मातरमनु। किं प्रयोजनम्? सप्तमीपञ्चम्योः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिषेधार्थम्। सप्तमीपञ्चम्यौ मा भूतामिति। 'साधुनिपुणाभ्यामर्चायां सप्तमी' इति सप्तमी, 'पञ्चम्यपाङ्परिभि:' इति पञ्चमी। तत्रायमप्यर्थ:—अप्रतेरिति न वक्तव्यं भवति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। उक्तं वा। किमुक्तम्? एकत्र तावदुक्तम्—अप्रतेरिति। इतरत्रापि—यद्यपि तावदयं परिर्दृष्टापचारो वर्जने चावर्जने च। अयं खल्वपशब्दोऽदृष्टापचारो वर्जनार्थ एव। तस्य कोऽन्यो द्वितीय: सहायो भवितुमर्हति—अन्यदतो वर्जनार्थात्। तद्यथा—अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभ:। कर्मप्रवचनीययु।।8।।

(301. **कर्मप्रवचनीये सप्तमीसूत्रम्** 2.3.1 आ. 9)

467. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी 2.3.9

ईश्वरवचनशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– कथमिदं विज्ञायते—यस्य चैश्वर्यमीश्वरता ईश्वरभावस्तस्मात्कर्मप्रवचनीययुक्तादिति। आहो स्विद् यस्य स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति?

भाष्यम्– कश्चात्र विशेष:?

(1477. **प्रथमपक्षदूषणवार्त्तिकम्**-1)

* यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम् *

भाष्यम्– यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदन्तरेण वचनं सिद्धम्। अधि ब्रह्मदत्ते पञ्चाला:। आधृतास्ते तस्मिन् भवन्ति। सत्यमेवमेतत्—नित्यं परिग्रहीतव्यं परिग्रहीत्रधीनं भवति।

(1478. **द्वितीयदूषणवार्त्तिकम्**-2)

* प्रथमानुपपत्तिस्तु *

भाष्यम्– प्रथमा नोपपद्यते। कुत:? पञ्चालेभ्य:।

आक्षेपभाष्यम्– का तर्हि स्यात्?

समाधानभाष्यम्– षष्ठीसप्तम्यौ 'स्वामीश्वराधिपतिदायाद' इति।

बाधकभाष्यम्– न तत्राधिशब्द: पठ्यते।

साधकभाष्यम्– यद्यपि न पठ्यते। अधिरीश्वरवाची।

बाधकभाष्यम्– न तत्र पर्यायवचनानां ग्रहणं भवति। कथं ज्ञायते? यदयं कस्यचित्पर्यायवचनस्य ग्रहणं करोति—'अधिपतिदायाद' इति।

समाधानान्तरभाष्यम्– षष्ठी तर्हि प्राप्नोति।

बाधकभाष्यम्– शेषलक्षणा षष्ठी: अशेषत्वान्न भविष्यति।

समाधानान्तरभाष्यम्– द्वितीया तर्हि प्राप्नोति 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाधकभाष्यम्– सप्तम्योक्तत्वात्तस्यार्थस्य द्वितीया न भविष्यति।

साधकभाष्यम्– भवेद्योऽधेर्ब्रह्मदत्तस्य चाभिसम्बन्धः स सप्तम्योक्तः स्यात्। यस्तु खल्वधेः पञ्चालानां चाभिसम्बन्धस्तत्र द्वितीया प्राप्नोति।

(1479. शेषपूर्तिवार्त्तिकम्-3)

*** स्ववचनात्तु सिद्धम् ***

भाष्यम्– अस्तु—यस्य स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति।

स्वस्मिन्नपि सप्तमीविधानानर्थक्याक्षेपभाष्यम्– एवमप्यन्तरेण वचनं सिद्धम्। अधि ब्रह्मदत्तः पञ्चालेषु—आधृतः स तेषु भवति। सत्यमेवमेतत्—नित्यं परिग्रहीता परिग्रहीतव्याधीनो भवति।

द्वितीयदूषणभाष्यम्– प्रथमानुपपत्तिस्तु। प्रथमा तु नोपपद्यते। कुतः? ब्रह्मदत्तात्।

प्रत्याक्षेपभाष्यम्– का तर्हि स्यात्?

समाधानभाष्यम्– षष्ठीसप्तम्यौ—'स्वामीश्वराधिपतिदायाद-' इति।

समाधानबाधकभाष्यम्– न तत्राधिशब्दः पठ्यते।

समाधानसाधकभाष्यम्– यद्यपि न पठ्यते। अधिरीश्वरवाची।

समाधानबाधकभाष्यम्– न तत्र पर्यायवचनानां ग्रहणं भवति। कथं ज्ञायते? यदयं कस्यचित्पर्यायवचनस्य ग्रहणं करोति—'अधिपतिदायाद-' इति।

समाधानसाधकभाष्यम्– षष्ठी तर्हि प्राप्नोति।

समाधानबाधकभाष्यम्– शेषलक्षणा षष्ठी, अशेषत्वान्न भविष्यति।

समाधानसाधकभाष्यम्– द्वितीया तर्हि प्राप्नोति 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

समाधानबाधकभाष्यम्– सप्तम्योक्तत्वात्तस्याभिसम्बन्धस्य द्वितीया न भविष्यति।

प्रत्याक्षेपसमाधानसाधकभाष्यम्– भवेद्योधेः पञ्चालानां चाभिसम्बन्धः स सप्तम्योक्तः स्यात्। यस्तु खल्वधेर्ब्रह्मदत्तस्य चाभिसम्बन्धः तत्र द्वितीया प्राप्नोति।

व्याख्यानान्तरभाष्यम्– एवं तर्हि—स्ववचनात्तु सिद्धम् इति। अधिः स्वं प्रति कर्मप्रवचनीयसञ्ज्ञो भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– एवमपि यदा ब्रह्मदत्तेऽधिकरणे सप्तमी तदा पञ्चालेभ्यो द्वितीया प्राप्नोति (कथम्?) 'कर्मप्रवचनीययुक्ते द्वितीया' इति।

समाधानभाष्यम्– 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति प्रथमा भविष्यति। यस्मादधिकम्।।9।।

(302. द्वितीयाचतुर्थीसूत्रम् 2.3.1 आ. 10)

470. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि 2.3.12

अनुपपत्तिवारणाधिकरणम्

(1480. पर्यायग्राहकवार्त्तिकम्-1)

*** अध्वन्यर्थग्रहणम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अध्वन्यर्थग्रहणं कर्तव्यम्। इह मा भूत्—पन्थानं गच्छति, वीवधं गच्छतीति।

(1481. **नियमवार्त्तिकम्-** 2)

*** आस्थितप्रतिषेधश्च ***

भाष्यम्– आस्थितप्रतिषेधश्चायं वक्तव्यः। यो ह्युत्पथेन पन्थानं गच्छति, 'पथे गच्छति' इत्येव तत्र भवितव्यम्।

सूत्रप्रयोजनाधिकरणम्

पूर्वपक्षिणआक्षेपभाष्यम्– किमर्थं पुनरिदमुच्यते?

समाधानभाष्यम्– चतुर्थी यथा स्यात्।

आक्षेपभाष्यम्– अथ द्वितीया सिद्धा?

समाधानभाष्यम्– सिद्धा 'कर्मणि' इत्येव।

पूर्वपक्ष्याक्षेपसाधकभाष्यम्– चतुर्थ्यपि सिद्धा। कथम्? 'सम्प्रदाने' इत्येव।

आक्षेपबाधकभाष्यम्– न सिध्यति। 'कर्मणायमभिप्रैति स सम्प्रदानम्' इत्युच्यते। क्रियया चासौ ग्राममभिप्रैति। कया क्रियया? गमिक्रियया।

पूर्वपक्ष्याक्षेपसाधकभाष्यम्– क्रियाग्रहणमपि तत्र चोद्यते।

सूत्रारम्भे दोषवारणाधिकरणम्

(1482. **पूर्वपक्षवार्त्तिकम्-** 3)

*** चेष्टायामनध्वनि स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गः ***

भाष्यम्– चेष्टायामनध्वनीति 'स्त्रियं गच्छति' 'अजां नयति' इत्यतिप्रसङ्गो भवति।

(1483. **समाधानवार्त्तिकम्-** 4)

*** सिद्धं त्वसम्प्राप्तवचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? 'असम्प्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत' इति वक्तव्यम्।.

(1484. **लाघवप्रदर्शकवार्त्तिकम्-** 5)

*** अध्वनश्चानपवादः ***

भाष्यम्– एवं च कृत्वा अनध्वनीयत्येतदपि न वक्तव्यं भवति। सम्प्राप्तं ह्येतत्कर्माध्वानं गच्छतीति।। गत्यर्थ.।।12।।

(303. **चतुर्थीसूत्रम्** 2.3.1 आ. 11)

471. चतुर्थी सम्प्रदाने 2.3.13

न्यूनतापूर्त्यधिकरणम्

(1485. **न्यूनतापूरकवार्त्तिकम्-** 1)

*** चतुर्थीविधाने तादर्थ्य उपसंख्यानम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– चतुर्थीविधाने तादर्थ्ये उपसंख्यानं कर्तव्यम्। यूपाय दारु, कुण्डलाय हिरण्यमिति।

आक्षेपभाष्यम्– किमिदं तादर्थ्यमिति?

समाधानभाष्यम्– तदर्थस्य भावः तादर्थ्यम्।

आक्षेपभाष्यम्– तदर्थं पुनः किम्?

समाधानभाष्यम्– सर्वनाम्नोऽयं चतुर्थ्यन्तस्यार्थशब्देन सह समासः।

आक्षेपभाष्यम्– कथं चात्र चतुर्थी?

समाधानभाष्यम्– अनेनैव।

आक्षेपसाधकभाष्यम्– यद्येवम्, इतरेतराश्रयं भवति। केतरेतराश्रयता? निर्देशोत्तर-कालं चतुर्थ्या भवितव्यम्। चतुर्थ्या च निर्देशः। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति—'भवति ह्यर्थशब्देन योगे चतुर्थी' इति, यदयं 'चतुर्थी तदर्थार्थ—' इति चतुर्थ्यन्तस्यार्थशब्देन सह समासं शास्ति।

न खल्वप्यवश्यं चतुर्थ्यन्तस्यैवार्थशब्देन समासो भवति। किं तर्हि? षष्ठ्यन्तस्यापि भवति। तद्यथा—गुरोरिदं गुर्वर्थमिति।

आक्षेपभाष्यम्– यदि तादर्थ्ये उपसंख्यानं क्रियते नार्थः सम्प्रदानग्रहणेन। यो ह्युपाध्यायाय गौर्दीयते उपाध्यायार्थः स भवति। तत्र तादर्थ्य इत्येव सिद्धम्।

समाधानभाष्यम्– अवश्यं सम्प्रदानग्रहणं कर्तव्यम्। याऽन्येन लक्षणेन सम्प्रदानसञ्ज्ञा तदर्थम्—छात्राय रुचितं छात्राय स्वदितमिति।

आक्षेपभाष्यम्– तत्तर्ह्युपसंख्यानं कर्तव्यम्?

समाधानभाष्यम्– न कर्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति—'भवति तादर्थ्ये चतुर्थी' इति। यदयं 'चतुर्थी तदर्थार्थ—' इति चतुर्थ्यन्तस्य तदर्थेन सह समासं शास्ति।

(1486. **चतुर्थीविधानवार्त्तिकम्**- 2)

* क्लृपिसम्पद्यमाने *

भाष्यम्– क्लृपिसम्पद्यमाने चतुर्थी वक्तव्या। मूत्राय कल्पते यवागूः। उच्चाराय यवान्नमिति।

(1487. **चतुर्थीविधानवार्त्तिकम्**- 3)

* उत्पातेन ज्ञाप्यमाने *

भाष्यम्– उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या। वाताय कपिला विद्युदातपायातिलोहिनी। (कृष्णा सर्वविनाशाय दुर्भिक्षाय सिता भवेत्) मांसौदनाय व्याहरति मृगः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1488. **चतुर्थीविधानवार्त्तिकम्**-4)

*** हितयोगे च ***

भाष्यम्– हितयोगे चतुर्थी वक्तव्या। हितमरोचकिने हितमामयाविने। चतुर्थी सं.।।13।।

(304. **उपपदचतुर्थीसूत्रम्** 2.3.1 आ. 12)

474. नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च 2.3 16

अनिष्टवारणाधिकरणम्

(1489. **विकल्पवारणवार्त्तिकम्**-1)

*** स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानात् ***

भाष्यम्– स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानाद् भवति विप्रतिषेधेन। स्वस्तियोगे चतुर्थ्या अवकाशः—स्वस्ति जाल्माय स्वस्ति वृषलाय। कुशलार्थैराशिषि वाविधानस्यावकाशः—अन्ये कुशलार्थाः—कुशलं देवदत्तस्य कुशलं देवदत्ताय। इहोभयं प्राप्नोति—स्वस्ति गोभ्यः स्वस्ति ब्राह्मणेभ्य इति। चतुर्थी भवति विप्रतिषेधेन।

(1490. **नियमवार्त्तिकम्**-2)

*** अलमिति पर्याप्त्यर्थग्रहणम् ***

भाष्यम्– अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम्। इह माभूत्—अलं कुरुते कन्यामिति। अपर आह—अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम्। इहापि यथा स्यात्—अलं मल्लो मल्लाय, प्रभुर्मल्लो मल्लाय, प्रभवति मल्लो मल्लायेति। नमः स्वस्ति०।।16।।

(305. **कारकचतुर्थीसूत्रम्** 2.3.1 आ. 13)

475. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु 2.3.17

इष्टोपपादनाधिकरणम्

आक्षेपभाष्यम्– अप्राणिष्वित्युच्यते तत्रेदं न सिध्यति—'न त्वा श्वानं मन्ये, न त्वा शुने मन्ये' इति।

समाधानभाष्यम्– एवं तर्हि योगविभागः करिष्यते—'मन्यकर्मण्यनादरे विभाषा'। ततः 'अप्राणिषु'; अप्राणिषु च विभाषेति।

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नोति—न त्वा काकं मन्ये, न त्वा शुकं मन्य इति।

समाधानभाष्यम्– यदेतद् 'अप्राणिषु' इति, एतद् 'अनावादिषु' इति वक्ष्यामि। इमे च नावादयो भविष्यन्ति। न त्वा नावं मन्ये यावत्तीर्णं न नाव्यम्। न त्वान्नं मन्ये यावद् भुक्तं न श्राद्धमिति। यत्र येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्ति।

(1491. **वार्त्तिकम्**-1)

*** मन्यकर्मणि प्रकृष्य कुत्सितग्रहणम् ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याभाष्यम्– मन्यकर्मणि प्रकृष्य कुत्सितग्रहणं कर्तव्यम्। इह मा भूत्—त्वां तृणं मन्य इति। मन्यकर्म।।17।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य तृतीये पादे प्रथममाह्निकम्

●

द्वितीयेऽध्याये तृतीये पादे द्वितीयमाह्निकम्

तृतीयाप्रकरणम्

(306. **कारकतृतीयासूत्रम्** 2.3.2 आ. 1)

476. कर्तृकरणयोस्तृतीया 2.3.18

न्यूनतापूरणाधिकरणम्

(1492. **तृतीयाविधानवार्त्तिकम्**- 1)

*** तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम् ***

भाष्यम्– तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानं कर्तव्यम्। प्रकृत्याभिरूपः। प्रकृत्या दर्शनीयः। प्रायेण याज्ञिकाः। प्रायेण वैयाकरणाः। माठरोऽस्मि गोत्रेण। गार्ग्योऽस्मि गोत्रेण। समेन धावति। विषमेण धावति। द्विद्रोणेन धान्यं क्रीणाति त्रिद्रोणेन धान्यं क्रीणाति। पञ्चकेन पशून् क्रीणाति। साहस्रेणाश्वान् क्रीणाति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

वार्त्तिकप्रत्याख्यानभाष्यम्– न वक्तव्यम्। 'कर्तृकरणयोस्तृतीया' इत्येव सिद्धम्। इह तावत्—प्रकृत्याभिरूपः, प्रकृत्या दर्शनीय इति। प्रकृतिकृतं तस्याभिरूप्यम्। प्रायेण याज्ञिकाः प्रायेण वैयाकरणा इति। एष तत्र प्रायः येन तेऽधीयते। माठरोऽस्मि गोत्रेण गार्ग्योऽस्मि गोत्रेणेति। एतेनाहं सञ्ज्ञाये। समेन धावति विषमेण धावतीति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—समेन पथेति। द्विद्रोणेन धान्यं क्रीणातीति। अत्रापि तादर्थ्यात्ताच्छब्द्यम्। द्विद्रोणार्थं द्विद्रोणम् द्विद्रोणेन हिरण्येन धान्यं क्रीणातीति। पञ्चकेन पशून् क्रीणातीति। अत्रापि तादर्थ्यात्ताच्छब्द्यम्, पञ्चपश्वर्थः पञ्चकः। पञ्चकेन पशून् क्रीणातीति। साहस्रेणाश्वान् क्रीणातीति। सहस्रपरिमाणं साहस्रं साहस्रेण हिरण्येनाश्वान् क्रीणातीति। कर्तृकरण.।।18।।

(307 **उपपदतृतीयासूत्रम्** 2.3.2 आ. 2)

477. सहयुक्तेऽप्रधाने 2.3.19

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– तिलैः सह माषान्वपतीति।

समाधानबाधकभाष्यम्– तिलैर्मिश्रीकृत्य माषा उप्यन्ते। तत्र 'करणे' इत्येव सिद्धम्।

समाधानान्तरभाष्यम्– इदं तर्हि––पुत्रेण सहागतो देवदत्त इति। अप्रधाने कर्तरि तृतीया यथा स्यात्।

समाधानबाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। प्रधाने कर्तरि लादयो भवन्तीति प्रधानकर्ता क्तेनाभिधीयते। यश्चाप्रधानं सिद्धा तत्र 'कर्तरि' इत्येव तृतीया।

समाधानान्तरभाष्यम्– इदं तर्हि—पुत्रेण सहागमनं देवदत्तस्येति।

समाधानबाधकभाष्यम्– षष्ठ्यत्र बाधिका भविष्यति।

समाधानान्तरभाष्यम्– इदं तर्हि—पुत्रेण सह स्थूलः। पुत्रेण सह पिङ्गल इति।

पूर्वोक्तोदाहरणाभ्युपगमभाष्यम्– इदं चाप्युदाहरणम्—तिलैः सह माषान्वपतीति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—तिलैर्मिश्रीकृत्य माषा उप्यन्ते तत्र करण इत्येव सिद्धम्— इति।

समाधानभाष्यम्– भवेत्सिद्धं यदा तिलैर्मिश्रीकृत्योप्येरन्। यदा तु खलु कस्य चिन्माषबीजावाप उपस्थितः तदर्थं च क्षेत्रमुपार्जितम् तत्रान्यदपि किञ्चिदुप्यते—यदि भविष्यति भविष्यतीति तदा न सिध्यति।

(1493. **सूत्रप्रत्याख्यानवार्त्तिकम्**-1)

* सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वादन्यत्रापि *

भाष्यम्– सह युक्तेऽप्रधानवचनमनर्थकम्। किं कारणम्? उपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वात्। अन्यत्रापि 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति प्रथमा भवति। एवमत्रापि 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति प्रथमा भविष्यति। क्वान्यत्र? गाः स्वामी व्रजतीति। सह युक्ते।।19।।

(308. **तृतीयानियमसूत्रम्** 2.3.2 आ. 3)

478. येनाङ्गविकारः 2.3.20

अङ्गशब्दस्यावयविपरत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—अक्षि काणमस्येति?

(1494. **समाधानवार्त्तिकम्**-1)

* अङ्गाद्विकृतात्तद्विकारश्चेदङ्गिनो वचनम् *

भाष्यम्– अङ्गाद्विकृतात्तृतीया वक्तव्या तेनैव चेद्विकारेणाङ्गी द्योत्यत इति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– न वक्तव्यम्। अङ्गशब्दोऽयं समुदायशब्दः। येनेति च करणे एषा तृतीया। येनावयवेन समुदायोङ्गी द्योत्यते तस्मिन् भवितव्यम्। न चैतेनावयवेन समुदायो द्योत्यते।। येनाङ्ग।।20।।

(309. तृतीयानियमसूत्रम् 2.3.2 आ. 4)

479. इत्थंभूतलक्षणं 2.3.21

समासान्तर्गतात्तृतीयावारणाधिकरणम्

(1495. आक्षेपवार्त्तिकम्-1)

* इत्थंभूतलक्षणं तत्स्थे प्रतिषेधः *

भाष्यम्– इत्थंभूतलक्षणं तत्स्थे प्रतिषेधो वक्तव्यः। अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति।

(1496. समाधानवार्त्तिकम्-)

* न वेत्थंभूतस्य लक्षणेनापृथग्भावात् *

भाष्यम्– न वा वक्तव्यम्? किं कारणम्। इत्थं भूतस्य लक्षणेनापृथग्भावात्। यत्रेत्थंभूतस्य पृथग्भूतं लक्षणं तत्र भवितव्यम्। चात्रेत्थंभूतस्य पृथग्भूतं लक्षणम्।

आक्षेपभाष्यम्– किं वक्तव्यमेतत्?

समाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? तथा ह्ययंप्राधान्येन लक्षणं प्रतिनिर्दिशति—इत्थंभूतस्य लक्षणमित्थंभूतलक्षणं तस्मिन्नित्थंभूतलक्षण इति। इत्थंभूत.।।21।।

(310. तृतीयासूत्रम् 2.3.2 आ. 5)

480. सञ्ज्ञोऽन्यतरस्यां कर्मणि 2.3.22

विप्रतिषेधाधिकरणम्

(1497. वार्त्तिकम्-1)

* सञ्ज्ञः कृत्प्रयोगे षष्ठी विप्रतिषेधेन *

भाष्यम्– 'सञ्ज्ञोऽन्यतरस्यां कर्मणि' इत्येतस्मात्कृद्योगे षष्ठी विप्रतिषेधेन। 'सञ्ज्ञोऽन्यतरस्याम्' इत्यस्यावकाशः—मातरं संजानीते मात्रा संजानीते। कृत्प्रयोगे षष्ठ्या अवकाशः—इध्मप्रव्रश्चनः पलाशशातनः। इहोभयं प्राप्नोति—मातुः सञ्ज्ञाता पितुः सञ्ज्ञाता इति। षष्ठी भवति विप्रतिषेधेन।

(1498. वार्त्तिकम्-2)

* उपपदविभक्तेश्चोपपदविभक्तिः *

भाष्यम्– उपपदविभक्तेश्चोपपदविभक्तिर्भवति विप्रतिषेधेन। 'अन्यारादितरर्तेदिक्शब्दा-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ञ्यूत्तरपदाजाहियुक्ते' इत्यस्यावकाशः—अन्यो देवदत्तात्। 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इत्यस्यावकाशः—गोषु स्वामी गवां स्वामी। इहोभयं प्राप्नोति—अन्यो गोषु स्वामी अन्यो गवां स्वामी। 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इत्येतद्भवति विप्रतिषेधेन।

बाधकभाष्यम्– नैष युक्तो विप्रतिषेधः। नह्यत्र गावोऽन्ययुक्ताः। कस्तर्हि? स्वामी।

वार्त्तिकोदाहरणान्तरभाष्यम्– एवं तर्हि 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इत्यस्यावकाशः—तुल्यो देवदत्तस्य। तुल्यो देवदत्तेन। 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इत्यस्यावकाशः—स एव। इहोभयं प्राप्नोति—तुल्यो गोभिः स्वामी तुल्यो गवां स्वामी। 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इत्येतद्भवति विप्रतिषेधेन। सञ्ज्ञोऽन्य।।22।।

(311. उपपदतृतीयासूत्रम् 2.3.2 आ. 6)

481. हेतौ 2.3.23

(1499. वार्त्तिकम्-1)

* निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् *

भाष्यम्– निमित्तकारणहेतुषु सर्वाः प्रायेण दृश्यन्त इति वक्तव्यम्। किं निमित्तं वसति। केन निमित्तेन वसति। कस्मै निमित्ताय वसति। कस्मान्निमित्ताद्वसति। कस्य निमित्तस्य वसति। कस्मिन्निमित्ते वसति। किं कारणं वसति। केन कारणेन वसति। कस्मै कारणाय वसति। कस्मात्कारणाद्वसति। कस्य कारणस्य वसति। कस्मिन्कारणे वसति। को हेतुर्वसति। कं हेतुं वसति। केन हेतुना वसति। कस्मै हेतवे वसति। कस्माद्धेतोर्वसति। कस्य हेतोर्वसति। कस्मिन्हेतौ वसति। हेतौ।।23।।

(312. कारकपञ्चमीसूत्रम् 2.3.2 आ. 7)

486. अपादाने पञ्चमी 2.3.28

न्यूनतावारणाधिकरणम्

(1500. वार्त्तिकम्-1)

* पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् *

भाष्यम्– पञ्चमीविधाने ल्यब्लोपे कर्मणि पञ्चम्या उपसंख्यानं कर्तव्यम्। प्रासादमारुह्य प्रेक्षते—प्रासादात्प्रेक्षते।

(1501. वार्त्तिकम्-2)

* अधिकरणे च *

भाष्यम्– अधिकरणे चोपसंख्यानं कर्तव्यम्। आसनात्प्रेक्षते। शयनात्प्रेक्षते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1502. वार्त्तिकम्-3)

*** प्रश्नाख्यानयोश्च ***

भाष्यम्– प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या। कुतो भवान्? पाटलिपुत्रात्।

(1503. वार्त्तिकम्-4)

*** यतश्चाध्वकालनिर्माणम् ***

भाष्यम्– यतश्चाध्वकालनिर्माणं ततः पञ्चमी वक्तव्याः। गवीधुमतः सांकाश्यं चत्वारि योजनानि। कार्तिक्या आग्रहायणी मासे।

(1504. वार्त्तिकम्-5)

*** तद्युक्तात्काले सप्तमी ***

भाष्यम्– तद्युक्तात्काले सप्तमी वक्तव्या। कार्तिक्या आग्रहायणी मासे।

(1505. वार्त्तिकम्-6)

*** अध्वनः प्रथमा च ***

भाष्यम्– अध्वनः प्रथमा च सप्तमी च वक्तव्या। गवीधुमतः सांकाश्यं चत्वारि योजनानि। गवीधुमतः सांकाश्यं चतुर्षु योजनेषु।

आक्षेपभाष्यम्– तत्तर्हीदं बहु वक्तव्यम्?

प्रथमद्वितीयवार्त्तिकप्रत्याख्यानभाष्यम्–

भाष्यम्– न वक्तव्यम्। 'अपादाने' इत्येव सिद्धम्। इह तावत्प्रासादात्प्रेक्षते शयनात्प्रेक्षते इति, अपक्रामति तत्तस्माद्दर्शनम्। यद्यपक्रामति किं नात्यन्तायापक्रामति? संततत्वात्। अथवान्यान्यप्रादुर्भावात्। अन्या चान्या च प्रादुर्भवति।

तृतीयवार्त्तिकप्रत्याख्यानभाष्यम्– प्रश्नाख्यानयोश्च पञ्चमी वक्तव्येति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—कुतो भवानागच्छतीति, पाटलिपुत्रादागच्छामीति।

चतुर्थीवार्त्तिकप्रत्याख्यानभाष्यम्– यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्येति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—गवीधुमतो निःसृत्य सांकाश्यं चत्वारि योजनानि। कार्तिक्या आग्रहायणी मासे इति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—कार्तिक्याः प्रभृत्या-ग्रहायणी मास इति।

पञ्चमवार्त्तिकप्रत्याख्यानभाष्यम्– तद्युक्तात्काले सप्तमी वक्तव्येति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—कार्तिक्याः प्रभृति आग्रहायणी गते मास इति।

षष्ठवार्त्तिकप्रत्याख्यानभाष्यम्– अध्वनः प्रथमा च सप्तमी चेति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते—गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि भवन्ति, ततः सांकाश्यम्। चतुर्षु योजनेषु गतेषु ततः सांकाश्यमिति। अपादाने।।28।।

(313. उपपदपञ्चमीसूत्रम् 2.3.2 आ. 8)

487. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते 2.3.29

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– अञ्चूत्तरपदग्रहणं किमर्थम्। न दिक्शब्दैर्योग इत्येव सिद्धम्?

समाधानभाष्यम्– 'षष्ठ्यतसर्थप्रत्ययेन' इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः। अन्यारा।।29।।

(314. उपपदविभक्तिसूत्रम् 2.3.2 आ. 9)

488. षष्ठ्यतसर्थप्रत्ययेन 2.3.30

पदकृत्याधिकरणम्

आक्षेपभाष्यम्– अर्थग्रहणं किमर्थम्?

समाधानभाष्यम्– 'षष्ठ्यतस्प्रत्ययेन' इत्युच्यमाने इहैव स्यात्—दक्षिणतो ग्रामस्य उत्तरतो ग्रामस्येति, इह न स्यात्—उपरि ग्रामस्य उपरिष्टाद् ग्रामस्येति। अर्थग्रहणे पुनः क्रियमाणे अतस्प्रत्ययेन च सिद्धं भवति—यश्चान्यस्तेन समानार्थः।

आक्षेपभाष्यम्– अथ प्रत्ययग्रहणं किमर्थम्?

समाधानभाष्यम्– इह मा भूत्—प्राग्ग्रामात्, प्रत्यग्ग्रामात्।

उपसंहारभाष्यम्– अञ्चूत्तरपदस्याप्येतत्प्रयोजनमुक्तम्। तत्रान्यतरच्छक्यमवक्तुम्। षष्ठ्यतस।।30।।

(315. उपपदतृतीयापञ्चमीसूत्रम् 2.3.2 आ. 10)

490. पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् 2.3.32

पञ्चमीसाधनाधिकरणम्

(1506. वार्त्तिकप्रथमखण्डम्-1)

* पृथगादिषु पञ्चमीविधानम् *

भाष्यम्– पृथगादिषु पञ्चमी विधेया—पृथग् देवदत्तात्।

आक्षेपभाष्यम्– किमर्थं न प्रकृतं पञ्चमीग्रहणमनुवर्तते? क्व प्रकृतम्? 'अपादाने पञ्चमी' इति।

(1507. वार्त्तिकद्वितीयखण्डम्-2)

* अनधिकारात् *

भाष्यम्– अनधिकारः सः।

(1508. वार्त्तिकतृतीयखण्डम्-3)

* अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः *

भाष्यम्– अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधो वक्तव्यः स्यात्। दक्षिणेन ग्रामम्, दक्षिणतो ग्रामस्येति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकप्रत्याख्यानभाष्यम्– एवं तर्हि—अन्यतरस्यांग्रहणसामर्थ्यात्पञ्चमी भविष्यति।

सामर्थ्यनिराकरणभाष्यम्– अस्त्यन्यदन्यतरस्यांग्रहणस्य प्रयोजनम्। किम्? यस्यां नाप्राप्तायां तृतीयारभ्यते सा यथा स्यात्। कस्यां च नाप्राप्तायाम्? अन्ततः षष्ठ्याम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'अपादाने पञ्चमी' इति।

आक्षेपस्मारणभाष्यम्– ननु—चोक्तम् अनधिकारः सः 'अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः' इति।

समाधानभाष्यम्– एवं तर्हि सम्बन्धमनुवर्तिष्यते—'अपादाने पञ्चमी'। 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' पञ्चमी। 'षष्ठ्यतसर्थप्रत्ययेन' अन्यारादिभिर्योगे पञ्चमी। 'एनपाद्वितीया' अन्यारादिभिर्योगे पञ्चमी। 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' पञ्चमीग्रहणमनुवर्तते, 'अन्यारादिभिर्योगे' इति निवृत्तम्।

समाधानान्तरभाष्यम्– अथवा मण्डूकप्लुतयोऽधिकारः। तद्यथा—मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः।

भाष्यम्– अथवा—

(1509. **वार्त्तिकम्**-4)

'अन्यवचनाच्चकाराकरणात्प्रकृतस्यापवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्य।'

भाष्यम्– अन्यस्या विभक्तेर्वचनाच्चकारस्यानुकर्षणार्थस्याकरणात्प्रकृतायाः पञ्चम्या द्वितीयाषष्ठ्यौ बाधिके भविष्यतः। यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति।

समाधानान्तरभाष्यम्– अथवा वक्ष्यत्येतत्—'अनुवर्तन्ते च नाम विधयः। न चानुवर्तनादेव भवन्ति। किं तर्हि? यत्नाद्भवन्ति' इति। पृथग्विना।।32।।

(316. **उपपदसूत्रम्** 2.3.2 आ. 11)

493. दूरान्तिकार्थेभ्यो द्वितीया च 2.3.35

(1510. **आक्षेपवार्त्तिकम्**-1)

* दूरान्तिकार्थेभ्यः पञ्चमीविधाने तद्युक्तात्पञ्चमीप्रतिषेधः *

भाष्यम्– दूरान्तिकार्थेभ्यः पञ्चमीविधाने तद्युक्तात्पञ्चम्याः प्रतिषेधो वक्तव्यः। दूराद्ग्रामस्य।

(1511. **आक्षेपबाधकवार्त्तिकम्**-2)

* न वा तत्रापि दर्शनादप्रतिषेधः *

भाष्यम्– अनर्थकः प्रतिषेधोऽप्रतिषेधः। न वा तत्रापि दर्शनात्पञ्चम्याः प्रतिषेधोऽनर्थकः तत्रापि हि पञ्चमी दृश्यते—

दूरादावसथान्मूत्रं दूरात्पादावसेचनम्।।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपिताद् गुरोः।। दुरान्ति।।35।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(317. कारकसप्तमीसूत्रम् 2.3.2 आ. 12)

494. सप्तम्यधिकरणे च 2.3.36

न्यूनतापूरणाधिकरणम्

(1512. सप्तमीविधानवार्त्तिकम्- 1)

*** सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् ***

भाष्यम्– सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानं कर्तव्यम्। अधीती व्याकरणे। परिगणिती याज्ञिक्ये। आम्नाती छन्दसि।

(1513. सप्तमीविधानवार्त्तिकम्- 2)

*** साध्वसाधुप्रयोगे च ***

भाष्यम्– साध्वसाधुप्रयोगे च सप्तमी वक्तव्या। साधुर्देवदत्तो मातरि। असाधुः पितरि।

(1514. सप्तमीविधायकवार्त्तिकम्- 3)

*** कारकार्हाणां च कारकत्वे ***

भाष्यम्– कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या। ऋद्धेषु भुञ्जानेषु दरिद्रा आसते। ब्राह्मणेषु तरत्सु वृषला आसते।

(1515. सप्तमीविधायकवार्त्तिकम्- 4)

*** अकारकार्हाणा चाकारकत्वे ***

भाष्यम्– अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या। मूर्खेष्वासीनेषु ऋद्धा भुञ्जते। वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति।

(1416. सप्तमीविधायकवार्त्तिकम्- 5)

*** तद्विपर्यासे च ***

भाष्यम्– तद्विपर्यासे च सप्तमी वक्तव्या। ऋद्धेष्वासीनेषु मूर्खा भुञ्जते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति।

(1517. सप्तमीविधायकवार्त्तिकम्- 6)

*** निमित्तात्कर्मसंयोगे ***

भाष्यम्– निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः। सप्तम्यधि।।36।।

(318. उपपदसप्तमीसूत्रम् 2.3.2 आ. 13)

495. यस्य च भावेन भावलक्षणम् 2.3.37

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयोदर्शनाभावेसप्तमीसाधनाधिकरणम्

(1518. **वार्त्तिकम्**-1)

*** भावलक्षणे सप्तमीविधाने अभावलक्षणे उपसंख्यानम् ***

भाष्यम्– भावलक्षणे सप्तमीविधाने अभावलक्षण उपसंख्यानं कर्तव्यम्। अग्निषु हूयमानेषु गतः, हुतेष्वागतः। गोषु दुह्यमानासु गतः, दुग्धास्वागतः। किं पुनः कारणं न सिध्यति? लक्षणं नाम तद्भवति येन पुनः पुनर्लक्ष्यते। सकृच्चासौ कथं चिदग्निषु हूयमानेषु प्रस्थितः, हुतेष्वागतः। गोषु दुह्यमानासु प्रस्थितः, दुग्धास्वागतः।

(1519. **न्यासान्तरेण समाधानवार्त्तिकम्**-9)

*** सिद्धं तु भावप्रवृत्तौ यस्य भावारम्भवचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? यस्य भावप्रवृतौ द्वितीयो भाव आरभ्यते तत्र सप्तमी वक्तव्या।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

समाधानभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—'भावलक्षणे सप्तमीविधानेऽभावलक्षण उपसंख्यानम्' इति।

समाधानभाष्यम्– नैष दोषः। न खल्ववश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते। सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणं भवति। तद्यथा—अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदसौ कमण्डलुपाणिर्दृष्टश्छात्रस्तस्य तदेव लक्षणं भवति। यस्य च।।37।।

(319. **उपपदपञ्चमीसूत्रम्** 2.3.2 **आ.** 14)

500. पञ्चमी विभक्ते 2.3.42

विभक्तशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—कृष्णा गवां सम्पन्नक्षीरतमेति?

समाधानभाष्यम्– विभक्त इत्युच्यते। न चैतद्विभक्तम्।

समाधानबाधकभाष्यम्– विभक्तमेतत्। गोभ्यः कृष्णा विभज्यते।

समाधानाशयभाष्यम्– विभक्तमेव यन्नित्यं तत्र भवितव्यम्। न चैतन्नित्यं विभक्तम्।

आक्षेपभाष्यम्– किं वक्तव्यमेतत्?

समाधानभाष्यम्– नहि। कथमनुच्यमानं गंस्यते? विभक्तग्रहणसामर्थ्यात्। यदि यद्विभक्तं चाविभक्तं च तत्र स्याद्, विभक्तग्रहणमनर्थकं स्यात्। पञ्चमी।।42।।

(320. **उपपदसप्तमीसूत्रम्** 2.3.2 **आ.** 15)

501. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः 2.3.43

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यूनतापूर्त्यधिकरणम्

(1520. वार्त्तिकम्-1)

*** अप्रत्यादिभिः ***

भाष्यम्– अप्रत्यादिभिरिति वक्तव्यम्। इहापि था स्यात्—(साधुर्देवदत्तो मातरं प्रति।) मातरं परि। मातरमनु। साधु।।43।।

(321. उपपदतृतीयासप्तमीसूत्रम् 2.3.2 आ. 16)

502. प्रसितोत्सुकाभ्यां तृतीया च 2.3.44

प्रसितशब्दार्थनिर्णयाधिकरणम्

आक्षेपभाष्यम्– प्रसित इत्युच्यते। कः प्रसितो नाम?

समाधानभाष्यम्– यस्तत्र नित्यं प्रतिबद्धः। कुत एतत्? सिनोतिरयं बध्नात्यर्थे वर्तते—बद्ध इवासौ तत्र भवति। प्रसितो।।44।।

(322. कारकसप्तमीसूत्रम् 2.3.2 आ. 17)

503. नक्षत्रे च लुपि 2.3.45

अनिष्टापत्तिवारणाधिकरणम्

आक्षेपभाष्यम्– इह कस्मान्न भवति—अद्य पुष्यः अद्य मघा?

समाधानभाष्यम्– अधिकरण इति वर्तते।।नक्षत्रे।।45।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य तृतीये पादे द्वितीयमाह्निकम्

●

द्वितीयेऽध्याये तृतीये पादे तृतीयमाह्निकम्

(323. प्रथमासूत्रम् 2.3.3 आ. 1)

504. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा 2.3.46

प्रातिपदिकपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– प्रातिपदिकग्रहणं किमर्थम्?

समाधानभाष्यम्– उच्चैः नीचैरित्यत्रापि यथा स्यात्।

आक्षेपभाष्यम्– किं पुनरत्र प्रथमया प्रार्थ्यते?

समाधानभाष्यम्– पदत्वम्।

समाधानबाधकभाष्यम्– नैतदस्ति। षष्ठ्यात्र पदत्वं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्– इदं तर्हि प्रयोजम्—ग्राम उच्चैस्तव स्वम्, ग्राम उच्चैस्ते स्वम् 'सपूर्वायाः प्रथमाया विभाषा' इत्येष विधिर्यथा स्यात्।

लिङ्गग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ लिङ्गग्रहणं किमर्थम्?

समाधानभाष्यम्– स्त्री पुमान् नपुंसकमित्यत्रापि यथा स्यात्।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। एष एव चात्रास्ति प्रातिपदिकार्थः।

समाधानान्तरभाष्यम्– इदं तर्हि—कुमारी वृक्षः कुण्डमिति।

परिमाणपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ परिमाणग्रहणं किमर्थम्?

समाधानभाष्यम्– द्रोणः खारी आढकमित्यत्रापि यथा स्यात्।

वचनपदप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ वचनग्रहणं किमर्थम्?

समाधानभाष्यम्– इह समुदाये वाक्यपरिसमाप्तिर्दृश्यते—गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन् दृष्टान्ते यत्रैतानि सर्वाणि समुदितानि भवन्ति तत्रैव स्यात्—द्रोणः खारी आढकमिति। इह न स्यात्—कुमारी वृक्षः कण्डमिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। प्रत्येकमपि वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा—गुणवृद्धिसञ्ज्ञे प्रत्येकं भवतः।

समाधानान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात्—एको द्वौ बहवः।

मात्रग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ मात्रग्रहणं किमर्थम्?

सामधानभाष्यम्– एतन्मात्र एव प्रथमा यथा स्यात्। कर्मादिविशिष्टे मा भूत्—कटं करोति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। कर्मादिषु द्वितीयाद्या विभक्तयः। ताः कर्मादिविशिष्टो बाधिका भविष्यन्ति।

समाधानबाधकान्तरभाष्यम्– अथवाऽचार्यप्रवृत्तिर्ज्ञापयति—न कर्मादिविशिष्टे प्रथमा भवतीति। यदयं सम्बोधने प्रथमां शास्ति।

समाधानसाधकज्ञापकनिरसनभाष्यम्– नैतदस्ति ज्ञापकम्। अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्? 'सामन्त्रितम्' इति वक्ष्यामीति।

समाधानबाधकज्ञापकान्तरभाष्यम्– यत्तर्हि योगविभागं करोति। इतरथा हि 'सम्बोधने आमन्त्रितम्' इत्येव ब्रूयात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानान्तरभाष्यम्– इदं तर्हि—उक्तेष्वष्येकत्वादिषु प्रथमा यथा स्यात्—एको द्वौ बहव इति।

अन्यतरप्रत्याख्यानभाष्यम्– वचनग्रहणस्याप्येतत्प्रयोजनमुक्तम्। अन्यतरच्छक्य-मवक्तुम्।

सामानाधिकरण्ये प्रथमासाधनाधिकरणम्

(1521. आक्षेपवार्त्तिकम्- 1)

*** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्ये उपसंख्यानमधिकत्वात् ***

भाष्यम्– प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्ये उपसंख्यानं कर्तव्यम्। वीरः पुरुष इति।

किं पुनः कारणं न सिध्यति? अधिकत्वात्। व्यतिरिक्तः प्रातिपदिकार्थ इति कृत्वा प्रथमा न प्राप्नोति। कथं व्यतिरिक्तः? पुरुषे वीरत्वम्।

(1522. समाधानवार्त्तिकम्- 2)

*** न वा वाक्यार्थत्वात् ***

भाष्यम्– न वा वक्तव्यम्। किं कारणम्? वाक्यार्थत्वात्। यदत्राधिक्यं वाक्यार्थः सः।

समाधानाय न्यासान्तरम्

अथवा 'अभिहिते प्रथमा' इत्येतल्लक्षणं करिष्यते।

(1523. न्यासान्तरदूषकवार्त्तिकम्- 3)

*** अभिहितलक्षणायामनभिहिते प्रथमाविधिः ***

भाष्यम्– अभिहितलक्षणायामनभिहिते प्रथमा विधेया। वृक्षः प्लक्ष इति।

दूषणपरिहारभाष्यम्– उक्तं वा। किमुक्तम्? अस्तिर्भवन्तीपरः प्रथमपुरुषोप्रयुज्य-मानोऽप्यस्तीति गम्यते। वृक्षः प्लक्षः 'अस्ति' इति गम्यत इति।

(1524. दूषणान्तरवार्त्तिकम्- 4)

*** अभिहितानभिहिते प्रथमाभावः ***

भाष्यम्– अभिहितानभिहिते प्रथमा प्राप्नोति। क्व? प्रासादे आस्ते शयन आस्त इति। सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा प्रथमा प्राप्नोति।

दूषणपरिहाराय न्यासान्तरम्

एवं तर्हि 'तिङ्समानाधिकरणे प्रथमा' इत्येतल्लक्षणं करिष्यते।

(1525. न्यासान्तरदूषणवार्त्तिकम्- 5)

*** तिङ्समानाधिकरण इति चेत्तिङोप्रयोगे प्रथमाविधिः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमा विधेया। वृक्षः प्लक्षः।

दूषणपरिहारभाष्यम्– उक्तं पूर्वेण। किमुक्तम्? अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते। वृक्षः प्लक्षः 'अस्ति' इति गम्यत इति।

(1526. तिङ्साधनाधिकरण आक्षेपवार्त्तिकम्-6)

*** शतृशानचोश्च निमित्तभावात्तिङोभावस्तयोरपवादत्वात् ***

भाष्यम्– शतृशानचोश्च निमित्तभावात्तिङोभावः। क्व? पचत्योदनं देवदत्त इति। किं कारणम्? तयोरपवादत्वात्। शतृशानचौ तिङपवादौ। तावत्र बाधकौ। न चापवादविषये उत्सर्गोऽभिनिविशते। 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः'। 'प्रकल्प्य चापवादविषयमुत्सर्गोऽभिनिविशते'। न तावदत्र कदाचित्तिङादेशो भवति। अपवादौ तावच्छतृशानचौ प्रतीक्षते।

समाधानभाष्यम्– पाक्षिक एष दोषः। कतरस्मिन्पक्षे शतृशानचोर्द्वैतं भवति—अप्रथमा वा विधिनाश्रीयते प्रथमा वा प्रतिषेधेनेति? विभक्तिनियमे चापि द्वैतं भवति—विभक्तिनियमो वा स्यादर्थनियमो वेति। तद्यदा तावदर्थनियमः अप्रथमा च विधिनाश्रीयते, तदा एष दोषो भवति। यदा हि विभक्तिनियमः, तदा यद्येवमप्रथमा विधिनाश्रीयते, अथापि प्रथमा प्रतिषेधेन, तदा न दोषो भवति। प्रातिपदकार्थ.।।46।।

अथ षष्ठीप्रकरणम्

(३२४. शेषषष्ठीसूत्रम् २.३.३ आ. २)

508. षष्ठी शेषे 2.3.50

शेषशब्दार्थनिरुपणाधिकरणम्

आक्षेपभाष्यम्– शेष इत्युच्यते। कः शेषः?

समाधानभाष्यम्– कर्मादिभ्यो येऽन्येऽर्थाः स शेषः।

आक्षेपभाष्यम्– यद्येवं शेषो न प्रकल्पते। न हि कर्मादिभ्योऽन्येऽर्थाः सन्ति। इह तावद्—'राज्ञः पुरुषः' इति राजा कर्ता, पुरुषः सम्प्रदानम्। 'वृक्षस्य शाखा' इति वृक्षः शाखाया अधिकरणम्। तथा यदेतत्स्वं नाम चतुर्भिरेतत्प्रकारैर्भवति—क्रयणाद्, अपहरणाद्, याञ्चायाः, विनिमयादिति। अत्र च सर्वत्र कर्मादयः सन्ति।

समाधानभाष्यम्– एवं तर्हि कर्मादीनामविवक्षा शेषः।

आक्षेपभाष्यम्– कथं पुनः सतो नामाविवक्षाः स्यात्?

समाधानभाष्यम्– सतोऽप्यविवक्षा भवति। तद्यथा—अलोमिका एडका, अनुदरा कन्येति। असतश्च विवक्षा भवति। तद्यथा—समुद्रः कुण्डिका। विन्ध्यो वर्धितकमिति।

शेषग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थं पुनः शेषग्रहणम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1527. समाधानवार्त्तिकम्- 1)

*** प्रत्ययावधारणाच्छेषवचनम् ***

भाष्यम्– प्रत्ययावधारणाच्छेषग्रहणं कर्तव्यम्। प्रत्यया नियताः, अर्था अनियताः। तत्र षष्ठी प्राप्नोति। तत्र शेषग्रहणं कर्तव्यं षष्ठीनियमार्थम्—शेष एव षष्ठी भवति, नान्यत्रेऽपि।

(1528. समाधानवार्त्तिकम्- 2)

*** अर्थावधारणाद्वा ***

भाष्यम्– अथवा अर्था नियताः, प्रत्यया अनियताः, ते शेषेऽपि प्राप्नुवन्ति। तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थम्—षष्ठ्येव भवति नान्येति।

शेषग्रहणप्रत्याख्यानभाष्यम्– अर्थनियमे शेषग्रहणं शक्यमकर्तुम्। कथम्? अर्था नियताः, प्रत्यया अनियताः। ततो वक्ष्यामि—षष्ठी भवतीति। तन्नियमार्थं भविष्यति यत्र षष्ठी चान्या च प्राप्नोति तत्र षष्ठ्येव भवतीति।

(1529. आक्षेपवार्त्तिकप्रथमखण्डम्- 3)

*** षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः ***

भाष्यम्– षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधो वक्तव्यः। राज्ञः पुरुष इत्यत्र राजा विशेषणम्, पुरुषो विशेष्यः। तत्र प्रातिपदिकार्थो व्यतिरिक्त इति कृत्वा प्रथमा न प्राप्नोति। तत्र षष्ठी स्यात् तस्याः प्रतिषेधो वक्तव्यः।

(1530. आक्षेपवार्त्तिकद्वितीयखण्डम्- 4)

*** तत्र प्रथमाविधिः ***

भाष्यम्– तत्र षष्ठीं प्रतिषिध्य प्रथमा विधेया। राज्ञः पुरुषः।

आक्षेपपरिहारभाष्यम्– उक्तं पूर्वेण। किमुक्तम्। 'न वा वाक्यार्थत्वाद्' इति। यदत्राधिक्यं वाक्यार्थः सः।

आक्षेपभाष्यम्– कुतो नु खल्वेतत्—'पुरुषे यदाधिक्यं स वाक्यार्थ इति, न पुना राजनि यदाधिक्यं स वाक्यार्थः स्यात्'।

समाधानभाष्यम्– अन्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि सोऽर्थो गम्यते, न पुनरन्तरेण राजशब्दस्य प्रयोगं पुरुषे सोऽर्थो गम्यते। अस्ति कारणं येनैतदेवं भवति। किं कारणम्? राजशब्दाद्धि भवान् षष्ठीमुच्चारयति। अङ्ग हि भवान् पुरुषशब्दादप्युच्चारयतु गंस्यते सोऽर्थः।

आक्षेपभाष्यम्– ननु च नैतेनैवं भवितव्यम्। न हि शब्दकृतेन नामार्थेन भवितव्यम्। अर्थकृतेन नाम शब्देन भवितव्यम्।

समाधानभाष्यम्– तदेतदेवं दृश्यताम्—अर्थरूपमेवैतदेवञ्जातीयकं येनान्तरेणापि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषशब्दस्य प्रयोगं राजनि सोऽर्थो गम्यते। किं पुनस्तत्? स्वामित्वम्। किं कृतं पुनस्तत्? स्वकृतम्। तद्यथा—प्रातिपदिकार्थानां क्रियाकृता विशेषा उपजायन्ते तत्कृताश्चाख्याः प्रादुर्भवन्ति—कर्म करणमपादानं सम्प्रदानमधिकरणम्—इति। ताश्च पुनर्विभक्तीनामुत्पत्तौ कदाचिन्निमित्तत्वेनोपादीयन्ते कदाचिन्न।

आक्षेपभाष्यम्– कदा विभक्तीनामुत्पत्तौ निमित्तत्वेन नोपादीयन्ते?

समाधानभाष्यम्– यदा व्यभिचरन्ति प्रातिपदिकार्थम्। यदा हि न व्यभिचरन्ति, आख्याभूता एव तदा भवन्ति—कर्म करणमपादानं सम्प्रदानमधिकरणमिति।

आक्षेपभाष्यम्– यथैव तर्हि राजनि स्वकृतं स्वामित्वं तत्र षष्ठी भवति। एवं पुरुषेऽपि स्वामिकृतं स्वत्वं तत्र षष्ठी प्राप्नोति।

समाधानभाष्यम्– राजशब्दादुत्पद्यमानया षष्ठ्याभिहितः सोऽर्थ इति कृत्वा पुरुषशब्दात्षष्ठी न भविष्यति।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—पुरुषस्य राजेति?

समाधानभाष्यम्– भवति। राजशब्दात्तु तदा प्रथमा।

आक्षेपभाष्यम्– न तर्हीदानीमिदं भवति—राज्ञः पुरुषस्येति?

समाधानभाष्यम्– भवति बाह्यमर्थमभिसमीक्ष्य। षष्ठी शेषे।।50।।

(325. **प्रतिपदषष्ठीसूत्रम्** 2.3.3 आ. 3)

510. अधीगर्थदयेशां कर्मणि 2.3.52

भावे प्रत्ययसाधनाधिकरणम्

(1530. **आक्षेपवार्त्तिकम्**-1)

* कर्मादिष्वकर्मकवद्वचनम् *

भाष्यम्– कर्मादिष्वकर्मकवद्भावो वक्तव्यः। किं प्रयोजनम्? अकर्मकाणां भावे लो भवतीति भावे लो यथा स्यात्—मातुः स्मर्यते, पितुः स्मर्यते इति। अथ वत्करणं किमर्थम्? स्वाश्रयमपि यथा स्यात्—माता स्मर्यते, पिता स्मर्यत इति।

(1531. **विपक्षबाधकं वार्त्तिकप्रथमखण्डम्**-2)

* कर्माभिधाने हि लिङ्गवचनानुपपत्तिः *

भाष्यम्– कर्माभिधाने हि लिङ्गवचनयोरनुपपत्तिः स्यात्। मातुः स्मृतम्। मात्रोः स्मृतम्। मातॄणां स्मृतमिति। मातुर्यल्लिङ्गं वचनं तत्स्मृतशब्दस्यापि प्राप्नोति।

(1532. **विपक्षबाधकं वार्त्तिकद्वितीयखण्डम्**-3)

* षष्ठीप्रसङ्गश्च *

भाष्यम्– षष्ठी च प्राप्नोति। कुतः? स्मृतशब्दान्मातुः सामानाधिकरण्यात्षष्ठी प्राप्नोति।

व्याख्यान्तरभाष्यम्– अपर आह—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

*** षष्ठीप्रसङ्गश्च ***

षष्ठी च प्रसङ्क्‍व्या। कुतः? मातृशब्दात्। स्मृतशब्देनाभिहितं कर्मेति कृत्वा षष्ठी न प्राप्नोति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। अविवक्षिते कर्मणि षष्ठी भवतीति। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? शेष इति वर्तते। शेषश्च कः? कर्मादीनामविवक्षा शेषः। यदा च कर्म विवक्षितं भवति तदा षष्ठी न भवति। तद्यथा—स्मराम्यहं मातरम्, स्मराम्यहं पितरमिति। अधीगर्थ।।52।।

(326. प्रतिपदषष्ठीसूत्रम् 2.3.3 आ. 4)

512. रुजार्थानां भाववचनानामज्वरेः 2.3.54

(1533. शेषपूरकवार्त्तिकम्-1)

*** अज्वरिसन्ताप्योः ***

भाष्यम्– अज्वरिसन्ताप्योरिति वक्तव्यम्। इहापि यथा स्यात्—चोरं सन्तापयति, वृषलं सन्तापयति।

आक्षेपभाष्यम्– अथ किमर्थं 'भाववचनानाम्' इत्युच्यते। यावता रुजार्था भाववचना एव भवन्ति?

समाधानभाष्यम्– भावकर्तृकाद्यथा स्यात्। इह मा भूद्—नदी कूलानि रुजतीति। रुजार्थानाम्।।54।।

(327. द्वितीयासूत्रम् 2.3.3 आ. 5)

518. द्वितीया ब्राह्मणे 2.3.60

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– गां निघ्नन्ति। गां प्रदीव्यन्ति। गां सभासद्भ्य उपहरन्ति।

समाधानबाधकभाष्यम्– नैतदस्ति। पूर्वेणाप्येतत्सिद्धम्।

समाधानभाष्यम्– इदं तर्हि—गामस्य तदहः सभायां दीव्येयुः। द्वितीया।।60।।

(328. षष्ठीसूत्रम् 2.3.3 आ. 6)

519. प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने 2.3.61

(1534. शेषपूरकवार्त्तिकम्-1)

*** हविषोऽप्रस्थितस्य ***

भाष्यम्– हविषः अप्रस्थितस्येति वक्तव्यम्। इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य। प्रेष्य।।61।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(329. षष्ठीसूत्रम् 2.3.3 आ. 7)

520. चतुर्थ्यर्थे बहुलं छन्दसि 2.3.62

(1535. वार्त्तिकम्-1)

*** षष्ठ्यर्थे चतुर्थी ***

भाष्यम्– षष्ठ्यर्थे चतुर्थी वक्तव्या। या खर्वेण पिबति तस्यै खर्वो जायते यां मलवद्वाससं सम्भवन्ति यस्ततो जायते सोऽभिशस्तो, यामरण्ये तस्यै स्तेनो, यां पराचीं तस्यै ह्रीतमुख्यपगल्भो, या स्नाति तस्या अप्सु मारुको, याभ्यङ्क्ते तस्यै दुश्चर्मा, या प्रलिखते तस्यै खलतिरपमारी, याङ्क्ते तस्यै काणो, या दतो धावते तस्यै श्यावदन्, या नखानि निकृन्तते तस्यै कुनखी, या कृणत्ति तस्यै क्लीबो, या रज्जुं सृजति तस्या उद्बन्धुको, या पर्णेन पिबति तस्या उन्मादुको जायते, अहल्यायै जार मनाय्यै तन्तुः।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्।

(1536. वार्त्तिकम्-2)

*** योगविभागासिद्धम् ***

भाष्यम्– 'चतुर्थी'। ततः 'अर्थे बहुलं छन्दसि'। चतुर्थ्य।।62।।

(330. कारकषष्ठीसूत्रम् 2.3.3 आ. 8)

523. कर्तृकर्मणोः कृति 2.3.65

कृद्ग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– कृद्ग्रहणं किमर्थम्?

समाधानभाष्यम्– इह मा भूत्—पचत्योदनं देवदत्त इति।

(1537. आक्षेपवार्त्तिकम्-1)

*** कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात् ***

भाष्यम्– कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणमनर्थकम्। किं कारणम्? लप्रतिषेधात्। प्रतिषिध्यतेऽत्र षष्ठी 'लप्रयोगे न' इति।

आक्षेपपरिहारभाष्यम्– तस्य कर्मकर्त्रर्थं तर्हि कृद्ग्रहणं कर्तव्यम्। कृतो ये कर्तृकर्मणी तत्र यथा स्यादन्यस्य ये कर्तृकर्मणी तत्र मा भूदिति।

परिहारबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। धातोर्हि द्वये प्रत्यया विधीयन्ते तिङश्च कृतश्च। तत्र कृत्प्रयोग इष्यते तिङ्प्रयोगे प्रतिषिध्यते।

परिहारसाधकभाष्यम्– न ब्रूमः—इहार्थं तस्य कर्मकर्त्रर्थं कृद्ग्रहणं कर्तव्यमिति। किं तर्हि? उत्तरार्थम्—'अव्यययोगे न' इति षष्ठ्याः प्रतिषेधं वक्ष्यति, स कृतोऽव्ययस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये कर्तृकर्मणी तत्र यथा स्यात्। अकृतोऽव्ययस्य ये कर्तृकर्मणी तत्र भा भूद्—उच्चैः कटानां स्रष्टेति।

(1538. आक्षेपसाधकवार्त्तिकम्-2)

*** तस्य कर्मकर्त्रर्थमिति चेत्प्रतिषेधेऽपि तदन्तकर्मकर्तृत्वात्सिद्धम् ***

भाष्यम्– कृत एते कर्तृकर्मणी नाव्ययस्य। अधिकरणमत्राव्ययम्।

समाधानान्तरभाष्यम्– इदं तर्हि प्रयोजनम्—उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः वक्ष्यति, स कृतो ये कर्तृकर्मणी तत्र यथा स्यात्। कृतोर्ये कर्तृकर्मणी तत्र मा भूदिति। आश्चर्यमिदं वृत्तमोदनस्य च नाम पाको ब्राह्मणानां च प्रादुर्भाव इति।

आक्षेपभाष्यम्– अथ क्रियमाणेऽपि कृद्ग्रहणे कस्मादेवात्र न भवति?

समाधानभाष्यम्– 'उभयप्राप्तौ' इति नैवं विज्ञायते—उभयोः प्राप्तिरुभयप्राप्तिः उभयप्राप्ताविति। कथं तर्हि? उभयोः प्राप्तिर्यस्मिन्कृति सोऽयमुभयप्राप्तिः कृद् उभयप्राप्ताविति।

सिद्धान्तसमाधानभाष्यम्– अथवा कृतो ये कर्तृकर्मणी तत्र यथा स्यात्। तद्धितस्य ये कर्तृकर्मणी तत्र मा भूदिति। कृतपूर्वी कटं भुक्तपूर्वी ओदनमिति।

आक्षेपभाष्यम्– ननु च वाक्येनैवानेन न भवितव्यम्। तत्र द्वितीयया तावन्न भवितव्यम्। किं कारणम्? क्तेनाभिहितं कर्मेति कृत्वा।

इनिप्रत्ययेन चापि नोत्पत्तव्यम्। किं कारणम्? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति।

आक्षेपपरिहारभाष्यम्– यत्तावदुच्यते—'द्वितीयया तावन्न भवितव्यम्। किं कारणम्? क्तेनाभिहितं कर्मेति कृत्वेति'। योऽसौ कृतकटयोरभिसम्बन्धः स उत्पन्ने प्रत्यये निवर्तते। अस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति।

यदप्युच्यते—'इनिप्रत्ययेन चापि नोत्पत्तव्यम्। किं कारणम्? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति'। नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च। यदा वाक्यम्, न तदा प्रत्ययः। यदा प्रत्ययः, सामान्येन तदा वृत्तिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः—कृतपूर्वी किम्? कटम्। भुक्तपूर्वी किम्? ओदनमिति।

समाधानान्तरभाष्यम्– अथवा इदं प्रयोजनम्—कर्तृभूतपूर्वमात्रादपि षष्ठी यथा स्यात्—देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति। कर्तृक. 65॥

(331. नियमसूत्रम् 2.3.3 आ. 9)

524. उभयप्राप्तौ कर्मणि 2.3.66

नियमप्रतिषेधाधिकरणम्

(1539. प्रतिप्रसववार्त्तिकम्-1)

*** उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– उभयप्राप्तौ कर्मणिषष्ठ्याः प्रतिषेधेऽकादिप्रयोगे प्रतिषेधो न भवतीति वक्तव्यम्। भेदिका देवदत्तस्य काष्ठानाम्, चिकीर्षा विष्णुमित्रस्य कटस्य।

भाष्यम् अपर आह—

(1540. वार्त्तिकन्यासान्तरम्-2)

*** अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम् ***

(1541. वार्त्तिकम्-3)

*** शेषे विभाषा ***

भाष्यम्– शोभना खलु पाणिनेः सूत्रस्य कृतिः, शोभना खलु पाणिनिना सूत्रस्य कृतिः। शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः, शोभना खलु दाक्षायणेन संग्रहस्य कृतिः। उभय.।।66।।

(332. कारकषष्ठीसूत्रम् 2.3.3 आ. 10)

525. क्तस्य च वर्तमाने 2.3.67

विशेषविवक्षाधिकरणम्

(1542. शेषपूरकवार्त्तिकम्-1)

*** क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम् ***

भाष्यम्– क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानं कर्तव्यम्। छात्रस्य हसितम्, नटस्य भुक्तम्, मयूरस्य नृत्तम्, कोकिलस्य व्याहृतमिति।

तृतीयाक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्।

(1543. अन्यथासिद्धिवार्त्तिकम्-2)

*** शेषविज्ञानात्सिद्धम् ***

भाष्यम्– शेषलक्षणात्र षष्ठी भविष्यति। शेष इत्युच्यते। कः शेषः? कर्मादीनामविवक्षा शेषः। कथं पुनः सतो नामाविवक्षा स्यात्, यदा छात्रो हसति, नटो भुङ्क्ते, मयूरो नृत्यति, कोकिलो व्याहरति? सतोऽप्यविवक्षा भवति। तद्यथा—अलोमिका एडका' 'अनुदरा कन्येति। असतश्च विवक्षा—समुद्रः कुण्डिका' 'विन्ध्योवर्धितकमिति।'

आक्षेपभाष्यम्– यद्येवम्, उत्तरत्र चातुःशब्द्यं प्राप्नोति—इदमहेः सृप्तम्, इहाहिना सृप्तम्, इहाहिः सृप्तः, इहाहेः सृप्तम् ग्रामस्य पार्श्वे ग्रामस्य मध्ये इति।

इष्टापत्तिभाष्यम्– इष्यत एव चातुःशब्द्यम्। क्तस्य च।।67।।

(333. कारकषष्ठीनिषेधसूत्रम् 2.3.3 आ. 11)

527. न लोकाव्ययनिष्ठाखलर्थतृनाम् 2.3.69

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इष्टोपपादकाधिकरणम्

(1544. विशेषवार्त्तिकप्रथमखण्डम्- 1)

*** लादेशे सल्लिड्ग्रहणं किकिनोः प्रतिषेधार्थम् ***

भाष्यम्– लादेशे सल्लिड्ग्रहणं कर्तव्यम्। सल्लिटोः प्रयोगे नेति वक्तव्यम्। किं प्रयोजनम्? किकिनोः प्रतिषेधार्थम्। किकिनोरपि प्रयोगे प्रतिषेधो यथा स्यात्—पपिः सोमम्, ददिर्गाः। किं पुनः कारणं न सिध्यति?

(1545. साधकवार्त्तिकद्वितीयखण्डम्- 2)

*** तयोरलादेशत्वात् ***

भाष्यम्– न हि तौ लादेशौ।

आक्षेपभाष्यम्– अथ तौ लादेशौ स्याताम्। स्यात्प्रतिषेधः?

समाधानभाष्यम्– बाढं स्यात्।

लादेशत्वसाधकभाष्यम्– लादेशौ तर्हि भविष्यतः। कथम्? 'आदृगमहनजनः किकिनौ लिट् च' इति लिड्वदिति वक्ष्यामि।

आक्षेपभाष्यम्– स तर्हि वतिनिर्देशः कर्तव्यः। नह्यन्तरेण वतिमतिदेशो गम्यते।

समाधानभाष्यम्– अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा—'एष ब्रह्मदत्तः' अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ते मन्यामहे—ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यलिटं लिडित्याह लिड्वदिति ज्ञास्यते।

(1546. शेषपूरकवार्त्तिकम्- 3)

*** उकारप्रयोगे न ***

भाष्यम्– उकारप्रयोगे नेति वक्तव्यम्। कटं चिकीर्षुः, ओदनं बुभुक्षुः।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। उकारोऽप्यत्र निर्दिश्यते। कथम्? प्रश्लिष्टनिर्देशोऽयम्—उ उक ऊक, ल ऊक लोकेति।

(1547. प्रतिप्रसववार्त्तिकम्- 4)

*** उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः ***

भाष्यम्– उकप्रतिषेधे कमेर्भाषायां प्रतिषेधो न भवतीति वक्तव्यम्। दास्याः कामुकः, वृषल्याः कामुकः।

(1548. प्रतिप्रसववार्त्तिकम्- 5)

*** अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ***

भाष्यम्– अव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेधो न भवतीति वक्तव्यम्। पुरा सूर्यस्योदेतोराधेयः। पुरा वत्सानामपाकर्तोः। पुरा क्रूरस्य विसृपो विरप्शिन्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1549. शेषपूरकवार्त्तिकम्-6)

*** शानंश्चानशशतृणामुपसंख्यानम् ***

भाष्यम्– शानश्चानशशतृणामुपसंख्यानं कर्तव्यम्। सोमं पवमानः। नटमाघ्नानः। अधीयन् पारायणम्। लप्रयोगे नेति निषेधो न प्राप्नोति।

वार्त्तिकवैयर्थ्यभाष्यम्– मा भूदेवम्। तृन्नित्येवं भविष्यति। कथम्? तृन्निति नेदं प्रत्ययग्रहणम्। किं तर्हि? प्रत्याहार ग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः? 'लटश्शतृ-' इत्यतः प्रभृत्या तृनो नकारात्।

आक्षेपभाष्यम्– यदि प्रत्याहारग्रहणम्, 'चोरस्य द्विषन्' अत्रापि प्राप्नोति।

(1550. समाधानवार्त्तिकम्-7)

*** द्विषः शतुर्वावचनम् ***

भाष्यम्– द्विषःशतुर्वेति वक्तव्यम्। तच्चावश्यं वक्तव्यम्। प्रत्ययग्रहणे सति प्रतिषेधार्थम्। प्रत्याहारग्रहणे सति तदेव विध्यर्थं भविष्यति। न लोकाव्य।।69।।

(334. कारकषष्ठीनिषेधसूत्रम् 2.3.3 आ. 12)

528. अकेनोर्भविष्यदाधमर्ण्ययोः 2.3.70

अर्थप्रत्यययोरन्वयदर्शकाधिकरणम्

(1551. वार्त्तिकम्-1)

*** अकस्य भविष्यति ***

भाष्यम्– अकस्य भविष्यति वक्तव्यम्। यवान् लावको व्रजति। ओदनं भोजको व्रजति।

(1552. वार्त्तिकम्-2)

*** इन आधमर्ण्ये च ***

भाष्यम्– तत इन आधमर्ण्ये भविष्यति चेति वक्तव्यम्। शतं दायी सहस्रं दायी ग्रामं गमी। अके।।70।।

(335. षष्ठीविकल्पनसूत्रम् 2.3.3 आ. 13)

529. कृत्यानां कर्तरि वा 2.3.71

योगविभागाधिकरणम्

आक्षेपभाष्यम्– कर्तृग्रहणं किमर्थम्?

समाधानभाष्यम्– कर्मणि मा भूदिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। भावकर्मणोः कृत्या विधीयन्ते। तत्र कृत्यैरभिहितत्वात्कर्मणि षष्ठी न भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधानभाष्यम्– अत उत्तरं पठति—

(1553. वार्त्तिकम्-3)

*** भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणम् ***

भाष्यम्– भव्यादीनां कर्म कृत्यैरनभिहितं 'गेयो माणवक: साम्नाम्' भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणं क्रियते।

आक्षेपभाष्यम्– किमुच्यते—भव्यादीनां कर्म कृत्यैरनभिहितमिति, नेहाप्यनभिहितं भवति—आक्रष्टव्या ग्रामं शाखेति।

समाधानभाष्यम्– एवं तर्हि योगविभाग: करिष्यते—'कृत्यानाम्' कृत्यानां प्रयोगे षष्ठी न भवतीति। किमुदाहरणम्? ग्राममाक्रष्टव्या शाखा। तत: 'कर्तरि वा' इति।

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नोति—गेयो माणवक: साम्नामिति।

समाधानभाष्यम्– उभयप्राप्ताविति वर्तते।

समाधानबाधकभाष्यम्– ननु चोभयप्राप्तिरेवैषा। गेयो माणवक: साम्नामिति च गेयानि माणवकेन सामानीति च भवति।

समाधानसाधकभाष्यम्– उभयप्राप्तिर्नाम सा भवति, यत्रोभयस्य युगपत्प्रसङ्ग:। अत्र च यदा कर्मणि न तदा कर्तरि। यदा कर्तरि न तदा कर्मणीति।। कृत्यानाम्।।71।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयाध्यायस्य तृतीये पादे तृतीयमाह्निकम्; पादश्च समाप्त:

●

द्वितीयेऽध्याये चतुर्थे पादे प्रथममाह्निकम्

एकवद्भावप्रकरणम्

336. अतिदेशसूत्रम् 2.4.1 आ. 1)

532. द्विगुरेकवचनम् 2.4.1

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

(1554. समाधानवार्त्तिकम्-1)

*** प्रत्यधिकरणं वचनोत्पत्ते: संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानम् ***

भाष्यम्– प्रत्यधिकरणं वचनोत्पत्तिर्भवति। किमिदं प्रत्यधिकरणमिति? अधिकरण-मधिकरणं प्रति प्रत्यधिकरणम्। संख्यासामानाधिकरण्याच्च। संख्यया बह्वर्थया चास्य सामानाधिकरण्यम्। प्रत्यधिकरणं वचनोत्पत्ते: संख्यासामानाधिकरण्याच्च 'बहुषु बहुवचनम्'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति बहुवचनं प्राप्नोति। इष्यते चैकवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति द्विगोरेकवचनविधानम्। एवमर्थमिदमुच्यते।

काकुभाष्यम्– अस्ति प्रयोजनमेतत्। किं तर्हीति।

अनुप्रयोगेऽप्येकवचनसाधनाधिकरणम्

(1555. **आक्षेपवार्त्तिकम्**- 2)

*** तत्रानुप्रयोगस्यैकवचनाभावोऽद्विगुत्वात् ***

भाष्यम्– तत्रानुप्रयोगस्यैकवचनं न प्राप्नोति 'पञ्चपूलीयम्' इति। किं कारणम्? अद्विगुत्वात्। 'द्विगुरेकवचनम्' इत्युच्यते। न चात्रानुप्रयोगो द्विगुसञ्ज्ञः।

(1556. **समाधानाय न्यासान्तरवार्त्तिकम्**- 3)

*** सिद्धं तु द्विग्वर्थस्यैकवद्वचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? द्विग्वर्थ एकवद्भवतीति वक्तव्यम्।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्हि? अन्वर्थग्रहणम्—उच्यते वचनम्, एकस्यार्थस्य वचनमेकवचनमिति।

एकशेषेबहुवचनसाधनाधिकरणम्

(1557. **आक्षेपवार्त्तिकम्**- 4)

*** एकशेषप्रतिषेधश्च ***

भाष्यम्– एकशेषे च प्रतिषेधो वक्तव्यः। पञ्चपूली च पञ्चपूली च पञ्चपूली च पञ्चपूल्यः।

(1558. **समाधानवार्त्तिकम्**- 5)

*** न वाऽन्यस्यानेकत्वात् ***

भाष्यम्– न वा वक्तव्यः। किं कारणम्? अन्यस्यानेकत्वात्। नैतद्द्विगोरनेकत्वम्। कस्य तर्हि? द्विग्वर्थसमुदायस्य।

तद्धितार्थद्विगौ एकवद्भावपरिहाराधिकरणम्

(1559. **आक्षेपवार्त्तिकम्**- 6)

*** समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थम् ***

भाष्यम्– समाहारग्रहणं च कर्तव्यम्। किं प्रयोजनम्? तद्धितार्थप्रतिषेधार्थम्। तद्धितार्थे यो द्विगुस्तस्य मा भूत्—पञ्चकपालौ पञ्चकपाला इति।

समाधानाय प्रत्याक्षेपभाष्यम्– किं पुनरयं पञ्चकपालशब्दः प्रत्येकं परिसमाप्यते, आहोस्वित्समुदाये वर्तते?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहबीजभाष्यम्– किं चात:?

प्रथमपक्षाङ्गीकारेविशेषप्रदर्शनभाष्यम्– यदितावत्प्रत्येकं परिसमाप्यते, पुरस्तादेव चोदितं परिहृतं च।

द्वितीयपक्षाङ्गीकारभाष्यम्– अथ समुदाये वर्तते।

(1560. द्वितीयपक्षे विशेषप्रदर्शनवार्त्तिकम्- 7)

*** न वा समाहारैकत्वात् ***

भाष्यम्– न वैतत् समाहारैकत्वादपि सिध्यति।

प्रथमपक्षाङ्गीकारभाष्यम्– एवं तर्हि प्रत्येकं परिसमाप्यते। पुरस्तादेव चोदितं परिहृतं च।

व्याख्यान्तरभाष्यम्– अपर आह—'न वा समाहारैकत्वात्'। न वा योगारम्भेणैवार्थ:। किं कारणम्? समाहारैकत्वादेकवचनं भविष्यति। द्विगुरेक।।1।।

(337. एकवद्भावसूत्रम् 2.4.1 आ. 2)

533. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् 2.4.2

अनिष्टापत्तिवारणाधिकरणम्

(1561. शेषपूर्तिवार्त्तिकम्- 1)

*** प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणम् ***

भाष्यम्– प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणं कर्तव्यम्। प्राण्यङ्गानां प्राण्यङ्गैरिति वक्तव्यम्। तुर्याङ्गानां तूर्याङ्गैरिति वक्तव्यम्। सेनाङ्गानां सेनाङ्गैरिति वक्तव्यम्। किं प्रयोजनम्? व्यतिकरो मा भूदिति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्।

(1562. समाधानहेतुवार्त्तिकम्- 2)

*** योगविभागात्सिद्धम् ***

भाष्यम्– योगविभाग: करिष्यते—'प्राण्यङ्गानाम्'। तत:—'तूर्याङ्गानाम्'। तत: 'सेनाङ्गानाम्' इति।

आक्षेपभाष्यम्– स तर्हि योगविभाग: कर्तव्य:?

समाधानभाष्यम्– न कर्तव्य:। प्रत्येकमङ्गशब्द: परिसमाप्यते। द्वन्द्वश्च।।2।।

(338. एकवद्भावसूत्रम् 2.4.1 आ. 3)

534. अनुवादे चरणानाम् 2.4.3

आक्षेपभाष्यम्– इह कस्मान्न भवति—नन्दन्तु कठकालापा:, वर्धन्तां कठकौथुमा:?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1563. **समाधानवार्त्तिकम्**-1)

*** स्थेणोः ***

व्याख्याभाष्यम्– स्थेणोरिति वक्तव्यम्।

आक्षेपभाष्यम्– एवमपि तिष्ठन्तु कठकालापा इत्यत्रापि प्राप्नोति।

(1564. **समाधानवार्त्तिकम्**-2)

*** अद्यतन्यां च ***

भाष्यम्– अद्यतन्यां चेति वक्तव्यम्। उदगात्कठकालापम्। प्रत्यष्ठात्कठकौथुमम्। उदगात्कौमोदपैप्पलादम्। अनुवादे।।3।।

(339. **एकवद्भावसूत्रम्** 2.4.1 आ. 4)

538. विशिष्टलिङ्गो नदीदेशोऽग्रामाः 2.4.7

अनिष्टवारणाधिकरणम्

(1565. **प्रतिप्रसववार्त्तिकम्**-1)

*** ग्रामप्रतिषेधे नगरप्रतिषेधः ***

भाष्यम्– अग्रामा इत्यत्रानगराणामिति वक्तव्यम्। इह मा भूत्—मथुरापाटलिपुत्रमिति।

(1566. **वार्त्तिकम्**-2)

*** उभयतश्च ***

भाष्यम्– उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः। शौर्यं च केतवता च शौर्यकेतवते। जाम्बवं च शालूकिनी च जाम्बवशालूकिन्यौ। विशिष्ट।।7।।

(340. **एकवद्भावसूत्रम्** 2.4.1 आ. 5)

539. क्षुद्रजन्तवः 2.4.8

क्षुद्रजन्तुत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्– क्षुद्रजन्तव इत्युच्यते। के क्षुद्रजन्तवः?

समाधानभाष्यम्– क्षोत्तव्या जन्तवः क्षद्रजन्तवः।

आक्षेपभाष्यम्– यद्येवं यूकालिक्षं कीटपिपीलिकं दंशमशकमिति न सिध्यति।

समाधानभाष्यम्– एवं तर्ह्यनस्थिकाः क्षुद्रजन्तवः।

लक्षणान्तरभाष्यम्– अथवा येषां स्वं शोणितं नास्ति ते क्षुद्रजन्तवः।

लक्षणान्तरभाष्यम्– अथवा येषामासहस्रादञ्जलिर्न पूर्यते ते क्षुद्रजन्तवः।

लक्षणान्तरभाष्यम्– अथवा येषां गोचर्ममात्रं राशिं हत्वा न पतति ते क्षुद्रजन्तवः।

सिद्धान्तलक्षणम्– अथवा नकुलपर्यन्ताः क्षुद्रजन्तवः। क्षुद्रजन्त।।8।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(341. एकवद्भावसूत्रम् 2.4.1 आ. 6)

540. येषां च विरोधः शाश्वतिकः 2.4.9

आक्षेपभाष्यम्– किमर्थश्चकारः?

समाधानभाष्यम्– एवकारार्थश्चकारः—येषां विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्यात्, यदन्यत्राप्नोति तन्मा भूदिति। किं चान्यत्राप्नोति? ('विभाषा वृक्षमृग-' इति। तत्र) 'पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम्' इत्युक्तम्, तन्न वक्तव्यं भवति।। येषां च।।9।।

(342. एकवद्भावसूत्रम् 2.4.1 आ. 7)

541. शूद्राणामनिरवसितानाम् 2.4.10

अनिरवसितशब्दार्थाधिकरणम्

आक्षेपभाष्यम्– 'अनिरवसितानाम्' इत्युच्यते। कुतोऽनिरवसितानाम्?

समाधानभाष्यम्– आर्यावर्तादनिरवसितानाम्।

आक्षेपभाष्यम्– कः पुनरार्यावर्तः?

समाधानभाष्यम्– प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्।

आक्षेपभाष्यम्– यद्येवं किष्किन्धगन्धिकं शकयवनं शौर्यक्रौञ्चमिति न सिध्यति।

समाधानभाष्यम्– एवं तर्ह्यार्यनिवासादनिरवसितानाम्। कः पुनरार्यनिवासः? ग्रामो घोषो नगरं संवाह इति।

आक्षेपभाष्यम्– एवमपि य एते महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति तत्र चण्डालमृतपा इति न सिध्यति।

समाधानभाष्यम्– एवं तर्हि याज्ञात्कर्मणोऽनिरवसितानाम्।

आक्षेपभाष्यम्– एवमपि तक्षायस्कारं रजकतन्तुवायमिति न सिध्यति।

सिद्धान्तसमाधानभाष्यम्– एवं तर्हि पात्रादनिरवसितानाम्। यैर्भुक्ते पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः। यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिता इति। शूद्राणाम्।।10।।

(343. एकवद्भावसूत्रम् 2.4.1 आ. 8)

542. गवाश्वप्रभृतीनि च 2.4.11

गणपठितरूपविवक्षाधिकरणम्

(1567. वार्त्तिकम्-1)

*** गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम् ***

भाष्यम्– गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं द्रष्टव्यम्। गवाश्वम्। गवाविकम्। गवैडकम्। गवाश्व।।11।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(344. एकवद्भावसूत्रम् 2.4.1 आ. 9)

543. विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्

नियमाधिकरणम्

(1568. नियमवार्त्तिकम्-1)

* बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम् *

भाष्यम्– फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां द्वन्द्वः विभाषा एकवद्भवति बहुप्रकृतिरिति वक्तव्यम्। फल—बदरामलकम्। बदरामलकानि। सेना—हस्त्यश्वम्। हस्त्यश्वाः। वनस्पति—प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधाः। मृग—रुरुपृषतम्। रुरुपृषताः। शकुनि—हंसचक्रवाकम्। हंसचक्रवाकाः। क्षुद्रजन्तु—यूकालिक्षम्। यूकालिक्षाः। धान्य—व्रीहियवम्। व्रीहियवाः। माषतिलम्। माषतिलाः। तृण—कुशकाशम्। कुशकाशाः। शरशीर्षम्। शरशीर्षाः। किं प्रयोजनम्? बहुप्रकृतिरेव यस्तत्र यथा स्यात्। क्व मा भूत्? बदरामलके तिष्ठतः।

आक्षेपभाष्यम्– किं पुनरनेन या प्राप्तिः सा नियम्यते, आहोस्विद्—अविशेषेण?

भाष्यम्– किञ्चातः?

प्रथमपक्षदूषणभाष्यम्– यद्यनेन या प्राप्तिः सा नियम्यते, प्लक्षन्यग्रोधौ 'जातिरप्राणिनाम्' इति नित्यो द्वन्द्वैकवद्भावः प्राप्नोति। अथाविशेषेण, न दोषो भवति।

द्वितीयपक्षाभ्युपगमभाष्यम्– यथा न दोषस्तथास्तु।

(1569. पूर्वविप्रतिषेधवार्त्तिकम्-2)

* पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम् *

भाष्यम्– पशुशकुनिद्वन्द्वे विरोधिनां 'येषां च विरोधः शाश्वतिकः' इत्येतद्भवति पूर्वविप्रतिषेधेन। पशुशकुनिद्वन्द्वस्यावकाशः—महाजोरभ्रम्। महाजोरभ्राः। हंसचक्रवाकम्। हंसचक्रवाकाः। 'येषां च विरोधः शाश्वतिकः' इत्यस्यावकाशः—श्रमणब्राह्मणम्। इहोभयं प्राप्नोति—काकोलूकं श्वशृगालमिति। 'येषां च विरोधः शाश्वतिकः' इत्येतद्भवति पूर्वविप्रतिषेधेन।

आक्षेपभाष्यम्– स तर्हि पूर्वविप्रतिषेधो वक्तव्यः?

समाधानभाष्यम्– न वक्तव्यः। उक्तं चकारकणस्य प्रयोजनम्—येषां च विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्याद् यदन्यत्प्राप्नोति तन्मा भूदिति।

(1570. पूर्वप्रतिषेधवार्त्तिकम्-3)

* अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकम् *

भाष्यम्– अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकं भवति पूर्वविप्रतिषेधेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्ववडवयोः पूर्वलिङ्गत्वस्यावकाशः—विभाषा पशुद्वन्द्वनपुंसकम्, यदा न पशुद्वन्द्वनपुंसकं सोऽवकाशः—अश्ववडवौ। पशुद्वन्द्वनपुंसकस्यावकाशः—अन्ये पशुद्वन्द्वाः—महाजोरभ्रं महाजोरभ्राः। पशुद्वन्द्वनपुंसकप्रसङ्ग उभयं प्राप्नोति—'अश्ववडवम्' पशुद्वन्द्वनपुंसकं भवति पूर्वविप्रतिषेधेन।

आक्षेपभाष्यम्– स तर्हि पूर्वविप्रतिषेधो वक्तव्यः?

समाधानभाष्यम्– न वक्तव्यः।

(1571. **समाधानहेतुवार्त्तिकम्**- 4)

*** प्रतिपदविधानात्सिद्धम् ***

भाष्यम्– प्रतिपदमत्र नपुंसकं विधीयते—'अश्ववडवपूर्वापर—' इति।

(1572. **प्रत्याख्यानवार्त्तिकम्**- 5)

*** एकवचनमनर्थकं समाहारैकत्वात् ***

भाष्यम्– एकवद्भावोऽनर्थकः। किं कारणम्? समाहारैकत्वात्। एकोऽयमर्थः समाहारो नाम तस्यैकत्वादेकवचनं भविष्यति।

प्रत्याख्यानबाधकभाष्यम्– इदं तर्हि प्रयोजनम्—एवं विज्ञास्यामि—इह नित्यो विधिः, इह विभाषेति।

प्रत्याख्यानसाधकभाष्यम्– नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति—'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति। यदयं 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' इत्याह।

प्रत्याख्यानबाधकभाष्यम्— इदं तर्हि प्रयोजनम्—'स नपुंसकम्' इति वक्ष्यामीति।

प्रत्याख्यानसाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य।

आक्षेपभाष्यम्– न तर्हीदानीमिदं वक्तव्यम्?

समाधानभाष्यम्– वक्तव्यं च। किं प्रयोजनम्? पूर्वत्र नित्यार्थम्, उत्तरत्र व्यभिचारार्थं 'विभाषा वृक्षमृग' इति। विभाषा वृ.।।12।।

(345. **एकवद्भावसूत्रम्** 2.4.1 आ. 10)

547. विभाषा समीपे 2.4.16

प्रत्याख्यानाधिकरणम्

आक्षेपभाष्यम्– किमुदाहरणम्?

समाधानभाष्यम्– उपदशं पाणिपादम्, उपदशाः पाणिपादाः।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम् अयं द्वन्द्वैकवद्भाव आरभ्यते तत्र कः प्रसङ्गो यदनुप्रयोगस्य स्यात्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याख्यानोपसंहारभाष्यम्– एवं तर्ह्यव्ययस्य संख्ययाऽव्ययीभावोऽप्यारभ्यते बहुव्रीहिरपि। तद्यदा तावदेकवचनं तदाऽव्ययीभावोऽनुप्रयुज्यते एकार्थस्यैकार्थ इति। यदा बहुवचनं तदा बहुव्रीहिरनुप्रयुज्यते बह्वर्थस्य बह्वर्थ इति। विभाषा।।16।।

अथ लिङ्गानुशासनप्रकरणम्

(346. **नपुंसकत्वसूत्रम्** 2.4.1 आ. 11)

550. तत्पुरुषोऽनञ्कर्मधारयः 2.4.19

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

एकदेशिसमाधानभाष्यम्– 'सञ्ज्ञायां कन्थोशीनरेषु' इति वक्ष्यति। तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। नहि सञ्ज्ञायां कन्थात उशीनरेष्वतत्पुरुषोऽनञ्समासः कर्मधारयो वास्ति।

समाधानभाष्यम्– उत्तरार्थं तर्हि—'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इति वक्ष्यति, तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। नहि तदाद्याचिख्यासायामुपज्ञोपक्रमान्तोऽतत्पुरुषो नञ्समासः कर्मधारयोः वास्ति।

समाधानभाष्यम्– उत्तरार्थमेव तर्हि—'छाया बाहुल्ये' इति वक्ष्यति, तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। नहि च्छायान्तो बाहुल्येऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ति।

समाधानभाष्यम्– उत्तरार्थमेव तर्हि 'सभा राजाऽमनुष्यपूर्वा' 'अशाला च' इति वक्ष्यति। तदत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

समाधानबाधकभाष्यम्– एतदपि नास्ति प्रयोजनम्। नहि सभान्तोऽशालायामतत्पुरुषो नञ्समासस्य कर्मधारयो वास्ति।

समाधानभाष्यम्– इदं तर्हि 'विभाषा सेनासुरा-' इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

आक्षेपभाष्यम्– तत्पुरुष इति किमर्थम्?

समाधानभाष्यम्– दृढसेनो राजा।

आक्षेपभाष्यम्– अनञिति किमर्थम्?

समाधानभाष्यम्– असेना।

आक्षेपभाष्यम्– अकर्मधारय इति किमर्थम्?

समाधानभाष्यम्– परमसेना। उत्तमसेना।। तत्पुरु.।।19।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(347. द्वन्द्वतत्पुरुषलिङ्गानुशासनसूत्रम् 2.4.1 आ. 12)

557. परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः 2.4.26

सूत्रप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमिदमुच्यते?

समाधानभाष्यम्– द्वन्द्वोऽयमुभयपदार्थप्रधानः। तत्र कदाचित्पूर्वस्य यल्लिङ्गं तत्समासस्यापि स्यात्, कदाचिदुत्तरपदस्य, इष्यते च परस्य यल्लिङ्गं तत्समासस्य यथा स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्येवमर्थमिदमुच्यते।

समाधानशेषभाष्यम्– तत्पुरुषश्चापि कः प्रयोजयति? यः पूर्वपदार्थप्रधान एकदेशिसमासः—अर्धपिप्पलीति। यो ह्युत्तरपदार्थप्रधानः, दैवकृतं तस्य परवल्लिङ्गम्।

अनिष्टापत्तिवारणाधिकरणम्

(1573. आक्षेपवार्त्तिकम्-1)

*** परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः ***

भाष्यम्– परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामापन्नजीविकः। अलंपूर्व—अलं जीविकायै अलंजीविकः। गतिसमास—निष्कौशाम्बिः निर्वाराणसिः।

(1574. प्रतिषेधवार्त्तिकम्-2)

*** पूर्वपदस्य च ***

भाष्यम्– पूर्वपदस्य च प्रतिषेधो वक्तव्यः। मयूरीकुक्कुटौ।

आशयान्तरेण प्रतिषेधवैयर्थ्यभाष्यम्– यदि पुनर्यथाजातीयकं परस्य लिङ्गं तथाजातीयकं समासादन्यदतिदिश्यते।

(1575. आशयान्तरदूषणवार्त्तिकम्-3)

*** समासादन्यल्लिङ्गमिति चेदश्ववडवयोष्टब्लुग्वचनम् ***

(1576 दूषणबाधकवार्तकम्-4)

*** निपातनात्सिद्धम् ***

भाष्यम्– निपातनात्सिद्धमेतत्। किं निपातनम्? 'अश्ववडवपूर्वापरे'ति।

(1577. दूषणबाधकान्तरवार्त्तिकम्-5)

*** उपसर्जनह्रस्वत्वं वा ***

भाष्यम्– अथवा 'उपसर्जनस्य' इति ह्रस्वत्वं भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– इहापि तर्हि प्राप्नोति—'कुक्कुटमयूर्यौ' इति।

इष्टापत्तिभाष्यम्– अस्तु।

(1578. **व्याख्यान्तरवार्त्तिकम्**-6)

* परवल्लिङ्गमिति शब्दशब्दार्थौ *

भाष्यम्– परवल्लिङ्गमिति शब्दशब्दार्थावतिदिश्यते। तत्रौपदेशिकस्य ह्रस्वत्वम्। आतिदेशिकस्य श्रवणं भविष्यति।

आक्षेपान्तरभाष्यम्– इदं तर्हि—दत्ता च कारीषगन्ध्या च दत्ताकारीषगन्ध्ये। दत्ता च गार्ग्यायणी च दत्तागार्ग्यायण्यौ। द्वौ ष्यङौ द्वौ ष्फौ च प्राप्नुतः।

इष्टापत्तिभाष्यम्– स्ताम् पुंवद्भावेनैकस्य निवृत्तिर्भविष्यति।

आक्षेपभाष्यम्– इदं तर्हि—दत्ता च युवतिश्च दत्तायुवती। द्वौ तिशब्दौ प्राप्नुतः।

उपसंहारभाष्यम्– तस्मान्नैतच्छक्यं वक्तुं 'शब्दशब्दार्थावतिदिश्येते' इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तं 'समासादन्यल्लिङ्गमिति चेदश्ववडवयोष्टाब्लुग्वचनम्' इति।

समाधानभाष्यम्– परिहृतमेतत्—'निपातनात्सिद्धम्' इति।

समाधानान्तरभाष्यम्– अथवा नैवं विज्ञायते—परस्यैव परवदिति। कथं तर्हि? परस्येव परवदिति। यथाजातीयकं परस्य लिङ्गं तथाजातीयकं समासस्यातिदिश्यते। अथ पूर्वपदस्य न प्रतिषिध्यते।

आक्षेपभाष्यम्– प्राप्तादिषु कथम्?

(1579. **समाधानवार्त्तिकम्**-7)

* प्राप्तादिषु चैकदेशिग्रहणात्सिद्धम् *

भाष्यम्– 'द्वन्द्वैकदेशिनोः' इति वक्ष्यामि।

आक्षेपभाष्यम्– तदेकदेशिग्रहणं कर्तव्यम्?

समाधानभाष्यम्– न कर्तव्यम्। एकदेशिसमासो नारभ्यते।

आक्षेपभाष्यम्– कथमर्धपिप्पलीति?

समाधानभाष्यम्– समानाधिकरणो भविष्यति—अर्धं च सा पिप्पली च अर्धपिप्पलीति।

समाधानबाधकभाष्यम्– न सिध्यति। परत्वात्षष्ठीसमासः प्राप्नोति।

षष्ठीसमासासम्भवभाष्यम्– अद्य पुनरयमेकदेशिसमास आरभ्यमाणः षष्ठीसमासं बाधते।

षष्ठीसमासेष्टापत्तिभाष्यम्– इष्यते च षष्ठीसमासोऽपि। तद्यथा—अपूपार्धं मया भक्षितं ग्रामार्धं मया लब्धमिति। एवं पिप्पल्यर्धमित्यपि भवितव्यम्।

आक्षेपभाष्यम्– कथमर्धपिप्पलीति?

समाधानभाष्यम्– समानाधिकरणो भविष्यति। परवल्लिङ्गम्।।26।।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(348. पुंल्लिङ्गसूत्रम् 2.4.1 आ. 13)

560. रात्राह्नाहाः पुंसि 2.4.29

शेषपूरणाधिकरणम्

(1580. शेषवार्त्तिकम्- 1)

*** अनुवाकादयः पुंसि ***

भाष्यम्– अनुवाकादयः पुंसि भाष्यन्त इति वक्तव्यम्। अनुवाकः। शंयुवाकः। रात्रा।।29।।

(349. नपुंसकसूत्रम् 2.4.1 आ. 14)

561. अपथं नपुंसकम् 2.4.30

शेषपूर्त्यधिकरणम्

(1581. शेषवार्त्तिकम्- 1)

*** पुण्यसुदिनाभ्यामह्नः ***

भाष्यम्– पुण्यसुदिनाभ्यामह्नो नपुंसकत्वं वक्तव्यम्। पुण्याहम्। सुदिनाहम्।

(1582. शेषवार्त्तिकम्- 2)

*** पथः संख्याव्ययादेः ***

भाष्यम्– पथः संख्याव्ययादेरिति वक्तव्यम्। द्विपथं त्रिपथं चतुष्पथम् उत्पथं विपथम्।

(1583. शेषवार्त्तिकम्- 3)

*** द्विगुश्च ***

भाष्यम्– द्विगुश्च समासो नपुंसकलिङ्गो भवतीति वक्तव्यम्। पञ्चगवं दशगवम्।

(1584. शेषवार्त्तिकम्- 4)

*** अकारान्तोत्तरपदो द्विगुः स्त्रियाम् ***

भाष्यम्– अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चपूली दशपूली।

(1585. शेषवार्त्तिकम्- 5)

*** वाबन्तः ***

भाष्यम्– वा आबन्तः स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चखट्वी पञ्चखट्वम् दश-खट्वी दशखट्वम्।

(1586. शेषवार्त्तिकम्- 6)

*** अनो नलोपश्च ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– अनो नलोपश्च वा च स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चतक्षी पञ्चतक्षम्।

(1587. **शेषवार्त्तिकम्**-7)

*** पात्रादिभ्यः प्रतिषेधः ***

भाष्यम्– पात्रादिभ्यः प्रतिषेधो वक्तव्यः। पञ्चपात्रं द्विपात्रम्।।30।।

(350. **पुंनपुंसकलिङ्गसूत्रम्** 2.4.1 **आ.** 15)

562. अर्धर्चाः पुंसि च 2.4.31

बहुवचनस्याद्यर्थकत्वाधिकरणम्

(1588. **वार्त्तिकम्**-1)

*** अर्धर्चादयः ***

भाष्यम्– अर्धर्चादय इति वक्तव्यम्। अर्धर्चः अर्धर्चम्। कार्षापणं कार्षापणः। गोमयं गोमयः। सरकं सरकः।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्।

(1589. **समाधानसाधकवार्त्तिकम्**-2)

*** बहुवचननिर्देशात्सिद्धम् ***

भाष्यम्– बहुवचननिर्देशादाद्यर्थो गम्यते। अर्धर्चाः।।31।।

अथ विधिप्रकरणम्

(351. **आदेशविधिसूत्रम्** 2.4.1 **आ.** 16)

563. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ 2.4.32

अन्वादेशलक्षणाधिकरणम्

(1590. **वार्त्तिकम्**-1)

*** अन्वादेशे समानाधिकरणग्रहणम्** (देवदत्तं भोजयेमं चेत्यप्रसङ्गार्थम्) *****

भाष्यम्– अन्वादेशे समानाधिकरणग्रहणं कर्तव्यम्। किं प्रयोजनम्? देवदत्तं भोजय इमं चेत्यप्रसङ्गार्थम्। इह मा भूत्—देवदत्तं भोजय इमं च यज्ञदत्तं भोजयेति।

(1591. **अन्वादेशलक्षणवार्त्तिकम्**-2)

*** अन्वादेशश्च कथितानुकथितमात्रम् ***

भाष्यम्– अन्वादेशश्च कथितानुकथितमात्रं द्रष्टव्यम्। तद् द्वेष्यं विजानीयाद्—इदमा कथितमिदमैव यदानुकथ्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे—अन्वादेशश्च कथितानुकथितमात्रमिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओदशशित्करणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– अथ किमर्थमशादेशः क्रियते, न 'तृतीयादिषु' इत्येवोच्येत। तत्र टायामोऽसि च एनेन भवितव्यम्। अन्याः सर्वा हलादयो विभक्तयः। तत्र इद्रूपलोपे कृते केवलमिदमोनुदात्तत्वं वक्तव्यम्।

समाधानभाष्यम्– अत उत्तरं पठति—

(1592. **प्रयोजनवार्त्तिकम्**- 3)

*** अशादेशवचनं साकच्कार्थम् ***

भाष्यम्– अशादेशवचनं साकच्कार्थं क्रियते। साकच्कस्यायमादेशो यथा स्यात्— इमकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतमिति।

आक्षेपभाष्यम्– अथ किमर्थं शित्करणम्?

(1593. **समाधानवार्त्तिकम्**- 4)

*** शित्करणं सर्वादेशार्थम् ***

भाष्यम्– शित्करणं क्रियते सर्वादेशार्थम्। शित्सर्वस्येति सर्वादेशो यथा स्यात्— इमकाभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतमिति। अक्रियमाणे हि शित्करणेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत।

(1594. **समाधानबाधकवार्त्तिकम्**- 5)

*** न वाऽन्त्यविकारवचनानर्थक्यात् ***

भाष्यम्– न वा वक्तव्यम्। किं कारणम्? अन्त्यस्य विकारवचनानर्थक्यात्। अकार-स्याकारवचने प्रयोजनं नास्तीति कृत्वान्तरेणापि शकारं सर्वादेशो भविष्यति।

(1595. **समाधानसाधकवार्त्तिकम्**- 6)

* **अर्थवत्त्वादेशप्रतिषेधार्थम्** (तस्माच्छित्करणम्) *

भाष्यम्– अर्थवत्त्वकारस्याकारवचनम्। कोऽर्थः? आदेशप्रतिषेधार्थम्। येऽन्ये अकारस्यादेशाः प्राप्नुवन्ति तद्बाधनार्थम्। तद्यथा—'मो राजि समः क्वौ' इति मकारस्य मकारवचने प्रयोज़नं नास्तीति कृत्वा अनुस्वारादयो बाध्यन्ते। तस्माच्छित्करणम्। तस्माच्छकारः कर्तव्यः।

एकदेशिसमाधानबाधकभाष्यम्– न कर्तव्यः। प्रश्लिष्टनिर्देशोऽयम्—'अ अ' 'अनेकाल् शित्सर्वस्य' इति सर्वादेशो भविष्यति।

समाधानबाधकभाष्यम्– अथवा विचित्रास्तद्धितवृत्तयः। नान्वादेशेकजुत्पद्यते। इदमो।।32।।

(352. **आदेशसूत्रम्** 2.4.1 आ. 17)

564. एतदस्त्रतसोस्त्रतसौ चानुदात्तौ 2.4.33

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुदात्तत्वकथनप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थं त्रतसोरनुदात्तत्वमुच्यते?

समाधानभाष्यम्– उदात्तौ मा भूतामिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। लित्स्वरे निघाते एतदनुदात्तत्वेन सिद्धम्।

समाधानसाधकभाष्यम्– इदमिह सम्प्रधार्यम्—अनुदात्तत्वं क्रियताम्, लित्स्वर इति। किमत्र कर्तव्यम्? परत्वाल्लित्स्वरः। नित्यमनुदात्तत्वम्—कृतेऽपि लित्स्वरे प्राप्नोति, अकृतेऽपि। तत्र नित्यत्वादनुदात्तत्वे कृते लिति पूर्व उदात्तभावी नास्तीति कृत्वा यथा प्राप्तः प्रत्ययस्वरः प्रसज्येत। तद्यथा—'गोष्पदप्रं वृष्टो देवः' ऊलोपे कृते पूर्व उदात्तभावी नास्तीति कृत्वा यथाप्राप्तः प्रत्ययस्वरो भवति। तस्मात्रतसोरनुदात्तत्वं वक्तव्यम्। एतदः।।33।।

(353. आदेशसूत्रम् 2.4.1 आ. 18)

565. द्वितीयाटौस्स्वेनः 2.4.34

इदमोऽपि स्थानित्वाधिकरणम्

आक्षेपभाष्यम्– कस्यायमेनो विधीयते। एतदः प्राप्नोति। इदमोऽपि त्विष्यते। तदिदमो ग्रहणं कर्तव्यम्।

समाधानभाष्यम्– न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्? 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' इति।

आक्षेपभाष्यम्– यदि तदनुवर्तते, 'एतदस्त्रतसोस्त्रतसौ चानुदात्ताविदमश्च' इतीदमोऽपि प्राप्नोति।

आक्षेपबाधकभाष्यम्– नैष दोषः। सम्बन्धमनुवर्तिष्यते। 'इदमोऽन्वादेशेशनुदात्तस्तृतीयादौ'। 'एतदस्त्रतसोस्त्रतसौ चानुदात्तौ' इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावश् भवति। ततः 'द्वितीयाटौस्स्वेनः'। इदमः एतदश्च। 'तृतीयादौ' इति निवृत्तम्।

अथवा मण्डूकगतयोऽधिकाराः। तद्यथा—मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः।

आक्षेपबाधकशेषभाष्यम्– अथवा एकयोगः करिष्यते—'इदमोऽन्वादेशेशनुदात्तस्तृतीयादावेतदस्त्रतसौ चानुदात्तौ'। ततः 'द्वितीयाटौस्स्वेनः' इदम एतदश्च। तृतीयादाविति निवृत्तम्।

आक्षेपबाधकशेषभाष्यम्– अथवोभयं निवृत्तं तदपेक्षिष्यामहे।

(1596. वार्त्तिकम्-1)

*** एनदिति नपुंसकैकवचने ***

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– एनदिति नपुंसकैकवचने वक्तव्यम्। इदं कुण्डमानय प्रक्षालयैनत् परिवर्तयैनत्।

आक्षेपभाष्यम्– यद्येनत्क्रियते एनो न वक्तव्यः।

प्रत्याक्षेपभाष्यम्– का रूपसिद्धिः—अथो एनम्, अथो एनानीति?

प्रत्याक्षेपसमाधानभाष्यम्– त्यदाद्यत्वेन सिद्धम्।

समाधानबाधकभाष्यम्– यद्येवमेनश्रितको न सिध्यति। एनच्छ्रितक इति प्राप्नोति।

समाधानसाधकभाष्यम्– यथालक्षणमप्रयुक्ते। द्वितीयाटौ।।34।।

अथार्धधातुकाधिकारप्रकरणम्

(354. **अधिकारसूत्रम्** 2.4.1 आ. 19)

566. आर्धधातुके 2.4.35

सप्तम्या वैषयिकत्वाधिकरणम्

(1597. **आक्षेपवार्त्तिकप्रथमखण्डम्**-1)

* जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम् *

भाष्यम्– जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्नार्धधातुके जग्ध्यादिभिर्भवितव्यम्।

आक्षेपभाष्यम्– किमतो यत्सति भवितव्यम्?

(1598. **आक्षेपवार्त्तिकद्वितीयखण्डम्**-2)

* तत्रोत्सर्गलक्षणप्रतिषेधः *

भाष्यम्– तत्रोत्सर्गलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। भव्यं प्रवेयम् आख्येयम्। ण्यत्यवस्थितेऽनिष्टे प्रत्यय आदेशः स्याद्। ण्यतः श्रवणं प्रसज्येत।

(1599. **समाधानवार्त्तिकम्**-3)

* सामान्याश्रयत्वाद्विशेषस्यानाश्रयः *

भाष्यम्– सामान्ये ह्याश्रीयमाणे विशेषो नाश्रितो भवति तत्रार्धधातुकसामान्ये जग्ध्यादिषु यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति।

(1600. **आक्षेपवार्त्तिकम्**-4)

* सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्गः *

भाष्यम्– सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेद् उवर्णाकारान्तेभ्यो ण्यत्प्राप्नोति। लव्यं पव्यमिति आर्धधातुकसामान्ये गुणे कृते यि प्रत्ययसामान्ये च वान्तादेशे 'हलन्ताद्' इति ण्यत्प्राप्नोति। इह च दित्स्यं धित्स्यम् आर्धधातुकसामान्ये अकारलोपे कृते 'हलन्ताद्' इति ण्यत्प्राप्नोति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1601. आक्षेपान्तरवार्त्तिकम्-5)

* पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः *

भाष्यम्– पौर्वापर्याभावाच्च सामान्येन जग्ध्यादीनामनुपपत्तिः। न हि सामान्येन पौर्वापर्यमस्ति।

(1602. न्यासान्तरेणसमाधानवार्त्तिकम्-6)

* सिद्धं तु सार्वधातुके प्रतिषेधात् *

भाष्यम्– सिद्धमेतत्। कथम्? अविशेषेण जग्ध्यादीनुक्त्वा 'सार्वधातुके न' इति प्रतिषेधं वक्ष्यामि।

आक्षेपभाष्यम्– सिध्यति। सूत्रं तर्हि भिद्यते।

सिद्धान्तिभाष्यम्– यथान्यासमेवास्तु।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम् 'जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम्' इति।

समाधानस्मारणभाष्यम्– परिहृतमेतत् 'सामान्याश्रयत्वाद्विशेषस्यानाश्रय' इति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम् 'सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्ग' इति।

समाधानभाष्यम्– नैष दोषः। वक्ष्यति तत्राज्ग्रहणस्य प्रयोजनम्—'अजन्तभूतपूर्वमात्रादपि यथा स्याद्' इति।

द्वितीयाक्षेपपरिहारबाधकभाष्यम्– यदप्युच्यते—'पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः' इति। अर्थसिद्धिरेवैषा यत्सामान्येन पौर्वापर्यं नास्तीति। असति पौर्वापर्ये विषयसप्तमी विज्ञास्यते 'आर्धधातुके विषये' इति। तत्रार्धधातुके विषये जग्ध्यादिषु कृतेषु यो यतः प्राप्नोति स ततो भविष्यति।

अथवा आर्धधातुकास्विति वक्ष्यामि। कासु आर्धधातुकासु? उक्तिषु युक्तिषु रूढिषु प्रतीतिषु श्रुतिषु संज्ञासु। आर्धधातुके।

(355. आदेशसूत्रम् 2.4.1 आ. 20)

567. अदो जग्धिर्ल्यप्ति किति 2.4.36

अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधत इति परिभाषाधिकरणम्

आक्षेपभाष्यम्– ल्यब्ग्रहणं किमर्थम्। न 'ति कितीत्येव सिद्धम्।

आक्षेपबाधकभाष्यम्– ल्यपि कृते न प्राप्नोति।

आक्षेपसाधकभाष्यम्– इदमिह सम्प्रधार्यम्—ल्यप् क्रियताम्, आदेशः, किमत्र कर्तव्यम्? परत्वाल्ल्यप्। अन्तरङ्ग, आदेशः।

समाधानभाष्यम्– एवं तर्हि सिद्धे सति यल्ल्यब्ग्रहणं करोति तज्ज्ञापयत्याचार्यः—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब् बाधते' इति। किमेतस्य ज्ञापने प्रयोजनम्? 'ल्यबादेश उपदेशिवद्वचनमनादिष्टार्थं बहिरङ्गलक्षणत्वाद्' इति वक्ष्यति, तन्न वक्तव्यं भवति।

संवादभाष्यम्– जग्धिविधिर्ल्यपि यत्तदकस्मात्सिद्धमदस्ति कितीति विधानात्।

हिप्रभृतींस्तु सदा बहिरङ्गो ल्यब्भरतीति कृतं तदु विद्धि।।

एष एवार्थः—

'जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते। ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्' इति। अदोजग्धि।।36।।

(356. आदेशसूत्रम् 2.4.1 आ. 21)

568. लुङ्सनोर्घस्लृ 2.4.37

(1603. शेषवार्त्तिकम्-1)

* घस्लृभावेऽच्युपसंख्यानम् *

भाष्यम्– घस्लृभावेऽच्युपसंख्यानं कर्तव्यम्। प्रात्तीति प्रघसः। लुङ्सनो।।37।।

(357. आदेशसूत्रम् 2.4.1 आ. 22)

573. हनो वध लिङि 2.4.42

(358. आदेशसूत्रम् 2.4.1 आ. 23)

574. लुङि च 2.4.43

आदेशेऽदन्तत्वनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमयमदन्तः, आहोस्विद्व्यञ्जनान्तः?

विशेषप्रदर्शकभाष्यम्– यदि व्यञ्जनान्तः 'वधौ व्यञ्जनान्त उक्तम्'। किमुक्तम्? 'वध्यादेशे वृद्धितत्वप्रतिषेध इड्विधिश्च' इति। अथादन्तः। न दोषो भवति।

सिद्धान्तिभाष्यम्– यथा न दोषस्तथास्तु।।हनो।।42-43।।

(359. आदेशसूत्रम् 2.4.1 आ. 24)

576. इणो गा लुङि 2.4.45

(1604. अतिदेशवार्त्तिकम्-1)

* इण्वदिकः *

भाष्यम्– इण्वदिक इति वक्तव्यम्। इहापि यथा स्यात्—अध्यगात्। अध्यगाताम्। अध्यगुः। इणो गा।।45।।

(350. आदेशसूत्रम् 2.4.1 आ. 25)

577. णौ गमिरबोधने 2.4.46

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– इण्वदिक इत्येव। अधिगमयति। अधिगमयतः। अधिगमयन्ति। णौ गमि।।46।।

(361. आदेशसूत्रम् 2.4.1 आ. 26)

578. सनि च 2.4.47

भाष्यम्– इण्वदिक इत्येव। अधिजिगमिषति। अधिजिगमिषतः। अधिजिगमिषन्ति। सनि च।।47।।

(362. आदेशसूत्रम् 2.4.1 आ. 27)

580. गाङ् ल्लिटि 2.4.49

ङित्करणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– ङित्करणं किमर्थम्?

(1605. सिद्धान्तिसमाधानवार्त्तिकम्- 1)

*** गाङ्यनुबन्धकरणं विशेषणार्थम् ***

भाष्यम्– गाङ्यनुबन्धकरणं क्रियते। विशेषणार्थम्। क्व विशेषणार्थेनार्थः? 'गाङ्कुटादिभ्योऽञ्णिन्ङिद्' इति। 'गाकुटादिभ्यः' इति ह्युच्यमाने इणादेशस्यापि प्रसज्येत।

(1606. एकदेशिसमाधानान्तरवार्त्तिकम्- 2)

*** ज्ञापकं वा सानुबन्धकस्यादेशवचन इत्कार्याभावस्य ***

भाष्यम्– अथ वैतज्ज्ञापयत्याचार्यः—सानुबन्धकस्यादेश इत्कार्यं न भवतीति।

भाष्यम्– किमेतस्य ज्ञापने प्रयोजनम्?

(1607. प्रयोजनवार्त्तिकम्- 3)

*** प्रयोजनं चक्षिङः ख्याञ् ***

भाष्यम्– (चक्षिङः ख्याञ्प्रयोजनम्—चख्यौ ख्यास्यति) इति 'ङित' इत्यात्मनेपदं नित्यं न भवति।

(1608. प्रयोजनवार्त्तिकम्- 4)

*** लटः शतृशानचौ ***

भाष्यम्– (लटः शतृशानचौ) प्रयोजनम् पचमानो यजमान इति 'टित' इत्येत्त्वं न भवति।

(1609. प्रयोजनवार्त्तिकम्- 5)

*** युवोरनाकौ ***

भाष्यम्– युवोरनाकौ च प्रयोजनम्। नन्दनः कारकः नन्दना कारिकेति। उगिल्लक्षणौ ङीब्नुमो न भवतः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1610. **दूषणवार्त्तिकम्**-6)

*** मेश्चाननुबन्धकस्याम्वचनम् ***

भाष्यम्– मेश्चाननुबन्धकस्याम्वक्तव्यः। अचिनवम्। असुनवम्। अकरवम्।

वार्त्तिकपूर्तिभाष्यम्– अत्यल्पमिदमुच्यते—मेरिति। तिप्सिम्मिपामिति वक्तव्यम्। इहापि यथा स्यात्—वेद वेत्थ।

ज्ञापितप्रत्याख्यानभाष्यम्– अस्य ज्ञापकस्य सन्ति दोषाः। सन्ति प्रयोजनानि। दोषाः समाः भूयांसो वा। तस्मान्नार्थो ज्ञापकेन।

आक्षेपभाष्यम्– कथं यानि प्रयोजनानि?

समाधानभाष्यम्– नैतानि सन्ति। इह तावत् 'चक्षिङः ख्याञ्' इति। ञित्करण-सामर्थ्याद्विभाषात्मनेपदं भविष्यति।

द्वितीयप्रयोजननिराकरणभाष्यम्– 'लटः शतृशानचौ' इति। वक्ष्यत्येतत्—'प्रकृतानामात्मनेपदानां टेरेत्वं भवति' इति।

तृतीयप्रयोजननिराकरणभाष्यम्– 'युवोरनाकौ' इति। वक्ष्यत्येतत्—'सिद्धं तु युवोरनुनासिकत्वाद्' इति। गाङ्।।49।।

(363. **आदेशसूत्रम्** 2.4.1 आ. 28)

585. चक्षिङः ख्याञ् 2.4.54

आदेशनिर्णयाधिकरणम्

आक्षेपभाष्यम्– किमयं कशादिः, आहोस्वित्ख्यादिः।

(1611. **समाधानवार्त्तिकम्**-1)

*** चक्षिङः कशाञ्ख्याञौ ***

भाष्यम्– चक्षिङः कशाञ् ख्याभ् इति कशादिः ख्यादिश्च।

(1612. **सिद्धान्तिसमाधानवार्त्तिकम्**-2)

*** खशादिर्वा ***

भाष्यम्– अथवा शखादिर्भविष्यति।

आक्षेपभाष्यम्– केनेदानीं कशादिर्भवति?

समाधानभाष्यम्– चर्त्वेन।

आक्षेपभाष्यम्– (अथ) ख्यादिः कथम्?

(1613. **समाधानवार्त्तिकम्**-3)

*** असिद्धे शस्य यवचनं विभाषा ***

भाष्यम्– असिद्धे शस्य विभाषा यत्वं वक्तव्यम्।

आक्षेपभाष्यम्– किं प्रयोजनम्?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1614. प्रयोजनवार्त्तिकम्-4)

*** प्रयोजनं सौप्रख्येवुञ्विधिः ***

भाष्यम्– सौप्रख्य इति योपधलक्षणो वुञ्विधिर्न भवति। सौप्रख्यीय इति 'वृद्धाच्छ' इति छो भवति।

(1615. प्रयोजनवार्त्तिकम्-5)

*** निष्ठानत्वमाख्याते ***

भाष्यम्– आख्यात इति निष्ठानत्वं न भवति।

(1616. प्रयोजनवार्त्तिकम्-6)

*** रुविधिः पुंख्याने ***

भाष्यम्– पुंख्यानमिति रुविधिर्न भवति।

(1617. प्रयोजनवार्त्तिकम्-7)

*** णत्वं पर्याख्याने ***

भाष्यम्– पर्याख्यानमिति णत्वं न भवति।

(1618. प्रयोजनवार्त्तिकम्-8)

*** सस्थानत्वं नमः ख्यात्रे ***

भाष्यम्– नमः ख्यात्र इति सस्थानत्वं न भवति।

(1619. आदेशप्रतिषेधवार्त्तिकम्-9)

*** वर्जने प्रतिषेधः ***

भाष्यम्– वर्जने प्रतिषेधो वक्तव्यः। अवसञ्चक्ष्याः। परिसञ्चक्ष्याः।

(1620. आदेशप्रतिषेधवार्त्तिकम्-10)

*** असनयोश्च ***

भाष्यम्– असनयोश्च प्रतिषेधो वक्तव्यः। नृचक्षा रक्षः। विचक्षण इति।

(1621. वार्त्तिकम्-11)

*** बहुलं तणि ***

भाष्यम्– बहुलं तणीति वक्तव्यम्। किमिदं तणीति? सञ्ज्ञाछन्दसोर्ग्रहणम्। किं प्रयोजनम्?

(1622. प्रयोजनवार्त्तिकम्-12)

*** अन्नवधकगात्रविचक्षणाजिराद्यर्थम् ***

भाष्यम्– अन्न—अन्नम्। वधक—वधकम्। गात्र—गात्रं पश्य। विचक्षण—विचक्षणः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजिर अजिरे तिष्ठति। चक्षि।।54।।

(364. आदेशसूत्रम् 2.4.1 आ. 29)

587. अजेर्व्यघञपोः 2.4.56

क्यपि प्रतिषेधाधिकरणम्

(1623. वार्त्तिकम्-1)

* घञपोः प्रतिषेधे क्यप उपसंख्यानम् *

भाष्यम्– घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम्। इहापि यथा स्यात्—समजनं समज्येति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। अपीत्येव भविष्यति। कथम्? अपीति नेदं प्रत्यय-ग्रहणम्। किं तर्हि? प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः? अपो अकारात्प्रभृत्या क्यपः पकारात्।

आक्षेपभाष्यम्– यदि प्रत्याहारग्रहणम्, संवीतिर्न सिध्यति।

समाधानभाष्यम्– एवं तर्हि नार्थ उपसंख्यानेन नापि घञपोः प्रतिषेधेन। इदमस्ति 'चक्षिङः ख्याञ्' 'वा लिटि' इति। ततो वक्ष्यामि 'अजेर्वी' अजेर्वीभावो भवति वा। व्यवस्थितविभाषा 'वा' इति। तेनेह च भविष्यति—प्रवेता, प्रवेतुम्, प्रवीतो रथः, संवीतिः। इह च न भविष्यति—समाजः समजः, उदाजः उदजः, समजनम् उदजनं समज्येति। तत्रायमप्यर्थः—इदमपि सिद्धं भवति प्राजितेति।

आक्षेपभाष्यम्– किंच भो इष्यत एतद्रूपम्?

समाधानभाष्यम्– बाढमिष्यते। एवं हि कश्चिद्वैयाकरण आह—कोऽस्य रथस्य प्रवेतेति।

सूत आह—अहमायुष्मन्नस्य रथस्य प्राजितेति। वैयाकरण आह—अपशब्द इति। सूत आह—प्राप्तिज्ञो देवानांप्रियः, न त्विष्टिज्ञः इष्यत एतद्रूपमिति। वैयाकरण आह—अहो नु खल्वनेन दुरुतेन बाध्यामह इति। सूत आह—न खलु वेञः सूतः, सुवतेरेष सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या, दुःसूतेनेति वक्तव्यम्।

आक्षेपभाष्यम्– न तर्हीदानीमिदं वक्तव्यम् 'वा यौ' इति।

समाधानभाष्यम्– वक्तव्यं च। किं प्रयोजनम्? नेयं विभाषा। किं तर्हि? आदेशो विधीयते—वा इत्ययमादेशो भवत्यजेर्यौ परतः। वायुरिति।।अजेर्व्य।।56।।

अथ लुक्प्रकरणम्

(365. लुग्विधायकसूत्रम् 2.4.1 आ. 30)

589. ण्यक्षत्रियार्षञितो यूनि लुगणिञोः 2.4.58

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1624. वार्त्तिकम्-1)

*** अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानम् ***

भाष्यम्– अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानं कर्तव्यम्। बौधिः पिता बौधिः पुत्रः। औदुम्बरिः पिता औदुम्बरिः पुत्रः।

न्यासान्तरभाष्यम्– अपर आह—

(1625. वार्त्तिकन्यासान्तरम्-2)

*** अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् ***

व्याख्याभाष्यम्– अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्तव्यमिति। जाबालिः पिता जाबालिः पुत्रः।

न्यासान्तरभाष्यम्– अपरह आह—

(1626. अपरमतेनवार्त्तिकम्-3)

*** अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् ***

व्याख्याभाष्यम्– अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्तव्यमिति। किं प्रयोजनम्? इदमपि सिद्धं भवति—भाण्डिजङ्घिः पिता भाण्डिजङ्घिः पुत्रः। कार्णखरकिः पिता कार्णखरकिः पुत्रः।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य चतुर्थे पादे प्रथममाह्निकम्

●

द्वितीयेऽध्याये चतुर्थे पादे द्वितीयमाह्निकम्

(366. लुक्सूत्रम् 2.4.2 आ. 1)

593. तद्राजस्य बहुषु तेनैवास्त्रियाम् 2.4.62

प्रत्ययपक्षदूषणाधिकरणम्

(1627. आक्षेपवार्त्तिकम्-1)

*** तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः ***

भाष्यम्– तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधो वक्तव्यः। प्रिय आङ्ग एषां त इमे प्रियाङ्गाः। प्रियो वाङ्ग एषां त इमे प्रियवाङ्गा इति।

प्रत्याक्षेपभाष्यम्– किमुच्यते समासबहुत्वे प्रतिषेध इति। यदा 'तेनैव चेत्कृतं बहुत्वम्' इत्युच्यते। न चात्र तेनैव कृतं बहुत्वम्?

प्रत्याक्षेपसमाधानभाष्यम्– भवति वै किञ्चिद्—क्रियमाणमपि चोदयन्ति—तद्वा कर्तव्यम्—तेनैव चेद्बहुत्वमिति समासबहुत्वे वा प्रतिषेध इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1628. वार्त्तिकम्-2)

*** अबहुत्वे लुग्वचनम् ***

भाष्यम्– अबहुत्वे च लुग्वक्तव्यः। अतिक्रान्तः अङ्गानत्यङ्ग इति। बहुवचने परतो यस्तद्राज इत्येवं च कृत्वा चोद्यते।

आक्षेपभाष्यम्– अथ किमर्थं पुनरिदम्, न बहुवचन इत्येव सिद्धम्?

समाधानभाष्यम्– न सिध्यति। बहुवचन इत्युच्यते। न चात्र बहुवचनं पश्यामः।

समाधानबाधकभाष्यम्– प्रत्ययलक्षणेन।

समाधानसाधकभाष्यम्– 'न लुमता तस्मिन्' इति प्रत्ययलक्षणस्य प्रतिषेधः।

समाधानबाधकभाष्यम्– 'न लुमताङ्गस्य' इति वक्ष्यामि।

समाधानसाधकभाष्यम्– नैवं शक्यम्। इह हि दोषः स्यात्—पञ्चभिर्गार्ग्यैभिः क्रीतः पटः पञ्चगार्ग्यो दशगार्ग्यः।

(1629. दूषणवार्त्तिकम्-3)

*** द्वन्द्वेऽबहुषु लुग्वचनम् ***

भाष्यम्– द्वन्द्वे अबहुषु लुग्वक्तव्यः। गर्गवत्सवाजा इति। इह च लुग्वक्तव्यः—गर्गेभ्य आगतं गर्गरूप्यं गर्गमयमिति। इह चात्रय इति उदात्तनिवृत्तिस्वरः प्राप्नोति।

प्रत्ययार्थबहुत्वस्थापनाधिकरणम्

(1630. समाधानवार्त्तिकम्-4)

*** सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात् ***

भाष्यम्– सिद्धमेतत्। कथम्? प्रत्ययार्थबहुत्वे लुग्वक्तव्यः।

प्रत्ययार्थपक्षे गौरवभाष्यम्– यदि प्रत्ययार्थबहुत्वे लुगुच्यते, तेनापि, 'अस्त्रियाम्' इति वक्तव्यम्। इह मा भूत्—आङ्ग्यः स्त्रियः वाङ्ग्यः स्त्रिय इति। यस्य पुनर्बहुवचने परतो लुगुच्यते तस्य ईकारेण व्यवहितत्वान्न भविष्यति।

प्रत्ययपक्षेऽपि गौरवभाष्यम्– यस्यापि तु बहुवचने परतो लुगुच्यते, तेनापि 'अस्त्रियाम्' इति वक्तव्यम्। आम्बष्ठ्याः स्त्रियः सौवीर्याः स्त्रिय इत्येवमर्थम्।

बाधकभाष्यम्– यत्रापि चापा व्यवधानम्।

साधकभाष्यम्– एकादेशे कृते नास्ति व्यवधानम्।

बाधकभाष्यम्– एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव।

(1631. अर्थपक्षे दूषणवार्त्तिकम्-5)

*** द्वन्द्वेऽबहुषु लुग्वचनम् ***

भाष्यम्– द्वन्द्वे अबहुषु लुग्वक्तव्यः। गर्गवत्सवाजा इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1632. अर्थपक्षदूषणवार्त्तिकम्-6)

*** गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् ***

भाष्यम्– गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः। बिदानामपत्यं माणवको बैदः। बैदौ।

आक्षेपभाष्यम्– किमर्थमिदम्। नाचीत्येवालुक् सिद्धः?

समाधानभाष्यम्– अचीत्युच्यते। न चात्राजादिं पश्यामः।

समाधानबाधकभाष्यम्– प्रत्ययलक्षणेन।

समाधानसाधकभाष्यम्– वर्णाश्रये नास्ति प्रत्ययलक्षणम्।

(1633. वार्त्तिकम्-7)

*** एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि ***

भाष्यम्– एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः। बैदस्यापत्यं बहवो माणवका बिदाः। बैदयोर्वा बिदाः। अञ् यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुङ्न प्राप्नोति।

आक्षेपबाधकभाष्यम्– मा भूदेवम्। अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति।

आक्षेपसाधकभाष्यम्– नैवं शक्यम्। इह हि दोषः स्यात्—काश्यपप्रतिकृतयः काश्यपा इति।

अर्थबहुत्वपक्षे दूषणपरिहारभाष्यम्– ततोऽयमाह—यस्य प्रत्ययार्थबहुत्वे लुक्। द्वन्द्वेऽबहुषु लुग्वचनमित्यस्य परिहारः—

(1634. वार्त्तिकम्-8)

*** न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात् ***

भाष्यम्– न वा एष दोषः। किं कारणम्? सर्वेषां द्वन्द्वे बह्वर्थत्वात्। सर्वाणि द्वन्द्वे बह्वर्थानि। कथम्? युगपदधिकरणविवक्षायां द्वन्द्वो भवति।

बहुवचनप्रत्ययपक्षे दूषणपरिहारभाष्यम्– ततोऽयमाह—यस्य बहुवचने परतो लुक्, यदि सर्वाणि द्वन्द्वे बह्वर्थानि। अहमपीदमचोद्यं चोद्ये—द्वन्द्वेऽबहुषु लुग्वचनमिति। ममापि ह्यत्र सर्वत्र बहुवचनं परं भवति।

बाधकभाष्यम्– लुकि कृते न प्राप्नोति।

परिहारसाधकभाष्यम्– प्रत्ययलक्षणेन भविष्यति।

परिहारबाधकभाष्यम्– 'न लुमता तस्मिन्' इति प्रत्ययलक्षणस्य प्रतिषेधः।

परिहारसाधकभाष्यम्– 'न लुमताङ्गस्य' इति वक्ष्यामि।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—नैवं शक्यम्। इह हि दोषः स्यात्—पञ्चभिर्गार्गीभिः क्रीतः षटः पञ्चगार्ग्यो दशगार्ग्य इति।

समाधानभाष्यम्– इष्टमेवैतत्संगृहीतम्—पञ्चगर्गो दशगर्ग इत्येव भवितव्यम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूषणासंगतिभाष्यम्– तथेदमपरमचोद्यं चोद्ये—गर्गरूप्यं गर्गमयम्। अत्रापि बहुवचन इत्येव सिद्धम्। कथम्? समर्थात्तद्धित उत्पद्यते। सामर्थ्यं च सुबन्तेन।

परिहारभाष्यम्– ततोऽयमाह यस्य प्रत्ययार्थबहुत्वे लुक्। यदि समर्थात्तद्धित उत्पद्यते। अहमपीदमचोद्यं चोद्ये—'गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्' इति। कथम्? यस्यापि बहुवचने परतो लुक् तेनाप्यलुग्वक्तव्यः। तस्यापि ह्यत्रबहुवचनं परं भवति।

अलुग्वचनबाधकभाष्यम्– न वक्तव्यः। अचीत्येवालुक् सिद्धः।

अलुग्वचनसाधकभाष्यम्– अचीत्युच्यते। न चात्राजादिं पश्यामः।

अलुग्वचनबाधकभाष्यम्– प्रत्ययलक्षणेन।

प्रत्ययलक्षणनिषेधस्मारणभाष्यम्– ननु चोक्तं 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति।

समाधानभाष्यम्– यदि वा कानि चिद्वर्णाश्रयाण्यपि प्रतययलक्षणेन भवन्ति तथेदमपि भविष्यति।

समाधानान्तरभाष्यम्– अथवा विशेषेणालुकमुक्त्वा 'हलि न' इति वक्ष्यामि।

आक्षेपभाष्यम्– यद्येवमविशेषेणालुकमुक्त्वा 'हलि न' इत्युच्यते, बिदानामपत्यं बहवो माणवका बिदा अत्रापि प्राप्नोति।

समाधानभाष्यम्– अस्तु। पुनरस्य युवबहुत्वे वर्तमानस्य लुग् भविष्यति।

आक्षेपभाष्यम्– पुनरलुक्कस्मान्न भवति?

समाधानभाष्यम्– समर्थानां प्रथमस्य गोत्रप्रत्ययान्तस्यालुगुच्यते। न चैतत्समर्थानां प्रथमं गोत्रप्रत्ययान्तम्। किं तर्हि? द्वितीयमर्थमुपसंक्रान्तम्। अवश्यं चैतदेवं विज्ञेयम्। अत्रिभरद्वाजिका वसिष्ठकश्यपिका भृग्वङ्गिरसिका कुत्सकुशिकिका इत्येवमर्थम्।

(1635. **समाधानवार्त्तिकम्**-9)

* गर्गभार्गविकाग्रहणं वा नियमार्थम् *

भाष्यम्– गर्गभार्गविकाग्रहणं वा क्रियते तन्नियमार्थं भविष्यति—एतस्यैव द्वितीयमर्थमुपसंक्रान्तस्यालुग्भवति नान्यस्येत्ति।

दूषणपरिहारभाष्यम्– यदप्युच्यते—'एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्य' इति। मा भूदेवम्—अञ्यो बहुषु यञ्यो बहुष्विति। अञन्तं यद्बहुषु यञन्तं यद् बहुष्वित्येवं भविष्यति।

आक्षेपस्मारणभाष्यम्– ननु चोक्तम्—नैवं शक्यम्। इह हि दोषः स्यात्—काश्यप-प्रतिकृतयः काश्यपाः—इति।

परिहारभाष्यम्—नैष दोषः। लौकिकस्य तत्र गोत्रस्य ग्रहणम्। न चैतल्लौकिकं गोत्रम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषसाम्यभाष्यम्– यस्य बहुवचने परतो लुक्। समासबहुत्वे तेन नेति प्रतिषेधो वक्तव्यः। तेनैव चेत्कृतं बहुत्वमिति वा वक्तव्यम्। यस्य प्रत्ययार्थबहुत्वे लुक् तेनास्त्रियामिति वक्तव्यम्।

समाधानभाष्यम्– यस्य बहुवचने परतो लुक् तस्यामधिको दोषः। अत्रय इति उदात्तनिवृत्तिस्वरः प्राप्नोति। तस्मात्प्रत्ययार्थबहुत्वे लुगित्येष पक्षो ज्यायान्।

आक्षेपभाष्यम्– अथेह कथं भवितव्यं गार्गी च वात्स्यश्च वाज्यश्चेति।

आक्षेपाशयभाष्यम्– यदि तावदस्त्री विधिनाश्रीयते अस्त्यत्रास्त्रीति कृत्वा भवितव्यं लुका। अथ स्त्री प्रतिषेधेनाश्रीयते अस्त्यत्र स्त्रीति कृत्वा भवितव्यं प्रतिषेधेन किं पुनरर्थ-सत्तत्त्वम्?

समाधानभाष्यम्– देवा ज्ञातुमर्हन्ति।

आक्षेपभाष्यम्– अथ यो लोप्यलोपिनां समासस्तत्र कथं भवितव्यम्?

समाधानभाष्यम्– उभयं हि दृश्यते—'शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु'। 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्' इति। तद्राजस्य।।62।।

(367. **लुक्सूत्रम्** 2.4.2 आ. 2)

595. यञञोश्च 2.4.64

षष्ठीतत्पुरुषेद्व्येकयोर्विकल्पाधिकरणम्

(1636.**वार्त्तिकम्**-1)

* यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् *

भाष्यम्– यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानं कर्तव्यम्। गार्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलं वा। गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा। बैदस्य कुलं बैदकुलं बिदकुलं वा। बैदयोः कुलं बैदकुलं बिदकुलं वा। यञादीनामिति किमर्थम्? आङ्गस्य कुलम् आङ्गकुलम्। आङ्गयोः कुलमाङ्गकुलम्। एकद्वयोरिति किमर्थम्? गर्गाणां कुलं गर्गकुलम्। तत्पुरुष इति किमर्थम्? गार्ग्यस्य समीपमुपगार्ग्यम्। षष्ठ्या इति किमर्थम्? गर्गाणां कुलं गर्गकुलम्। तत्पुरुष इति किमर्थम्? गार्ग्यस्य समीपमुपगार्ग्यम्। षष्ठ्या इति किमर्थम्? शोभनगार्ग्यः। परमगार्ग्यः। यञञो।।64।।

(368. **लुक्सूत्रम्** 2.4.2 आ. 3)

597. बह्वच इञः प्राच्यभरतेषु 2.4.66

प्राच्यभरतानां समुच्चयाधिकरणम्

आक्षेपभाष्यम्– किमयं समुच्चयः प्राक्षु च भरतेषु चेति। आहोस्विद्भरतविशेषणं प्राग्ग्रहणं प्राञ्चो ये भरता इति।

जिज्ञासाभाष्यम्– किं चातः?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषप्रदर्शनभाष्यम्– यदि समुच्चयः। भरतग्रहणमनर्थकम्। न ह्यन्यत्र भरताः सन्ति। अथ प्राग्ग्रहणं भरतविशेषणम्। प्राग्ग्रहणमनर्थकम्। नह्यप्राञ्चो भरताः सन्ति।

प्रथमपक्षाभ्युपगमभाष्यम्– एवं तर्हि समुच्चयः।

दोषस्मरणभाष्यम्– ननु चोक्तम्—भरतग्रहणमनर्थकं नह्यन्यत्र भरताः सन्तीति।

समाधानभाष्यम्– नानर्थकम्। ज्ञापकार्थम्। किं ज्ञाप्यते? एतज्ज्ञापयत्याचार्यः—'अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवति' इति। किमेतस्य ज्ञापने प्रयोजनम्? 'इञः प्राचाम्' भरग्रहणं न भवति। औद्दालकिः पिता। औद्दालकायनः पुत्र इति। बह्वच।।66।।

(369. लुक्प्रतिषेधसूत्रम् 2.4.2 आ. 4 सू.)

598. न गोपवनादिभ्यः 2.4.67

(1637. वार्त्तिकम्-1)

* गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः *

गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यो द्रष्टव्यः। हारितः हारितौ। बहुषु—हरिताः। न गोपव।।67।।

(370. विकल्पसूत्रम् 2.4.2 आ. 5)

600. उपकादिभ्योन्यतरस्यामद्वन्द्वे 2.4.69

अद्वन्द्वग्रहणप्रयोजनाधिकरणम्

आक्षेपभाष्यम्– किमर्थमद्वन्द्व इत्युच्यते?

समाधानभाष्यम्– द्वन्द्वे मा भूदिति।

समाधानबाधकभाष्यम्– नैतदस्ति प्रयोजनम्। इष्यते द्वन्द्वे भ्राष्ट्रककपिष्ठलाः। भ्राष्ट्रकिकापिष्ठलय इति।

समाधानभाष्यम्– अत उत्तरं पठति—

(1638. समाधानवार्त्तिकम्-1)

* अद्वन्द्व इति द्वन्द्वाधिकारनिवृत्त्यर्थम् *

भाष्यम्– अद्वन्द्व इत्युच्यते द्वन्द्वाधिकारनिवृत्त्यर्थम्। द्वन्द्वाधिकारो निवर्त्यते तस्मिन्निवृत्ते अविशेषेण द्वन्द्वे चाद्वन्द्वे च भविष्यति। उपकादिभ्यो।।69।।

(371. प्रकृत्योरादेशसूत्रम् 2.4.2 आ. 6)

601. आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् 2.4.70

प्रकृत्यादेशत्वनिर्णयाधिकरणम्

(1639. वार्त्तिकम्-1)

* आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनम् *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनं कर्तव्यम्। अगस्ति—कुण्डिनजित्येतौ प्रकृत्यादेशौ भवत इति वक्तव्यम्। किं प्रयोजनम्?

(1640. वार्त्तिकद्वितीयखण्डम्-2)

*** लुक्प्रतिषेधे वृद्ध्यर्थम् ***

भाष्यम्– लुक्प्रतिषेधे वृद्धिर्यथा स्यात्।

(1641. वार्त्तिकतृतीयखण्डम्-3)

*** प्रत्ययान्तनिपातने हि वृद्ध्यभावः ***

भाष्यम्– प्रत्ययान्तनिपातने हि सति वृद्ध्यभावः स्यात्। आगस्तीयाः कौण्डिना इति।

आक्षेपभाष्यम्– यदि प्रकृतिनिपातनं क्रियते। केनेदानीं प्रत्ययस्य लोपो भविष्यति?

(1642. वार्त्तिकम्-4)

*** अधिकारात्प्रत्ययलोपः ***

भाष्यम्– अधिकारात्प्रत्ययलोपो भविष्यति।

आक्षेपभाष्यम्– तत्तर्हि प्रकृतिनिपातनं कर्तव्यम्?

समाधानभाष्यम्– न कर्तव्यम्।

(1643. वार्त्तिकम्-5)

*** योगविभागात् सिद्धम् ***

भाष्यम्– योगविभागः करिष्यते—('आगस्त्यकौण्डिन्ययोः') आगस्त्यकौण्डिन्ययोर्बहुषु लुग्भवति। ततः ('अगस्ति कुण्डिनच्') इगस्तिकुण्डिनजित्येतौ च प्रकृत्यादेशौ भविष्यतः आगस्त्यकौण्डिन्ययोरिति।

प्रत्याक्षेपभाष्यम्– एवमपि प्रत्ययान्तयोरेव प्राप्नोति। प्रत्ययान्ताद्धि भवान् षष्ठीमुच्चारयति—'आगस्त्यकौण्डिन्ययोः' इति।

समाधानभाष्यम्– नैष दोषः। यथापरिभाषितं प्रत्ययस्य लुक्श्लुलुपो भवन्तीति प्रत्ययस्यैव भविष्यति। अवशिष्टस्यादेशौ भविष्यतः। आगस्त्य।।70।।

अथ धातुप्रत्ययलुक्प्रकरणम्

(372. यङ्लुक्सूत्रम् 2.4.2 आ. 7)

605. यङोऽचि च 2.4.74

(1644. वार्त्तिकम्-1)

*** ऊतोऽचि ***

भाष्यम्– ऊतः अचीति वक्तव्यम्। इह मा भूत्—सनीस्रसो दनीध्वस इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– उथ ऊत इत्युच्यते। इह कस्मान्न भवति—योयूयः। रोरूयः?

समाधानभाष्यम्– विहितविशेषणमूकारग्रहणम्। ऊकारान्ताद्यो विहित इति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। इष्टमेवैतत्संगृहीतम्—सनीस्रंसो दनीध्वंस इत्येव भवितव्यम्। यङो०।।74।।

(373. सिज्लुक्सूत्रम् 2.4.2 आ. 8)

608. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु 2.4.77

धातुविशेषनिर्णयाधिकरणम्

(1645. वार्त्तिकम्-1)

*** गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् ***

भाष्यम्– गापोर्ग्रहणे इण्पिबत्योर्ग्रहणं कर्तव्यम्। इणो यो गाशब्दः पिबतेर्यः पाशब्द इति वक्तव्यम्। इह मा भूत्—अगासीन्नटः, अपासीद्धनमिति।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। इण्ग्रहणे तावद्वार्त्तम्—निर्देशादेव व्यक्तं 'लुग्विकरणस्य ग्रहणम्' इति।

पाग्रहणे चापि वार्तत्तम्—उक्तमेत्तत्—'सर्वत्रैव पाग्रहणे अलुग्विकरणस्य ग्रहणाम्' इति। गातिस्था।।77।।

(374. सिज्लुक्सूत्रम् 2.4.2 आ. 9)

610. तनादिभ्यस्तथासोः 2.4.79

तप्रत्ययनिर्णयाधिकरणम्

(1646. वार्त्तिकम्-1)

*** तथासोरात्मनेपदवचनम् ***

भाष्यम्– तथासोरात्मनेपदस्य ग्रहणं कर्तव्यम्। आत्मनेपदं यौ तथासाविति वक्तव्यम्।

(1647. वार्त्तिकम्-2)

*** एकवचनग्रहणं वा ***

भाष्यम्– अथवा एकवचनं ये तथासी इति वक्तव्यम्। तच्चावश्यमन्यतरत्कर्तव्यम्।

(1648. वार्त्तिकम्-3)

*** अवचने ह्यनिष्टाप्रसङ्गः ***

भाष्यम्– अनुच्यमाने ह्येतस्मिन्ननिष्टं प्रसज्येत—अतनिष्ट यूयम् असनिष्ट यूयमिति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। यद्यपि तावदयं तशब्दो दृष्टापचारोस्त्यात्मनेपदम्, अस्ति च परस्मैपदम्, अस्त्येकवचनम्, अस्ति बहुवचनम् अयं तु खलु थास्शब्दोऽदृष्टापचार आत्मनेपदमेकवचनं च। तस्यास्य कोऽन्यः सहायो भवितुमर्हति अन्यदत आत्मनेपदादेकवचनाच्च। तद्यथा—'अस्य गोर्द्वितीयेनार्थ' इति गौरेवानीयते नाश्वो न गर्दभ इति। तनादि।। 79।।

(375. लुक्सूत्रम् 2.4.2 आ. 10)

612. आमः 2.4.81

लुङ्लोटोर्लुक्साधनाधिकरणम्

(1649. **शेषवार्त्तिकम्**-1)

* आमो लेर्लोपे लुङ्लोटोरुपसंख्यानम् *

भाष्यम्– आमः लेर्लोपे लुङ्लोटोरुपसंख्यानं कर्तव्यम्। तां वैजवापयो विदामक्रन्। अस्य भवन्तो विदांकुर्वन्तु।

आक्षेपभाष्यम्– तत्तर्हि वक्तव्यम्?

समाधानभाष्यम्– न वक्तव्यम्। लिग्रहणं निवर्तिष्यते।

आक्षेपभाष्यम्– यदि निवर्तते। प्रत्ययमात्रस्य लुक् प्राप्नोति।

समाधानभाष्यम्– इष्यत एव प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह 'कृञ्चानुप्रयुज्यते लिटि' इति। यदि च प्रत्ययमात्रस्य लुग् भवति तत एतदुपपन्नं भवति।

आम्ग्रहणनिर्णयाधिकरणम्

(1650. **आक्षेपवार्त्तिकम्**-2)

* आमन्तेभ्यो णलः प्रतिषेधः *

भाष्यम्– आमन्तेभ्यो णलः प्रतिषेधो वक्तव्यः। शशाम तताम। वृद्धौ कृतायम् 'आमः' इति लुक् प्राप्नोति।

(1651. **समाधानवार्त्तिकम्**-3)

* आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेधः *

भाष्यम्– आमन्तेभ्योऽर्थवद्ग्रहणाण्णलः। अप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। लुक् कस्मान्न भवति—शशाम ततामेति? अर्थवद्ग्रहणात्। अर्थवत आम्शब्दस्य ग्रहणम्। न चैषोऽर्थवान्।

(1652. **समाधानबाधकवार्त्तिकम्**-4)

* आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोप्रतिषेध इति चेदमः प्रतिषेधः *

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यम्– आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेध इति चेत् अमधातोः प्रतिषेधो वक्तव्यः। आम।

समाधानसाधकभाष्यम्– उक्तं वा। किमुक्तम्? 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति।

लुगादेशापवादत्वाधिकरणम्

आक्षेपभाष्यम्– किं पुनर्लुगादेशापवादः, आहोस्वित्—कृतेष्वादेशेषु भवति।

(1653. **समाधानवार्त्तिकम्**-5)

*** लुगादेशापवादः ***

भाष्यम्– लुग् आदेशानामपवादः।

(1654. **समाधानबाधकवार्त्तिकम्**-6)

*** तिङ्कृताभावस्तु ***

भाष्यम्– तिङ्कृतास्य तु अभावः। कस्य? पदत्वस्य।

(1655. **समाधानसाधकवार्त्तिकम्**-7)

*** सुबन्तत्वात्सिद्धम् ***

भाष्यम्– 'सुबन्तं पदम्' इति पदसञ्ज्ञा भविष्यति।

आक्षेपभाष्यम्– कथं स्वाद्युत्पत्तिः?

(1656. **समाधानवार्त्तिकम्**-8)

*** लकारस्य कृत्त्वात् प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम् ***

भाष्यम्– लकारः कृत्, 'कृत्प्रातिपदिकम्' इति प्रातिपदिकसञ्ज्ञा, तदाश्रयं प्रत्ययविधानम्, प्रातिपदिकाश्रयत्वात्स्वाद्युत्पत्तिर्भविष्यति।

समाधानबाधकभाष्यम्– (यद्येवं) सुपः श्रवणं प्राप्नोति।

समाधानसाधकभाष्यम्– अव्ययादिति लुग् भविष्यति।

आक्षेपभाष्यम्– कथमव्ययत्वम्?

(1657. **समाधानवार्त्तिकम्**-9)

*** अव्ययत्वं मकारान्तत्वात् ***

भाष्यम्– कृदन्तं मान्तमव्ययसञ्ज्ञं भवतीति अव्ययसञ्ज्ञा भविष्यति।

आक्षेपभाष्यम्– स्वरः कथम्—यत्प्रकारयाञ्चकार?

(1658. **समाधानवार्त्तिकम्**-10)

*** स्वरः कृदन्तप्रकृतिस्वरत्वात् ***

भाष्यम्– कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो भविष्यति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1659. **फलान्तरवार्त्तिकम्**-11)

*** तथा च निघातानिघातसिद्धिः ***

भाष्यम्– तथा च निघातानिघातसिद्धिर्भवति। चक्षुष्कामं याजयाञ्चकार 'तिङ्ङतिङ' इति तस्य चानिघातः। तस्माच्च निघातः सिद्धो भवति।

(1660. **आक्षेपवार्त्तिकम्**-12)

*** नञा तु समासप्रसङ्गः ***

भाष्यम्– नञा तु समासः प्राप्नोति—नकारयाम् नहारयाम्। 'नञ्' सुबन्तेन सह समस्यत' इति समासः प्राप्नोति।

समाधानभाष्यम्– उक्तं वा। किमुक्तम्? असामर्थ्यादिति। नात्र नञ आमन्तेन सामर्थ्यम्। केन तर्हि? लिडन्तेन न चकार कारयाम् न जहार हारयामिति। आमः।।81।।

(376. **लुक्सूत्रम्** 2.4.2 आ. 11)

613. अव्ययादाप्सुपः 2.4.82

आप्ग्रहणस्यादृष्टार्थत्वाधिकरणम्

(1661. **वार्त्तिकम्**-1)

*** अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात् ***

भाष्यम्– अव्ययादापः लुग्वचनमनर्थकम्। किं कारणम्? लिङ्गाभावात्। अलिङ्गमव्ययम्।

आक्षेपभाष्यम्– किमिदं भवान् सुपो लुकं मृष्यति, आपो लुकं न मृष्यति। यथैव ह्यलिङ्गमव्ययम्, एवमसंख्यमपि?

समाधानभाष्यम्– सत्यमेवमेतत्। प्रत्ययलक्षणमाचार्यः प्रार्थयमानः सुपो लुकं मृष्यति। आपः पुनरस्य लुकि सति न किञ्चिदपि प्रयोजनमस्ति।

आक्षेपभाष्यम्– उच्यमानेऽप्येतस्मिन् स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम्? एकत्वादीनामभावात्। एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते। न चैषामेकत्वादयः सन्ति।

समाधानभाष्यम्– अविशेषेणोत्पद्यन्ते। उत्पन्नानां नियमः क्रियते। अथवा प्रकृतानर्थानपेक्ष्य नियमः क्रियते। के च प्रकृताः? एकत्वादयः। एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोरिति।

अथवा आचार्यप्रवृत्तिर्ज्ञापयति—उत्पद्यन्तेऽव्ययेभ्यः स्वादय इति। यदयम् 'अव्ययादाप्सुप' इति लुकं शास्ति। अव्ययादा।।82।।

(377. **लुक्प्रतिषेधाम्विधिसूत्रम्** 2.4.2 आ. 12)

614. नाव्ययीभावादतोऽम्त्वपञ्चम्याः 2.4.83

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगविभागार्थसाधनाधिकरणम्

(1662. वार्त्तिकम्-1)

*** नाव्ययीभावादत इति योगव्यवसानम् ***

भाष्यम्– 'नाव्ययीभावादतः' इति योगो व्यवसेयः। नाव्ययीभावादकारान्तात्सुपो लुग् भवति। ततः—'अम् त्वपञ्चम्याः' इति।

आक्षेपभाष्यम्– किमर्थो योगविभागः?

(1663. वार्त्तिकम्-2)

*** पञ्चम्या अम्प्रतिषेधार्थः ***

भाष्यम्– पञ्चम्या अमः प्रतिषेधो यथा स्यात्।

(1664. वार्त्तिकम्-3)

*** एकयोगे ह्युभयोः प्रतिषेधः ***

भाष्यम्– एकयोगे ह्युभयोः प्रतिषेधः स्यात्। अमः अलुकश्च।

आक्षेपभाष्यम्– स तर्हि योगविभागः कर्तव्यः?

समाधानभाष्यम्– न कर्तव्यः।

(1665. वार्त्तिकम्-4)

*** तुर्नियामकः ***

भाष्यम्– तुः क्रियते। स नियामको भविष्यति—अमेवापञ्चम्या इति।

अपादानपञ्चमीनिर्णयाधिकरणम्

(1666. शेषपूरकवार्त्तिकम्-5)

*** अमि पञ्चमीप्रतिषेधेऽपादानग्रहणम् ***

भाष्यम्– अमि पञ्चमीप्रतिषेधे अपादानग्रहणं कर्तव्यम्। अपादानपञ्चम्या इति व्यक्तव्यम्। किं प्रयोजनम्?

(1667. शेषपूर्तिप्रयोजनवार्त्तिकम्-6)

*** कर्मप्रवचनीययुक्तेऽप्रतिषेधार्थम् ***

भाष्यम्– कर्मप्रवचनीययुक्ते मा भूद्—आपाटलिपुत्रं वृष्टो देवः।

(1668. शेषपूर्तिवैयर्थ्यवार्त्तिकम्-7)

*** न वोत्तरपदस्य कर्मप्रवचनीययोगात् समासात् पञ्चम्यभावः ***

भाष्यम्– न वा वक्तव्यम्। किं कारणम्? उत्तरपदमत्र कर्मप्रवचनीययुक्तम्। उत्तरपदस्य कर्मप्रवचनीययोगात्समासात्पञ्चमी न भविष्यति। यदा च समासः कर्मप्रवचनीययुक्तः,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति तदा प्रतिषेधः। तद्यथा—आ उपकुम्भात्। आ उपमणिकात् इति। नाव्ययीभावा।।83।।

(378. अम्विकल्पसूत्रम् 2.4.2 आ. 13)

615. तृतीयासप्तम्योर्बहुलम् 2.4.84

(1669. वार्त्तिकम्-1)

* सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् *

भाष्यम्– सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यमिति वक्तव्यम्। सुमद्रं सुमगधम्। ऋद्धि। नदीसमास—उन्मत्तगङ्गं लोहितगङ्गम्। संख्यावयव—एकविंशतिभारद्वाजं त्रिपञ्चाशद्गौतमम्। तृतीयासप्त।।84।।

(379. आदेशसूत्रम् 2.4.2 आ. 14)

616. लुटः प्रथमस्य डारौरसः 2.4.85

डारौरसां टेरेत्वनिवारणाधिकरणम्

(1670. पूर्वप्रतिषेधवार्त्तिकम्-1)

* टितां टेरेविधेर्लुटो डारौरसः पूर्वविप्रतिषिद्धम् *

भाष्यम्– टितां टेरेविधेर्लुटो डारौरसो भवन्ति पूर्वविप्रतिषेधेन। टेरेत्वस्यावकाशः—पचते पचेते पचन्ते। डारौरसामवकाशः—श्वः कर्ता श्वः कर्तारौ श्वः कर्तारः। इहोभयं प्राप्नोति—श्वः अध्येता श्वः अध्येतारौ श्वः अध्येतार इति। डारौरसो भवन्ति पूर्वविप्रतिषेधेन।

आक्षेपभाष्यम्– स तर्हि पूर्वविप्रतिषेधो वक्तव्यः?

समाधानभाष्यम्– न वक्तव्यः।

(1671. वार्त्तिकम्-2)

* आत्मनेपदानां चेति वचनात्सिद्धम् *

भाष्यम्– आत्मनेपदानां च डारौरसो भवन्तीति वक्तव्यम्।

(1672. वार्त्तिकम्-3)

* तच्च समसंख्यार्थम् *

भाष्यम्– तच्चावश्यमात्मनेपदग्रहणं कर्तव्यं समसंख्यार्थं संख्यातानुदेशो यथा स्यात्। अक्रियमाणे ह्यात्मनेपदग्रहणे षट् स्थानिनस्त्रय आदेशाः वैषम्यात्संख्यातानुदेशो न प्राप्नोति।

प्रथमवार्त्तिकप्रत्याख्यानभाष्यम्– पूर्वप्रतिषेधार्थेन तावन्नार्थ आत्मनेपदग्रहणेन। इदमिह सम्प्रधार्यम्—डारौरसः क्रियन्ताम्, एत्वम्, इति। किमत्र कर्तव्यम्? परत्वादेत्वम्। नित्या डारौरसः कृतेऽप्येत्वे प्राप्नुवन्ति, अकृतेऽपि प्राप्नुवन्ति। टेरेत्वमपि नित्यम्=कृतेष्वपि डारौरस्सु प्राप्नोति, अकृतेष्वपि प्राप्नोति। अनित्यमेत्वम्=अन्यस्य कृतेषु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डारौरस्सु प्राप्नोति, अन्यस्याकृतेषु। शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति। डारौरसोप्यनित्याः अन्यस्य कृते एत्वे प्राप्नुवन्ति, अन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन्तोऽनित्या भवन्ति। उभयोरनित्ययोः परत्वादेत्वम्। एत्वे कृते पुनः प्रसङ्गविज्ञानाद् डारौरसो भविष्यन्ति।

द्वितीयवार्त्तिकप्रत्याख्यानभाष्यम्– समसंख्यार्थेन चापि नार्थ आत्मनेपदग्रहणेन। स्थानेऽन्तरतमेन व्यवस्था भविष्यति। कुत आन्तर्यम्? अर्थतः। एकार्थयैकार्थौ द्व्यर्थस्य द्व्यर्थौ बह्वर्थस्य बह्वर्थः।

अथवा आदेशा अपि षडेव निर्दिश्यन्ते। कथम्? एकशेषनिर्देशोऽयम्।

आक्षेपभाष्यम्– अथैतस्मिन्नेकशेषे सति किमयं कृतैकशेषाणां द्वन्द्वः—डा च डा च डा। रौ च रौ च रौ। रश्च रश्च रः। डा च रौ च रश्च डारौरस इति। आहो स्वित्कृतद्वन्द्वानामेकशेषः—डा च रौ च रश्च डारौरसः। डारौरसश्च डारौरसश्च डारौरस इति।

प्रथमपक्षदूषणभाष्यम्– यदि कृतैकशेषाणां द्वन्द्वः अनिष्टः समसंख्यः प्राप्नोति। एकवचनद्विचनयोर्डा प्राप्नोति बहुवचनैकवचनयो रौ प्राप्नोति द्विवचनबहुवचनयो रस् प्राप्नोति। अथ कृतद्वन्द्वानामेकशेषः। न दोषो भवति।

सिद्धान्तलक्षणम्– यथा न दोषस्तथास्तु।

आक्षेपभाष्यम्– किं पुनरत्र ज्यायः?

समाधानभाष्यम्– उभयं हि दृश्यते—बहु शक्तिकिटकं बहूनि शक्तिकिटकानि। बहु स्थालीपिठरं बहूनि स्थालीपिठराणि।

श्लोकार्थोपसंहारभाष्यम्– डारौरसः कृते टेरे यथा द्वित्वं प्रसारेण। समसंख्येन नार्थोऽस्ति सिद्धं स्थानेऽर्थतोन्तरः। आन्तर्यतो व्यवस्था त्रय एवेमे भवन्तु सर्वेषाम्। टेरेत्वं च परत्वात्कृतेऽपि तस्मिन्निमे सन्तु।

डादेशेसर्वादेशत्वाधिकरणम्

(1673. **वार्त्तिकम्**-4)

* डाविकारस्य शित्करणं सर्वादेशार्थम् *

भाष्यम्– डाविकारः शित्कर्तव्यः। किं प्रयोजनम्? सर्वादेशार्थम् 'शित्सर्वस्य' इति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारे 'अलोऽन्त्यस्य विधयो भवन्ति' इत्यन्त्यस्य प्रसज्येत।

(1674. **वार्त्तिकम्**-5)

* निघातप्रसङ्गस्तु *

भाष्यम्– निघातस्तु प्राप्नोति। श्वः कर्ता। तासेः परं लसार्धधातुकमनुदात्तं भवतीत्येष स्वरः प्राप्नोति।

प्रथमवार्त्तिकप्रत्याख्यानभाष्यम्– यत्तावदुच्यते—'डाविकारस्य शित्करणं सर्वादेशार्थम्' इति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(1675. **शित्करणप्रत्याख्यानवार्त्तिकम्**-6)

*** सिद्धमलोऽन्त्यविकारात् ***

भाष्यम्– सिद्धमेतत्। कथम्? अलोऽन्त्यविकारात्।

आक्षेपभाष्यम्– अस्त्वयमलोऽन्त्यस्य। का रूपसिद्धिः—कर्ताः?

(1676. **समाधानवार्त्तिकम्**-7)

*** डिति टेर्लोपाल्लोपः ***

भाष्यम्– डिति टेर्लोपेन लोपो भविष्यति।

बाधकभाष्यम्– अभत्त्वान्न प्राप्नोति।

समाधानसाधकभाष्यम्– डित्करणसामर्थ्याद्भविष्यति।

(1677. **शित्करणप्रत्याख्यानवार्त्तिकम्**-8)

*** अनित्त्वाद्वा ***

भाष्यम्– अथवा अनित्त्वादेतत्सिद्धम्। किमिदमनित्त्वादिति? अन्त्यस्यायं स्थाने भवन्न प्रत्ययः स्यात्। असत्यां प्रत्ययसञ्ज्ञायामित्सञ्ज्ञा न। असत्यामित्सञ्ज्ञायां लोपो न। असति लोपेऽनेकाल्। यदानेकाल् तदा सर्वादेशः। यदा सर्वादेशः तदा प्रत्ययः। यदा प्रत्ययस्तदेत्सञ्ज्ञा। यदेत्सञ्ज्ञा तदा लोपः।

(1678. **शित्करणप्रत्याख्यानवार्त्तिकम्**-9)

*** प्रश्लिष्टनिर्देशाद्वा ***

भाष्यम्– अथवा प्रश्लिष्टनिर्देशोऽयम्—डा आ डा। सः 'अनेकाल्शित्सर्वस्य' इति सर्वादेशो भविष्यति।

प्रत्याख्याननिराकरणभाष्यम्– यदा तर्ह्ययमन्त्यस्य स्थाने भवति तदा तिङ्ग्रहणेन ग्रहणं न प्राप्नोति।

(1679. **प्रत्याख्यानसाधकवार्त्तिकम्**-10)

*** तिङ्ग्रहणमेकदेशविकृतस्यानन्यत्वात् ***

भाष्यम्– 'एकदेशविकृतमनन्यवद्भवति' इति तिङ्ग्रहणेन ग्रहणं भविष्यति।

आक्षेपभाष्यम्– स्वरः कथम्?

(1680. **वार्त्तिकम्**-11)

*** स्वरे विप्रतिषेधात्सिद्धम् ***

भाष्यम्– (इदमिह सम्प्रधार्यम्—) डारौरसः कियन्तामनुदात्तत्वमिति। किमत्र कर्तव्यम्? परत्वादनुदात्तत्वम्। नित्या डारौरसः कृतेऽप्यनुदात्तत्वे प्राप्नुवन्ति, अकृतेऽपि प्राप्नुवन्ति। अनुदात्तत्वमपि नित्यं कृतेष्वपि डारौरस्सु प्राप्नोति, अकृतेष्वपि प्राप्नोति। अनित्यमनुदात्तत्वम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यस्य कृतेषु डारौरस्सु प्राप्नोति, अन्यस्याकृतेषु। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। डारौरसोऽप्यनित्याः। अन्यथास्वरस्य कृतेऽनुदात्तत्वे प्राप्नुवन्ति। अन्यथास्वरस्याकृते। स्वरभिन्नस्य च प्राप्नुवन्तोऽनित्या भवन्ति। उभयोरनित्ययोः परत्वादनुदात्तत्वम्। अनुदात्तत्वे कृते पुनःप्रसङ्गविज्ञानाद् डारौरसः। टिलोपे उदात्तनिवृत्तिस्वरेण सिद्धम्।

बाधकभाष्यम्– न सिध्यति। किं कारणम्? अन्तरङ्गत्वाद् डारौरसः तत्रान्तरङ्गत्वाड्डारौरस्सु कृतेषु अनुदात्तत्वं क्रियतां टिलोप इति। किमत्र कर्तव्यम्? परत्वाट्टिलोपेन भवितव्यम्।

वार्त्तिकतात्पर्यान्तरभाष्यम्– एवं तर्हि 'स्वरविप्रतिषेधात् सिद्धम्'। न्याय्य एवायं स्वरविप्रतिषेधः। इदमिह सम्प्रधार्यम्– अनुदात्तत्वं क्रियतामुदात्तनिवृत्तिस्वर इति। किमत्र कर्तव्यम्? परत्वादनुदात्तत्वम्। अनुदात्तत्वे कृते पुनःप्रसङ्गविज्ञानादुदात्तनिवृत्तिस्वरो भविष्यति।

आक्षेपभाष्यम्– तदेतत्क्व सिद्धं भवति यत् पिद्वचनम्। यदपिद्वचनं तत्र न सिध्यति?

समाधानभाष्यम्– तत्रापि सिद्धम्। कथम्? इदमद्य लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः। न चापवादविषये उत्सर्गोऽभिनिविशते 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते'। तत्र तावदत्र कदाचित्प्रत्ययस्वरो भवति अपवादं लसार्वधातुकानुदात्तत्वं प्रतीक्षते। तत्रानुदात्तत्वं क्रियतां लोप इति। यद्यपि परत्वाल्लोपः सोसाववविद्यमानोदात्तत्वे अनुदात्ते उदात्तो लुप्यते।

प्रत्ययस्वरापवादो लसार्वधातुकानुदात्तत्वम्। तेन तत्र न प्रसक्तः प्रत्ययस्वरः कदाचित्। प्रत्ययस्वरश्च तासेर्वृत्तिसन्नियोगशिष्टः। तेन चाप्यसावुदात्तो लोप्स्यते तथा न दोषः। लुटः प्र.।।85।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
द्वितीयाध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्;

समाप्तश्चायं पादोऽध्यायश्च

●

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयाध्यायान्तव्याख्यातवार्त्तिकानुक्रमणी

वार्त्तिकाणि	पृष्ठाङ्काः
अकच्श्नम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम्	220
अकर्मकग्रहणे कालकर्मणामुपसंख्यानम्	401
अकस्य भविष्यति	555
अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्	553
अकारकं ह्यकथितात्	397
अकारकमिति चेदुपयोगवचनानर्थक्यम्	390
अकारकार्हाणा चाकारकत्वे	542
अकारस्य विवृतोपदेश आकारग्रहणार्थः	16
अकारान्तोत्तरपदो द्विगुः स्त्रियाम्	566
अक्षरं न क्षरं विद्यात्	41
अक्षशलाकयोश्चैकवचनान्तयोः	449
अक्षादयस्तृतीयान्ताः परिणापूर्वोक्तस्य यथा न तदयथाद्योतने	449
अक्षु चानेकवर्णादिशेषु	147
अगुरुपुत्रादीनाम्	428
अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम्	29
अङ्गसञ्ज्ञायां तदादिग्रहणं स्यादिनुमर्थम्	373
अङ्गसञ्ज्ञया भपदसञ्ज्ञयोरसमावेशः	352
अङ्गाद्विकृतात्तद्विकारश्चेदङ्गिनो वचनम्	536
अङ्गाधिकार इटो विधिप्रतिषेधौ	201
अङ्गाश्रये चैकशेषवचनम्	279
अचः पूर्वविज्ञानादैचोः सिद्धम्	174
अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः	245
अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति	36
अचोऽन्त्यादि टि प्रयोजनम्	93
अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि	37
अजाद्याट्त्वे प्रयोजनम्	92
अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य	185
अज्ग्रहणं संयोगाच्समुदायनिवृत्यर्थम्	246
अज्वरिसन्ताप्योः	550

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्	75
अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनम्	350
अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम्	577
अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानम्	577
अणिञोर्लुगर्थमल्ग्रहणम्	253
अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गः	254
अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात्	213
अतपर एच इग्घ्रस्वादेशे	25
अतन्त्रे तरनिर्देशे शङ्कुतूणवयोर्मृदङ्गेन समासः	517
अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति	319
अतो दीर्घे यलोपवचनम्	179
अत्यन्तसंयोगे कर्मवल्लाद्यर्थम्	528
अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तेन समासवचनानर्थक्यम्	455
अत्यादयः क्रान्ताद्यर्थे द्वितीयया	494
अत्र लोपोऽभ्यासस्य	204
अदिखादिनीवहीनां प्रतिषेधः	400
अद्यतन्यां च	559
अद्वन्द्व इति द्वन्द्वाधिकारनिवृत्त्यर्थम्	582
अद्वन्द्वतत्पुरुषविशेषणानाम्	298
अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थम्	97
अधिकरणं कर्ता	359
अधिकरणं कर्म	359
अधिकरणगतिः साहचर्यात्	292
अधिकरणे च	538
अधिकारः प्रतियोगं तस्यानिर्देशार्थः	322
अधिकारपरिमाणज्ञानार्थं तु	322
अधिकारपरिमाणाज्ञानं तु	322
अधिकारात्प्रत्ययलोपः	583
अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः	540
अधिरीश्वरवचने उक्तम्	415
अधिरीश्वरे, विभाषा कृञि	129
अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः	384
अधीयानविदुषोश्छन्दोब्राह्मणानि	320
अध्यर्धग्रहणं च समासकन्विध्यर्थम्	97
अध्युपसृष्टं कर्म	359

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
अध्वनः प्रथमा च	539
अध्वनश्चानपवादः	532
अध्वन्यर्थग्रहणम्	531
अनडानङ्भ्यां च	365
अनञिति च	475
अनत्यन्तसंयोगार्थं तु	455
अनधिकारात्	540
अनन्तर इति चेत्पूर्वोत्तरयोरित्कृतप्रसङ्गः	315
अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूसंख्यानम्	175
अनन्तरे प्लुतो मा भूत्	238
अनन्यत्वाच्च	214
अनन्यप्रकृतिरिति वा	115
अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात्	525
अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते	521
अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम्	522
अनर्थकं च	145
अनर्थकं तु	234
अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः	35
अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि	320
अनवनकौटिल्ययोः	345
अनवयवप्रसङ्गात्प्रतिपदं विधेश्च	361
अनव्ययीभावस्य	445
अनाकृतिः	44
अनादेशत्वात्	161
अनारम्भो वा	61
अनित्त्वाद्वा	591
अनित्यविज्ञानं तु तस्मादुपसंख्यानम्	161
अनिनस्मन्ग्रहणानि च	225
अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः	190
अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु	22
अनुकरणस्येतिकरणपरत्वप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः	408
अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात्	162
अनुपसर्गाद्वा	126
अनुपसर्गाद्वा	88
अनुबन्धकरणार्थश्च	14

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि **पृष्ठाङ्काः**

अनुबन्धकसङ्करस्तु 19
अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः 314
अनुबन्धोऽन्यत्त्वकरः 100
अनुबन्धोऽन्यत्त्वकर इति चेन्न लोपात् 100
अनुर्लक्षणेवचनानर्थक्यं सामान्यकृतत्वात् 412
अनुवर्तते विभाषा, शरोऽचि यद्वारयत्ययं द्वित्वम् 37
अनुवाकादयः पुंसि 566
अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु 517
अनेकमपीति तु वचनात्सिद्धम् 253
अनेकवचनमुपसर्जनार्थम् 499
अनेकशफेषु 299
अनेकशेषभावार्थं तु 419
अनेकान्ते वृत्तिविशेषः 315
अनेकान्तो ह्यनन्यत्वकरः 214
अनेकार्थाश्रयश्च पुनरेकशेषः (स्तस्मान्नैकशब्दत्वम्) 280
अनो नलोपश्च 566
अनोर्ज्ञः प्रतिषेधे सकर्मकवचनम् 338
अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम् 409
अन्तरङ्गं च 363
अन्तरतमवचनं च 146
अन्तरान्तरेण युक्तानामप्रधानवचनम् 527
अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम् 93
अन्त्यविज्ञानात्सिद्धम् 203
अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम् 136
अन्नवधकगात्रविचक्षणाजिराद्यर्थम् 575
अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः (कारकाणां क्रियासमर्थत्वात्) 458
अन्यकर्मेति चेद् ब्रूयाल्लादीनामविधिर्भवेत् 398
अन्यतरार्थं पुनर्वचनम् 58
अन्यत्र सञ्ज्ञासमावेशान्नियमार्थं वचनम् 351
अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः 469
अन्यत्र सहवचनात्समुदाये सञ्ज्ञाप्रसङ्गः 47
अन्यत्रापि तद्विषयदर्शनात् 297
अन्यत्रापि तद्विषयदर्शनात् 514
अन्यत्राभिधेयस्य व्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः 270
अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा 322

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
अन्यवाचकेनान्यस्य वचनानुपपत्तिः	513
अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत् प्लक्षस्य न्यग्रोधत्वाद् न्यग्रोधस्य प्लक्षत्वात् स्वशब्देनाभिधानम्	513
अन्याभावो द्विवचनटाब्विषयत्वात्	105
अन्वयव्यतिरेकाभ्याम्	303
अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिः	383
अन्वादेशश्च कथितानुकथितमात्रम्	567
अन्वादेशे समानाधिकरणग्रहणम् (दैवदत्तं भोजयेमं चेत्यप्रसङ्गार्थम्)	567
अपत्यं वृद्धं युवा	358
अपरविधाविति तु वक्तव्यम्	171
अपरिमाणबिस्तादिग्रहणं च प्रतिषेधे प्रयोजनम्	221
अपवादप्रसङ्गस्तु स्थानिवत्त्वात्	163
अपादानं च वृक्षस्य पर्णं पततीति	383
अपादानमुत्तराणि	358
अपादानादीनां त्वप्रसिद्धिः	385
अपिद् ङिदिति चेत् शबेकादेशप्रतिषेध आदिवत्त्वात्	232
अपुरीति वक्तव्यम्	111
अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्	92
अपृक्तसञ्ज्ञायां हल्ग्रहणं स्वादिलोपे हलोऽग्रहणार्थम्	253
अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्	361
अप्रत्यय इति चेत् तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात्	263
अप्रत्यादिभिः	544
अप्रधानत्वात्	36
अप्रधाने दुहादीनाम्	398
अप्रयुक्ते दीर्घसत्त्रवत्	10
अप्रयोगः प्रयोगान्यत्वात्	10
अप्राप्ते त्रिसंशयाः	125
अप्राप्तेर्वा	120
अप्राप्तेर्वा	199
अप्राप्तेर्वा	257
अप्राप्तेर्वा	378
अबहुत्वे लुग्वचनम्	578
अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम्	577
अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः	137
अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिःशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था च	152

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
अभावेऽवसानलक्षणे उपर्यभावचनम्	423
अभावेऽवसानसंज्ञिन्युपर्यभाववचनम्	424
अभिधानं पुनः स्वाभाविकम्	287
अभिधानं पुनः स्वाभाविकम्	514
अभिधानार्थं तु	468
अभिहितलक्षणायामनभिहिते प्रथमाविधिः	546
अभिहितानभिहिते प्रथमाभावः	546
अभ्यर्हितम्	518
अमि पञ्चमीप्रतिषेधेऽपादानग्रहणम्	588
अमुष्येत्यन्तः	252
अयोगवाहानामट्सु णत्वम्	32
अर्तिश्रुदृशिभ्यश्च	335
अर्थतश्चेदविशिष्टम्	497
अर्थतश्चेल्ल्टलुटोर्नन्ध्यरीहणसिन्धुतक्षशिलादिषु दोषः	318
अर्थनियमे मत्वर्थग्रहणम्	503
अर्थनियमे सिद्धम्	381
अर्थवत्ता नोपपद्यते केवलेनावचनात्	261
अर्थवत्त्वादेशप्रतिषेधार्थम् (तस्माच्छित्करणम्)	568
अर्थवत्प्रातिपदिकम्	360
अर्थवत्यनेकपदप्रसङ्गः	259
अर्थवत्समुदायानां समासग्रहणं नियमार्थम्	260
अर्थवन्तो वर्णा धातुप्रतिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्	33
अर्थातिदेशात्सिद्धम्	273
अर्थावधारणाद्वा	548
अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत्	466
अर्थेन नित्यसमासवचनम्	460
अर्धर्चादयः	567
अर्धपूर्वपदश्च पूरणप्रत्ययान्तः	97
अलमिति पर्याप्त्यर्थग्रहणम्	534
अलिङ्गमसंख्यमिति वा	112
अलैवानर्थकेन	225
अलोऽन्त्यस्य प्रयोजनम्	93
अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः	156
अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः	155
अलोऽन्त्यात् पूर्वोऽलुपधेति वा	204

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम्	184
अल्लोपस्य स्थानिवत्त्वात्	61
अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात्	159
अवकाशोऽकारकमिति चेन्नास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति	525
अवचनादापि तत्परविज्ञानम्	105
अवचनादापि तत्परविज्ञानमिति चेत्केऽपि तुल्यम्	106
अवचनाल्लोकविज्ञानात् सिद्धम्	204
अवचनाल्लोकविज्ञानात् सिद्धम्	91
अवचने हि सुबन्तमात्रप्रसङ्गः	444
अवचने ह्यनिष्टाप्रसङ्गः	584
अवयवग्रहणात्सिद्धम्	151
अवयवग्रहणात्सिद्धम्	312
अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः	151
अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः	313
अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासो गोह इति	140
अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसन्दिग्धत्वात्	141
अवयवस्त्रीविषयत्वात्सिद्धम्	372
अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधप्रसङ्गे यण्स्थानप्रतिषेध-प्रसङ्गोवयवस्येयङुवङ्स्थानत्वात्	372
अवरादीनां च पुनः सूत्रपाङ्गे ग्रहणानर्थक्यं गणे पङ्गितत्वात्	109
अवादयः क्रुष्टाद्यर्थे तृतीयया	494
अवाद् ग्रो गिरतेः	336
अविनाशोनाश्रितत्त्वात्	292
अविनाशोऽनैकात्म्यात्	293
अविभक्तावितरेतराऽऽश्रयत्वादप्रसिद्धिः	112
अविशेषेण बहुव्रीहावनेकपदप्रसङ्गः (तत्र स्वरसमासान्तपुंवद्भावेषु दोषः)	441
अविशेषेण संयोगोपधासञ्ज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः	33
अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः	178
अविशेषेणैकश्रुत्यमिति चेद् व्यवहितानामप्रसिद्धिः	253
अवे तृस्त्रोः करणाधिकरणयोः	319
अव्यपवर्गगतेश्च	287
अव्ययं प्रवृद्धादिभिः	494
अव्ययत्वं मकारान्तत्वात्	586
अव्ययप्रतिषेधः	265
अव्ययप्रतिषेधश्च	445

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि **पृष्ठाङ्काः**

अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः 554
अव्ययमव्ययेन 495
अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात् 587
अव्ययानां च 502
अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः 118
अशादेशवचनं साकच्कार्थम् 568
अशिष्यं वा बहुवत् पृथक्त्वाभिधानात् 274
अशिष्यः संख्योत्तरपदः संख्येयवाभिधायित्वात् 507
अशिष्य एकशेष एकेनोक्तत्वात् 285
अशिष्यो वा विदितत्वात् 125
अशिष्टव्यवहारे तु तृतीया च विधीयते 337
अश्नोतेर्वा सरोऽक्षरम् 41
अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकम् 561
असनयोश्च 575
असन्दिग्धम् 38
असमासे वचनलोपः 279
असावित्यन्तः 251
असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात् सामान्यस्य च विवक्षितत्वात्सिद्धम् 294
असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् 112
असिद्धवचनात्सिद्धम् 174
असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः 174
असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः 175
असिद्धे शस्य यवचनं विभाषा 574
असिद्धे ह्याद्गुणाप्रसिद्धिः 81
अस्ति च वैरूप्यम् 290
अस्ति चैकमनेकाधिकरणस्थं युगपत् 288
अस्तिभवतिविद्यतीनां च धातुत्वम् 302
अस्त्यप्रयुक्त इति चेत् नार्थे शब्दप्रयोगात् 10
अस्त्यप्रयुक्तः 9
अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः 178
अस्मदो नामयुवप्रत्यययोश्च 273
अहीने द्वितीयास्वरवचनानर्थक्यं च 454
अह्नो रविधौ 198
आकार आख्याते परादिश्च 251

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
आकारस्य तपरकरणं सवर्णार्थम्	48
आकारान्तान्नुक्षुक्प्रतिषेधः	166
आकृतिवाचित्वादेकवचनम्	296
आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः	287
आकृत्युपदेशात्सिद्धम्	15
आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः	15
आख्यातं साव्ययकारकविशेषणं वाक्यम्	435
आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसञ्ज्ञाप्रसङ्गः	390
आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनम्	582
आगमेः क्षमायाम्	332
आङः स्थः प्रतिज्ञाने	333
आङि नुप्रच्छ्योः	333
आङीषदर्थे	493
आङो दोऽव्यसनक्रियस्य	331
आङ् मर्यादाभिविध्योः	413
आचारात्	36
आचारे नियमः	11
आचार्यदेशशीलनेन च तद्विषयता	124
आचार्याचारात्सञ्ज्ञासिद्धिः	44
आत्मनः कर्मत्वे प्रतिषेधः	347
आत्मनेपदनियमे वा प्रातिषेधः	350
आत्मनेपदप्रतिषेधार्थं तु	346
आत्मनेपदवचनं नियमार्थम्	325
आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु	318
आत्मनेपदस्य च	346
आत्मनेपदानां चेति वचनात्सिद्धम्	589
आत्वं कित्त्वस्योपादास्त	116
आत्वं पुग्विधेः क्नापयति	117
आत्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यः	365
आदिवत्त्वे प्रयोजनं—प्रत्ययञ्निदाद्युदात्तत्वे	92
आदिरन्त्येन सहेतेत्यसम्प्रत्ययः संज्ञिनोऽनिर्देशात्	218
आदेशः स्थानिवदिति चेन्नानाश्रितत्वात्	162
आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम्	185
आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः	150
आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः	160

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम्	160
आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसम्प्रत्ययः	135
आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम्	69
आनुपूर्व्यवचनं च	416
आने मुगीदासः	207
आन्यभाव्यं तु कालशब्दव्यवायात्	20
आपि लोपोऽकोऽनचि	203
आमन्तेभ्यो णलः प्रतिषेधः	585
आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोप्रतिषेध इति चेदमः प्रतिषेधः	585
आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेधः	585
आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यामन्त्रितकारकवचनम्	444
आमो लेर्लोपे लुङ्लोटोरुपसंख्यानम्	585
आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः	201
आमि सर्वनाम्नः सुट्	207
आम्विधौ च	167
आरभ्यमाणे नित्योऽसौ	173
आशिषि नाथः	333
आश्रय इति चेदल्विधिप्रसङ्गः	162
आश्रयाभावान्नदीसञ्ज्ञायां घिसञ्ज्ञानिवृत्तिरिति चेद्यणादेशाभावः	356
आश्रयात्सिद्धत्वं यथा रोरुत्वे	80
आस्थितप्रतिषेधश्च	532
आहिभुवोरीट्प्रतिषेधः	165
इकः कित्त्वं गुणो मा भूत्	234
इक्प्रकरणान्नुम्लोपे वृद्धिः	60
इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्	49
इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः	52
इड्विधिश्च	166
इड्विधिराकारलोपस्य पपिवान्	117
इड्विधौ ह्यग्रहणम्	240
इण्ङिशीनामाद्गुणः सवर्णदीर्घत्वात्	364
इण्वदिकः	572
इतरथा हि तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः	330
इतरथा हि ताभ्यां सत्रन्ताभ्यामात्मनेपदप्रतिषेधः	341
इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः	346
इतरथा हि सर्वप्रसङ्गः	345

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
इतरथा ह्यनिष्टप्रसङ्गः	155
इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य	383
इतरथा ह्यसम्प्रत्ययो यथा लोके	43
इतरथा ह्यसम्प्रत्ययोऽकृत्रिमत्वाद्यथा लोके	95
इतरथा ह्यसितृणयोश्छेदनेऽविशेषः स्यात्	385
इतरथा ह्येकान्तेऽपि सन्देहः	316
इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः	305
इतिकरणोऽर्थनिर्देशार्थः	121
इति वा वचने तावत्	269
इतीन्द्रवद्विषयः	288
इतीन्द्रवद्विषयः	292
इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात्	314
इत्त्वं कित्संनियोगेन	239
इत्थंभूतलक्षणं तत्स्थे प्रतिषेधः	537
इत्सञ्ज्ञायां सर्वप्रसङ्गोऽविशेषात्	308
इयङादेशो गुणात्	366
इच्च कस्य तकारेत्त्वम्	237
इदर्थाभावात्सिद्धम्	310
इदर्थाभावात्सिद्धम्	312
इद्द्रोण्या नेति वक्तव्यम्	269
इन आधमर्ण्ये च	555
इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात्ताभ्यां किद्वचनानर्थक्यम्	233
इर उपसंख्यानम्	312
इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च	448
इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च	494
इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः	15
ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः	79
ईदाद्यन्तमिति चेदेकस्य विधिः	78
ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः	78
ईदूतौ सप्तमीत्येव	85
ईप्सितस्य कर्मसञ्ज्ञायां निर्वृत्तस्य कारकत्वे कर्मसञ्ज्ञाप्रसङ्गः क्रियेप्सितत्वात्	395
ईयसो बहुव्रीहौ पुंवद्वचनम्	267
ईषद् गुणवचनेन	488
उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः	554
उकारप्रयोगे न	554

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
उक्तं वा	163
उक्तं वा	168
उक्तं वा	190
उक्तं वा	232
उक्तं वा	257
उक्तं वा	257
उक्तं वा	268
उक्तं वा	403
उक्तं वा	422
उक्तं शेषे	62
उगिद्वर्णग्रहणवर्जम्	220
उच्चनीचस्यानवस्थितत्वात्सञ्ज्ञाऽप्रसिद्धिः	247
'उञ' इति योगविभागः	84
उत्तरपदत्वे च पदादिविधौ	200
उत्तरपदत्वे चापदादिविधौ	198
उत्तरपदलोपे च	177
उत्तरपदातिशये आतिशायिको बहुव्रीहेः बह्वाढ्यतराद्यर्थः	480
उत्तरपदेन परिमाणिना द्विगोः समासवचनम्	468
उत्तरार्थं च	95
उत्तरार्थं तु	191
उत्त्वे च	30
उत्पातेन ज्ञाप्यमाने	533
उद ईहायाम्	333
उदात्तगतिमता च तिङा	495
उदात्तादिषु च	150
उदिकूले रुजिवहोः	319
उदुपधत्वमकित्त्वस्य निकुचिते	116
उदुपधाच्छपः	240
उद्यमननिपातनानि कर्तुश्छिदिक्रिया	384
उपधारोरवीत्यर्थम्	62
उपधासञ्ज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्सङ्घातप्रतिषेधः	202
उपपदमतिङिति तदर्थप्रतिषेधः	495
उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम्	221
उपपदविभक्तेश्चोपपदविभक्तिः	537
उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः	472

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
उपरिविरामवचनम्	423
उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात्	110
उपसर्गग्रहणम्	332
उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानम्	339
उपसर्गादस्यत्यूह्योर्वावचनम्	335
उपसर्जनसन्निपाते तु पूर्वपरव्यवस्थार्थम्	411
उपसर्जनस्य पूर्ववचनं परप्रयोगनिवृत्त्यर्थम्	516
उपसर्जनह्रस्वत्वं वा	564
उपसर्जनह्रस्वत्वे च	266
उपाद्देवपूजासङ्गतकरणमित्रकरणपथिषु	334
उपाद्देवपूजासंगतकरणयोः	333
उभयत्र च	130
उभयतश्च	559
उभयदर्शनाच्च	287
उभयनिमित्तत्वात्	176
उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः	206
उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः	552
उभयसञ्ज्ञान्यपि	379
उभयादेशत्वाच्च	176
उभयोरनर्थकं वचनमनिष्टादर्शनात्	411
उभयोऽन्यत्र	105
उभस्य सर्वनामत्वेऽकजर्थः	105
उभाभ्यामल्पाच्तरम्	520
उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः	149
उरण् रपरे च	58
उवङादेशश्च	366
उषविदजागृभ्योऽन्यतरस्याम्	127
उसि पररूपाच्च	368
ऊँ वा शाकल्यस्य	85
ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्	36
ऊङापोरेकादेश ईत्त्वलोपाभ्याम्	365
ऊतोऽचि	583
ऊर्णोतेर्विभाषा	125
ऋकारलृकारयोः सवर्णविधिः	74
ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम्	517

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	**पृष्ठाङ्काः**
ऋतेपि सः	237
ऋतोर्वृद्धिमद्विधाववयवानां प्रयोजनम्	223
ऋदित्त्वं दीर्घसंश्रयम्	235
ऋदुपधेभ्यो लिटः कित्वं गुणाद्विप्रतिषेधेन	232
ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गोऽविशेषात्	147
एकतिङ्	435
एकत्वादकारस्य सिद्धम्	18
एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः	24
एकदेशविकृतस्यानन्यत्वात्सिद्धम्	161
एकदेशविकृतस्योपसंख्यानम्	161
एकदेशविकृतेषूपसंख्यानम्	161
एकद्रव्योपनिवेशिनी सञ्ज्ञा	360
एकयोगे ह्युभयोः प्रतिषेधः	588
एकवचनग्रहणं वा	584
एकवचनद्विगोश्चोपसंख्यानम्	485
एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि	579
एकवचनमनर्थकं समाहारैकत्वात्	562
एकवर्णवच्च	28
एकविभक्तावषष्ठ्यन्तवचनम्	257
एकविभक्ताविति चेन्नाभावाद्विभक्तेः	278
एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम्	280
एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य	442
एकशेषनिर्देशाद्वा	310
एकशेषनिर्देशाद्वा	437
एकशेषप्रतिषेधश्च	557
एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः	357
एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्तार्थे प्रतिषेधः	357
एकस्मिन्युगपदसम्भवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः	361
एकहलादौ पूरयितव्येऽन्यतरस्याम्	128
एकाचो द्वे प्रथमार्थम्	91
एकाजनेकाज्ग्रहणेषु चानुपपत्तिः	19
एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्	20
एकादीनां दशादिभिर्द्वन्द्वः	515
एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रसङ्गः	515
एकादेशस्योपसंख्यानम्	151

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
एकादेशस्योपसंख्यानम्	176
एकादेशे दीर्घग्रहणम्	25
एकान्तस्तत्रोपलब्धेः	315
एकान्तादित्वे च सर्वप्रसङ्गः	226
एकारान्तनिपातनं च	452
एकार्थानामपि विरूपाणाम्	283
एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः	286
एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः	514
एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः	286
एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः	514
एङः पूर्वत्वे प्रतिषेधः	318
एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम्	228
एच इग्वचनं सवर्णाकारनिवृत्त्यर्थम्	139
एजवर्णयोरादेशोऽवर्णं स्थानिनोऽवर्णप्रधानत्वात्	148
एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः	384
एनदिति नपुंसकैकवचने	569
ऐचोश्चोत्तरभूयस्त्वात्	140
ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य	187
ओतश्श्विप्रतिषेधः	84
कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम्	190
कडारादयः	520
कथितेऽभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः सपरे	397
कथिते लादयश्चेत्स्युः षष्ठीं कुर्यात्तदा गुणे	397
कदाचित्कर्मधारयः सर्वधनाद्यर्थः	478
कपि च	267
कबभावार्थं वा	508
कबभावार्थं वा	510
कबभावार्थो वा	509
करणं पराणि	359
करोतिपिबत्योः प्रतिषेधः	168
कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थम्	328
कर्तृकरणे कृता क्तेन	457
कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात्	551
कर्तृकर्मणोश्च भूकृञोः	320
कर्तृग्रहणमनुपराद्यर्थम्	349

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
कर्तृवचनेनापि	503
कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम्	346
कर्मण: करणसञ्ज्ञा सम्प्रदानस्य च कर्मसञ्ज्ञा	392
कर्मणीति षष्ठीनिर्देशश्चेदकर्तरि कृता समासवचनम्	491
कर्मधारयत्वे तत्पुरुषग्रहणम्	353
कर्मप्रवचनीययुक्तेऽप्रतिषेधार्थम्	588
कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं सप्तमीपञ्चम्यो: प्रतिषेधार्थम्	529
कर्मवचनेनाप्रथमाया:	503
कर्मव्यतिहारादिषु कर्तृग्रहणं भावकर्मनिवृत्त्यर्थम्	330
कर्मसञ्ज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति	383
कर्मादिष्वकर्मकवद्वचनम्	549
कर्माभिधाने हि लिङ्गवचनानुपपत्ति:	549
काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति	175
कारकं चेत्तु नाकथा	397
कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत्	397
कारक इति सञ्ज्ञानिर्देशश्चेत्संज्ञिनो निर्देश:	382
कारककालविशेषात् सिद्धम्	100
कारकार्हाणां च कारकत्वे	542
कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम्	513
कारिकाशब्दस्य	406
कार्यविपरिणामाद्वा सिद्धम्	163
कार्येषु युगपदन्वाचययौगपद्यम्	124
कालभावाध्वगन्तव्या: कर्मसञ्ज्ञा ह्यकर्मणाम्	399
कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश:	485
कितवव्यवहारे च	450
किदतिदेशात्	239
किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्	47
किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्	71
किमर्थमुपदिश्यते	41
किरतेर्हर्षजीविकाकुलायकरणेषु	332
कु: पापार्थे	493
कुटादीनामिट्प्रतिषेध:	230
कृञादिषु तु लिङ्गप्रतिषेध:	342
कृतापकृतादीनां चोपसंख्यानम्	475
कृते भवेत्	234

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
कृत्प्रयोगे तु परं विधानं षष्ठ्यास्तत्प्रतिषेधार्थम्	525
कृत्यैर्नियोगे यद्ग्रहणम्	463
कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यते	457
कृद्योगा च	488
कृन्मेजन्तः परोऽपि सः	404
कृन्मेजन्तश्चानिकारोकारप्रकृतिः	115
कृभ्वस्तियोगे	408
कृभ्वोः क्त्वाणमुलौ	320
कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः	357
कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम्	185
केकयमित्रय्वोरियादेश एत्वम्	177
क्ङिति प्रतिषेधे तन्निमित्तग्रहणम्	62
क्तनिर्देशेऽसमर्थत्वादप्रतिषेधः	492
क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम्	553
क्त्वा च विग्रहात्	240
क्त्वायां कित्प्रतिषेधश्च	231
क्यष आत्मनेपदवचनं तस्यान्यत्र नियमात्	327
क्रमेर्दीर्घत्वं च	201
क्रियाग्रहणम्	392
क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य	419
क्रियापवर्गे	529
क्रियाप्रतिषेधो वा	495
क्रियामध्ये	529
क्रियावचने उपसर्गप्रत्ययप्रतिषेधः	302
क्रियावचनो धातुः	302
क्रियाविशेषक उपसर्गः	303
क्रियाव्यतिहारे	329
क्रुधद्रुहोरुपसृष्टयोः कर्म सम्प्रदानम्	359
क्लृपिसम्पद्यमाने	533
कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि	175
क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्	182
क्षेपे सगतिकसकारकसमासे उक्तम्	464
क्सलोपे लुग्वचनम्	178
खलगोरथादिनित्रकट्यचश्च	321
खलतिकादिषु वचनम्	272

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
खलेयवादीनि प्रथमान्तान्यन्यपदार्थे	451
खशादिर्वा	574
गतप्रत्यागतादीनां चोपसंख्यानम्	476
गतिदिवः कर्महेतुमत्सु चग्रहणम्	354
गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसञ्ज्ञम्	356
गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात्	387
गत्युपसर्गसञ्ज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम्	406
गत्युपसर्गसञ्ज्ञे कर्मप्रवचनीयसञ्ज्ञा	359
गर्गभार्गविकाग्रहणं वा नियमार्थम्	580
गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम्	560
गाङ्व्यनुबन्धकरणं विशेषणार्थम्	573
गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्	584
गुरुलघुसञ्ज्ञे नदीघिसञ्ज्ञे	355
गुरुसञ्ज्ञा च	176
गुणयोश्चेन्नाप्रकरणात्	248
गुणवचनं च	360
गुणवचनवद्वा	292
गुणवृद्ध्येज्भावेषु च	147
(नि)गृहीतिः	239
गोः पूर्वणित्त्वात्वस्वरेषु	167
गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्	266
गोण्या इत्त्वं प्रकरणात्	269
गोतो णित्	207
गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक्	579
गोत्रान्ताद्वाऽसमस्तवत्	227
गोत्रोत्तरपदस्य च	227
गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः	582
ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः	178
ग्रामप्रतिषेधे नगरप्रतिषेधः	559
ग्रो यङ्यचि विभाषा	128
घञपोः प्रतिषेधे क्यप उपसंख्यानम्	576
घञादिषु द्विग्रहणेषु	319
घसञ्ज्ञायां नदीतरे प्रतिषेधः	93
घसञ्ज्ञायां नदीतरेऽप्रतिषेधः	94
घस्लृभावेऽच्युपसंख्यानम्	572

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	**पृष्ठाङ्काः**
घिन्नदी	358
घुसञ्ज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्	87
घुसञ्ज्ञायां प्रकृतिग्रहणं शिदर्थम्	86
घेर्ङित्याण् नद्याः	207
ङमो ह्रस्वादचि ङमुण् नित्यम्	208
ङसिङसोः ख्यत्यात्परस्य	320
ङित्किद्वचने तयोरभावादप्रसिद्धिः	228
ङीब्विधावुगिद्ग्रहणं प्रयोजनम्	221
ङ्याब्ग्रहणेऽदीर्घः	164
चक्षिङः कशाञ्ख्याञौ	574
चङ्परनिर्ह्रासे चोपसंख्यानं कर्तव्यम्	183
चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोविशेषात्	459
चतुर्थीविधाने तादर्थ्य उपसंख्यानम्	532
चतुष्पाज्जातिः	481
चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसम्प्रत्ययादनिष्टप्रसङ्गः	511
चुञ्चुप्चणपोश्चकारप्रतिषेधः	312
चेष्टायामनध्वनि स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गः	532
चोदनायां चैकस्योपाधिवृत्तेः	289
चोदनासु च तस्यारम्भात्	289
छन्दसिपरव्यवहितवचनं च	410
जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम्	570
जाग्रोगुणविधिः	230
जातिशब्देन हि द्रव्याभिधानम्	274
जातिस्वरप्रसङ्गस्तु	454
जात्याख्यायां वचनादेशे स्थानिवद्भावप्रतिषेधः	164
जात्याख्यायां सामान्याभिधानादैकार्थ्यम्	273
जित्पर्यायवचनस्यैव राजाद्यर्थम्	211
जिह्वाकात्यहरितकात्यवर्ज्जम्	227
जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्	386
ज्ञाने धर्म इति चेत्तथाऽधर्मः	11
ज्ञापकं वा सानुबन्धकस्यादेशवचन इत्कार्याभावस्य	573
ज्ञापकं स्यात् तदन्तत्वे	86
ज्ञापकात्सिद्धम्	98
ज्ञापकान्न परोक्षायाम्	238
ज्ञायते चैकोपदिष्टम्	287

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
ज्योतिषामुद्गमने	335
झित्तस्य्च तद्विशेषाणां च मत्स्याद्यर्थम्	211
टकितोराद्यन्तविधाने प्रत्ययप्रतिषेध:	134
टितां टेरेविधेर्लुटो डारौरस: पूर्वविप्रतिषिद्धम्	589
ठञ्विधौ संख्याया: प्रयोजनम्	223
डाविकारस्य शित्करणं सर्वादेशार्थम्	590
डिति टेर्लोपाल्लोप:	591
डु च	360
णत्वं पर्याख्याने	575
णिलोपस्तु प्रयोजनम्	235
णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धि:	345
ण्यन्ते कर्तुश्च कर्मण:	398
तच्च समसंख्यार्थम्	589
तच्छीलादिषु धातुत्रिग्रहणेषु	319
तत्कीर्तने च द्वेधाऽप्रतिपत्ति:	124
तत्पर इति वा वर्णस्यावसानम्	425
तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेध:	357
तत्पुरुषत्वे द्विगुचग्रहणम्	353
तत्पुरुषस्समानाधिकरण: कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धि:	255
तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात्	367
तत्र गाङ: प्रतिषेध:	185
तत्र च च्विप्रतिषेध:	410
तत्र जातादिषु वावचनात्सिद्धम्	454
तत्र तुस्मानां प्रतिषेध:	314
तत्र नानाकारकात्रिघातयुष्मदस्मदादेशप्रतिषेध:	434
तत्र पुंवद्भावप्रतिषेध:	511
तत्र प्रत्ययनियमेऽव्ययानां पदसञ्ज्ञाऽभावोऽसुबन्तत्वात्	381
तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात्	327
तत्र प्रत्ययलक्षणप्रतिषेध:	188
तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात्	213
तत्र प्रथमाविधि:	548
तत्र भवस्तस्य व्याख्यान: क्रतुयज्ञेभ्यश्च	320
तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेध: शेषत्वात्	418
तत्र लुकि श्लुविधिप्रतिषेध:	193
तत्र व्यपदेशिवद्वचनम्	90

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः	357
तत्र सकि दोषः	81
तत्र सवर्णलोपे दोषः	75
तत्र हेतुमण्णिचः प्रतिषेधः	343
तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वात्	349
तत्रादेशलक्षणप्रतिषेधः	174
तत्रानुप्रयोगस्यैकवचनाभावोऽद्विगुत्वात्	557
तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्	18
तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्	214
तत्रानेकार्थाभिधानेनेकशब्दत्वम्	277
तत्रापि सरसी यदि	86
तत्राभ्यासरूपम्	185
तत्रासरूपसर्वादिशदाप्प्रतिषेधे पृथक्त्वनिर्देशोनाकारान्तत्वात्	315
तत्रैकवचनादेशे उक्तम्	273
तत्रैकसञ्ज्ञाधिकारे तद्वचनम्	352
तत्रोत्सर्गलक्षणप्रतिषेधः	570
तत्स्थैश्च गुणैः	489
तथा च निघातानिघातसिद्धिः	587
तथा च लिङ्गवचनसिद्धिः	289
तथा च विग्रहः	290
तथा चोत्तरस्य वचनार्थः	503
तथासोरात्मनेपदवचनम्	584
तदर्थगतेर्वा	440
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते	42
तदेकदेशविज्ञानाद्वा सिद्धम्	220
तदेकदेशविज्ञानाद्वा सिद्धम्	374
तद्धितकाम्योरिक्प्रकरणात्	64
तद्धितलुक्यवन्त्यादीनां प्रतिषेधः	268
तद्धितलुक्यवन्त्यादीनामप्रतिषेधोऽलुक्परत्वात्	268
तद्युक्तात्काले सप्तमी	539
तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः	577
तद्वच्च हल्ग्रहणेषु	215
तद्वदतिदेशेऽकिद्विधिप्रसङ्गः	229
तद्विपर्यासे च	542
तद्विषयं च	297

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
तद्विषयं च	514
तन्निमित्तग्रहणं वा	444
तस्मात्तत्र तपरनिर्देशात्सिद्धम्	215
तस्मात्स्थानिवद्वचनम्	175
तस्मादिग्लक्षणा वृद्धिः	57
तस्मादुपदेशः	214
तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः	492
तस्य	73
तस्य च	222
तस्य कर्मकर्त्रर्थमिति चेत्प्रतिषेधेऽपि तदन्तकर्मकर्तृत्वात्सिद्धम्	552
तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात्	367
तस्य दोषः संयोगादिलोपलत्वणत्वेषु	184
तस्य दोषस्तयादेश उभयप्रतिषेधः	164
तस्य दोषो ङौ नकारलोपेत्त्वेम्विधयः	195
तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य	117
तस्य दोषो विदो लटो वा	321
तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः	17
तस्यान्तोदात्तत्वं विप्रतिषेधात्	442
तस्यावचनं वचनप्रामाण्यात्	73
तपरकरणात्सिद्धम्	168
तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम्	216
तयोरलादेशत्वात्	554
तयोरनेकार्थत्वाद्बहुवचनप्रसङ्गः	512
तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेन्न बहुत्वाभावात्	513
तरब्ग्रहणं ह्यौपदेशिकम्	94
तव्यदादीनां त्वप्रसिद्धिः	362
तस्मिँस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम्	206
तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः	156
तिङ्कृताभावस्तु	586
तिङ्कृत्तद्धितसमासैः परिसंख्यानम् (उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिवचनम्)	523
तिङ्ग्रहणमेकदेशविकृतस्यानन्यत्वात्	591
तिङ्विधिप्रतिषेधश्च	279
तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमाविधिः	546
तिङ्समासे तिङ्समासवचनम्	279

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम्	358
तिष्ठद्गु कालविशेषे	451
तिसृचतसृत्वं ङीब्विधेः	116
तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति	194
तुग्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घेत्त्वमुमेत्त्वरीविधिभ्यः	365
तुर्नियामकः	588
तुल्यः सन्निकर्षः	421
तुल्यरूपे संयोगे द्विव्यञ्जनविधिः	30
तृजकाभ्यां चानर्थकः प्रतिषेधः	491
तृजादिभिस्तुल्यम्	361
तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम्	535
तृतीयासप्तम्यन्तेषु च क्रियाभिधानादशिष्यो बहुव्रीहिः	509
तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात्	456
तृन्नादीनां विभाषा	128
त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानि	297
त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च प्रयोजनम्	224
त्यदादिविधौ च	103
त्यदादीनां सामान्यार्थत्वात्	298
त्यदाद्यकारष्टाब्विधेः	117
त्रयाणां हि विकारनिर्देशः	242
त्रयादेशे स्रन्तप्रतिषेधः	166
त्रलादीनां चोपसंख्यानम्	112
दध आकारलोप आदिचतुर्थत्वे प्रयोजनम्	184
दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्	236
दर्शनं वै हेतुः	297
दर्शनं वै हेतुः	513
दर्शनं हेतुरिति चेत्तुल्यम्	297
दर्शनं हेतुरिति चेत्तुल्यम्	513
दाप्प्रतिषेधे न दैप्यनेजन्तत्वात्	89
दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानात्	508
दिति	221
दीङः प्रतिषेधः स्थाघ्वोरित्त्वे	89
दीधीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधित्वाच्च छन्दसश्छन्दस्यदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः	65
दीध्यदिति च श्यन्व्यत्ययेन	65

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्का:
दीपादीनां विभाषा	127
दीर्घप्रसङ्गस्तु	139
दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः	243
दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थ:	18
दीर्घाणां तु प्रसज्यते	234
दीर्घाणां नाकृते दीर्घे	235
दीर्घाप्रसङ्गस्तु निवर्तकत्वात्	139
दीर्घारम्भात्	234
दीर्घे यलोपप्रतिषेध:	179
दीर्घे ह्रस्वविधिप्रतिषेध:	27
दीर्घो मा भूत्	237
दुर्निन्दायाम्	493
दूरान्तिकार्थेभ्य: पञ्चमीविधाने तद्युक्तात्पञ्चमीप्रतिषेध:	541
दृशे: सर्वत्र	400
दृष्टमानन्तर्यं व्यवहितेऽपि	69
देवब्रह्मणोरनुदात्तत्वमेके	252
देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य	250
देशश्च	399
द्युपथिमथिपुंगोसखिचतुरनडुत्रिग्रहणं प्रयोजनम्	224
द्रव्यवच्चोपचारा:	19
द्रव्याभिधानं व्याडि:	289
द्रव्याभिधाने ह्याकृत्यसम्प्रत्यय:(स्तत्रासर्वद्रव्यगति:)	288
द्रुतविलम्बितयोश्चानुपदेशात्	215
द्रुतादिषु चोक्तम्	244
द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्	217
द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्	243
द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्	421
द्रोणं पचत्याढकं पचतीति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाक:	384
द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्	468
द्वन्द्वप्रतिषेधश्च	280
द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन	520
द्वन्द्वे च विभाषा जसि	125
द्वन्द्वे च	267
द्वन्द्वेऽन्त्यस्य	200
द्वन्द्वेऽबहुषु लुग्वचनम्	578

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वयोः क्रिययोः कारकेन्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः 524
द्वयोर्द्वयोः समास इति चेन्न बहुषु द्वित्वाभावात् 440
द्विगुश्च 566
द्विगुसञ्ज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः 466
द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः 467
द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम् 453
द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य 482
द्वितीयाविधानेऽभितःपरितःसमयानिकषाऽध्यधिधिग्योगेषूपसंख्यानम् 526
द्विवचनबहुवचनविधिः 279
द्विवचनबहुवचनाप्रसिद्धिरेकार्थत्वात् 285
द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् 186
द्विर्वचनादयश्च प्रतिषेधे 178
द्विर्वचनादीनि च 184
द्विषः शतुर्वावचनम् 555
द्वेधाऽप्रतिपत्तिः 123
द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः 361
धर्मशास्त्रं च तथा 288
धर्मादिषूभयम् 518
धर्मान्नञः प्रयोजनम् 223
धातोश्चार्थाभेदात्प्रत्ययान्तरेषु 303
ध्माधेटोः नाडीमुष्टयोश्च 321
ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत 398
ध्वाङ्क्षेणेत्यर्थग्रहणम् 463
न चैकमनेकाधिकरणस्थं युगपत् 289
न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः 292
नञा तु समासप्रसङ्गः 587
नञोऽस्त्यर्थानां च 502
नञ्विशिष्टे समानप्रकृतिग्रहणम् 475
न तु तद्विशेषणैः 489
नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधः 452
नदीसञ्ज्ञायामाख्याग्रहणं स्त्रीविषयार्थम् 371
नदीह्रस्वत्वं सम्बुद्धिलोपस्य 118
नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसञ्ज्ञाभावः 356
न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः 232
नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिब्निवृत्त्यर्थम् 265

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात्	264
नभोङ्गिरोमनुषां वत्युपसंख्यानम्	379
न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे	202
नलोपो वृत्रहभिः	116
न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम्	148
न वाऽकर्मकस्योत्तरेण विधानात्	338
न वा ग्रहणविशेषणत्वात्	81
न वाऽज्विधेः	68
न वा ण्यन्तेऽन्यस्य कर्तृत्वात्	347
न वाऽतज्जातीयव्यवायात्	69
न वा तत्रापि दर्शनादप्रतिषेधः	541
न वा तादर्थ्यात्ताच्छब्द्यम्	256
न वाऽदर्शनस्य लोपसंज्ञित्वात्	193
न वाऽदर्शनस्याशक्यत्वादर्थगतिः साहचर्यात्	271
न वाऽऽद्यन्तवत्त्वात्	78
न वा द्युतादिभ्यो वावचनात्	349
न वाऽध्रौव्यस्याविवक्षितत्वात्	387
न वानन्तरस्य प्रतिषेधात्	330
न वाऽनभिधानादसमानाधिकरणेषु समाससञ्ज्ञाभावः	502
न वानभिहितत्वात् सामान्याभिधाने हि विशेषानभिधानम्	500
न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके	322
न वानिष्टादर्शनात्	516
न वानुदेशिकस्य प्रतिषेधादितरेण भावः	160
न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः	148
न वाऽन्त्यविकारवचनानर्थक्यात्	568
न वाऽन्यतरेणानभिधानात् (अनभिहिते हि विधानम्)	524
न वाऽन्यस्यानेकत्वात्	557
न वा पदस्यार्थे प्रयोगात्	281
न वाऽपायस्याविवक्षितत्वात्	383
न वा पूर्वेण कृतत्वात्	410
न वा पृथक्सञ्ज्ञाकरणात्	193
न वा प्रतिषेधवचनं ज्ञापकं परभावस्य	519
न वा प्रत्ययेन नित्यसम्बन्धात् केवलस्याप्रयोगः	261
न वा प्रयोगाभावात्	336
न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात्	122

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	**पृष्ठाङ्काः**
न वा बहिरङ्गलक्षणत्वात्	138
न वा यक्चिणोः प्रतिषेधात्	346
न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः	419
न वा लिङ्गाभावात्	265
न वा वचनप्रामाण्यात्	439
न वावयवतत्पुरुषत्वात्	441
न वाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथाऽन्यत्र	88
न वार्थविप्रतिषेधाद्युगपद्वचनाभावः	280
न वा वाक्यार्थत्वात्	546
न वा विधिपूर्वकत्वात् प्रतिषेधसम्प्रत्ययो यथा लोके	121
न वाऽव्ययत्वात्	504
न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिः	210
न वा शाटकयुगाद्यर्थम्	110
न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वस्य प्रसिद्धिः	472
न वा षष्ठीसमासाभावादुपपदसमासः	496
न वा संयोगस्यापूर्वविधित्वात्	176
न वा सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति	115
न वा समानयोगवचनात्	321
न वाऽसमासेऽदर्शनात्	459
न वा समाहारैकत्वात्	558
न वाऽसम्भवात्	356
न वा सवर्णदीर्घत्वस्यानवकाशत्वात्	364
न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात्	579
न वाऽसुजन्तत्वात्	507
न वा सुबन्तैकान्तत्वात्	445
न वा सेट्त्वस्याकिदाश्रयत्वादनिटि वा कित्त्वम्	240
न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च सञ्ज्ञा	385
न वा स्वातन्त्र्याद् इतरथा ह्यकुर्वत्यपि कारयतीति स्यात्	402
नवेतिविभाषायामर्थसञ्ज्ञाकरणम्	120
न वेत्थंभूतस्य लक्षणेनापृथग्भावात्	537
न वै एष लोके समप्रत्ययः	297
नवैकशेषनिर्देशात्	416
न वैकविभक्तित्वात्	499
न वैकशेषप्रतिषेधार्थम् (पूर्वदीर्घार्थं च)	510
न वोच्चारणसामर्थ्यात्	314

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
न वोत्तरपदस्य कर्मप्रवचनीययोगात् समासात् पञ्चम्यभावः	588
न वोत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य	519
न वोभयेप्सितत्वात्	395
न सेडिति कृतेऽकित्त्वे	238
नाकुर्वतीति चेत्स्वतन्त्रः	402
नाधिकार इति चेदुक्तम्	323
नानार्थानामपि सरूपाणाम्	283
नाप्रतिषेधात्	120
नाप्रतिषेधात्	199
नाप्रतिषेधात्	257
नाप्रतिषेधात्	377
नाभावो यञि दीर्घत्वस्यामुना	116
नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु	28
नाव्ययीभावादत इति योगव्यवसानम्	588
निघातप्रसङ्गस्तु	590
नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदटो नित्यनिमित्तत्वादात्मनेपदाभावः (तस्मादुपसंख्यानम्)	340
नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम्	241
नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात्	37
निपातनात्सिद्धम्	564
निपातनात्स्यदादिषु	60
निपातस्यानर्थकस्य प्रातिपदिकत्वम्	263
निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्	538
निमित्तात्कर्मसंयोगे	542
निमित्तिस्वरबलीयस्त्वाद्वा	442
नियमः प्रकृतेषु वा	382
नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन	53
निरादयः क्रान्ताद्यर्थे पञ्चम्या	494
निर्दिष्टग्रहणमानन्तर्यार्थम्	206
निर्दिष्टलोपाद्वा	314
निर्देश्यमिति चेत् तृतीयार्थनिर्देशोऽपि	456
निर्वृत्तप्रतिपत्तौ निर्वृत्तिः	145
निष्ठानत्वमाख्याते	575
निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम्	519
निष्ठायामवधारणात्	238

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि **पृष्ठाङ्काः**

निष्ठासञ्ज्ञायां समानशब्दाप्रतिषेधः 99
नुडिडधिकेन च 475
नुम्लोपे स्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम् 60
नेतारावागच्छतं धारणिं रावणिं च ततः 172
नेति चेन्न विधिः 123
नैकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषे 288
नैकार्थ्यम् 285
नैकार्थ्यम् 512
नैकार्थ्यमिति चेदारम्भानर्थक्यम् 285
न्याय्यभावात्कल्पनं सञ्ज्ञादिषु 22
पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् 538
पञ्चम्या अम्प्रतिषेधार्थः 588
पथः संख्याव्ययादेः 566
पथिमथोः सर्वनामस्थाने लुकि 197
पदं भम् 358
पदविधौ समर्थवचनं वर्णाश्रये शास्त्र आनन्तर्यविज्ञानात् 437
पदसञ्ज्ञायामन्तग्रहणमन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् 377
पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च 223
पदार्थादन्यस्यानुपलब्धिरिति चेत् पदार्थाभिसम्बन्धस्योपलब्धिः(स्तस्मात्प्रतिषेधः) 259
पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात् 499
पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् 224
परः सन्निकर्षः संहिता चेदद्रुतायामसंहितम् 421
परमपि च्छन्दसि 445
परवचनात्सिद्धमिति चेन्नापवादत्वात् 135
परवचने सिति पदं भम् 356
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः 564
परवल्लिङ्गमिति शब्दशब्दार्थौ 565
परश्चासौ व्यवस्थया 173
परस्परव्यपेक्षां सामर्थ्यमेके 433
परस्परोपपदाच्च 331
परस्मैपदप्रतिषेधात्कृञादिषु विधानम् 349
परस्मैपदमात्मनेपदम् 359
परस्मैपदसञ्ज्ञा पुरुषसञ्ज्ञा 355
परस्य चोभयवाचित्वात् 298
परादावकारलोपौत्वपुक्प्रतिषेधश्चङ्युपधाह्रस्वत्वमिटो व्यवस्थाऽभ्यासलोपोऽ-
भ्यस्ततादिस्वरो दीर्घत्वं च 154

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
परादौ गुणवृद्ध्यौत्वदीर्घनलोपानुस्वारशीभावे नकारप्रतिषेधः	137
पराभावात्	38
परिभाषा	326
परिमाणग्रहणं च	301
परिमाणार्थं च	375
पर्यादयो ग्लानाद्यर्थे चतुर्थ्या	494
पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम्	561
पश्चात्स्रंस्यते ध्वंस्यते च	172
पाठात्पर्युदासः, पङ्क्तितानां सञ्ज्ञाकरणम्	103
पाठेन धातुसञ्ज्ञायां समानशब्दप्रतिषेधः	300
पात्रादिभ्यः प्रतिषेधः	567
पादिषु धेट उपसंख्यानम्	351
पारेमध्ये षष्ठ्या वावचनम् (अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने)	452
पित्करणं किमर्थमिति चेत्पर्यायार्थम्	312
पित्पर्यायवचनस्य च स्वाद्यर्थम्	211
पित्प्रतिषेधाद्वा	89
पुक् ह्रस्वत्वस्यादीदपत्	117
पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम्	53
पुण्यसुदिनाभ्यामह्नः	566
पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम्	275
पुनश्चनसौ छन्दसि	406
पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावादसंहितम् (एकवर्णवर्तित्वाद्वाचः, उच्चरितप्रध्वंसित्वाच्च वर्णानाम्)	422
पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः	571
पूङः क्त्वानिष्ठयोरिटि वाप्रसङ्गः सेट्प्रकरणात्	240
पूजायां च प्रतिषेधानर्थक्यम्	492
पूर्वत्रासिद्धे च	184
पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम्	267
पूर्वपदस्य च	564
पूर्वपदातिशये आतिशायिकाद् बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः	479
पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यम्	176
पूर्ववत्सन इति शदिम्रियत्यर्थम्	341
पूर्वशेषदर्शनाच्च	298
पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते	85
पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेद्दुपादिष्वप्रसिद्धिः	342

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
पूर्वादिष्ववरस्योपसंख्यानम्	457
पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च	138
पूर्वान्ते र्ववधारणं विसर्जनीयप्रतिषेधो यक्स्वरश्च	153
पूर्वोपदेशे कित्त्वक्सेड्विधयो झल्ग्रहणानि च	31
पूर्वोपदेशे कित्त्वप्रतिषेधो व्यलोपवचनं च	31
पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात्	278
पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसम्प्रसारणं सार्वधातुकचङादिषु	230
पृथगर्थानामेकार्थीभावः समर्थवचनम्	429
पृथगादिषु पञ्चमीविधानम्	540
पैलादिषु वचनात्सिद्धम्	254
प्रकरणे च सर्वसम्प्रत्ययार्थः	317
प्रकल्पकमिति चेन्नियमाभावः	208
प्रकृतिविकाराव्यवस्था च	208
प्रकृत्यर्थनियमेऽन्याभावः	327
प्रख्याविशेषात्	287
प्रचये समासप्रतिषेधः	434
प्रतिपदविधाना च	489
प्रतिपदविधानात्सिद्धम्	562
प्रतिषेधः पूर्वस्य च	338
प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात्	160
प्रतिषेधे तु पूर्वनिपातप्रसङ्गस्तस्माद्राजदन्तादिषु पाङ्गः	519
प्रतिषेधे भूतपूर्वस्योपसंख्यानम्	108
प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात्	109
प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्	181
प्रतिषेधे स्वस्नादिग्रहणं प्रयोजनम्	221
प्रतिषेधे हसादीनामुपसंख्यानम्	330
प्रतिषेध्यमिति चेत्कर्तर्यपि प्रतिषेधः	492
प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानम्	556
प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपम्	186
प्रत्ययग्रहणं चापञ्चम्याः	225
प्रत्ययग्रहणं णियगर्थम्	343
प्रत्ययग्रहणं पदादावप्रसङ्गार्थम्	375
प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य	192
प्रत्ययविधिरेकादेशात्	366
प्रत्ययादर्शनं तु लुमत्संज्ञम्	193

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
प्रत्ययार्थस्याऽव्यतिरेकात्प्रकृत्यन्तरेषु	302
प्रत्ययान्तनिपातने हि वृद्ध्यभावः	583
प्रत्ययावधारणाच्छेषवचनम्	548
प्रत्ययाश्रयत्वादन्यत्र सिद्धम्	60
प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम्	277
प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव	286
प्रत्यवयवं च वाक्यपरिसमाप्तेः	47
प्रत्यात्मवचनं च	146
प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात्	146
प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न	36
प्रथमभावग्रहणं च	305
प्रथममध्यमोत्तमसञ्ज्ञायामात्मनेपदग्रहणं समसंख्यार्थम्	416
प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात्	284
प्रथमलिङ्गग्रहणं च	371
प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात्प्रथमायाः समासे सञ्ज्ञाप्रसिद्धिः	255
प्रथमानुपपत्तिस्तु	530
प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्	398
प्रधाने कार्यसम्प्रत्ययाच्छेषः	296
प्रयोगे सर्वलोकस्य	11
प्रयोजनं क्विब्लुप्समासाः	371
प्रयोजनं क्सलोपः सलोपे	184
प्रयोजनं घञ् षत्वणत्वे	406
प्रयोजनं चक्षिङः ख्याञ्	573
प्रयोजनं ञिनिकिल्लुकि स्वराः	197
प्रयोजनं डतरादीनामद्ड्भावे	103
प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम्	189
प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः	258
प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः	375
प्रयोजनं महदप्स्वसृनप्तॄणां दीर्घविधौ	223
प्रयोजनं यणेकादेशेत्त्वोत्त्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः	363
प्रयोजनं समासतद्धितविधिस्वराः	376
प्रयोजनं सर्वनामाव्ययसञ्ज्ञायाम्	221
प्रयोजनं सौप्रख्येवुञ्विधिः	575
प्रयोजनं ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम्	115
प्रयोजनं ह्रस्वसञ्ज्ञां दीर्घप्लुतौ	358

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
प्रयोजनमतो लसार्वधातुकानुदात्तत्वे	207
प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धी दीर्घत्वेमडाट्श्नम्विधयः	195
प्रयोजनमव्यक्तानुकरणस्यात इतौ	203
प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु	357
प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु	223
प्रश्नाख्यानयोश्च	539
प्रश्लिष्टनिर्देशात्सिद्धम्	165
प्रश्लिष्टनिर्देशाद्वा	591
प्रसारणे च	58
प्रसिद्धो नियमस्तत्र	382
प्रहरणार्थेभ्यश्च	520
प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम्	270
प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः	410
प्राग्वचनं सञ्ज्ञाऽनिवृत्त्यर्थम्	404
प्राग्वचनं समाससञ्ज्ञाऽनिवृत्त्यर्थम्	446
प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणम्	558
प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते	310
प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात्	280
प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्ये उपसंख्यानमधिकत्वात्	546
प्रातिपदिकैकान्तस्तु सुब्लोपे	445
प्रादय इति योगविभागः (निपातसञ्ज्ञार्थः, एकयोगे हि निपातसञ्ज्ञाभावः)	405
प्रादयः क्तार्थे	493
प्रादयो गताद्यर्थे प्रथमया	494
प्रादिप्रसङ्गे कर्मप्रवचनीयप्रतिषेधः	493
प्रादिभ्यो धातुजस्य वा	502
प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः	216
प्राप्तादिषु चैकदेशिग्रहणात्सिद्धम्	565
प्राप्ते च	129
प्रैषेऽस्वतन्त्रप्रयोजकत्वाद्धेतुसञ्ज्ञाऽप्रसिद्धिः	403
प्रोक्तादयश्च तद्धिताः	13
प्लुतश्च विषये स्मृतः	238
प्लुतसञ्ज्ञा च	25
प्लुत्यादिष्वज्विधिः	25
बलिरक्षिताभ्यां चानर्थकं वचनम्	460

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
बहिरङ्गेण सिध्यति	173
बहुच्पूर्वस्य च	200
बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम्	561
बहुलं तणि	575
बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम्	474
बहुवचननिर्देशात्सिद्धम्	567
बहुव्रीहिः समानाधिकरणानाम्	502
बहुव्रीहौ चाग्रहणम्	98
बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्	518
बहुव्रीह्यर्थं तु	357
बहोरिष्ठादीनामादिलोपे	207
बह्वादीनामग्रहणम्	98
ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्याविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः	295
भक्षेरहिंसार्थस्य	401
भयनिर्गतजुगुप्सुभिः	462
भयभीतभीतिभीभिः	462
भवतीति चेदादेशप्रतिषेधः भवतीति चेन्न प्रतिषेधः	123
भवे च तद्धितः	13
भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणम्	556
भसञ्ज्ञाङीष्फगोरात्वेषु च सिद्धम्	194
भसञ्ज्ञायामुत्तरपदलोपे षषः प्रतिषेधः	378
भावलक्षणे सप्तमीविधाने अभावलक्षणे उपसंख्यानम्	543
भाववचने धातौ तदर्थप्रत्ययप्रतिषेधः	305
भाववचनो धातुः	304
भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न	424
भावो हि कार्याथोंऽनन्यार्थो लोपः	315
भुवद्वद्भ्यो धारयद्वद्भ्यः पदसञ्ज्ञा	378
भूयसि प्राग्वचनम्	323
भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः	307
भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते	300
भेदकत्वात्स्वरस्य	48
भेर्याघातवत्	217
भ्रातुश्च ज्यायसः	518
भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य	152
भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेशः	296

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात् सिद्धम्	296
मकारान्तत्वं च गतिसञ्ज्ञासन्नियुक्तम्	409
मघवन्वर्जम्	251
मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य	118
मत्वर्थे वा पूर्वस्य विधानात्	508
मनुष्यलुपि प्रतिषेधः	272
मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम्	211
मन्यकर्मणि प्रकृष्य कुत्सितग्रहणम्	534
मरुच्छब्दस्योपसंख्यानम्	406
मात्रगृह्यसञ्ज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः	79
मात्रार्थं वा कृतं भवेत्	269
मा वा पूर्वपदस्य भूत्	86
मित्सुटोरुपसंख्यानम्	374
मिदचोऽन्त्यात्परः	93
मिदचोऽन्त्यात्पर इति स्थानपरप्रत्ययापवादः	136
मृज्यर्थमिति चेद्योगविभागात्सिद्धम्	55
मेश्चाननुबन्धकस्याम्वचनम्	574
य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिः	149
यङ्लोपे यणियङुवङः	177
यङ्यक्क्यवलोपे प्रतिषेधः	60
यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम्	581
यञेकादेशदीर्घैत्त्वेषु प्रतिषेधः	266
यञेकादेशदीर्घैत्त्वेषु बहिरङ्गलक्षणत्त्वात्सिद्धम्	266
यणादेशाच्च	366
यणादेशादियुवौ	368
यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः	178
यतश्चाध्वकालनिर्माणम्	539
यत्तत्र तृणेन तत्परशोश्छेदनम्	384
यथार्थं वा षष्ठीनिर्देशः	208
यथा लौकिकवैदिकेषु	44
यथा लौकिकवैदिकेषु	9
यस्मिन्विधिस्तदादावल्ग्रहणे	225
यस्मिन्विधिस्तदादित्वे प्रयोजनम्	92
यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम्	530
यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्रोपसर्जनसञ्ज्ञाप्रसङ्गः	256

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	**पृष्ठाङ्काः**
याडापः	207
यावतिथोऽलनुबन्धस्तावतो योगानिति वचनात्सिद्धम्	323
यावतामभिधानं तावतां प्रयोगो न्याय्यः	286
यावतामभिधानं तावतां प्रयोगोन्याय्य इति चेदेकेनाप्यनेकस्याभिधानम्	286
युक्तार्थसम्प्रत्ययाच्च सामर्थ्यम्	459
युगपच्च देशपृथक्त्वदर्शनात्	20
युगपत्सम्भवो नास्ति	173
युवोरनाकौ	573
युष्मदस्मदोः स्थग्रहणात्	200
युष्मदस्मदोश्चादेशाः	321
युष्मदस्मच्छेषवचनं नियमार्थम्	418
युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन	418
येन विधिस्तदन्तत्वे प्रयोजनम्	93
येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः	219
योगविभागः	373
योगविभागात्सिद्धम्	558
योगविभागासिद्धम्	551
योगविभागात् सिद्धम्	189
योगविभागात् सिद्धम्	583
योगविभागाद्वा	378
योगशेषे च	155
योगाभावाच्चान्यस्य	271
योगे प्रतिषेधश्चादिभिः	436
य्वोरन्यत्र परेणेण् स्यात्	40
रकि ज्यः सम्प्रसारणम्	60
रथसीताहलेभ्यो यद्विधौ प्रयोजनम्	222
रलः क्त्वासनोः कित्त्वम्	241
रवत्प्रतिषेधाच्च	24
राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात्	436
रायात्वप्रतिषेधश्च	179
रीश्वराद्वीश्वरान्मा भूत्	404
रुदादिभ्यः सार्वधातुके	207
रुविधिः पुंख्याने	575
रूपान्यत्वाच्च	162
रूपसामान्याद्वा	21

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
रेण तुल्यं सुधीवनि	239
रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः	31
रोण्या अण्	222
रोपधेतोः पथिदूतयोः	320
लकारस्य कृत्त्वात् प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम्	586
लकारस्य ङित्त्वादादेशेषु स्थानिवत्प्रसङ्गः	64
लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम्	64
लकारस्यानुबन्धाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः	310
लक्ष्यलक्षणे व्याकरणम्	14
लघु गुरु	358
लघ्वक्षरम्	518
लटः शतृशानचौ	573
लविधानाद्विहितम्	325
लादेशे परस्मैपदग्रहणं पुरुषबाधितत्वात्(दिह वचने हि सञ्ज्ञाबाधनम्)	415
लादेशे सल्लिड्ग्रहणं किकिनोः प्रतिषेधार्थम्	554
लादेशो वर्णविधेः	366
लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात्	290
लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात्	290
लिङ्गार्था तु प्रत्यापत्तिः	15
लिङ्गेन वा	44
लीभियोः प्रश्लिष्टनिर्देशात्सिद्धम्	166
लुकि चाऽग्रहणम्	97
लुक्प्रतिषेधे वृद्ध्यर्थम्	583
लुक्युपसंख्यानम्	192
लुक्लोपयणयवायावेकादेशेभ्यः	368
लुगादेशापवादः	586
लुङि सिजादिदर्शनात्	100
लुमति प्रतिषेधाद्वा	193
लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम्	197
लुमति प्रत्ययग्रहणमप्रत्ययसञ्ज्ञाप्रतिषेधार्थम्	189
लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते	270
लुप्ताख्यातेषु च	440
लुप्तेऽर्थग्रहणाद्भवेत्	85
ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः	22
लोकतः	121

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि पृष्ठाङ्काः

लोकतः	8
लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः	8
लोडादेशे शाभावजभावधित्वहिलोपैत्त्वप्रतिषेधः	166
लोपश्च बलवत्तरः	36
लोपसञ्ज्ञायामर्थसतोरुक्तम्	188
लोपे हि विधानम्	192
लौकिकं चातिवर्तते	404
वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये	270
वचनप्रामाण्यादिति चेद् नानाकारकाणां प्रतिषेधः	458
वचनप्रामाण्यादिति चेत् फङ्निवृत्त्यर्थं वचनम्	254
वचनाद्यत्र तन्नास्ति	214
वचनाद्यत्र दीर्घत्वम्	85
वचनार्थो हि सिद्धे	80
वद्विधिनस्भावाबीत्त्वस्वाङ्गादिस्वरणत्वेषु दोषः	407
वद्विधिनस्भावाबीत्त्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम्	407
वध्यादेशे वृद्धितत्त्वप्रतिषेधः	165
वरेयलोपस्वरवर्जम्	184
वर्जने प्रतिषेधः	575
वर्णकालभूयस्त्वं तु	421
वर्णग्रहणं च सर्वत्र	224
वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते	42
वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः	213
वर्णं वाऽऽहुः पूर्वसूत्रे	41
वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्	35
वर्णव्यत्यये चार्थान्तरगमनात्	34
वर्णसञ्ज्ञा चेन्निर्वृत्तिः	132
वर्णस्यार्थवदनर्थकत्वे उक्तम्	262
वर्णानामानुपूर्व्येण	518
वर्णानुपलब्धौ चानर्थगतेः	34
वर्णेन तृतीयासमास एतत्प्रतिषेधे वर्णग्रहणम्	476
वर्णैकदेशा वर्णग्रहणेन चेत्सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः	27
वर्णोऽन्त्यो वाऽवसानम्	425
वलादेरार्धधातुकस्येट् प्रयोजनम्	92
वसेरश्यर्थस्य प्रतिषेधः	394
वस्वर्थम्	239

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
वहेरनियन्तृकर्तृकस्य	401
वाक्यप्रतिषेधोर्थवत्त्वात्	259
वाक्यादौ च द्वेद्वे	251
वाक्यापरिसमाप्तेर्वा	75
वा नामधेयस्य	227
वा नामधेयस्य	252
वाप्रकरणे तीयस्य ङित्सूपसंख्यानम्	111
वा प्रियस्य	519
वाबन्त:	566
वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनात्	389
वा लिप्सायाम्	334
वावचनानर्थक्यं च स्वभावसिद्धत्वात्	431
विकरणव्यवहितत्वात्तु नियमाप्राप्ति:	325
विकरणेभ्य: प्रतिषेध:	324
विकृति: प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम्	460
विग्रहे च युगपद्वचनं ज्ञापकं युगपद्वचनस्य	512
विधिप्रतिषेधयोर्युगपद्वचनानुपपत्ति:	123
विध्यनित्यत्वमनुपपन्नं प्रतिषेधसञ्ज्ञाकरणात्	122
विनाशे प्रादुर्भावे च सर्वं तथा स्यात्	290
विपराभ्यामित्युपसर्गग्रहणम्	331
विप्रतिषिद्धं तु	122
विप्रतिषिद्धेषु चानुपपत्ति:	511
विप्रतिषेधात् सिद्धम्	217
विप्रतिषेधाद्वा	80
विप्रतिषेधाद्वा प्रथमाभाव:	525
विप्रतिषेधे परमङ्गाधिकारे पूर्वम्	362
विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसञ्ज्ञात्वस्य	132
विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेध:	208
विभक्तौ तवर्गप्रतिषेधोऽतद्धिते	311
विभक्त्यर्थाभिधानेद्रव्यस्य लिङ्गसंख्योपचारानुपपत्ति:	500
विभाषाग्रेप्रथमपूर्वेषु	127
विभाषा विप्रलापे	129
विभाषा वृक्षमृगादीनाम्	126
विभाषा श्वे:	131
विभाषा सङ्घुषास्वनाम्	131

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
विभाषेति योगविभागः	450
विभाषोपपदेन प्रतीयमाने	129
विभाषोपयमने	126
विरामे विरामवचनम्	423
विरामे विरामवचनम्	424
विशिष्टा वा षष्ठी स्थानेयोगा	141
विषयार्थं पुनर्वचनम्	58
विषयेण तु नानालिङ्गकरणात्सिद्धम्	19
विशेषणविशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुपसर्जनाप्रसिद्धिः	473
विशेषणानां वचनं जातिनिवृत्त्यर्थम्	271
वृत्ताद्वा	316
वृत्तिपृथक्त्वं तु नोपपद्यते	215
वृत्तिसमवायार्थ उपदेशः	14
वृद्धसञ्ज्ञायामजसंनिवेशादनादित्वम्	226
वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम्	52
वृद्धिग्रहणमुत्तरार्थम्	55
वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात्	55
वृद्धिविधौ च धातुग्रहणानर्थक्यम्	407
वृषण्वस्वश्वयोश्च	379
वेशोयशआदेर्भगाद्यत्खौ	320
वैरूप्यविग्रहौ द्रव्यभेदात्	293
व्यञ्जनस्याऽविद्यमानत्वं यथान्यत्र	226
व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः	146
व्यथेषु च सामान्यात्सिद्धम्	293
व्यर्थेषु च मुक्तसंशयम्	290
व्यवेतप्रतिषेधश्च	493
शचङन्तस्यान्तरङ्गलक्षणत्वात्	63
शतृशानचोश्च निमित्तभावात्तिङोभावस्तयोरपवादत्वात्	547
शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः	338
शप उपलम्भने	333
शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम्	400
शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधः	400
शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानम्	512
शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमिति चेद्द्विववचनबहुवचनानुपपत्तिः	512
शब्दसञ्ज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात्	210

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
शब्दसञ्ज्ञायां ह्यर्थासम्प्रत्ययो यथान्यत्र	120
शब्दाप्रतिपत्तिः	13
शब्दाविरामे प्रतिवर्णमवसानम्	422
शब्देनार्थगतेरर्थस्यासम्भवात्तद्वाचिनः सञ्ज्ञाप्रतिषेधार्थं स्वंरूपवचनम्	210
शब्दे ल्युडर्थः	13
शर्षु जश्भावषत्वे	32
शानंश्चानश्शतृणामुपसंख्यानम्	555
शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन	12
शिक्षेर्जिज्ञासायाम्	332
शित्करणं सर्वदेशार्थम्	568
शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिः	307
शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः	119
शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात्	400
शेऽर्थवद्ग्रहणात्	82
शेषवचनं च	328
शेषवचनं च घिसञ्ज्ञानिवृत्त्यर्थम्	356
शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधः	348
शेषवचनं पदतश्चेन्नाभावात्	497
शेषविज्ञानात्सिद्धम्	553
शेषे विभाषा	553
शौण्डादिभिः	463
श्नम्बहुजकक्षु नानादेशत्वाद् उत्सर्गाप्रतिषेधः	521
श्रच्छब्दस्योपसंख्यानम्	406
श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात्	453
श्रितादिषु गमिगाम्यादीनामुपसंख्यानम्	453
श्रेण्यादिषु च्व्यर्थवचनम्	474
श्वादेरिञि, पदान्तस्यान्यतरस्याम्	128
श्वेः सम्प्रसारणपूर्वत्वं यणादेशात्	366
श्वोभूते शातनीं पातनीं च	172
षट्सञ्ज्ञायामुपदेशवचनम्	98
षत्वे चाऽऽदेशसम्प्रत्ययार्थम्	91
षष्ठीनिर्देशार्थं तु	190
षष्ठीप्रसङ्गश्च	549
षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः	548
षष्ठीसमासश्च युक्तपूर्णान्तः	458

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
षष्ठीसमासादुपपदसमासो विप्रतिषेधेन	496
षष्ठ्यन्तयोः समासेऽर्थाभेदात् प्रधानस्यापूर्वनिपातः	516
षष्ठ्यन्तयोश्चोपसर्जनत्वे उक्तम्	256
षष्ठ्यर्थे चतुर्थी	551
षष्ठ्याः स्थानेयोगत्वादिङ्निवृत्तिः	58
षष्ठ्याः स्थानेयोगवचनं नियमार्थम्	140
संयोगसञ्ज्ञायां सहवचनं यथान्यत्र	66
संस्त्यानप्रसवौ लिङ्गम्	291
संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान्	291
संहितावसानयोर्लोकविदितत्वात् सिद्धम्	425
सक्रियाविशेषणं च	435
सङ्ख्या	360
सङ्ख्याप्रयोगे प्रतिषेधः	273
सङ्ख्याया अर्थसम्प्रत्ययादन्यपदार्थत्वाच्चानेकशेषः	283
सङ्ख्याया अल्पीयसः	518
सङ्ख्यासञ्ज्ञायां संख्याग्रहणं संख्यासम्प्रत्ययार्थम्	94
सङ्ख्यासमासे सुजन्तत्वात्संख्याप्रसिद्धिः	507
सङ्ख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः	317
सङ्घातस्यैकार्थ्यात्सुबभावो वर्णात्	35
सङ्घातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः	433
सङ्घातार्थवत्त्वाच्च	34
सङ्घातार्थवत्त्वाच्चेति चेद् दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः	262
सङ्घातेनार्थगतेः	302
सङ्घादिष्वञ्प्रभृतयः	320
सञ्ज्ञः कृत्प्रयोगे षष्ठी विप्रतिषेधेन	537
सञ्ज्ञया विधाने नियमः	51
सञ्ज्ञया विधाने नियमः	246
सञ्ज्ञाकरणे क्ङिद्ग्रहणेऽसम्प्रत्ययः शब्दभेदात्	229
सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थः	43
सञ्ज्ञानियमे सिद्धम्	410
सञ्ज्ञासञ्ज्ञ्यसन्देहश्च	44
सञ्ज्ञासमासनिर्देशः पृथग्विभक्तिसंज्ञ्यनुच्चारणार्थः	317
सञ्ज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम्	317
सञ्ज्ञोपसर्जनप्रतिषेधः	102

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
सतो निमित्ताभावात्पदसञ्ज्ञाऽभावः	194
सतो वृद्ध्यादिषु सञ्ज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः	46
सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम्	90
सत्याश्रये विधिरिष्टः	159
सनि झल्ग्रहणं विदुः	238
सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम्	25
सपूर्वायाः प्रथमाया विभाषा	128
सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः	209
सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्	542
सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम्	589
सप्तम्या चेत्प्रकृतेः प्रतिषेधः	348
सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम्	519
सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य	79
सप्तम्युपमानपूर्व(पद)स्योत्तरपदलोपश्च	502
समः क्ष्णुवः सकर्मकार्थम्	345
समर्थतराणां वा	434
समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानमसमर्थत्वात्	436
समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशानर्थक्यम्	437
समानवाक्ये निघातयुष्मदस्मदादेशाः	436
समानशब्दप्रतिषेधः	88
समानशब्दप्रतिषेधः	121
समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्	88
समानाधिकरणत्वात्सिद्धम्	272
समानाधिकरणसमासाद् बहुव्रीहिः	478
समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन	477
समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च	481
समानाधिकरणे द्विर्वर्णग्रहणम्	477
समानाधिकरणेषूपसंख्यानमसमर्थत्वात् (द्रव्यं पदार्थ इति चेत्)	438
समायानिकषाहायोगेषूपसंख्यानम्	526
समास इति चेत्स्वरसमासान्तेषु दोषः	278
समास उत्तरपदस्य बहुवचनस्य लुपः	271
समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः	360
समासग्रहण उक्तम्	264
समासतद्धितविधाविति चेदन्यत्र समाससञ्ज्ञाभावः	466
समासप्रत्ययविधौ प्रतिषेधः	219

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
समाससञ्ज्ञाश्च	359
समासादन्यल्लिङ्गमिति चेदश्ववडवयोष्टब्लुग्वचनम्	564
समासान्तप्रतिषेधश्च	441
समासेष्वव्ययीभावः	404
समासो द्वयोर्द्वयोश्चेद् द्वन्द्वेनेकग्रहणम्	440
समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थम्	557
समाहारसमूहयोरविशेषात्समाहारग्रहणानर्थक्यं तद्धितार्थेन कृतत्वात्	467
समाहारोऽचोश्चेन्नाभावात्	247
समुदायविकारषष्ठ्याश्च	502
समुदायसामर्थ्याद्वा सिद्धम्	435
समुदायात्सिद्धम्	512
समुदायात्सिद्धमिति चेन्नैकार्थत्वात्समुदायस्य	512
समुदाये संयोगादिलोपो मस्जेः	67
समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं यथा लोके	259
सम्प्रत्ययाच्च तदर्थाध्यवसानम् (सम्प्रतीयमानार्थलोपे ह्यनवस्था)	459
सम्प्रयोगो वा नष्टाश्वदग्धरथवत्	148
सम्प्रसारणसञ्ज्ञायां वाक्यस्य सञ्ज्ञा चेद्वर्णविधिः	132
सम्बन्धिशब्दैर्वा तुल्यम्	73
सम्बन्धिशब्दैर्वा तुल्यम्	218
समोऽकूजने	332
समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम्	335
सर्वत्र मत्वर्थे प्रतिषेधः	469
सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः	229
सर्वत्रापत्यादिषूपसंख्यानम्	282
सर्वनामसञ्ज्ञायां निपातनाण्णत्वाभावः	101
सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात्	188
सर्वलिङ्गता च	460
सर्वविभक्तिर्ह्यविशेषात्	112
सर्वादेशप्रसङ्गश्चानिगन्तस्य	52
सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात्	148
सर्वादेशार्थं वा वचनप्रामाण्यात्	191
सर्वाद्यानन्तर्यकार्यार्थम्	103
सर्वामन्त्रितसिज्लुक्स्वरवर्जम्	197
सर्वे देशान्तरे	10
सवर्णसञ्ज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्	72

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्	214
सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वम्	215
सवर्णेऽण् तपरं ह्युत्रर्द्दत्	40
सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न	428
सस्थानत्वं नम: ख्यात्रे	575
सहयुक्ते तृतीया स्याद् व्यतिहारे तङो विधि:	337
सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्ते: कारकविभक्तिर्बलीयस्त्वादन्यत्रापि	536
सहवचनं पृथगसमासार्थम्	447
सहविवक्षायामेकशेष:	282
साक्षात्प्रभृतिषु च्व्यर्थवचनम्	409
साधनं कृतेति वा पादहारकाद्यर्थम्	458
साध्वनुशासनेऽस्मिन् शास्त्रे यस्य विभाषा तस्य साधुत्वम्	123
साध्वसाधुप्रयोगे च	542
सामर्थ्याद्धि पुनर्भाव्यम्	234
सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम्	298
सामान्यातिदेशे हि विशेषानतिदेश:	159
सामान्याश्रयत्वाद्विशेषस्यानाश्रय:	570
सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्ग:	570
सिचि जुसोऽप्रसङ्ग आकारप्रकरणात्	200
सिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य	415
सित्तद्विशेषाणां वृक्षाद्यर्थम्	211
सिद्धं तु कालकर्मणामकर्मकवद्वचनात्	401
सिद्धं तु कालपरिमाणं यस्य स कालस्तेन	485
सिद्धं तु क्तेन विसमाप्तावनञ्	476
सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात्	493
सिद्धं तु णलादीनां ग्रहणप्रतिषेधात्	314
सिद्धं तु तदन्तान्तवचनात्	220
सिद्धं तु तदाद्यादिवचनात्	374
सिद्धं तु तपरनिर्देशात्	243
सिद्धं तु द्विग्वर्थस्यैकवद्वचनात्	557
सिद्धं तु नित्यशब्दत्वात्	47
सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्यय:	305
सिद्धं तु पदसामानाधिकरण्यात्	255
सिद्धं तु पाठात्	113
सिद्धं तु पूर्वस्य कार्यातिदेशात्	230

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
सिद्धं तु पूर्वस्य लिङ्गातिदेशात्	342
सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात्	123
सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः	384
सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात्	375
सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात्	578
सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात्	466
सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात्	188
सिद्धं तु प्रसङ्गे रपरत्वात्	150
सिद्धं तु प्रसज्यप्रतिषेधात्	122
सिद्धं तु प्रसज्यप्रतिषेधात्	229
सिद्धं तु प्रादीनां क्तार्थे तत्पुरुषवचनात्	358
सिद्धं तु भावप्रवृत्तौ यस्य भावारम्भवचनात्	543
सिद्धं तु यथा गुणचनेषु	500
सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात्	162
सिद्धं तु यस्य विधौ तं प्रतीति वचनात्	256
सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात्	511
सिद्धं तु युष्मदस्मदोः प्रतिषेधात्	418
सिद्धं तु राजविशिष्टाया गोः क्षीरेण सामर्थ्यात्	437
सिद्धं तु लकारनिर्देशात्	310
सिद्धं तु लडादीनामात्मनेपदवचनात्	339
सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्	219
सिद्धं तु व्यवसितपाठात्	316
सिद्धं तु व्यवसितान्त्यत्वात्	309
सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात्	164
सिद्धं तु षष्ठ्यधिकारे वचनात्	135
सिद्धं तु षष्ठ्यधिकारे वचनात्	58
सिद्धं तु समर्थानामिति वचनात्	437
सिद्धं तु समसंख्यत्वात्	242
सिद्धं तु समासविधाने वचनात्	256
सिद्धं तु समानप्रक्रमवचनात्	247
सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च	458
सिद्धं तु समानार्थानामेकशेषवचनात्	283
सिद्धं तु सार्वधातुके प्रतिषेधात्	571
सिद्धं तु स्थानिसञ्ज्ञानुदेशादान्यभाव्यस्य	194
सिद्धं तूपदेशनेऽनुनासिकवचनात्	308

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
सिद्धं तूभयनिर्देशात्	348
सिद्धं तूभयान्तर्यात्	149
सिद्धं त्वङ्गरूपग्रहणाद् यस्याङ्गस्येयुवौ तत्प्रतिषेधात्	372
सिद्धं त्वच्समुदायस्याभावात्तद्गुणसम्प्रत्ययः	248
सिद्धं त्वतस्मिन् णाविति वचनात्	350
सिद्धं त्वधिकान्ता संख्या संख्यया समानाधिकरणाधिकारेऽधिकलोपश्च	515
सिद्धं त्वन्वयव्यतिरेकाभ्याम्	261
सिद्धं त्वपवादन्यायेन	315
सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते	217
सिद्धं त्वसम्प्राप्तवचनात्	532
सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात्	218
सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्	72
सिद्धं वाप्यन्यकर्मणः	398
सिद्धमचः स्थानिवत्त्वात्	378
सिद्धमजाकृतिनिर्देशात्	226
सिद्धमनच्त्वात्	75
सिद्धमनुबन्धस्याऽनेकान्तत्वात्	89
सिद्धमलोऽन्त्यविकारात्	591
सिद्धमेङः सस्थानत्वात्	139
सिद्धविपर्यासश्च	100
सिद्धे शब्दार्थसम्बन्धे	6
सिन्ध्वपकराभ्यां कन् अणञौ च	321
सुत्यापराणामन्तः	251
सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु	407
सुपां कर्मादयोप्यर्थाः संख्या चैव, तथा तिङाम्	381
सुप्तिङामविशेषेण विधानाद् दृष्टविप्रयोगाच्च नियमार्थं वचनम्	381
सुबधिकारेऽस्तिक्षीरादिवचनम्	504
सुबन्तत्वात्सिद्धम्	586
सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात्स्वरेऽवधारणाच्च	444
सुब्रह्मण्यायामोकार उदात्तः	251
सुब्लोपे च प्रत्ययलक्षणत्वात्	264
सुसर्वार्धदिक्छब्देभ्यो जनपदस्य प्रयोजनम्	223
सूच्याद्यर्थमथापि वा	269
सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः	12
सृजभावोऽभिहितार्थत्वात् समासे	507

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	पृष्ठाङ्काः
स्तोष्याम्यहं पादिकमौदवाहिं ततः	172
स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गस्तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्	143
स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्	18
स्थानेऽन्तरतमे निर्वर्तके सर्वस्थानिनिवृत्तिः	145
स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद् गुरुपुत्र इति यथा	158
स्थूलादीनां यणादिलोपेऽवादेशः	177
स्थेणोः	559
स्यान्तस्योपोत्तमं च	252
स्वतन्त्रत्वात्सिद्धम्	403
स्वतन्त्रत्वात्सिद्धमिति चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धम्	403
स्वतन्त्रस्य कर्तृसञ्ज्ञायां हेतुमत्युपसंख्यानमस्वतन्त्रत्वात्	402
स्वती पूजायाम्	493
स्वरः कृदन्तप्रकृतिस्वरत्वात्	586
स्वरभिन्नानां यस्योत्तरः स्वरविधिः	283
स्वराद्यन्तोपसृष्टात्	344
स्वराद्युपसृष्टात्	344
स्वरानन्तर्हितवचनम्	69
स्वरानुबन्धज्ञापनाय च	307
स्वरितपरसन्नतरार्थं च	250
स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम्	249
स्वरितात्संहितायामनुदात्तानामिति चेद् द्व्येकयोरैकश्रुत्यवचनम्	252
स्वरितोदात्ताच्चास्वरितार्थम्	250
स्वरितोदात्तार्थं च	249
स्वरेऽवधारणं सुबलोपार्थम्	445
स्वरे च वस्वादेशे	167
स्वरे विप्रतिषेधात्सिद्धम्	591
स्वरो लोपात्	366
स्ववचनात्तु सिद्धम्	531
स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानात्	534
स्वाङ्गकर्मकाच्च	332
हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम्	30
हन्तेर्घत्वम्	178
हरतेर्गतताच्छील्ये	333

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्त्तिकाणि	**पृष्ठाङ्काः**
हरीतक्यादिषु व्यक्तिः	272
हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम्	281
हरिवह्योरप्रतिषेधः	330
हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः	177
हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात्	309
हलो यमां यमि लोपे प्रयोजनम्	184
हलोः संयोग इति चेद् द्विर्वचनम्	68
हविषोऽप्रस्थितस्य	550
हितयोगे च	534
हृक्रोर्वावचनेऽभिवादिदृशोरात्मनेपद उपसंख्यानम्	401
हृक्रोरन्यतरस्याम्	130
हृक्रोर्वावचनेऽभिवादिदृशोरात्मनेपद उपसंख्यानम्	401
हेत्वर्थं तु वचनम्	412
ह्रस्वता हि विधीयते	269
ह्रस्वसम्प्रत्ययादिति चेदुच्चार्यमाणशब्दसम्प्रत्यायकत्वाच्छब्दस्यावचनम्	213
ह्रस्वादिविधिरलोन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिह निगमिदीर्घेष्वज्ग्रहणम्	245
ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात्	242
ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोऽस्तु।	37
ह्रस्वार्थम्	234
ह्रस्वेयुव्स्थानप्रवृत्तौ स्त्रीवचने	372
ह्रस्वेयुव्स्थानप्रवृत्तौ च स्त्रीवचने	372
ह्रादाविरामे स्पर्शाघोषसंयोगेऽसन्निधानादसंहितम्	422
ह्व आकारलोपात्	366

●

पुस्तकालय
147341

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R
400
मिश्र-व

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या.............. आगत संख्या 147341

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा ।

147341

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar